श्रीव्यासतीर्थ विरचिता

तात्पर्य चन्द्रिका

(श्री जयतीर्थविरचित तत्त्वप्रकाशिकायाः व्याख्यानरूपा)

श्रीराघवेन्द्र तीर्थविरचित प्रकाशिकया

पाण्डुरङ्गि केशवाचार्यविरचित भावदीपिकया च सहिता

प्रथमं सम्पुटम्

Edited by

Prof. K.T. Pandurangi

Former Prof. of Sanskrit, Bangalore University

Hon. Director of Dvaita Vedanta Studies & Research Foundation, Bangalore.

This volume is published with the grant from Govt. of India, Ministry of Human Resources Development, Dept. of Education under the Central Plan Scheme- Development of Sanskrit Education

Published by

Dvaita Vedanta Studies and Research Foundation

No.33/163, 10th B Main Road, I Block, Jayanagar, Bangalore

Year 2000

Tātparya Chandṛikā of Śrī Vyāsatīrtha a commentary on Tattvaprakāśikā of Śrī Jayatīrtha with the commentaries Prakāśikā of Śrī Raghavendra tīrtha and Bhāvadīpikā of Śrī Pāndurangi Keshavāchārya. Edited by Prof. K.T. Pandurangi, Published by Dvaita Vedanta Studies and Research Foundation, No.33/163, 10th B Main Road, I Block, Jayanagar, Bangalore-560 011.

Pages :

© : The editor

Year of Publication : 2000

Price : Rs.300

Printed at : **Vāgartha,** 149, 8th Cross, N.R. Colony, Bangalore-19. Ph.: 652 76 77

Preface

Tātparyachandrikā of Śrī Vyāsatīrtha is a major work of Dvaita Vedanta. It is a detailed commentary on Tatvaprakāśikā of Śrī Jayatīrtha. It gives a critical exposition of Pūrvapakṣa and Siddhānta of each adhikaraṇa of Brahmasūtra according to Śrī Madhvāchārya's Bhāṣya. It reviews the formulation of the same according to Śrī Śaṅkarabhāṣya and Śrī Rāmānuja bhāṣya. It makes a comparative and critical evaluation of the three Bhāṣyas.

Within the Dvaita tradition, the relevance of the observations in Anuvyākhyāna. Nyāyavivaraṇa, Tatvaprakāśikā and Nyāyasudhā and their supplementing and supporting each other is eruditely explained. It is a commentary on the four works of Śrī Madhvāchārya on Brahmasūtras viz Bhāṣya, Aṇubhāṣya, Anuvyākhyāna, Nyāyavivaraṇa and Śrī Jayatīrtha's commentaries on these works.

A special feature of this work is that the Pūrvamīmānsā nyāyas are utilised to interpret the sūtra and śruti. About sixty Pūrvamīmānsā nyāyā's are utilised.

There are two well known commentaries on this work viz. Prakāśikā of Śrī Raghavendra Tīrtha and Bhāvadīpikā of Pandurangi Keshavāchārya. The latter is also known as Gururājiya. These commentaries explain each observation of Chandrikā with appropriate introductory remarks bringing out the purpose and the significance of each observation. Brief observations of Chandrikā are elaborated and elaborate remarks are summarised. The full text of Pūrvamīmānsā nyāyas quoted in Chandrikā is given and the manner in which each nyāya is utilised is explained. This helps the scholars who are not quite familiar with Pūrvamīmānsā.

It is planned to publish this work in three volumes. The first volume contains the 1st Pāda of the first chapter.

Prof. Pandurangi has edited this work with the help of three rare manuscripts procured from the library of Sri Uttarādi Mutha and his own collection. He has added a detailed introduction in English which gives a critical exposition. This will help the modern scholars to undertake further research.

We offer our praṇāmas to Sri Sri Satyatmatirtha Swamiji of Sri Uttarādi Mutha for providing the manuscripts. We thank Prof. Pandurangi for editing this valuable work.

Vidwan Krishnacharya Upadhyaya and Vidwan Ramakanta Joshi the traditional Research Fellows at the Foundation have assisted the editor. We record our appreciation of their hard work.

The Vāgartha Printers have printed it neatly. We thank them.

N. Narasimha Rau
Chairman
Dvaita Vedanta Studies and
Research Foundation

Introduction

Tātparya Chandrikā of Śrī Vyāsatīrtha is a major work of Dvaita Vedānta. It is a detailed commentary on Tattvaprakāśikā of Śrī Jayatīrtha which is a commentary on Brahmasūtra bhāṣya of Śrī Ānandatīrtha, more popularly known as Śrī Madhvāchārya. Brahmasūtras form the central text of Vedānta philosophy. The Vedānta doctrines enshrined in Veda, Upaniṣads, Pañcharātra and Itihāsa Purāṇa are codified and logically explained. It is presented in sūtra and adhikaraṇa forms with the arrangement of pūrvapakṣa and siddhānta. The passages from Veda and Upaniṣads are taken as Viṣayavākyas i.e. the statements of themes, and interpreted. This involves a two level presentation viz. i) Interpretation of the Viṣayavākyas ii) Logically consistent presentation of the theme.

A vast Vedānta literature has developed on the basis of these sūtras in the form of bhāṣya, commentaries on bhāṣya, sub-commentaries on these and independent polemical works i.e. vādagranthas. Different schools of Vedānta have taken shape. Among these, Advaita, Viśiṣṭādvaita and Dvaita of Śaṅkara, Rāmānuja and Madhva are prominent. Very distinguished scholars have written commentaries on the bhāṣya of the three founders of the schools. Vāchaspati miśra, Vedānta deśika and Jayatīrtha are the leading commentators of the three schools respectively. These commentaries are not merely explanatory. These are polemical works. These review the works of each other in respect of the interpretation of Upaniṣad passages referred by brahmasūtras and the doctrines developed. This has resulted in rich contribution to the science of interpretation and epistemology. It has also resulted in different world views based on deep investigation into the very nature of thought structure and the nature of the world structure brought into the field of thought structure. The debate carried on in these great commentaries is not a controversy of vested interests in this or that school of Vedānta but a serious effort to know mind and matter deeply.

There is an important difference between the systems like Nyāya, Sāmkhya, and Vedānta. While Nyāya and Sāmkhya develop their world view purely by logical analysis the Vedānta develops it through interpretation of the scripture. It means that they do not depend upon only contemporary minds and their limited logic but they take into account the reflections of the great minds of previous generations of even remote past. The debate on the interpretation of the Upaniṣadic passages is an attempt to know the reflections of the minds of earlier generations. The debate on the interpretation of Upaniṣad passages is not text torturing in favour of this or that school but a deeper investigation into the very relation between the language and thought in different contexts. These debates on interpretation not only apply the canons of interpretation to unearth the thought but also examine the language used in different

places in the same text and in the allied texts. By bringing about a harmony among these texts they arrive at the exact nature of the concepts, doctrines and the theme. The logical consistency, of course, is taken care of both linguistically and psychologically. It is a fascinating study to go through these debates on the interpretation of upaniṣadic passages and get an insight into upaniṣadic thought.

Tātparya Chandrikā of of Śrī Vyāsatīrtha has made rich contribution both in respect of the interpretation of upaniṣadic passages and the logical chiselling of the Vedānta doctrines, concepts and themes. Its contribution is two fold :

i) Within the tradition of Dvaita works the observations made in the four works of Śrī Madhvāchārya on brahmasūtras, the works of Trivikramapandita, Padmanābhatīrtha and Jayatīrtha are brought together and the theme of each adhikaraṇa is given a consolidated shape.

सूत्रे भाष्येऽनुभाष्ये च सन्न्यायविवृतौ तथा टीकासु च यदस्पष्टं तच्च स्पष्टीकरिष्यते ।

ii) The interpretation offered to upaniṣadic passages by the commentators on Śaṅkara bhāṣya viz Bhāmati and Vivaraṇa are reviewed and their formulation of pūrvapakṣa and siddhānta is examined. The interpretation offered by Rāmānuja bhāṣya and Śrutaprakāśikā is also reviewed.

In the presentation of Dvaita view as well as the views of Advaita and Viśiṣṭādvaita Chandrikā profusely utilises Pūrvamīmānsā nyāyas. A careful study of the utilisation of these nyāyas will convince the importance of vākya śāstra for understanding the upaniṣadic thought.

In a way Chandrikā is an interdisciplinary study of the three schools of Vedānta developing rich thought on linguistics, epistemology and the science of interpretation.

Tātparya Chandrikā

जिज्ञासादिकरणम् - Invocatory verses

Śrī Vyāsatīrtha commences his great work Tātparyachandrikā with an invocation that describes the supreme God with four attributes viz., (i) he is absolutely free from drawbacks, (ii) he has infinite auspicious attributes, (iii) he bestows bhakti, jñāna etc., on his devotees (iv) he bestows liberation. These four attributes summarise the themes of the four chapters of Brahmasūtras. These very attributes are stated in the invocation of Tattvaprakāśikā by Śrī Jayatīrtha. In a way it is a summary of the invocation made

by Śrī Jayatīrtha. However, there is a difference in the order of the attributes. The attribute i.e., absolutely free from drawbacks is second attribute in Tattvaprakāśikā while it is first in Tātparyachandrikā. As per the order of the themes of Brahmasūtras it should have been second. The change in the order is justified by the commentators on three grounds: (i) absence of drawbacks provides a ground for the attribute i.e., auspicious attributes. (ii) mention of the attribute i.e., free from the drawbacks removes the obstacles in the undertaking of composing of a work. (iii) by the prayer of God two goals are to be achieved a) removal of misery (b) attainment of bliss. The first is achieved by the mention of the attribute i.e., the absence of drawbacks and the second is achieved by the mention of auspicious attributes. Keeping the order of these results in mind the order of these two attributes is arranged.

After the prayer of supreme God, Vyāsatīrtha offers prayers to Śrī Vedavyāsa i.e., Bādarāyaṇa the author of the Brahmasūtras, Śrī Ānandatīrtha the author of the Bhāsya, Śrī Padmanābha tīrtha the first disciple of Śrī Ānandatīrtha and the first commentator on the Bhāṣya, Śrī Jayatīrtha the author of Tattvaprakāśikā an exhaustive commentary on Bhāṣya on which the Tātparya Chandrikā is a commentary, Śrī Brahmaṇyatīrtha his Aśrama Guru, Śrī Lakṣmī Nārāyaṇa muni i.e., Śrīpādarāja, his Vidyā Guru.

Before he proceeds to start his commentary, he explains the method adopted by him in his commentary. The salient features of his commentary are stated as under :

1. The points that are not explicitly stated in sūtras, Bhāṣya, Anuvyākhyāna, Nyāyavivaraṇa, Sannyāyaratnāvali, Tattvapradīpa, Tattvaprakāśika and Nyāyasudhā will be fully explained.

2. The untenability of pūrvapakṣa and siddhānta formulated by other Bhāṣyakāras, in the case of each adhikaraṇa, each sūtra will be clearly pointed out and the appropriateness of pūrvapakṣa and siddhānta formulated by Śrī Anandatīrtha will be affirmed.

3. Such portion only of the Bhāṣya and commentaries of other schools of Vedanta that especially deserves to be rejected will be quoted and the drawbacks in it will be pointed out as suggested in Śrī Madhvabhāṣya.

A careful reading of Tātparya Candrikā will make it clear that the above guidelines are fully followed throughout this work.

i) सूत्रे भाष्येऽनुभाष्ये च सन्न्यायविवृतौ तथा ।
टीकासु च यदस्पष्टं तच्च स्पष्टीकरिष्यते ॥
प्रतिसूत्रं प्रकाश्येते घटनाघटने मया ।
स्वीयान्यपक्षयोः सम्यग् विदाङ्कुर्वन्तु सूरयः ॥

परोक्तेदूष्य एवांशो मितैः शब्दैरनूद्यते ।
दूषणं चापि हनुमद् भाष्यसूचितमुच्यते ॥

While commenting on the invocatory verses of Tattvaprakāśikā, certain key words in these verses are explained. We may especially note the following.

(i) आनन्दादेः शुद्धत्वं नाम सान्तत्वसातिशयत्वादिरहितम् ।

(ii) लेपः - पुण्यपापसम्बन्धः (iii) श्रुतिमती- श्रवणमनने (iv) नियतध्यानम् - स्वयोग्योपासनम्, (v) ज्ञानम्– साक्षात्कारः, (vi) अमलम् - मुमुक्षूपास्यम् ।

The verse याञ्चामन्दर etc., is interpreted as explaining the आप्तिमूलत्व ground of प्रामाण्य of Brahmasūtras by pointing out वक्त्रानुकूल्य, श्रोत्रानुकूल्य and प्रसङ्गानुकूल्य. It is also stated that the very designation Brahmasūtra brings out श्रुतिमूलत्व and युक्तिमूलत्व grounds of प्रामाण्य. The interesting remarks of Śrī Jayatīrtha

गङ्गासङ्गेन नैर्मल्यं रथ्याद्भिः लभ्यते यथा ।
वाचो विशुद्धिसिद्ध्यर्थं सङ्गम्यन्ते गुरोर्गिरः ॥

'Just as stream waters that join river Gangā become holy, to make my words also worthy I join them with the bhāṣya words of my Guru Śrī Ānandatīrtha by way of this commentory.' This is stated to serve two purposes (i) my words will be joined to Bhāṣya words by way of explanation (ii) The remarks of Bhāṣyakāra himself in his four works on Brahmasūtra will be brought together.

(i) गुरोः गिरः मदीयया वाचा सङ्गम्यन्ते व्याख्यानव्याख्येय भावेन सम्बध्यन्ते इत्यर्थः ।

(ii) यद्वा गुरोः गिरः परस्परं सङ्गम्यन्ते सम्बद्धतया प्रकाश्यन्ते इत्यर्थः ।

Commenting on the word नारायण it is made clear that the import of this word is same as ब्रह्मन् and therefore नारायण is शास्त्रप्रतिपाद्य. This word is etymologically explained to indicate that the themes of the four chapters of Brahmasūtras are conveyed by this word. Two interesting grammatical points are also stated while explaining this word. These are (i) justification of न लोपाभाव (ii) justification of णत्व.

The definition of Sūtra is given in the Bhāṣya as

अल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखम् ।
अस्तोभमनवद्यं च सूत्रं सूत्र विदो विदुः ॥

This definition is explained clause by clause in Tattvaprakāśikā. This is supplemented here as under.

i) अल्पाक्षरत्वम् - यावदक्षरतां विना विवक्षितार्थासिद्धिः तदर्थप्रतिपादनाय ततोऽधिकाक्षरानुपादानम् ।

ii) बहुशाखानिर्णायकत्वम्–सद्व्याकरणादेरपि बहुशाखागतपदार्थनिर्णायकत्वात् न अव्याप्तिः ।

iii) व्यर्थाक्षरादिराहित्यम् - अर्थाप्रतिपादकत्वेपि स्तोभाक्षराणां ऋगक्षरव्याप्तगानभागपूरणायेव प्रयोजनानन्तराय अक्षराप्रयोगः ।

Formulation of Pūrvapakṣa and Siddhānta of Jijñāsādhikaraṇa in Bhāmati commentary by Vāchaspati Miśra

Pūrvapakṣa – The pratyagātmā i.e., jīvātmā, and Brahman are identical. The jīvātmā is known by the direct experience as 'aham'. Therefore there is no doubt about brahman. Hence, there is no subject matter for jijñāsā. Further, avidyānivṛtti i.e., removal of avidyā cannot be the prayojana i.e., the purpose, since, it is not removed even when ātman is known as stated above.

It cannot be claimed that the ātman that is known by the experience 'aham' is embodied gross ātman. The pure ātman stated in Vedānta text is yet to be known, because, the Vedānta texts are only meant for recitation and their import is not to be taken account of as it is oppossed to direct experience i.e. अहम्. Though the karmakāṇḍa portion conveys its import viz., Dharma, the Vedānta portion is meant only for recitation.

i) तत्र भा मत्युक्तमधिकरणम् – प्रत्यगात्मनः एव ब्रह्मत्वात् तस्य च अहमिति प्रकाशमानत्वेन असन्दिग्धत्वात् न विषयत्वम् ।

ii) नापि अविद्यानिवृत्तिः प्रयोजनम् । उक्तरीत्या आत्मनि भासमानेऽपि तदनिवृत्तेः

iii) वेदान्तानां प्रबलाहंप्रत्यय बाधितत्त्वेन जपमात्रोपयोगित्वेन अविवक्षितार्थत्वात् उपचरितार्थत्वाद्वा

iv) तथा च वेदान्तविचारो न आरब्धव्यः इति पूर्वपक्षः

Siddhānta – Vedānta texts do convey ātman i.e., brahman, who is of the nature jñāna, ānanda. This purport of Vedānta texts could be settled by the criteria of upakrama, upasamhāra etc. It is not justifiable to say that these texts do not convey any meaning and are meant only for recitation. As regards the opposition by pratyakṣa, the śruti texts are superior to pratyakṣa. Therefore, the pure Brahman conveyed by Vedānta has to be known and he is the subject matter for jijñāsa.

सिद्धान्तस्तु - वेदान्तवाक्यैः ज्ञानानान्दैकरसाद्वितीयोदासीनस्वभावः आत्मा उपक्रमादिभिः प्रतिपाद्यते । न च ईदृगात्मतत्त्वाभिदधति तत्पराणि सन्ति युक्तमुपचरितार्थानीति वक्तुम् । प्रत्यक्षं तु सम्भावितदोषम् अपैरुषेयेण निर्दोषेण आगमेन बाध्यते । तेन वेदान्तवेद्यः शुद्धो अहं प्रत्ययेन भातीति विषयादिसिद्धिः । (ता.चं.)

The review of Bhāmati view

Narrating the pūrvapakṣa and siddhānta formulated in Bhāmati as stated above, its drawbacks are pointed out as under:

The crucial point in Bhāmati's presentation is the statement 'शुद्धो न भाति' i.e. in the experience अहम् the pure Brahman is not comprehended. Therefore, there is a need to know him through Vedānta texts. This statement may mean one of the following positions.

i) आत्मस्वरूपे किञ्चिद् भाति किञ्चिद् न भाति ।

ii) आत्मस्वरूपमेव न भाति ।

iii) अनात्मापि भाति ।

On a closer examination it will be found that none of these will be a proper explanation of शुद्धो न भाति. In the first alternative the question arises whether that aspect of Brahman that is not comprehended is real or projected. To say that this is real is against Advaita. This will introduce two real aspects in Brahman. If it is mithyā i.e., projected, then, it does not deserve to be known by Śāstra.

1. a) शुद्धो न भातीति कोऽर्थः? (i) किम् आत्मस्वरूपे किञ्चिद् भाति किञ्चित् न भातीति । (ii) किम् आत्मस्वरूपमेव न भातीति । (iii) यद्वा अनात्मापि भातीति ।

(b) आद्ये अभासमानः अंशः आत्मभिन्नः सत्यश्चेत् अपसिद्धान्तः । मिथ्या चेत् न तत्त्वावेदकशास्त्रवेद्यः ।

The second alternative viz., आत्मस्वरूपमेव न भाति is also not a proper explanation of शुद्धो न भाति since आत्मन् is स्वप्रकाश and it cannot remain without revealing itself. तस्य (आत्मनः) स्वप्रकाशत्वेन अभानायोगात्

It cannot be claimed though आत्मन् is स्वप्रकाश it is not comprehended as it is covered by avidyā, since, a स्वप्रकाश object cannot be covered by any.

एतेन स्वप्रकाशत्वात् स्फुरति चैतन्यम्, अविद्यावृतत्वात् न स्फुरति इति निरस्तम् । स्फुरति अस्फुरणायोगस्य उक्तत्वात् ।

The third alternative viz., अनात्मापि भाति also does not hold good. The presence of additional element cannot come in the way of the comprehension of the ātman that is स्वप्रकाश । अनात्मनः अधिकस्य भानेपि आत्मनः असन्दिग्धत्वेन अविषयत्व तादवस्थ्यात् ।

Further, when अधिष्ठान is स्वप्रकाश there cannot be any आरोप on it. अधिष्ठाने तत्त्वतः स्फुरति अनात्मारोपायोगाच्च ।

The review of Vivaraṇa view

In vivaraṇa, the pūrvapakṣa and siddhānta are formulated slightly differently. Pūrvapakṣin argues that jīva brahmaikya cannot be the subject matter of jijñāsā since, jīva has kartṛtva, bhoktṛtva etc., attributes that are true and brahman has no such attributes.

The elimination of the bondage of kartṛtva, bhaktṛtva etc., can not be the purpose of jijñāsā, since these are true and not the results of ajñāna. Therefore, there is neither subject matter nor the purpose for Brahma jijñāsā.

न प्रत्यग् ब्रह्मैक्यं विषयः । कर्तृत्वादेः विरुद्धधर्मस्य सत्यत्वेन ऐक्यायोगात् । नापि तन्निवृत्तिः प्रयोजनम् । ज्ञानस्य अज्ञानमात्र निवर्तकत्वेन सत्यस्य ज्ञानान्निवृत्त्ययोगात् । (ता.चं)

Siddhāntin points out that the jīva and jagat are mithyā i.e., projected. These are not true. This is established in adhyāsa bhāṣya. Therefore, aikya can be the subject matter and elimination of adhyāsa can be the purpose.

प्रपञ्चस्तुमिथ्यैव । अत एव भाष्ये अध्यासवर्णनम् ।

The siddhanta proposed here introduces the concepts of adhyāsa and mithyātva. However, without introducing these concepts the subject matter can be worked out. The difference between kartṛtvadiviśiṣṭa jīva and brahman that is mithyā according to advaitin is comprehended by pratyakṣa, anumāna etc., that are not free from the defects. On the other hand the identity that is real according advaitin is conveyed by śruti which is free from the defects. Therefore, the identity between kartṛtvadiviśiṣṭa jīva and brahman can be the subject matter without introducing the concept adhyāsa.

कर्तृत्वादिविशिष्टस्य सम्भावितदोषेण अतत्त्वावेदेकन प्रत्यक्षानुमानादिना मिथ्याभेदे गृहीतेपि तात्त्विकाभेदे मानान्तरविरोधाभावेन विशिष्टस्यैव निर्दोषया श्रुत्या तात्विकाभेदबोधनसम्भवेन विषयार्थं अध्यासस्य अवक्तव्यत्वात् ।

These observations are made only to show that the effort of Vivaraṇa to formulate pūrvapakṣa and siddhanta by introducing adhyāsa is not successful. In the ultimate analysis identity cannot be the subject matter in any form.

The review of Rāmānuja view

According to Rāmānuja Bhāṣya pūrvapakṣa is raised on the ground that linguistic communication is always in terms of activity. Sentences convey their meaning as connected with the action. Brahman is not conveyed as connected with any activity. Therefore, śruti does not convey brahman. Hence there is no need for any jijñāsā i.e., enquiry into the purport of śruti.

In siddhānta it is pointed out that the sentences can convey the objects as they are without any connection with the action. When the persons and objects are introduced to children even when these are not connected with any activity the children do comprehend the meaning of the introducing sentences and the objects introduced. Therefore, Brahman can be conveyed by śruti without connection with any activity. Hence, the enquiry into the purport of śruti can be undertaken.

Both in pūrvapakṣa and siddhānta, the mode of sentence conveying its meaning is made the ground. Pūrvapakṣin goes by kārya vyutpatti theory and siddhāntin goes by siddha vyupti theory.

केचित्तु वृद्धव्यवहारेण कार्ये एव शब्दानां व्युत्पन्नतया सिद्धे ब्रह्मणि वेदान्तानामप्रामाण्यात् विचारो नारम्भणीयः इति प्राप्ते अम्बाताताद्दीन् अङ्गुल्या निर्दिश्य अम्बाताताद्दिशब्देषु प्रयुक्तेषु बालानां तेषु तच्छब्दानां प्रथमव्युत्पत्तिदर्शनात् ब्रह्मणि वेदान्तानां प्रामाण्यसम्भवात् विचारः आरब्धव्यः इत्याहुः ।

Here, the merit of the arguments given for and against is not questioned but the point whether there is any scope to raise such a pūrvapakṣa is raised. It is pointed out that such a pūrvapakṣa has no scope for two reasons.

i) According to Rāmānuja tradition, the twelve chapters of Karmamīmānsā, four chapters of Devamīmānsā and four chapters of Brahmamīmānsā form one unit of twenty chapters. The Devamīmānsā section does not contain any action oriented statements. Therefore, this section has to be comprehended by the siddha vyutpatti procedure only. Hence, there is no scope for raising a pūrvapakṣa at the commencement of Brahmamīmānsā on the ground of the need of kārye vyutpatti.

किञ्च अथातो धर्मजिज्ञासेत्यादि अनावृत्तिः शब्दादित्यन्तं विंशति लक्षणमेकं शास्त्रमिति वदता त्वया चतुर्लक्षणी देवमीमांसा ब्रह्ममीमांसायाः पूर्वेति स्वीकृतत्वेन सिद्धे व्युत्पत्त्यभावे सिद्धरूपदेवमीमांसानुपपत्तेः तस्याः तत्रैव सिद्धत्वात् पुनः इह सिद्धे व्युत्पत्त्यभावेन पूर्वपक्षः अनुपपन्नः ।

ii) Further, pūrvapakṣa should be normally suggested by the words in the sūtra. There is no suggestion of the pūrvapakṣa raised in the Rāmānuja Bhāṣya.

न चात्र अथशब्दादिना कार्ये व्युत्पत्तिनिरासः प्रतीयते । न च सौत्रपदनिरस्यैः हेतुभिः सूत्रावतारिकारूपपूर्वपक्षे सम्भवे हेत्वन्तरेण सः युक्तः । (ता.चं.)

Clarifications in respect of Sangati

The observations in Tatvaprakāśikā in respect of Sangati are clarified in Chandrikā.

i) The first adhikaraṇa has both upodghāta sangati and antarbhāva sangati with śāstra. It has no such sangatis with adhyāya and pāda.

ii) An alternate view is that Samanvaya and Ikṣati adhikaranas have adhyāya sangati but no pādasangati while the other three do not have both adhyāya sangati and pādasangati.

iii) From Ānandamaya adhikaraṇa onwards both adhyāya sangati and pādasangati are present.

i) शास्त्रेणेव न ताभ्याम् (अध्यायपादाभ्याम्) औपोद्घातिकी सङ्गतिः ।

ii) यथाशास्त्रेण अन्तर्भाव लक्षणा सङ्गतिः न तथा अध्यायपादाभ्याम् ।

iii) यद्वा आनन्दमयाधिकरणमारभ्य सङ्गतिद्वयम् । ततोऽर्वाक् समन्वयेक्षत्योः पादमात्रेण सङ्गत्यभावः । अन्येषां तु अध्यायेनापीति । (ता.च.)

Explaining the sangati as stated above, the procedure followed in commenting on Tattvaprakāśikā is briefly stated-

संदेह बीजपूर्वस्य टीकादावेव कीर्तनात् ।
अस्माभिः पूर्वपक्षश्च सिद्धान्तश्च विविच्यते ।
उपन्यासमुखेनैव टीकार्थोपि निरूप्यते ।
पूर्वपक्षादिमेयानामविक्षिप्तत्वसिद्धये ॥

The ground for the doubt, the subject matter etc are already stated for each adhikaraṇa in Tatvaprakāśikā. Therefore, pūrvapakṣa and siddhānta will be stated here. These will be stated in an organised discourse form to avoid the schattering of the points.

Discussion of the objections that there is no scope to undertake Brahma jijñāsā

In the first adhikaraṇa the very basic question whether there is any need to undertake an investigation into the purport of śruti is raised. Pūrvapakṣin argues that there is no subject matter for investigation into the purport of śruti nor any purpose will be served by it. The Brahman is supposed to be the subject matter. However, he is not distinct from Jīva chaitanya. The jīva is known directly by the experience 'aham.' Ātman is svaprakāśa i.e. self-revealing.

पूर्वपक्षस्तु न शास्त्रमारम्भणीयम् । न्यायानुसन्धानात्मकविचाररूप- जिज्ञासायाः एव अकर्तव्यत्वात् । तदकर्तव्यत्वं च निर्विषयत्वादिहेतुभ्यः । तत्र तावद् विषयत्वेन अभिमतं ब्रह्म न जीवाद् भिन्नं मानाभावात् । वेदान्तैश्च उपक्रमादिभिः अद्वैतरीत्या अखण्डप्रत्यगात्ममात्र प्रत्यायनात् । तस्य च अहमिति स्वप्रकाशतया भासमानत्वात् । (ता.चं.)

Ātman cannot be taken as not self-revealing. In that case it is to be taken as comprehended by mind as stated by Tārkikas? or revealed by samvit located in it as stated by Prābhākaras? In the first alternative the so called mānasa pratyakṣa is also not self-revealing and needs another cognition to comprehend it. This leads to anavasthā i.e. infinite regress. It cannot be argued that only in such cases wherein there is a desire to ascertain the cognition it has to be known by another cognition but not in all cases, therefore, there is no contingency of infinite regress. This is against experience. Cognition does not wait for a desire to ascertain it. It reveals itself like the experiences of happiness and sorrow.

i) आत्मनश्च अस्वप्रकाश्यत्वे तत् प्रकाशः किं तार्किकरीत्या मानसानुभवेन किं वा प्राभाकररीत्या स्वप्रकाशसंविदाश्रयतया। नाद्यः तस्यापि परपरप्रकाश्यत्वेन अनवस्थानात्। कस्यचिदनुभवस्य स्वप्रकाश्यत्वे आत्मनः एव तदस्तु।

ii) न च ज्ञानं जिज्ञासितं ग्राह्यम्। जिज्ञासा च न सर्वत्र इति न अनवस्था इति वाच्यम्। ज्ञानस्य सुखदुःखादिवत् जिज्ञासाभावेपि अनुभवात्। (ता.चं.)

The Prābhākara view also does not hold good since the ātman is not the location of samvit i.e. cognition, but he is identical with samvit.

किञ्च आत्मनः औत्तरिकानुस्मृत्यन्यथानुपपत्त्या संविद्रूपत्वात् न संविदाश्रयत्वम्।

Even if the mānasapratyakṣatva or samvidāśrayatva are granted, there is no escape from the position that the ātman is already known as in the case of self revealing position. This means that the pūrvapakṣa position that there is no need for investigation into the import of śruti stands.

अस्तु वा तार्किकादिरीत्या अहमर्थप्रकाशः। तथापि प्रत्यगात्मनः असंदिग्धत्वात् अविषयता।

अत एव सुधायां स्वप्रकाशतया स्वप्रकाशज्ञानाश्रयतया वा मानसप्रत्यक्षवेद्यतया वा सिद्धत्वेन इत्युक्तम्।

It is argued that Brahman has to be taken as not yet known, otherwise śruti will become apramāṇa on the ground that it jñātajñāpaka i.e. conveying the same that is already known (anuvādaka). Apauruṣeya śruti cannot be treated as apramāṇa. Therefore, a distinction has to be made between the ātman that is known as 'aham' and the Brahman that is conveyed by śruti. The latter can be subject matter of jijñāsā. This argument also does not hold good.

Such anuvādakatva is tolerated in the instances like 'वायुर्वै क्षेपिष्ठा' and विद्वद्वाक्य in Pūrvamīmānsā. Therefore, this situation cannot provide the subject matter for investigation.

ननु एवं वेदान्तानां सिद्धचैतन्यमात्रपरत्वे प्रागुक्तरीत्या ज्ञातज्ञापकत्वेन अप्रामाण्यं स्यात् । न च तद्युक्तम् । अपौरुषेयत्वेन अदोषत्वात् । अतः अतिरिक्तब्रह्मपरत्वमकामेनापि वाच्यमिति तद्विषयकत्वेन विचारः आरम्भणीयः इत्याशङ्क्य वैदिकदृष्टान्तेन तदुपपादयति - (प्र) । सिद्धचैतन्यमात्रबोधने श्रुतेरनुवादकत्वे च वायुक्षेपिष्ठादि वाक्यवत् विद्धद्वाक्यवच्चन्यायप्राप्तत्वात् सह्यम् । (च)

In the arthavāda statement 'वायु वै क्षपिष्ठा' क्षिप्रगामित्व of वायु which is already known is stated, still this vedic statement is not considered as apramāṇa. In the vedic statements 'य एवं विद्वान् पौर्णमासीं यजते' 'य एवं विद्वान् अमावास्यां यजते' there is anuvāda i.e. re-statement of Agneya etc group of three rituals, still it is not considered as apramāṇa. In the same way even if Brahman is known by experience, 'aham' the śruti that conveys it need not be apramāṇa. Hence, on this ground it need not be treated as unknown and made the subject of jijñāsā. Therefore, there is no subject matter for the enquiry into the import of śruti. The Vedas are meant for only the recitation.

i) वायुर्वै क्षेपिष्ठा इत्यर्थवादवाक्यस्य मानान्तरप्राप्तक्षिप्रगामित्वादिरूपार्थानुवादकत्वं यथा तद्वत् । (प्र.)

ii) आग्नेयादित्रिकद्वयानुवादकस्य सफलत्वात् समुदायद्वयानुवादः । (प्र.)

iii) वेदान्ताध्ययनं जपार्थमस्तु । (ता.चं.)

The whole discussion of Pūrvapakṣa is summed up with the remark that the undertaking of jijñāsā has no scope either by way of वेदविचार or by way ब्रह्मविचार that is to say, neither प्रमाण supports it nor प्रमेय supports it.

प्रमाणभूत वेदविचाररूपेणापि विचारस्य अकर्तव्यता अभिप्रेता । प्रमेयभूतब्रह्मविचाररूपेणवा । (ता.चं.)

In the context of the formulation of pūrvapakṣa and siddhānta, attention is drawn to the different presentations in Tatvaprakāśika and Nyāyasudhā and the purpose behind these two positions is explained.

सुधायां तु अनुव्याख्याने सिद्धे व्युत्पत्त्यादेः अतः शब्दार्थत्वेन उक्तत्वात् तद्व्यावर्त्यपूर्वपक्षे कार्ये व्युत्पत्तिरुक्ता । इह तु टीकायां न्यायविवरणोक्त ब्रह्मशब्दव्यावर्त्यपूर्वपक्षः उच्यत इति नेह सा वक्तव्या ।

With this remark the attempt of some to introduce kāryaparatva as the ground of pūrvapakṣa is rejected.

The purpose of jijñāsā also cannot be properly worked out. The Brahman is already known through the experience 'aham' and the liberation has not accrued. Since there is no subject matter nor there is any purpose, there cannot be any interested eligible person. The śruti statement 'śrotavyaḥ' does not make any room for jijñāsā. The expression śravaṇa does not convey vichāra. The śruti statements mantavya anveṣtavya also occur in the middle of the statements relating to brahman and therefore, do not

imply any injunction for vichāra. These are on par with 'viṣhuḥ upanśu yaṣṭavyaḥ' which is not taken as an injunction. Similarly the statement 'तस्माद् ब्राह्मण: पाण्डित्यम्' etc. also does not imply any injunction for vichāra. The fact that vichāra leads to knowledge is a natural position and it does not require any injunction. There is no scope for niyama vidhi or parisamkhyāvidhi since the ātman is known only through śabdapramāṇa. The adhyānavidhi also cannot be invoked to elicit the injunction of vichāra since it is a nityavidhi according to advaitins.

i) नापि जिज्ञासाया: प्रयोजनमस्ति । प्रत्यग्रूपे ब्रह्मणि अहमिति ज्ञायमानेपि मोक्षानुपलम्भात् । विषयाद्यभावादेव नाधिकारी नापि सम्बन्ध: ।

ii) ननु कथं तर्हि श्रोतव्य इति विचारविधानमिति चेन्न । वक्ष्यमाणरीत्या श्रवणस्य विचाररूपत्वाभावात् ।

iii) मन्तव्य: अन्वेष्टव्य: इत्यादेश्च ब्रह्मपरतया अभिप्रेतवाक्यमध्यस्थतया 'विष्णुरुपांशु यष्टव्य:' इतिवत् कृत्यप्रत्ययस्यार्हार्थत्वेनाप्युपपत्ते: अविधायकत्वात् ।

iv) नापि 'आत्मन्येव आत्मानं पश्येदिति' 'तद्विजिज्ञासस्व' इति वा विधि: । मुख्यार्थयो: ज्ञानेच्छयो: अविधेयत्वात् । विधौ च लक्षणाया: अन्यायत्वात् । अनयोरपि ब्रह्मपरतया लिङो विधिशक्तिप्रतिबन्धाच्च ।

v) एतेन तस्माद् ब्राह्मण: पाण्डित्यमित्यादेरपि विचारविधित्वं निरस्तम् । विचारस्य ज्ञानहेतुताया: अन्वयव्यतिरेकप्राप्तत्वेन विध्यनपेक्षणाच्च । नियमपरिसङ्ख्ययोश्च आत्मन: शब्दैकगम्यतया साधनान्तरप्राप्त्यभावेन अयोगात् ।

vi) नापि अध्ययनविधे: अर्थज्ञानपर्यन्ततया तदाक्षिप्तो विचार: इति युक्तम् । स्वमते तस्य नित्यत्वेन अर्थज्ञापनपर्यन्तत्वायोगात् । (ता.चं.)

Stating the objections in detail, Chandrikā establishes the need for undertaking brahma jijñāsā as per Śri Madhva bhāṣya and Tīkā.

The expression brahman in the sūtra conveys the brahman who is guṇaparipūrṇa. He is distinct from jīva who has limited guṇas. Therefore, the nature of Brahman has to be enquired into as per the śruti 'Tad-vijijñasāsva.' It cannot be contended that the distinction between jīva and Brahman is not real. The distinction is established by śruti and sākṣin. The guṇapūrṇatva of Brahman is not only supported by śruti, but by the etymology of the word brahman also. Unlimitedness is its etymological meaning. This unlimitedness is not merely in respect of space and time only. It includes the unlimitedness in respect of guṇas also. Even if it is taken in the sense of unlimitedness in respect of space only it establishes the distinction between jīva and brahman, since, jīva is aṇu and brahman is all pervasive.

i) जिज्ञास्य ब्रह्मशब्देन गुणपूर्त्यभिधायिना अपूर्णत्वेनानुभूता ज्ञीवाद् भिन्नं प्रतीयते ।

ii) जिज्ञास्यमेव ब्रह्म । तद्विजिज्ञासस्व तद्ब्रह्मेत्यादिश्रुते: ।

iii) निर्दोषश्रुतिसाक्षिभ्यां प्रमिते ब्रह्मजीवयोः । गुणपूर्त्यल्पगुणते मिथ्येति च न युज्यते ॥

iv) नकेवलं श्रुत्या गुणपूर्तिः ब्रह्मशब्दार्थः । किन्तु ब्रह्मशब्दावयवशक्त्यापि । गुणापरिच्छेदोऽपि अपरिच्छेद एव न च संकोचे हेतुरस्ति ।

The criterion applied to 'विष्णुरूपांशु यष्टव्यः' not to treat it as an injunction cannot be applied in the case of तद्विजिज्ञासस्व. The former occurs in the middle of a statement that relates to one item i.e. jāmita doṣaparihāra. If upamśu yaṣṭavyaḥ is taken as an injunction, then, it results in vākyabheda. Here, there is no such contingency. On the other hand, this statement can go well with other statement that states Brahman and forms one sentence with it like the statement about prayāja becoming one statement with darśapūrṇamāsa statement. The capacity of the statement तद्विजिज्ञासस्व to be an injunction is not prevented by any other factor. The statement 'आत्मन्येव आत्मानं पश्येत्' also can be the injunction of vichāra. Adhyayanavidhi also can be an injunction of vichāra.

i) न च मन्तव्यः इत्यादेः विष्णुरूपांशु यष्टव्यः इत्यादिवदविधित्वं वाच्यम् । तत्र जामितादोषोपक्रम तन्निर्हरणान्तैकवाक्यमध्यस्थानां विष्ण्वादिवाक्यानां विधित्वे प्रतीतैकवाक्यताभङ्गादेरिव प्रकृते बाधकस्य अभावात् ।

ii) प्रयाजादिवाक्यस्य स्वयमवान्तरवाक्यतया विधायकस्यापि पुनः दर्शपूर्णमासादिवाक्येन वाक्यैकवाक्यतावत् प्रकृतेपि पृथग्विधायकस्यापि ब्रह्मपरवाक्येन वाक्यैकवाक्यतोपपत्तेश्च ।

iii) आत्मन्येव आत्मानं पश्येदित्यादावपि दर्शनस्य लक्षितस्य विचारस्य वा विधिसम्भवात् । सति बाधके विधावपि लक्षणायाः स्वीकृतत्वाच्च ।

iv) अध्ययनविधेरपि विचाराक्षेपकतायाः विचारविधेः अपूर्वविधित्वादेश्च अन्यत्र उक्तत्वात् । (ता.चं.)

Discussion of the Sūtrāvayavatva of Omkāra

After establishing the necessity of jijñāsā i.e. vichāra, an interesting point is raised about the meaning and the status of 'Om'kāra in the sūtra.

In Anuvyākhyāna it is stated that 'Om'kāra should be at the commencement. Its meaning is explained as guṇapūrṇatva. In Sudhā it is stated that both at the beginning and at the end of a sūtra omkāra should be added by ūha. It is a part of the sūtra. Its meaning has to be taken as a part of sūtra meaning. It is stated separately in the first sūtra only to indicate that it has to be recited in all sūtras.

i) अनुव्याख्याने तत्र ताराथमूलत्वमिति ॐकारस्य सूत्रादित्वमुक्त्वा ओतत्ववाचीहि ॐकारः इति सः व्याख्यातः ।

ii) सुधायां च स्रवत्यनोङ्कृतं ब्रह्मपरस्ताच्च विशीर्यत इति श्रुतिबलात् प्रतिसूत्रं ब्रह्मविद्यात्वात् आद्यन्तयोः ऊह: कार्यः । न चोह्यमानं वाक्यात् पृथक् । ॐकारार्थस्य प्रथमसूत्रवाक्यार्थे समन्वयेन अवयत्वनिश्चयात् । असंहिततया निर्देशस्तु सर्वसूत्रेषु अनुगतिसूचनार्थः इत्युक्तम् ।

These statements raise a number of questions.

i) Ūha is substitution, for example 'अग्नये' in prakṛti yāga is substituted by सूर्याय in vikṛtiyāga.

ii) The expression ūha cannot be taken in the sense of adhyāhāra here. Unless there is ākāṅkṣā, no adhyāhāra can be made. There is no ākāṅkṣā here.

iii) That which is brought by ūha is not considered as a constituent part of the hymn.

iv) The meaning of the Om viz. guṇapūrṇatva, cannot be connected with that of brahman since brahman is a subbordinate word to jijñāsā.

v) If 'Om' is meant to convey its meaning, then, its use at the beginning of sūtra is sufficient. It need not be repeated at the end.

vi) If Omkāra is taken into later sūtras by way of anuṣanga, then, its meaning has to be a part the meaning of those sūtras also. This is not possible.

i) सूर्यायेत्यूहं प्रति अग्नये इत्यादेरिव प्रकृते स्थानिनो अभावात् ।

ii) न च उहशब्देन अध्याहारो लक्ष्यत इति वाच्यम् । साकांक्षत्वाभावात् ।

iii) मन्त्रेष्वपि ऊह्यमानस्य अनवयवत्वमिष्टमेव ।

iv) अपि च ओतत्वस्य न वाक्यार्थे अन्वयः । ब्रह्मणः शब्दतः उपसर्जनस्य पदान्तरोपात्तौत्वान्वयानुपपत्तेः ।

v) अपि च अर्थप्रतीत्यर्थत्वे आदावेव प्रयोगेण चरितार्थत्वादन्ते प्रयोगवैयर्थ्यम् ।

vi) किञ्च ॐकारस्य उत्तरत्र अनुषङ्गे अनुषक्तस्य तत्र तत्र अर्थान्वयदर्शनात् प्रकृतेपि ॐकारार्थस्य जन्मादिसूत्रेषु अन्वयो वाच्यः । स च न शक्यः । (ता.चं.)

These difficulties are removed by the following explanation :

i) The expression 'ūha' is used here in the sense of adhyāhāra but not in the sense of substitution.

ii) Here, adhyāhāra is made on the basis of śruti 'स्रवत्यनोंकृतं ब्रह्म परस्ताच्च विशीर्यते.' The brahmavidyā will slip from the mind if it is not started with 'Om'kāra and it will vanish if it is not closed by 'Omkāra.' Therefore, there is no need of any ākāṅkṣā.

iii) Omkāra is adṛṣtārtha as its recitation is recommended by śruti and it is dṛṣtārtha as it conveys meaning. Its recitation at the commencement of first sūtra is both for adṛṣta and dṛṣta. Its recitation at the end and in all other sūtras is adṛṣtārtha.

iv) Since the meaning of Omkāra i.e. guṇapūrṇatva, cannot be connected with jijñāsā it gets connected with brahman.

i) नात्र ऊहशब्दः मन्त्रसामसंस्कारोह इत्यादाविव कर्म व्युत्पत्त्या विकारपरः किन्तु अध्याहारवाचकः ।

iii) तत्र च स्रवत्यनोंकृतं ब्रह्म इति श्रुतिरेव मानम् (ता.चं.) ॐकारानुच्चारणे निन्दाश्रवणात् तदन्यथानुपपत्त्या तदुच्चारणविधेरुन्नयनात् आकांक्षायाः अभावेपि विधिबलादध्याहारः इति भावः । (प्र.)

iii) स्विष्टकृदादाविव ॐकारोच्चारणमुभयार्थम् । अत एव नान्ते प्रयोगवैयर्थ्यम् । नाप्युत्तरसूत्रे ॐकारार्थस्य अनन्वयदोषः । तत्र दृष्टासम्भवेन अदृष्टार्थत्वोपपत्तेः ।

iv) जिज्ञासान्वितत्वेन प्रथमं प्रतीतस्य ओतत्वस्य तत्र असम्भवेन अङ्गावतारन्यायेन तदुपसर्जनब्रह्मशब्दान्वयात् ।

v) न च ब्रह्मशब्देनैव विषयसूचनात् ॐकार वैयर्थ्यम् । न केवलं जिज्ञास्ये ब्रह्मशब्दश्रवणात् तस्य जिज्ञास्यता किन्तु ओमित्यदक्षरमुद्गीथमुपासीतेत्यादौ जीवेषु असम्भावित गुणपूर्तिवाचकोंकारादि श्रवणादपीति युक्तयन्तरसूचकत्वात् ।

In respect of 'Omkāra' a seeming difference between sannyāyaratnāvali and Anuvyākhyāna is quoted and resolved. Sannyāyaratnāvali states that Omkāra should be separately recited. It should not be considered as a constituent of sūtra like the word atha. This goes against Anuvyākhyāna wherein a meaning i.e. guṇapūrṇatva is assigned to Omkāra. To avoid this conflict a solution is offered that the meaning is not intended to make it a constituent of sūtra but to indicate that the guṇapūrṇa i.e. Nārāyaṇa who is conveyed by Omkāra is the import of the entire Veda and the subject matter of this Śāstra. Thus the purpose of the two statements is different. Sannyāyaratnāvali states the position of Omkāra in respect of the sūtra while Anuvyākhyāna gives its meaning to convey the subject matter of the Śāstra. Conveying its meaning is not intended to make it sūtrāvayava.

i) सन्न्यायरत्नावल्यां तु ॐकारस्तु पृथगुच्चरितो वेदितव्यः । न अथ शब्दवत् सूत्रोपनिबद्धः इति सूत्रात् पार्थक्यमेव उक्तम् ।

ii) तत्र अनुव्याख्याने ओतत्ववाचीत्यादिना तदर्थकथनं वेदव्याख्येयोंकारार्थवाचक श्रीनारायणपदवाच्यस्य सर्ववेदार्थत्वात् शास्त्रविषयत्वमित्यभिप्रेत्य । न तु सूत्रार्थतया । अन्यथा भर्गादिशब्दानामपि सूत्रावयवत्वं स्यात् । स एव भर्गशब्दार्थ इति तदर्थस्यापि कथनात् ।

The seeming difference between Sannyāyaratnāvali and Anuvyākhyāna is resolved in another way also. The Śruti 'स्रवत्यनोंकृतं ब्रह्म' enjoins the recitation of Omkāra at the commencement of Brahmavidyā in a general way. This is not a constituent of Sūtra. The Smṛti statement ॐकारश्चाथशब्दश्च quoted in the Bhāṣya states that Omkāra is a constituent of sūtra like the words atha and ataḥ. Sannyāyaratnāvali statement relates

to the first Omkāra, Anuvyākhyāna and Sudhā that state Omkāra as a constituent of sūtra relate to the second. It means that Omkāra has to be recited twice at the commencement of the first sūtra and only once at the end. In the case of other sūtras it has to be recited once only both at the commencement and the end.

i) यद्वा मास्तु स्रवत्यनोंकृतमित्यनेन साधारणोंकारस्य सूत्रावयवता । तथापि ॐकारश्चाथशब्दश्चेति भाष्योदाहृतस्मृत्या अथातः शब्दतुल्यतया आद्यसूत्रावयवतायाः उक्तत्वादनुव्याख्याने ॐकारस्य आद्यसूत्रावयवत्वोक्तिः युक्ता । तथा च सन्यायरत्नावली स्रवतीत्यादि साधारणोंकार विषया । सुधातु ॐकारश्चेत्यादि स्मृतिप्रापितासाधारणोङ्कार विषयेति द्रष्टव्यम् । (ता.चं.)

ii) अयमर्थः । यथा अष्टाक्षरादौ एकः ॐकारः तदवयवः अन्यौ च द्वौ अदृष्टार्थौ एवमाद्य सूत्रेपि एकः तदवयवः अन्यौ च आद्यन्तयोः अदृष्टार्थौ । (प्र.)

A third solution is also suggested. The Sannyāyaratnāvali statement ॐकारस्तु पृथगुच्चारितो वेदितव्यः does not deny सूत्रावयवत्व of Omkāra. It only states that the Omkāra should be borrowed in other sūtras also.

यद्वा सन्यावल्युक्तं पृथक्त्वं ऊह्यमानत्वं न तु वाक्ये अनन्वयः ।

In view of this there is no need to envisage two Omkāras at the commencement, since, one and the same Omkāra can serve both the purposes of dṛṣṭārtha i.e. conveying the meaning and adṛṣṭārtha.

श्रुतिप्रापितोंकारस्य स्मृतिविषयत्वसम्भवात् न ॐकारद्वयं कल्प्यमिति भावेन एकविषयत्वेपि अविरोधमाह यद्वा इति । (प्र.)

Discussion of the meaning of the word अथ

After discussing the sūtravāyatva of Omkāra, the discussion of the meaning of the expression atha is taken up. In Advaita commentaries 'atha' is taken in the sense of 'after' and it is stated that this elicits the eligible person, his qualification, and the result to be obtained.

अधिकारि तद्विशेषणप्रयोजनलाभाय आनन्तर्यार्थता ।

However, it is difficult for them to identify the eligible person and the result to be realised. There are three possible alternatives in identifying the eligible person and the result

i) मुमुक्षुः अधिकारी मोक्षः फलम् ।

ii) ब्रह्मज्ञानकामः अधिकारी ब्रह्मज्ञानं फलम्

iii) अपरोक्षज्ञानकामः अधिकारी अपरोक्षज्ञानं फलम् ।

The last one is further developed into two more alternatives with more technical adjectives. The first alternative does not help since vichāra is not the means of liberation. The second alternative also does not help, since advaitin has already denied the eligibility of mere jñānakāma in the context of adhyayana vidhi. The third alternative also does not help to identify the eligible person since the desire for aparokṣajñāna depends on parokṣajñāna which is yet to be obtained. Therefore, no eligible person i.e. adhikārī, can be identified in Advaita.

i) न तावत् विचारविधौ त्वत्पक्षे मुमुक्षुः अधिकारी मोक्षः फलमिति युक्तम् । विचारो मोक्षसाधनतया न प्राप्तः इति तद्विधेः अपूर्व विधित्वापातात् । मुमुक्षोरपि ज्ञानकामनां विना विचारे अप्रवृत्तेः ।

ii) नापि विचारविधौ ज्ञानकामो अधिकारी ज्ञानं च फलमिति युक्तम् । अध्ययनविधेः ज्ञानकामाधिकारं निषेधता त्वया ज्ञानकामना निषेधात् ।

iii) श्रवणसाध्यस्य परोक्षज्ञानस्य प्रागसत्त्वेन तदधीनायाः अपरोक्षज्ञानकामनायाः श्रवणविध्यधिकारि विशेषणत्वायोगः ।

iv) तस्मात् परोक्षज्ञाने कामनां निषेधतः परस्य मते ज्ञाने मोक्षे वा विचारप्रवृत्तिपर्यन्तकामनायोगात् तत्कामस्य अधिकारिणः तस्य फलस्य सूचनं न आनन्तर्यार्थेनापि अथशब्देन.

After pointing out that proper adhikārin cannot be identified in advaita and therefore he cannot take atha in the sense of after adhikāra, the various other meanings of the expression atha are noticed and it is pointed out that these are not suitable in the present context. These are : (i) ārambha i.e. commencement (ii) pūrvaprakṛtāpekṣā i.e. needed by the earlier topic (iii) kāraṇānantarya i.e. after the cause (iv) prakṛtāt arthāt arthāntara i.e. a topic different from the earlier topic. None of these suit in the present context.

In advaita four qualifications viz. (i) नित्यानित्यवस्तुविवेकः (ii) इहामुत्र फलभोगविरागः (iii) शमदमादिसम्पत्तिः (iv) मुमुक्षुत्वम् are laid down as the grounds of eligibility. These are examined in detail and it is pointed out that the nature and utility of these cannot be properly explained in advaita.

For instance, if नित्यानित्यविवेक is taken in the sense of distinguishing between ब्रह्मन् and संसार or सत्य and अनृत, then, if it is known just at the eligibility stage, then there is no need to undertake brahmajijñāsā. Further, विवेक means difference and according to advaita the difference is not real. If an unreal condition is made the ground of eligibility it cannot lead to a valid result.

किञ्च विवेको भेदस्य ज्ञानम् । तस्य च भ्रमत्वे ब्रह्मविचारः न नित्यफलकः स्यात् । प्रमात्वे भेदः सत्यः स्यात् । तस्मात् परमते न नित्यानित्यवस्तु विवेकः युक्तः ।

The second qualification इहामुत्रार्थभोगविरागः also does not work. According to विवरण even the enjoyment of worldly objects leads to the emergence of the bliss of ātman. No detachment from such a bliss could be the ground of eligibility विवरणे विषयैरपि नित्यमात्मस्वरूपसुखमेव अभिव्यज्यते न तु जन्यसुखमस्तीत्युक्तत्वेन वैषयिकसुखेपि विरागायोगात् ।

The scope of śama, dama etc also cannot be clearly explained in advaita. These overlap with the earlier two qualifications.

शमदमादि सम्पत्तिरित्यत्र च आदिशब्दो न युक्तः । तितिक्षाद्यनुगतस्य विवेकादि व्यावृत्तस्य च उपसङ्ग्राहक धर्मस्य अभावात् ।

मुमुक्षा also cannot be a requirement of eligibility since the liberation is nothing but Brahmasvarūpatva which is always there. There will be no desire for something that is always present.

मुमुक्षा च न परपक्षे युक्ता मोक्षस्य नित्यसिद्धात्ममात्रत्वेन तत्रेच्छायोगात् ।

Further, नित्यानित्यवस्तुविवेक etc cannot be the grounds of eligibility one after the other as stated in Bhāmati or all cannot be directly the grounds as stated in Vivaraṇa.

Rejecting the advaita concept of eligibility and its grounds, Chandrikā concludes the discussion and states that the adhikāra has to be explained as described in Śrī Madhvabhāṣya and the expression 'atha' should be understood in the sense of 'after acquiring such an adhikāra.'

तस्मात् अधिकारानन्तर्यमेव अर्थः । तदर्थत्वं च स्वमत एव युक्तम् । न तु परमते इत्यभिप्रेत्याह भाष्यकारः - अधिकारानन्तर्यार्थश्चेति ।

The expression mangalārtha in the Bhāṣya should be understood in the sense mangala prayojanaka. It does not convey auspiciousness as its meaning but its very utterance leads to auspiciousness.

In respect of adhikāra the three categories described in the Bhāṣya are neatly summarised in Chandrikā as under :

i) यस्य विष्णुपादैक संश्रयत्वादिकं प्रचुरम् अध्ययनशमदमादिके अप्रचुरे सः उत्तमः ।
ii) यस्य विष्णुपादैकसंश्रयत्वमप्रचुरम् अध्ययनशमदमादिके प्रचुरे स मध्यमः ।
iii) यस्य शमदमादि विष्णुपादैकसंश्रयत्वादिके अप्रचुरे अध्ययनं तु प्रचुरं सः अधमः ।

Discussion of the import of the word अतः

Discussing the import of the expression अतः, the following meanings are explained.

i) यतः नारायणप्रसादमृते न मोक्षः, न च ज्ञानं विना अत्यर्थप्रसादः अतः ब्रह्मजिज्ञासा कर्तव्या (भाष्य) ननु प्रकृतस्य हेतुत्ववाचकेन अतः शब्देन कथमिदं लब्धम्? प्रसादादेः मोक्षहेतुत्वादेः प्रामाणिकत्वादे-तच्छब्देन परामर्शः । बुद्धिसन्निधानमेवहि प्रकृतत्वम् । (ता.चं.)

ii) एतत्सूत्रनिर्णेतव्येन 'नारायणोऽसौ परमो विचिन्त्यः मुमुक्षुभिः' इत्यदिविधिविचारवाक्येन उपस्थापितत्वात् विचारस्य मोक्षप्रयोजनकत्वमतः शब्दार्थः

iii) अनुव्याख्यानोक्तदिशा ब्रह्मतर्के प्रकृतत्वात् सिद्धे व्युत्पत्त्यादिकमिव विचारस्य मोक्षहेतुत्वमतः शब्दार्थः ।

iv) जन्मादिसूत्रे ब्रह्मणः विचारसाध्यज्ञानजन्यप्रसादद्वारा मोक्षहेतुत्वस्य वक्ष्यमाणत्वात् भगवतः उक्तद्वारेण मोक्षदत्वस्य अतः शब्दार्थत्वोपपत्तिः ।

v) अनुव्याख्याने तु बन्धस्य मिथ्यात्वात् तन्निवृत्तेः प्रसाद नैरपेक्ष्यात् न भगवत् प्रसादार्था जिज्ञासा मुमुक्षुणा कर्तव्या इत्यादिशङ्कानिरासाय प्रयोजनसाधकं जगत्सत्यत्वादिकमपि अतः शब्देन उक्तम् ।

In these explanations prasāda figures as the main cause for the liberation and therefore, that is the key point in the import of अतः । The God himself bestows liberation by bestowing his grace. Therefore, jijñāsā i.e. vichāra in respect of God has to be undertaken to know him and obtain his grace. This is the main import of अतः. The doctrines of सिद्धे व्युत्पत्ति and जगत्सत्यत्व are also accommodated in the import to reject the objections based on कार्ये व्युत्पत्ति and जगन्मिथ्यात्व.

In conclusion it is stated that the expressions ब्रह्मन् and अतः provide the subject matter and the purpose.

विषयप्रयोजनयोः अभावात् निरधिकारित्वमितिशङ्का तु तत्समर्पकाभ्यां अतःशब्दब्रह्मशब्दाभ्यां निराकृता ।

The objections viz. i) the knowledge could be obtained by performing the sacrifices as per the śruti 'कर्मणा ज्ञानमातनोति.' Therefore there is no need of vichāra. ii) the performance of sacrifice itself leads to the liberation as per the statement 'तत्कर्म हरितोषयत्' hence, there is no need of knowledge iii) there is no need of prasāda i.e. grace also, the removal of ignorance by knowledge is sufficient to obtain liberation, are set at rest by the stand that the expression अतः conveys the fact that the grace obtained by the knowledge is the means of liberation.

i) सत्यपि विषये जिज्ञासा न साक्षान्मोक्षहेतुः नापि ज्ञानद्वारा । कर्मणा ज्ञानमातनोति इत्यादिश्रुत्या कर्मणापि सिद्धेः ।

ii) किञ्च ज्ञानमपि न साक्षात् मोक्षहेतुः । नापि भगवत्प्रसादद्वारा । तस्य तत् कर्म हरितोषं यदित्यादिना कर्मणापि सिद्धेः ।

iii) ज्ञानेन अज्ञाननिवृत्तौ प्रसादस्य अनपेक्षितत्वाच्च इति शङ्का अतः शब्देन प्रसादादेः मोक्षादिहेतुत्वं सूचयता परिहृता ।

Continuing the discussion it is stated that there is no repetition of the statement of हेतु by the words अथ and अतः । अधिकारि विशेषणस्य शमदमादेः विचारकारकत्वस्य अथशब्देन लाभेपि सप्रयोजनत्वादेः विचारकर्तव्यताप्रमाणस्य अतः शब्देनोक्तेः (न पौनरुक्त्यम्)

In this context the explanations of Bhāmati and Vivaraṇa in respect of the relative meaning and the arrangement of Viśeṣaṇas in working out the meaning of अथ and अतः are reviewed and rejected.

The review of Rāmānuja interpretation of अथ and अतः

According to Rāmānuja bhāṣya the expression अथ means after धर्मजिज्ञासा. अतः means the Karmas lead to small and temporary results and Brahmajñāna leads to infinite and permanent results. अथ provides the time of undertaking vichāra and अतः provides the reason for undertaking vichāra. Thus, there is no repetition.

केचित्तु अथ शब्दो जिज्ञासा विशेषणीभूतकालपरः । नहि ब्रह्मविचारस्य कर्तव्यत्वमात्रं साध्यं किन्तु धर्मजिज्ञासानन्तर्यविशिष्टम् । अतः शब्दस्यतु तस्मिन् विशिष्टे साध्ये कर्मणामल्पास्थिरत्वनिर्णयसहितः ब्रह्मज्ञानस्यानन्तस्थिरफलताप्रतीतिरूपः विशिष्टोहेतुरर्थः । ततश्च सार्थकं पदद्वयमित्याहुः ।

This explanation also does not hold good. When it is stated that अथ stands for धर्मजिज्ञासानन्तर्य, some reason for undertaking Brahmajijñāsā after Dharmajijñasā is already implied and that reason need not be repeated by the word अतः ।

अथ शब्दस्य उक्तप्रतीत्यानन्तर्यार्थत्वे (धर्मजिज्ञासानन्तर्यार्थत्वे) अकारणानन्तर्योक्तेः वैयर्थ्येन अथशब्देनैव तस्याः हेतुत्वलाभादतः शब्दवैयर्थ्यात् ।

Further, in Rāmānuja Bhāṣya the pūrvapakṣa is raised on the ground that there is no सिद्धे व्युत्पत्ति. Therefore, it is sufficient, if ब्रह्मविचारकर्तव्यता is stated in siddhānta. धर्मजिज्ञासानन्तर्य need not be a part of siddhānta. किञ्च सिद्धे व्युत्पत्त्यभावाद् विचाराकर्तव्यत्वे त्वद्रीत्या पूर्वपक्षिते ब्रह्मविचारकर्तव्यतामात्रं सिद्धान्तयितव्यम् । न तु उक्तानन्तर्यविशिष्टम् ।

Finally Chandrikā states the Dvaita position as under :

अथशब्देनाधिकारमत इत्यमुना फलम् । ब्रह्मशब्देन विषयं सूत्रयामास सूत्रकृत् ।

The review of Advaita explanation of the meaning of the word Brahman

The expression Brahman conveys guṇapūrṇatva. According to Advaita this expression conveys akhanda by way of lakṣaṇā. It is not proper to take the meaning of this expression by lakṣaṇā.

ब्रह्मशब्दश्च श्रुतिबलाद् गुणपूर्त्यर्थः । परपक्षे अखण्डस्य ब्रह्मपदलक्ष्यस्यैव जिज्ञास्यत्वात् श्रुतिसूत्रस्थ ब्रह्मपदस्यैव मुख्यार्थत्यागः ।

Advaita explains the import of the expression brahman in another way also. It conveys त्रिविधपरिच्छेदाभाव, that is to say, Brahman has no limitation in terms of space, time and the presence of another object (देशतः कालतः वस्तुतः परिच्छेदाभाव). It is महत्त्व in this sense that is the import of the expression Brahman. The third aspect i.e. the absence of another object rules out the presence of jīva as a seperate entity. The very expression brahman establishes जीवाभेद.

त्रिविधपरिच्छेदाभावरूपमहत्त्वार्थेन ब्रह्मपदेनैव जीवाभेदसिद्धिः ।

This claim is rejected on the ground that this will lead to the अभेद with jār etc all other objects also. तन्न तेनैव घटाद्यभेदप्रसङ्गात् ।

To meet this objection an attempt is made to distinguish the cases of jīva and the jar etc other objects on the ground that jīvasvarūpa is real and jar etc are not so.

जीवस्वरूपस्य तात्विकत्वात् घटादेः अतथात्वात् वैषम्यम् ।

This claim has led to a detailed discussion स्वतुल्यसद्रूपापरिच्छेद and तात्त्विकापरिच्छेद. Finally it is concluded that to establish महत्त्व of ब्रह्मन् a real अल्पवस्तु has to be accepted. Therefore, the very expression brahman if conveys महत्त्व, conveys सद्वितीयत्व also.

किञ्च वस्तुतो अल्पे सत्येव तन्निरूपितमहत्त्वस्य वास्तवत्वमिति ब्रह्मशब्देनैव सद्वितीयत्वम् ।

The compound word ब्रह्मजिज्ञासा has to be dissolved as ब्रह्मणः जिज्ञासा. The genetive case suffix has to be taken in the sense of कर्मत्व. Though in advaita also this compound word is dissolved in the same way, they cannot workout कर्मत्व of brahman, while in Dvaita, it can be properly and fully explained.

अत्र परैः ब्रह्मणो जिज्ञासेति षष्ठीसमासः । न तु चतुर्थीसमासः । षष्ठी च कर्मणि । न तु शेषे । कर्मणिषष्ठ्या हि प्रतीत्यनुबन्धितया जिज्ञासापेक्षितकर्मणः साक्षात् लाभः । तदयुक्तम् । परपक्षे विचारजन्यज्ञानकर्मणो ब्रह्मणो विचारकर्मत्वायोगात् ।

स्वपक्षे कर्मणि षष्ठचामपि प्रमाणसाधनप्रयोजनादिपरिकरयुक्तस्यैव ब्रह्मणः जिज्ञासाकर्मत्वात् न प्रमाणादि विचारस्य अप्रतिज्ञातता ।

The explanation of the importance of manana

An interesting point is raised to reconcile the statements in Tīkā and Sudhā in respect of the role of śravaṇa, manana and nidihyāsana in undertaking vichāra. In

Sudhā it is clearly stated that manana which is of the nature of reasoning is the chief motivater for undertaking vichāra.

युक्त्यनुसन्धानात्मको मननापरनामको विचारो जिज्ञासा । सुधायां जिज्ञासा नाम युक्त्यनुसन्धानात्मक विचारापरपर्यायं मननमित्युक्तत्वात् ।

Śravaṇa is just comprehending the import of the śruti statements. It does not motivate the undertaking of vichāra.

नहि औपदेशिकवाक्यार्थ ग्रहणलक्षणश्रवणस्य कर्तव्यता उक्तरूपशास्त्रस्य आरम्भणीयत्वे हेतुः ।

This position makes it a little difficult to understand the Tīkā statement श्रवणादिरूपा जिज्ञासा कार्या । This difficulty could be solved by taking the compound word श्रवणादिरूपा as अतद्गुणसंविज्ञानबहुव्रीहि. According to this explanation श्रवण is excluded from the scope of जिज्ञासा. It is only a preliminary.

Another way of reconciling Tīkā and Sudhā is to take श्रवण and निदिध्यासन as परम्परया आरम्भणीयत्वे हेतु keeping this in mind it is stated that jijñāsā which is a kind of upāsanā is of three levels.

अत एव उपासना नाम ब्रह्मजिज्ञासेति त्रिविधोपासनायाः जिज्ञास्यत्वं तत्रैवोक्तम् ।

In any case manana is the chief form of jijñāsā. It is not śravaṇa as contended in Vivaraṇa.

मननमेव जिज्ञासत्वेन उक्तमिति मननविधिमूलमेव इदं सूत्रम् । न तु विवरणमत इव श्रवणविधिमूलम् ।

Discussion of the import of the word Jijñāsā

Another point to be noted here is that the word jijñāsā conveys its sense vichāra by rūdhi only. One comprehends this meaning without waiting to know its primary meaning i.e. the desire. Only in such cases in which one proceeds from primary meaning to the extended meaning, it is a case of lakṣaṇā. For instance, in Gangayām ghoṣaḥ, first the primary meaning i.e. pravāha i.e. flowing water is brought to the mind, then only the extended meaning i.e. tīra i.e. bank of the river, is comprehended. Here, no such process is followed. Therefore, it is a case of rūdhi but not lakṣaṇā.

जिज्ञासाशब्दतोहीच्छामज्ञात्वैव विजानते । विचारं लौकिकाः तेन तत्रायं रूढ इष्यते ।
अन्यथा मण्टपादीनां गृहादौ स्यान्न रूढता । गङ्गाशब्दात् तीरादि तद्धीपूर्वं प्रकाश्यते ।

तस्मात् जिज्ञासाशब्दो विचारे रूढ एव ।

In Rāmānuja Bhāṣya it is argued that the word jijñāsā need not be taken in the sense of vichāra. It conveys the desire itself. However, since the desire cannot be enjoined its object jñāna of the nature of vichāra is enjoined.

जिज्ञासाशब्दः रूढ्या लक्षणया वा विचारं नार्पयति। किन्तु इच्छार्थ एव। इच्छायाः अविधेयत्वादिच्छां प्रति कर्मीभूत मिष्यमाणं विचारात्मकं ज्ञानं विधेयम्।

This contention is rejected by pointing out that just as svarga which is the object of desire cannot be enjoined the jñāna cannot be enjoined on the ground that it is an object of desire.

नहि स्वर्गकामपदेन इच्छाविषयतः प्रतीतः स्वर्गः विधेयः।

Further, the expression jñāna means cognition in the normal sense. It does not mean vichāra.

किञ्च जानातेः प्रमितौ स्वारस्यात् न तर्करूप ज्ञानपरता।

Once again Bhāmati view is quoted to reject it.

Bhāmati once again insists that the expression jijñāsā may be taken in the sense of desire only and the sense vichāra may be obtained by way of ārthika i.e. implied meaning. The sense desire itself can provide the subject matter etc. This is rejected by pointing out that mere desire cannot provide the subject matter etc. in advance. The desire can arise only after these are known.

i) भामत्यां तु न जिज्ञासा नाम विचारः। इच्छायां सन् विधानात्। शास्त्रप्रवृत्त्यङ्ग विषयप्रयोजनसूचनेन स्वार्थपरत्वोपपत्तेः विचारे लक्षणा न युक्ता। विचारस्तु आर्थिकोऽर्थः। ज्ञातुमिच्छाहि सन्दिग्धे विषये निर्णयाय भवति।

ii) विषयाद्यभावादिच्छाभावं वदन्तं प्रति इच्छायाः विषयादिसूचनायुक्तेः।

In advaita it is considered that such portion of Veda wherein sacrifices etc. karmas are described is interpreted in Pūrvamīmānsā. Here in Uttara mīmānsā the portion of Veda that deals with brahman which is siddhavastu is interpreted. Therefore, the former does not make the latter unnecessary.

Rejection of the bifurcation of Veda as Kāryaniṣtha and Vastuniṣtha

यत्तु परैः अस्य शास्त्रस्य पूर्वतन्त्रेण गतार्थत्वमाशङ्क्य तत्र कार्यनिष्ठो वेदभागः विचारितः इह तु वस्तुनिष्ठो विचार्यत इत्यगतार्थत्वमुक्तम्। तन्न।

Such a bifurcation cannot be worked out. Even in Uttara mīmānsā upāsanās which are of the form of karma are described. Certain upāsanās like udgīthopāsana are

particularly based on karma. This will be out of place if the above bifurcation is accepted. Advaita does not consider upāsanā as the means of liberation. Therefore, considering certain portion as dealing with karma and other portion as dealing with brahman does not work out. The entire Veda conveys brahman, the karma and devatā are conveyed by way of avāntara tātparya i.e. subordinate items.

i) इह अतत्त्वभूतोपास्यसविशेषब्रह्मविचारस्य उपासनापादे तद्विधिविचारस्य चायोगात्। न चोपासना मन्मत इव त्वन्मते मोक्षसाधनं येन फलसाधनादियुक्तब्रह्मविचारप्रतिज्ञानात् तद्विचारः सङ्गच्छेत।

ii) तस्मात् सर्वस्यापि वेदस्य ब्रह्मपरत्वात् सर्वोपीहैव विचार्यः। कर्मदेवमीमांसयोः वेदैकदेशावन्तर तात्पर्यविषयकर्मदेवताविचारः।

Rejection of the formulation of Vipratipatti

In advaita, vipratipatti i.e. the two sides for discussion to raise a discussion about brahman, is worked out in another way : whether brahman is the same as pratyagartha i.e. jīva or distinct from it, and whether jīva is distinct from body etc or not. The first alternative is सामान्यविप्रतिपत्ति and the second is विशेष विप्रतिपत्ति।

This statement can be understood in three ways :

i) तत्पदार्थं बिम्बभूतं ब्रह्म उद्दिश्य त्वंपदार्थप्रत्यगर्थाभेदविधानेन (ii) त्वंपदार्थमुद्दिश्य तत्पदार्थविधानेन (iii) उभयत्र विरुद्धांशत्यागेन ऐक्यमात्रविधानेन (प्र.)

In the first alternative both सामान्य विप्रतिपत्ति and विशेष विप्रतिपत्ति relate to Jīva : whether jīva is identical with brahman or identical with body etc.

This विप्रतिपत्ति is not in respect of brahman but it is in respect of jīva. Thus it is व्यधिकरण.

i) यदापि परैः ब्रह्मणः जिज्ञास्यत्वार्थमेव प्रत्यगर्थे अहं ब्रह्मास्मीति प्रत्यक्त्वरूपेण सामान्येन विप्रतिपत्तिः। चार्वाकादीनामहमर्थे देहेन्द्रियमनःशून्यब्रह्मत्वादिविप्रतिपत्तेः विशेषविप्रतिपत्तिश्चेत्युक्तं तद् व्यधिकरणम्।

The second alternative i.e. त्वं पदार्थमुद्दिश्य तत् पदार्थविधान i.e. whether brahman is identical with jīva, also does not hold good. This results in making प्रत्यक् as जिज्ञासाधर्मि which is not mentioned in the sūtra.

नापि देहत्वादिना विप्रतिपन्नः प्रतिबिम्बः प्रत्यगर्थ एव जिज्ञासाधर्मी प्रतीचो ब्रह्मत्वेन जिज्ञासा ब्रह्मजिज्ञासेति युक्तम्। सूत्रे अश्रुतप्रत्यक्पदकल्पनापातात्।

The third alternative viz उभयत्र विरुद्धांशत्यागेन ऐक्यमात्रविधान also does not work. This amounts to the identity of चिन्मात्र itself but not of brahman and jīva who are विशिष्ट. Brahman is no longer the उद्देश of जिज्ञासा.

विरुद्धांशत्यागेन मुखमात्रस्येव चिन्मात्रस्यैव अभेदस्वीकारेण विशिष्टयोः बिम्बप्रतिबिम्बयोः अभेदाभावेन ब्रह्माभेदविधानाय तस्य उद्देश्यत्वासम्भवाच्च ।

It cannot be claimed that to avoid व्यधिकरणत्व we formulate विप्रतिपत्ति as ब्रह्म प्रतीचः अन्यत् न वा avoiding a reference to body etc. This goes against the observations in the bhāṣya.

अथ जिज्ञासा धर्मिणि ब्रह्मण्येव प्रतीचोऽन्यत् न वा इति विप्रतिपत्तेः न वैयधिकरण्यम् । तर्हि भवदीयभाष्ये इह सूत्रे प्रतीचि देहत्वादिविप्रतिपत्त्युक्तिः उत्तरसूत्रे जीवाद् भेदकस्य लक्षणस्योक्तिश्च अयुक्ता ।

Finally, a discussion could be raised about such an entity that is known in a general way and it has to be known in a particular way. In the case of nirviśeṣa brahman no such distinction as known generally but not known in a particular way can be made.

i) ज्ञातं सामान्यतो यत्तु विशेषेण विचार्यते ।
ज्ञाताज्ञातविभागस्तु निर्विशेषे न युज्यते ॥

तदुक्तमनुव्याख्याने 'इदमित्त्थमिति ज्ञानं जिज्ञासायाः प्रयोजनमिति ।

In view of this, Brahman i.e. Viṣṇu who is an ocean of auspicious qualities is the subject matter of jijñāsa.

तस्मात् शास्त्रेण जिज्ञास्यमस्मदीयं गुणार्णवम् ।
वासुदेवाख्यमद्वन्द्वं परं ब्रह्माखिलोत्तमम् ॥

जन्माधिकरणम्

Definition of Brahman

In this adhikaraṇa Brahman is defined as sṛṣṭyadikartā. In the earlier adhikaraṇa he was described as guṇapūrṇa and his jijñāsā was enjoined. Guṇapūrṇatva is the main definition of brahman. In order to support and explain guṇapūrṇatva this definition is given. Brahman is already distinguished from jīva in the earlier sūtra on the ground that he is guṇapūrṇa while jīva is not. Another important ground of distinction viz. sriṣṭyadikartṛtva is stated here.

This is neatly stated in Chandrikā

i) जिज्ञासाकारणीभूतगुणपूर्तिप्रसिद्धये ।
जिवादिभेदकं विष्णोः विश्वकर्तृत्वमुच्यते ॥ (ता.चं.)

ii) उक्तं च सुधायाम्– अनेन लक्षणेन लक्षिते ब्रह्मणि समस्तगुणपूर्णत्वं प्रधानलक्षणं सिद्धयति । (प्र.)

Explanation of sangaṭi

For this adhikaraṇa sangaṭi is explained in two ways : i) आक्षेपिकी सङ्गतिः (ii) प्रपञ्चप्रपञ्चक भावसङ्गतिः ।

i) पूर्वोक्तजिज्ञासाक्षेपेण इह पूर्वपक्षोत्थानात् पूर्वाधिकरणेन आक्षेपिकी सङ्गतिः ।

ii) यावत् जीवभेदकं नोच्यते तावदत्र श्रुतौ रूढित्यागेन बाधकाभावेन ब्रह्मपदाद् योगासिद्ध्या गुणपूर्त्यसिद्धेः न जिज्ञासा युक्ता इति पूर्वपक्षे तदाक्षेपात् सङ्गतिः ।

In the previous adhikaraṇa the word brahman is taken to mean brahman but not jīva on the ground that this word conveys guṇapūrṇatva. This meaning is obtained by yogavṛtti i.e. etymological explanation. However, this word conveys jīva by rūdhi i.e. the meaning by usage. Between the two rūdhi has to be preferred to yoga. Hence, brahman in the sense of Viṣṇu cannot be the subject matter of jijñāsā. It is only the jīva who is the subject matter of jijñāsā. In this way the pūrvapakṣa of this adhikaraṇa is formulated by raising an objection against the siddhānta of previous adhikaraṇa. Hence, the ākṣepa i.e. raising an objection, is the sangati for this adhikaraṇa. This sangaṭi is worked out in Chandrikā.

It is also stated that as per Nyāyasudhā prapañchyaprapanchaka bhāva sangati also can be worked out. In the previous adhikaraṇa brahman is stated as the subject matter of jijñāsā. Such jijñāsā has to be made by giving the definition and pramāṇas. Between these two the definition has to be given first. That is given in this adhikaraṇa. This results in the prapañchya-prapañchaka bhāva relation between the two.

i) आद्यसूत्रे साधनादिसहितं ब्रह्म विचार्यमित्युक्तम् । ब्रह्मणश्च अभ्यर्हितत्वात् आदौ तज्जिज्ञासैव प्राप्ता । सा च लक्षणप्रमाणाभ्याम् । तत्रापि लक्षणविशिष्टे प्रमाणाकाङ्क्षा इति लक्षणस्य प्राथम्यमिति प्रकारान्तरेण अधिकरणसङ्गतिरुक्ता ।

ii) प्रकारान्तरेणेति अनेन प्रपञ्चप्रपञ्चकभावलक्षणा सङ्गतिरुक्ता भवति । (पां)

Pūrvapakṣa view

In this adhikaraṇa the question whether the word brahman conveys brahman or jīva is raised. To decide this, a further question is raised whether there is any ground to reject the rūdhī meaning and take the yaugika meaning of the word brahman. Further, whether the sṛṣṭyādikartṛtva stated in the earlier sentence 'yato vā imāni bhūtāni jayante' etc could be some how applied to jīva or not is also discussed.

अत्र 'तद्विजिज्ञासस्व तद्ब्रह्म' इति वाक्यस्यं ब्रह्म किं जीव उत विष्णुरिति चिन्ता । तदर्थं ब्रह्मशब्दस्य रूढ्यर्थजीवत्यागेन यौगिकार्थविष्णु ग्रहणे हेतुः नास्ति उत अस्तीति । तदर्थं यतो वेत्यदिपूर्ववाक्यं किं जीवे कथञ्चित् नेतुं शक्यमुत अशक्यमिति । (ता.चं.)

Pūrvapakṣin argues that the word brahman has to be taken in the sense of jīva for the following reasons.

i) जीव एव इदं ब्रह्म । बृह् जाति जीवेत्यभिधानात् ब्रह्मशब्दस्य तत्र रूढेः । विष्णौ तु यौगिकत्वात् । रूढेः योगात् बलीयस्त्वस्य रथकारादिशब्देषु स्थितत्वात् ।

i) The word brahman conveys jīva by rūdhi and Viṣṇu by yoga. Rūdhi has to be preferred to yoga.

ii) This word cannot be applied to jīva also by yoga, since the yaugika sense guṇapūrṇatva is not found in jīva.

न च जीवे योगाङ्गीकारात् रूढिः अक्लृप्तेति वाच्यम् । यौगिकार्थस्य गुणपूर्तेः जीवे असम्भवात् ।

iii) In the instance 'तदेव ब्रह्म परमं कवीनाम्' समुद्रशायित्व etc attributes come in the way of taking the word brahman in the sense of jīva. Here, no such consideration comes in the way of taking it as jīva.

तथा च तदेव ब्रह्म परममित्यादौ रूढिबाधकसमुद्रशायित्वादिलिङ्गाद् विष्णुपरत्वेपि तद्विजिज्ञासस्वेत्यत्र न तत्परता ।

iv) It is claimed that the sṛṣtikartṛtva is stated to brahman in the previous sentence 'यतो वा इमानि भूतानि.' Hence, the word brahman cannot convey jīva. However, jīva also can be considered as sṛṣtikartā, since, sṛṣti takes place by the adṛṣta of jīvas.

न च जीवपरत्वे यतो वेत्यदिपूर्ववाक्योक्तकारणत्वमेव बाधकम् । जीवस्यापि अदृष्टद्वारा तत्र हेतुत्वोपपत्तेः ।

v) It may also be noted that in the injunction 'आत्मा द्रष्टव्यः' the word आत्मन् that refers to jīva is used. This indicates that jīva is the subject matter of jijñāsā.

अत एव 'आत्मा द्रष्टव्यः' इत्यादौ जिज्ञासाविधायकवाक्ये जीवे प्रसिद्धात्मपदप्रयोगः ।

iv) Strictly speaking brahman cannot be defined as जगत्कारण since he is निष्क्रिय and निर्विकार.

ब्रह्मणो निष्क्रियत्वेन कर्तृत्वस्य निर्विकारत्वेन उपादानत्वस्य च असम्भवेन कारणत्वस्य ब्रह्मपक्ष एव बाधकत्वात् । (ता.चं.)

All these claims of pūrvapakṣin are rejected in siddhānta.

Siddhānta view

i) The Śruti 'यतो वा इमानि भूतानि जायन्ते' clearly states that brahman i.e. Viṣṇu is the cause of the world. Jīva cannot be the cause. He cannot be considered as the cause, since, a cause through its adṛṣta cannot be considered as cause in its primary sense.

The śruti य उ त्रिधातु etc clearly states that Viṣṇu is the cause. Hence, in यतो वा इमानि etc also he has to be taken as the cause. If jīva is considered as cause through his adṛṣṭa, then, the words जात etc cannot be taken in their primary sense.

The expression अभिसंविशन्ति in this śruti states that brahman is attained by the liberated. Jīva is not attained by the liberated.

(i) 'य उत्रिधातु पृथिवी' इत्यादि श्रुतिभिः विष्णवेकनिष्ठस्य कारणत्वस्य जिज्ञास्ये यतो वेत्यादिना श्रवणात् । तस्य च अनुपपत्त्या रूढेरपि बाधात् । अदृष्टद्वारा कल्पकत्वेन वा जीवकारणत्वे जातानि पदानां मुख्यार्थत्यागापत्तेः ।

(ii) अभिसंविशन्तीति मुक्तप्राप्तत्वस्य सर्वथानुपपत्तेः ।

ii) Later in the Brahmasūtra itself jīva's कर्तृत्व is denied in the sūtra 'इतरव्यपदेशात् ।

i) जीवकर्तृतायाश्च इतरव्यपदेशादित्यादिसूत्रेषु निराकरिष्यमाणत्वात् ।

ii) नहि जन्मादिहेतुत्वं जीवस्य जगतो भवेत् । हिताक्रियादिदोषत्वं वक्ष्यत्येव स्वयं प्रभुः ।

iii) The expression आत्मा refers to Brahman as stated in the śruti 'आत्मा नारायणः परः' and also as per द्युभ्वाधिकरणन्याय ।

iv) सत्यकामत्व etc attributes cannot be the attributes of jīva सत्यकामत्वादीनां सर्वथा अनुपपत्तेः ।

v) The निष्क्रियत्वश्रुति should not be literally taken since कर्तृत्व etc activities are stated to brahman in a large number of śrutis.

vi) The word brahman conveys Viṣṇu by विद्वद्रूढि also. विद्वद्रूढि is preferable to अज्ञरूढि 'सविष्णुराहहि तं ब्रह्मेत्याचक्षते' इति प्रयोगबाहुल्यरूपरूढेः ब्रह्ममीमांसान्तिमसूत्रे अभिहितत्वात् । (प्र.)

The superiority of विद्वद्रूढि compared with अज्ञरूढि is explained by giving a number of Pūrvamīmānsā examples.

vii) In the śrutis 'नारायणोऽसौ परमो विचिन्त्यः' 'नारायणं महाज्ञेयम्' etc नारायण is stated as the object of jijñāsā.

Stating the pūrvapakṣa and siddhānta as stated in Tīkā, Chandrikā narrates the same as stated in Nyāyasudhā.

An alternate view of pūrvapakṣa and siddhānta stated in Nyāyasudhā

In Sudhā the two sides are stated as 'whether the word brahman conveys jīva who is well known or some other meaning. It is argued that if the second alternative is accepted, then, the other meaning has to be fixed, the word has to be invested with the power to convey this meaning, and the intention to convey such a meaning has to be

envisaged. This is a round about way of obtaining the other meaning. This is gaurava. On the other hand if jīva is taken as the meaning conveyed by the word brahman, no such round about procedure is required, there will be lāghava.

i) सुधायां तु ब्रह्मशब्दः किं प्रसिद्ध जीवपरः उत अर्थान्तरपरः इति सन्दिह्य अन्त्ये स्वार्थस्य तद्वाचितायाः तत्र तात्पर्यस्य च कल्पनेन गौरवम् ।

ii) आद्येतु लाघवम् । जीवस्य अकल्प्यत्वात्, शक्तेरपिक्लृप्तत्वात् अबाधेन तात्पर्यस्यापि सिद्धत्वात् इति पूर्वपक्षितम् ।

As against this, siddhāntin points out that the well known meaning jīva has to be given up, because, in the earlier sentence, brahman is stated as the cause of creation etc which is not applicable to jīva.

सिद्धान्तस्तु 'यतो वा इमानि भूतानि जायन्ते' इत्यादिवाक्यशेषात् ब्रह्मशब्दस्य प्रसिद्धार्थपरित्यागेन अलौकिकार्थपरत्वोपपत्तिः ।

The purpose of this adhikaraṇa as stated in Anuvyākhyāna

In Anuvyākhyāna the purpose of this adhikaraṇa is explained in another way. In first adhikaraṇa brahman is declared as jijñāsya on the ground that he bestows liberation. But he also bestows bondage. Therefore, he can as well be ajijñyāsya. This adhikaraṇa removes this objection by pointing out he is sṛṣṭyadikartā. He bestows liberation if he is pleased. On the other hand he bestows bondage if he is not pleased. Therefore, jijñāsā has to be undertaken to obtain his grace.

अनुव्याख्याने तु मोक्षदत्वात् ब्रह्म जिज्ञास्यमित्युक्तं प्रथमसूत्रे । मोचकत्वेन विष्णुः जिज्ञास्यश्चेत् बन्धकत्वेन अजिज्ञास्योपि स्यात् इति प्राप्ते अप्रसन्नस्य बन्धकत्वं प्रसादहेतोः जिज्ञासायाः कर्तव्यत्वानुकूलमेव न तु प्रतिकूलम् । सूत्रे सृष्ट्यादिहेतुत्वोक्तिस्तु मोचकत्वसम्भावनार्थेति सिद्धान्त इति ।

The review of Bhāmati view

In Bhāmati जगदुत्पत्तिकारणत्व is stated as the definition of brahman. This definition does not hold good, since, brahman is the substratum for the bhrama i.e. projection, and therefore cannot be its cause. Sūkti is not the cause of rajata. If it is argued that to be substratum itself is to be the cause, then, the statement as जन्म becomes meaningless.

i) तदुत्पत्त्यादितु (लक्षणं) भविष्यति

ii) तदुत्पत्त्यादीति तदुत्पत्तिकारणं लक्षणमित्यर्थः (पां.)

iii) जिज्ञास्यत्वेन आद्यसूत्रे प्रकृतस्य निर्विशेषब्रह्मणः भ्रमाधिष्ठानत्वेन अकारणत्वाच्च ।

The review of Rāmānuja view

In Rāmānuja bhāṣya the question whether brahman can be comprehended through a definition or not is raised. By way of pūrvapakṣa it is argued that जन्म etc can neither define brahman by way of viśeṣaṇa nor by way of upalakṣaṇa.

i) न तावत् जन्मादयः विशेषणत्वेन लक्षयन्ति विशेषणस्य स्वाश्रये सर्वविशेषधर्मकत्वेन एकस्मिन् अनेकविशेषणायोगेन अनकविशेषणाश्रयस्य ब्रह्मणः अनेकत्वप्रसङ्गात् ।

If many attributes are given as the definitions of one and the same entity, the unity of the entity will be broken. Therefore, janma etc adjectives cannot be brahman's definitions.

These cannot be the definitions by way of upalakṣaṇa also. In the case of upalakṣaṇa one object is indicated by another. Here there is no second entity by which brahman can be indicated.

नापि उपलक्षणतया उपलक्ष्याकारान्तराप्रतीतेः ।

Therefore, जन्मादि etc cannot constitute the definition of Brahman. तस्मात् जन्मादिवाक्यं न ब्रह्म लक्षयितुं शक्तम् इति प्राप्ते ।

Stating the pūrvapakṣa as given above, siddhānta is stated that such attributes that are not opposed to each other do not break the unity.

अस्तु तावद् विशेषणत्वं । न च ब्रह्मणः अनेकत्वप्रसङ्गः विशेषणानां स्वविरोधिधर्मव्यावर्तकत्वात् । जन्मादीनां कालभेदेन अविरोधात् ।

Stating the above pūrvapakṣa and siddhānta as stated in Rāmānuja bhāṣya, Chandrikā remarks, according to Rāmānuja janma etc belong to the kārya stage, the difference among the adjectives at this stage cannot introduce any break at the kāraṇa stage.

किञ्च जन्मादयः इत्यत्र जन्मादिशब्देन कार्यावस्थागतोत्पत्तिविवक्षायां तद्भेदे न तदनाश्रयब्रह्मभेदाशङ्का ।

Further, to resolve the difficulty stating that sṛṣti, sthiti etc take place at different times, therefore, these attributes do not break the unity is also not correct. Brahman has the capacity to create even during pralaya.

सिद्धान्ते कालभेदेन अविरोधोक्तिश्च अयुक्ता । लयादिकाले सामर्थ्यरूपायाः सृष्ट्यादिकारणतायाः सत्त्वात् ।

The expression जन्मादि conveys सृष्टि, स्थिति etc eight activities

The expression जन्मादि in the sūtra stands for सृष्ट्याद्यष्टक i.e. creation etc eight states.

i) The śruti यतो वा इमानि भूतानि mentions सृष्टि, स्थिति, प्रलय and मोक्ष.

ii) य आत्मानमन्तरो यमयति mentions नियमन

iii) 'त्वं मुक्तिदः बन्धदः' 'त्वं ज्ञानदः त्वमज्ञानदः' mention नियमन etc.

Though there are many more states of objects, only those that are particularly stated in the context of jijñāsā and helpful to obtain God's grace are mentioned.

यद्यपि चेतनस्थानि सुखदुःखादीनि अचेतनस्थानि वृद्धिह्रासादीनि सन्ति तथापि विचारविधायक नानावाक्यपरामर्शेन स्कान्दे सूत्रकृतैव अष्टकर्तृत्वेन लक्षणस्य उक्तत्वात् ।

Chandrikā explains the purpose served by each of the eight definitions in bringing out the glory of God. The idea of समुदायलक्षण is rejected and it is stated that these eight are separate definitions.

i) केचित्तु अनेकलक्षणवैयर्थ्यात् जन्मादिहेतुत्वसमुदायः एकं लक्षणम् । तत्र ।

ii) तस्मात् जन्मादिहेतुत्वं प्रत्येकं लक्षणम् ।

The review of स्वरूपलक्षण and तटस्थलक्षण

Chandrikā reviews the advaita concepts of स्वरूपलक्षण and तटस्थलक्षण in detail.

The following definitions of these two are quoted and rejected.

के ते स्वरूपतटस्थलक्षणे–

i) लक्ष्यगतागते वा ii) सत्यासत्ये वा iii) यावत् स्वबोध्यव्यावृत्तिभावि–अभाविनी iv) यावल्लक्ष्यभावि-अभाविनी v) लक्ष्यान्तर्गतानन्तर्गते vi) निरुपाधिकसोपाधिकरूपे vii) स्वतोव्यावर्तकव्यावर्तकान्तरोपस्थापकरूपे viii) विशेषणोपलक्षणरूपे

All these are examined in detail and rejected. We will notice only three to give an idea of the nature of these definitions.

The first definition लक्ष्यगत is स्वरूपलक्षण and लक्ष्यागत is तटस्थलक्षण does not work, because, the crow which is supposed to be तटस्थलक्षण is found in लक्ष्य i.e. the home of Devadatta. On the other hand आनन्द which is स्वरूपलक्षण is not present in brahman since it is identical with brahman. Thus both definitions fail in these instances.

i) काकादेः गृहे सत्त्वेन स्वरूपलक्षणत्वापातात् ।

ii) आनन्दादेः स्वरूपलक्षणत्वाभावप्रसङ्गाच्च । तस्य ब्रह्मैक्येन तदनिष्ठत्वात् ।

The second definition viz सत्यासत्ये which means अनध्यस्ताध्यस्ते also fails in the case of the crow and home, since the crow is not अध्यस्त on the home काकादेः गृहादौ अकल्पितत्वात् ।

The definitions लक्ष्यान्तर्गत is स्वरूपलक्षण and लक्ष्यानन्तर्गत is तटस्थलक्षण also do not work. By the expression अन्तर्गत, if लक्ष्यैकदेशत्व is meant the अखण्डत्व of brahman will break down.

In this way all definitions of these concepts are rejected.

Chandrikā concludes this discussion with the following observations :

असाधारणधर्मोहि लक्षणं परिकीर्त्यते ।
तच्च निर्धर्मिक ब्रह्मवादिनां युज्यते कथम् ॥
स्वरूपं वा तटस्थं वा लक्षणं भेदकं मतम् ।
सजातीयाद् विजातीयात् तच्चाद्वैतिमते कथम् ।
न च मिथ्याभेदसिद्धयै मिथ्यालक्षणकीर्तनम् ।
मुमुक्षुं तत्त्वजिज्ञासुं प्रति शास्त्रेषु शोभते ॥

A distinct attribute is given as definition of an object. Brahman has no attributes according to advaita. Therefore, the question of giving a definition of brahman does not arise in advaita. A definition is intended to distinguish the object defined from the objects of the same class or different class. Since, there is no second object in advaita the question of distinguishing brahman from other objects does not arise. Hence, no purpose is served by giving a definition of brahman. To talk of an unreal definition to achieve an unreal difference does not befit a philosopher.

शास्त्रयोनित्वाधिकरणम्

Śruti is the source for the knowledge of Brahman

In this adhikaraṇa it is stated that śruti and such of the āgamas that are in tune with śruti are pramāṇas to know the jagatkaraṇa. Anumāna and the āgamas that are not in agreement with śruti are not the pramāṇas. The śruti and Śaḍāgamas declare that Viṣṇu is jagatkāraṇa. Therefore, Rudra etc who are claimed to be jagatkāraṇa on the basis of inference and such āgamas that are not in agreement with śruti are not jagatkāraṇa. In view of this the definition jagatkāraṇatva applies to Viṣṇu only but not to Rudra etc others. Hence there is no ativyāpti of this definition in Rudra etc.

उक्तस्य लक्षणस्य अतिव्याप्तिनिरासाय प्रमाणमुच्यते ।

Explanation of sangaṭi

Chandrikā states that the सङ्गति of this adhikaraṇa with previous adhikaraṇa is अनन्तरसङ्गतिः । This remark of Chandrikā is elaborated in prakāśikā as under :

i) पूर्वोक्तमुपजीव्य अस्य प्रवृत्तेः उपजीव्योपकभावरूपा वा ।

ii) एतस्मिन् सति पूर्वप्रमेयसिद्धेः हेतुहेतुमद्भावो वा

iii) पूर्वोक्तमतिव्याप्तमिति आक्षिप्य समाधीयते इति आक्षेपिकी वा सङ्गतिः ।

The themes of शास्त्रयोनित्वाधिकरण and स्मृत्यधिकरण do not overlap

Before the presentation of pūrvapakṣa and siddhānta of this adhikaraṇa an interesting question is raised viz the theme of this adhikaraṇa is repetition of the theme of स्मृत्यधिकरण (II-1-1). In both these adhikaraṇas the contention of Sāmkhya, Pāśupata etc viz. Rudra etc are also jagatkāraṇa is rejected.

ननु एतत् स्मृत्यधिकरणेन पुनरुक्तम् । तत्रेव अत्रापि साङ्ख्यशुपतादि- दुरागमानामपि निरासात् ।

Before the final solution is given to this problem, some tentative solutions are suggested and their unsuitability is pointed out.

i) अत्र कर्तृत्वादिकं विष्णोः अन्यस्य वेति सन्देहः । तत्र तु विष्णोः कर्तृत्वादिकं युक्तमयुक्तं वा ।

The question posed here is whether jagatkartā is Viṣṇu or some one else, while in the other adhikaraṇa the question raised is whether the kartritva of Viṣṇu is based on sound reason or not?

This criterion to distinguish the theme of the two adhikaraṇas is not sound. When by the same siddhānta both the doubts could be removed, there is no need to formulate two seperate adhikaraṇas. एकेनैव सिद्धान्तेन सन्देहद्वयनिरासात् ।

ii) तत्र समयविगानं सन्देहबीजं अत्र तु पूर्वन्यायप्रसिद्धीति ।

In स्मृत्यधिकरण pūrvapakṣa is based on समय i.e. opposition from a system of philosophy, in this adhikaraṇa it is based on the opposition to the point made in the previous adhikaraṇa.

This is also not a sound ground to distinguish the two adhikaraṇas. The opposition to the point made in this adhikaraṇa is also based on samaya only.

iii) अत्र दृष्टफलेषु संवादेन प्रामाण्ये प्राप्ते दृष्टफलेष्वेव विसंवादेन अप्रामाण्यमिति सिद्धान्तः । तत्र तु सर्वज्ञत्वादिना प्रणीतत्वात् प्रामाण्ये प्राप्ते प्रबलस्मृत्यदिविरोधात् विप्रलम्भमूलमप्रामाण्यमिति सिद्धान्तः ।

In this adhikaraṇa संवाद and विसंवाद of दृष्टफल are the basis of pūrvapakṣa and siddhānta while in the other adhikaraṇa सर्वज्ञप्रणीतत्व and प्रबलस्मृतिविरोध are the basis.

This is also not a sound ground since दृष्टफलविसंवाद is made a ground in the other adhikaraṇa also under the sūtra 'इतरेषां च अनुपलब्धेः'.

Explaining the unsatisfactory nature of these solutions Chandrikā offers final solution.

उच्यते । तत्र पाशुपत्यादिस्मृत्या पूर्वपक्षे पञ्चरात्रादिस्मृत्या सिद्धान्तः । अत्र तु स्मृत्यनुमानाभ्यां पूर्वपक्षे श्रुत्यादिरूपेण शास्त्रेण सिद्धान्तः । अत एव तत्र सूत्रे नान्यस्मृतीति स्मृतिशब्दः । अत्र तु शास्त्रशब्दः ।

In स्मृत्यधिकरण pūrvapakṣa is made on the basis of पाशुपतस्मृति and siddhānta is stated on the basis of पञ्चरात्रस्मृति. Here pūrvapakṣa is based on smṛti and anumāna and siddhānta is based on śāstra i.e. śruti.

The ground for distinguishing these two adhikaraṇa may be stated in another way also.

यद्वा अत्र अनुमानेन पूर्वपक्षे तदयोग्यत्वेन सिद्धान्तः । तत्र तु शैवाद्यागमेन पूर्वपक्षे तदप्रामाण्येन सिद्धान्तः इति भेदः।

In this adhikaraṇa pūrvapakṣa is based on anumāna while siddhānta states the jagatkāranatva cannot be settled by anumāna. In स्मृत्यधिकरण the pūrvapakṣa is based on Śaivāgama etc and siddhānta states that these are not pramāṇa.

A third way is also suggested अत्र विष्णोः अन्येषां च कारणत्वमिति समुच्चायेन लक्षणस्य अतिव्याप्त्या पूर्वपक्षे विष्णोरेवेत्यवधारणेन सिद्धान्तः । तत्र तु विष्णोः कारणत्वं न इति असम्भवेन पूर्वपक्षे अस्तीति सिद्धान्तः ।

Here, pūrvapakṣa is based on अतिव्याप्ति of the definition in other than Viṣṇu and Siddhānta affirms Viṣṇu alone is jagatkāraṇa. In Smṛtyadhikaraṇa pūrvapakṣa is based on असम्भव i.e. the definition does not apply to Viṣṇu at all, and siddhānta affirms that it is found in Viṣṇu.

The purpose served by these two adhikaraṇas is quite different.

किञ्च अस्य समन्वयप्रस्तावाय उक्तलक्षणे ब्रह्मणि प्रमाणप्रतिज्ञार्थत्वेन स्वपक्षसाधकोपन्यासपरत्वात् । तस्य च समन्वयोपपादकाविरोधव्युत्पादनाय बाधकोद्धारपरत्वात् द्वयमर्थवत् ।

Here, pramāṇa is stated for the definition of brahman to develop स्वपक्ष while in the other adhikaraṇa to remove the opposition for समन्वय an objection is rejected. In this way these two adhikaraṇas serve different purposes.

Similarly, there is no repetition in the case of रचनानुपपत्त्यधिकरण and पत्यधिकरण also. In the first the kartṛtva of pradhāna is rejected on the ground that it is achetana and in पत्यधिकरण the kartritva of Śiva is rejected on the ground that he has drawbacks like birth etc. The aprāmaṇya of the respective āgamas is not made a ground.

'रचनानुपपत्तेश्च नानुमानम्' पत्युरसामञ्जस्यादित्यादौ तु प्रधानस्य अचेतनत्वात् शिवादेश्च जननाददिोषवत्वात् न कर्तृत्वयोग्यता इति वक्ष्यते । न तु तत्तदागमाप्रामाण्यमिति न तेनापि पुनरुक्तिः ।

Pūrvapakṣa view

Clarifying that there is no पुनरुक्ति Chandrikā proceeds to state pūrvapakṣa. Here, whether jagatkāraṇatva belongs to Viṣṇu or someone else also has to be considered. For this purpose it has to be considered whether jagatkāraṇatva could be established by anumāna or not.

अत्र जगत् कारणत्वं किमन्यस्यापि किं वा विष्णोरेवेति चिन्ता । तदर्थं कारणत्वं किमनुमानादि-विषयत्वयोग्यमुत अयोग्यमिति ।

Pūrvapakṣin argues that Rudra etc can be established as kartā by anumāna. Therefore, the definition jagatkāraṇatva applies to Rudra etc also.

अनुमानेन रुद्रादीनामपि कारणतासिद्धेः अतिव्याप्तिः ।

The following anumāna is proposed to establish Rudra as the agent.

क्षित्यादिकं सकर्तृकं कार्यत्वात्. Though this anumāna establishes an agent in a general way, with the support of āgama it may be made clear that Rudra is the agent referred to here.

यद्यपि कार्यत्वाद्यनुमानात् कर्तृमात्रं सिद्ध्यति न तु शिवादिः कर्तेति । तथापि श्रुत्युक्ते कर्तरि न पर्यवस्यति किन्तु आगमोक्ते कर्तरि ।

Pūrvapakṣin proposes the anumāna in another way also.

शिवो जगज्जन्मादिकर्ता सर्वज्ञत्वात् । सर्वज्ञत्वादिकं च आगमसिद्धमिति आगमसहायेन अनुमानेन इह पूर्वपक्षः।

Siddhānta view

Presenting the pūrvapakṣa as stated above Chandrikā states siddhānta with an impressive example. Just as the eye is not able to comprehend rasa and gandha, anumāna is not able to convey brahman, and dharma.

चक्षुरादि यथाशक्तं रसगन्धादिवस्तुषु । अनुमापि तथाशक्ता धर्मब्रह्मादिवस्तुषु ॥

Anumāna is not the means to know the cause of the world. न अनुमानं जगत्कारणे प्रमाणम् ।

The review of advaita interpretation

In Śaṅkarbhāṣya the expression शास्त्रयोनि is explained as शास्त्रस्य योनिः and interpreted as brahman is the cause of the śruti. It is stated that this fact indicates that brahman is omniscient.

अत्र परेषां भाष्ये शास्त्रस्य योनिरिति विग्रहमाश्रित्य ऋगादिकारणत्वं ब्रह्मणः इह उच्यते। पूर्वसूत्रे अर्थलब्धस्य सार्वज्ञस्य स्फोरणार्थमित्युक्तम्।

This explanation does not hold good for the following reasons :

i) According to Advaita कारणत्व of brahman is of the nature of भ्रमाधिष्ठानत्व. Such kāraṇatva cannot convey sārvajñatva.

त्वदभिमतभ्रमाधिष्ठानरूपकारणत्वेन सार्वज्ञालाभात्।

ii) There is no special reason to indicate सर्वज्ञत्व without indicating सर्वशक्तिमत्व etc other attributes.

पूर्वसूत्रे अर्थलब्धसर्वशक्त्यादित्यागेन सार्वज्ञस्यैव स्फोरणे निमित्ताभावाच्च।

iii) It is not convincing that the omniscience that was indicated by the creatorship of the whole world is indicated by the creation of vedas.

जगन्निर्माणेन अस्फुटीकृतस्य सार्वज्ञस्य तदेकदेशशास्त्रनिर्माणेन स्फुटीकरणायोगाच्च।

iv) It is also not correct to say that omniscience is indicated to exclude kāraṇatva for the prakṛti of the sāmkhyas. For this purpose it is sufficient to say that prakṛti is achetana while brahman is chetana.

i) जगत्कारणत्वं प्रधानादिव्युदासेन ब्रह्मण्येव साधयितुं हेतुत्वेनोक्तं सार्वज्ञं शास्त्रयोनित्वेन साध्यते इति चेन्न (प्र.)

ii) साङ्ख्याभिमताचेतनकारणातायाश्च चेतनत्वमात्रेण निषेधसम्भवात्।

Further, the nature of the creation of śruti cannot be properly explained. It cannot be 'अर्थमुपलभ्य रचयितृत्वं प्रणेतृत्वम्.' This will make it pauruṣeya पौरुषेयत्वापातात्. It cannot also be अध्यापकवदुच्चारयितृत्वमात्रम्. This will not make him omniscient. तेन सार्वज्ञासिद्धेः।

Vivaraṇa explains the position between brahman and śruti as यथा दीपगता प्रकाशनशक्तिः वन्हौ तथा वेदगता सर्वप्रकाशनशक्तिः तदुपादाने ब्रह्मणि. This claim misses an important point. The relation between brahman and its effect is not of परिणाम but it is अध्यस्त. Therefore, कार्यशक्ति cannot be traced to कारणशक्ति. परिणामिपरिणामयोः एकशक्तित्वेपि कथमधिष्ठानाध्यस्तयोः तत्।

The stand that Veda is the projection of विज्ञानशक्ति of brahman will also lead to complication. Avidyā, ākāśa etc are also the projections of brahman. These also will have to be treated as सर्वप्रकाशक.

एतेन अधिष्ठानस्य ब्रह्मणः विज्ञानशक्तिविवर्तरूपं शास्त्रमिति निरस्तम्। अविद्याकाशादेरपि तद्विवर्तत्वेन शास्त्रवत् सर्वप्रकाशकत्वापातात्।

Kalpataru tries to find another justification for this interpretation of adhikaraṇa. Jagatkāraṇatva of brahman may be objected on the ground that Vedas are not created. To ward off this objection, it is stated here that Vedas have arisen from brahman.

अथवा वेदनित्यत्वात् ब्रह्मणो विश्वयोनिता । नेति शङ्कामपाकर्तुं शास्त्रयोनित्वमुच्यते ॥

On this claim it is pointed out that this doubt is to be raised in वियत्पाद but not here. Otherwise even in respect वियत् such a doubt will be required to be discussed here only.

i) ब्रह्मेतरसर्वानित्यत्वप्रतिपादके वियत्पादे वक्तव्यत्वात् । अन्यथा वियदादावपि एवमाशङ्कायामत्रैव तन्निरासः स्यादिति भावः ।

There is no difference between a vedic teacher reciting Veda and brahman reciting it. Hence, he cannot be assigned a special status of śāstrayonitva. किञ्च अध्यापकेपि पूर्वपूर्वसदृशानुपूर्वीरचयितृत्वस्य भावात् अभिनवानुपूर्वीरचयितृत्वस्य च ब्रह्मण्यपि अभावात् अध्यापकादधिकस्य शास्त्रयोनित्वस्य ब्रह्मणि असिद्धिः ।

The review of Rāmānuja interpretation

After reviewing the pūrvapakṣa and siddhānta as per advaita interpretation, Chandrikā reviews Rāmānuja interpretation.

The pūrvapakṣa states that jagatkāraṇatva is not conveyed by Veda. It is established by inference. It is only restated in Veda. Therefore, there is no need of any jijñāsā.

जगत्कारणं न वेदवाक्यप्रतिपाद्यम् । अनुमानेन सिद्धेः तथा च वाक्यानामनुमानप्राप्तानुवादित्वेन अविचार्यत्वमिति प्राप्ते ।

Siddhānta states that brahman is beyond senses. Therefore, pratyakṣa does not help to know him. Kāryatvānumāna suffers from drawbacks. Therefore, Veda only conveys him.

अत्यन्तातीन्द्रियत्वेन प्रत्यक्षाद्यविषयत्वात् । कार्यत्वाद्यनुमानानां दुष्टत्वेन ईश्वरासाधकत्वात् वेदान्तवेद्यत्वमिति अननुवादकानां वेदान्तानां विचार्यत्वम् ।

However, according to Rāmānuja bhāṣya the śruti यतोवा इमानि भूतानि itself is a restatement of kāraṇatva stated in other śruti statements. Therefore, brahmalakṣanatva has to be enjoined on kāraṇatva obtained from other śruti statements. This means that brahmalakṣaṇa statement is not a restatement. To make this a restatement brahmalakṣaṇatva itself has to be stated as obtained by inference in pūrvapakṣa and this has to be rejected in siddhānta.

अत्र ब्रूमः । यतो वेत्यादिवाक्यं प्रसिद्धार्थयच्छब्दयोगात् वाक्यान्तरसिद्धकारणत्वानुवादेन तस्य लक्षणत्वविधायकमिति ते मतम् । यथोक्तम् 'यच्छब्दयोगात् कारणत्वमनूद्यते' इति 'ब्रह्मलक्षणत्वमेव अस्य वाक्यस्य विधेयमिति' च । एवं च कारणत्वस्य आनुमानिकत्वेपि तदनुवादेन लक्षणत्वविधायकस्य यतो वेत्यादेः अनुवादकत्वसिद्धेः तत् सिद्ध्यर्थं कारणत्वस्य ब्रह्मलक्षणत्वमानुमानिकमिति पूर्वपक्षितव्यम् । तदेव च शास्त्रयोनीति सिद्धान्तयितव्यम् ।

In these remarks two points have to be noted. Rāmānuja bhāṣya makes आनुमानिकत्व of कारणत्व the ground of pūrvapakṣa and वेदवेद्यत्व of कारणत्व the ground of siddhānta. However, in the review it is pointed out that आनुमानिकत्व of ब्रह्मलक्षण has to be made the ground for pūrvapakṣa and वेदवेद्यत्व i.e. शास्त्रयोनित्व, the ground of siddhānta.

Further, not only the कारणवाक्यऽ are जिज्ञासा विषय but the statements like सत्यकामः सत्यसङ्कल्पः etc are also जिज्ञासाविषय since these are discussed in some later adhikaraṇas.

The review of वर्णकान्तर of Advaita

Reverting to the वर्णकान्तर of advaita by interpreting शास्त्रयोनित्व as शास्त्रप्रमाणकत्व, the question is raised whether शास्त्र is प्रमाण in respect of कारणत्वादिविशिष्ट ब्रह्म or निर्विशेषब्रह्म. In the first alternative it amounts to teaching अतात्विक, in the second stating the definition etc is contradiction. This is made clear in anuvyākhyāna.

सर्वधर्मोज्झितस्यास्य किं शास्त्रेणाधिगम्यते । मिथ्याधर्मविधातुश्च वेदस्यैवाप्रमाणता ।
यत् सत्यं नैव तद्वेद्यं यद्वेद्यं तच्च नैव सत् । इति ते समयस्तत्र कुत्रार्थे शास्त्रमानता ।।

समन्वयाधिकरणम्

In this adhikaraṇa whether śāstra, i.e. śruti, conveys Viṣṇu only as jagatkāraṇa or some one else also is raised. To decide this, a further question whether the purport of śruti is to be determined by śaivāgamas that explain śruti or by upakrama etc canons of ascertaining the purport is raised. To utilise these canons to settle the purport the relative priority of these also has to be examined.

अत्र शास्त्रयोनित्वं किमन्यस्यापि किं वा विष्णोरेवेति चिन्ता । तदर्थं वेदतात्पर्यनिश्चयः किं शैवागमादिना किं वा उपक्रमादिना इति । तदर्थं उपक्रमादेः बलाबलव्यवस्थानं न सम्भवति उत सम्भवतीति ।

Pūrvapakṣin's arguments against the usefulness of Upakrama etc canons

Pūrvapakṣin argues that śaivāgamas are a kind of commentary on Veda. These state Rudra etc as jagatkāraṇa. A text has to be understood as explained in the commentary.

The śruti 'सर्वे वेदा यत्पदमामनन्ति' is interpreted in āgamas in favour of Śiva, though pañcharātra states Viṣṇu alone is kāraṇa.

पूर्वपक्षस्तु कारणत्वस्य शास्त्रयोनित्वेपि अतिव्याप्तिः । शैवाद्यागमात् वेदव्याख्यानरूपात् रुद्रादेः कारणत्वे वेदतात्पर्यनिश्चयात् । न चैवं पञ्चरात्रादिना विष्णावपि तात्पर्य निश्चयापत्तिः । तथापि सिद्धान्त्यभिप्रेता-वधारणासिद्धेः ।

Pūrvapakṣin further argues that upakrama etc. do not help to determine the purport of Vedas. He examines these and points out the drawbacks in each case. उपक्रमादि तु न तात्पर्यनिश्चायकम् ।

1&2) उपक्रमः, उपसंहारः – In the context of अश्वप्रतिग्रहेष्टि in upakrama it is stated that he who gives the horses should perform this ritual. In upasamhāra it is stated that he who receives the horses should perform this ritual. In this way upakrama and upasamhāra contradict each other. Therefore these do not help to determine the purport.

अश्वप्रतीग्रहेष्टिः उपक्रमाद् दातुः उपसंहात् प्रतिग्रहीतुरिति प्रसङ्गात् ।

3) अभ्यासः – Abhyāsā i.e. repetition, is also not of any help to determine the purport. Repetition of the same point does not strengthen it.

अभ्यासोऽपि न तात्पर्यधीहेतुः । असकृदुक्तेः वैयर्थ्यात् ।

4) अपूर्वता – Apūrvatā i.e. already not comprehended by another pramāṇa, also does not help to determine the purport of veda. In this case the veda will not be pramāṇa to convey the reality of the world, difference between the world and brahman etc which are already comprehended by pratyakṣa.

मानान्तराग्रह्यतारूपापूर्वतापि न तात्पर्यधीहेतुः । जगत्सत्यत्वजीवेशभेदादिग्राहिप्रत्यक्षेण गृहीतार्थायाः श्रुतेः अतात्पर्यप्रसङ्गात् ।

5) फलम् – The result also does not help to determine the purport of Veda. In this case, such of the śruti statements that enjoin नित्यकर्म which have no result will have to be treated as not conveying any meaning. फलमपि न तात्पर्य धीहेतुः । अश्रुतफलानां नित्यादिवाक्यानामतात्पर्यापातात् ।

6) अर्थवादः– Arthavāda also does not help to determine the purport. There are many statements in Veda that are not associated with any arthavāda.

7) उपपत्तिः– Upapatti i.e. reason also cannot help. Neither a reason stated in śruti itself, nor an outside reason can be utilised to determine the purport of Veda. Veda is

स्वतः प्रमाण. If a reason is utilised to determine the purport of Veda its प्रमाणान्तरानपेक्षत्व will be given up. तस्मात् न उपक्रमादिना तात्पर्यनिर्णयः किन्तु सर्वज्ञपणीतागमादेव ।

The above pūrvapakṣa is based on the consideration that the śaivāgama is a kind of commentory on vedas. Therefore, the purport of veda be understood in the light of śaivāgama.

One more pūrvapakṣa is formulated on the ground that the very veda also states in the passage 'ज्ञात्वा शिवं हिरण्यगर्भं' etc. that Rudra etc are jagatkāraṇa. There is no other statement or other pramāṇa that contradicts it. If such clear vedic statements are to be interpreted differently on the basis of upakrama etc then it amounts to thursting the interpreter's idea on apauruṣeya veda. Hence, Rudra etc also have to be taken as jagatkāraṇa.

i) यद्वा शास्त्रात् रुद्रादेः कारणता तावत् भाति । तत्र शास्त्रतात्पर्यं च अबाधितप्रतीत्या निश्चीयते । नहि रुद्रादेः कारणत्वे शास्त्रादन्यद् बाधकमस्ति ।

ii) यदि च पौरुषेयेण पूर्वापरपरामर्शेन शब्दस्वरसप्रतीतत्यागः तदा पुरुषोत्प्रेक्षया अपौरुषेयः शब्दः बाध्येत ।

The first pūrvapakṣa is stated in nyāyavivaraṇa the second is stated in bhāṣya while in tīkā these two are put together.

टीकायां प्रतीतिसम्प्रीचीनेन आगमेन एक एव दृढः पूर्वपक्षः दर्शितः ।

Siddhānta justifies the utilisation of upakrama etc

Siddhānta points out that the import of āgama which is supposed to be the commentary on veda also has to be determined by upakrama. Therefore, it is better to directly apply these criteria to comprehend the purport of veda itself.

अनिश्चिततात्पर्यस्य आगमस्य शास्त्रतात्पर्यानिश्चायकत्वात् उपक्रमादिभिः आगमतात्पर्यनिश्चये वेदेपि तैरेव तन्निश्चयोऽस्तु ।

व्याख्यातृवचनानां यैः लिङ्गैः तात्पर्यनिश्चयः । उपक्रमाद्यैः तैरेव श्रुतितात्पर्य निर्णयः ॥

आपातजप्रत्ययाश्च परस्परविरोधिनः । अविरुद्धा प्रतीतिस्तु पूर्वापरविमर्शजा ॥

आपाततो भ्रमप्राप्तमर्थं हित्वा विमर्शतः । गहनश्रुतितात्पर्य विषयोऽन्विष्यते यतः ।

नहीक्षुलेहनेनैव ज्ञात इक्षुरसो भवेत् । नचेक्षुदण्डं निष्पीड्य लब्धो नेक्षुरसो भवेत् ॥

नहि अनन्तशाखात्मकत्वात् स्वरूपेणैव अपरिच्छेद्यो नानानिगमनिरुक्तव्याकरणादीना विना दुर्बोधपदार्थः नानान्यायकलापं च विना दुरधिगमवाक्यार्थः वेदः सुबोधार्थः । (ता.चं.)

Pūrvapakṣin had argued that Upakrama etc canons to determine the purport really do not help. Siddhānta rejects his contention and explains the utility of these canons as under :

अभ्यासः– Abhyāsa i.e. repetition is helpful to convey the difficult points and the points that appear impossible. Only in such cases where the point already clearly known is repeated it is a drawback.

दुरधिगमे असम्भाविते अर्थे तात्पर्याभावशङ्कानिरासार्थमसकृदुक्तिश्च अर्थवती । यत्र केवलं ज्ञातज्ञापकता तत्रैव पौनरुक्त्यं दोषः ।

अपूर्वता– Apūrvatā i.e. the nature of being new is violated only if the matter was already known by an evidence not dependent on the new evidence. If the other evidence is dependent on the new evidence it does not take away the apūrvatā of the new evidence. For instance, dharma, adharma etc are conveyed by smṛti also. This does not take away the apūrvatā of śruti evidence in these matters, since, smṛti evidence is dependent on śruti evidence in this respect. Similarly, sarvajñatva of God established by anumāna does not take away the apūrvatā of śruti in this respect.

i) अपूर्वता तु स्वबोधनीयपुरुषगताज्ञानादिविरोधिना स्वानुपजीविमानान्तरेण अग्राह्यार्थत्वम् ।

ii) वेदार्थस्य धर्माधर्मादेः ईश्वरसार्वज्ञादेः स्वोपजीविना स्मृतिवाक्येन सर्वकर्तृत्वाद्यनुमानेन च ग्राह्यत्वेपि तयोः वेदोपजीवित्वात् वेदस्य अपूर्वता ।

Pūrvamīmānsā instances of apūrvatā

In this context Chandrikā quotes a number of pūrvamīmānsā instances and points out in which respect there is apūrvatā and in which aspect there is no apūrvatā. We may notice a few instances.

i) अवघातादेः वैतुष्यसाधनतायाः वेदानुपजीविमानान्तरग्राह्यत्वेन व्रीहीनवहन्तीत्यादेः अपूर्व विधित्वासम्भवात् नियमविधित्वमाश्रितम् ॥

In the statement 'व्रीहीनवहन्ति' grinding of the paddy to prepare purodaśa is stated. The fact of grinding is comprehended by pratyakṣa. Therefore, it cannot be apūrvavidhi. Therefore, it is considered as niyamavidhi. The apūrvavidhi is meant to enjoin something new while niyamavidhi restricts to one act among known alternate acts. The paddy could be utilised for purodaśa by removing the husk by nail etc also. However, by niyamavidhi it is restricted to grinding only.

ii) दध्ना जुहोति इत्यादेः गुणविधेः स्वानुपजीविना अग्निहोत्रं जुहोति इत्यादिना ग्राह्यार्थत्वात् न होमांशे अपूर्वता । किन्तु तदग्राह्य दध्यादौ ।

In the injunction 'दध्ना जुहोति' होम is already enjoined by अग्निहोत्रं जुहोति, therefore, there is no apūrvatā in this respect, while in respect of the subbordinate item दधि there is apūrvatā since it is not already enjoined.

iii) एवं देवतासहितकर्मविधायकस्य ब्राह्मणवाक्यस्य स्वविहिते कर्मणि देवतासमर्पकं मन्त्रं प्रति उपजीव्यत्वात् देवतांशे अपूर्वता मन्त्रस्य तु तदंशेपि न अपूर्वता ।

The brāhmaṇa statement that enjoins the ritual with devatā has apūrvatā both in respect of ritual and devatā while mantra has no apūrvatā in respect of devatā.

Giving many pūrvamīmānsā instances as stated above, Chandrikā points out that the śruti statement 'विश्वं सत्यम्' has अपूर्वता even though the जगत् सत्यत्व is comprehended by प्रत्यक्ष because some schools of philosophy have contested it.

एवं वादिविप्रतिपत्तिजन्यातत्वावेदकत्वशङ्काकलङ्कितेन असर्वविषयेण प्रत्यक्षेण विश्वं सत्यमित्यादिवाक्येनेव जगत्सत्यत्वाप्राप्तेः तद्वाक्यस्यापूर्वता ।

अर्थवादः– In respect of arthavāda two important observations are made :

i) स्तुतौ निन्दायाम् एककर्तृकोपाख्यानरूपपरकृतौ बहुकर्तृकोपाख्यानरूपपुराकल्पे च अर्थवादशब्दो अक्षादिशब्दवत् नानार्थः ।

There are four types of arthavādas. The expression conveys all these. Therefore, this word is a word that conveys many meanings.

This statement is made to meet the objection- ननु स्तुत्यादीनामनेकेषाम् कथमर्थवादशब्दवाच्यत्वं चतुर्षु अनुगमकोपाधेरभावात् इत्यतः आह स्तुतौ इत्यादि । (प्र.)

ii) Now, to meet the above objection.

अभियुक्तप्रयोग or विधिशेषत्व may be taken as अनुगमकोपाधि ।

मन्त्रशब्दवदभियुक्तप्रयोगरूपानुगमकोपाधिको वा विधिशेषत्वरूपैकाधिको वा इति द्रष्टव्यम् ।

Upasamhāra is superior to upakrama

उपसंहारः is superior to upakrama on two grounds : i) Upasamhāra is a kind of explanation of upakrama, therefore what is stated in upasamhāra has to be preferred to that of upakrama.

ii) Unless the earlier statement is rejected the later statement will not have any scope. Therefore, upasamhāra is to be preferred to upakrama.

i) निश्चितप्रामाण्यव्याख्यानुसारेण व्याख्येयस्य नेयत्वात् ।

ii) पूर्वाबाधे उत्तरस्यानुत्थानात् उपक्रमादुपसंहारस्य प्राबल्यम् ।

To explain this position a few pūrvamīmānsā instances are quoted.

i) वासः परिधत्ते यत् क्षौममित्यत्र यत् क्षौममित्युपसंहारेण वासः परिधत्ते इति उपक्रमस्थवासःशब्दस्य क्षौमपरत्वं दृष्टम् (पां.)

ii) 'श्रद्धां जुहोती'त्युपक्रमात् 'इति तु पञ्चम्यामाहुतौ आपः' इति उपसंहास्य प्राबल्यम् ।

Pūrvapakṣin had stated that upakrama is preferred to upasamhāra on the basis of वेदोपक्रमाधिकरणनय and अश्वप्रतिग्रहेष्टिनय । Chandrikā points out that both these do not support the preferability of upakrama.

i) नचैवं वेदोपक्रमाधिकरणविरोधः । नहि तत्र 'उच्चैः ऋचा क्रियते' इति उपसंहारस्थ ऋगादिशब्दः 'त्रयो वेदाः' इति उपक्रमस्थवेदशब्दमात्रात् लाक्षणिकः । किन्तु 'अग्नेः ऋग्वेदः वायोः यजुर्वेदः' इति वेदशब्दाभ्यासात् ।

In Vedopakramādhikāraṇa, the words ऋक्, यजुस् etc occur in upasamhāra individually. In upakrama the word Veda occurs in a general way. However, it is decided that the words ऋक्, यजुस् etc should be taken in a general way as Vedas. This is claimed to be the ground for the superiority of upakrama. But taking the words ऋक्, यजुस् etc in a general way as veda is not because of the occurrence of the word veda in upakrama but because it repeatedly occurs in the passage 'अग्नेः ऋग्वेदो वायोः यजुर्वेदः' etc. Here अभ्यास is the ground to take the words ऋक्, यजुः etc in a general way as Veda but not upakrama.

ii) नाप्यश्वप्रतिग्रहेष्टिनयविरोधः । तन्त्रसारे मैत्रयणीशाखायां दात्रुपक्रमतोपि ऋते कर्माङ्गत्ववशादेव व दातुः इष्टिः प्रतीयते इति उपक्रमं विनैव दातुः इष्टिरिति उक्तत्वात् ।

In अश्वप्रतिग्रहेष्टिनय the conclusion that the giver of the horses should perform the इष्टि is not based on the ground that it is stated so in upakrama but on the ground that it is अङ्गकर्म. It is a general rule that he who performs प्रधानकर्म should perform अङ्गकर्म.

दातुरिष्टिरिति स्वीकारो न उपक्रमप्राबल्यात् । किन्तु इयमिष्टिः वैदिककर्माङ्गं न स्वतन्त्रेति व्यवस्थापनात् अङ्गप्रधानयोः एककर्तृकत्वनियमेन कर्तुः दातुरेव इयं इष्टिरिति सिद्धति ।

Among upakrama etc the later is superior to the earlier

अभ्यासः– It is already stated that abhyāsa i.e. repetition is not a drawback but it is a help to determine the purport. Here, it is made clear that it is superior to upakrama and upasamhāra. For instance, in ānandamayādhikaraṇa it is concluded that ānandamaya etc refer to brahman on the ground that the word brahman repeatedly stated.

एवम् उपसंहारादिरूपसकृदुक्तितः असकृदुक्तिरूपाभ्यासस्य प्राबल्यम् । यथा आनन्दमयाधिकरणे 'तस्यैष शारीर आत्मा यः पूर्वस्य' इति जीवप्रापकोपसंहाराद् ब्रह्मशब्दाभ्यासस्य ।

अपूर्वता– The nature of अपूर्वता and its utility to determine the purport is already explained. Here its superiority to अभ्यास is explained.

A new import is superior to mere frequent statement. For instance, in इतरव्यपदेशाधिकरण in the statement जीवाद् भवन्ति भूतानि जीवे तिष्ठन्त्यचंचलाः' etc the expression jīva repeatedly occurs. However, there is novelty in interpreting this word as referring to brahman. This statement refers to ब्रह्मप्रादुर्भावः.

फलम्– फल is superior to अपूर्वता.

अर्थवादः– एवं फलमात्रात् करणाकरणयोः इष्टानिष्टकथनादिरूपार्थवादस्य प्राबल्यम् । अर्थवाद is superior to फल.

उपपत्तिः– Upapatti is Superior to arthavāda. For instance, under the sūtra पृथगुपदेशात्. भिन्नोऽचिन्त्यः परमो जीव सङ्घात् etc that states जीवब्रह्मभेद giving reason is preferred to abheda śruti that has arthavāda.

यथा पृथगुपदेशादित्यत्र सार्थवादाभेदश्रुतितः 'भिन्नोऽचिन्त्यः परमो जीवसङ्घात्' इति सोपपत्तिकभेदश्रुतेः ।

It was argued by pūrvapakṣin that if śruti requires reasoning to determine its purport, then, its self validity will be affected.

This is answered by pointing out that if reason is utilised to ascertain the purport of the passage that will not affect prāmāṇya, it will be affected if the reason is utilised to fix the individual meaning.

न च तात्पर्यनिर्णयाय श्रुत्युक्तायाः अनुक्तायाः वा उपपत्तेः अपेक्षायामनपेक्षत्वरूपप्रामाण्यहानिः । किन्तु निर्णीते तस्मिन् अर्थनिर्णयाय तदपेक्षायाम् ।

Explaining the priorities of upakrama etc as later is superior to earlier Chandrikā concludes the discussion by quoting anuvyākhyāna.

उपक्रमादिलिङ्गानां बलीयो हि उत्तरोत्तरम् । श्रुत्यादौ पूर्वपूर्वं च ब्रह्मतर्क विनिर्णयात् ॥

ऐकरूप्यम्– The passages wherein upakrama and upasamhāra conflict, the meaning has to be fixed resolving the conflict. This is known as ऐकरूप्यम्. This is separately stated in प्रमाणलक्षण. This ऐकरूप्य is superior to upasamhāra.

i) यत्र एकस्य अर्थस्य उपक्रममात्रम् उपसंहारमात्रं वा तत्र तन्मात्रादुपक्रान्तादिमात्रे अर्थे तात्पर्यम् । यत्र तु उभयं तत्र तदविरोधलक्षणैकरूप्यात् उभयानुगुणेन तात्पर्यम् । अत एव प्रमाणलक्षणे उपक्रमोपसंहारतदैकरूप्याभ्यासापूर्वता फलार्थ वादाश्चेति तदैक्यरूप्यं पृथगुक्तम् ।

ii) अत्र टीकायां तदैक्यरूप्यस्य पृथगनुक्तिस्तु अन्यत्रोक्तत्वात् ।

iii) उपसंहारादैकरूपस्य बलवत्त्वम् ।

These upakrama etc are शब्दप्रमाण in respect of their meaning, but these are of the nature of लिङ्ग i.e. हेतु in respect of तात्पर्य.

i) एतच्च उपक्रमादिकं स्वार्थे शब्दात्मकमपि महावाक्यतात्पर्ये लिङ्गं च ।

ii) उपपत्तिस्तु स्वार्थेपि लिङ्गरूपा तात्पर्येपि ।

After explaining the upakrama etc canons of determining the purport, Chandrikā explains the import of समन्वयसूत्र as under :

सूत्राक्षरार्थस्तु – ततु ब्रह्मैव शास्त्रयोनि सम्यक् अन्वयात्' उपपत्त्यादेः लिङ्गात् ।

The nature of सम्यक्त्व is explained as सावकाशत्व निरवकाशत्वादिना विचारितस्वरूपत्वम् ।

Brahman is conveyed by śāstra duly interpreted by the application of the criteria of upakrama etc by examining the सावकाशत्व, निरवकाशत्व of the same.

The review of advaita interpretation

Chandrikā reviews the pūrvapakṣa and siddhānta formulated by Advaita. Pūrvapakṣa states that śruti cannot convey brahman which is सिद्धवस्तु. It does not lead to any initiative nor to any result. Further, the statements about सिद्धवस्तु are anuvādaka and dependent upon pratyakṣa etc other pramāṇas.

वेदान्ताः ब्रह्मणि न प्रमाणम् । सिद्धवस्तुबोधने प्रवृत्त्याद्यभावेन फलाभावात् सापेक्षत्वप्रसङ्गाच्च ।

Siddhānta answers these two objections as follows : By the knowledge ब्रह्मात्मैक्यज्ञान there will be ब्रह्मप्राप्ति. By the realisation that the jagat and jīva are projected the bondage of these will be eliminated.

i) तत्र ब्रह्मात्मैक्यज्ञानात् प्राप्तब्रह्मप्राप्तिः, कल्पितत्वेन नित्यहीनसंसारहानिश्च सम्भवतीति फलवत्त्वम् ।

Though brahman is सिद्धवस्तु as it is not known by any other pramāṇa, the statements about it in śruti are not anuvādaka i.e. neither mere restatements nor dependent upon other pramāṇas like pratyakṣa.

सिद्धस्यापि ब्रह्मणः मानान्तरागोचरत्वात् न सापेक्षत्वम् ।

Stating the pūrvapakṣa and siddhānta as narrated above the advaita explains the nature of समन्वय as अखण्डार्थत्व.

समन्वयश्च लक्षणया अखण्डार्थत्वम् । ततश्च तत् ब्रह्म शास्त्रप्रतिपाद्यं समन्वयादिति सूत्रार्थः ।

The above pūrvapakṣa and siddhānta formulated by advaita are not proper. The first point raised in pūrvapakṣa viz. there is no prayojana is already answered in jijñāsūtra by advaitin. The second point viz. सापेक्षत्व will arise only in the case of pauruṣeya statements. Therefore, formulation of pūrvapakṣa on these two grounds is not justified.

The siddhānta also is not justified. The very attempt of samanvaya of śruti in respect of brahman fails for the following reasons.

i) Since brahman is स्वप्रकाश there is no room for any doubt in respect of its nature.

ii) Since brahman cannot be conveyed by the words, it is beyond śruti.

iii) Since, it is निर्विशेषचिन्मात्र there cannot be any समन्वय of śruti.

स्वप्रभत्वादसन्दिग्धे अवाच्यत्वात् श्रुत्यगोचरे । निर्विशेषे च चिन्मात्रे कथं श्रुतिसमन्वयः ॥

iv) निर्विशेषात्मनि विषयसंशयपूर्वपक्षसिद्धान्तप्रयोजनाख्यपञ्चक- रूपाधिकरणासम्भवो द्रष्टव्यः ।

Chandrikā concludes the discussion by pointing out the irrelevance of the interpretation in respect of the first four sūtras.

i) In the first sūtra it is stated that brahman is comprehended through the experience 'अहम्'

ii) In the second sūtra a definition viz. जन्मादिकर्तृत्व that is not found in अहमर्थ is stated as its definition.

iii) In the third sūtra śāstra is stated as pramāṇa for nirviśeṣa brahman.

iv) In the fourth sūtra samanvaya of śruti in nirviśeṣa brahman is stated. However, later samanvaya in saviśeṣa brahman is worked out. From this it is clear that the whole interpretation is inconsistant.

आद्यसूत्रेऽहमर्थेहि प्रसिद्धिः प्रतिपादिता । जिज्ञासार्थं द्वितीये हि जगज्जन्मादिहेतुता ।

अविद्यमानाहमर्थे लक्षणत्वेन कीर्तिता ईश्वरस्य तृतीये तु निर्विशेषप्रमाणता ॥

शास्त्रस्योक्ता चतुर्थे च तस्मिन्नेव समन्वयः । प्रतिज्ञातोन्तरित्यादौ सविशेषं तु कथ्यते ।

ब्रह्मेति मायिनां पक्षः तत्र किं केन सङ्गतम् ।

The review of Rāmānuja's interpretation

According to Rāmānuja bhāṣya, here, pūrvapakṣa is made on the ground that śruti cannot convey brahman who is सिद्धरूप and siddhānta is based on the consideration that even सिद्धरूपब्रह्मज्ञान leads to results. However, it has to be pointed here that this consideration about सिद्धव्युत्पत्ति versus कार्यव्युत्पत्ति is already taken into account in the very first sūtra.

i) केचित्तु फलाभावात् सिद्धपरत्वं नेति प्राप्ते 'पुत्रः ते जातः' इत्यादौ सिद्धपरत्वेपि फलदर्शनात् न दोषः ।

ii) समन्वयश्च ब्रह्मणः अभिधेयत्वेन सम्बन्धः ।

iii) फलसद्भावेन सिद्धपरसर्ववाक्यविचारोपपादकस्य अस्य तदुपपादकाद्यसूत्रानन्तर्यस्यैव युक्तत्वात् ।

There is a very intersting observation in respect of the theme of first four sūtras in Rāmānuja tradition.

व्युत्पत्त्यभावः प्रतिपत्तिदौस्थ्यमन्येन सिद्धत्वमथाफलत्वम् ।
एतानि वै सूत्रचतुष्टयेन नारम्भमूलानि निराचकार ॥

This observation states that the four sūtras remove four objections against undertaking brahmajijñāsā. However, it has to be noted that the second sūtra gives the definition and the third sūtra gives pramāṇa. Therefore, strictly speaking śāstrārambha has already taken place.

जन्मादिसूत्रे लक्षणोक्त्या शास्त्रयोनिसूत्रादौ प्रमाणाद्युक्त्या ब्रह्मणो विचार्यमाणत्वेन उपोद्घातत्वायोगात् ।

ईक्षत्यधिकरणम्

The main points made in first four sūtras

At the commencement of this adhikaraṇa Chandrikā recapitulates the points made in the earlier four adhikaraṇas as under :

i) In the first sūtra गुणपूर्णत्व is stated as the प्रधानलक्षण of brahman.

ii) In the second sūtra जन्मादिकारणत्व is stated as the लक्षण of brahman with a view to support गुणपूर्णत्व.

iii) In the third sūtra śāstra is stated as the authority to know brahman.

iv) In the fourth sūtra it is stated that the entire śāstra conveys brahman by वाच्यवृत्ति.

In this adhikaraṇa objections are raised against the two points i) The entire Veda conveys brahman ii) It conveys by वाच्यवृत्ति i.e. expressed meaning. These two points were made in earlier adhikaraṇa by the expression सम् in the sūtra समन्वयात् ।

The purpose served by the sūtra गति सामान्यात्

It may be noted here that the sūtra 'गतिसामान्यात्' of this adhikaraṇa supports this meaning of सम् and it is rightly included under this adhikaraṇa.

अत एव गतिसामान्यादित्यस्य संशब्दार्थसमर्थनरूपतया ऐक्यादेतधिकरणान्तर्भावः ।

If this sūtra is not taken as supporting the meaning of सम् and treated only as शाखान्तरविरोधपरिहारक, then, it will have to constitute a separate adhikaraṇa. The fact of this sūtra supporting वाच्यत्व is also indicated by placing it before the sūtra श्रुतत्वाच्च which quotes the authority for वाच्यत्व of brahman.

i) अन्यथा गतिसूत्रस्य वेदानामनन्तत्वेन शाखान्तरे अन्यथात्वे शङ्किते शाखान्तरस्यापि प्रमाणत्वात् नैतच्छाखाविरोधः इत्येवंपरत्वात् सूत्रान्तराणां तु वाच्यत्वसाधकत्वात् अधिकरणभेदः स्यात् ।

ii) सूत्रकृता च 'श्रुतत्वाच्च' इत्यस्मात् प्रागेव तन्निवेशितम् ।

Pūrvapakṣa and Siddhānta views

The pūrvapakṣa and siddhānta of this adhikaraṇa are formulated as under : Pūrvapakṣin argues that śruti does not convey brahman, since, he is declared to be beyond words by śruti itself as 'यतो वाचो निवर्तन्ते' etc. It is true that ātman is stated to be the object of knowledge in the śruti 'पुरिशयं पुरुषमीक्षते.' He cannot be comprehended by any other pramāṇa. Śruti is the only pramāṇa to comprehend him. This requires that he has to be śruti vāchya. However, the ātman referred to in that śruti is gauṇa ātman i.e. jīva. So far as the śuddha ātman i.e. brahman is concerned, he is beyond words. Even if śuddha is taken as referred to in that śruti, he may be considered as conveyed by śruti by lakṣaṇāvṛti but not by vāchyavṛtti.

न ब्रह्मणि समन्वयो युक्तः । 'यतो वाचो निवर्तन्ते' इत्यादिश्रुतिभिः तस्य अवाच्यत्वात् । ननु पुरिशयं पुरुषमीक्षत इति ब्रह्मणः ईक्षणीयत्वं श्रुतम् । तच्च न शब्देतरेण । ब्रह्मणः औपनिषदत्वात् । शब्देन ईक्षणं च वाच्यत्वं विना न युक्तमिति चेन्न । तत्र ईक्षणीयत्वेन उक्तो हि सगुण आत्मा । स च वाच्य एव । यश्च अवाच्यः शुद्धः तस्य न ईक्षणीयत्वम् । अस्तु वा शुद्धस्य ईक्षणीयत्वं तथापि न वाच्यत्व सिद्धिः लक्षणया शब्दबोध्यत्वात् ।

Siddhānta points out that the ātman that is stated as to be known in the śruti has to be taken as śuddha ātman i.e. brahman only, since, its knowledge is intended to obtain liberation. This śuddha ātman i.e brahman cannot be treated as conveyed by lakṣaṇā, since, an entity that is not conveyed by any word by vāchyavṛtti cannot be conveyed by lakṣaṇāvṛtti. Further the words like nirguṇa, avāchya etc do convey śuddha ātman by vāchyavṛtti.

It cannot be argued that since śuddha ātman i.e. brahman is svaprakāśa i.e. self revealing, it need not be conveyed by śāstra. In this case the very śāstra becomes worthless.

i) सिद्धान्तस्तु न तावत् शुद्धस्य आत्मनः ज्ञेयत्वमेव नेति युक्तम् । सूत्रे आत्मशब्दे तन्निष्ठमोक्षोपदेशादिभिः ज्ञेयस्य शुद्धत्वोपपादनात् ।

ii) नापि तस्य ज्ञेयत्वेपि लक्षणयैव तदिति युक्तम् । वाच्यसंबद्धतया ज्ञातस्यैव लक्ष्यत्वात् ।

iii) किञ्च निर्गुण–अवाच्यपदानां सगुणं न वाच्यामिति शुद्धस्यैव तद्वाच्यसिद्धिः ।

The description of brahman in the śruti as avāchya, ajñeya etc. indicate that he cannot be easily comprehended but not that he cannot be comprehended at all.

अवाच्य अज्ञेयत्वादिश्रुतिस्तु अप्रसिद्धत्वाभिप्राया इति भाष्य एव उक्तम् ।

अद्भुतत्वादवाच्यं तत् अतर्क्याज्ञेयमेव च । अनन्तगुणपूर्णत्वादित्यूदे पैङ्गिनां श्रुतिः ।

After presenting the pūrvapakṣa and siddhānta, Chandrikā briefly states the points made in each sūtra and the purpose served by it for developing the theme of the adhikaraṇa.

i) सूत्रक्रमस्तु - आद्यसूत्रे साक्षाद् वाच्यत्वहेतोः ईक्षणीयत्वस्य उक्तिः ।

In the first sūtra ātman i.e. brahman is stated as vāchya i.e. conveyed by vāchyavṛtti on the ground that it is stated to be known in the śruti.

ii) द्वितीये तस्य व्यधिकरणासिद्ध्युद्धारः

In second sūtra the claim that ईक्षणीयत्व and वाच्यत्व stated in the śruti are that of saguṇa ātman i.e. jīva, therefore, śuddha ātman is not vāchya, is rejected.

इक्षणीयत्वस्य सगुणनिष्ठतया शुद्धे या असिद्धिः तदुद्धारः । (प्र.)

iii, iv) तृतीय चतुर्थयोः तदुद्धारकस्य अन्यथासिद्धिशङ्का निरासः ।

The claim that the word ātman refers to saguṇa i.e. jīva, and does not belong to śuddha ātman is rejected in the third and fourth sūtras.

i) सगुणे एव मुख्यत्वशङ्कानिरासः (प्र.) ii) आत्मशब्दस्य विष्णुपरत्वमिव गौणपरत्वमपि अस्तु इति शङ्कानिरासः (पां.)

v) स्वाप्ययस्य तु वाच्यत्वे परम्परया हेतुत्वात् पञ्चमता

The fifth sūtra supports vāchyatva through the śruti पूर्णमदः पूर्णमिदं etc. therefore it is placed as fifth sūtra.

vi) षष्ठे तु गौणात्मनि अपि स्वाप्ययादिः शाखान्तरे उच्यतामिति शङ्कानिरासः ।

In the sixth sūtra the objection that in other śākhās of veda, the suguṇa ātman i.e. jīva is also likely to have been stated as having the attributes of स्वाप्ययत्व etc. is rejected by pointing out there will be no dis agreement among different śākhas of Veda.

vii) श्रुतत्वाच्च इत्यत्र तु गतिसामान्यस्य श्रुतत्वादित्यस्यापि विवक्षितत्वात् तस्य अन्त्यता.

The sūtra श्रुतत्वात् is placed at the end as it is also intended to cover the point stated in गतिसामान्यात्.

The review of Advaita interpretation

Chandrikā reviews the advaita interpretation of this adhikaraṇa as follows :

Pūrvapakṣin argues that the śruti 'सदेव सोम्येदमग्र आसीत्' states that the achetana i.e. non-sentient prakṛti mentioned in sāmkhyasmṛti is the cause of the world. Against this siddhāntin points out that the cause is stated to know. Therefore, it has to be chetana i.e. sentient. Hence the non-sentient prakṛti cannot be the cause.

अन्येतु 'सदेव सोम्येदमग्र आसीदित्यादिकारणवाक्यं साङ्ख्यादि- स्मृतिसिद्धाचेतनकारणानुवादीति प्राप्ते ईक्षणेन चेतनकारणताप्रापकमिति सिद्धान्तः इत्याहुः ।

These pūrvapakṣa and siddhānta do not hold good. When chetana brahman is claimed to be the cause, it could be worked out in one of the three way by advaitin :

i) Viśiṣṭa brahman is pariṇāma kāraṇa.

ii) Viśiṣṭa brahman is agent.

iii) Śuddha brahman is adhiṣṭhāna for the projection of the world.

i) तत् किं विशिष्टस्य परिणामित्वमेतद् वाक्यबोध्यम्? ii) किं वा कर्तृत्वं बोध्यम् iii) यद्वा शुद्धस्य भ्रमाधिष्ठानत्वं बोध्यम् । None of these positions are justified.

i) According to advaita the viśiṣṭa brahman himself is a projection i.e. mithyā. Therefore, he cannot be referred to by the term सत् in the śruti 'सदेव सोम्य' etc to claim to be either परिणाम कारण or कर्ता. Further, in the previous adhikaraṇa it is stated by advaitin that all śruti passages refer to अखण्डचिन्मात्र. In view of this सत् has to refer to अखण्डचिन्मात्र only but not विशिष्ट ब्रह्मन्.

i) नाद्यद्वितीयौ विशिष्टे सदेवेत्यादिवाक्योक्तसत्त्वाद्ययोगात् ।

ii) पूर्वसूत्रे अखण्डे समन्वयस्यैव प्रतिज्ञातत्वेन अत्र अखण्डस्यैव वक्तव्यत्वात् ।

ii) Both in the second and the third alternatives the reply given relates to something different than the points made by pūrvapakṣin. Pūrvapakṣin talked of परिणाम of प्रकृति while siddhāntin talks of brahman as the agent and adhisthāna. This is not a reply to pūrvapakṣa but a different position from pūrvapakṣa.

i) द्वितीये वैयधिकरण्यं च । न हि प्रधानं परिणामि इति प्राप्ते ब्रह्म कर्तृ इति सिद्धान्तो युक्तः ।

ii) अत एव न तृतीयः । प्रधानं परिणामि इति प्राप्ते ब्रह्म अधिष्ठानमित्यस्य व्यधिकरणत्वात् ।

Moreover, if this adhikaraṇa is interpreted as a refutation of प्रधानकारणत्व then its right place would be fourth pāda.

Further, according to Sāmkhyas prakṛti is not aśabda. It is stated in the śruti 'अजामेकां लोहित शुक्ल कृष्णाम्' etc. On the contrary it is advaita brahman that is aśabda.

किञ्च अशब्दत्वं अवाच्यत्वं वा ब्रह्मण एव । साङ्ख्यमते तस्य वाच्यत्वात् । कारणत्वेनैव अजामित्यादि-श्रुतिसिद्धत्वात् ।

The review of Rāmānuja's interpretation

Chandrikā reviews the Rāmānuja interpretation of this adhikaraṇa also with the remark एतेन इदमधिकरणं प्रधानादेः जडस्य हेतुत्वनिरासकमिति केषाञ्चित् पक्षोऽपि अपास्तः ।

This adhikaraṇa cannot be interpreted by Rāmānuja as rejecting the कारणत्व and उपादानत्व of प्रधान, since, this status is accepted by him for प्रधान. The only condition inttroduced by him is, प्रधान is the body of परमपुरुष and it is not without him on its own.

न तावत् प्रधानस्य कारणत्वमुपादानत्वं वा निरसितुमिदमधिकरणम् । तयोः त्वन्मतेपि प्रधाने सत्त्वात् । उक्तं हि– न वयं अव्यक्तं तत्परिणामविशेषांश्च स्वरूपेण नाभ्युपगच्छामः । अपितु परमपुरुषशरीरतया तदात्मकत्वविरहेणेति ।

It should be further noted that just as प्रधान alone is not the cause, brahman alone is also not the cause. Therefore, nothing is gained by rejecting कारणत्व to प्रधान यथा च प्रधानं केवलं अकारणं तथा ब्रह्मपि । विशिष्टस्यैव कारणत्वात् ।

Chandrikā concludes the discussion of this adhikaraṇa commenting on the concluding remarks of Tīkā.

आनन्दमयाधिकरणम्

Four kinds of vedic words

At the commencement of ānandamayādhikaraṇa Chandrikā states the four types of vedic words the samanvaya of which is presented in the first chapter of Brahmasūtras.

वैदिकाः शब्दाः तावत् चतुर्विधाः अन्यत्रैव प्रसिद्धाः, उभयत्र प्रसिद्धाः, अन्यत्र प्रसिद्धाः, तत्र प्रसिद्धाः ।

The plan of the discussion of these words is, pāda I अन्यत्र प्रसिद्धनामात्मक शब्दाः II अन्यत्र प्रसिद्धलिङ्गात्मकशब्दाः III उभयत्र प्रसिद्ध शब्दाः IV) अन्यत्रैव प्रसिद्धाः ।

Chandrikā raises a discussion on the nature of these groupings and the possible over-lapping. The contingency of certain adhikaraṇas not properly fitting into this scheme is also raised. The objection raised in the course of this discussion are removed and the nature of the four types of words is neatly stated as under :

i) श्रुत्यन्तरादिभिः तुल्या उभयत्र प्रसिद्धता

ii) श्रुत्यादितो लोकतो वा इतरेषु प्रसिद्धता (अन्यत्रप्रसिद्धता)

iii) बलवत् श्रुतिलिङ्गाद्यैः अन्येष्वेव प्रसिद्धता (अन्यत्रैव प्रसिद्धता)

Such words that appear to convey brahman and others in viṣayavākya and some other śrutis are उभयत्र प्रसिद्ध words. In the case of these words, the other meaning only has to be given up.

ii) Such words that appear to convey only others than brahman in viṣayavākya are अन्यत्र प्रसिद्ध words. In the case of these words the other meaning has to be given up and the meaning i.e. brahman has to be confirmed.

iii) Such words that appear to convey others than brahman and also appear to be supported by śruti, liṅga etc are अन्यत्रैव प्रसिद्ध words. In the case of these words the other meaning has to be rejected appropriatly re-interpreting the supporting śruti and the meaning brahman has to be confirmed.

Chandrikā illustrates the samanvaya of these types of words in different adhikaraṇas. The observations in Tīkā in the course of the samanvaya are explained in detail.

The nature of नामात्मक and लिङ्गात्मक words

Chandrikā explains the nature of नामात्मक words and लिङ्गात्मक words as follows :

i) यानि आपततो रूढानि तानि नामानि । तद्विपरीतानि लिङ्गानि ।

The words that are usually taken as rūdha are nāma while other words are liṅga.

ii) अथवा यानि आपाततो रूढानि तानि नामानि । यानि आपाततः यौगिकानि तानि लिङ्गानि ।

The words that are usually taken as rūdha are nāma while the words that are etymologically explained are liṅga. आद्यपक्षे योगरूढानि लिङ्गानि । द्वितीयेतु नामलिङ्गोभयात्मकानि ।

The yoga rūdha words come under liṅga as per first explanation and come under both nāma and liṅga as per the second explanation.

Strictly speaking all words are यौगिक words. The God is conveyed by all words by way of yoga i.e. etymological explanation only. सर्वशब्दानां ब्रह्मणि 'यच्छब्दाः योगवृत्तयः' इति यौगिकत्वात् । To indicate this the expression आपाततः रूढानि is used.

Chandrikā explains the scheme of pāda also explaining the rationale behind it.

The review of Advaita scheme of pāda arrangement

In advaita bhāṣya, the basis of pāda arrangement is explained as under :

अन्ये तु प्रथमे स्पष्टब्रह्मलिङ्गानि उदाहरणानि । द्वितीयतृतीययोस्तु अस्पष्टब्रह्मलिङ्गानि । चतुर्थे प्रधानस्य अशब्दत्वोक्तिः ।

Such passages that clearly refer to brahman are discussed in the 1st pāda, the passages that refer to brahman without specifically indicating brahman are discussed in the second and third pādas. In the fourth pāda the fact that the prakṛti is not conveyed by śruti is discussed.

However, on closely examining it is found that this scheme is not strictly followed in advaita bhāṣya. For instance, in the second pāda सर्वात्मकत्व, पुण्यपापराहित्य, अमृतत्व, etc स्पष्टलिङ्ग passages are discussed. In the third pāda also अदृश्यत्व, अस्थूलत्व, परात् परत्व etc स्पष्टलिङ्ग passages are discussed. Similarly, आकाश, प्राण passages of 1st pāda are not स्पष्टब्रह्मलिङ्गक. From these instances it is clear that the above scheme is not properly followed.

The scheme that सविशेष passages are discussed in the second pāda and the निर्विशेष passages in the third pāda has also failed.

यच्च द्वितीये सविशेषं तृतीये निर्विशेषमित्युक्तं तदपि न ।

In the second pāda भ्रमाधिष्ठानत्व, कालत्रयातीतत्व, पूर्णसुखत्व, अदृश्यत्व etc are discussed. These are not the attributes of सविशेष. In third pāda सत्यकामत्व, दृश्यत्व, रूपित्व etc are discussed. These are not the attributes of निर्विशेष. Therefore, सविशेष-निर्विशेष scheme also is not strictly followed.

The position that अशब्दत्व of प्रधान is discussed in the fourth pāda also cannot be substantiated. अशब्दत्व of प्रधान is discussed only in three adhikaraṇas. In other adhikaraṇas the fact of certain passages dealing with jīva, the distinction between upādāna and nimitta etc are discussed. Thus, प्रधानाशब्दता न चतुर्थपादव्यापिनी.

The review of Rāmānuja's scheme of pāda arrangement

After reviewing advaita scheme of the arrangement of the theme of the first chapter, Chandrikā reviews the arrangement of Rāmānuja bhāṣya. According to Rāmānuja bhāṣya, जन्मादिकारणत्व definition given in the second sūtra has two implications viz Brahman is certainly kāraṇa, and no other is kāraṇa. The first is intended to remove असम्भव and the second is intended to remove अतिव्याप्ति. The first is established in the first pāda and the second is established in other three pādas.

केचित्तु जन्मादिसूत्रे ब्रह्म कारणमेव ब्रह्मैव कारणम् इति अवधारणद्वयं विवक्षितम् । तत्र लक्षणे असम्भवरूपायोगव्यवच्छेदः प्रथमपादे अतिव्याप्तिरूपान्ययोगव्यवच्छेदः त्रिपाद्याम् । तत्रापि अस्पष्टजीवादि-लिङ्गकानि वाक्यानि द्वितीये स्पष्टजीवादिलिङ्गकानि तृतीये तत्तत्प्रतिपादनच्छायानुसारीणि चतुर्थे ।

This scheme also does not work satisfactorily. According to Rāmānuja in ईक्षत्यधिकरण, प्रधानकारणता is rejected. Under 'कामाच्च नानुमानापेक्षा' जीवादिकारणता is rejected. This means that there is अतिव्याप्तिपरिहार in the first pāda also.

Another way of explaining the theme proposed in Rāmānuja bhāṣya is as under चिदचिद्विलक्षणं मूलकारणभूतं वस्तु प्रथमे पतिपाद्यते अथ तस्य गुणविशेषाः त्रिपाद्यामिति ।

In the first pāda the primary cause that is distinct from both चित् and अचित् is explained. In other three pādas the other attributes are explained.

This explanation also does not work well. In this case the discussion of अन्तस्थत्व, ज्योतिष्त्व etc in the first pāda will be out of place.

तत्र चिदचिद्विलक्षणत्वं यदि कारणत्वेनैव तदा अन्तर्ज्योतिरित्यादौ कारणत्वादन्यस्य अन्तस्थत्व ज्योतिष्त्वादेः उक्तेः अन्तरित्यादेरपि आद्यपादान्तर्गतिः न स्यात् ।

After reviewing the theme of the 1st chapter proposed by Śaṅkara and Rāmānuja, Chandrika explains the scheme of Saṅgati.

The scheme of sangaṭi

There are five Saṅgatis viz. i) शास्त्रसङ्गति ii) अध्यायसङ्गति iii) पादसङ्गति iv) श्रुतिसङ्गति v) अधिकरणसङ्गति.

The first three are अन्तर्भाव type and the last two are आनन्तर्य type.

शास्त्रेऽध्याये तथा पादे श्रुत्याधिकरणेन च । सङ्गतिः पञ्चधा प्रोक्ता सर्वाधिकरणेष्वपि ॥

तत्र चाद्यत्रिकं प्रायेणान्तर्भावात्मकं मतम् । उत्तरं तु द्वयं प्रोक्तमानन्तर्यात्मकं सदा ॥

Further, the ground of siddhānta is also found in the case of आनन्दमय। सङ्गति is also suggested by it.

हेतुव्यपदेशरूपसिद्धान्तहेतोः अधिकस्य तत्र सत्त्वात् । सर्वापेक्षितानन्दप्रदेत्यादिना प्रागुक्तसङ्गति-सूचनार्थत्वाच्च। (प्र.)

In the sūtra अभ्यास i.e. ब्रह्मशब्दाभ्यास i.e. repeated occurrence of the word brahman is given as the ground for taking आनन्दमय as referring to brahman. In this connection it should be noted that only in the case of आनन्दमय and विज्ञानमय there is repeated occurrence of the word brahman. In the case of अन्नमय etc other three the word brahman occurs only once. There is no अभ्यास i.e. repeated occurrence. This is carefully noted in the bhāṣya and Tīkā. However, this does not affect the position that अन्नमय etc also convey brahman. It may also be noted that the word ātman which is equivalent to brahman occurs repeatedly. This may also be taken as referred to by the word abhyāsa in the sūtra.

यद्वा ब्रह्मशब्दवत् 'अन्योन्तर आत्मा' 'एतमन्नमयमात्मानमुपसंक्रामति' इत्यादौ ब्रह्मशब्दसमानार्थात्म-शब्दसद्भावादभ्यासः ।

The word brahman occurs with anna etc in the next anuvāka. This also satisfies the requirement of abhyāsa.

यद्वा अन्नं ब्रह्मेति व्यजानात् इत्युत्तरानुवाकेपि अन्नमयादौ ब्रह्मशब्दाभ्याससद्भावादभ्यासः ।

Though the word तपस् also repeatedly occurs the statements तपसा ब्रह्मविजिज्ञासस्व 'स तपस्तप्त्वा अन्नं ब्रह्मेति व्यजनात्' make it clear that the expression तपस् cannot be equated with brahman.

यद्यपि तपो ब्रह्मेति असकृत् श्रवणात् तपस्यपि ब्रह्मशब्दाभ्यासोऽस्ति तथापि पूर्वत्र तपसा ब्रह्म विजिज्ञासस्व इति उत्तरत्र च स तपस्तप्त्वा अन्नं ब्रह्मेति व्यजानात् इति च अभ्यासात् तपसि ब्रह्मशब्दः न मुख्य इति न तपः ब्रह्मता ।

The meaning of mayat suffix

The mayat suffix in the words आनन्दमय etc carries three meanings viz. तादात्म्यार्थे विकारार्थे प्राचुर्यार्थे मयट् त्रिधा, the meaning विकार does not suit here. Though तादात्म्य may be taken it does not bring out पूर्णानन्दत्व nature of brahman, nor it serves any other purpose, therefore, प्राचुर्य is the most appropriate meaning here.

आनन्दादेः पूर्णत्वसिद्ध्यर्थं स्वार्थिकत्वे मयटः वैयर्थ्य परिहारार्थं च प्राचुर्यार्थता उक्ता ।

Before examining the views of other bhāṣyas Chandrikā explains the grounds for he arrangement of sūtras in this adhikaraṇa in detail and justifies the placement of each sūtra.

The review of Bhāmati view

Bhamati states that the expression पुच्छ conveys brahman while आनन्दमय etc convey he five kośas. If आनन्दमय is taken as brahman the following difficulties will arise.

) The suffix mayat which has to be taken in the sense of vikāra i.e. modification in the case of annamaya etc the other four, it will be taken in the sense of prāchurya in the case of ānandamaya only. This is violating the normal course.

i) Even the sense of prāchurya cannot be taken in its strict sense, since, the expression prāchurya of ānanda makes room for a little of sorrow also while brahman is absolutely free from sorrow.

ii) The expression brahman which refers to nirviśeṣa brahman will be required to be taken as referring to saviṣa brahman.

v) The expression आनन्द in the passages 'सैषा आनन्दस्य मीमांसा will be required to be taken as आनन्दमय.

अन्येतु आनन्दमय तदवयवपुच्छयोः द्वयोः ब्रह्मत्वायोगात् एकस्य ब्रह्मता वाच्या । तत्र आनन्दमयस्य ब्रह्मत्वे–

i) विकारार्थमयटः प्रायपाठत्यागः ii) प्राचुर्यस्यापि प्रतियोग्यल्पत्वापेक्षत्वात् ब्रह्मणि दुःखलेशस्यापि अभावात् मयटः स्वार्थत्यागः iii) पुच्छवाक्यगत ब्रह्मशब्दस्य गौणार्थत्वम् iv) सैषा आनन्दस्य मीमांसा इत्यादौ अभ्यस्यमानानन्दप्रातिपदिकेन मयटोऽर्थो लक्ष्यते इति चत्वारो दोषाः ।

On the other hand if पुच्छ is taken as conveying brahman, the reference to avayava only has to be given up. पुच्छस्य ब्रह्मत्वे अवयवप्रायपाठबाधमात्रम् । तस्मात् पुच्छमेव ब्रह्मेति युक्तम् ।

Further, ānandamaya is saviśeṣa and it is distinct in each body while brahman is nirviśeṣa and identical. Therefore, ānandamaya etc are only kośas. पुच्छ is stated to be within and the foundation.

किञ्च प्रियाद्यवयवयोगेन आनन्दमयः सविशेषः । ब्रह्म तु निर्विशेषम् । अपि च आनन्दमयः प्रतिशरीरं प्रियादिभेदाद् भिन्नः । ब्रह्म तु अभिन्नम् । तस्मात् आनन्दमयः न ब्रह्म । किन्तु पञ्च कोशाः । न च सर्वान्तरत्वादानन्दमयो ब्रह्म । पुच्छवाक्ये ततोपि अन्तरस्य प्रतिष्ठापदेनोक्तेः ।

However, the expression आनन्द etc. in भृगुवल्ली portion refer to brahman, since, mayat suffix is not found.

This interpretation is not in consonance with the sūtra intention. Hence, Bhāmati advises to go by śruti than sūtra. सूत्राणि तु वेदसूत्रविरोधेतु गुणेतु अन्यायकल्पना इति न्यायेन अन्यथा व्याख्येयानि ।

In the dvaita interpretation of ānandamaya passage, primary meaning is not given up even in a single case, while in advaita interpretation primary meaning is given up in all cases.

एकत्रापि न मुख्यार्थलङ्घनं मामके मते । सर्वत्रापि च मुख्यार्थ लङ्घनं तावके मते ।

i) The word brahman is taken in its primary sense i.e. pūrṇatva, since, both ānandamaya and puccha refer to pūrṇa. This is stated in śruti and smṛti.

तथाहि– आनन्दमयपुच्छयोः द्वयोरपि पूर्णत्वेन ब्रह्मशब्दस्तावत् मुख्यः । पूर्णत्वं हि ब्रह्मशब्दस्य मुख्यार्थः । उक्तं च 'विश्वतश्चक्षुः' 'पूर्णमदः पूर्णमिदम्' इति श्रुत्या 'सर्वतः पाणिपादं तद्' इत्यादिस्मृत्या च अवयवस्य पूर्णत्वम् । तदुक्तमनुव्याख्याने–

ब्रह्मता अवयवेपि स्यात् तथा अवयविनि स्वतः ।
यथैव कृष्णकेशस्य कृष्णस्य ब्रह्मताखिला ।
दर्शिता चैव पार्थाय निस्सीमाः शक्तयोऽखिलाः ॥

ii) The mayat suffix is used in the sense of prāchurya in annamaya etc also. Therefore, the usage of this word in the same sense in all cases is also not given up.

अन्नमयादावपि प्राचुर्यार्थत्वस्य भाष्ये एव उक्तत्वात् न प्रायपाठत्यागः ।

iii) The expression prāchurya does not necessarily make room for something different from it to be present in some measure in the same place. It may be same type in another place.

प्राचुर्यस्य प्रतियोग्यल्पापेक्षत्वेपि न प्रतियोगिनः सामानाधिकरण्यनियमः । यतः प्राचुर्यस्य विजातीय सामानाधिकरणाल्पं यथा तथा सजातीयविभिन्नाधिकरणाल्पं निरूपकम् ।

In the instance ब्राह्मणप्रचुरः ग्रामः i.e. Brahmanas are in larger number in this village, the presence of śūdras in smaller number in the same village is contrasted. But in the instance, प्रचुरप्रकाशः सविता the sun has plenty of light, smaller light of stars is contrasted. The stars are not in the same place. In the first instance, the contrasting factor is समानाधिकरण but विजातीय, in the second instance, the contrasting factor is सजातीय but व्यधिकरण. In the present case of आनन्दप्राचुर्य of ब्रह्मन् आनन्दाल्पत्व of जीव is contrasting factor. It is सजातीय but व्यधिकरण. Therefore, आनन्दपाचुर्य of brahman does not warrant the presence of a little sorrow also in brahman.

दृश्यतेहि ब्राह्मणप्रचुरः ग्रामः इत्यादौ समानाधिकरणस्य विजातीयशूद्रादेः अल्पत्वेनेव, प्रचुरप्रकाशः सविता इत्यादौ व्यधिकरणस्य सजातीयस्य नक्षत्रादिप्रकाशस्य अल्पत्वेनापि प्राचुर्यम्। प्रकृते च 'सैषानन्दस्य मीमांसा' इति श्रुत्यैव व्यधिकरणस्य सजातीयस्य जीवानन्दस्य अल्पत्वमुक्त्वा ब्रह्मानन्दस्य 'यतो वाचः' इति महत्वमुक्तम्।

Even in the instance, 'ब्राह्मणप्रचुरः ग्रामः' this expression conveys प्राचुर्य only. The अल्पत्व of others is presented by another pramāṇa.

ब्राह्मणप्रचुरः इत्यादावपि प्रचुरशब्दो महत्वमाह। विरोधिप्रतीतिस्तु मानान्तरात्।

iv) The expression आनन्दमय conveying सविशेष ब्रह्मन् is in order, since, ब्रह्मन् is सविशेष. The śruti यतो वाचो etc. does not convey निर्विशेषब्रह्मन्।

न च 'यतो वाचो निवर्तन्ते' इति श्रुतिः निर्विशेषत्वमाह किन्तु अवाङ्मनसगोचरानन्तविशेषवत्त्वम्।

The śruti 'सोऽकामयत' refers to some thing that is stated nearby which is masculine gender. Therefore, ānandamaya is referred to here as the cause of the world, but not puccha, hence, ānandamaya is brahman.

किञ्च सोकामयत इत्यत्र पुल्लिङ्गेन सन्निहितपरामर्शिना तच्छब्देन नपुंसकब्रह्मपुच्छशब्दनिर्दिष्टस्य परामर्शायोगेन सन्निहितस्य आनन्दमयस्यैव परामर्ष्टव्यत्वात् कथमानन्दमयस्य अब्रह्मता।

Further मनोमय also has to be taken as referring to brahman. The statement यतो वाचो निवर्तन्ते relates to manomaya. The special nature viz. न बिभेति कुतश्चन stated in this context makes it clear that manomaya is also brahman.

'यतो वाचो निवर्तन्ते नबिभेति कुतश्चन' इति लिङ्गात् ब्रह्मविषयत्वं त्वयापि स्वीकृतमिति कथं मनोमयस्य अब्रह्मता।

Annamaya also refers to brahman. If Annamaya etc did not refer to brahman, then, stating these in the context of teaching brahman will be purposeless. These cannot be considered merely as medium. These are not stated as medium to know brahman. These are stated as the very brahman.

किञ्च अन्नमयादीनां अब्रह्मत्वे ब्रह्मजिज्ञासोः तदुपदेशायोगः। द्वारमपि द्वारत्वेनैव उपदेष्टव्यं न तु आत्मना। तस्मात् अन्नमयादयो ब्रह्मैव न द्वारम्।

The statement स वा एष पुरुषो अन्नरसमयः' also refers to brahman i.e. Viṣṇu. The statement 'आत्मनः आकाशः सम्भूतः' etc refers to the प्रादुर्भाव. From this it is clear that स वा एष पुरुषः refers to God.

) आत्मनः आकाशः इत्यादौ अन्नात् पुरुषः इत्यन्ते वाक्ये हरेरपि आकाशादि नियामकरूपप्रादुर्भाव-

ii) आकाशः सम्भूतः इत्यादेः आकाशपदवाच्यं भूताकाशतदभिमानि तद्देहत् त्रितयान्तर्नियामक चतुष्टययरूपं चतुष्टमात्मनः सम्भूतम्। तस्मात् चतुष्टयात् आकाशाद् वायुशब्दितं चतुष्टयं सम्भूतम्। तत्र सम्भवो नाम हरेः प्रादुर्भावः, अभिमानिनः अभिमानविशेषः, देहस्य भूतस्य च परिणामः। (प्र.)

The anna etc stated in Bhṛguvalli also refer to brahman. The śruti भार्गवी वारुणी विद्या परमे व्योमन् itself makes it clear.

तथा भृगुर्वै वारुणि, इति उत्तरानुवाके उक्तानां अन्नादीनां ब्रह्मत्वं तावदुपेयम्। 'भार्गवी वारुणी विद्या परमे व्योमन् प्रतिष्ठिता' इति श्रुत्या स्वयमेव ब्रह्मपरत्वोक्तेः।

In this way, the whole section is explained without involving any conflict between श्रुति and सूत्र.

तस्मात् श्रुतिविरोधाभावात् न सूत्राणि अन्यथा नेयानि।

The review of Rāmānuja's view

According to Rāmānuja bhāṣya ānandamaya only conveys brahman, vijñānamaya refers to jīva and the other three refer to kośas.

आनन्दमयः परमात्मा विज्ञानमयस्तु जीवः अन्नमयादयस्तु त्रयः कोशाः इति सिद्धान्तः इत्याहुः।

On this Chandrikā remarks : vijñānamaya cannot be jīva, since, it is stated that all deities worship it.

विज्ञानमयस्य जीवत्वे 'विज्ञानं देवाः सर्वे समुपासते' इत्यादेः अयोगः।

Similarly annamaya etc are also brahman as per the śruti 'अन्नं ब्रह्मेति व्यजानात्' etc.

According to Rāmānuja's interpretation mayat suffix is taken in four different senses. This is not proper.

अन्नमये विकारार्थः प्राणमयमनोमययोः स्वार्थिकः विज्ञानमये सम्बन्धार्थः आनन्दमये प्राचुर्यार्थः इति वैरूप्यप्रसङ्गात्।

Reviewing the views of other bhāṣyakāras Chandrikā summarises the Dvaita siddhānta view as under :

ब्रह्मशब्दात् समस्तात्तत्वलिङ्गाच्च वाक्यतः। पूर्वोत्तरस्थात् मन्त्रस्थब्रह्मप्रकरणादपि।

भृगुवल्ली समाख्यानात् मुक्तगीतावसानकात्। स्थानप्रमाणतश्चैव पञ्चानां ब्रह्मता स्थिता।

It may be noted here that श्रुति, लिङ्ग, वाक्य, प्रकरण, समाख्या, स्थान criteria are pointed out here in support of the thesis that annamaya etc five convey brahman.

Chandrikā further explains that anna, prāṇa etc stated in Bhṛguvalli also convey brahman.

ब्रह्मप्रश्नोत्तराद् ब्रह्मलक्षणाद् ब्रह्मशब्दतः । विज्ञातत्वाच्च तपसो मुक्तगम्यत्वतस्तथा
वाधूलीयसमाख्यानादनुव्याख्या निरूपितात् । भृगुवल्लुचुदितस्यान्नप्राणादेः ब्रह्मतास्थिता ॥

In this context the question is raised whether it is proper that many words convey one and the same viz brahman. Just as यजति ददाति जुहोति convey different forms of the ritual why not consider annamaya, prāṇamaya also as conveying different entities. This question is answered by pointing out that different entities need not be conveyed, but different attributes of the same entity viz brahman may be conveyed as in the instance of vijñāna, śraddhā, niṣṭhā etc being considered as the attributes of satya i.e. brahman in bhumādhikaraṇa.

i) ननु यजति ददाति जुहोत्यादाविव अन्नमयप्राणमयादौ शब्दभेदेन अर्थभेदस्य न्यायत्वात् एकस्य ब्रह्मत्वमन्येषां अन्यत्वं वाच्यमित्यत आह । (प्र.)

ii) यथा भूमाधिकरणे ब्रह्मत्वेन निर्णीतात् सत्यादुपरिश्रुताः विज्ञानमतिश्रद्धा निष्ठाकृत्यादिशब्दाः पूर्वोक्त सत्याख्ये ब्रह्मणि गुणविध्यर्थाः न तु वस्त्वन्तरपराः । एवमन्नमयादिशब्दाः अपि प्रकृते ब्रह्मणि सर्वोपजीव्यत्वादि गुणविशेषविधानार्थाः न तु वस्त्वन्तरपराः इति ब्रह्मैव पञ्चरूपमिति ।

iii) नारायणवासुदेवसंकर्षणप्रद्युम्नानिरुद्धाख्यपञ्चरूपं ब्रह्मैव क्रमेण आनन्दमयविज्ञानमयमनोमय-प्राणमयान्नमयशब्दैः उच्यते ।

अन्तस्थत्वाधिकरणम्

In this adhikaraṇa the attribute antasthatva is affirmed as the attribute of Viṣṇu with a view to facilitate the samanvaya of Indra etc many adhidaiva names in Viṣṇu. Hence, the discussion of the samanvaya of a liṅga i.e. attribute in the first pāda i.e. nāmapāda is justified.

अत्र अन्तस्थत्वलिङ्गसमन्वयस्य अधिदैवगतेन्द्रादिनामसमन्वयार्थत्वात् पादसङ्गतिरिति टीकायामेव उक्तम् । (ता.चं.)

Explanation of Sangaṭi

The Sangaṭi of this adhikaraṇa with ānandamayādhikaraṇa is आक्षेपसङ्गति । अदृश्यत्व is stated to be the attribute of आनन्दमय. This attribute is also stated as the attribute of अन्तस्थ. This अन्तस्थ is not Viṣṇu, therefore, ānandamaya is also not Viṣṇu. This objection is raised on the conclusion of ānandamaya adhikaraṇa and answered in this adhikaraṇa. Therefore, there is आक्षेपसङ्गति between these two adhikaraṇas.

अनन्तरसङ्गतिस्तु आनन्दमयधर्मस्य अदृश्यत्वस्य अन्तस्थे श्रवणात् अन्तस्थस्य च अविष्णुत्वात् आनन्दमयोऽपि न विष्णुरिति पूर्वसिद्धान्ताक्षेपेण इह पूर्वपक्षोत्थानात् आक्षेपिकी सङ्गतिः । इयं च 'अदृश्ये अनात्म्ये' इति भाष्य एवोक्ता । (ता.चं.)

Chandrikā further states that the आक्षेप सङ्गति may also be presented by way of आक्षेप of जन्मादिकर्तृत्व and शास्त्रयोनित्व. It may also be worked out on the basis of the आक्षेप that the words ānandamaya etc are not fixed in any particular meaning by usage. Therefore, these can be taken to convey Viṣṇu by etymology. But the name, Indra etc are fixed by usage in the deity Indra etc only. Hence, these cannot convey Viṣṇu by etymology.

यद्वा युक्तमानन्दमयशब्दो विष्णुपर इति तस्य अर्थविशेषे निरूढत्वाभावात् । इन्द्रादिशब्दास्तु अर्थविशेषे निरूढाः न अन्यत्र नेतुं शक्याः । (ता.चं.)

The areas of discussion

In this adhikaraṇa the question whether antastha is Indra etc deities or Viṣṇu is raised. In order to decide this whether śruti be explained to suit the liṅga i.e. attribute, or liṅga be adjusted to suit śruti. It has to be further examined whether śruti is niravakāśa or liṅga. Even if liṅga is niravakāśa, it has to be decided whether śruti by its very nature is superior to niravakāśa liṅga or the latter is superior.

अत्र अन्तस्थः किं इन्द्रादिः उत विष्णुरिति चिन्ता । तदर्थं किमिन्द्रादिश्रुत्यनुसारेण लिङ्गं नेयमुत तद्विपरीतमिति । तदर्थं किं श्रुतिर्निरवकाशा लिङ्गं तु सावकाशमुत तद्विपरीतमिति । तथा लिङ्गस्य निरवकाशत्वेपि किं श्रुतित्वप्रयुक्त प्राबल्यं बलवत् किं वा निरवकाशत्वप्रयुक्तप्राबल्यं बलवदिति ।

Three ways of pūrvapakṣa

Stating the areas of discussion as described above Chandrikā proceeds to analyse pūrvapakṣa in three alternate ways and points out the difficulty in each case.

i) Among Indra etc only a particular one is antastha.
इन्द्रादिषु निर्धारितः एकः अन्तस्थः

ii) Among Indra etc one of them is antastha without fixing any particular one.
अनिर्धारितः यः कश्चित्

iii) Indra etc all सर्वोपिति वा.

i) First alternative does not hold good, since, no particular deity could be selected when many are mentioned.

ii) The second alternative also does not work, since, pūrvapakṣa cannot be of a doubtful nature.

iii) The third alternative also is not sound, since, antastha is described as the ruler of all and there cannot be many rulers.

Stating the above difficulties Chandrikā suitably works out the above three alternatives and states that the pūrvapakṣa may be taken in any of three ways :

i) Among Indra etc a particular deity, say, Indra, Sūrya or Varuṇa may be taken. What is required is that he must be other than Viṣṇu.

ii) Any one of them may be taken. This does not make pūrvapakṣa doubtful. Since, excluding Viṣṇu is the definite aim.

iii) All can be taken. This does not lead to the contingency of many rulers, since, all of them are identical.

In any case, since, Indra etc are supported by śruti antasthatva is the attribute of these but not that of Viṣṇu.

Siddhānta view

Ordinarily śruti is superior to liṅga. However, when śruti is sāvakāśa and liṅga is niravakāśa, liṅga is superior. In the present case, antasthatva is an attribute of Viṣṇu only. In many śruti passages he is stated as antastha. This attribute cannot be applied to any other. Therefore, it is niravakāśa. The Indra śruti etc also apply to Viṣṇu by paramamukhyavṛtti, hence, these are sāvakāśa in respect of Viṣṇu. Therefore, the antastha is Viṣṇu only.

लिङ्गादिभ्यो बलवती श्रुतिर्यद्यपि च स्वतः । अवकाशोज्झितैः लिङ्गैः सावकाशातु बाध्यते ।

लोके श्रुतौ स्मृतौ चैव विष्णुलिङ्गतया स्थितम् । समुद्रान्तरवस्थानपूर्वकं कथमन्यगम् ॥ (ता.चं.)

Further, the names Indra etc are the names of Viṣṇu both by विद्वद्रूढि and महायोगवृत्ति. किञ्च इन्दं मित्रं वरुणमग्निमाहुः' इत्यादि श्रुत्या इन्द्रादिशब्दानां विष्णावेव विद्वद्रूढेः सत्त्वेन इन्द्रादिशब्दप्रवृत्ति निमित्तस्य परमैश्वर्यादेः विष्णावेव मुख्यतः सम्भवेन महायोगस्यापि सत्त्वेन च इन्द्रादिश्रुतिः विष्णावेव मुख्या ।

It cannot be contended that the śruti 'इन्द्रं मित्रं वरुणम्' etc talks of the identity between these deities and Viṣṇu. In the next sentence 'सप्तार्धगर्भा भुवनस्य रेतो विष्णोः विष्ठन्ति विदशा विधर्मणि' the difference between Viṣṇu and these deities is clearly stated. In the śruti 'यो देवानां देवतमः' etc also the difference is stated.

न तु नारायणादिनां नाम्नामन्यत्र सम्भवः । अन्यनाम्नां गतिर्विष्णुरेक एव प्रकीर्तितः ।

This smṛti clearly states that Indra etc names are the names of Viṣṇu while Nārāyaṇa etc are the names of Viṣṇu alone.

In the śruti 'इन्द्रस्य आत्मा' etc the word आत्मन् does not mean इन्द्रस्वरूपभूत. In the same context in the passage 'आत्मा जनानाम्' the word आत्मन् is used in the sense of अन्तर्यामिन्. In the passage 'शास्ता जनानाम्' it is used in the sense of a ruler. Therefore, the word आत्मन् in the passage 'इन्द्रस्य आत्मा' cannot be taken in the sence of इन्द्रस्वरूप.

The review of Advaita and Rāmānuja views

The advaita bhāṣya and Rāmānuja bhāṣya formulate the pūrvapakṣa and siddhānta of this adhikaraṇa differently. The viṣayavākyas selected by them are also different. In the passage 'य एषोऽन्तरादित्ये हिरण्मयः पुरुषः दृश्यते' 'य एषोऽन्तरक्षिणि पुरुषो दृश्यते' someone is stated to be within āditya and within the eye. Pūrvapakṣin argues that he is a prospering jīva, since, he is described as having a form. Siddhānta states that he cannot be jīva, since, he is declared to be free from the drawbacks and he is सर्वात्मा. Therefore he is brahman. Though brahman is nirviśeṣa, his saviśeṣa form is described here to help the less equipped to meditate upon him.

निर्विशेषं परं ब्रह्म साक्षात् कर्तुमनीश्वराः ये मन्दास्तेऽनुकम्प्यन्ते सविशेष निरूपणैः ।

Rāmānuja bhāṣya also adopts the same Viṣayavākya and formulates pūrvapakṣa and siddhānta in a similar way.

It is not correct to say that सविशेषज्ञान is intended to procure निर्विशेष ज्ञान. It can neither generate निर्विशेषज्ञान through अदृष्ट or through by any known means. सविशेषध्यान also does not lead to निर्विशेषज्ञान.

In view of this the advaita formulation of pūrvapakṣa and siddhānta of this adhikaraṇa dose not serve any useful purpose.

आकाशाधिकरणम्

In this adhikaraṇa the samanvaya of adhibhūta words ākāśa etc. is presented. Since, ākāśa is prominent among the bhūtas i.e. elements, it is specifically mentioned in the sūtra. The others are indicated.

अत्र अधिभूताकाशादिनाम्नां समन्वय उच्यते । भूतेषु आकाशस्य प्राधान्यात् सूत्रे तस्य मुखतः कीर्तनम् । अन्येषां तु उपलक्षणम् । (ता.चं.)

In the earlier adhikaraṇa by the samanvaya of antasthatva liṅga the samanvaya of Indra etc many adhidaiva names was presented. In this adhikaraṇa by the samanvaya of the name ākāśa and samanvaya of many liṅgas i.e. attributes such as parovariyastva, udgīthatva, anantatva will be presented.

पूर्वत्र अन्तस्थत्वरूपैकलिङ्गसमन्वयेन बहु नामसमन्वयात् । अत्र तु आकाश इत्येकनामसमन्वयेन बहुलिङ्ग समन्वय सिद्धेः । (ता.चं.)

Pūrvapakṣa based on a fresh objection

In this adhikaraṇa the ruling given in the earlier adhikaraṇa viz niravakāśa liṅga is superior to sāvakāśa śruti is utilised to answer a fresh objection. Therefore, ātideśikī is the saṅgati here.

अनन्तरसङ्गतिस्तु अधिकाशङ्कां कृत्वा पूर्वन्याय एव अतिदिश्यते इति आतिदेशिकी । (ता.चं)

The ruling of antasthatvādhikaraṇa is utilised in the next three adhikaraṇas also. These are arranged on the basis of fresh objections.

अभ्यधिकाशङ्काक्रमात् तत्क्रमः (तां.चं.)

If the import of ākāśa is not settled in favour of Viṣṇu in this adhikaraṇa, then, the word ākāśa in the passage 'yad eṣa ākāśa' will also not convey Viṣṇu. This means that ānandamaya is also not Viṣṇu. This objection is resolved by settling the import of 'ākāśa' as Viṣṇu in this adhikaraṇa.

अन्यः प्रसज्येत इति पूर्वपक्षे आनन्दमयाधिकरणाक्षेपात् सिद्धान्ते च तत्समाधानात् सफलोऽयं विचारः इत्युक्तम् । (ता.चं.)

Chandrikā considers the possibility of the ākṣepa based on Janmādi adhikaraṇa also and states that it is not feasible.

The area of discussion

In this adhikaraṇa the question whether the word ākāśa conveys bhūtākāśa or Brahman is raised. In order to decide this the question whether ākāśa śruti has to be preferred and parovarīyastva etc liṅgas are to be set aside has to be examined. For this purpose, the point whether the word ākāśa can convey Brahman or not has to be looked into. This can be settled by examining whether the jada objects also are under the control of Īśvara or not.

In the previous adhikaraṇa it is already decided that the niravakāśa liṅga has to be preferred to sāvakāśa śruti. However, since, some fresh objections could be raised by pūrvapakṣin here, fresh examination of the question is necessary.

Pūrvapakṣa view

The fresh objection is stated as under : The word ākāśa cannot convey brahman, since, the chief attribute of ākāśa i.e. vivaratva i.e. providing room for other objects, is not found in brahman. It cannot be claimed that though this attribute is not found in

brahman, since, it is under the control of brahman the word ākāśa can be used with reference to brahman, Because, brahman can have control over sentient objects only, ākāśa is jaḍa, therefore, it is not under the control of brahman like a servant of a king being under the control of the king. Further, vivaratva is the very nature of ākāśa. The nature of an object cannot be under the control of another.

शङ्का च– चेष्टा हि चेतनानां या सा भवेत् तत्प्रसादतः । अचेतनस्वभावस्तु विवरादिः कथं ततः ॥

Further, the word ākāśa is used in several śruti passages. Therefore, liṅga cannot over-ride so many śruti statements. Hence, the word ākāśa conveys bhūtākāśa only but not brahman.

Siddhānta view

This claim of pūrvapakṣin is rejected in siddhānta. It is not correct to say that a jaḍa entity cannot be under the control of brahman. When chetana is under his control, the jaḍa is much more under his control.

चिद्गतस्य ईशतन्त्रत्वे स्यादेवाचिद्गतस्य तत् । यतोऽत्यन्तपराधीनं चेतनादप्यचेतनम् ।

Further, even the nature of entities is due to his will. The vivaratva nature of ākāśa is due to his will. Therefore, it is also under his control.

अस्तु छिद्रमिति या हरीच्छा तद्वशान्नभः । छिद्रात्मकं हि सञ्जातमन्यथा निबिडं भवेत् ॥ (अ.व्या. ता.चं.)

The nature of all is under the control of the God.

स्यन्दते शासनात् नद्यः भीषास्मात् पवतेऽनिलः । नभो ददाति श्वसतां मार्गमित्यादिकाश्चताः ॥

The rivers flow as per his order, the wind blows by his order, and ākāśa makes room by his order.

Further, the word ākāśa conveys the unlimited capacity to make room for other objects. This is not possible for bhūtākāśa. God only has such unlimited capacity. therefore, the word ākāśa primarily conveys God only. There is vidvad rūdhi also.

नहिदेशकालाभ्यां परिच्छिन्नस्य अवकाशदातृत्वं निरवधिकम् – सुधा (तां.चं.)

अत एव विद्वद्रूढिरपि सिद्धा । वैदिकप्रयोग बाहुल्यात् । तस्मादाकाशशब्दः ब्रह्मणि मुख्यः ।

The anantatva attribute applies to only Viṣṇu. It does not apply to avyākṛtākāśa and bhūtākāśa. The former is limitless in respect of space and time only and the latter is not so even in these two respects. The God is limitless in respect of space, time and attributes. Therefore, he is primarily ananta. The attribute parovarīyastva i.e. supreme among superiors, applies to Viṣṇu only. Even the attribute bhūtakāraṇatva i.e. the cause of the elements primarily applies to Viṣṇu only.

The review of Advaita and Rāmānuja views

The advaita and Rāmānuja also formulate the pūrvapakṣa stating that the word ākāśa conveys bhūtākāśa and siddhānta stating that it conveys brahman. However, the manner in which these positions are explained is not convincing and it's drawbacks are pointed out in Chandrikā. The question is raised whether brahman to be conveyed by the word ākāśa is viśiṣṭa or śuddhā? If it is viśiṣṭa anantatva cannot be its attribute. If it is śuddha, then, jyaystva cannot be its attribute.

विशिष्ट विषयं चेदनन्तत्वाद्यसम्भवः विशुद्धविषयं चेत् ज्यायस्त्वादेरसम्भवः ।

Further, the attributes parovarīyatva etc that are stated to be present in brahman cannot be stated as really present in advaita. If these are projected, then, brahman that has these attributes will also be projected.

किञ्च सूत्रोक्तं लिङ्गं न तावत् ब्रह्मणि तत्त्वतोऽस्ति ।
यदिचारोपितं लिङ्गं तत्साध्या ब्रह्मतापिहि । आरोपिता स्यादेवं च पूर्वपक्षः स्थिरो भवेत् ॥

प्राणाधिकरणम्

In this adhikaraṇa the samanvaya of the word prāṇa and similar other ādhyātmika words is explained. Since, the ruling given in the antasthatvādhikaraṇa viz. niravakāśa liṅga is superior to śruti is utilised here to raise and answer a fresh objection this adhikaraṇa has ātideśiki sangaṭi

i) अत्र आध्यात्मिकप्राणादिशब्दसमन्वयः उच्यते ।

ii) अत्रापि अधिकाशङ्कानिरासेन पूर्वन्याय एव अतिदिश्यते इति आतिदेशिकी अवान्तरसङ्गतिः । (ता.चं.)

The areas of discussion

In this adhikaraṇa the question whether the word prāṇa conveys mukhyaprāṇa or Viṣṇu is raised. In order to decide this the question whether prāṇa śruti is to be preferred and the attribute śrīpatitva is to be set aside or the liṅga i.e. attribute is to be preferred and śruti be explained away, has to be examined. For this purpose, the point whether the ground of the use of the word prāṇa viz jīvana hetutva is primarily found in Viṣṇu or not has to be settled. This has to be settled by verifying whether jīvana is sustained or lost by the presence and absence of mukhyaprāṇa or Viṣṇu.

अत्र प्राणः किं मुख्यवायुः उत ब्रह्मेति चिन्ता । तदर्थं किं प्राण श्रुतिप्रसिद्धचनुसारेण श्रीपतित्वादिलिङ्गं बाध्यं किं वा विपरीतमिति । तदर्थं प्राणशब्दप्रवृत्तिनिमित्तं जीवनहेतुत्वं किं ब्रह्मणि नास्ति उत अस्तीति । तदर्थं किं जीवनं मुख्यप्राणान्वयव्यतिरेकानविधायि उत ईश्वरान्वयव्यतिरेकानविधायि । (तां.चं.)

Pūrvapakṣa view

Pūrvapakṣin argues that jīvana has anvaya-vyatireka with mukhyaprāṇa as per the śruti 'तत् प्राणे प्रपन्ने उदतिष्ठत् तत् प्राण उत्क्रान्ते पद्यते' Here it is clearly stated that when mukhya prāṇa is present the body functions and when he leaves it collapses. From this, anvaya i.e. presence of jīvana if mukhyaprāṇa is present and vyatireka i.e. the absence of jīvana if mukhyaprāṇa is absent could be made out. Further, the bhūtavāyu is the body of mukhyaprāṇa. The anvaya-vyatireka of this vāyu with jīvan is known by pratyakṣa. From this the anvaya-vyatireka of jīvana with mukhyaprāṇa could be ascertained.

i) प्रत्यक्षेण जीवनस्य मुख्यप्राणान्वयव्यतिरेकानुविधानाज्ञानेपि तत् प्राण प्रपन्ने उदतिष्ठत् इत्यादिवाक्यात् तज्ज्ञानम्।

ii) यद्वा कुलालशरीरस्य घटं प्रतीव मुख्यप्राणशरीरभूतवायोः जीवनं प्रति अन्वयव्यतिरेकदर्शनमात्रेण तस्य तत्र हेतुत्वम्। (ता.चं.)

Such anvaya-vyatireka between jīvana and Viṣṇu is not found either by pratyakṣa or by śruti. Therefore, the word prāṇa conveys mukhyaprāna but not Viṣṇu.

Siddhānta view

Siddhānta points out that just as bhūta vāyu is the body of mukhyaprāṇa, the mukhyaprāṇa in a way is the body of Viṣṇu. Hence, there is anvaya-vyatireka between jīvana and Viṣṇu.

वायुवृत्तिर्यथा मुख्यप्राणदेहस्तथैव सः। विष्णोर्देहः ततस्तस्यैवान्वय व्यतिरेकिता।

Further, mukhyaprāṇa is under the control of Viṣṇu, therefore, the word prāṇa primarily conveys Viṣṇu.

किञ्च मुख्यप्राणस्य जीवनादिहेतुत्वेपि तस्य भगवदधीनत्वेनापि तत्र प्राणशब्दो मुख्यः।

It is used in the sense of Viṣṇu in the śruti प्राणस्य प्राणः। Śrīpatitva attribute also establishes that prāṇa conveys Viṣṇu only.

Śaṅkara and Rāmānuja take a different viṣayavākya and formulate pūrvapakṣa whether the word conveys the well-known prāṇa or brahman. Chandrikā points out the drawbacks in their approach.

ज्योतिरधिकरणम्

Three views in respect of the structure of adhikaraṇa-

In respect of this adhikaraṇa there are three approaches within the tradition of Dvaita commentaries.

1) ज्योतिः etc four sūtras form one adhikaraṇa. The śruti 'ज्योतिर्हृदय आहितं यत्' of अग्निसूक्त is viṣaya vākya. This is the view of Tatvapradīpa.

2) ज्योतिः etc four sūtras form one adhikaraṇa. However, the śruti 'यदतः परो दिवो' etc of छान्दोग्य is viṣayavākya. This is the view of sannyāyaratnāvali.

3) The sūtra 'ज्योतिः चरणाभिधानात्' forms one adhikaraṇa and the other three sūtras form a different adhikaraṇa. This is the view of Tīkāchārya.

1) अत्र त्रीणि दर्शनानि ज्योतिरित्यादि चतुस्सूत्री एकमधिकरणम् । विषयवाक्यं तु अग्निसूक्तस्थं यदिति वाक्यमेव । इदं च एकमधिकरणमिति वदतः तत्त्वप्रदीपकृतः अभिप्रेतम् ।

2) मतान्तरं तु चतुस्सूत्र्याः एकाधिकरणत्वेपि विषयवाक्यं ज्योतिरित्यस्यापि 'अथ यदतः परो दिवो ज्योतिरिति छान्दोग्यवाक्यमेवेति सन्न्यायरत्नावलीकारस्य अभिप्रेतम् ।

3) मतान्तरं तु ज्योतिस्सूत्रमेकमधिकरणम् । छन्द इत्यादि त्रिसूत्रीतु अधिकरणान्तरमिति । इदं च टीकाकारस्य अभिप्रेतम् ।

Chandrikā discusses the implications of these views and the sources for these views in bhāṣya, nyāyavivaraṇa and anuvyākyāna. Finally, Chandrikā remarks इदं च मतत्रयं सूत्रयोजनामात्रे भिन्नं प्रमेये तु अविरुद्धम् । (ता.चं.)

In ज्योतिरधिकरण the import of the word ज्योति etc that are employed in vedic hymns is discussed.

तत्र ज्योतिरधिकरणे सूक्तस्थ ज्योतिरादिशब्दाः उदाहरणम् ।

The areas of discussion

Here, the question whether the word jyotiḥ conveys the deity Agñi or Viṣṇu is raised. In order to decide this the question whether the śruti be given priority or the liṅga has to be decided. To settle this a further question whether the sūkta that supports śruti could be explained away or it has to be taken into account and śruti be preferred.

अत्र ज्योतिः किमग्निः किं वा विष्णुरिति चिन्ता । तदर्थं किं ज्योतिः श्रुतिप्रसिद्धयनुसारेण कर्णादिविदूरत्वलिङ्गं बाध्यमुत विपरीतमिति । तदर्थं किं श्रुत्यनुग्रहकं सूक्तं निरवकाशमुत सावकाशमिति ।

Pūrvapakṣa view

Pūrvapakṣin argues that though it is already ruled in the earlier adhikaraṇa that niravakāśa attributes of brahman set aside the claim of sāvakāśa śruti, here, the śruti has support of niravakāśa sūkta i.e. agnisūkta. Therefore, the attributes karnādividuratva i.e. free from the limitation of senses etc that are supposed to be the attributes of Viṣnu have to be taken as the attributes of Agni.

एवं च तत्र इत्थं पूर्वपक्षः । यद्यपि पूर्वाधिकरण न्यायेन निरवकाशब्रह्मलिङ्गैः सावकाशाग्निश्रुतिबाधः तथापि सूक्तं निरवकाशम् । एवं च निरवकाशप्रकरणानुगृहीतश्रुत्या निरवकाशमपि कर्णादिविदूरत्वादिलिङ्गं बहुवैभवाभिप्रायेण कथञ्चिदग्नावपि नेयम् ।

Siddhānta view

Siddhānta points out that the attribute karṇādi viduratva means unlimited glory. This is the attribute of Viṣṇu only as per the śruti परो मात्रया etc.

Agni has no such unlimited glory is clear from the śruti 'अग्निर्देवानामवमः' etc. Agni śruti also applies to Viṣṇu only. He is called by the words agni, jyoti etc in the śruti.

i) कर्णादिविदूरत्वं हि इयदिति परच्छेदानर्हवैभवत्वम् । तच्च परो मात्रयेति भाष्योक्तश्रुतिभिः निरवकाशम् । नहि 'अग्निः देवानामवमः' इति अवमतया 'भीषा स्मादग्निस्तपति' इति सभयतया 'परिहि एनंम्रियंते विद्युत् वृष्टिः चन्द्रमाः आदित्योऽग्निः' इति मरणादिमत्तया श्रुतस्य अग्नेः अपरिच्छेद्यं वैभवम् ।

ii) अग्निश्रुत्यादिस्तु 'ज्योतिषामपि तज्योतिः' अहमग्निरहं हुतमिति श्रुतिस्मृतिभिः विष्णौ सावकाशम् ।

iii) कर्णादीनां विदूरत्वं विष्णोरन्यत्र नैवहि । अग्नेस्तु श्रुतिसूत्रादि सावकाशं परात्मनि ॥

After presenting the siddhānta view that the word jyotiḥ i.e. agniḥ, conveys Viṣṇu and Agnisūkta is strictly speaking Viṣṇu sūkta Chandrikā quotes from Indra sūkta etc other sūktas also to show that the glory of Indra etc described in these sūktas is really the glory of Viṣṇu and the names Indra etc are the names of Viṣṇu. We may notice a few here.

इन्द्रः– न त्वा वां इन्द्र कश्चन न जातो न जनिष्यते ।

बृहस्पतिः– विश्वेषामिज्जनिता ब्रह्मणामसि ।

सूर्यः– सूर्य आत्मा जगतः तस्थुषश्च ।

वरुणः– यो विश्वस्य जगत ईश

विश्वकर्मा– 'विश्वतः चक्षुः' 'यो नः पिता जनिता'

The glory described in these hymns is the glory of Viṣṇu. Therefore, these hymns are Viṣṇu hymns.

गायत्र्यधिकरणम्

In this adhikaraṇa the samanvaya of gayatri etc adhiveda words is presented.

There are two views in respect of viṣayavākya and the points of pūrvapakṣa and siddhānta.

i) अथ यदतः परोदिवो ज्योतिः etc छान्दोग्य passage is विषयवाक्य. The point raised is whether the word jyotiḥ refers to chandas or viṣṇu is the first view.

ii) 'गायत्री वा इदं सर्वम्' etc छान्दोग्य passage is विषयवाक्य. The point raised is whether the word gāyatri refers to 'chandas or viṣṇu' is the second view.

The areas of discussion

The question whether the word gāyatri conveys gāyatri metre or viṣṇu is raised here. In order to decide the question whether gāyatri śruti is to be preferred or bhūtādipādatva etc attributes of viṣṇu are to be preferred has to decided. For this purpose, whether the word gāyatri has the ground to convey viṣṇu or not has to be examined. This can be settled by checking whether anādi entities are under the control of viṣṇu or not अत्र गायत्री किं छन्दः किं वा विष्णुः इति चिन्ता । तदर्थं किं गायत्री श्रुतिप्रसिद्धचनुसारेण भूतपादत्वादि विष्णुलिङ्गं बाध्यं किं वा विपरीतमिति । तदर्थं गायत्रीशब्द प्रवृत्तिनिमित्तं ब्रह्मणि नास्ति उत अस्तीति । तदर्थं किम् अनादिस्वभावः ईशानधीनः उत तदधीन इति ।

It is already ruled in the earlier adhikaraṇa that niravakāśa liṅga has to be preferred to śruti. However, a fresh objection viz 'since there are many well-known words to convey viṣṇu there is no point in taking the word gāyatri etc that convey something else as conveying viṣṇu' could be raised here. Therefore, the question is taken for discussion.

i) अधिकाशङ्क्या पूर्वपक्षोदयः । शङ्का तु विष्णौ प्रसिद्धेषु शब्देषु सत्सु अन्यत्रप्रसिद्ध गायत्र्यादिशब्द प्रयोगे प्रयोजनं न ।

Another ground of objection is that there are different statements viz. दिवः इति पञ्चम्युपदेशः and दिवि इति सप्तम्युपदेशः.

Further, gāyatri is veda which is anādi. Hence, it is not under the control of Viṣṇu. Therefore, तदधीनत्त्वन्याय also cannot be utilised here.

Vedas are Kūtasthanīya

In this context Chandrikā discusses the nature of नित्यत्व of Veda. In Viṣṇutatva nirṇaya tīka it is stated that the arrangement of the sequence of syllables in the vedic hymns is not eternal. It is made. We do not say that the veda is eternal i.e. kūtastha nitya. ननु कृतकक्रमविशिष्टवर्णात्मकस्य वेदस्य न अनादित्वम् । उक्तं हि विष्णु तत्वनिर्णयटीकायाम् । नहि वयं वेदस्य कूटस्थनित्यतां ब्रूमः ।

This remark of Viṣṇutatvanirṇaya tīkā should not be taken literally, because, in Tatvasamkhyāna it is clearly stated that the veda is eternal i.e. kūtasthanityā.

तत्वसंख्यान टीकायां नित्यत्वं नाम कूटस्थतया आद्यन्तशून्यत्वम् । तच्च वेदानां 'नित्याः वेदाः समस्ताश्च' इत्यादिप्रमाणसिद्धमित्युक्तम् ।

This position is quite reasonable. The syllables are eternal and all pervasive. Therefore, these cannot have any sequence on their own. The arrangement of sequence is a mental arrangement. Since, the very mental functioning of God is eternal, that is to say, it has no beginning, the sequence of the syllables of the vedic hymns also has no beginning.

i) नित्यत्वात् सर्वगतत्वाच्च वर्णानां स्वतः क्रमाभावः (प्र.)

ii) स्वतः क्रमशून्यानां वर्णानां क्रमस्य बुद्धिघटितत्वेपि ईश्वरबुद्धेः अनादिनित्यत्वेन तद्घटितत्वादनादि-नित्यत्वोपपत्तेः । (प्र.)

iii) क्रमस्य सदा ईश्वरबुद्धिस्थत्वात् । अत एवोक्तं विष्णुतत्वनिर्णये सर्वज्ञत्वादीश्वरस्य तद्बुद्धौ सर्वदा प्रतीयमानत्वात् । (ता.चं.)

Now, the question arises whether one should go by Tatvanirṇaya statement or by Tatvasamkyāna statement. One says veda is not kūtasthanitya and the other says veda is kūtasthanitya. This apparent conflict is resolved by pointing out that so far as the natural position and the position in the mind of God is concerned the sequence of syllables is eternal. It has no beginning or end. Even during pralaya it continues.

प्रलयेऽविच्छेदाय अवश्यवक्तव्यानादिनित्यभगवद्बुद्धिघटितक्रमवत्तामपेक्ष्य क्वचित् (तत्वसंख्याने) कूटस्थनित्यत्वमुक्तम् । (प्र.)

However, when men learn Veda they comprehend it in the order in which it is recited by their teachers.

This order of recitation and comprehension is not anādi as it is generated by the recitation. Keeping this in mind it is stated that the sequence is kṛtaka i.e. made.

i) तादृशस्य इतरप्रमाजनकत्वाभावात् तदर्थं उच्चारणघटितस्यैव तस्य वक्तव्यत्वात् । उच्चारणस्य च अनादिनित्यत्वाभावात् कूटस्थता नेति क्वचित् (विष्णु तत्त्वनिर्णये) उक्तम् (प्र.)

ii) कौटस्थ्य निषेधस्तु अस्मदादीन् प्रति प्रमापकत्वोपयुक्तस्य अस्मदादिबुद्धिस्थस्य क्रमस्य उच्चारणाद्यधीनत्वेन कृतकत्वात् । (तां.चं.)

In this way, since, the statements of Tatvasamkhyāna and Tatvanirṇaya are made from different points of view there is no conflict between Tatvasamkhyāna and Tatvanirṇaya. The final position is that the vedas are kūtasthanitya.

Pūrvapakṣin has based his argument on this concept of anāditva and questioned the Īśvarādhinatva. Siddhānta points out that even anāditva is Īśvarādhīna. This is also intended to show that even jīva etc that are anādi are under the control of God.

i) अनादिस्वभावनियामकत्वरूपमहागुणसिद्धचर्थमनादिस्वभावनिमित्तकशब्दान्तरसमन्वये न्यायः फलिष्यति । (पां.)

ii) अनादित्वं सिद्धवत् कृत्य ईशाधीनत्वमाशङ्कच तादृशस्यापि ईशाधीनत्वोक्तौ वेदे फलाभावेपि तादृश जीवात्मादेः ईशाधीनत्वं सिद्धयति फलमिति । (प्र.)

While presenting siddhānta of this adhikaraṇa Chandrikā first removes the fresh objections i.e. abhyadhikāśamkas one by one.

i) The first objection was that when there are well-known words like Nārāyaṇa to convey Viṣṇu why an obsecure word like gāyatri is selected. This is answered by pointing out that this special word is selected for meditation 'तत्र आद्याशङ्का चेतोर्पणनिगदात्' इति सूत्रे प्रयोजनोक्त्या परिहृता ।

ii) The second and third objections viz 'there are different statements like दिवः पर, and दिवि and conflicting attributes like कर्णादिविदूरत्व and दृष्टत्व' are answered by the sūtra उभयस्मिन्नपि अविरोधात् ।

iii) The fourth objection is that many well-known words cannnot be set aside even by niravakāśa liṅga. This is answered by stating that there are many liṅgas also. These are supported by well-known words.

iv) The last and the most important objection that the gāyatri is veda. It is anādi and therefore, it cannot be under the control of God is rejected by specifically stating that even anādi entities are under the control of God.

अनादीनां गुणादीनां यथा गुण्यादितन्त्रता । तथानादिश्रुतेरस्तु क्षेमायेश्वरतन्त्रता ॥

अकर्तुमन्यथा कर्तुं कर्तुं चास्तीश्वरस्य यत् । सामर्थ्यं तेन तत्तन्त्रमनाद्यपि च सादिवत् ॥

Chandrikā concludes siddhānta with the remark तस्मात् विष्णुरेव अधिवेदगत गायत्र्यादिशब्दवाच्यः ।

After presenting siddhānta view in detail Chandrikā reviews the interpretations of advaita and Rāmānuja. Both these take the four sūtras as one adhikaraṇa. The advaita interpretation will result in the repetition of the same point in jyoti sūtra and bhutādi sūtra.

पौनरुक्त्यं परमते ज्योतिर्भूतादिसूत्रयोः । पादोपदेशादन्याहि नैवास्ति चरणाभिधा ॥

The interpretation of उभयस्मिन्नविरोधात् is also not convincing.

Dvaita interpretation that one statement is from the point of view of three lokas the other from the point of seven lokas is most suitable. Chandrikā gives the details of these lokas.

प्राणाधिकरणम्

In this adhikaraṇa the question whether the word Prāṇa conveys mukhyavāyu etc. or viṣṇu is raised. In order to decide this the question whether the vāyu śruti is to be preferred and viṣṇu śruti has to be explained away or the other way round has to be examined. This has to be settled by finding out whether vāyuśruti is niravakāśa and viṣṇu śruti is sāvakāśa or the other way round.

अत्र प्राण: किं मुख्यवाय्वादि: किंवा विष्णुरिति चिन्ता । तदर्थं वाय्वादिश्रुत्याद्यनुसारेण विष्णुश्रुत्यादि नेयमुत विपरीतमिति । तदर्थं किं वाय्वादिश्रुत्यादिकं निरवकाशं विष्णुश्रुत्यादिकं सावकाशमुत विपरीतमिति ।

Stating the areas of discussion as stated above Chandrikā examines the objection that the theme of this adhikaraṇa is already settled in प्राणाधिकरण and there is no need to take up the same point again. Chandrikā also examines the question whether any purpose is served by this adhikaraṇa. These two objections are discussed starting with the remarks

i) ननु अत एव प्राण: इत्यनेन गतार्थमिदम्

ii) ननु अथापि प्राचीनोपि अन्य: इति प्रयोजनोक्ति: अयुक्ता.

The question whether the word prāṇa here comes under the group of उभयत्र प्रसिद्ध is also examined and it is made clear that it comes under अन्यत्रप्रसिद्ध only. The whole discussion is concluded with the remark तस्मात् पादसङ्गति: पूर्वपक्षोदयश्च ।

Clearing the ground for presenting siddhānta Chandrikā states the siddhānta-

i) The attributes देवोपास्यत्व, सर्ववेदप्रतिपाद्यत्व, सूर्यमण्डलस्थत्व, सर्वान्तर्यामित्व, सर्वव्यापित्व etc stated with reference to prāṇa are the attributes of viṣṇu as per the śruti and smṛti. Therefore, the word prāṇa conveys viṣṇu.

ii) The śruti, liṅga etc that appear to apply to others viz Indra, jīva and vāyu are sāvakāśa i.e. could be explained as applying to Viṣṇu. The expression 'अहम्' refers to अन्तर्यामिन्. The other attributes can be explained as applying to अन्तर्यामिन् ।

प्राणलिङ्गादिकं यद्यप्यवकाशोज्झितं स्वत: । तथाप्यन्तर्यामिगततया नेतुं हि शक्यते ॥

बहुत्वात् श्रुतिसाहित्यादवकाशोज्झितत्वत: । बलवद्भि: विष्णुलिङ्गै: प्राणश्रुत्यादि नीयते ॥

Chandrikā states the points made in each sūtra neatly.

1) आद्ये स्वपक्षहेतूक्ति: २) द्वितीये इन्द्रप्रयुक्ताहंशब्दबाधकोद्धार: ३) तृतीये 'मयि' इति 'स्यात्' इति यत् बाधकोद्धारे बाधकं तस्य परिहार: ४) चतुर्थे उपासात्रैविध्यकथन् ।

Stating the points made in the sūtras as stated above, Chandrikā reviews the interpretation of this adhikaraṇa in advaita and Viśiṣṭādvaita.

The themes of the six adhikaraṇas from Ānandamaya to padantyaprāṇa are neatly stated in Tantradīpikā of Śrī Raghavendra tīrtha-

अत्रानन्दमयनये विष्णोः स्वावयवैक्यम्, अन्तर्नये इन्द्रादिदेवगतैश्वर्यादेः आकाशनये सर्वस्वभावस्य च ईशायत्तत्वम्, प्राणनये सर्वजीवनहेतुत्वं ज्योतिर्नये सर्वसूक्तानाम् अवैष्णवत्वप्रसिद्धेः अज्ञानमूलत्वम्, छन्दोनये अनादिनित्यस्यापि ईशाधीनत्वम्, अन्त्यनये सर्वतत्तत् श्रुतिलिङ्गानां तदन्तर्यामिस्थत्वं सिद्धमिति बोध्यम्।

The above summary of the contents of तात्पर्यचन्द्रिका is made to help the modern scholars to get an idea of the contribution of Tātparya Chandrikā to a critical study of the Brahmasūtras and the three bhāṣyas on the same. It is hoped that this will enkindle an interest to study the whole work deeply and encourage the young scholars to undertake research in this valuable work. We give below a brief account of the life and works of the author of Tātparya Chandrikā and the commentators.

Śrī Vyāsatīrtha

Śrī Vyāsatīrtha the author of Tātparya Chandrikā has a high place in the field of Indian Philosophy, particularly in Dvaita Vedānta tradition. In a traditionally quoted verse of Pakṣadhara-Miśra the well-known Navyanyāya scholar of Navadvīpa the high esteem in which Vyāsatīrtha was held by his contemporary scholar is ensrined. The verse reads as :

यदधीतं तदधीतं यदनधीनं तदप्यधीतम्। पक्षधरविपक्षो नावेक्षि विना नवीनव्यासेन ॥

His high place in Dvaita Vedānta tradition is indicated by another traditionally quoted verse :

श्रीमध्वः कल्पवृक्षस्तु जयार्यः कामधुक् स्मृतः। चिन्तामणिस्तु व्यासार्यो मुनित्रयमुदाहृतम् ॥

This great scholar was born in or about 1460 A.D. in a village Bannur in the Mysore District of Karnataka. He was ordained to sannyāsa by Brahmaṇyatīrtha when he was just about sixteen years of age. He went to Kānchi a centre of learning in those days and mastered the Nyāya, Vyākaraṇa and Mīmānsā Śāstras. Then, he proceeded to Mulbagal another centre of learning, particularly, of Dvaita Vedānta, and studied Dvaita Vedānta under Lakṣmīnārāyaṇa Muni also known as Śrīpādarāja.

Saluva Narasimha the king of Candragiri near Tirupati was a disciple of Śrīpādarāja. He invited Śrī Vyāsatīrtha to his court and honoured him. Later Saluva Narasimha became the king of the famous Vijayanagar empire and invited Śrī Vyāsatīrtha to stay

at Vijayanagar. Since then, Śrī Vyāsatīrtha made Vijayanagar his head quarter. Saluva Narasimha's successor Krishna Devarāya developed great admiration for him and took his blessings and guidance in the welfare of the kingdom.

In a biographical poem on Vyāsatīrtha viz. व्यासयोगिचरितम् composed by सोमनाथकवि a detailed account of Śrī Vyāsatīrtha's life and works is given. Śrī Vyāsatīrtha composed his three great works : न्यायामृतम्, तात्पर्यचन्द्रिका and तर्कताण्डवम् during his stay at Vijayanagar. His तात्पर्यचन्द्रिका is a work of अधिकरणप्रस्थान । It is written as a commentary on तत्त्वप्रकाशिका of Jayatīrtha. However, it is more a वादग्रन्थ than a mere commentary. The bhāṣyas of Śaṅkara and Rāmānuja, their commentaries viz., Bhāmati and Śrutaprakāśikā respectively are critically examined in this work. His third great work तर्कताण्डव is a criticism of तत्त्वचिन्तामणि of गङ्गेश the source book of नव्यन्याय । It also reviews the views of Bhātta and Prābhākara Mīmānsā in respect of प्रमाण, प्रामाण्य, पदार्थ, वाक्यार्थ etc., epistemological and the linguistic issues. It is a work of a comparative study of these issues. His other works viz., भेदोज्जीवन and मन्दारमञ्जरी are also important works. The merit and the contents of all works of Śrī Vyāsatīrtha are fully dealt with in the history of Dvaita literature by Dr. B.N.K. Sharma in a masterly way, Dr. Dasagupta also has highlighted the contribution of Vyāsatīrtha to Dvaita-Advaita dialectics and the polemics of Indian Philosophy. Therefore, only a brief reference to the life and works of Śrī Vyāsatīrtha is made here.

Śrī Rāghavendra tīrtha

Prakāśikā of Śrī Rāghavendra tīrtha is a detailed commentory on Tātparyachandrikā. Śrī Rāghavendra tīrtha was a Pīthādhipati from 1623-71 A.D. He was a successor to Śrī Sudhīndra tīrtha. He was a contemporary of Raghunātha Nayaka and Vijaya Raghava Nayaka of Tanjor. He was a great scholar and a great saint with mystic power. He has forty works to his credit. His works on Sūtraprasthāna are most important. Particulary, his commentary Parimala on Nyāyasudha of Śrī Jayatīrtha and Prakāśika on Tātparya Chandrika are very helpful. His commentary viz Tattvamanjari on Aṇu-bhāṣya, his other small treatises on Brahmasūtras viz Nyāyamuktāvali and Tantradīpikā give good grounding for the study of sūtraprasthāna. His upaniṣatkhadārthas give word by word meaning of principal upaniṣads. He has also written commentories on Daśaprakaraṇas and Ṛgbhāṣya. His contribution to Dvaita literature is very rich both in quantity and quantity.

Śrī Pāndurangi Keśavāchārya

Bhāvadīpikā also known as Vākyārtha vivṛti of Śrī Pāndurangi Keshavachārya is also a detailed commentary on Tātparya Chandrikā. He flourished between 1580 to

1640 A.D. He is the son of the elder brother of Pāndurangi Ānanda bhattāraka a contemporary of Śrī Vādirāja tīrtha and the author of Nyāyāmṛta Kaṇṭakoddhāra. He has also made good contribution to Dvaita Vedanta literature. His commentary viz Śeṣavākhyārtha chandrikā on Nyāyasudhā of Jayatīrtha is a continuation of Vākhyārtha chandrika of Śrī Vidyādhīśa tīrtha. He has also written commentaries on Daśaprakaraṇa and Ṛgbhāṣya. His commentary on Tātparya Chandrikā has its own special style. The purpose and significance of each observation in Chandrikā is explained. Whenever alternate explanations are given in Chandrikā, the reason for it is explained in this commentary. Mīmānsā nyāyas are profusely quoted, grammatical niceties are explained.

These two commentaries considerably help to know the depth of Chandrikā interpretation and thought.

Śrī Rāghavendra tīrtha and Pāndurangi Keśavāchārya were contemporaries. Śrī Vidyādhīśa tīrtha the elder brother of Keśavāchārya is reported to have met Śrī Sudhīndra tīrtha and Śrī Rāghavendra tīrtha. It is quite likely that Keśavāchārya also met him. However, it is not clear whether these had seen the commentaries of each other.

No single scholar has written commentaries on Vyāsatrayi i.e. Chandrikā, Nyāyāmṛtam and Tarkatāndavam. Śrī Rāghavendra tīrtha has commented on two of these viz Chandrikā and Tarkatāndavam and Pāndurangi family has commented on the two i.e. Nyāyāmṛtam and Chandrikā.

The following three commentaries on Chandrikā are also reported. The commentary by Śrī Lakṣmīnātha tīrtha, Śrī Satyānanda tīrtha, Śrī Satyapriya tīrtha and Śrī Mannari Krishnāchārya. The manuscripts of these are available only in fragments. We are trying to procure one or two more manuscripts so that a reasonable portion can be restored and published.

I take this opportunity to record my appreciation of the assistance given to me by two young scholars Sri Ramakanta Joshi and Sri Krishnacharya Upadhyaya.

I thank Sri N. Narasimha Rau, Chairman of Dvaita Vedanta Foundation for giving me the opportunity to edit this valuable work.

Mahāmahopādhyāya
Prof. K.T. Pandurangi
Hon. Director
Dvaita Vedanta Studies
and Research Foundation

तात्पर्यचन्द्रिका

प्रथमाध्यायस्य प्रथमः पादः

विषयानुक्रमणिका

जिज्ञासाधिकरणम् १-१-१

1. मङ्गलश्लोकाः 1-22
2. सूत्राणां व्याख्येयत्वसमर्थनम् 23-26
3. भामतीमतपरीक्षा 27-38
4. विवरणमतपरीक्षा 39-42
5. रामानुजमतपरीक्षा 42-46
6. स्वमनेन सङ्गतिनिरूपणम् 46-52
7. स्वमतेन पूर्वपक्षः 53-76
8. स्वमतेन सिद्धान्तः 76-81
9. प्रणवस्यादिसूत्रावयवत्वसमर्थनम् 82-94
10. अद्वैत्युक्ताथशब्दार्थपरीक्षा 95-120
11. विशिष्टाद्वैत्युक्ताथशब्दार्थपरीक्षा 120-123
12. स्वरीत्या अथशब्दस्य अधिकारानन्तर्यार्थत्व वर्णनम् 124-128
13. स्वरीत्या अतश्शब्दार्थवर्णनम् 128-138
14. भामतीविवरणोक्तात:शब्दार्थपरीक्षा 139-142
15. विशिष्टाद्वैत्युक्तात:शब्दार्थपरीक्षा 142-144
16. विषयफलयोः भामत्युक्त जिज्ञासापदलभ्यत्व-परीक्षा 144-146
17. ब्रह्मशब्दस्य स्वरीत्या विष्णुवाचित्वं, अद्वैतमतपरीक्षा च 146-149
18. ब्रह्मशब्दस्य अद्वैत्युक्तकालवस्त्व-परिच्छिन्नार्थकत्वपरीक्षा 149-153
19. ब्रह्मजिज्ञासा इति समासशोधनम् 153-156
20. स्वरीत्या जिज्ञासाशब्दस्य विचारार्थकत्वम् 156-159
21. पञ्चपादीयविवरणोक्तविचारशक्त्यसम्भव-परीक्षा 160-164
22. विशिष्टाद्वैत्युक्तविचाररूढ्यसम्भवपरीक्षा 164-166
23. स्वरीत्या विचारे रूढिसमर्थनेन इच्छार्थकत्वस्य प्रकृते असम्भववर्णनम् 167-167
24. भामतीमतकौमुदीमतयोः परीक्षा 168-170
25. पूर्वतन्त्रेणैतच्छास्त्रस्य गतार्थताशङ्कासमाधानयोः अद्वैत्युक्तयोः परीक्षा 170-172
26. ब्रह्मणः प्रसिद्यप्रसिद्धिभ्यां विचार्यत्वासम्भवाशङ्का समाध्योरद्वैत्युक्तयोः परामर्शः 172-176
27. भास्करमतपरीक्षणं अधिकरणोपसंहारश्च 177-179

जन्माधिकरणम् १-१-२

28. सङ्गतिविचारः 179-180
29. पूर्वपक्षः 180-190
30. सिद्धान्तः 190-204
31. सुधारीत्या अधिकरणनिरूपणम् 204-208
32. भामत्युक्ताधिकरणपरीक्षा 208-210
33. रामानुजभाष्यपरीक्षा 210-211
34. यादवप्रकाशमतपरीक्षा 212-214
35. जन्मादीत्यनेन सृष्टयाद्यष्टकत्वप्रतिपादन-निरूपणम् 214-222
36. जन्मादिहेतुत्वसमुदायस्य लक्षणत्वमिति मतपरीक्षा 222-224
37. स्वरूपतटस्थलक्षणभेदपरीक्षा 225-235
38. सत्यज्ञानत्वादिलक्षणवत् जन्मादिकारणत्वलक्षणमपि स्वेतरसर्वव्यावर्तकमिति निरूपणम् 235-238

शास्त्रयोनित्वाधिकरणम् १-१-३

39. अधिकरणसङ्गतिः स्मृत्यधिकरणेन गतार्थताशङ्का च 238-241
40. स्मृत्यधिकरणेन गतार्थताशङ्कासमाधान-कथनम् 241-249
41. संशयपूर्वपक्षौ 250-256
42. सिद्धान्तः 256-259
43. अद्वैत्यभिमतषष्टीतत्पुरुषत्वपरीक्षा 259-261
44. अद्वैताभिमता अधिकरण स्वरूपपरीक्षा 261-268
45. विशिष्टाद्वैत्यभिमताधिकरणपरीक्षा 268-270
46. अद्वैत्यभिमतवर्णकान्तरपरीक्षा 270-272
47. यादवप्रकाशाभिमताधिकरणपरीक्षा 272-276

समन्वयाधिकरणम् १-१-४

48. पूर्वपक्षनिरूपणम् 276-279
49. पूर्वपक्षिणा उपक्रमादीनां तात्पर्यनिर्णायकत्व-निरूपणम् 279-285
50. वेदजन्यापातप्रतीतिमूलकं पूर्वपक्षान्तरम् 283-286
51. उपक्रमादिभिः तात्पर्यनिर्णयसमर्थनम् 287-292
52. अभ्यासस्य तात्पर्यनिर्णायकत्वे पूर्वपक्षोक्त-दोषोद्धारः 292-294
53. अपूर्वतास्वरूपनिर्वचनपूर्वकं तस्याः तात्पर्यनिर्णायकत्वसमर्थनम् 295-304
54. उपक्रमादुपसंहारस्य प्राबल्यम् 305-310
55. अभ्यासादपूर्वतायाः प्राबल्यम् 311-313
56. अपूर्वतायाः फलस्य प्राबल्यम् 313-315
57. फलादर्थवादस्य प्राबल्यम् 316-318
58. अर्थवादादुपपत्ते प्राबल्यम् 318-321
59. उपक्रमोपसंहारयोः ऐकरूप्यत्वविचारः 322-321
60. उपक्रमादीनां सावकाशत्व-निरवकाशत्व विचारः 325-329
61. सूत्राक्षरार्थनिरूपणम् 325-329
62. भामत्याद्युक्ताद्वैतमतपरीक्षा 330-334
63. रामानुजमतपरीक्षा 334-337

ईक्षत्यधिकरणम् १-१-५

64. सङ्गतिकथनपूर्वकं गतिसामान्य-सूत्रस्यैतधिकरणान्तर्भावोपपादनम् 337-342
65. पूर्वपक्षः 343-344
66. सिद्धान्तः 344-348
67. अवाच्यत्वादिश्रुतेः अर्थनिरूपणम् 348-351
68. स्वपक्षे सूत्राक्षरस्वारस्यस्य परपक्षे तदभावस्योपपादनम् 351-357
69. सूत्रक्रमनिरूपणम् 357-361
70. अद्वैताभिमतपूर्वपक्षसिद्धान्तपरीक्षा 361-368
71. विशिष्टाद्वैतमतपरीक्षा 368-371
72. यादवप्रकाशीयमतपरीक्षा 371-376
73. वैदिकशब्दाः अन्यत्र प्रसिद्धेत्यादि-चतुर्विधाः 377-379
74. नामलिङ्गभेदेन शब्दद्वैविध्यासम्भवशङ्का पादक्रमायोगशङ्का च 380-384
75. हेतुस्वरूपफलमुखेन अन्यत्र प्रसिद्धादीनां लक्षणनिरूपणम् 384-388
76. हेतुमुखलक्षणादीनामसांकर्यनिरूपणम् 388-396
77. नामलिङ्गस्वरूपनिरूपणं पादभेदोपपादं च 397-399
78. पादक्रमोपपादनम् 399-402
79. कैमुत्यन्यायेन अन्यत्र-प्रसिद्धशब्दसमन्वयशङ्कानिरासः 403-405
80. अद्वैत्युक्तपादोपाधीनां सांकर्यप्रदर्शनम् 406-409
81. अद्वैत्युक्तपादभेदतत्क्रमयोर्निरासः 409-411
82. विशिष्टाद्वैत्युक्तपादभेदादीनां निरासः 411-417
83. संगतिपञ्चकनिरूपणम् 418-423
84. आनन्दमयशब्दस्य टीकोक्तदिशा नामत्वेन पादान्तर्भावः 423-429
85. भाष्ये आनन्तरसङ्गतेरकथने बीजोक्तिः 429-432
86. अधिकरणविषयचिन्तापरम्परा पूर्वपक्षोदयबीजम् 432-435
87. ब्रह्मशब्दाभ्यासस्य भागासिद्धिपरिहारः 435-442
88. सूत्रक्रमहेतुनिरूपणम् 443-448
89. भामतीमतानुवादः 448-450
90. आनन्दमयपुच्छादिशब्देषु न मुख्यार्थलङ्घनम् 450-453
91. मयटः प्राचुर्यार्थत्वे दुःखलेशापत्तिपरिहारः 453-456
92. आनन्दमयमनोमययोः ब्रह्मत्वसाधनम् 457-462
93. अन्नमयादिपञ्चकस्य ब्रह्मत्वसाधनम् 457-462
94. अन्नमयादीनां ब्रह्मत्वे बाधकपरिहारः 465-468
95. शाखान्तरस्थानां पञ्चानां कोशत्वनिरूपणं तदन्तर्गतभगवदुपासनानिरूपणम् 468-472
96. विशिष्टाद्वैतमतपरीक्षा 472-474
97. यादवप्रकाशव्याख्यानपरीक्षा 475-478
98. स्वाभिमताधिकरणप्रमेयोपपादनम् 478-482
99. अन्नमयादिपञ्चानामपि ब्रह्मपरत्वनिरूपणम् 482-486
100. टीकाक्षरार्थवर्णनम् 484-486

अन्तस्थत्वाधिकरणम् १-१-७

101. सङ्गतिकथनम् 486-492
102. चिन्तापरम्परानिरूपणपूर्वकं पूर्वपक्षकथनम् 492-500
103. श्रुतितः निरवकाशलिङ्गस्य प्राबल्यम् 500-501

104. इन्द्रादीशब्दानां विष्णौ मुख्यत्वोपपादनम् 502-505
105. इन्द्रादीनां अभेदपक्षनिराकरणम् 505-513
106. अद्वैतमतानुवादः 510-513
107. अद्वैतमते असाधारणदोषनिरूपणम् 513-516
108. निर्विशेषज्ञानार्थं सविशेषनिरूपणमित्यस्य निराकरणम् 516-523
109. टिकाक्षरार्थनिरूपणम् 523-525

आकाशाधिकरणम् १-१-८

110. विषयनिरूपणपूर्वकं सङ्गतिकथनम् 526-528
111. भाष्यवाक्यस्य विचारफलप्रदर्शनपरत्ववर्णनम् 528-532
112. विषयवाक्यविचारः 532-535
113. अधिकरणविषयचिन्तापरम्परानिरूपणम् 535-537
114. अभ्यधिकाशंकासमर्थनेन पूर्वाधिकरणेन अगतार्थतावर्णनम् 537-550
115. आकाशशब्दस्य भगवति मुख्यत्वोपपादनम् 550-557
116. अनन्तत्वादिलिङ्गानां भगवदेकनिष्ठत्वोपपादनम् 557-561
117. अद्वैतविशिष्टाद्वैतमतयोः उभयसाधारणदोषकथनम् 561-564
118. अद्वैतमतेदोषाभिधानं अधिकरणोपसंहारश्च 564-566

प्राणाधिकरणम् १-१-९

119. अधिकरणसङ्गतिनिरूपणं अगतार्थताकथनं च 567-568
120. अधिकरणविषयचिन्तापूर्वपक्षयोः निरूपणम् 569-570
121. अधिकरणपूर्वपक्षः 571-572
122. अन्तिमप्रणाधिकरणेन अगतार्थता 572-574
123. पूर्वपक्षाभिप्रायान्तरकथननिरासः 575-577
124. तल्लिङ्गादिति हेतुविवरणपूर्वकं सिद्धान्तकथनम् 577-581
125. अनुवादकद्वयस्य एकवाक्यतानिरूपणम् 581-582
126. अद्वैतमतानुवादः 582-583
127. अद्वैतमतपरीक्षा 584-591

ज्योतिरधिकरणम् १-१-१०

128. सन्न्यायरत्नावल्याद्युक्ताभिप्रायत्रयसमर्थनम् 591-602
129. टीकासुधाभिमतपूर्वपक्षद्वयकथनम् 603-606
130. टीकासुधयोः एकाभिप्रायवर्णनेन पूर्वपक्षरचना 606-608
131. अग्निश्रुतिसूक्तादीनां विष्णौ सावकाशत्ववर्णनम् 608-611
132. सूक्तान्तरेष्वपि निरवकाशत्वेन प्राबल्यसमर्थनम् 612-614
133. अन्तराद्यधिकरणानां ज्योतिरधिकरणस्य च परस्परं अगतार्थतावर्णनम् 614-616

गायत्र्यधिकरणम् १-१-११

134. पूर्वपक्षपञ्चकप्रदर्शनम् 617-620
135. अधिकाशङ्कापञ्चकनिरूपणेन पूर्वपक्षोदयप्रदर्शनम् 620-626
136. शङ्कानिरासपूर्वकं सिद्धान्तोपपादनम् 626-628
137. अनादेरपि ईशाधीनत्वसमर्थनम् 628-631
138. अन्याधीनतासमर्थनस्य अनौचित्यशङ्कापरिहारः 631-633
139. अद्वैतविशिष्टाद्वैतमतपरीक्षा 633-642
140. दिवः पर इत्यस्य टीकोक्ताशयविवरणम् 642-646
141. त्रिपात्विश्वतः पृष्ठसर्वतः पृष्ठशब्दानां मतद्वयोक्तार्थनिरासपूर्वकं अधिकरणोपसंहारः 646-648

अन्तिमप्राणादिकरणम् १-१-१२

142. सङ्गतिचिन्तानिरूपणम् 648-649
143. अतीतप्राणाधिकरणेन अगतार्थतावर्णनम् 650-652
144. निरवकाशप्रापकप्रदर्शनेन पूर्वपक्षोत्थिति वर्णनम् 652-657
145. पूर्वपक्षफलाक्षेपसमाधानम् 657-663
146. पादसङ्गत्यनुपपत्तिशङ्कापरिहारः 663-665
147. जीवमुख्यप्राणादिलिङ्गानां विष्णुपरत्वसमर्थनेन सिद्धान्तनिरूपणम् 665-671
148. सूत्रक्रमसमर्थनम् 671-673
149. अद्वैतमतपरीक्षा 673-676
150. विशिष्टाद्वैतमतपरीक्षा 677-678
151. न वक्तुरिति सूत्रस्य अद्वैतविशिष्टाद्वैतमतोक्तार्थपरीक्षा 678-680
152. शास्त्रदृष्टिजीवमुख्यप्राणसूत्रयोः अद्वैतविशिष्टाद्वैतव्याख्यानपरीक्षा 680-684
153. जीवमुख्यप्राणसूत्रस्य वृत्तिकृद्व्याख्यानविशिष्टाद्वैत व्याख्यानपरीक्षापूर्वं पादोपसंहारः 685-688

प्रथमाध्यायस्य प्रथमः पादः समाप्तः

॥ श्री वेदव्यासाय नमः ॥

श्रीब्रह्मण्यतीर्थश्रीपादशिष्यश्रीव्यासतीर्थविरचिता

तात्पर्यचन्द्रिका

प्रथमाध्यायस्य प्रथमः पादः

जिज्ञासाधिकरणम्

अस्पृष्टदोषगन्धाय कल्याणगुणसिन्धवे ।
नमोनमो भक्तमुक्तिदायिने शेषशायिने ॥ १ ॥
शमयन्भवसन्तापं रमयन्साधुचातकान् ।
कृष्णमेघः कृपादृष्टिवृष्ट्या पुष्णातु मामपि ॥ २ ॥
श्रीमदानन्दतीर्थार्यपादपङ्कजरेणवः ।
पवित्रयंतु मां नित्यं पापपाटनपण्डिताः ॥ ३ ॥
शारदावासवदनशारदाम्बुरुहान्मुहुः ॥
पद्मनाभमुनीन्वंदे सर्वशास्त्रविशारदान् ॥ ४ ॥
मिथ्यासिद्धान्तदुर्ध्वांतविध्वंसनविचक्षणः ।
जयतीर्थाख्यतरणिर्भासतां नो(मे)हृदम्बरे ॥ ५ ।
कंसध्वंसिपदाम्भोजसंसक्तो हंसपुङ्गवः ।
ब्रह्मण्यगुरुराजाख्यो वर्ततां मम मानसे ॥ ६ ॥
पदवाक्यप्रमाणाब्धिविक्रीडनविशारदान् ।
लक्ष्मीनारायणमुनीन्वन्दे विद्यागुरून्मम ॥ ७ ॥

श्री राघवेन्द्रतीर्थविरचिता प्रकाशिका

समस्तगुणसम्पूर्णं सर्वदोषविवर्जितम् ।
ज्ञानिप्रियतमं वन्दे मुक्तिदं कमलापतिम् ॥ १ ॥
शर्वादिसर्वगीर्वाणनिर्वाणगतिहेतवः ।
पूर्णप्रज्ञपदाम्भोजपांसवः पान्तु नः सदा ॥ २ ॥
विधूतदुर्मतध्वान्तो विशदीकृतपद्धतिः ।
यः सज्जनानुज्जहार जयतीर्थरविं भजे ॥ ३ ॥
पदवाक्यप्रमाणज्ञान्सम्प्रदायार्थकोविदान् ।
व्यासतीर्थमुनीन्सेवे दुर्वादिफणिपक्षिपान् ॥ ४ ॥
अस्मद्देशिकपादानां प्रणम्य चरणाम्बुजम् ।
तात्पर्यचन्द्रिकाव्याख्यां विधास्यामि यथामति ॥ ५ ॥

तत्वप्रकाशिकाव्याख्याव्याजेनाधिसूत्रं प्रवर्तमानेषु ग्रन्थेषु दुर्गमार्थान् सुगमान्विधित्सुर्व्यासतीर्थमुनिः प्रारिप्सितग्रन्थपरिसमाप्त्याद्यर्थं अध्यायचतुष्टयोक्तगुणविशिष्ट देवतानतिरूपं मङ्गलं विदधाति ॥ अस्पृष्टेति ॥ असम्बद्धदोषलेशायेति द्वितीयाध्यायार्थः । ''गन्धो गन्धक आमोदे सम्बन्धे लेशगर्वयो''रित्यभिधानात् । यं दोषलेशोपि न स्पृशति तस्मा इति यावत् । बहुव्रीहेर्दोषगन्धपदांतत्वेन केवलगन्धपदांतत्वाभावात् ''अल्पाख्याया''मितीत्वं न भवति । कल्याणानां गुणानां धर्माणां सिन्धुरिव सिन्धुराश्रय इत्याद्याध्यायार्थः । सत्त्वादीनां श्रुत्यादौ गुणत्वप्रसिद्धेः मतान्तरे दुःखादीनां गुणत्वोक्तेश्च तद्व्युदासाय कल्याणेति ॥ आद्यार्थस्यादौ वाच्यत्वेपि द्वितीयार्थस्याद्यार्थहेतुत्वादादावुक्तिः । कल्याणधर्मत्वोपपादकत्वाद्वा । सदोषत्वे तस्यायोगात् । विघ्नादिदोषनिवृत्तेरादावपेक्षितत्वाद्वा । ''तं यथा यथोपासते'' इत्यादेः । भक्तेभ्यो भक्त्युपलक्षितवैराग्यश्रवणमननादिसाधनवद्भ्यः मुक्तिदायिन इत्यनेन तृतीयचतुर्थार्थोक्तिः । नमोनम इत्यादराद्विरुक्तिः । ''नमः स्वस्ती''त्यादिनाचतुर्थी । एवं विधश्च नारायण इति सूचयति । शेषशायिन इति ॥ १ ॥ प्रतिपाद्यदेवतां नत्वा सूत्रकर्तुः कृपादृष्टिमात्मन्याशास्ते ॥ शमयन्निति ॥ कृष्णमेघः वेदव्यासाख्यमेघः पुष्णातु ज्ञानभक्त्यादिभिः भवसन्तापशान्तिविशिष्टस्वरूपानन्दानु भवलक्षणरमणदानेन वा पुष्टङ्करोतु । तस्य मेघत्वोपपादनं विशेषणद्वयेन । इष्टदेवतात्वाद्वसुदेवसुतः कृष्णोऽपि ग्राह्यः ॥ २ ॥

(प्रकाशिका)

भाष्यकर्तुरादिगुरोः पादरेणुभ्यः कामान्तरं याचते ॥ श्रीमदिति ॥ कथं तेषां पवित्रीकरणशक्तेतत्यत उक्तम् ॥ पापेति ॥ भजकानामिति शेषः ॥ ३ ॥ प्राचीनटीकाकर्तृन्नमति ॥ शारदेति ॥ सरस्वत्यावासभूतं वदनाख्यशरत्कालसम्बन्धि पङ्कजं येषां तान् । एतदुपपादयति ॥ सर्वेति ॥ गुरुत्वाद्बहुवचनम् ॥ ४ ॥ व्याख्येयग्रन्थकर्तुर्हृद्यावासं प्रार्थयते ॥ मिथ्येति ॥ तस्य तरणित्वोपपादकमेतत् ॥ ५ ॥ यतःस्वस्य पारमहंस्यं तस्य गुरोः हृद्यावासमर्थयते ॥ कंसेति ॥ कंसध्वंसी कृष्णः । तस्य पदाख्याम्बुजानुरक्तः । परमहंसाश्रमीत्यर्थः ॥ ६ ॥ स्वस्य विद्योपदेष्टृन्नमति ॥ पदेति ॥ इदं तु गुरुत्वे शक्त्युपपादकम् ॥ पदं शब्दशास्त्रम् । वाक्यं मीमांसायुग्मम् । प्रमाणं तर्कशास्त्रम् । बहुवचनं प्राग्वत् ॥ ७ ॥

पाण्डुरङ्गि केशवाचार्यविरचिता भावदीपिका

सकल सुगुणपात्रं सर्वदोषैकजैत्रं सुमतिसुगतिदात्रं सुष्ठु सज्ज्ञाननेत्रम् ।
निखिलजनिजनित्रं नित्यदुष्टैकनेत्रं नवनवसुचरित्रं नौमि लक्ष्मीकलत्रम् ॥ १ ॥
शुभगुणगणगात्रं शुद्धविज्ञाननेत्रं श्रुतिविततचरित्रं श्रान्ततापातपत्रम् ।
श्रमजलधिवहित्रं शान्तिमन्तः पवित्रं श्रयत विबुधमित्रं शक्तियोगीन्द्रपौत्रम् ॥ २ ॥
विद्याख्यरत्नप्रभवाय बुद्धौ विद्योतमानाय सुबृंहिताय ।
शुद्धाय नित्यं मुनिसेविताय मध्वाद्भुतांभोनिधये नमोऽस्तु ॥ ३ ॥

श्रीमद्व्याससुशास्त्रदुग्धजलधिं मध्वोक्तसत्तर्कदु-
स्तर्काख्यामरदानवाभृतमतिश्रेष्ठाहिहृद्भूभृता ।
आलोड्याखिलतत्वभासकमहारत्नानि चाप्नोत्सुधां
सोऽयं योगिमहेन्द्रसन्निभजयार्याख्यो भवेन्मे मुदे ॥ ४ ॥
वेदव्यासमतापगापतिवरं श्रीमज्जयप्रोक्तिसत्-
सर्पावेष्टितमध्वसन्मुनिवरग्रन्थागवर्येण यः ।
संलोड्याखिलसंनयामृतवरं तत्वादिसद्दीपिका
सत्तात्पर्यसुचन्द्रिकातरुवरं यस्तर्कसत्ताण्डवम् ॥ ५ ॥
निष्कास्याद्भुतखण्डनत्रयमुखव्याख्यानरत्नोच्चयं
दृष्ट्वा कुत्सितयुक्त्यरातिपिहितां श्रीव्यासतीर्थो बुधः ।
स्वोक्तिं रक्षितुमत्र यः प्रतिपदं सम्यग्विशेषार्पको
विद्याधीशसुतीर्थसद्गुरुवरः किं नावतीर्णः स हि ॥ ६ ॥

(पाण्डुरङ्गि)

विद्याधीशं चन्द्रिकाब्धिविक्रीडनविचक्षणम् ।
विद्यागुरुं कुलगुरुं नौमि तं मे जगद्गुरुम् ॥ ७ ॥
निशम्य सकलं शास्त्रं विद्याधीशाज्जगद्गुरोः ।
चन्द्रिकायाः प्रकाशोऽयं केशवेन प्रकाश्यते ॥ ८ ॥

ग्रन्थादौ मङ्गळमाचरति ॥ अस्पृष्टेति ॥ अध्यायचतुष्टयप्रतिपाद्यगुणविशिष्टतया परदेवता स्तूयते । तत्र अस्पृष्टेति द्वितीयाध्यायार्थः । अस्पृष्टोऽसम्बद्धो दोषगन्धो दोषलेशो येन स तथोक्तस्तस्मै । अस्पृष्टदोषायेत्यनुक्त्वा अस्पृष्टदोषगन्धायेति गन्धपदोपादानं तु एतद्व्याख्ये-यचिन्तासन्तापलेपोद्भवमृतिमुखराशेषदोषातिदूरमिति विशेषणगतातिदूरमिति पदाभिप्रायेण । कल्याणानां गुणानां धर्माणां सिन्धुरिव सिन्धुः आश्रय इति आद्याध्यायार्थः । ''सज्ज्ञानसुखशक्तिभिः पयोनिधिरिवे''ति ''ज्ञानेन सूर्य इवे''ति ''निखिलपूर्णगुणैर्णः समुद्र इवे''ति च तत्र तत्र टीकाकारैस्तृतीयासमासाश्रयणादत्रापि कल्याणगुणैः सिन्धुः समुद्र इवेति । ''तृतीये''ति योगविभागात्तृतीयातत्पुरुष इति वा । कल्याणत्वेन गुणविशेषणं तु वीर्यादिदेहमित्यत्रत्यादिशब्दसङ्गाह्यतावच्छेदकधर्मसूचनार्थम् ।

यद्यपि अध्यायद्वयार्थकथनरूपटीकाग्रन्थक्रमानुरोधेन कल्याणगुणसिन्धव इत्याद्याध्या-यार्थोक्त्यनन्तरमस्पृष्टदोषगन्धायेति द्वितीयाध्यायार्थोक्तिरुचिता न तु व्यत्यासेन । तथापि दुःखनिवृत्त्यनन्तरमेवानन्दादिगुणावाप्तिलक्षणो मोक्ष इति फलक्रममनुसृत्य तत्साधनोपा-सनविषययोर्निर्दोषत्वकल्याणगुणत्वयोः पौर्वापर्यमुचितमिति भावेनायं व्यत्यास इति ज्ञेयम् । यद्वा द्वितीयाध्यायार्थभूताऽपि भगवन्निर्दोषता विघ्नरूपदोषनिर्हरणाय मुमुक्षुणा प्रथममनु-सन्धेयेति भावेन टीकाक्रमपरित्यागेन क्रमान्तराश्रयणमिदमिति ज्ञातव्यम् । भक्तेति तृतीयाध्यायार्थसूचनम् । ततश्च भक्तेभ्यो भक्त्युपलक्षितवैराग्यादिसमस्तसाधनवर्ग्यश्चतु-र्विधमोक्षदायिन इत्युक्तं भवति । शेषशायिन इति परदेवतायाः शेषरूपमञ्चस्थत्व कथनेन तादृशस्य परमात्मनः परमानन्दमग्नत्वात्तत्प्रार्थनमविलम्बेनापेक्षिताशेषपुरुषार्थसाधनमिति सूचितं भवति ॥ १ ॥

मीमांसाशास्त्रकर्तुर्वासिष्ठकृष्णस्य स्वेष्टदेवताया यादवकृष्णस्य च स्वात्मनि कृपादृष्टिवृष्टि पुष्टिमाशास्ते ॥ शमयन्निति ॥ कृष्णस्य मेघत्वोपपादनाय विशेषणद्वयमिदम् ॥ साधुचातकानिति ॥ भगवत्पक्षे साधव एव चातकाः तान् रमयन्निति कालमेघपक्षे चातकान्

(पाण्डुरङ्गि)

साधु रमयन्निति योजना ॥ २ ॥ भाष्यकर्तृन् प्रार्थयते ॥ श्रीमदिति ॥ तेषां पवित्रीकरण शक्तिमुपपादयितुमुक्तम् ॥ पापेति ॥ पण्डिताः कुशलाः ॥ ३ ॥ आदिटीकाकर्तृन्नमति ॥ शारदेति ॥ शारदायाः सरस्वत्याः आवासो यस्मिन् तच्छारदावासं तच्च तद्वदनं च शारदावासवदनम् । तदेव शारदाम्बुरुहं शरत्काल सम्बन्धि पङ्कजं येषां तानित्यर्थः । तस्यैवोपपादनम् ॥ सर्वेति ॥ गुरुत्वात् बहुवचनम् ॥ ४ ॥ व्याख्येयग्रन्थकर्तुर्हृद्यावासं प्रार्थयते ॥ मिथ्येति ॥ एतच्च टीकाकर्तुस्तरणित्वोपपादनार्थं विशेषणम् ॥ ५ ॥ आश्रमगुरोर्हृद्यावासं प्रार्थयते ॥ कंसेति ॥ कंसध्वंसी श्रीकृष्णः तस्यं पादाख्याम्बुजानुरक्तः। हंसपुङ्गवः चतुर्थाश्रमीत्यर्थः ॥ ६ ॥ विद्यागुरून्प्रणमति ॥ पदेति ॥ अत्र पदार्थ-ज्ञानोपायभूतं पद्यते शब्दार्थोऽनेनेति व्युत्पत्त्या व्याकरणं पदम् । वाक्यार्थ ज्ञानोपायन्याय-समर्पकं प्रमेयमीमांसाशास्त्रं वाक्यम् । उद्देशलक्षणविभागपरीक्षाभिः प्रमाणस्वरूपनिर्धारकं प्रमाणमीमांसाशास्त्रं प्रमाणमिति विवेकः ॥ ७ ॥

तात्पर्यचन्द्रिका

श्रीमद्भाष्यस्य टीका या जयतीर्थार्यनिर्मिता ॥
गम्भीरा निर्मला चेमां व्याकरिष्ये यथामति ॥ ८ ॥
सूत्रे भाष्येऽनुभाष्येच सन्न्यायविवृतौ तथा ।
टीकासुच यदस्पष्टं तच्च स्पष्टीकरिष्यते ॥ ९ ॥
प्रतिसूत्रं प्रकाश्येते घटनाघटने मया ।
स्वीयान्यपक्षयोः सम्यग्विदांकुर्वंतु सूरयः ॥ १० ॥

प्रकाशिका – एवं मङ्गलनिचयमारचय्य शिष्यमनस्समाधानार्थं चिकीर्षितं प्रतिजानीते ॥ श्रीमदिति ॥ तत्वप्रदीपभ्रान्तिं निरस्यति ॥ जयतीर्थेति ॥ या जयतीर्थार्यनिर्मिता तामिमामित्यन्वयः । व्याख्याने हेतुमाह ॥ गम्भीरेति ॥ गाम्भीर्यं गहनार्थत्वम् । निर्मलत्वं चासङ्गतार्थवर्णनादिशून्यत्वम् ॥ ८ ॥ स्वप्रवृत्तेः फलान्तरमाह ॥ सूत्र इति ॥ निरुपपदसूत्र शब्दस्य ब्रह्मसूत्र एव मुख्यत्वात्सूत्र इत्यवादि । एवं भाष्य इत्यपि । अनुभाष्ये अनुव्याख्याने । च शब्दादणुभाष्येच ॥ टीकास्विति ॥ त्रिविक्रमपण्डिताचार्यकृता तत्त्वप्रदीपाख्या अनुव्याख्यानटीका न्यायसुधा पद्मनाभाचार्य कृता सन्न्याय रत्नावलिश्च

न्यायविवरणटीकाच तत्वप्रकाशिकाचेत्येतासु टीकास्वित्यर्थः ॥ ९ ॥ स्वप्रवृत्तेरन्यच्च फलमाह ॥ प्रतिसूत्रमिति ॥ स्वपरपक्षयोर्यथाक्रमं घटनाघटने । विदाङ्कुर्वन्तु जानन्तु । यद्यपि स्वस्येदमित्यर्थेऽणिकृते स्वशब्दस्य द्वारादिषु पाठेन ''द्वारादीनाञ्चे''ति सूत्रेण वकारात्पूर्व-मैजागमेनौकारे सति सौवेति भाव्यम् । तथापि स्वस्मै हितमित्यर्थे ''प्राक्क्रीताच्छ'' इति च्छप्रत्यये स्वीयेति साध्विति ज्ञेयम् । चतुर्थस्य द्वितीयपादे ''गाहादिभ्यश्चे''त्यत्र दुर्घटवृत्तौ तथैवोक्तेः ॥ १० ॥

पाण्डुरङ्गि – टीकाया व्याख्येयत्वप्रयोजकं निर्दोषत्वगम्भीरत्वादिकं दर्शयन्नेव चिकीर्षितं निर्दिशति ॥ श्रीमद्भाष्यस्येति ॥ तत्वप्रदीपभ्रान्तिं वारयति ॥ जयतीर्थार्यनिर्मितेति ॥ या जयतीर्थार्यनिर्मिता इमामित्यन्वयः । स्वप्रवृत्तेः प्रयोजनमाह ॥ सूत्र इति ॥ चशब्दोऽणुभाष्य सङ्ग्रहार्थः । टीकासु भाष्यानुव्याख्यानसन्न्यायविवृतिटीकासु तत्वप्रदीपसन्न्यायरत्नावलि तत्वप्रकाशिकान्यायसुधासु । 'यद्यप्यभूततद्भावार्थकच्विप्रयोगादेवास्पष्टत्वलाभादस्पष्टमिति पृथगस्पष्टत्वकथनमनर्थकं तथापि विशिष्टवाचकानां शब्दानां विशेषणवाचकपदसंनिधाने विशेष्यमात्रपरत्वस्य बहुषुस्थलेषु दृष्टत्वादवैयर्थ्यमिति ज्ञेयम् । स्वीयान्येत्यत्र स्वीयश्चान्यश्च स्वीयान्यौ अन्यत्वं च प्रकृतात्स्वीयादित्यवधेयम् ॥

तात्पर्यचन्द्रिका

ग्रन्थादौ मङ्गळमाचरति ॥ शुद्धेति ॥ इदं च पद्यं भाष्यस्थाद्यश्लोकविवरण-रूपत्वात्तद्वदेव वक्ष्यमाणादिसूचकत्वेन व्याख्येयम् ।

आनन्दादेः शुद्धत्वंनाम सान्तत्वसातिशयत्वादिराहित्यम् । लेपः पुण्यपाप-सम्बन्धः । श्रुतिमती श्रवणमनने । नियतध्यानं स्वयोग्योपासनम् । ज्ञानं साक्षा-त्कारः । स एव योग उपायः । अमलं मुमुक्षूपास्यम् । नतु परमत इवमुकुन्दाभिधं मन्दोपास्यम् ।

व्याचिख्यासितभाष्यमूलसूत्रप्रामाण्यं सूचयन्मङ्गळान्तरमाचरति ॥ यांचेति ॥ अत्र यत उदैद्विर्द्येंदिरैत्यादिना वक्त्रानुकूल्यं निर्जरैरित्यादिना श्रोत्रानुकूल्यं यांचेत्यादि-ना प्रसङ्गानुकूल्यं च दर्शयता ''वक्तृश्रोतृप्रसक्तीनां यदाग्निरनुकूलते''त्यनु-

(तात्पर्यचन्द्रिका)

व्याख्यानोक्ता आप्तिमूलता सूत्राणां सूचिता । ब्रह्मसूत्रपदेन ब्रह्मपरश्रुति-व्याख्यानरूपत्वात् श्रुतिमूलत्वं न्यायव्युत्पादकत्वाद्युक्तिमूलत्वं च सूचितम् ।

भाष्यस्य व्याख्येयत्वप्रयोजकं सफलत्वगम्भीरत्वादि दर्शयन् भाष्यकृतं प्रणमति ॥ स्वान्तेति ॥ वैकर्तनांशुव्रजादेः स्वान्तध्वान्तनिकृन्तनादावशक्तत्वादेव भाष्येण जितत्वम् । गङ्गासङ्गेन यथा रथ्याद्विर्नैर्मल्यं लभ्यते तथा मदीयाया वाचो विशुद्धिसिध्यर्थं गुरोर्गिरो मदीयया वाचा सङ्गम्यन्ते व्याख्यानव्याख्येय-भावेन सम्बध्यन्त इत्यर्थः । यद्वा गुरोर्गिरः परस्परं सङ्गम्यन्ते सम्बद्धतया प्रकाश्यन्त इत्यर्थः ॥

प्रकाशिका – ननु भाष्यव्याख्यानार्थं प्रवृत्तस्य भगवतो जयतीर्थमुनेः सैव कार्या किमाद्यपद्येन । मङ्गळाचरणस्यापि ''अथाविद्ये''ति भाष्यव्याख्यारम्भे माङ्गलिकस्याथेत्यस्य प्रयोक्ष्यमाणतया सिद्धत्वादित्यत आह ॥ ग्रन्थादाविति ॥ तस्य तु कृत्यं वक्ष्यत इति भावः। मङ्गळमारचय्य ग्रन्थे निबध्नातीत्यर्थः । मङ्गळपदोपादानेन तस्य प्रारिप्सितपरिसमाप्त्यादि हेतुत्वात्तदनुष्ठानस्य शिष्टाचारपरंपराप्राप्तत्वेनावश्यकत्वं सूचितम् । ग्रन्थादावित्युक्त्या च मङ्गलस्य ग्रन्थाङ्गत्वं च । भाष्यव्याख्यानरूपं चेदं अतो नानुपयुक्तकथनमित्याह ॥ इदं चेति ॥ यद्वा ब्रह्मवन्द इत्यनेनैव मङ्गळस्य चीर्णत्वात् किंविशेषणैः कृत्यमित्याशङ्क्य च व्याख्येय-पद्यगत विशेषणकृत्यानीवात्रापि ध्येयानीत्याह ॥ इदं चेति ॥ वक्ष्यमाणाध्यायार्थ-सूचकत्वेनेत्यर्थः । आदिपदेन नारायणशब्दान्वाख्यानपरत्ववत्तत्पर्यायब्रह्मशब्दान्वाव्याख्या-नपरत्वसूचकत्वेन तस्यैव वन्द्यत्वोपपादकत्वेन चेति ग्राह्यम् । यद्वा अधिकार्यादिचतुष्टय-सूचकत्वेनेत्यर्थः ।

''तथाह्यादिसूत्रे भगवत'' इत्याद्यपद्यव्याख्या सर्वाऽप्यत्र यथायोगमनुसन्धेयेति भावः । आद्यार्थस्य ''गुणैः सर्वैरुदीर्ण''मित्यस्य विवरणं शुद्धेत्यादि ॥ तत्र यदि शुद्धत्वं दुःखासम्भिन्नत्वं तदा चिन्तादिदोषदूरमित्यनेन गतार्थमत आह ॥ आनन्दादेरिति ॥ द्वितीयार्थस्य''दोषवर्जित''मित्यस्य विवृतिश्चिन्तेति ॥ तत्र चिन्तासन्तापाभ्यां लेपः सङ्ग इति भ्रान्तिं निराह ॥ लेपइति ॥ तृतीयार्थस्य''ज्ञेय''मित्यस्य विवृतिः सद्भिरित्यादि ॥ तत्र श्रुत्या श्रवणेन जाता या मतिः तया नियतं तद्विषय एव नियमितं यद्ध्यानमा-

लोचनात्मकं मननं तज्जनितनिरन्तरानुस्मृतिरूपज्ञानलक्षणध्यानादिति भ्रान्तिं निराह ॥ श्रुतिमती इति ॥ योग उपाय इति ॥ ''योगःसन्नहनोपाये''त्यभिधानादिति भावः । नन्वमलं निर्दोषमित्यर्थश्चेच्चिन्तेत्यादिना गतार्थमत आह ॥ अमलमिति ॥ मायारूप-मलरहितम् । ''निर्विशेषं परं ब्रह्मे''त्याद्युक्त्या परमते मायिन एव मन्दोपास्यत्वात् । यद्वा नविद्यते मलं संसाराख्यं यस्मादित्यर्थः । मुमुक्षूपास्यमिति पर्यवसितव्याख्यानम् । संसारनिवर्तकस्यैव तदुपास्यत्वादिति भावः ।

ननु ग्रन्थादाववश्यकार्यस्य मङ्गळस्य कृतत्वात्किं द्वितीयपद्येन । यदि ''श्रेयांसि बहुविघ्नानी''ति मङ्गळान्तरस्य कार्यता तदा ''व्यासो भवतुमे भूत्यै'' इत्येतावता पूर्तेर्न विशेषणकृत्यमित्यत आह ॥ व्याचिख्यासितेति ॥ एतेन सूत्रप्रामाण्यसूचनं विशेषण-कृत्यमित्युक्तं भवति । व्याचिख्यासितेत्युक्त्या तत्सूचनमपि नानुपयुक्तमित्याह ॥ ब्रह्मपरेति ॥ ब्रह्मसूत्रेत्यत्र तन्त्रेण ब्रह्मणो विष्णोः सम्बन्धि यद्ब्रह्म श्रुतिजातं तस्य यानि सूत्राणि न्यायनिबन्धनात्मकवाक्यानीत्युक्तं भवति । यद्वा ब्रह्मणः श्रुतिजातस्य सूत्रं तन्निर्णाय-कन्यायनिबन्धनात्मकशास्त्रमित्यर्थः । श्रुतिजातस्य ब्रह्मपरत्वं च वास्तवमभिप्रेत्येति ध्येयम् । न्यायेति सूत्रेत्युक्तिलब्धोऽर्थः ।

ननु भाष्यव्याख्याने तत्कर्तृप्रसादस्यावश्यकतया तत्प्रणामस्य कार्यत्वेऽपि न विशेषण कृत्यमित्यत आह ॥ भाष्यस्येति ॥ ध्वान्तशब्दिताज्ञाननिवर्तकत्वतापत्रयोन्मूलकत्वरूपं फलवत्त्वं गम्भीर्यमापाततोऽप्रतीयमानहृदयत्वम् । आदिपदेनामितशब्दित- ब्रह्मर्थत्वग्रहः ॥ प्रणमतीति ॥ यद्यपि प्रपद्य इति प्रपत्तिरेव श्रुता । तथापि नमनादिनैव सा भवतीति तथोक्तम् । धातूनामनेकार्थत्वमुपेत्य वा एवमुक्तम् । ध्वान्तनिवर्तकत्वाद्यविशेषे कथं जितत्वमत आह ॥ वैकर्तनेति ॥ स्वान्तेति ॥ भाष्यस्य तु शक्तत्वाद्विशेष इति भावः । उभयत्रादिपदेन चन्द्रचन्द्रिकायास्तापत्रयोन्मूलने अशक्तत्वात्समुद्रस्य चामितत्वाभावादिति ग्राह्यम् । यद्वा काकोलूकवत् परस्परं युद्धलब्धजयाभावात्कथं तेन जितत्वं तेषामित्यत आह ॥ वैकर्तनेति ॥ एवकारेण लौकिकं जयं प्रत्याह ॥ वाचोविशुद्धिसिद्ध्यर्थमित्यत्र वाचः कर्तुरश्रवणाद्गुरोरित्यस्यैवात्राप्यन्वये गुरोर्वाचो विशुद्धिसिद्ध्यर्थं गुरोर्गिरः मिथः सङ्गम्यन्ते इत्यस्यायोगाद्गिरां सङ्गतत्वासङ्गतत्वाभ्यां सङ्गतिकरणासम्भवाच्चेत्याशङ्क्य दृष्टान्तांशं स्फुटीकुर्वन्नपेक्षितपूर्त्योत्तरार्धं द्वेधा व्याचष्टे ॥ गङ्गासङ्गेनेति ॥ रथ्याद्विरिति ॥ ''द्वित्रिभ्यां

(प्रकाशिका)

पाद्दन्मूर्धस्वि''ति निर्देशाज्ज्ञापकात् ''ऋक्पूरब्धूः पथामानक्ष'' इति समासान्तोऽनित्य इति भावः ॥ यद्वेति ॥ मदीयया वाचेत्यनुकर्षः । अस्मिन्पक्षे वाचो गीर्भिः सङ्गतिरार्थिकीति न दृष्टान्तानानुगुण्यम् ।

पाण्डुरङ्गि – ग्रन्थादौ मङ्गळमाचरतीति ॥ नन्वयं मङ्गलोपनिबन्ध एव तत्कथं मङ्गलाचारत्वोक्तिः । न च मङ्गलोपनिबन्धनस्य नमस्काराङ्गतया स्वातन्त्र्येणवा समाप्त्यननुकूलत्वादयुक्तत्वमिति वाच्यम् । समाप्त्यननुकूलस्यापि शिष्यशिक्षार्थतया युक्तत्वात् । तथाहि नहि ग्रन्थो व्यसनितया क्रियते किन्तु ''यावत्कीर्तिर्मनुष्याणां पुण्यलोकेषु गीयते । तावद्वर्षसहस्राणि पुण्यलोके महीयते'' इति सत्कीर्त्यनुवृत्तये । नचाप्रचरता तेन सत्कीर्तिरनुवर्तयितुं शक्या । नचाशिक्षिताः शिष्या मङ्गलं कुर्यूः । नच तेषां मङ्गलाकरणे ग्रन्थाध्ययनाध्यापने भवतः । कदाचित्कस्यचिदन्तरा विघ्नानुत्पादेपि बहुलविघ्नोत्पादात् । तथाचाहुः ''श्रेयांसिबहुविघ्नानी''ति ॥ तस्मात् ग्रन्थारम्भे मङ्गलाचरणविषया शिष्यशिक्षैव युक्ता । वक्ष्यतिच ग्रन्थकारः ''नमस्काराधिकार्यादिग्रन्थनसूचने शिष्यशिक्षार्थ''मिति ॥

तत्कथं शिष्यशिक्षार्थस्य मङ्गलोपनिबन्धस्य मङ्गलाचारत्वकथनमिति चेत् अत्र स्वामिनः यद्यप्येवं शिष्यशिक्षार्थता नमस्कारोपनिबन्धस्य सम्भवति तथापि न सैव प्रयोजनम्। मङ्गलान्तर इव इष्टसिद्ध्यर्थिनां शिष्याणां कर्तव्यत्वबुद्धिसम्भवात् । न खल्वन्यन्मङ्गलं कृतं ग्रन्थकारैर्ग्रन्थादौ निबध्यते । ततश्च प्रचरद्ग्रन्थेषु सहस्रशो नमस्कारोऽपि निबन्धनेन शिष्यशिक्षायाः सम्भावितत्वेऽप्युत्तरोत्तरेषां ग्रन्थकाराणां नमस्कारोपनिबन्धदर्शनादवगच्छामो यत्प्रणामवाचकनमःशब्दादिवत्तदनुमापकलिपेरपि विघ्नानुत्पादोद्देशेनैव करणम् । उल्लिखंत्यपि केचिद्विघ्नो मामूदिति । कृतेऽपि मङ्गलान्तरे विघ्नहेतुबलीयस्त्वसम्भावनायां मङ्गलप्राचुर्यार्थं नमस्कारकरणवत्कृतेऽपि नमस्कारे तदुपनिबन्धरूपमङ्गलांतरानुष्ठानमप्युपपन्नमेव । तथाच टीकायां ''शिष्यशिक्षार्थ''मित्यानुषङ्गिकप्रयोजननिर्देशः । अन्यार्थमपि कृतस्य लोकेऽन्यार्थत्वदर्शनात् । तद्यथा शाल्यर्थं कुल्याः प्रणीयन्ते ताभ्यश्च पानीयं पीयत इति सर्वमनवद्यम् ।

वस्तुतस्तु त्रिविधस्यापि नमस्कारस्य सैद्धान्तिकत्वात्सर्वेष्वपि ग्रन्थेष्वादौ नमःशब्दादिप्रयोगो वाचिकनमस्कार एव । नत्वसौ मङ्गलोपनिबन्धः । अन्यथा कागतिः ''अस्पृष्टदोषगन्धाये''त्यादिस्तुतिरूपशब्देषु । नहि सोऽपि स्तुतिरूपमङ्गलोपनिबन्धः । स्तुतिरूप-

शब्दाप्रतिपादकत्वात् । किं तूत्कर्षप्रतिपादकशब्दत्वेन तेषामेव स्तुतित्वम् । तस्मादेवं-जातीयकेषु सर्वग्रन्थेषु गुणप्रधानभावेन नतिस्तुतिरूपमङ्गलाचरणमेव । शिष्यशिक्षा त्वानुषङ्गिक्येव पूर्ववत् । तादृशलिपिरचनया नमःशब्दादिरूपनमस्कारज्ञानेन तस्याः सम्भवात् ।

ननु ब्रह्म वन्द इत्यनेनैव मङ्गलस्य चीर्णत्वात्किं विशेषणैः कृत्यमित्याशङ्क्य ''नारायणं गुणै'' रिति व्याख्येयपद्यगतविशेषणकृत्यानामेवात्रापि तत्कृत्यत्वान्नानुपपत्तिरित्याह ॥ इदं चेति ॥ आद्यश्लोकविवरणरूपत्वादिति ॥ विवरणं च भाष्याद्यश्लोकस्थो गुणशब्दो न तार्किकोक्तदुःखादिपरः किं त्वानन्दादिपरः । दोषशब्दोऽपि न रागद्वेषमोहपरः किन्तु चिन्तादिपरः । ज्ञेयशब्दोऽपि न ज्ञेयत्वमात्रपरः घटादिसाधारण्यात् किन्तु श्रोतव्यत्वादिचतुष्टयपरः । गम्यशब्दोऽपि न मुक्तप्राप्यत्वमात्रपरः किन्तु वेदसमधिगम्यत्वपरोऽपीति द्रष्टव्यम् ॥ वक्ष्यमाणादीति ॥ वक्ष्यमाणं गुणपूर्णत्वनिर्दोषत्वादि । आदिपदेन नम्यत्वप्रयोजकेष्टत्वादिपरिग्रहः । तस्यापि शुद्धानंदेत्यादिना सूचितत्वादित्यपि द्रष्टव्यम् ॥

आनन्दादेः शुद्धत्वं सान्तत्वसातिशयत्वादिराहित्यमिति ॥ यद्यप्यत्र आनन्दादिरूपो देहो यस्यासावानन्दादिदेहः । शुद्धश्चासावानन्दादिदेहश्चेति शुद्धत्वं न तावद् ब्रह्मणो विशेषणम् । तस्य दोषातिदूरमित्यनेनैवोक्तत्वात् । नापि शुद्धः आनन्दादिरूपो देहो यस्येति देहस्य विशेषणम् । देहस्यानन्दरूपत्वेनैव शुद्धत्वसिद्धेः । तथापि शुद्धः आनन्दादिर्देहो यस्येति आनन्दादेर्गुणस्य विशेषणमुरुत्वादिवत् । तत्रापि शुद्धत्वं न दुःखाद्यमिश्रत्वं तस्य दोषातिदूरमित्यनेनैव सिद्धेः। किंतु सान्तत्वादिराहित्यमेव । उरुत्वादिविशेषणेन ज्ञानादेः सर्वविषयत्वादिलाभेऽपि सान्तत्वादिराहित्यालाभात्तल्लाभाय शुद्धत्वस्यानन्दादिसर्वविशेषणत्वाश्रयणमिति द्रष्टव्यम् । ननु चिन्तासन्तापलेपेत्यत्र चिन्तासन्तापराहित्योक्तयैव दोषातिदूरमित्यत्रेव तत्सम्बन्धाभावस्य सिद्धत्वाल्लेपपदमनर्थकमित्यतो भवेदेवं यद्यत्र लेपश्चिंतासन्तापाभ्यां सम्बन्धरूपो विवक्षितः स्यात् न चैवं किन्तु पुण्यपापादिसम्बन्धरूपं दोषान्तरमेव स इत्यतो न तदानर्थक्यमिति भावेनाह ॥ लेपः पुण्यपापसम्बन्ध इति ॥

श्रुतिमती श्रवणमनने इति ॥ श्रुतिमतिशब्दौ न प्रसिद्धवेदबुद्धिपरौ किन्तु श्रवणमननपरौ । तेन ध्यानशब्दवत्साधनाध्यायार्थसूचकत्वमनयोरपि युक्तमिति भावः । ननु ध्यानस्येव श्रवणमननयोरप्यवश्यानुष्ठेयत्वात्तदर्थकनियतपदानर्थक्यमित्यतो न ध्यानस्य

(पाण्डुरङ्गि)

नियतत्वमवश्यानुष्ठेयत्वं येन श्रवणादिसाधारण्यं स्यात् । किं नाम स्वयोग्यत्वं तच्च ध्यानासाधारणं ध्यानस्येव श्रवणादेः शक्यत्वेऽप्ययोग्यत्वप्रयुक्तनिषेधाभावादिति भावेनाह ॥ नियतध्यानं स्वयोग्योपासनमिति ॥ ज्ञानं साक्षात्कार इति ॥ नतु परोक्षज्ञानम् । तस्य ध्यानजनकत्वेन तदजन्यत्वादिति भावः । योगशब्दस्य सम्बन्धार्थत्वे वैयर्थ्यभियाऽर्थांतरमाह ॥ स एवयोग उपाय इति ॥ तथाच गम्यत्वेऽपि न ज्ञेयत्वं ब्रह्मणोंऽगीकार्यम् । कर्मादिनाऽपि तत्प्राप्तेः श्रुतत्वादित्याशङ्कानिरासार्थमुपायांतरनिरासकं तदावश्यकमिति भावः ।

अमलमित्यस्य निर्दोषार्थत्वे ''दोषातिदूरमित्यनेन पौनरुक्त्यमित्यतः प्रकारान्तरेण व्याचष्टे ॥ अमलं मुमुक्षूपास्यमिति ॥ विशेषणप्रयोजनमाह ॥ नत्विति ॥ वन्द्यत्वप्रयोजकविशिष्टत्वलाभाय ब्रह्मपदम् । गुणवत्त्वे दोषवत्त्वमपि स्यादित्यतोऽमलमिति तदुपपादनम् । मुकुन्दाभिधमिति मोक्षदत्वोक्त्या वन्द्यत्वनिमित्तेष्टत्वसमर्थनम् । वेदान्तवेद्यमिति तन्निमित्ताधिकृतत्वकथनम् । विशेषणचतुष्टयविवरणरूपाणि चापराणि विशेषणानि । विश्वस्योदयमातनोतीत्यादाविव । तथाहि । ब्रह्मशब्दोक्तविशिष्टत्वविवरणं शुद्धेति ॥ तत्रोपपादकामलत्वविवरणं चिंतेति । अत्र मुखरशब्दः स्वार्थिकरप्रत्ययान्त एवाभिमतः । न तु मत्वर्थीयरप्रत्ययान्तः । तथा सति वाचालार्थत्वापत्त्या तत्प्रमुखत्वालाभप्रसङ्गात् । वेदान्तवेद्यमित्युक्ताधिकृतत्वविवरणं सद्भिर्वैराग्यभक्तीत्यादि । धर्मादिषूभयमित्युक्तत्वात् । गुणवृद्धी इत्यादिवत् वैराग्यभक्तीत्यस्य साधुत्वम् । मुकुन्दाभिधमित्युक्तेष्टत्वविवरणं गम्यमिति विशेषणमात्रमर्थवदित्यपि योजना द्रष्टव्येति गुरवः ॥

सूत्रप्रामाण्यं सूचयन्निति ॥ मूलिप्रामाण्यस्य मूलप्रामाण्याधीनत्वादिति भावः ॥ अशक्तत्वादेव जितत्वमिति ॥ नतुशक्तौ सत्यामपि दीपालोकादेः सौरालोकादाविव तत्सङ्कोचादित्यर्थः । स्वान्तेति श्लोके निर्दोषमित्येतत् मध्यदीपिकान्यायेन पूर्वत्रोत्तरत्र च हेतुप्रदर्शनपरम् । जितसिन्धुराजमित्यत्र हेतुमाह ॥ अमितमिति ॥ मूले निकृन्तनमिति ॥ नचेदं युक्तं कृती च्छेदन इत्यस्य इदित्त्वाभावेन ''इदितोनुम्धातो''रित्यनेन नुमोप्रसङ्गात् । विनिकृन्ततीत्यत्र तु ''शेमुचादीना''मिति भविष्यति । निकर्तन इति तु वक्तव्यम् । अस्मात् ल्युटि तस्यानादेशे तस्यार्धधातुकतया तस्मिन्परतो लघूपधगुणे रपरत्वेच उक्तरूपनिष्पत्तिसम्भवात् । ''नखनिकृन्तनेन सर्वं काष्णायसं विज्ञातं स्यात्'' इत्यादौ तु च्छान्दसत्वान्नुम् भविष्यति । तथाच निकृन्तन इत्यपशब्द इति चेत् न । ''इदितोनुम्धातो''

रित्यत्र धातोरिति योगविभागाश्रयणस्याकरे स्थितत्वेनानिदित्त्वेप्यस्य तेनात्र नुम् सम्भवात्। न च योगविभागो न शक्योऽङ्गीकर्तुं तथा सति धातुमात्राच्नुम् प्राप्त्याऽति-प्रसङ्गापातात् । ततश्च योगविभागे''शेमुचादीना''मिति शेग्रहणस्य धातोरित्यत्र सिंहावलो-कितन्यायेनापेक्षणान्न प्रकृते नुम्सिद्धिरिति वाच्यम् । योगविभागस्येष्टसिद्ध्यर्थत्वमात्रे-णानतिप्रसङ्गसम्भवे ''शेमुचादीना''मित्यतः शेग्रहणानुवृत्तेस्तदर्थतयाऽनपेक्षितत्वेन नुम् सम्भवादिति गुरवः ॥

मूले कृपालव इति ॥ यद्यपि कृपेरालुचप्रत्ययो न विहितः ''स्पृहिगृही''त्यादिना स्पृह्यादिभ्य एव तत्स्मरणात् । तथापि स्पृह्यादिभ्यो लुश्मात्रविधानेनैव स्पृहयालु-रित्यादिरूपसिद्धावालुञ्विधानसामर्थ्यात्कृपेरपि तत्सिद्धिः । न चालुञ्विधौ''अयामन्ता-ल्वाय्येत्न्विष्णुष्वि''ति णेरयादेशात् तत्सिद्धावपि लुश्विधौ कथं स्पृहयालुरिति रूपसिद्धि-रिति वाच्यम् । स्पृहेर्लुशि तस्य शित्वेन ''तिङ्शित्सार्वधातुक''मिति सार्वधातुकतया ''कर्तरिशबि''ति शपि ''सार्वधातुकार्धधातुकयो''रिति गुणे अयादेशे ''अतोदीर्घो-यञी''ति दीर्घतायां च सत्यां स्पृहयालुरिति रूपसिद्धेरप्रत्यूहत्वात् । सत्यप्येवं लुश्विधान-सामर्थ्येनापि विवक्षितसिद्धावालुच्करणमन्यत्रापि यथा स्यादित्यस्यार्थस्य ज्ञापकम् । तथाच सूत्रलात् कृपेरालुचि कृपालुशब्दनिष्पत्तिरप्रत्यूहैव । अत एव कौमुद्यां ''हरे कृपालो हरःपाही''त्युक्तम् ।

ननु च न लुश्विधौ विवक्षितसिद्धिः । लुश्विधौ लकारस्येत्संज्ञाप्रसङ्गात् । स्पृहया-लुरिति दीर्घानुपपत्तेश्च । तिङीत्यनुवृत्त्या तिङि यञि परत एव ''अतोदीर्घोयञी''त्यनेन दीर्घविधानात् । श्रद्धालुश्च नसिध्येत् । श्रत्पूर्वाद्धाधातोर्लुशि शपि तस्य जुहोत्यादि-त्वाच्छ्लुभावे ''श्लाविति द्विर्भावे'' ''ह्रस्व'' इति ह्रस्वत्वेच ''श्नाभ्यस्तयोरात'' इत्यालोपे श्रद्दधलुरिति प्रसङ्गात् । अतो लुश्विधौ स्पृहयालुरित्यादिविवक्षितरूपासिद्धिप्रसक्त्या तत्सिध्यर्थमेव लुच्करणसार्थक्यान्न तदन्यथानुपपत्त्याऽन्यत्राप्यालुच्प्रत्ययविधायकत्वमस्येति चेत् उच्यते लुश्विधावपि यादित्वादित्संज्ञाभावोपपत्तेः । यकारश्च लुप्तनिर्दिष्टः क्रियते । योजनाभावाद्वा तत्संज्ञाभावः । नह्यत्र लित्स्वरप्रत्ययस्वरयोर्विशेषोऽस्ति । उभयत्र ''एका-दुदात्त नोदात्त'' इत्युदात्तस्वरस्य भावात् ।

(पाण्डुरङ्गि)

नापि स्पृहयालुरिति दीर्घानुपपत्तिरिति द्वितीयोदोषः । ''अतोदीर्घोयञी''त्यत्र ''तुरुस्तु शम्यमःसार्वधातुक''इत्यतः सार्वधातुकग्रहणस्यैवानुवृत्त्या तिङ्ग्रहणाननुवृत्तेः । नाप्यन्योदोषः । अनेकार्थत्वाद्धातूनामत्र विषये दधात्यर्थे वर्तमानस्य धेटो भविष्यति । नच शिदाश्रयोऽशितीत्यात्वप्रतिषेधात् तदनुपपत्तिः । एवं तर्हि श्रद्धा आ श्रद्धेत्याकारप्रश्लेषादात्वं भविष्यति । अथवा दधातेरेव ''संज्ञापूर्वको विधिरनित्य'' इति न द्विर्वचनं प्रवर्तिष्यते । ततश्च लुशविधिनैवोपपत्तावेवमपि ज्ञानार्थमालुञ्विधीयते । एतत् ज्ञापयति यत्रालुचैव रूपसिद्धिस्ततोप्ययं भवतीति कृपेरप्यालुच्प्रत्यय इति ॥ यद्यपि ''संज्ञापूर्वकोविधिरनित्य'' इत्येतद्भाष्ये नोक्तं तथापि प्रयोगबाहुल्यादुक्तम् । एतदेवाभिप्रत्योक्तं गीताभाष्यटीकायां ''व्याकरणान्तरादवगन्तव्य'' इति ॥ व्याकरणस्य ''स्पृहिगृही''त्यादेरान्तरं लुशमभिधाय आलुच्करणसामर्थ्यं तस्मादित्यर्थः । केचित्तु दयालव इत्येवात्र पाठः अतो नोक्तशङ्कासमाधानयोरवसर इत्याहुः ॥

मूलेरथ्याद्विरिति ॥ यदत्र रथ्यापाभिरिति प्राप्नोति रथ्याद्विरित्यपशब्द इति केनचिदुक्तं तदसत् । समासान्तविधेरनित्यत्वेन तदप्रसङ्गात् । तदनित्यत्वं च शोभना आपो यस्मिन्सरसीति स्वप् इत्यादौ ''ऋक्पूरब्धूःपथामानक्ष'' इति समासान्ताकारस्याभावादेवावसीयते । सति हि समासान्तस्य नित्यत्वे तत्रापि समासान्ताकारप्रसङ्गे स्वपमिति प्रसङ्गात् । तथाचोक्तं प्रसादकृता ''ऋक्पूरब्धूः पथामानक्ष'' इति समासान्तस्तु नभवति । ''तस्यानित्यत्वा''दिति । अथ नपूजनादिति निषेधादेव तत्र समासान्ताकाराप्रसक्तेर्न तस्यानित्यतायामिदं ज्ञापकम् । अत एव अनित्यत्वादिति प्राचोक्तः परिहारः प्रामादिक एवास्थेय इति चेत्सत्यम् । तथापि बह्वप् बह्वपी बह्वाम्पीत्यादौ काशिकोदाहृते समासान्ताकारस्यानिवारणात् । तत्रापूजनार्थतया ''नपूजनादि''ति निषेधाप्रसङ्गात् । ततश्च समासान्तविधेरनित्यत्वादेव तदभाव इति वक्तव्यम् । उक्तं च शेषिकृता ''समासान्तविधेरनित्यत्वान्न स कृत'' इति ॥

तथा ''स्फिगपूतवीणां जोध्वकुक्षिसीरनामनामचे''त्यध्वग्रहणम् । तद्धि अपादध्वनः अपादित्यनुवर्तमाने अपादुत्तरस्याध्वशब्दस्यान्तोदात्तत्वं यथा स्यादिति क्रियते । यदि च नित्यः समासांतःस्यात् तदा ''उपसर्गादध्वन'' इति टचिकृते टित्त्वादन्तोदात्तत्वं सिद्धमित्यध्वग्रहणं नकुर्यात् । कृतं चातो ज्ञापकमस्तीयं परिभाषा समासान्तविधिरनित्य

इति । तथाभाष्ये ''द्वित्रिभ्यां पाद्दन्मूर्धसुबहुव्रीहा''विति सूत्रे अकृतसमासांतस्य मूर्धशब्दस्योपादानं लिङ्गम् । अनित्योहि समासांतो यथा स्यादिति । पाद्दन्निति''पादस्य लोपो हस्त्यादिभ्यः'' ''वयसिदन्तस्यदतृ'' इति समासान्तो निर्दिष्टस्तथा मूर्धशब्दोऽपि ''द्वित्रिभ्यां मूर्ध्न'' इति समासान्ते मूर्धेष्विति निर्दिष्टः स्यात् । तथाचाकृतः । सच समासान्तविधेरनित्यत्वं ज्ञापयति । तेन द्विमूर्धात्रिमूर्धेत्युदात्तत्वं भवति । तस्मात्समासान्तविधेरनित्यत्वेऽपि तन्नित्यत्वभ्रममात्रमूलकमेव परस्य रथ्यापाभिरिति रूपप्रसञ्जनमिति दिक् ।

टीकायां वाच इत्येतत् सन्निधानाद्गुरोर्वाक्परमिति भाति । तच्चायुक्तम् । तस्याः स्वतः शुद्धत्वेन तद्विशुध्यर्थत्वस्यायोगादित्यतस्तत् योग्यतया टीकाकृद्वाक्यपरमित्याह ॥ मदीयाया वाच इति ॥ अत्रमदीयया वाचेत्यपि पूरणीयं भवतीत्यपरितोषादाह ॥ यद्वेति ॥

तात्पर्यचन्द्रिका

॥ अथाविद्येति ॥ प्रतिग्रन्थव्याख्याप्रारम्भार्थोऽथशब्दः ॥ फलसाधनता-सिद्ध्यर्थमिति ॥ समङ्गलस्यैव सफलत्वादिति भावः ॥ भगवतः प्रसत्त्या पुरुषार्थो भवतीति सूचित इति ॥ भगवत्प्रसादस्य मोक्षहेतुत्वे अतश्शब्देन संक्षिप्योक्त इत्यर्थः ॥ विशिष्टगुणानप्याचष्ट इति ॥ नारायणशब्दस्य विशिष्टगुणवाचकत्वप्रदर्शनं च तस्य ब्रह्मशब्दसमानार्थकत्वात् । शास्त्रार्थवाचकत्वाच्च नारायण एव शास्त्रार्थ इति दर्शयितुम् ॥ नरीयत इति ॥ नञुपपदात् रीङ्क्षय इत्यस्माद्धातोः करणे ड्प्रत्यये प्रज्ञादित्वात्स्वार्थेऽण्प्रत्यये च कृते नारमिति रूपसिद्धिरिति द्रष्टव्यम् । अरमणं दुःखम् ॥ निर्दोषवेदोत्पन्नत्वादिति ॥ निर्दोषवेदवाचकान्नारशब्दात्तस्येदमित्यणि कृते नारशब्दो वेदजन्यज्ञानवाचीति भावः ॥

प्रकाशिका – नन्वथाविद्येत्यत्राथशब्दो न मङ्गलार्थः । तस्य कृतत्वात् । नाप्यानन्तर्यार्थः । कस्याप्यर्थस्य पूर्वं भाष्ये अप्रकृतत्वात् । भाष्यकृतनमनस्य टीकाकृतव्याख्याप्रतिज्ञानन्तर्यायोगात् । नाप्यारम्भार्थः । आरभ्यत इत्यनुक्त्वापि आरब्धे इदमनेनारब्धमिति ज्ञातुं शक्यत्वात् । व्याकुर्वे इत्युक्त्यैव व्याख्या प्रारभ्यत इत्यस्य लाभाच्च । प्रश्नाद्यर्थत्व-शङ्कानवकाशाच्च व्यर्थ इत्यत आह ॥ अथाविद्येतीति ॥ यद्यपि प्रतिग्रन्थव्याख्यानमारभ्यत

(प्रकाशिका)

इत्यनुक्त्वाऽपि तस्मिन्नारब्धेऽनेन प्रतिग्रन्थव्याख्याऽऽरब्धेतिज्ञातुं शक्यं तथापि शिष्यमनस्समाधानार्थं प्रतिग्रन्थव्याख्यानमारभ्यत इति वक्तुं अथशब्दः प्रायोजीति ध्येयम् ।

ननु भाष्यस्याखिलफलसाधनतासिद्धिः कथं नमस्कारमात्रात्स्यादित्यत आह ॥ समङ्गलस्येति ॥ अतःशब्देनोक्तत्वात् कथं सूचनमित्यत आह ॥ भगवत इति ॥ ननु भाष्ये आदौ वक्ष्यमाणार्थकथनस्य श्रोतृबुद्ध्यानुकूल्यरूपफलवत्त्वेऽपि नारायणशब्दव्याख्यानस्य नकिंचित्फलमत आह ॥ विशिष्टेति ॥ न रीयतेऽनेनेत्यत्र डप्रत्यये कृते नरमिति स्यात् नारमिति कथं अत आह ॥ नरीयत इतीति ॥ औणादिके डप्रत्यये टिलोपेच नरमिति भवति अतः ''प्रज्ञादिभ्यश्चे''ति स्वार्थिकेऽण्प्रत्यये ''तद्धितेष्वचामादे''रित्यादिवृद्धौ ''यस्येति चे''त्यकारलोपे वक्ष्यमाणरीत्या नलोपाभावेच नारमिति सिद्धमित्यर्थः । अरमणं रमणाभाव इति भ्रांतिं निराह ॥ अरमणमिति ॥ नारमित्यनेन कथं निर्दोषवेदोत्पन्नत्वस्य लाभ इत्यत आह ॥ निर्दोषेति ॥ नविद्यंते अराः दोषाः निरर्थकत्वादयो यस्य सोऽयं नारो वेदः ततोऽणि यस्येति लोपे नारमिति सिद्धम् । सम्बन्धश्च जन्यजनकभाव इति भावः ।

ननु नारशब्दात् ''वृद्धिर्यस्याचामादिस्तद्वृद्ध''मिति वृद्धसंज्ञायां ''वृद्धाच्छ'' इति च्छप्रत्यये नारीयमिति भाव्यं कथं नारमिति । सत्यम् । ''वा नामधेयस्य वृद्धसंज्ञे''ति वा ''ओर्गुणः'' इत्यत्र गुणग्रहणेन ज्ञापनात्संज्ञापूर्वको विधिरनित्य इति वा नारमिति साधु । अत एव तृतीयस्य द्वितीयेपादे ''स्पृहिगृहिपतिदयी''तिसूत्रे श्रद्धालुरित्यत्र श्लाविति द्विर्वचनमाशङ्क्य संज्ञापूर्वको विधिरनित्य इति द्विर्वचनं नेत्युक्तं मञ्जर्याम् ।

पाण्डुरङ्गि – ''अथाविद्यापटले''ति टीकायामथशब्दो न मङ्गलार्थः । मङ्गलानानुष्ठितत्वात् । नाप्यानन्तर्यार्थः । आचार्यकर्तृकनमस्कारादिग्रथनस्य टीकाकारीयव्याख्यानप्रतिज्ञानादानन्तर्यासम्भवात् । नापि भाष्यव्याख्याप्रारम्भार्थः । ''शुद्धे''त्यादिनैव तस्यारम्भात् । यदाह ''भाष्यस्थाद्यश्लोकविवरणरूपत्वा''दिति ॥ नापि प्रतीकग्रहणपूर्वकव्याख्यानप्रारम्भार्थः । ''व्याकुर्वे'' इत्यनेनैव तत्सिद्धेः । नच गङ्गासङ्गेनेत्यनेन व्यवधानात्पुनः प्रतिज्ञानमावश्यकम् । तस्य तच्छेषतया व्यवधायकत्वाभावात् । ''व्याकुर्व'' इति लडभिप्रेतवर्तमानसामीप्यस्याबाधाच्च । तस्मादनर्थकोऽथशब्द इत्यतः ''अथयदसन्दिग्धमप्रयोजनं च नतत्प्रेक्षावत्प्रतिपित्सागोचर'' इति साङ्करभाष्यावतारिकारूपभामतिग्रन्थस्थाथशब्दस्य प्रतिग्रन्थव्याख्याप्रारम्भार्थत्वेन कल्पतरौ व्याख्यानदर्शनादत्रापि

प्रतिग्रन्थव्याख्यारम्भार्थोऽथशब्द इत्याह ॥ प्रतिग्रन्थेति ॥ यद्यपि प्रतिग्रन्थव्याख्या प्रारभ्यत इत्यनुक्त्वाऽपि तस्मिन्नारब्धेऽनेन प्रतिग्रन्थव्याख्या प्रारब्धेत्यवगन्तुं शक्यं तथापि श्रोतॄणां श्रद्धेयत्वप्रतिपत्त्यर्थं तदुक्तिः । दृश्यन्ते हि तदर्थमेव लोकेऽप्याप्ताः किञ्चिदहं वदिष्यामीत्युक्त्वाऽपि हितमुपदिशन्तीति भावः ।

ग्रथनस्य ''नमस्काराधिकार्यादिग्रथनसूचने शिष्यशिक्षार्थ''मित्युत्तरग्रन्थे शिष्यशिक्षार्थतायाः वक्ष्यमाणत्वेन फलसाधनतासिध्यादिफलकत्वाभावात्कैवल्याद्यखिलफलसाधनतासिध्यर्थत्वोक्त्यनुपपत्तिरित्यत आह ॥ समङ्गलस्यैवेति ॥ नन्वतःशब्देन भगवत्प्रसादस्य मोक्षहेतुतायाः वचनवृत्त्या प्रतिपादनादार्थिकत्वप्रतिपादकटीकास्थसूचितपदानुपपत्तिरित्यतस्तदभिप्रायमाह ॥ सङ्क्षिप्योक्त इति ॥ सङ्क्षिप्योक्तिरेवात्र सूचनमित्यभिप्रेतमिति भावः । ननु भाष्ये आदौ वक्ष्यमाणार्थकथनस्य श्रोतृबुध्यानुकूल्यरूपफलवत्वादुपपत्तावपि नारायणशब्दान्वाख्यानस्य निष्प्रयोजनत्वान्न तदुपपत्तिरित्यतस्तत्प्रयोजनमाह ॥ नारायणंशब्दस्य विशिष्टगुणवाचकत्वप्रदर्शनं चेति ॥ सर्वगुणोदीर्णत्वनिर्दोषत्वज्ञेयत्वगम्यत्वरूपविशिष्टगुणवाचकत्वप्रदर्शनं चेत्यर्थः । एतच्च ''नारायण एव शास्त्रार्थ इति दर्शयितु''मित्युत्तरेण सम्बध्यते ।

कथं विशिष्टगुणवाचकत्वप्रदर्शनेन नारायणस्य शास्त्रार्थतासिद्धिरित्यत उक्तम् ॥ ब्रह्मशब्दसमानार्थत्वादिति ॥ तथाच नारायणशब्दस्य विशिष्टगुणवाचकत्वेन तद्वाचकब्रह्मशब्दसमानार्थत्वात् ब्रह्मणश्च शास्त्रार्थत्वात् नारायणस्यापि शास्त्रार्थत्वेनाधिकृतत्वाद्युक्तं नम्यत्वमिति भावः । ननु च गुणोदीर्णत्वमात्रस्य नारायणशब्दार्थत्वकथनेनापि तदर्थकब्रह्मशब्दसमानार्थत्वासिद्धिसम्भवाद्गुणचतुष्टयाभिधायकत्वप्रदर्शनमनुपयुक्तमेवापन्नमित्यत उक्तम् ॥ शास्त्रार्थवाचकत्वाच्चेति ॥ तथाच गुणचतुष्टयस्याध्यायचतुष्टयप्रतिपाद्यत्वान्नारायणशब्दस्य गुणचतुष्टयाभिधायकत्वान्नारायणस्य शास्त्रार्थत्वसिद्धिरिति भावः । यद्वा ब्रह्मशब्दसमानार्थत्वान्नारायणशब्दस्य ब्रह्मणः शास्त्रप्रतिपाद्यत्वान्नारायणस्य शास्त्रप्रतिपाद्यत्वमित्युक्तौ परंपरा भवतीत्यपरितोषादाह ॥ शास्त्रार्थेति ॥ शास्त्रार्थभूतगुणोदीर्णत्वनिर्दोषत्वादिप्रतिपादकत्वे नारायणशब्दस्य दर्शिते साक्षान्नारायण एव शास्त्रप्रतिपाद्य इति सिध्यतीति भावः । अत्र दर्शयितुमित्यतः परं अतो युक्तं ब्रह्ममीमांसाशास्त्रव्याख्यानावसरे तन्नमनमिति शेषो बोध्यः । तेन ब्रह्ममीमांसाशास्त्रे ब्रह्मण एवाधिकृतत्वेन नम्यत्वात्तत्परित्यागेन नारायणवंदनं न युक्तमिति चोद्यानवकाश इति ध्येयम् ॥

(पाण्डुरङ्गि)

नञुपपदादिति ॥ डप्रकरणे''अन्येष्वपि दृश्यत''इत्यपिशब्दस्य प्रागुक्तोपपदकर्तृकारकादिसर्वोपाधिव्यभिचारार्थत्वादिति भावः । नन्वेवं न रीयतेऽनेनेति करणे डप्रत्यये डित्वाट्टिलोपे नरमित्येव स्यात् नारमिति तु कथमित्यत आह ॥ प्रज्ञादित्वादिति ॥ ''प्रज्ञाश्रद्धार्चाभ्योण'' इति सूत्रे प्रज्ञाऽस्यास्तीत्यर्थे मत्वर्थीयणप्रत्ययविधानेन प्राज्ञ इति रूपोपपादनेऽपि ''प्रज्ञादिभ्यश्चे''ति सूत्रे प्रजानातीति प्रज्ञः स एव प्राज्ञ इति स्वार्थेऽण्प्रत्ययविधानात्प्रज्ञादित्वान्नरशब्दस्य नरमेव नारमिति स्वार्थेऽण्प्रत्यये कृते ''तद्धितेष्वचामादे''रित्यादिवृद्धौ ''यस्येति चे''त्यकारलोपे नारमिति रूपसिद्धिरिति भावः । ज्ञानस्य बन्धनिवृत्त्यर्थत्वेन मोक्षसुखातिशयार्थत्वाभावादरमणशब्दो न सुखाभावार्थ इत्याह ॥ अरमणं दुःखमिति ॥ कथं नारशब्देन वेदजन्यज्ञानस्य लाभः येन तस्य तद्वाचित्वं स्यादित्यत आह ॥ निर्दोषेति ॥ न विद्यन्ते अरा दोषा यस्यासौ नारो वेदः ततो वेदवाचकान्नारशब्दान्नारस्येदं नारमित्यर्थेऽणिकृते ''यस्येतिचे''त्यकारलोपे नारमिति रूपसिद्धिः ।

''तस्येद''मिति सूत्रेण सम्बन्धसामान्येऽणो विहितत्वेऽपि योग्यत्वात्सामान्यस्य विशेषे पर्यवसानमभिप्रेत्य तज्ज्ञन्येत्युक्तम् । नच नारशब्दात्''वृद्धिर्यस्याचामादिस्तद्वृद्ध''मिति वृद्धसंज्ञायां ''वृद्धाच्छ'' इति च्छप्रत्यये नारीयमिति भवितव्यम् । तत्कथमणप्रत्ययाश्रयणेन नारमिति रूपं सिध्येदिति वाच्यम् । ''वानामधेयस्ये''ति वृद्धसंज्ञायाः वैकल्पिकत्वेन नारीयं नारमिति रूपद्वयस्याप्युपपन्नत्वात् ''ओर्गुण'' इत्यत्र गुणग्रहणेन संज्ञापूर्वकस्य विधेरनित्यत्वज्ञापनाच्च तदुपपत्तिः । अत एव ''स्पृहिगृही''ति सूत्रे श्रद्धालुरित्यत्र श्लाविति द्विर्वचनमाशङ्क्य संज्ञापूर्वको विधिरनित्य इति द्विर्वचनं नेत्युक्तं पदमञ्जर्यामिति ध्येयम् ॥

तात्पर्यचन्द्रिका

नगनाकादिशब्दवदिति ॥ ननु नभ्राण्नपादित्यादिसूत्राभ्यां नाकनगशब्दयोर्नलोपाभाव उक्तः नारायणशब्देतु नेति कथं तदृष्टान्तीकरणमिति चेन्मैवम् । स्त्रैणार्थ इत्यत्र ''स्त्रीपुंसाभ्या''मित्यादिना विहितस्य नञो नलोपाभावार्थं ''नलोपोनञ''इतिसूत्रे''रात्रेः कृति विभाषे''त्यतोऽनुवृत्ताया विभाषाया व्यवस्थितविभाषात्वस्य न्यास एवोक्तत्वेन नारायण इत्यत्रापि नलोपाभावाद्युपपत्तेः । यद्वा नसमासोस्तु । अत्र''पूर्वपदात्संज्ञायामग'' इति णत्वम् । ल्युटष्टित्करणसामर्थ्येनायनशब्दोऽधिकरणे त्रिलिंग इति पुँल्लिंगत्वं च द्रष्टव्यम् ।

पृथङ्नतिरितीत्यत्रेतिशब्दस्य ''इत्यरुचिं सूचयती''ति पूर्वेणान्वयः । विघ्नाभावस्य नमस्कारेणैव सिद्धेर्ग्रथनं व्यर्थं एवमधिकार्यादिसूचनस्य प्रवृत्त्यङ्गतया वक्तव्यत्वेपि न महाफलार्थं तत्कार्यं तत्स्मरणेनैव फलसिद्धेरित्यत आह ॥ नमस्काराधिकार्यादिग्रथनसूचने इति ॥

प्रकाशिका - ननु अरायणो नेत्यादि व्युत्पत्तौ नञो नलोपे नुटिच सति अनरायणेति भाव्यमित्याशङ्क्योक्तं मूले नगनाकादिवदिति । तत्राक्षिपति ॥ नन्विति ॥ नभ्राण्नपान्नवेदानासत्यानमुचिनकुलनखनपुंसकनक्षत्रनक्रनाकेषु प्रकृत्ये''ति सूत्रेण नाकशब्दस्य ''नगोप्राणिष्वन्यतरस्या''मितिसूत्रेण नगशब्दस्य नलोपाभावो निपातित इत्यर्थः ।

नगनाकादौ यथा सौत्रत्वात् साधुत्वमेवमिहापि सौत्रत्वादेव समाधानमिति टीकाशय इत्यभिप्रेत्य सौत्रत्वप्रकारं दर्शयति ॥ मैवमित्यादिना ॥ स्त्रीशब्दात् हिताद्यर्थे तद्धिते ''स्त्रीपुंसाभ्यां नञ्स्नञौ भवनादि''ति नञ्प्रत्यये स्त्री नञ् इति स्थिते ञित्वादादिवृद्धौ णत्वेच स्त्रैण इति रूपं ततोऽर्थशब्देन समासे स्त्रैणार्थ इति भवति । तत्र नलोपोनञ इति नलोपे कार्ये णत्वस्यासिद्धतया नलोपे ''तस्मान्नुडची''ति नुटिकृते स्त्र्यायनर्थ इति प्राप्नोति । तत्र''रात्रेः कृतिविभाषे'' त्यव्यवहितपूर्वसूत्राद्विभाषापदमनुवृत्त्य नञो नलोपो भवति विभाषयेति षष्ठे तृतीयपादे व्याख्यातम् । तर्हि अनश्च इत्यादावपि रूपद्वयं प्राप्नोति अतः क्वचिन्नित्यं स्यात् क्वचिन्नैव स्यात् इति व्यवस्थितविकल्प इति वृत्तिव्याख्याने न्यास एवोक्तम् । नास्माभिर्यतितव्यमित्यर्थः । आदिपदेन नुडभावग्रहः ।

ननु विभापापदानुवृत्तौ नभ्राण्नपादित्यादिसूत्रं व्यर्थम् । तत्राप्युक्तरीत्या समाधानसम्भवात् । प्रपञ्चनस्यागतिकगतित्वात् । परिगणनत्वे प्राप्तः स एव दोषः । अतो ज्ञायते नात्र तदनुवृत्तिरस्तीत्यनुशयेनाह ॥ यद्वेति ॥ अस्मिन्पक्षे नभ्राडित्यादितु नञ्स्वरार्थं नञ्समास इति भावः । मञ्जर्यां तु नञ्प्रत्ययस्य नलोपमाशङ्क्य प्रत्ययञित्त्वस्य वृद्धिस्वरयोश्चरितार्थत्वात् निपातञित्त्वस्याचरितार्थत्वात् निपातस्यैव नञो ''नलोपोनञ'' इति सूत्रे ग्रहणं न प्रत्ययनञः इत्येकं समाधिमुक्त्वा उत्तरपदाधिकारवशात्पूर्वपदस्य नञ इत्याक्षेपात्प्रत्ययनञो पूर्वपदत्वान्न नलोप इत्युक्तम् । तन्मते विभाषापदाननुवृत्तेस्तदनुरोधेनवाऽह ॥ यद्वेति ॥

(प्रकाशिका)

''अमानोनाः प्रतिषेध'' इति निषेधार्थकनशब्देन सुप्सुपेति समासः । तथाच नञ्-भावान्न नलोपः । अत एव कौमुद्यां नैकधेत्यादौ नसमास इत्युक्तमिति भावः । समासस्थले सत्यप्यैकपद्ये ''रषाभ्यां नोणः समानपदे'' इत्यत्र विवक्षितस्य समानमेव पदं न तु पूर्वोत्तर-पदव्यवहारभागित्येवंरूपस्य समानपदत्वस्याभावात्कथं णत्वमित्यतः सुधोक्तमाह ॥ अत्रेति ॥ ननु ''नपुंसके भावेक्त'' इति नपुंसक इत्यनुवर्तमाने ''ल्युट्च'' ''करणाधि-करणयोश्चे''ति ल्युटो विधानेन नारायणमिति नपुंसकलिङ्गेन भाव्यमित्यत आह ॥ ल्युट इति ॥ ल्युटष्टित्करणं हि ''टिड्ढाण''ञित्यादिना ङीबर्थम् । यदि ल्युडंतस्य क्लीबत्वमेव तर्हि स्त्रीत्वाभावात् तन्निमित्तकङीबर्थं टित्करणमनर्थकम् । तेन ज्ञायते लिङ्गान्तरमस्तीति सामान्यतो ज्ञापनात्पुँल्लिङ्गतोपपत्तिरित्यर्थः । अधिकरण इति प्रकृताभिप्रायेण । अत एव महाभाष्ये ''भूवादयो धातव'' इत्यत्र ''कोसावनुमानो नामे''ति करणे पुँल्लिङ्गप्रयोगः ।

यद्यपि वृत्तौ ''करणाधिकरणयो''रिति सूत्रे नपुंसक इत्यस्यानुवृत्तेरनुक्तेः इध्मप्रव्रश्चन इत्युदाहरणे पुँल्लिङ्गोक्तेश्च नपुंसक इति नानुवर्तत इत्येव सुवचम् । तथापि तदननुवृत्तिरेव टित्करणेन ज्ञाप्यते इत्येवमुक्तमित्यदोषः । वृत्तिकारस्यापीदमेव बीजमित्युक्तं भवति । भाष्ये गुरुदेवतासमुच्चायकचशब्दसत्त्वादपीत्यस्य वैयर्थ्यं निरसितुं टीकायां ''स्वस्य गुरुदेवताभेद'' इत्याद्युक्तम् । तत्र यद्यपीत्यादेरन्वयाभावात्प्रकारार्थकेतिशब्देनान्वयमाह ॥ पृथगिति ॥ नमस्कारस्य विघ्नोत्सारणार्थं अधिकारादिसूचनस्य प्रवृत्त्यर्थं कार्यतया फलस्य स्पष्टत्वात् फलोक्तिरयुक्तेत्यत आह ॥ विघ्नाभावस्येति ॥ तत्कार्यं अधिकारादिसूचनं कार्यम् । तत्स्मरणेनैव अधिकारादिस्मरणेनैव । स्मरणस्यान्यथापि सम्भवादिति भावः ।

पाण्डुरङ्गि — नभ्राण्नपादित्यादिसूत्राभ्यामिति ॥ अत्र नभ्राण्नपादित्येकदेशेन समग्रसूत्रोपलक्षणात् आदिशब्देन ''नगोप्राणिष्वन्यतरस्या''मित्यस्य सङ्ग्रहात् सूत्राभ्यामि-त्युक्तम् । ततश्च ''नभ्राण्नपान्नवेदानासत्यानमुचिनकुलनखनपुंसकनक्षत्रनक्रनाकेषु प्रकृत्ये''-ति सूत्रेण नाकशब्दे ''नगोप्राणिष्वन्यतरस्या''मिति सूत्रेण नगशब्दे नलोपाभावो निपात्यत इत्यर्थः । आदिपदेन प्रभृत्यर्थकेन शिष्टसम्पूर्णसूत्रपरिग्रहः । केवलसूत्रपदेन च ''नगोप्राणि-ष्वन्यतरस्या''मिति सूत्रपरिग्रहः । तथाच ''नभ्राण्नपादित्यादिसूत्राभ्या''मित्युक्त-मुपपन्नमित्यप्याहुः ॥

कथं तदृष्टान्तीकरणमिति ।। यद्यप्युदाहृतसूत्राभ्यामिह नलोपाभावस्यानुक्तत्वादेव तदृष्टान्तीकरणमुपपद्यते । प्रत्युत तत्सूत्रेणेह नलोपाभावोक्तौ अत्र नभ्राण्नपादित्यादिना नलोपाभावः इत्येव वक्तुं शक्यत्वात् येन सूत्रेण नलोपाभावो विधीयते तस्यैकस्यैवोदाहरणसम्भवाच्च नगनाकादिशब्दवदिति दृष्टान्तीकरणमेवानुपपन्नं प्रसज्यते । किं च यदि नलोपाभाव एव दृष्टान्तः तर्हि नाकादिशब्दवदित्येतावतैव पूर्तेर्वैकल्पिकनलोपाभाववन्नगशब्दोदाहरणं व्यर्थं नभ्राडित्यस्यैव दृष्टान्तत्वसम्भवे नाकशब्दोदाहरणं च व्यर्थम् । तस्मादलाक्षणिकडप्रत्ययप्रदर्शनार्थं नगशब्दस्य नित्यनलोपाभावस्य तत्प्रयुक्तनुडभावस्य नारमणं येनेत्यादिव्युत्पत्तेश्च प्रदर्शनाय नाकशब्दस्य अराश्रयो नभवतीति प्रदर्शनायादिशब्देन नासत्यादिशब्दस्य च ग्रहणमित्यङ्गीकार्यम् । तथाचोदाहृतसूत्राभ्यामत्र डप्रत्ययनलोपाभावानुक्तावपि यथाकथंचिड्डप्रत्ययनलोपाभावादिव्युत्पादनाय नगनाकादिशब्दवदिति दृष्टान्तीकरणं युक्तमेव । तथाचोक्तं न्यासे रूढिशब्दा एते यथाकथंचिद्व्युत्पाद्या इति । तथापि डप्रत्यये साधकस्योभयत्र साम्येन तस्य दृष्टान्तत्वसम्भवेऽपि नलोपाभावसाधकसूत्रद्वयस्येहाप्रवृत्त्या साधकान्तरस्याभावेन कथंचिदपि नलोपाभावस्य व्युत्पादयितुमशक्यतया कथं तदृष्टान्तीकरणमित्यत्र तात्पर्यमित्यवधेयम् ।

अत्र नभ्राडित्यादिषु नारायणशब्दोप्युपसङ्ख्येय इति सुधोक्तरीत्या समाधाने सत्येव स्वयं समाधानान्तरमाह ।। मैवमिति ।। स्त्रैणार्थ इत्यत्रेति ।। स्त्रिया अयं स्त्रैणः ''स्त्रीपुंसाभ्यां नञ्स्नञौ भवना''दित्यत्र ''धान्यानां भवनेक्षेत्रेखञि''ति वक्ष्यमाणभवनसंशब्दात्प्राग्येऽर्थास्तेषु स्त्रीशब्दान्नञो विहितत्वात् तस्येदमित्यर्थस्य ततः प्राचीनत्वात् । स्त्रीशब्दादिदमर्थे नञ्प्रत्यये ञित्त्वादादिवृद्धौ णत्वेच स्त्रैणशब्दनिष्पत्तिः । ततः सचासावर्थश्चेत्यर्थशब्देन समासे स्त्रैणार्थ इति भवति । अत्र ''नलोपोनञ'' इत्येतत्प्रसक्त्यर्थमर्थपदं गृहीतम् । अन्यथा ''नलोपोनञ'' इति सूत्रे ''अलुगुत्तरपद'' इत्यत उत्तरपद इत्यस्यानुवृत्तेरुत्तरपदस्यापरत्वादेव नलोपाप्रसक्त्या विभाषाकथनानौचित्यप्रसंगादिति भावः । तर्हि अनश्च इत्यादावपि रूपद्वयं प्राप्नोतीत्यत आह ।। व्यवस्थितेति ।। क्वचिन्नित्यं स्यात् क्वचिन्नैव स्यादिति व्यवस्थितेत्यर्थः । ''नलोपाभावाद्युपपत्ते''रित्यादिपदेन तत्प्रयुक्तनुडभावपरिग्रहः ।

नचैवं सति ''नलोपो नञ'' इत्यत्र नञ इति सानुबन्धग्रहणमनर्थकमापद्यते । तथाहि । पामनपुत्र इत्यादौ नलोपाभावार्थं सानुबन्धग्रहणमिति वाच्यम् । पामास्यास्तीति पामनः

(पाण्डुरङ्गि)

''लोमादिपामादिपिच्छादिभ्यः शनेलच'' इति पामशब्दात् मत्वर्थीयो नप्रत्ययः । तस्य पुत्रशब्देन षष्ठीसमासः विभाषानुवृत्तौ तस्याः व्यवस्थितत्वे च तत एव पामनपुत्र इत्यत्रापि नलोपाभावोपपत्तौ किं सानुबन्धग्रहणेन । नच विभाषाननुवृत्तौ स्त्रैणपुत्रः स्त्रैणार्थ इत्यत्र नलोपाभावो नस्यात् । सानुबन्धकत्वस्यापि तत्र सत्त्वात् । अतो विभाषानुवृत्तिरावश्यकीति वाच्यम् ॥ प्रत्ययञित्त्वेहि ''अचोञ्णिती''ति वृद्धिर्विहिता । तथा ''ञ्नित्यादिर्नित्य'' मित्याद्युदात्तत्वं च तन्निमित्ततया प्रत्ययञित्त्वस्य चरितार्थत्वान्निपातञित्त्वस्याचरितार्थत्वाच्चरितार्थाचरितार्थयोश्चाचरितार्थस्यैव ग्राह्यत्वात् ''नलोपोनञ'' इत्यत्राचरितार्थसानुबन्धकनिपातस्यैव ग्रहणेन स्त्रैणार्थ इत्यादौ नलोपाभावोपपत्तेः । यद्वा पूर्वपदत्वेन नञो विशेषणान्न भवति नलोपः । उत्तरशब्दस्य सम्बन्धिशब्दत्वेन पूर्वपदभूतस्य नञ एव ''नलोपोनञ'' इत्यत्र ग्रहणादिति न्यास एवोक्तत्वात् । स्त्रैणपुत्र इत्यादौ तु न नञः पूर्वपदत्वम् । स्त्रैण इत्येतावत्येव पूर्वपदत्वस्य पर्याप्तत्वेन नञ्मात्रे पूर्वपदत्वापर्याप्तेः । अतो न भवति स्त्रैणार्थ इत्यादौ नलोपः ।

नचैवं सानुबन्धकग्रहणमनर्थकमापद्यते । अपूर्वपदत्वादेव पामनपुत्र इत्यादौ नलोपाभावसम्भवात् । न हि तत्र नकारमात्रे पूर्वपदत्वपर्याप्तिः । किं तु पामन इत्यस्मिन्नितीति कथं तत्प्रसक्तिरिति वाच्यम् । नैकधेत्यादौ नलोपाभावसिध्यर्थत्वोपपत्तेः । तत्र नकारस्य पूर्वपदत्वपर्याप्त्यधिकरणत्वेन पूर्वपदत्वविशेषणेन नलोपाभावासिद्धेः । व्यवस्थितविभाषाश्रयणेच तत एव नैकधेत्यादावपि नलोपाभावसिद्ध्युपपत्तेरनर्थकं सानुबन्धग्रहणमापद्यते । तस्मात् व्यवस्थितविभाषाश्रयणस्यायुक्तत्वात्कथं तेन नारायणशब्दे नलोपाभावसिद्धिः । नञः पूर्वपदत्वपर्याप्त्यधिकरणत्वेन नलोपप्राप्तेर्वञ्लेपत्वात् । तत्कथमेतत्समाधानमित्यतो न्यास एवोक्तत्वादित्युक्तम् । नात्र गुणदोषचिंतया प्रयोजनम् । न्यासस्यापि वृत्तिव्याख्यानत्वात्तदुक्तरीत्याप्यस्मदभिलषितसिद्धेः । संमतं चैतत् ग्रन्थकारस्य । अन्यथा व्यवस्थितविभाषाश्रयणान्नलोपाभावोपपत्तेरित्येव ब्रूयात् । नतु न्यास एवोक्तत्वादितीत्यवधेयम् ।

यद्वा एतदस्वरसादेवाह ॥ यद्वेति ॥ ''अमानोनाः प्रतिषेध'' इति वचनात्प्रतिषेधार्थकस्य नशब्दस्य नैकधेत्यादाविव ''सुपुसुपे''त्यनेन समास इति भावः । ततश्चोक्तरीत्या ''नलोपोनञ'' इत्यत्र सानुबन्धकग्रहणसिद्धेर्नसमासाश्रयणे न तेन

नलोपप्राप्तिरिति। अत्र वदन्ति नात्र प्रतिषेधार्थकनसमासाश्रयणमुचितं ''नञो विरुद्धार्थवाचित्वात् नञोभावार्थत्वा''दित्यादिटीकाविरुद्धत्वात् । तस्मात्प्रौढिवाद एवायम् । अत एवास्त्वित्युक्तमिति । किं चैवं नगनाकादिशब्दवदिति दृष्टान्तीकरणमनर्थकमापद्यते । एतत् पक्षे नलोपाप्राप्तेस्तदनपेक्षणादिति । तदसत् । टीकाया आद्यपक्षानुसारेण प्रवृत्तत्वेन तदविरोधात् । दृष्टान्तीकरणस्य चालाक्षणिकडप्रत्ययप्रदर्शनार्थत्वेन सार्थक्यादिति सङ्क्षेपः ।

ननु नारायनमिति वक्तव्यम् । नारायणमिति णत्वं तु तत्प्रापकाभावादयुक्तम् । न च ''रषाभ्यां नोणः समानपद'' इत्येतदेव तत्प्रापकमिति वाच्यम् । निमित्तस्य रेफस्य निमित्तिनो नकारस्य च समानपदस्थत्व एव तेन णत्वविधानेन प्रकृतेच तयोरसमानपदस्थतया तेन णत्वाप्राप्तेः । न चैकपद्यमैकस्वर्यमेकविभक्तिकत्वं च समासप्रयोजनमिति वदद्भिर्वैयाकरणैः समासस्यैकपदत्वाङ्गीकारान्नारायणपदस्यापि पदद्वयसमासरूपत्वेन समानपदत्वसम्भवाद्युक्तैवानेन णत्वप्राप्तिरिति वाच्यम् । तत्र अखण्डपदत्वरूपैकपदत्वस्यैव समानपदतया विवक्षितत्वेन समासरूपैकपदस्य व्यावर्तितत्वेनासमानपदत्वानिवारणात् । न चात्र ज्ञापकाभाव इति वाच्यम् । सौत्रसमानग्रहणस्यैव तत्र ज्ञापकत्वात् । तदुक्तम् । पद इत्येतावतैव सामर्थ्यादेकपदत्वे लब्धेऽपि समानग्रहणं यत्समानमेव पदं न कदाचिद्भिन्नं तत्रैव यथा स्यादित्येवमर्थम् । तेनाखण्डपद एव भवति न समासपद इति । तथाच दुर्नामरामनामेत्यादाविवाखण्डपदत्वाभावान्नारायणपदे न तेन णत्वसम्भव इत्यतोऽत्र सुधोक्तं णत्व प्रापकमुदाहरति ॥ अत्रेति ॥ पूर्वपदस्थान्निमित्तादुत्तरस्य गकारानन्तरितस्य नकारस्य णकार आदेशो भवति संज्ञाविषय इति सूत्रार्थः । तथाच असमानपदत्वेऽपि शूर्पणखेत्यादाविव णत्वं युक्तमिति भावः ।

ननु ''यदनान्तमकर्तरी''ति कर्तृव्यतिरिक्तकारके यदनप्रत्ययान्तं तत्तृतीये नपुंसकलिङ्गे इत्यमरकोशेऽनप्रत्ययान्तस्य नपुंसकताया नियमितत्वात् साध्यते अनेनेति साधनमित्यादौ साधनमित्यादिशब्दानां नित्यनपुंसकताया एवोपलंभादत्राप्ययनशब्दस्याधिकरणसाधनत्वान्नपुंसकतैव युक्ता । न च ''करणाधिकरणयोश्चे''त्यत्र ''नपुंसकभावे क्त'' इत्यतो भाव ग्रहणाननुवृत्त्या ''संनियोगशिष्टानां सहवा प्रवृत्तिः सहवा निवृत्ति''रिति परिभाषया नपुंसक इत्यंशस्यापि निवृत्तेर्विशेष्यनिघ्नतया लिङ्गत्रयेऽपि करणाधिकरणादौ ल्युडनुशासनसम्भवान्न नपुंसकत्वनियम इति वाच्यम् । तथा सति साधनादिशब्दानां नियतलिङ्गत्वाभावप्रसङ्गात्

(पाण्डुरङ्गि)

''यदनान्तमकर्तरी''त्यस्य विशेषविषयकत्वाच्च परिभाषाया अनित्यतामाश्रित्य करणाधिकरणयोश्चेत्यत्र नपुंसक इत्यनुवृत्तेरावश्यकत्वात् । तथाच नारायण इति पुल्लिङ्गानुपपत्तिरेवेत्यत आह ॥ ल्युट इति ॥ नच सामर्थ्याश्रयणं निर्बीजम् । करणं करणी प्रमाणं प्रमाणीत्याद्यभियुक्तप्रयोगाणामेव तत्र बीजत्वात् । अत एव ''टिड्ढाणञ्'' इति सूत्रे लटो ङ्यनुबन्धकत्वात् टिद्ग्रहणेन ग्रहणे निरस्ते तर्हि तत एव ल्युटोऽप्यग्रहणं प्रसज्येतेत्याशङ्किते लटष्टित्त्वस्य टेरेत्वेन चरितार्थत्वात् ल्युटष्टित्त्वस्याचरितार्थत्वात्तदग्रहणे टित्त्ववैयर्थ्यापत्त्या ङीबर्थमेव टित्करणसामर्थ्यम् । इदं च बाहुलकमनाश्रित्य समाधानम् । तदाश्रयणेतु ''कृत्यल्युटोबहुल''मिति बाहुलकादेव त्रिलिंगतासिद्धिरिति सर्वमनवद्यम् ।

''पृथङ्नतिरिती''त्यत्रत्यस्येतिशब्दस्य वैयर्थ्यमन्वयोपदर्शनेन परिहरति ॥ पृथगिति ॥ ननु नमस्कारग्रथनं व्यर्थम् । नचविघ्नाभावार्थं तत् । नमस्कारादिमात्रेणैव तत्सिद्ध्या ग्रथनस्यातदर्थत्वात् । एवमधिकारादिसूचनमपि व्यर्थमेव । नच महाफलार्थं तत् । अधिकारादिस्मरणेनैव तत्सिध्या तदर्थमधिकारादिसूचनस्यानावश्यकत्वादिति शङ्कते ॥ विघ्नाभावस्येति ॥ नन्वधिकारिसूचनविषये कथं वैयर्थ्यशङ्का । अधिकारादिसूचनस्य शिष्यप्रवृत्तिहेतुत्वेनार्थवत्त्वसम्भवादित्यत आह ॥ अधिकार्यादिसूचनस्येति ॥ नचाधिकारादिसूचनस्य महाफलार्थत्वानुक्तेः कथं तदाक्षेप इति वाच्यम् । तथासति ग्रथनस्य विघ्नाभावार्थताया अपि टीकायामनुक्त्या तदाक्षेपस्याप्यनौचित्यप्रसङ्गात् । न च पूर्वग्रन्थात्तदलाभेऽपि सम्भावितत्वात्तदाशङ्कच निराकरणमिति वाच्यम् । प्रकृतेऽपि साम्यात् । टीकायां तु महाफलसाधनस्मरणविषयत्वादधिकारादेः प्राधान्यं ततश्चावश्यसूचनीयत्वमित्येवाभिमतम् । न तु सूचनस्य कर्तव्यतायां प्रवृत्त्यङ्गत्ववत्स्मरणस्य महाफलार्थत्वरूपहेत्वंतरपरत्वमपि ॥ वैयधिकरण्यप्रसङ्गात् । वस्तुतस्तु ''तत्स्मरणस्य महाफलहेतुत्वाच्चे''ति टीकास्वारस्यानुसारेण सूचनस्य स्मरणद्वारा महाफलार्थत्वोक्तेर्न किंचिदेतत् । ततश्च स्मरणसूचनयोः साध्यसाधनभावानवगत्या शङ्केयम् । परिहारे तयोः साध्यसाधनभावस्य स्पष्टत्वादेव तदनुपपादनमित्यवधेयम् ।

तात्पर्यचन्द्रिका

अनन्यार्थतयेति ॥ प्रातीतिकार्थांतरपरं न भवतीत्यनेन प्रकारेणेत्यर्थः ॥ प्रायस्तदेवोपादेयमिति ॥ अप्रमाणत्वादिना निश्चितस्यापि ख्यात्याद्यर्थं व्याख्यानदर्शनात्प्राय इत्युक्तम् ।

''अथेष्टानिष्टे''ति भाष्येऽथेत्यस्यावतारानन्तरमेव नतु परोपदेशमपेक्ष्य येन स्वतः सार्वज्ञं न स्यादित्यर्थः । वेदमुत्सन्नमित्यादेरित्यस्य इत्यर्थ इति वक्ष्यमाणेनान्वयः ॥ अवांतरवेदादिविभागकथनमिति ॥ स्वत एव ऋङ्निगदादिरूपादेकैकस्मान्महावेदादुद्धृतस्यावान्तरस्य ऋगादिवेदस्य चतुर्विंशत्यादिशाखाभेदेन आदिपदेन शाखानां चोपशाखाभेदेन विभागकथनमित्यर्थः । यद्वा महावेदस्यावान्तरवेदत्वेन आदिपदेन चतुर्विंशत्यादित्वेन च विभागकथनमित्यर्थः ॥ तदल्पाक्षरत्वमिति ॥ यावदक्षरतांविना विवक्षितार्थासिद्धिः तदर्थप्रतिपादनाय ततोऽधिकाक्षरानुपादानमल्पाक्षरत्वमित्यर्थः ॥

बहुशाखानिर्णायकत्वमिति ॥ सव्याकरणसूत्रादेरपि बहुशाखागतपदार्थनिर्णायकत्वान्नाव्याप्तिरिति ज्ञेयम् ॥ व्यर्थाक्षरादिराहित्यमिति ॥ अर्थाप्रतिपादकत्वेऽपि साम्नि स्तोभाक्षराणां ऋगक्षराव्याप्तगानभागपरिपूरणायेव प्रयोजनान्तरायाक्षराप्रयोग इत्यर्थः ॥ कारणान्तरसम्भवादित्यत आहेति ॥ ''मुख्यस्ये''ति मूलग्रन्थे मुख्यस्य निर्विशेषणशब्दवाच्यत्वे ''इति वेदविदः प्राहु''रित्यनेन वेदस्य वृद्धव्यवहारस्य च प्रमाणीकृतत्वात्तेन शङ्कायाः परिहार इति भावः ॥

शब्दसमूहैः क्रियमाण इति ॥ शब्दजातस्येति षष्ठी कर्तरि न तु कर्मणीत्यर्थः ।

प्रकाशिका – ''अनन्यार्थतया व्याख्येय''मित्यत्र स्वप्रयोजनार्थतया व्याख्येयमिति भाति तदयुक्तं व्याख्यानस्यान्यार्थत्वादित्यतोऽर्थमाह ॥ प्रातीतिकेति ॥ अनेन प्रकारेणेति तृतीयार्थः । प्रायःपदव्यावर्त्यस्य दुर्गमत्वादाह ॥ अप्रमाणत्वादिनेति ॥ अथेतिभाष्येऽथशब्दस्य मङ्गळाद्यर्थकत्वायोगादानन्तर्यार्थत्वे चातिशयाभावेन वैयर्थ्यमित्यत आह ॥ अथेत्यस्येति ॥ अत एव प्रमेयदीपिकायां ''व्यासोऽवततार । ततश्चेष्टानिष्टप्राप्तिपरिहारे''ति भाष्यगतस्य ततश्चेत्यस्यावतारानन्तरमेवेत्यर्थ उक्त इति भावः । एतेन ''अथ अनन्तरमेवे''ति तत्वप्रदीपवाक्यं विवृतं भवति । वेदमुत्सन्नमित्यादेरन्वयाभावादाह ॥ वेदमुत्सन्नमित्यादेरित्यस्येति ॥ अवान्तरवेदादीत्यस्य दुर्गमार्थत्वाद्वेधाऽर्थमाह ॥ स्वत एवेति ॥ तदल्पाक्षरत्वमित्यत्र विवक्षितार्थासिद्धिरेवाल्पाक्षरत्वमिति भाति तच्चायुक्तमिति विवक्षितपूरणेनार्थमाह ॥ यावदिति ॥ यदि बहुशाखानिर्णायकत्वं विश्वतोमुखत्वं तर्हि

(प्रकाशिका)

शब्दान्वाख्यानपरे महाव्याकरणसूत्रे दैवमीमांसासूत्रादौ चाव्याप्तिरित्यत आह ॥ सव्याकरणेति ॥ अल्पाक्षरमित्यनेनैव व्यर्थाक्षरादिराहित्यस्य लाभादस्तोभमिति व्यर्थमित्यतोऽभिप्रायमाह ॥ अर्थेति ॥ कारणान्तरसम्भवादित्यस्य ''मुख्यस्य निर्विशेषेणे''त्यनेन कथमुत्तरमित्यत उत्तरार्धेन तल्लब्धमित्याह ॥ मुख्यस्येतीति ॥ वेदस्येति ॥ अस्यार्थस्य वेदोक्तत्वाभावे तद्विदामेतदुक्तेरयोगाद्वेदस्य प्रमाणीकृतत्वादित्युक्तम् । शब्दजातस्येति षष्ठ्यन्तेन कथमस्यार्थस्य लाभ इत्यत आह ॥ शब्दजातस्येतीति ॥ ''कर्तृकर्मणोः कृती''ति कर्तरि षष्ठीति भावः । शब्दानां करणत्वेऽप्यवान्तरव्यापारापेक्षया कर्तृत्वमिति ध्येयम् ।

पाण्डुरङ्गि – ''अनन्यार्थतया व्याख्येय''मिति टीकायां स्वप्रयोजनतया व्याख्येयं न तु परप्रयोजनतयेति भाति । तदयुक्तम् । व्याख्यानस्य परप्रयोजनतया परप्रयोजनत्वनिषेधानुपपत्तेरित्यतोऽर्थमाह ॥ प्रातीतिकार्थांतरपरं न भवतीति । अत्युपादेयत्वाभावादनन्यार्थतया न व्याख्येयानीति साधने अप्रयोजकत्वमाशङ्क्य व्यापकाभावेन व्याप्याभावसाधनत्वान्नतदित्यभिप्रेत्य अनन्यार्थतयाव्याख्येयत्वात्युपादेयत्वयोर्व्याप्यव्यापकभावोपदर्शनपरे ''यदुपादेय''मिति ग्रन्थे अत्युपादेयत्वाभावेन निश्चितेऽपि ख्यात्याद्यर्थं व्याख्यायमाने व्यभिचारपरिहारायानन्यार्थतयेति व्याप्यकोटौ विशेषणम् । अत एव व्यापकाभावेन व्याप्याभावानुमानेऽपि तदर्थवदित्याशयवानन्यार्थतयेत्येतत्तत्परिहारोपयुक्ततया व्याचष्टे ॥ प्रातीतिकार्थांतरपरं नभवतीत्यनेन प्रकारेणेति ॥ अनेन ''अनन्यार्थतये''ति प्रकारे तृतीयेत्युक्तं भवति ।

''यच्च प्रमाणत्वे सतीष्टसाधनतावबोधकं प्रायस्तदेवोपादेय''मिति टीकायां प्राय उपादेयत्वस्य प्रमाणत्वे सतीष्टसाधनतावबोधकत्वव्याप्यतालाभात् प्रमाणत्वे सतीष्टसाधनतावबोधकत्वाभावान्न प्राय उपादेयमिति फलितेऽनुमाने प्रायःपदव्यावर्त्यस्य दुर्गमत्वात्तद्वैयर्थ्यमाशङ्क्य परिहरति । अप्रमाणत्वादिनेति ॥ यदुपादेयं तत्प्रमाणत्वे सतीष्टसाधनावबोधकमित्येवोक्तौ ख्यात्यर्थं व्याख्यायमाने अप्रमाणत्वादिना निश्चिते उपादेयत्वसत्त्वेऽपि प्रमाणत्वे सतीष्टसाधनतावबोधकत्वाभावाद्व्यभिचारः स्यात् । तद्वारणाय प्राय इत्युक्तम् । तदर्थश्च अतीति । ततश्च अत्युपादेयत्वस्यैव व्याप्यत्वेन ख्यात्याद्यर्थं व्याख्यायमाने यादृशतादृशोपादेयत्वसत्त्वेऽप्यत्युपादेयत्वाभावान्न तत्र व्यभिचारः । अत एव तत्र व्यतिरेकानुमानेऽप्युक्तव्यभिचारपरिहारात्प्राय इत्युक्तम् । तस्यात्यर्थत्वं च ब्रह्मसूत्राणां

अत्युपादेयत्वादित्युत्तरटीकानुसारेण ज्ञातुं शक्यमिति प्राय इत्यस्योक्तव्यभिचारपरिहारकत्वानुपपादनं न दोषायेति ज्ञातव्यम् ।

॥ न तु परोपदेशमपेक्ष्येति ॥ तथाच ''वेदमधीत्य स्नाया''दित्यत्रेव नानन्तर्यमात्रमत्र विवक्षितम् । तस्य स्वतःसिद्धत्वात् । किन्तु ''सिद्धे सत्यारम्भो नियमार्थ'' इति न्यायादव्यवहितानन्तर्यमेव विवक्षितमिति न तदर्थकभाष्यस्थाथशब्दवैयर्थ्यमिति भावः । व्यवहितत्वादन्वयं दर्शयति ॥ वेदमुत्सन्नमित्यादेरित्यस्य इत्यर्थ इति वक्ष्यमाणेनान्वय इति ॥ अवान्तरवेदादीत्येतदुर्गमार्थत्वाद्व्याचष्टे ॥ स्वत एवेति ॥ व्यासावतारमनपेक्ष्य नारायणरूपेण परमात्मना विभक्तादुपवेदाख्यादित्यर्थः । भाष्ये शाखानामुपशाखाभेदस्याकथितत्वाट्टीकायां तत्परादिशब्दो नयुक्त इत्यरुच्या प्रकारान्तरेण तद्व्याचष्टे ॥ यद्धेति ॥ यावदक्षरतामिति ॥ अत्र तदर्थप्रतिपादनायेति विशेषणाट्टीकायां तदल्पाक्षरत्वमित्यत्र तच्छब्देन बुद्धिस्थमेव परामृश्यते कण्ठोक्तस्य परामर्शायोगादित्युक्तं भवति । सुधायांतु ''श्रुत्याऽर्थाद्वा योऽर्थः प्रतीयते तदप्रतिपादनमल्पाक्षरत्वमित्युक्तम् । तदप्यनेन टीकैकवाक्यतया योजितं भवति । विवक्षितार्थासिद्धिः श्रुत्या अर्थाद्वेति तत्प्रतिपादनाय तदधिकानुपादानमेव तदप्रतिपादनमिति। तेन श्रुत्याऽर्थाद्वा प्रतीयमानस्य स्वेनैव श्रुत्याऽर्थाद्वा प्रतिपादनात्तदप्रतिपादनोक्तिर्व्याहतेति सुधायां शङ्कानवकाशः । सूत्रगतविवक्षितार्थप्रत्यायकश्रुत्यतिरिक्तश्रुत्या अप्रतिपादनस्यैव विवक्षितत्वादिति भावः ॥ पर्यायेषु च लाधवगौरवचिंताभावाभिप्रायेण चैतल्लक्षणम् । अन्यथा आनन्दमय इत्यादावपि सुखमय इति कमय इति वा वक्तुं शक्यत्वेनाल्पाक्षरत्वाभावापत्तेरित्यवधेयम् ।

अत्र टीकायां विश्वतोमुखत्वमेव सूत्रलक्षणतयाऽभिमतम् । अन्यत्तु स्वरूपकथनमात्रम् । अत एवेह टीकायां विश्वतोमुखत्वस्यैवाव्याप्त्यादिशङ्कापरिहारः कृत इत्यवधेयम् ॥ अर्थाप्रतिपादकत्वेऽपीति ॥ तेन न स्वरवर्णसाधारण्येन समन्वयोक्तिविरोधः ॥ इत्यत आहेतीति ॥ एतादृशीशङ्का कथमनेन परिहृतेत्यर्थः ॥ कर्तरीति ॥ कर्तृकर्मणोः कृतीति कर्तरि षष्ठीति भावः । करणे कर्तृत्वोपचाराभिप्रायेणेदम् । शब्दस्य करणत्वेन कर्तृत्वाभावात्। यद्वा अवान्तरव्यापारवत एव कारणस्य करणत्वात्प्रधानक्रियां प्रति करणस्यापि स्वव्यापारं प्रति कर्तृत्वस्यापि सत्वात्तदभिप्रायेणायं ग्रन्थः । न च व्याख्यानस्य पश्चात्तनत्वनियमात्कथं जैमिन्यादिसूत्राण्यप्राक्तनब्रह्मसूत्रव्याख्यानानि स्युरिति वाच्यम् । मन्त्रब्राह्मण-

(पाण्डुरङ्गि)

वद्व्याख्यातृबुद्धिविवक्षया पश्चात्तनत्वसम्भवात् । ''व्यासचित्तस्थितावकाशादवच्छिन्नानि कानिचित् । अन्ये व्यवहरंत्येतान्यूरीकृत्य गृहादिव''दिति तन्मूलभूतानादिव्यासज्ञानविषयै-कदेशविषयव्यासोपदेशजनितज्ञानमूलत्वाद्वा तेषां ब्रह्मसूत्रव्याख्यानरूपत्वमिति द्रष्टव्यम् ।

तात्पर्यचन्द्रिका

परोक्ते दूष्य एवांशो मितैः शब्दैरनूद्यते ।
दूषणं चापि हनुमद्भाष्यसूचितमुच्यते ।

तत्र भामत्युक्तमधिकरणम् । प्रत्यगात्मन एव ब्रह्मत्वात्तस्य चाहमिति प्रकाश-मानत्वेनासन्दिग्धत्वान्नविषयत्वम् । नाप्यविद्यानिवृत्तिः प्रयोजनम् । उक्तरी-त्याऽऽत्मनि भासमानेपि तदनिवृत्तेः । न च वाच्यमहं प्रत्ययः स्थूलोहंकर्ता भोक्ता दुःखीति गृह्णाति तद्विपरीतश्च वेदान्तप्रतिपाद्यः सन्दिग्ध इति विषयादिसिद्धिरिति । वेदान्तानामध्ययनविध्यापादितप्रयोजनवदर्थावबोधानामपि प्रबलाहंप्रत्यय बाधित-त्वेन जपमात्रोपयोगित्वेनाविवक्षितार्थत्वादुपचरितार्थत्वाद्वा । तथाच वेदान्तविचारो नारब्धव्य इति पूर्वपक्षः ।

सिद्धान्तस्तु । वेदान्तवाक्यैर्ज्ञानानन्दैकरसाद्वितीयोदासीनस्वभाव आत्मोप क्रमादिभिः प्रतिपाद्यते । नच क्रियासमभिहारेण दृगात्मतत्वमभिदधति तत्पराणि सन्ति युक्तमुपचरितार्थानीति वक्तुम् । प्रत्यक्षं तु सम्भावितदोषमपौरुषेयेण निर्दोषेणागमेन बाध्यते । तेन वेदान्तवेद्यः शुद्धोहंप्रत्ययेन भातीति विषयादि-सिद्धिरिति ॥

प्रकाशिका – ''तत्रादिसूत्रस्येदं सङ्गत्यादी''त्यत्रेदंशब्देन परोदीरितसङ्गत्यादिकमयुक्त-मिति टीकायां सूचितम् । तद्विवरितुं प्रतिजानीते ॥ परोक्त इति ॥ इदं तु शिष्यमनः समाधानाय । उत्तरार्धेन दूषणानां परमाप्तोक्तिमूलत्वेन बलवत्तामाह । तत्र ''हनुशब्दो-ज्ञानवाची''ति स्मृतेर्हनुर्ज्ञानम् । ''भूमनिन्दाप्रशंसासु भवन्ति मतुबादयः । संसर्गेस्ति विवक्षायां नित्ययोगेतिशायने ॥ १ ॥ इत्युक्तेर्भूमार्थे मतुप् । पूर्णबोध इत्यर्थः । यद्वा तस्य हनुमदैक्यात्तथोक्तिः । संज्ञापूर्वकविधेरनित्यत्वाद्धनुशब्दे ''शरादीनां चे''ति न दीर्घः ''संज्ञाया''मिति सूत्रेण मतुपो मकारस्य यवादित्वादित्युक्तं धातुवृत्तौ । चोवधारणे ।

सूचितमेवेत्यन्वयः । भाष्येति अनुभाष्यादिकं च ग्राह्यम् । भाष्ये अधिकरणशरीरस्यास्पष्टत्वात्तद्विवरणपरयोर्वाचस्पत्यविवरणयोः स्पष्टत्वेनादौ वाचस्पत्योक्तमधिकरणप्रकारं दूषयितुमनुवदति । तत्र दूष्येषु मध्य इति ॥ प्रत्यगात्मन एवेति ॥ अतिरिक्तब्रह्मसत्त्वे मानाभावादिति भावः ॥ न विषयत्वमिति ॥ न हि स्फीतालोकमध्यमध्यासीनं कश्चिज्जिज्ञासत इति भावः ।

नाविवक्षितार्थत्वं वेदान्तानामाशङ्कितुं शक्यम् । स्वाध्यायोध्येतव्य इत्यध्ययनविधेर्दृष्टार्थत्वेन तेन सर्वस्य वेदस्य फलवदर्थावबोधनपरत्वापादनस्य ''अथातोधर्मजिज्ञासे''त्यत्र निर्णीतत्वादत आह ॥ अध्ययनेत्यादि ॥ अविवक्षितार्थत्वेऽध्ययनं व्यर्थमित्यत आह ॥ जपमात्रेति ॥ क्रियासमभिहारेण पौनःपुन्येन । ज्ञानानंदादिस्वरूपमात्मतत्वमभिदधानानि । अत एव तत्र तात्पर्यवत्त्वेन विद्यमानानीत्यर्थः ।

प्रत्यक्षबाधाद्युक्तमित्यत आह ॥ प्रत्यक्षं त्विति ॥ शुक्तिरजतादौ व्यभिचारदर्शनादिति भावः । बाधकत्वे हेतुर्निर्दोषेणेति ॥ तत्र हेतुरपौरुषेयेणेति ॥ नन्वत्र ''शुद्धो न भाती''त्यादिना सिद्धान्तांशस्यैवाग्रे दूष्यत्वेन तावन्मात्रमेवानुवदनीयम् । नतु पूर्वपक्षोपि । तथात्वे ''परोक्ते दूष्य एवांश'' इति प्रतिज्ञाव्याकोप इति चेन्न । सिद्धान्तस्य पूर्वपक्षसापेक्षत्वेन तदननुवादे सिद्धांतमात्रानुवादायोगात् । यद्वा सिद्धान्ते दूषिते पूर्वपक्षोपि दूषितप्राय इत्यभिप्रेत्य तदनुवादः । ''निर्विशेषे स्वयं भाते किमज्ञानावृतं भवे''दित्यनुव्याख्यानं हृदि कृत्वाऽनूदितं दूषयति ।

पाण्डुरङ्गि – ''भाष्यसूचित''मित्यत्र भाष्यपदं भाष्यानुव्याख्यानादिसूत्रसम्बन्धिसमस्तग्रन्थपरम् । नतु भाष्यमात्रपरम् । प्रसिद्धेषु कुभाष्योक्तेष्वधिकरणेषुसत्सु तद्विरुद्धं स्वीयमधिकरणं बुद्धिस्थं न भवतीत्यतोऽनुवादपूर्वकं तानि निराकर्तुमुत्तरोग्रन्थः । तत्र भामत्युक्तमधिकरणशरीरं दर्शयति ॥ तत्रेति ॥ तत्र दूष्येषुमध्ये ॥ प्रत्यगात्मन एवेति ॥ तदतिरिक्तब्रह्मसत्त्वे मानाभावादिति भावः ॥ नविषयत्वमिति ॥ स्फीतालोकमध्यवर्तिनो घटस्य जिज्ञास्यत्वादर्शनादिति भावः । ननु नाविक्षितार्थत्वं वेदान्तानां शङ्कितुं शक्यम् । अध्ययनविधेर्दृष्टार्थत्वेन सर्ववेदस्यार्थज्ञानपर्यततायाः सिद्धत्वादित्यत उक्तम् ॥ अध्ययनविधीति ॥ नन्वर्थज्ञानस्य सुखदुःखाभावेतरत्वान्न पुरुषार्थत्वमित्यत उक्तम् । ''प्रयोजनव''दित्यर्थावबोधविशेषणम् । नन्वविवक्षितार्थत्वे वेदान्तानां तदध्ययनवैयर्थ्यमित्यत उक्तम् ॥ जपमात्रोपयोगितयेति ॥ ननु च उपक्रमादिलिङ्गैर्निर्णीततात्पर्यत्वाद्वेदान्तानां

(पाण्डुरङ्गि)

नाविवक्षितार्थत्वं युक्तमित्यत आह ।। उपचरितार्थत्वाद्वेति ।। प्रत्यक्षविपरीतार्थप्रतिपादन कल्पने प्रमाणाभावादुपक्रमादेस्तात्पर्यमात्रनिश्चायकत्वेनार्थे तथात्वानिश्चायकत्वादिति भावः ।

प्रमाणलक्षणे प्रथमपादे प्रथमाधिकरणे चिन्तितं ''अथातो धर्मजिज्ञासा । चोदना-लक्षणोर्थोधर्म'' इत्यारभ्य ''अन्वाहार्ये च दर्शना''दित्येतदन्तं शास्त्रमस्य विषयः । तत्रैतन्मतद्वयम् । अध्ययनविधिरक्षरग्रहणमात्रपर्यवसायीति केचित् । अपरेतु अर्थज्ञानरूपदृष्ट प्रयोजनायेदमध्ययनं विधीयते । अर्थज्ञानं च विचारमन्तरेण न सम्भवति । ततो विधिर्विचार शास्त्रस्य प्रयोजक इति ।

अत्र विचारशास्त्रमनारम्भणीयमारम्भणीयं वेति चिन्ता । तदर्थं अधीत्य स्नातव्यं वा धर्मजिज्ञासया गुरुगृहेऽवस्थातव्यं वेति । तदर्थमपि स्वाध्यायाध्ययनविधिदृष्टार्थमध्ययनं विधत्ते उत दृष्टार्थमिति । यद्यदृष्टार्थं स्वाध्यायाध्ययनं विधीयते ततस्तन्मात्रेणैव शास्त्रसमाप्तेः ''अधीत्य स्नाया''दिति वचनबलेन समावर्तितव्यम् । अवैधश्चायं विचारो नारम्भणीयः । यदि च अक्षरग्रहणपरम्परोपजायमानवाक्यार्थज्ञानायाध्ययनं विधीयते ततस्तस्य विचार-मन्तरेणासम्भवादध्ययनविधिनैवार्थाद्विचारो विहित इति विचारयितव्यो धर्म इति विचारशास्त्रमारम्भणीयम् ।

तत्र विनापि विधिना ज्ञानलाभान्न हि तदर्थता । कल्प्यस्तु विधिसामर्थ्यात्स्वर्गो विश्वजिदादिवत् । तथाहि । अदृष्टार्थ एवायमध्ययनविधिर्न दृष्टार्थः । विनैव विधिनाऽध्य-यनस्यार्थज्ञानहेतुताया लोकसिद्धत्वेन विध्यनपेक्षिततयाऽपूर्वविधित्वानुपपत्तेः । नचावघात विधिवन्नियमार्थता । लिखितपाठादिनाऽर्थज्ञानसम्भवे गुरुपूर्वकाध्ययनेनैव एतत्कुर्यादिति तत्सम्भवादिति वाच्यम् । अवघातोहि दर्शाद्यपूर्वे नियम्यते अवघातनिष्पन्नैरेव तण्डुलैरपूर्वं सिध्यतीति । नतण्डुलस्वरूपे । विनाप्यवघातं तण्डुलस्वरूपसिद्धेर्मानान्तरगृहीतत्वेन तद्विरोधात् । न चेह तथा । विनाप्यध्ययनं लिखितपाठादिनापि ज्ञानदर्शनेन तत्स्वरूपे नियमासम्भवात् । नच तर्ह्यवघातस्य दर्शाद्यपूर्व इव क्रत्वपूर्वे नियमोस्तु अधीतैरेव वेदैर-वगतानि कर्माणि फलदानीति तत्सम्भवादिति वाच्यम् । अनारभ्याधीततया अध्ययनस्या-क्रत्वर्थत्वात् । नाप्यध्ययनस्य क्रत्वर्थत्वे श्रुत्यादिकं मानमस्ति । तस्माद्दृष्टार्थत्वेऽपूर्व नियमनासम्भवान्न दृष्टार्थत्वम् ।

किञ्च ''अधीत्य स्नाया''दित्यध्ययनस्नानयोर्नैरन्तर्यं बोधयन्ती स्मृतिरन्तराऽर्थ ज्ञानसम्पादनायासंविरुणद्धि । ततोऽपूर्वद्वारा स्वर्गार्थमध्ययनं विधीयत इति विचारस्य वैधत्वाभावाद्विचारशास्त्रमनारम्भणीयम् । उच्यते । ''लभ्यमाने फले दृष्टे नादृष्टपरिकल्पना । विधेश्च नियमार्थत्वान्नानर्थक्यं भविष्यती''ति । यदुक्तं ज्ञानस्वरूपे क्रत्वपूर्वे वा न नियमः सम्भवतीति तदनुमन्यामहे । किन्तु योयमग्निहोत्रादिष्वधीतवेदानां त्रैवर्णिकानामेवाधिकारो नानधीतवेदानां शूद्राणामित्यधिकारनियमः सप्रयोजनमध्ययनविधेः । तथाहि । असत्यध्ययनविधावग्निहोत्रादिशास्त्राणि विद्वांसमलभमानान्यविद्वांसमेवाधिकृत्य विद्यामन्तरेणानुष्ठानासम्भवाद्विद्यामाक्षिपंत्यविशेषाच्चतुरो वर्णानधिकुर्युः । सति ह्यध्ययनविधौ त्रैवर्णिकानामेव विदुषामधिकारो भवति न तुरीयस्य ।

तथाहि । वसन्ते ब्राह्मणमुपनयीतेत्यादौ द्वितीयानिर्देशादुपनयनसंस्कारकर्मत्वम् । संस्कृताश्च त्रैवर्णिकाः किमस्माभिः कर्तव्यमित्यपेक्षंते । शेषस्य परार्थत्वात् । तदाश्रयत्वात्तेषाम् । तत्संनिधौ चाध्ययनमनिर्दिष्टकर्तृकं विधीयमानं कर्तारमपेक्षते । तत्राकाङ्क्षासन्निधियोग्यत्वैरेवं ज्ञाप्यते त्रैवर्णिकैरेवोपनीतैरध्ययनेनाक्षरग्रहणादिपरंपरयाऽर्थज्ञानं कर्तव्यमिति । एवं च फलवदध्ययनकर्तृभूतमाणवकसंस्कारत्वादुपनयनमध्ययनाङ्गम् । अध्ययनमपि दृष्टफलज्ञानार्थम् । अर्थज्ञानं त्वनुष्ठानौपयिकत्वात्प्रसिद्धफलमेवेति सर्वेषां फलवत्त्वम् । एवं च त्रैवर्णिकेषु विद्वत्सु लब्धेषु न चतुर्थस्य विद्यामाक्षिपंत्यग्निहोत्रादीनि । किन्तु त्रैवर्णिकानेव विदुषोधिकुर्वंति । ततोऽग्निहोत्रादिकर्मानुष्ठानौपयिकार्थज्ञानावसानमध्ययनमध्ययनविधिना विधीयत इति विचारमन्तरेणार्थज्ञानानुपपत्तेरध्ययनविधिरेव विचारमाक्षिपत्स्मार्तमध्ययनसमावर्तनयोर्नैरन्तर्यं बाधत इति सिद्धम् ॥ अध्ययनानन्तरं वैधो विचारः कर्तव्य इति विचारशास्त्रमारम्भणीयमिति ॥

उपक्रमादिभिरिति ॥ आदिपदेन परामर्शोपसंहारयोः परिग्रहः । परामर्शोनाम मध्ये निर्देशो बोध्यः ॥ क्रियासमभिहारेणेति ॥ क्रियासमभिहारः पौनःपुन्यम् । तेन ज्ञानानन्दादिस्वरूपमात्रमात्मतत्वमभिदधानानि अत एव तत्र तात्पर्यवत्त्वेन विद्यमानानि सन्तीत्यर्थः ॥ उपचरितार्थानीति वक्तुमिति ॥ अभ्यासे हि भूयस्त्वमर्थस्य भवति । यथा अहोदर्शनीया अहोदर्शनीयेति । न न्यूनत्वं नाल्पत्वमपीति भावः । ननु तथाप्यहंप्रत्ययबाधितत्वादुपचरितार्थत्वं वेदान्तानामास्थेयमित्यत आह ॥ प्रत्यक्षं त्विति ॥ प्रत्यक्षस्य

(पाण्डुरङ्गि)

बाध्यत्वोपपादनाय सम्भावितदोषमित्युक्तम् । पौरुषेयतया सम्भावितेत्यर्थः । आगमस्य बाधकत्वोपपादनाय निर्दोषेणेति ॥ तत्र हेतुरपौरुषेयेणेति ॥

ननु यजमानः प्रस्तर इत्यादेरिव वेदान्तानामपि प्रबलाहंप्रत्ययबाधितत्वादुपचरितार्थत्वे शङ्किते कथं सिद्धान्ते वेदान्तानामेव प्रत्यक्षबाधकत्वाभिधानम् । वेदान्तवाक्येष्विव यजमान-प्रस्तरादिवाक्येष्यपूर्वतादितात्पर्यलिङ्गसद्भावेन तस्यापि यजमानप्रस्तरभेदग्राहकप्रत्यक्षबाधक-त्वापातादिति चेन्न । स्थूलोहमित्यादिपरोदाहृतप्रत्यक्षस्य नाहं स्थूल इत्यादिप्रत्यक्षेणैव बाधिततया तत्सजातीयस्य कर्ता भोक्ता सुखीत्यादिप्रत्यक्षस्यापि दोषशङ्काकलंकिततया वेदान्तानां तद्बाधकत्वोपपत्तावपि प्रस्तरयजमानभेदग्राहकप्रत्यक्षे कुत्रापि प्रत्यक्षेण बाधा-दृष्ट्याऽऽगममात्रेण प्रत्यक्षबाधयोगात् । ''यजमानं सुवर्गं लोकं गमयति यदेतैः प्रस्तरं प्रहरती''ति वाक्यशेषपर्यालोचनयापि तत्रोपचारस्यैवावगमात् । वेदान्तवत्तात्पर्यलिङ्गा-भावाच्च युक्तः प्रत्यक्षेण तद्बाध इत्येवं वैषम्यस्यात्र सिद्धान्तेऽभिप्रेतत्वात् । अत एव स्थूलोह-मित्यादित्वेनैवोपन्यासः कृत इति ध्येयम् ॥ विषयादिसिद्धिरितीति ॥ तथाचाहंप्रत्यये सत्यपि विषयज्ञानाभावात् न फलानुपलंभबाध इति विषयसिध्यैव फलमपि सिध्यतीत्यर्थः । यद्यपि परोक्ते दूष्य एवांश इति प्रतिज्ञानुरोधेन सिद्धान्तमात्रमेवानुवदनीयम् । शुद्धो न भातीत्युत्तरग्रन्थेन सिद्धान्तांशस्यैव दूष्यत्वात् । तथापि सिद्धान्तस्य पूर्वपक्षसापेक्षत्वेन तदननुवादे सिद्धान्तमात्रानुवादायोगात्पूर्वपक्षांशोप्यनूदितो नतु तस्यापि दूषणीयत्वाभि-प्रायेणेति ध्येयम् ।

तात्पर्यचन्द्रिका

तन्न । तथाहि । शुद्धो न भातीति कोर्थः । किमात्मस्वरूपे किंचिद्भाति किञ्चिन्न भातीति । किंवात्मस्वरूपमेव न भातीति यद्वाऽनात्मापि भातीति । आद्येऽभास-मानोंशः शरीरादिभ्योभेदो वा कर्तृत्वभोक्तृत्वाद्यभावो वा ब्रह्मात्माभेदोवा द्वितीयमात्राभावोवा । आत्मभिन्नः सत्यश्चेदपसिद्धान्तः । अभावद्वैतं त्वन्यत्र-निरस्तम् । मिथ्याचेन्नतत्वावेदकशास्त्रवेद्यः । आत्ममात्रत्वेतु द्वितीयपक्षान्तर्भावः । तथापि कल्पितेन भेदेनागृहीत इव भातीति चेन्न । तत्वतो गृह्यमाणेऽधिष्ठाने भेदकल्पनाया अगृहीतत्वारोपस्य चायोगात् । नच मिथ्याभूतेनापि तेनोपलक्षित

आत्मा शास्त्रवेद्यः स च सत्य इति वाच्यम् । स्वप्रकाशत्वेन नित्यसिद्धात्माव बोधनार्थमुपलक्षणोक्त्ययोगात् । उपलक्षण एव तात्पर्ये चाप्रामाण्यापातात् । अत एव न द्वितीयः । तस्य स्वप्रकाशत्वेनाभानायोगात् । स्वप्रकाशस्याप्यविद्यावशादभानेऽ-विद्यादेर्दुःखादेश्च प्रकाशे न स्यात् । तस्य चैतन्यप्रकाशाधीनप्रकाशत्वोपगमात् । एतेन स्वप्रकाशत्वात्स्फुरति चैतन्यमविद्यावृतत्वाच्च न स्फुरति । नच विरोधः । स्फुरणस्य तात्विकत्वादस्फुरणस्य चातात्विकत्वात् । एवं च न कोपिदोषः । स्फुरत्त्वादज्ञानादिसाधकत्वस्यास्फुरत्त्वाद्विषयत्वस्य च सम्भवादिति निरस्तम् । स्फुरत्यस्फुरणारोपायोगस्योक्तत्वात् । नच स्वरूपचितः प्रकाशेऽपि तस्या अज्ञानविरोधित्वात् विरोधिन्याश्च वृत्तेरभावेनाविद्यावृतत्वात्सन्दिग्धत्वमिति युक्तम् । स्वरूपचितोऽज्ञानाविरोधित्वे तद्वेद्ये दुःखादावज्ञानप्रसङ्गात् । त्वन्मते अयं घट इत्याद्यपरोक्षवृत्तेरपि घटाद्यवच्छिन्नचिद्विषयत्वाच्च । श्रवणादिजनितसंस्कारसहि-तान्तःकरणवृत्तिनाश्यत्वे च मिथ्यारूप्यादौ तददर्शनात्सत्ये भ्रमरादिध्याननिवर्त्य-कीटत्वादौ च तद्दर्शनादज्ञानस्य सत्यत्वं स्यात् । न तृतीयः । अनात्मनोधिकस्य भानेप्यात्मनो सन्दिग्धत्वेनाविषयत्वतादवस्थ्यात् । अधिष्ठाने तत्वतः स्फुरत्य-नात्मारोपायोगाच्च । एतेन यथा षड्जादयो गान्धर्वशास्त्राभ्यासात्प्रागपि स्फुरन्त-स्तद्रूपेणानुल्लिखिता न श्रोत्रेण व्यज्यन्ते व्यज्यन्ते तु शास्त्रवासितेन तेन एवं वेदान्तवाक्यजन्यब्रह्मैक्याकारवासनावासितान्तःकरणेन तद्भावाभिव्यक्तिर्न प्रागिति भामत्युक्तं निरस्तम् । तत्र प्रागस्फुरतः पश्चाच्च स्फुरतः षड्जत्वादिजातिभेदस्येव प्रकृते तस्याभावात् । एतेनैव तत्त्वमसीति वाक्याद्यद्यप्यात्मनो ब्रह्मत्वं ज्ञातं तथापि वादिविप्रतिपत्त्या संशयात्तत्र जिज्ञासेति भामत्युक्तं निरस्तम् । चिन्मात्रे धर्मिणि निश्चिते तन्मात्रैक्ये संशयायोगात् ।

युक्तं चापौरुषेयस्याप्यागमस्य शङ्कितातात्पर्यभ्रमरूपदोषस्य यजमानः प्रस्तर इत्यादेरिव प्रत्यक्षविरोधेन प्रतीतार्थप्रच्यावनम् । उक्ता च त्वयापि तत्त्वमसि वाक्ये प्रत्यक्षाविरोधाय लक्षणा । तस्मात्परमते स्वरूपमात्रस्य स्वप्रकाशत्वेन नित्यसिद्ध-त्वादन्यस्य चाज्ञानकल्पितत्वेनाज्ञानविषयत्वायोगेनाज्ञानाससम्भवादज्ञातो विषयोऽ-ज्ञाननिवृत्तिः फलमज्ञानी चाधिकारी न युक्त इति शास्त्रमनारम्भणीयमेवेति भामतीमतं तावदयुक्तम् ।

प्रकाशिका – ॥ तन्नेति ॥ चतुर्विधोप्यभासमानोंश आत्मभिन्नोऽभिन्नोवा । आद्ये सत्यो मिथ्यावेति विकल्पान् हृदि निधाय क्रमेण निरस्यति ॥ आत्मभिन्न इति ॥ यद्यप्यात्मस्वरूपे अभासमानोंशः क इति विकल्पितेष्वात्मभिन्नत्वकल्पो नावकल्पते तथापि तत्राप्यस्ति दूषणमित्यभिप्रेत्येदम् । अभासमानस्य च नात्मस्वरूपत्वमिति युक्तिसूचनाय वेति ध्येयम् । ननु भेदोन्योन्याभावः । अभेदोपि भेदाभाव एवेति चतुर्णामभावरूपत्वेनात्मभिन्नानामपि सत्यत्वे न कापि हानिः । भावद्वैतस्यैवाद्वैतविरोधित्वात् । उक्तं च ''अभावरूपा धर्मा नाद्वैतं निघ्नन्ति'' इति । अत आह ॥ अभावद्वैतं त्विति ॥ यद्वा भेदाभेदयोर्भावत्वेप्यतिरिक्तकल्पद्वयविषयकशङ्कासमाधानार्थमिदमिति ध्येयम् । अन्यत्रेति । न्यायामृते अंशित्वादिहेतुभङ्गे । उपलक्षणमेतत् । एतावता वेदतन्मीमांसयोः द्वितीयाभावादिपरत्वमेव स्यात् नत्वखण्डात्मपरत्वमिति आत्मविद्यात्वभङ्गःस्यात् । तथाचाथातो द्वितीयाभावादिजिज्ञासेत्येव सूत्रविन्यासः स्यात् । नतु ब्रह्मजिज्ञासेतीत्यपि ध्येयम् ।

द्वितीयं निराह ॥ मिथ्येति ॥ आत्मभिन्नो द्वितीयाभावादिर्मिथ्याचेदित्यर्थः । अन्यथा अतत्वावेदकं शास्त्रं प्रसज्येतेति भावः । अभेदपक्षस्त्वात्मस्वरूपमेव न भातीति द्वितीयपक्षेंतर्भूतः । तथाच तत्र स्वप्रकाशत्वेनाभानायोगादिति वक्ष्यमाण एव दोषोऽत्रापि प्रसरतीति भावेनाह ॥ आत्ममात्रत्वेत्विति ॥ ननु द्वितीयाभावादिरात्माभिन्न एव । नचोक्तदोषः । भातस्यापि तस्याविद्यकभेदेनाभातत्वारोपसम्भवादिति शङ्कते ॥ तथापीति ॥ आत्ममात्रत्वेन गृहीतत्वेपीत्यर्थः । अधिष्ठाने आत्मनीत्यर्थः ॥ भेदेति ॥ आत्मना द्वितीयाभावादेरित्यर्थः । तन्मूलाज्ञानासम्भवादिति भावः । द्वितीयाभावादिरात्मातिरिक्तो मिथ्येति पक्षे उक्तदोषोद्धारमाशंक्य निरस्यति ॥ नचेति ॥ यद्यप्येषा शङ्का मिथ्याचेदिति ग्रन्थानन्तरमेव कार्या तथाप्यात्ममात्रं न शास्त्रवेद्यं येन द्वितीयपक्षोक्तदोषः स्यादित्यभेदपक्षोक्तदोषपरिहारार्थापि भवतीति नदोषः । आत्मन्येव तात्पर्यमुपलक्षण एव वेति विकल्पं क्रमेण निरस्यति ॥ स्वप्रकाशत्वेनेति ॥ आत्मस्वरूपमेव न भातीति द्वितीयं निराह ॥ अत एव नद्वितीय इति ॥ तथाच नविषयत्वमिति भावः । भानाभानयोरुक्तदोषद्वयपरिहारमनूद्यातिदेशेन दूषयति ॥ एतेनेति ॥ न कोपि दोष इत्युक्तमेव विशदयति ॥ स्फुरत्त्वादिति ॥ एतेनेत्युक्तमेव व्यवहितत्वाद्विशदयति ॥ स्फुरतीति ॥

ननु शुद्धचितो भानेप्यविद्यावृतत्वेन विषयता युज्यते । तस्या अज्ञानसाधकत्वेन तदनिवर्तकत्वात् । अन्तःकरणवृत्तेस्तन्निवर्तिकाया अद्याप्यभावात् । एकविषयकयोर्वृत्ति-

चितोर ज्ञानविरोधित्वाविरोधित्वे घटविषयकयोः सौरालोकज्ञानयोस्तमोविरोधित्वाविरोधित्वे इव युक्ते इत्याशङ्क्य निराह ॥ न चेति ॥ तद्वेद्ये चिद्वेद्ये । तथाच नात्मन्यावृतत्वमिति भावः । न च सुखाद्यपि वृत्तिप्रतिबिम्बितचिता वेद्यं न केवलया । केवलातु नाज्ञानविरोधिनीतिवाच्यम् । सुखादेर्ज्ञातैकसत्त्वाभावापातादिति भावः ।

किं च वृत्तिसमान्यस्याज्ञानविरोधित्वमुत वृत्तिविशेषस्य । आद्येऽपि किं परोक्षवृत्तेरुतापरोक्षवृत्तेः । नाद्यः । त्वन्मते नित्यातीन्द्रिये परोक्षवृत्तौ सत्यामप्यज्ञानानिवृत्तेः । द्वितीये त्वात्मविषया सेदानीमप्यस्तीत्याह ॥ त्वन्मत इति ॥ न च घटावच्छिन्नचैतन्यविषया वृत्तिरज्ञानविषयचिदविषया सती तदज्ञानाविरोधिनीति वाच्यम् । दण्डी चैत्र इति वृत्त्या चैत्राज्ञानानिवृत्त्यापातात् । द्वितीयं निरस्यति ॥ श्रवणादीति ॥ अन्वयव्यतिरेकपूर्वं सत्यत्वमाह ॥ मिथ्येति ॥ तददर्शनात् तादृशवृत्तिनाश्यत्वादर्शनात् । उपलक्षणं चेदम् । भ्रमकालीनापरोक्षज्ञानानधिकविषयज्ञानेन कारणान्तरजन्येनाप्यज्ञाननिवृत्तावतिप्रसङ्गात् । अनधिकविषये श्रवणादिवैयर्थ्याच्चेत्यपि ध्येयम् ॥ सत्य इति ॥ अधिष्ठानसमानसत्ताक इत्यर्थः । सत्यत्वं अधिष्ठानसमसत्त्वम् ।

तृतीयेंऽगुलिद्वयवदात्मानात्मानावेकज्ञाने भासेते उत तादात्म्येनेति विकल्पौ हृदि कृत्वा क्रमेण निराह ॥ अनात्मन इति ॥ आत्मनो भानेपि शास्त्रविषयत्वं सञ्जघटीतीत्याशङ्कामुक्तातिदेशेनानूद्य निरस्यति ॥ एतेनेति ॥ शास्त्रगम्यात्मनो निश्चितत्वेनेत्यर्थः । तद्रूपेण षड्जत्वादिना रूपेण । तेन श्रोत्रेण । तद्भावाभिव्यक्तिः ब्रह्मभावाभिव्यक्तिः । दृष्टान्तवैषम्यमाह ॥ तत्रेति ॥ ननु घटे निश्चितेऽपि तज्ज्ञाने प्रामाण्यसन्देहाद्घटेऽपि यथा सः तथात्रापीत्याशङ्कां निरस्यति ॥ एतेनैवेति ॥ जातिविशेषाभावेनैवेत्यर्थः । एवं चाहंप्रत्यये शुद्धो नभातीत्येतदयुक्तमिति स्थितम् । यदप्यवादि प्रत्यक्षं सम्भावितदोषमपौरुषेयेणागमेन बाध्यत इति तदपि नेति भावेन ''यजमानप्रस्तरत्वं यथा नार्थः श्रुतेर्भवेत् । ब्रह्मत्वमपि जीवस्य प्रत्यक्षस्याविशेषत'' इत्यनुव्याख्यानसूचितदूषणेन निरस्यति ॥ युक्तं चेति ॥ किञ्चेति चार्थः ॥ यजमान इति ॥ आद्यस्य चतुर्थे तत्सिद्धिपेटिकायां ''यजमानःप्रस्तरः यजमानो वा एककपालः'' इत्यत्राभेदस्य बाधात्प्रस्तरादिशब्दलक्षिते स्रुग्धारणादौ कार्ये यजमानलक्षणगुणो विधीयत इति प्राप्ते यजमानस्य प्रस्तरवत्सूक्तवाकेन प्रहरणादेककपालवच्च सर्वहुतकरणात्सर्वतन्त्रपरिलोपापातात् यजमानकार्यकरत्वं प्रस्तरेप्य-

(प्रकाशिका)

स्तीति सिंहश्चैत्र इतिवद्गौण्या वृत्त्याऽयमभेदव्यपदेश इत्युक्तम् । तद्वदिहाप्युपचरितार्थत्वमिति ॥ त्वयापीति ॥ सर्वज्ञत्वाल्पज्ञत्वविशिष्टयोरभेदस्य बाधेन चिन्मात्रलक्षणाया अङ्गीकारादिति भावः ॥ ''अतोधिकारिविषयफलयोगादिवर्जितम् । अनन्तदोषदुष्टं च हेयं मायामतं शुभै''रित्यनुव्याख्यानं हृदि कृत्वोपसंहरति ॥ तस्मादिति ॥ अन्यस्यचेति ॥ ''पूर्वसिद्धतमसोहि पश्चिमो नाश्रयो भवति नापि गोचर'' इति विवरणोक्तेरिति भावः ॥ अज्ञानासम्भवादिति ॥ आवरणभूताज्ञानस्याव्रियमाणेन व्याप्तत्वाद्व्यापकासम्भवे व्याप्यासम्भवादिति भावः । त्रयाणां निरासे सम्बन्धोऽपि निरस्तप्राय एवेति तन्नोक्तम् । उक्तं च ''योगः शशनृशृङ्गयो''रिति ।

पाण्डुरङ्गि – तथाहीति । द्वितीयाभावादिविशिष्टोहि शुद्धपदार्थस्तत्र विशेषणभाननिषेधाभिप्रायेण आद्यः कल्पः । विशेष्यभूतात्मभाननिषेधाभिप्रायेण द्वितीयः कल्पः । शुद्धो न भाति किं तु अशुद्धोपीत्यभिप्रायेण तृतीयः कल्प इति । अभासमानांशः आत्मनो भिन्नोऽभिन्नो वा आद्ये सत्यो मिथ्यावेति विकल्पं मनसि निधाय क्रमेण दूषयति ॥ आत्मभिन्न इति ॥ ननु चाभावरूपाधर्मा नाद्वैतं निघ्नंतीति मण्डनोक्तेरभावद्वैतं स्वीकृतं शरीरादिभ्यो भेदादेश्च अभावरूपत्वात् कथं तस्य आत्मभिन्नस्य सत्वे अपसिद्धान्त इत्यत आह ॥ अभावद्वैतं त्विति ॥ अन्यत्र न्यायामृते अंशित्वहेतुभंगे अभावे अभावत्वादेस्तदाश्रये चाभावाश्रयत्वादेर्भावस्यावश्यकत्वात् भावस्य सत्यत्वादित्यादिना निरस्तमित्यर्थः । अस्तु मिथ्याभूतस्यापि भेदादेः शास्त्रवेद्यत्वमित्यत उक्तम् ॥ तत्वावेदकेति ॥ तथा सति शास्त्रस्यातत्वावेदकत्वं स्यात् शास्त्रं च अतत्वावेदकं चेति विप्रतिषिद्धमिति भावः ॥

द्वितीयपक्षान्तर्भाव इति ॥ तथाच तद्दूषणेनैव दुष्टत्वमिति भावः । अथाभासमानांशस्य आत्ममात्रत्वेपि न द्वितीयपक्षांतर्भावप्रसक्तिः आत्मनो भानाङ्गीकारात् ॥ नचैवं भासमानात्ममात्रत्वात् अभासमानत्वव्याघात इति वाच्यम् । भासमानात्मनोऽभासमानांशस्य च कल्पितभेदादात्मभानेन वस्तुतो गृहीतत्वेपि अगृहीतत्वारोपसम्भवेनाभासमानत्वोक्तेरुपपन्नतया न तत्पक्षे वक्ष्यमाणदूषणग्रस्तत्वमिति भावेन शङ्कते ॥ तथापीति ॥ तत्वत इति ॥ अधिष्ठानज्ञानस्यैव भ्रमविरोधितया तस्मिन्सत्यपि भेदभ्रमस्य तन्निमित्तकागृहीतारोपस्य वाभ्युपगमे निवर्तकान्तरस्याभावात् तदनिवृत्तिप्रसङ्गादिति भावः । यदुक्तमभासमानोंश आत्मातिरिक्तश्चेत्सत्यो मिथ्यावेति । तत्र मिथ्याभूत इति ब्रूमः । नचैवं तद्विशिष्टात्म-

बोधकवेदान्तानां अतत्वावेदकत्वप्रसङ्ग इति वाच्यम् । तदुपलक्षितात्मनःसत्यत्वात् । तथाच भेदाभावादेर्मिथ्यात्वाङ्गीकृतेर्नापसिद्धान्तः । तदुपलक्षितात्मनः सत्यस्यैव शास्त्रप्रतिपाद्यत्वात् नातत्वावेदकत्वमपीति शङ्कते ॥ नच मिथ्याभूतेति ॥ स्थूलतारकादेश्चन्द्रादिस्वरूपज्ञापकतयैव आत्मस्वरूपज्ञापनार्थमेव भेदाभावादेर्वेदान्तेषु प्रतिपादनेन तत्प्रतिपादनस्यापि आत्मस्वरूप एव तात्पर्यान्नातत्वावेदकत्वमिति अभिमतं किं वोपलक्षणीभूतभेदाभावादावेव तात्पर्यमिति विकल्प्य आद्यं निराकरोति ॥ स्वप्रकाशत्वेनेति ॥ नांत्य इत्याह उपलक्षण एवेति ॥

आत्मस्वरूपमेव न भवतीति द्वितीयं निराकरोति ॥ अत एव नद्वितीय इति ॥ अत एवेत्युक्तमेव प्रथयति ॥ तस्येति ॥ तथाच न तस्य विषयत्वमिति भावः । चैतन्यभानाभानपक्षयोरुक्तदोषपरिहारमाशङ्क्य अतिदेशेन दूषयति ॥ एतेनेति ॥ नकोपि दोष इत्युक्तमेव विशदयति ॥ स्फुरत्त्वादिति ॥ एतेनेत्युक्तमेव विशदयति ॥ स्फुरतीति ॥ उक्तत्वादिति ॥ तत्वतो गृह्यमाण इत्यादिना उक्तप्रायत्वादित्यर्थः । ननु शुद्धचितो भानेपि अविद्यावृतत्वेन तस्य विषयत्वमुपपद्यत एव तस्या अज्ञानसाधकत्वेन तदनिवर्तकत्वात्तन्निवर्तिकाया वृत्तेश्च इदानीमसत्त्वात् । न चैकविषयकत्वाविशेषात् वृत्तिचितोःकथमज्ञानविरोधित्वाविरोधित्वविभाग इति वाच्यम् । घटविषयकत्वाविशेषेपि सौरालोकज्ञानयोस्तमोविरोधित्वाविरोधित्वदर्शनेन एकविषयत्वेपि वृत्तिचितोस्तदुपपत्तेरित्याशङ्क्य निषेधति ॥ नचेति ॥ तद्वेद्ये चिद्वेद्ये । तथाच नात्मन्यज्ञानावृतत्वमिति भावः । न च दुःखादिकमपि वृत्तिप्रतिबिम्बतचिद्वेद्यमिति वाच्यम् । तथासति वृत्त्यभावदशायां तदप्रकाशेन घटादिवत्तस्य ज्ञातैकसत्त्वाभावापातादिति भावः ।

वृत्तेरेव अज्ञानविरोधित्वं वदन्प्रष्टव्यः किं परोक्षवृत्तिरेवाज्ञानिविरोधितया अभिमता किं वापरोक्षवृत्तिः द्वितीयेपि अपरोक्षवृत्तिमात्रं उत तद्विशेषः । नाद्यः । तथासति नित्यातीन्द्रियेपि परोक्षवृत्त्या तन्निवृत्तिप्रसङ्गेन अभिव्यक्तापरोक्षैकरसचैतन्यसम्बन्धेन तदापरोक्ष्यापातादित्यभिप्रेत्य द्वितीये आद्यं दूषयति ॥ त्वन्मत इति ॥ तथाच विरोधिन्यावृत्तेः सत्त्वात् नाविद्यावृतत्वं ब्रह्मण इत्यर्थः । नन्वयं घट इत्यपरोक्षवृत्त्या घटविषयिण्या घटाज्ञाननिवृत्तावपि चैतन्याविषयत्वात्कथं तया ब्रह्माज्ञाननिवृत्त्यापादनमित्यत उक्तम् ॥ घटावच्छिन्नचिद्विषयादिति ॥ ननु नापरोक्षवृत्तिमात्रं अज्ञानविरोधितया

(पाण्डुरङ्गि)

ष्यते । किं तु तद्विशेष एव ॥ नचैवमुक्तदोषावकाशः । अयं घट इत्यादिरूप-
वृत्तेरपरोक्षवृत्तित्वेपि श्रवणादिजनितसंस्कारसंस्कृतान्तःकरणवृत्तित्वाभावेन चैतन्याज्ञाना-
निवर्तकत्वादिति द्वितीयमाशङ्क्य निराकरोति ॥ श्रवणादीति ॥ प्रसङ्गाङ्गव्यतिरेक-
व्याप्त्युपपादनं मिथ्येति । तददर्शनात् । विशिष्टवृत्तिनाश्यत्वादर्शनात् । अन्वयव्याप्त्युपपादनं
त्य इति । अनात्मापि भातीति तृतीयेऽपि किमात्मवत् अनात्मनोपि स्वातंत्र्येण अहं
त्यये भानमभिमतं किं वा तत्तादात्म्येनेति विकल्पद्वयं मनसि निधाय आद्यं दूषयति ॥
आत्मन इति ॥ द्वितीयं प्रत्याह ॥ अधिष्ठान इति ॥ अन्यथा तदनुवृत्तिप्रसङ्गादिति भावः ।
आत्मनोऽभानेऽपि शास्त्रविषयत्वमुपपन्नमित्याशङ्क्यामुक्तातिदेशेन परिहरति ॥ एतेनेति ॥
षट्जादय इत्यादिपदेन निषादऋषभगान्धारमध्यमधैवतपरिग्रहः ॥ तद्रूपेणेति ॥ षट्जत्वादि-
रूपेणेत्यर्थः । यद्यपि गान्धर्वशास्त्राभ्यासरहितैरपि सूक्ष्ममतिभिः श्रूयमाणाः स्वराः
केंचित्परस्परवैलक्षण्येनानुभूयन्ते तदेव च षट्जत्वादिकमिति तैस्तदवगम्यत एव
षट्जादिशब्दविशेषवाच्यत्वं परं न ज्ञायते तथापि ये स्थूलमतयः स्वरानाकर्णयन्तोऽपि
समवर्णपरिणामान् केशादीनिव परस्परविविक्ततयाऽवगन्तुं न प्रभवन्ति तेषामपि गान्धर्वशास्त्र
परिचये सति क्रमेण विविक्तोल्लेखो दृश्यते स एवोदाहरणमत्रेति द्रष्टव्यम् । तेन श्रोत्रेण ॥
ब्रह्मभावाभिव्यक्तिरिति ॥ ब्रह्मभावाभिव्यक्तिरित्यर्थः ।

ननु धर्मधर्मिणोरैक्यस्य सिद्धान्तत्वात् कथं धर्मिभानेपि षड्जत्वादिधर्माणाम-
भानमित्यत उक्तम् ॥ जातिभेदस्येति ॥ जातिविशेषस्येत्यर्थः । न वयं षड्जत्वादिधर्माः
धर्मिणो निर्विशेषाभिन्ना इत्याचक्ष्महे किं तर्हि सविशेषाभिन्ना एवेति । तथाच भेदकार्य-
कारिविशेषशक्त्या उपपन्नं तेषां प्रागभानमिति भावः । ततश्च दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यमिति
हृदयम् । ननु निश्चितेप्यर्थे तज्ज्ञानप्रामाण्यसन्देहादर्थसन्देहदर्शनादिहापि तथा स्यादित्या-
शङ्क्य निरस्यति ॥ एतेनेति ॥ तन्मात्रैक्ये चिन्मात्रैक्ये । एवं परोक्तमहंप्रत्यये शुद्धाभानं
निरस्य तदुक्तं पौरुषेयतया सम्भावितदोषस्य प्रत्यक्षस्य अपौरुषेयतया निर्दोषेणागमेन बाधं
निरस्यति ॥ युक्तं चेति ॥

यजमानः प्रस्तर इत्यादेरिवेति ॥ प्रथमस्य चतुर्थे त्रयोदशाधिकरणे चिन्तितम् ।
तत्सिद्धिजातिसारूप्यप्रशंसाभूमलिङ्गसमवायाः । इदमाम्नायते यजमानः प्रस्तरो यजमान
एकपाल इत्यादि किं नामधेयं प्रस्तरशब्दो यजमानस्य यजमानशब्दो वा प्रस्तरस्येति किं

वा गुणविधिरुतार्थवादइति तत्रैकमपरस्य नामधेयं प्रस्तरशब्दो वा यजमानस्य यजमानशब्दो वा प्रस्तरस्य उद्भिदायागेनेत्यादाविव सामानाधिकरण्यादित्येकः पूर्वपक्षः । गुणविधिरित्यपरः पूर्वपक्षः । गुणविधिपक्षे प्रथमलूनबर्हिर्मुष्टिविशेषत्वरूपप्रस्तरत्वस्य यजमाने यष्टृत्वरूपयजमानत्वस्य वा प्रस्तरे विधातुमशक्यतया तत्कार्ये गुणविधाने वाच्ये तत्रापि प्रस्तरस्याचेतनत्वेन यजमानकार्यजपादिकर्तृत्वानुपपत्त्या यजमानकार्ये प्रस्तररूपगुणविध्यनुपपत्तावपि प्रस्तरे जुहूं सादयतीत्यादेः प्रस्तरकार्यतयाऽवधारितस्रुग्धारणादौ यजमानस्य शक्ततया प्रस्तरकार्ये यजमानरूपगुणविध्यङ्गीकारे नानुपपत्तिः । नचायमर्थवाद एवास्त्विति वाच्यम् । अर्थान्तरवचनेनार्थान्तरस्य स्तुत्ययोगात् । नचावयवद्वारा अष्टाकपालवचनेन द्वादशकपालस्येव इहाप्यन्यतरवचनेनान्यतरस्तुतिरुपपन्नेति वाच्यम् । अष्टाकपालद्वादशकपालयोरिव प्रकृते अंशांशिभावाभावेनावयवद्वारा स्तुत्यनुपपत्तेः क्षिप्रत्वादिधर्मवत्कस्यचिदुत्कर्षस्याप्रतीत्या वायुर्वैक्षेपिष्ठादेवतेत्यादिवत्स्तुतिरूपत्वस्याप्ययोगाच्च । तस्मान्नामधेयगुणविध्योरन्यतरत्वमिति प्राप्ते ब्रूमः । गोमहिषयोरिवात्यन्तभिन्नार्थत्वेन प्रसिद्धेः उभयानुगतप्रवृत्तिनिमित्ताभावादनेकशक्तिकल्पनाप्रसङ्गाच्च नतावदेकस्येतरनामधेयतोपपद्यते । नापि गुणविधिरिति द्वितीयः । प्रस्तरकार्यस्रुग्धारणादौ यजमानरूपगुणविधावन्तर्वेद्यां प्रस्तरवत् यजमानेपि स्रुगाद्यासादनापातेन ''दक्षिणतोब्रह्मयजमानावासाते'' इत्यादिवाक्यप्रमापितयजमानकार्यविलोपापत्तेः । सूक्तवाकेन ''प्रस्तरं प्रहरती''ति विहितहोमरूपकार्येपि यजमानस्य हविष्ट्वेन प्रस्तरवद्विधानाद्यजमाने प्रहृते सर्वकर्मविलोपापत्तेश्च । एककपालकार्ये यजमानरूपगुणविध्यङ्गीकारे ''एककपालं सर्वं हुतं करोती''ति शास्त्रादेककपालवद्यजमानस्यापि सर्वहुतकरणापत्त्या प्रयोगपरिसमाप्त्यभावप्रसङ्गाच्च । तस्मादुत्तरं बर्हिषा प्रस्तरं सादयति एककपालं सर्वं हुतं करोतीति विध्यन्तरैकवाक्यतया तत्स्तावकत्वादर्थवादत्वमेव वाच्यम् । सिंहो देवदत्त इत्यादौ हि सिंहगुणशौर्यादियुक्तदेवदत्तस्य सिंहपदेनेव यजमानगुणयागसाधनत्वयुक्तप्रस्तरस्य यजमानपदेन स्तुत्युपपत्तेः । न च गुणेऽशक्तत्वान्नतदभिधायकत्वम् । ततश्चाशब्दत्वान्नशाब्दप्रस्तरान्वयो युक्त इति वाच्यम् । बोधकत्वमात्राङ्गीकारेण शक्त्या तदभिधायकत्वानंगीकारात् । नचाशक्तत्वे बोधकत्वासम्भवः । लक्षितलक्षणारूपगौण्यैव तद्बोधकत्वात् । यजमानशब्दोहि स्वार्थं यजमानं शक्त्या प्रतिपादयति । सचाभिहितः स्वसमवेतकार्यकरत्वसम्बन्धाद्बोधयति । तच्च प्रस्तरेप्यस्तीति प्रस्तरावबोधो यजमानपदेनेति स्तावकत्वोपपत्तेरर्थवादत्वमेवेति ।

(पाण्डुरङ्गि)

नकेवलं निर्दोषतया प्रबलस्यापि वाक्यस्य प्रत्यक्षबाधेनाविवक्षितार्थत्वदर्शनमात्रेण तदापादयामः किं नाम परेणापि तथास्वीकारादित्याह ॥ उक्ताचेति ॥ ननु न प्रत्यक्षविरेधात्तत्वंपदयोर्लक्षणोच्यते किं तर्हि किंचिज्ज्ञत्वसर्वज्ञत्वयोरैक्यासम्भवेन तद्विशिष्टयोरैक्यासम्भवेनान्वयानुपपत्त्यैवेति चेत् अत्राहुः । विशिष्टैक्यरूपान्वयाभावस्यापि प्रत्यक्षेणैव ज्ञातत्वात् । न च शुद्धैक्ये तात्पर्यात्तदन्यथानुपपत्त्या लक्षणेति वाच्यम् । उपक्रमादिलिङ्गानां तत्त्वंपदार्थयोरैक्यमात्र एव तात्पर्यग्राहकत्वेनोपपत्तेः । न च विशेषणैक्यानुपपत्तिप्रतिसंधानसहकृतमुपक्रमादिकं शुद्धैक्ये तात्पर्यग्राहकमिति वाच्यम् । एवं वदता त्वयैव प्रत्यक्षविरोधेन लक्षणाऽङ्गीकृता स्यात् तादृशानुपपत्तिप्रतिसन्धानस्य प्रत्यक्षरूपत्वादिति । दोषान्तरं सूचयन्नेव प्रकृतमुपसंहरति ॥ तस्मादिति ॥ स्वरूपमात्रस्येति ॥ चैतन्यस्वरूपमात्रस्येत्यर्थः ॥ नित्यसिद्धत्वादिति ॥ सिद्धप्रकाशविलोपासिद्धप्रकाशानुत्पत्त्यादिरूपावरणकृत्यस्य तस्मिन्ननिरूपणान्न तस्याज्ञानविषयत्वमिति भावः ॥ अन्यस्यचेति ॥ अन्योन्याश्रयापत्तेरिति भावः ॥ अज्ञानासम्भवादिति ॥ अत्राज्ञानमिति प्रतीत्याऽज्ञानस्य सविषयत्वनियमसिद्धेर्व्यापकीभूतसविषयत्वव्यावृत्त्या तद्व्याप्याज्ञानत्वस्याप्यसम्भवादित्यर्थः ।

तात्पर्यचन्द्रिका

एतेन न प्रत्यग्ब्रह्मैक्यं विषयः । कर्तृत्वादेर्विरुद्धधर्मस्य सत्यत्वेनैक्यायोगात् । नापि तन्निवृत्तिःप्रयोजनम् । ज्ञानस्याज्ञानमात्रनिवर्तकत्वेन सत्यस्य ज्ञानान्निवृत्त्ययोगादिति प्राप्ते सत्यं कर्तृत्वभोक्तृत्वादिप्रपञ्चस्य सत्यत्वे विषयादिर्नसिध्यतीति । प्रपञ्चस्तु मिथ्यैव । अत एव भाष्येऽध्यासवर्णनमिति विवरणाभिप्रेतमधिकरणमपि निरस्तम् । कर्तृत्वादिविशिष्टस्य सम्भावितदोषेणातत्वावेदकेन प्रत्यक्षानुमानादिना मिथ्याभेदे गृहीतेपि तात्विकाभेदे मानान्तरविरोधाभावेन तत्त्वंपदमुख्यार्थत्वाय तल्लक्षिते चिन्मात्रेऽभेदाप्रसक्त्या तत्त्वमसिवाक्यावैयर्थ्याय च विशिष्टस्यैव निर्दोषया श्रुत्या तात्विकाभेदबोधनसम्भवेन विषयार्थमध्यासस्यावक्तव्यत्वात् । नच विरुद्धधर्मस्य सदा सत्त्वे भेदस्तात्विकएव स्यादिति वाच्यम् । अस्याप्यनुमानस्य श्रुतिविरुद्धत्वेनातात्विकविषयत्वात् । नापि प्रयोजनार्थं तदुक्तिः । सेत्वज्ञानाकार्यस्यापि पापस्य सेतुज्ञानान्निवृत्तेः । विस्तृतं चैतदन्यत्र । तस्मान्नविवरणमतमपि युक्तम् ।

प्रकाशिका – विवरणमतमप्युक्तातिदेशेन निराह ॥ एतेनेति ॥ आत्मभिन्नः सत्यश्चेदपसिद्धान्त इत्यादिदूषणजातेनेत्यर्थः । तथाहि ब्रह्मैक्यं हि विषय इति सिद्धांत्यभिमतम् । तच्चात्मस्वरूपमुत भिन्नम् । आद्ये तस्य स्वप्रकाशत्वेन शास्त्रवैयर्थ्यम् । नच भेदभ्रमनिरासार्थं शास्त्रम् । अधिष्ठानाप्रकाशं विना भेदभ्रमस्यैवायोगात् । स्वरूपे प्रकाशमानेप्यज्ञानविरोधिवृत्त्यभावाद्भ्रम इति त्वयुक्तम् । तद्वेद्ये दुःखादावज्ञानप्रसङ्गात् । द्वितीये सत्यत्वेऽपसिद्धान्तः । अभावत्वेप्यभावद्वैतस्यान्यत्र निरासात् । मिथ्यात्वे तु न तत्वावेदकशास्त्रवेद्यतेत्यादि ॥ प्रत्यगिति ॥ जीवब्रह्मैक्यमित्यर्थः । विश्वकर्तृत्वसर्वज्ञत्वादेर्ब्रह्मधर्मस्यासर्वकर्तृत्वाल्पज्ञत्वादेर्जीवधर्मस्य सत्यत्वादित्यर्थः । यद्वा कर्तृत्वभोक्तृत्वदुःखित्वादिजीवधर्मस्य ब्रह्मधर्मविरुद्धस्य सत्यत्वादित्यर्थः । तन्निवृत्तिः कर्तृत्वभोक्तृत्वादिबन्धनिवृत्तिः ॥ ज्ञानस्येति ॥ यद्विषयकं हि ज्ञानं तद्विषयकमज्ञानमेव साक्षान्निवर्तयति । यदि च कर्तृत्वादिकमज्ञानकार्यं तदा तद्द्वारा तन्निवर्तकं स्यात् । न हि तत्तथेत्यर्थः । सत्यस्य अज्ञानाकार्यस्येति व्याख्येयम् । मिथ्यैव आविद्यक एवेत्यर्थः । तथाच कर्तृत्वादिविरुद्धधर्माणां मिथ्यात्वेनैक्यस्य विषयत्वमज्ञानकार्यत्वेन च ज्ञानान्निवृत्तियोगेन कर्तृत्वादिबन्धनिवृत्तिः फलमिति भावः ॥

अत एवेति ॥ यतः कर्तृत्वादेर्मिथ्यात्वे विषयादिसिद्धिरत इत्यर्थः । अन्यथा ''अस्मत्प्रत्ययगोचरे विषयिणि चिदात्मके युष्मत्प्रत्ययगोचरस्य तद्धर्माणां चाध्यास'' इत्यारभ्य'' ''मिथ्याप्रत्ययरूपः कर्तृत्वभोक्तृत्वप्रवर्तनः सर्वलोकप्रत्यक्ष'' इत्यन्तं भाष्यं व्यर्थमेव स्यादिति भावः । यदुक्तं विषयादिसिद्ध्यर्थमध्यासवर्णनं भाष्य इति तदप्ययुक्तमिति भावेन ''बन्धमिथ्यात्वं नैवमुक्तिरपेक्षत'' इत्यनुव्याख्यानं हृदि कृत्वा दूषणान्तरमाह ॥ कर्तृत्वादीति ॥ विशिष्टस्येति ॥ मिथ्याभेदे गृहीतेपीत्यन्वयः । मिथ्यात्वेहेतुः अतत्वावेदकेनेति । तत्र हेतुः सम्भावितेति ॥ न केवलं विशिष्टाभेदे बाधकाभावः प्रयोजनं चास्तीत्याह ॥ तत्त्वंपदेति ॥ युक्तं च विशिष्टैक्यमेवेत्याह ॥ तल्लक्षित इति ॥ तत्त्वं पदलक्षित इत्यर्थः। यत्र हि भेदः प्रसक्तस्तत्रैव तन्निषेधरूपाभेदो बोधनीयः । न हि चिन्मात्रे भेदः प्रसक्तः । येन तत्राभेदबोधनं सार्थकम् । किंतु विशिष्टएवेति । विशिष्टस्य कर्तृत्वादिविशिष्टस्य । विशिष्टाभेदे बाधकं शङ्कते ॥ न चेति ॥ तथाच तत्वावेदकप्रत्यक्षादिमानविरोध इति भावः ।

॥ अस्येति ॥ सदातनविरुद्धधर्मवत्त्वात्तात्विकभेदवन्तौ जीवपरावित्यनुमानस्येत्यर्थः । ''तत्परत्वात्परत्वाच्चे''ति त्वयैवोक्तेरिति भावः । तदुक्तिः अध्यासोक्तिः ॥ सेत्विति ॥

(प्रकाशिका)

''सेतुं दृष्ट्वासमुद्रस्य ब्रह्महत्यां व्यपोहति''त्यादिस्मृतेरिति भावः । पापस्य सेत्वज्ञानकार्यत्वे हि तज्ज्ञानमज्ञाननिवृत्तिद्वारा तन्निवर्तकं स्यात् । नच तत्तथा । तथाच तद्वदेवात्राप्य-ज्ञानाकार्यस्य विरुद्धधर्मस्य ज्ञानेन निवृत्तिसम्भवान्नतदर्थं तस्य मिथ्यात्ववर्णनमित्यर्थः । ननु सेतुदर्शनस्यापि न साक्षात्पापनिवर्तकत्वं किन्तु स्वजन्यादृष्टद्वारा । साक्षान्निवर्तकत्वेपि न ज्ञानत्वेन किन्तु विहितक्रियात्वेन । ज्ञानत्वेन ज्ञाननिवर्त्यत्वज्ञानस्यैव । अतः कर्तृत्वादे-राविद्यकत्वायाध्यासवर्णनं युक्तमित्यत आह ॥ विस्तृतमिति ॥ न्यायामृते ज्ञाननिवर्त्य-त्वान्यथानुपपत्तिभङ्ग इत्यर्थः ।

पाण्डुरङ्गि – ॥ प्रत्यगिति ॥ जीवब्रह्मैक्यमित्यर्थः ॥ ऐक्यायोगादिति ॥ पारमार्थिक-विरुद्धधर्माधिकरणयोरैक्ये जलानलयोरपि तत्प्रसङ्गादिति भावः ॥ तन्निवृत्तिरिति ॥ कर्तृत्वादिरूपबन्धनिवृत्तिरित्यर्थः ॥ ज्ञानस्येति ॥ यतो ज्ञानमज्ञानस्यैव निवर्तकमिति व्याप्तेरिति भावः ॥ प्रपञ्चस्त्विति ॥ तथा कर्तृत्वादिरूपप्रपञ्चस्य मिथ्यात्वादैक्यस्य विषयत्वं मिथ्यात्वेनाज्ञानकार्यत्वात् ज्ञानेन तन्निवृत्त्या प्रयोजनं च सिद्धमित्यर्थः ॥ अत एवेति ॥ कर्तृत्वभेक्तृत्वादिरूपप्रपंचस्य सत्यत्वे विषयाद्यसंभवादेवेत्यर्थः ॥ सम्भावितदोषेणेति ॥ अत्र प्रत्यक्षादेर्मिथ्याभेदग्राहकत्वे अतत्वावेदकत्वं हेतुः तत्र च सम्भावितदोषत्वमिति ज्ञेयम् । नकेवलं विशिष्टाभेदे बाधकाभावः प्रयोजनान्तरं चास्तीत्याह ॥ तत्त्वंपदेति ॥ युक्तं च विशिष्टैक्यमेवेत्याह ॥ तल्लक्षित इति ॥ तत्त्वंपदलक्षित इत्यर्थः । यत्रहि भेदः प्रसक्तस्तत्रैव हि तन्निषेधरूपोऽभेदो बोधनीयः । न हि चिन्मात्रेभेदः प्रसक्तः। चिच्चिन्नेत्यनवभासात् । येन तत्राभेदबोधनं सार्थकं स्यादिति भावः ॥ विशिष्टस्यैवेति ॥ कर्तृत्वादिविशिष्टस्यैवेत्यर्थः ॥ न चेति ॥ तथाच तत्वावेदकप्रत्यक्षादिप्रमाणविरोध इति भावः ॥ अस्येति ॥ सदातनविरुद्धध-र्मवत्त्वात्तात्विकभेदवंतौ जीवपरावित्यनुमानस्येत्यर्थः ॥ तदुक्तिरिति ॥ अध्यासोक्तिरित्यर्थः ॥ सेत्विति ॥ ''सेतुंदृष्ट्वासमुद्रस्य ब्रह्महत्यां व्यपोहती''त्यादि स्मरणादितिभावः । पापस्य सेत्वज्ञानकार्यत्वे हि तज्ज्ञानस्य तदज्ञाननिवृत्तिद्वारा तन्निवर्तकत्वं स्यात् । नच तदस्ति । तथाच तद्वदेवात्राप्यज्ञानाकार्यस्यापि विरुद्धधर्मस्य ज्ञानेन निवृत्तिसम्भवान्न तदर्थं तस्य मिथ्यात्ववर्णनमित्यर्थः । ननु सेत्वादिज्ञानस्यादृष्टद्वारेण तन्निवर्तकत्वान्नसाक्षात्तन्निवर्त-कत्वम्। तत्त्वेपि वा न ज्ञानत्वेन तत् । किंतु विहितक्रियात्वेन । ब्रह्मज्ञानं च न तादृशमिति दृष्टांतदार्ष्टांतिकवैषम्यमिति चेत्समं प्रकृतेपीत्याह ॥ विस्तृतमिति ॥ अन्यत्र न्यायामृते ज्ञाननिवर्त्यत्वान्यथानुपपत्तिभङ्ग इत्यर्थः । यद्वा ननु सेतुदर्शनमात्रं न निवर्तकम् ।

सेतुस्थानामपि तत्प्रसङ्गात् । किं तु दूरगमनादिविशिष्टमेवेति चेदिहापि न ब्रह्मज्ञानमात्रं निवर्तकम् । भाषाप्रबन्धजन्येन अनधीतवेदान्तजन्येन अधीतवेदान्तजन्येनाप्यसम्भावना-विपरीतभावनाप्रबलारब्धकर्मादिना प्रतिबद्धेनापि तन्निवृत्तिप्रसक्तेः । किं तु नियमाधीत-वेदान्तश्रवणादिनियमविशिष्टमेवेति साम्यमेवेत्याह ॥ विस्तृतमिति ॥

तात्पर्यचन्द्रिका

केचित्तु वृद्धव्यवहारेण कार्य एव शब्दानां व्युत्पन्नतया सिद्धे ब्रह्मणि वेदान्ता-नामप्रामाण्याद्विचारो नारम्भणीय इति प्राप्ते अंबातातादीनङ्गुल्या निर्दिश्यांबा-तातादिशब्देषु प्रयुक्तेषु बालानां तेषु तच्छब्दानां प्रथमव्युत्पत्तिदर्शनात् ब्रह्मणि वेदान्तानां प्रमाण्यसम्भवात्तद्विचार आरब्धव्य इति सिद्धान्त इत्याहुः ॥ तत्र ब्रूमः। अथ कर्मविचारानन्तरमतः कर्मणां विचारितत्वादेव ब्रह्मविचारः कर्तव्य इति हि तव सूत्रार्थः । न चात्राथशब्दादिना कार्ये व्युत्पत्तिनिरासः प्रतीयते । नच सौत्रपदनिर-स्यैर्हेतुभिः सूत्रावतारिकारूपपूर्वपक्षसम्भवे हेत्वंतरेण सयुक्तः । नच विधिवाक्यस्थस्यास्य ब्रह्मशब्दस्य स्वप्रधाने सिद्धे व्युत्पत्तिरद्यापि सिद्धा । येन तत्प्रयोगात्सा सूच्येत ।

किं च "अथातोधर्मजिज्ञासे"त्यादि "अनावृत्तिःशब्दा"दित्यन्तं विंशति लक्षणमेकं शास्त्रमिति वदता त्वया चतुर्लक्षणी देवमीमांसा द्वादशलक्षण्याः कर्ममीमांसाया उत्तरा ब्रह्ममीमांसायास्तु पूर्वेति स्वीकृतत्वेन सिद्धे व्युत्पत्त्यभावे सिद्धरूपदेवमीमांसानुपपत्तेस्तस्यास्तत्रैव सिद्धत्वात्पुनरिह सिद्धे व्युत्पत्त्यभावेन पूर्वपक्षो न युक्तः । अत एव सिद्धान्तोप्ययुक्तः । त्वद्रीत्या सिद्धे व्युत्पत्तेरत-श्शब्दादिनाऽबोधनात् । विचारकर्तव्यताहेत्वर्थेनातश्शब्देनोक्तस्याथशब्दादिना सूचितस्य च तत्र हेतुत्वसम्भवे तद्विपरीतायाः सिद्धे व्युत्पत्तेस्तत्र हेतुत्वायोगात् ।

प्रकाशिका – रामानुजीयमतमप्यनूद्य निराचष्टे ॥ केचित्त्विति ॥ वृद्धव्यवहारादन्येन शब्दानामादौ व्युत्पत्त्यभावाद्वृद्धेन च गामानयेति वाक्ये प्रयुक्ते प्रयोज्यवृद्धेन च गव्यानीतायां पार्श्वस्थो बालोऽस्य गवानयनप्रवृत्तिर्ज्ञानपूर्वा प्रवृत्तित्वात् मत्प्रवृत्तिवत् । ज्ञानं तु

(प्रकाशिका)

सहेतुकमित्यन्यस्य हेतोरदर्शनाद्वाक्यमेव हेतुत्वेन गृहीत्वा पश्चादावापोद्वापक्रमेण कार्य एव शब्दानां व्युत्पत्तिं प्रत्येतीति कार्य एव वाक्यानां प्रामाण्यम् । ब्रह्म तु सिद्धरूपमिति सिद्धे व्युत्पत्त्यभावेन वेदान्ता न ब्रह्म बोधयितुं शक्ता इत्यप्रमाणम् । अतस्तदर्थनिर्णयात्मकमिदं शास्त्रं नारम्भणीयमिति पूर्वपक्षस्याशयः । सिद्धान्तस्य तु नैवं बालानां प्रथमं कार्ये व्युत्पत्तिग्रहः । एतावदनुसन्धानाशक्तत्वात् । किन्तु सिद्ध एव । तथाहि । मातापित्रादीनङ्गुल्या निर्दिश्य इयं ते अम्बा अयं ते तात इत्यम्बादिशब्देषु केनचिदाप्तेन प्रयुक्तेषु सत्सु तत्रैषां शब्दानां व्युत्पत्तिमवधारयन्ति । न हि निखिललोकविदितशब्दार्थसम्बन्धावधारणप्रकारापनोदो युज्यते । अतो ब्रह्मणि सिद्धरूपेपि बोधमापादयितुं शक्ता वेदान्ता इति विचारशास्त्रमिदमारभ्यमेव । उक्तं च ''कार्ये व्युत्पत्तिराद्या नियतिरिति गिरस्तत्परा एव सर्वा अन्या वेदेपि रीतिस्तत उपनिषदामूषरप्रायतैव । नातस्तद्वेद्यमीमांसनमुचितमिति प्रत्यवस्थीयमाने सिद्धे व्युत्पत्तिमाद्यां बहुमुखमवयन्ब्रह्म जिज्ञास्यमाहे''ति । कर्मविचारानन्तरं तत एव हेतोर्ब्रह्मविचारः कर्तव्य इति तदीयभाष्यं हृदि कृत्वाह ॥ अथेति ॥ अत्र ''एतत्सर्वं तर्कशास्त्रे ब्रह्मतर्के हि विस्तरात् । उक्तं'' इत्यादिनाऽनुव्याख्याने कार्ये व्युत्पत्तिनिरासेन सिद्धे व्युत्पत्तेरतश्शब्दार्थत्वेनोक्तत्वात् । सुधायामपि पूर्वपक्षे कार्ये व्युत्पत्तेरुक्तत्वाद्वक्ष्यमाणं दूषणं न लगतीत्यत उक्तमिति हि तव सूत्रार्थ इति । तथाच तद्रीत्या वक्ष्यमाणं दूषणमिति ज्ञेयम् ॥ नचात्रेति ॥ यदि कर्मविचाराद्याक्षेपेण पूर्वपक्षः क्रियेत तदैवैतद्घटेत नान्यथेति भावः । सूत्रपदानिरस्योप्यगत्या क्रियत इत्यत आह ॥ नचेति ॥ कोयं नियम इत्यत उक्तवतारिकेति । अन्यथाऽसङ्गतिः स्यादिति भावः ॥ सम्भव इति ॥ अस्मद्रीत्येति भावः ।

ननु यथा भवन्मते जीवभेदकगुणपूर्तिवाचिब्रह्मपदप्रयोगाद्विषयसिद्धिस्तथा मन्मतेपि सिद्धब्रह्मवाचकब्रह्मपदप्रयोगात्सिद्धे व्युत्पत्तिर्ज्ञायत इत्यत आह ॥ न चेति ॥ ब्रह्मशब्दस्य वेजिज्ञासस्वेति लोड्वाच्यकार्यान्वितब्रह्मपरत्वेन सिद्धे व्युत्पत्तेरलाभात्सूत्रे च श्रुत्यनुसरणाय कर्तव्यपदाध्याहाराच्च । यद्यत्र लिङादिविधिप्रत्ययरहितं ब्रह्मपदोपेतं विषयवाक्यं स्यात्सूत्रे च कर्तव्यपदाध्याहारो न स्यात्तदा सा सूच्येत । नह्येवमिति भावः । ननु कार्ये व्युत्पत्त्यनिरासे सिद्धे ब्रह्मणि प्रामाण्यायोगात्तन्निरासकस्यान्यस्याभावाद्भवद्भिरप्यस्मिन्नेव सूत्रे तन्निरासागत्याऽत्रैवं पूर्वःपक्षः कृत इत्यत आह ॥ किंचेति ॥ विंशतिलक्षणमिति ॥ लक्षणशब्दोपायपर्यायः । पूर्वतन्त्रे द्वादशलक्षणानि । दैवीमीमांसायां चत्वारि । उत्तरस्यां चत्वारिचेत्यर्थः । अत एवेत्युक्तं हेतुं विशदयति ॥ त्वद्रीत्येति ॥ अगतिं परिहरति ॥

विचारेति ।। हेत्वर्थेन हेतुबोधकेन ।। सम्भव इति ।। वक्ष्यमाणदिशेति भावः । तत्र विचारकर्तव्यतायाम् । त्वन्मते कर्मविचारस्यैव ब्रह्म विचारं प्रति हेतुत्वोक्त्या सिद्धे व्युत्पत्तेर्हेतुत्वस्यातश्शब्देनाबोधनादिति भावः ।

यत्कश्चिदाह ''परीक्ष्य लोकान्कर्मचितान्ब्राह्मणो निर्वेदमायात् । नास्त्यकृतः कृतेन तद्विज्ञानार्थं सगुरुमेवाभिगच्छे''दिति मुण्डकवाक्यमुदाहृत्य इदं शास्त्रमारम्भणीयं नवा । तदर्थं ब्रह्मज्ञानाय तद्विचाराङ्गभूतगुरूपसत्तिं परीक्ष्य लोकानित्यादिवाक्यं विधातुं शक्नोति नवा । तदर्थं ब्रह्मविचारार्हं नेति सन्देहे ''अयमात्मा ब्रह्मे''त्यादिश्रुत्या जीवस्यैव ब्रह्मत्वात्तस्य चाहंधीसिद्धत्वेनासन्दिग्धतया विचारानर्हत्वात् । न चेयं श्रुतिरहंधीसिद्धेन विशिष्टेनाभेदं न बोधयति किं तु चिन्मात्रेण तच्चेदानीमावृतत्वात्सन्दिग्धमिति वाच्यम् । श्रुतावयमिति प्रत्यक्षसिद्धं विशिष्टमेव परामृश्य ब्रह्मतोपदेशात् । ''मुष्टिलोपात्तु सङ्घचालोपस्तद्गुणत्वात्स्या''दिति दाशमिकाधिकरणन्यायेन प्राथमिकेदंशब्दस्वारस्यानुरोधेन चरमब्रह्मशब्दस्य देहबृंहणादिना कथंचित्तस्मिन्नेव नेयत्वात् । न च ''ध्यायतीवे''त्यादि श्रुतेः कर्तृत्वादिकं मिथ्येति युक्तम् । प्रत्यक्षविरोधेन श्रुतेः पारतन्त्र्यमात्रपरत्वात् । अस्तु वा चिन्मात्रैक्यम् । तथापि तस्य निर्विशेषत्वेन शब्देन प्रतिपादनासम्भवान्न तदयमात्मेत्यादिवाक्यबोध्यम् । किंतु विशिष्टैक्यमेव । तच्चासन्दिग्धम् । ब्रह्मणो जीवान्यत्वेपि तस्य साकल्येन ज्ञानासम्भवात् । एकदेशज्ञानं जातमपि न मोक्षहेतुः स्यादतो ब्रह्मणोऽविचार्यत्वाद्रूपसत्तिमिदं वाक्यं न विदधातीति शास्त्रमेतन्नारम्भणीयमिति प्राप्ते । तेभ्यो विलक्षणस्साक्षी चिन्मात्रोहं सदाशिवः । ज्ञाज्ञौच द्वावजावीशानीशा''वित्यादि श्रुतिभिर्भेदस्याप्यावेदनेन द्विविधवाक्यदर्शनेन सन्दिग्धत्वसम्भवाद्विचारार्हं ब्रह्मेति शास्त्रमारम्भणीयमिति सिद्धान्त इति ।। यथोक्तं ''आत्माब्रह्मेत्यधीतःस्फुरति स तु सदा निर्विशेषः स चेत्स्यात्तस्यातीतस्य बुद्धेः सरणिमिहनयैः कापरिच्छेदवार्ते'' त्यादि ।

तन्न । यद्गतन्यायैस्सूत्रनिबद्धैर्यद्वाक्यार्थो निर्णीयते तस्यैवोदाहरणत्वयोग्यतया परीक्ष्येति वाक्यस्यातथात्वेनानुदाहरणत्वात् । न ह्यथातो ब्रह्मजिज्ञासेति सूत्रे परीक्ष्येति वाक्यगततद्वाक्यार्थनिर्णायकन्यायनिबन्धनमस्ति । नवाऽत्र सूत्रे स्थित्वा सर्वतीर्थकरैरेतद्वाक्यार्थो निर्णीयते । यदपि क्लेशेनास्य वाक्यस्य जिज्ञासासूत्रेणैकार्थतां व्युत्पाद्योदाहरणत्वकथनं तदपि न । साक्षाज्जिज्ञासापदाद्युपेतस्यैवोदाहरणत्वसम्भवे क्लेशायोगात् । समानार्थत्व-

(प्रकाशिका)

मात्रेणोदाहरणत्वायोगाच्च । निर्णेयार्थकस्यैवोदाहरणत्वात् । पूर्वपक्षोप्ययुक्तः । अयमात्मा ब्रह्मेत्यादौ ब्रह्मत्वं यादृशतादृशं निरङ्कुशं वा । नाद्यः । ब्रह्मैक्यासिद्धेः । नद्वितीयः । प्रत्यक्षबाधात् । न हि मायावादिमत इव प्रत्यक्षमतत्वावेदकमिति पूर्वपक्षिणो मतम् । तस्य बलवत्त्वेन ध्यायतीवेत्यादेरन्यार्थवर्णनात् । अयमात्मेत्यभेदवाक्यं पश्यतः पूर्वपक्षिणस्तद्भेदावेदकवाक्यादावान्ध्यस्यायुक्तत्वेन सर्वसामञ्जस्याय चन्द्रिकोक्तदिशाऽद्वैतिरीत्येत्युक्तस्यैवानुसरणीयत्वाच्च । किं च जीवस्याहंधीसिद्धत्वेपि देहादिविविक्तत्वादिना सन्दिग्धत्वात्तेन रूपेण जिज्ञासासम्भवेन शास्त्रानारम्भासिद्धेश्च । अन्यथा त्वन्मतेप्यग्रे जीवविचारो न स्यात् ।

यदप्यस्तु वेत्यादिना चिन्मात्रैक्यमङ्गीकृत्यायमात्मेत्यादिवाक्याबोध्यत्ववर्णनं तदप्यचारु । तस्य तादृशागमवाक्यं विनाऽङ्गीकारायोगेनागमेन तदप्रतिपादनोक्तेर्व्याहतत्वात् । यापि ब्रह्मणो जीवान्यत्वमुपेत्य यथावत्तस्यापरिच्छेद्यत्वोक्तिः साप्ययुक्ता । सूत्रे तस्यासमाधानात् । ब्रह्मणः साकल्येनापरिच्छेद्यत्वादिरूपमहामहिमत्वबोधकवचनसहस्रबलेनागत्या तस्य यथायोग्यमेकदेशपरिज्ञानस्यैव मुक्तिहेतुत्वस्य कल्प्यत्वात् । सिद्धान्तोप्ययुक्तः । त्वदुक्तसन्देहोपपादकन्यायस्य सूत्रे केनापि पदेनाप्राप्तेरित्याद्यूह्यम् ।

पाण्डुरङ्गि – रामानुजीयं मतमनूद्य दूषयति ॥ केचित्त्विति ॥ वृद्धव्यवहारस्य कार्यप्रतिपत्तिनिबन्धनतया कार्यमात्रनिष्ठत्वेन तादृशव्यवहारदर्शनजन्यतया प्रत्याय्यप्रत्यायकभावलक्षणसम्बन्धग्रहणलक्षणव्युत्पत्तेरपि कार्यमात्रविषयतया कार्यमात्रव्युत्पत्त्यपेक्षशब्दस्य कार्यप्रतिपादकत्वसम्भवेपि परिनिष्पन्ने ब्रह्मणि शब्दानामव्युत्पन्नत्वेन तद्बोधकत्वानुपपत्त्या वेदान्तानां ब्रह्मणि प्रामाण्यासम्भवेनानुग्राह्यप्रमाणविरहाद्वेदान्तविचारस्याकर्तव्यतया वेदार्थनिर्णायकन्यायग्रथनात्मकं शास्त्रमनारम्भणीयमिति पूर्वपक्षाभिप्रायः । छोटिकावादनादिना अव्युत्पन्नमभिमुखीकृत्य अम्बाताताद्दीनंगुल्या प्रदर्श्य इयं ते अम्बा अयं ते पिता इति केनचिदाप्तेन प्रयुक्तेषु सत्सु अम्बादिपदार्थानां वर्तमानत्वेन प्रतिसम्बन्धिनां प्रत्यक्षत्वोपपत्तेरिष्टसाधनत्वेन जिज्ञासायाः सम्भवादम्बाताताद्दिशब्दानामम्बाताताद्दिषु प्राथमिकव्युत्पत्तिदर्शनात्सिद्ध एव शब्दानां व्युत्पन्नत्वेन तत्सापेक्षवेदान्तानां परिनिष्पन्नेपि प्रामाण्यसम्भवादनुग्राह्यप्रमाणसद्भावेन वेदान्तविचारस्य कर्तव्यत्वाच्छास्त्रमारम्भणीयमिति सिद्धान्ताशयः ॥ तव सूत्रार्थ इति ॥ ''कर्मविचारानन्तरं तत एव हेतोर्ब्रह्मविचारः कर्तव्य इति

अथात इत्युक्तं'' इति तद्भाष्योक्तेरिति भावः । ननु अथशब्दादिना कार्ये व्युत्पत्तिनिरासा प्रतीतावपि भवत्वेवं पूर्वपक्ष इत्यत आह ॥ नच सौत्रपदेति ॥ सौत्रपदनिरस्यहेतुभिरेव पूर्वपक्षस्य कर्तव्यत्वे सूत्रावतारिकारूपेति हेतुगर्भं विशेषणम् । अन्यथा सूत्रावतारिकात्वानुपपत्तेः ॥ सम्भव इति ॥ अस्मद्गीत्येति शेषः ॥ हेत्वन्तरेणेति ॥ सौत्रपदानुक्तहेतुनिरस्यहेत्वन्तरेणेत्यर्थः । ननु च सौत्रपदोक्तहेतुनैव पूर्वपक्षः कर्तव्य इति न नियमः । तत्सूचितहेतुनिरस्यहेतुनापि पूर्वपक्षाणां बहुलमुपलम्भात् । प्रकृते च सिद्धे व्युत्पत्तेः सौत्रपदेनानुक्तावपि सूचितत्वमस्त्येव । सूत्रे सिद्धार्थपरब्रह्मशब्दप्रयोगादित्यत आह ॥ न चेति ॥ ब्रह्मशब्दस्य स्वप्रधाने सिद्धे व्युत्पत्त्यभावे हेतुमाह ॥ विधिवाक्यस्थस्येति ॥ तद्विजिज्ञासस्वेति श्रुतौ लोड्वाच्यान्वितब्रह्मपरत्वात्सूत्रे च श्रुत्यनुसारेणाध्याहृतकर्तव्य-पदोक्तकार्यान्वितब्रह्मपरत्वाद् ब्रह्मशब्दस्य न सिद्धपरत्वमिति भावः ।

ननु कार्ये व्युत्पत्तेरनिराकरणे सिद्धे ब्रह्मणि प्रामाण्यायोगात्तन्निरासकस्यान्यस्या-भावादगत्याऽत्रैवं पूर्वपक्षः कृत इत्यत आह ॥ किंचेति ॥ विंशतिलक्षणमिति ॥ लक्षण-शब्दोध्यायपरः । तस्याः सिद्धे व्युत्पत्तेः । तत्रैव देवमीमांसायामेव ॥ पुनरिति ॥ विशेषहेत्वनुक्तेर्न तदाक्षेपोपि सम्भवति । सूचनं तूभयत्राप्यविशिष्टमेवेति भावः । नन्वतश्शब्दादिनाऽबोधनेपि सिद्धेव्युत्पत्तेर्हेतुत्वमस्त्वित्यत आह ॥ विचारेति ॥ अथशब्दा-दिना सूचितस्येति ॥ मोक्षस्येति शेषः । अथशब्दस्य मुमुक्षानन्तर्यार्थत्वादिति भावः । तत्र विचारकर्तव्यतायाम् । सम्भवे वक्ष्यमाणरीत्येति शेषः ॥ तद्विपरीताया इति ॥ तन्मते अतश्शब्देन कर्मविचारस्यैव ब्रह्मविचारं प्रति हेतुताया उक्तत्वेन सिद्धेव्युत्पत्तेर्हेतुत्व-स्याप्रतिपादनादिति भावः ।

तात्पर्यचन्द्रिका

तदेवं मतान्तरीयमधिकरणमयुक्तमिति हृदि निधाय स्वमतेनाधिकरणमारचयति ॥ तत्रेदमित्यादिना ॥ अध्यायपादसङ्गतिस्त्विति ॥ यद्यप्येतदधिकरणाभावे शास्त्रस्येव तदेकदेशयोरध्यायपादयोरप्यारम्भासम्भवः तथापि सिद्धे शास्त्रारम्भे पुनरध्यायाद्या-रम्भाक्षेपस्यानेनासमाधानाच्छास्त्रेणेव न ताभ्यामौपोद्घातिकी सङ्गतिरित्यर्थः । यद्वा यथा तद्विजिज्ञासस्वेत्यादिब्रह्मविचारविधायकवाक्यार्थनिर्णायकन्यायव्युत्पादकत्वाद्

ब्रह्मविचाररूपेण शास्त्रेणान्तर्भावलक्षणासङ्गतिः न तथाध्यायपादाभ्याम् । समन्वयतद्विशेषाप्रतिपादकत्वादित्यर्थः । यथोक्तम् । सङ्गतिस्तावद्विविधा । अन्तर्भावलक्षणा आनन्तर्यलक्षणाचेति । अत एवोक्तं सुधायां ''अत एवास्य सूत्रस्य न शास्त्रबहिर्भाव'' इति । एतेन प्रथमसूत्रस्य समन्वयाद्यशेषविचारहेतुत्वाच्छास्त्रप्रथमाध्यायप्रथमपादसङ्गतय इति कल्पतरूक्तं निरस्तम् । द्वितीयाध्यायतो व्यावृत्तस्य शास्त्रसङ्गत्यतिरिक्तस्य प्रथमाध्यायादिना सङ्गतिविशेषस्यानुक्तत्वेनाध्यायपादपीठत्वमात्रस्य न्याय्यत्वात् । एतेनैव श्रोतव्यादिवाक्यानां स्वार्थे समन्वयस्य तद्द्वारेण विचार्यमाणवेदान्तवाक्यानामपि ब्रह्मणि समन्वयस्य च निमित्तत्वादाद्यं सूत्रं समन्वयेन सङ्गतमिति विवरणोक्तं निरस्तम् । तत्तद्वाक्यस्य स्वार्थे समन्वयप्रतिपादनमात्रेण समन्वयाध्यायसङ्गतौ तृतीयाध्यायादेरपि समन्वयसङ्गतिप्रसङ्गात् । विचारकर्तव्यताप्रतिपादनेन ब्रह्मणि समन्वयनिमित्तत्वस्येवाविरोधादिनिमित्तत्वस्यापि सत्त्वेन द्वितीयादितो व्यावृत्तस्य प्रथमेन सङ्गतिविशेषस्यासिद्धेश्च । पादसङ्गत्यनुक्तेश्च ।

ननु तथाप्यानन्दमयाधिकरणमारभ्येति कथम् । समन्वयसूत्रे साक्षात्समन्वयोक्तेः ''समन्वयसूत्रेणाध्यायशेषस्य प्रपञ्चप्रपञ्चकभावसङ्गति''रिति सुधाग्रन्थाच्च तत्राध्यायसङ्गतेः सत्त्वात् । ईक्षत्यधिकरणे समन्वयासाधारणहेतुवाच्यत्वसमर्थनेन तस्मिन्नपि तस्याः सत्त्वात् । न चेक्षतौ वचनवृत्त्या जगत्कारणत्वादिना शास्त्रैकजन्यप्रमागोचरत्वरूपशास्त्रयोनित्वे अवाच्यत्वरूपं बाधकमेवोद्भूतं न तु समन्वये हेतुरुक्त इति वाच्यम् । ''तदभावे कुतोन्वय'' इत्यनुव्याख्याने वाच्यत्वस्य समन्वयहेतुत्वेनोक्तत्वादिति । उच्यते । वैदिकशब्दानां ब्रह्मण्युपक्रमादिलिङ्गप्रमाणकः शक्तितात्पर्यलक्षणः सम्बन्धः समन्वयः । स च न समन्वयसूत्रव्युत्पाद्यः । तत्र तत्प्रमाणस्यानुक्तेः । किन्तु व्युत्पादयिष्यमाणः स शास्त्रयोनित्वे हेतुत्वेन सिद्धवदुपन्यस्तः । ईक्षतावबाच्यत्वप्रयुक्तसमन्वयासम्भवाशङ्कैव निरस्ता समन्वयस्तु न व्युत्पादित इति न तयोरध्यायपादाभ्यामन्तर्भावलक्षणा सङ्गतिः । यद्वा आनन्दमयाधिकरणमारभ्य सङ्गतिद्वयम् । ततोर्वाक्समन्वयेक्षत्योः । पादमात्रेण सङ्गत्यभावः । अन्येषु त्वध्यायेनापीति सङ्गत्योरभावः पञ्चाधिकरणीसाधारणः । अत एवाध्यायपादसङ्गतिरिति समुदायैकवचनं प्रयुक्तमिति ॥

प्रकाशिका – ननु टीकाव्याख्यार्थं प्रवृत्तस्यादावेव किं परमतनिरासेनेत्यतस्तदुपयोगं दर्शयंष्टीकामवतारयति ॥ तदेवमित्यादिना ॥ आदिसूत्रस्येति पदं हित्वा इदंशब्दप्रतीकग्रहणं तु मतान्तरीयाधिकरणमयुक्तमिति ग्रन्थकर्तुर्हृदयमिति ज्ञापनाय । अस्य सूत्रस्य समन्वयाद्यशेषविचारहेतुत्वात्कथमध्यायाद्यसङ्गतिरित्याक्षिप्य सङ्गतिशब्दस्यार्थद्वयमभिप्रेत्य समाधत्ते ॥ यद्यपीत्यादिना ॥ औपोद्धातिकीति ॥ अनेन टीकायां शास्त्रसङ्गतिरित्यस्य शास्त्रेणैवौपोद्धातिकीत्यर्थ उक्तः । ननु विचारकर्तव्यतासमर्थनेन शास्त्रारम्भसिद्धावपि समन्वयाध्यायो नारम्भणीय इति शङ्कायाः जीवभेदकगुणपूर्तिवाचिब्रह्मशब्देन समाधानमस्ति । अन्यथा गुणपूर्त्यर्थकसमन्वयानारम्भःस्यात् । तथाच कथमध्यायासङ्गतिरिति चेन्न । तथासत्युक्तरीत्याऽविरोधाध्यायारम्भप्रयोजकत्वस्यापि सत्त्वेन ततो व्यावृत्तस्याद्याध्यायेन सङ्गत्यन्तरस्याभावात् पादचतुष्टयद्वारैवाध्यायचतुष्टयारम्भप्रयोजकत्वेन तदात्मकशास्त्रारम्भप्रयोजकत्वादस्य च न शास्त्रसङ्गत्यतिरिक्ताध्यायसङ्गतिरस्तीति सुधानुसारेण सङ्गतिपदमन्यथा व्याचष्टे ॥ यद्वेति ॥ न्यायेति ॥ अधिकारिप्रयोजनविषयसत्त्वरूपन्यायव्युत्पादकत्वादित्यर्थः ॥ यथोक्तमिति ॥ सुधायामाद्यस्य तृतीये पादे उक्तमित्यर्थः । अत्रान्तर्भावसङ्गतिष्टीकाभिमतेत्यत्रोपष्टम्भकमाह ॥ अतएवोक्तमिति ॥ अत एवास्येति ॥ जिज्ञासाविधायकवाक्यार्थनिर्णायकन्यायव्युत्पादकत्वादेवेत्यर्थः । टीकास्थतुशब्दसूचितं परमतदूषणं व्यनक्ति ॥ एतेनेति ॥ औपोद्धातिकी सङ्गतिर्नेत्यर्थकथनेनेत्यर्थः । एतच्छब्दार्थं व्यनक्ति । द्वितीयाध्यायत इति ॥ एतेनैवेति ॥ औपोद्धातिकी अन्तर्भावलक्षणा वा सङ्गतिर्नेत्यर्थकथनेनेत्यर्थः ॥ स्वार्थ इति ॥ श्रोतव्यादिवाक्यस्य ब्रह्मज्ञानाय वेदान्तविचारः कर्तव्य इति विचारकर्तव्यतारूपस्वार्थप्रतिपादकत्वरूपसमन्वयस्येत्यर्थः । स्वार्थे समन्वयेन समन्वयाध्यायसङ्गतिरिति पक्षमतिप्रसङ्गेन दूषयित्वा ब्रह्मणि वेदान्तसमन्वयस्य निमित्तत्वादितीममंशमपि दूषयति ॥ विचारेति ॥ एवमपि पादसङ्गतिर्नोक्तेत्याह ॥ पादेति ॥ आद्याधिकरणस्याध्यायाद्यसङ्गतिमङ्गीकृत्यानन्दमयाधिकरणमारभ्येत्येतत्सुधाविरुद्धमिति भावेनाक्षिपति ॥ नन्विति ॥ तत्रेति ॥ समन्वयाधिकरणेऽध्यायान्तर्भावरूपसङ्गतेः सत्त्वादित्यर्थः । नन्वीक्षत्यधिकरणे ब्रह्मणोऽवाच्यत्वात्कथं तत्र शास्त्रयोनित्वमिति चोद्यमेव निरस्तम् । अत एव सूत्रे अशब्दमवाच्यं नेत्येवोक्तमित्याशङ्क्य निरस्यति ॥ न चेति ॥ कारणत्वादिनेति प्रकारे तृतीया । अनेन प्रकारेण शास्त्रजन्यप्रमागोचरत्वेत्यर्थः ॥ तदभाव इति ॥ शब्दगोचरत्वाभाव इत्यर्थः ॥ शास्त्रयोनित्व इति ॥ शास्त्रजन्यप्रमाविषयत्वे साध्ये

समन्वयादित्यनेनोपक्रमादिप्रमाणकशक्तितात्पर्यलक्षणसम्बन्धादिति सिद्धवदुपन्यस्त इत्यर्थः । इदं तु सुधोक्तं सूत्रार्थमभिप्रेत्येति ध्येयम् । प्रपञ्चप्रपञ्चकभावकथनसुधावाक्यं तु हेतुविवरणाभिप्रायमिति भावः ॥ असम्भवाशङ्केति ॥ वाच्यत्वं समन्वयसम्भावकमेवोक्तम् । न तूपक्रमादिभिः स व्युत्पादितः । नापि तत्रोपक्रमादिहेतुर्निरूपितः । तदभावे कुतोन्वय इत्यनुव्याख्यानं तु कुतोन्वयसम्भावनेत्येवंपरम् । अत एवेक्षतौ पूर्वपक्षटीकायां ''तच्च वाच्यत्व एव सम्भवती''ति सम्भवशब्दप्रयोग इति भावः । यद्यप्यध्यायसङ्गतिरेव पूर्वपक्षिता तथापि यथा न पादेन सङ्गतिस्तथाध्यायेनापीति दृष्टान्ततयाऽध्यायपादाभ्यामिति तदुक्तिः । उत्तरप्रस्थानानुरोधात्परिहारान्तरमाह ॥ यद्वेति ॥ पञ्चाधिकरणीति ॥ ''द्विगो''रिति ङीप् । उक्तार्थे टीकासंमतिमाह ॥ अत एवेति ॥ यतो द्वैरूप्यं पञ्चस्वधिकरणेष्वत एवेत्यर्थः । यद्यध्यायपादसङ्गती इति द्विवचनप्रयोगः स्यात्तदा पञ्चस्वधिकरणेषु ते न स्त इति धीस्स्यात् । सङ्गतिरित्युक्तौ तु ततोर्वाक् त्रिषूभयसङ्गत्यभावः द्वयोः पादमात्रसङ्गत्यभाव इति ज्ञातुं शक्यत इति सङ्गतिद्वयसमुदायाभिप्रायेणैकवचनं प्रयुक्तमित्यर्थः ।

पाण्डुरङ्गि – टीकाव्याख्यानं प्रतिज्ञाय परमतखण्डनं कथं नासङ्गतमित्यतस्तस्योपयोगमाह ॥ तदेवमिति ॥ हृदि निधायेति ॥ अन्यथा सङ्गत्यादीत्येव वक्तव्यतया इदं सङ्गत्यादीति न ब्रूयादिति भावः ॥ तथापि सिद्धे शास्त्रारम्भ इत्यादि ॥ अत्र ब्रह्मजिज्ञासायाः कर्तव्यतासमर्थनादस्ति शास्त्रादिसङ्गतिरिति पूर्वटीकास्थेन ब्रह्मजिज्ञासाशब्देनोक्तस्य विचारस्याकारद्वयमस्ति प्रारिप्सितशास्त्रे वर्तिष्यमाणत्वेन विचारकर्तव्यतासाधकाद्यसूत्रसापेक्षत्वं तद्विजिज्ञासस्वेति ब्रह्मविचारविधायकवाक्यार्थनिर्णायकतया ब्रह्मविचारत्वं चेति । अत्राद्याकारविवक्षायां टीकास्थः सङ्गतिशब्द उपोद्घातपरः। ''अन्यथा शास्त्रस्यानारम्भणीयत्वप्रसङ्गा''दिति टीकाप्युपोद्घातोपपादिका । द्वितीयाकारविवक्षायां तु सङ्गतिशब्दोऽन्तर्भावपरः । अन्यथेत्यादिटीकाप्यधिकरणप्रयोजनोक्तिपरा । तत्राद्यपक्षविवक्षया शास्त्रेणेव न ताभ्यामौपोद्घातिकी सङ्गतिरित्युक्तम् । द्वितीयपक्षविवक्षया तु यथा शास्त्रेणान्तर्भावलक्षणा सङ्गतिर्न तथाध्यायपादाभ्यामित्युक्तमिति ध्येयम् ॥ यथोक्तमिति ॥ आद्यस्य तृतीये ''अधिकारश्च तद्धानि''रित्येतद्व्याख्यानावसरे सुधायामुक्तमित्यर्थः ॥ आनन्तर्यलक्षणाचेतीति ॥ उपोद्घातादिकं तु तद्विशेष इति भावः । अन्तर्भावसङ्गतेष्टीकाभिमतत्वे उपष्टम्भकमाह ॥ अत एवेति ॥ अत एवास्येति ॥ तद्विजिज्ञासस्वेति ब्रह्मविचारविधायकवाक्यार्थनिर्णायकतया ब्रह्मविचाररूपत्वादेवेत्यर्थः । टीकास्थतुशब्दसूचितं

परमतदूषणं प्रकटयति ॥ एतेनेति ॥ औपोद्घातिकी सङ्गतिर्नेत्यर्थकथनेनेत्यर्थः । एतेनेत्युक्तं व्यनक्ति ॥ द्वितीयाध्याय इति ॥ शास्त्रसङ्गत्यतिरिक्तस्येति ॥ शास्त्रसङ्गतिरूपैवेयमध्यायादिसङ्गतिः । न तु विशेषाकारेणेयमध्यायादिसङ्गतिरिति भावः । यद्वेति व्याख्यानं विवरणमतनिरासार्थमित्यभिप्रेत्य तदनूद्य दूषयति ॥ एतेनैवेति ॥ स्वार्थ इति ॥ श्रोतव्यादिवाक्यानां ब्रह्मज्ञानाय वेदान्तविचारकर्तव्यतारूपार्थप्रतिपादकत्वरूपसमन्वयस्येत्यर्थः । श्रोतव्यादिवाक्यानां स्वार्थे समन्वयेन समन्वयाध्यायसङ्गतिपक्षं तावन्निराकरोति ॥ तत्तद्वाक्यस्येति ॥ ब्रह्मणि वेदान्तसमन्वयस्य निमित्तत्वादित्युक्तमप्यंशं निरस्यति ॥ विचारेति ॥ अविरोधादिनिमित्तत्वस्यापीति । विचारकर्तव्यताया असमर्थने अविरोधाध्यायस्याप्यप्रवृत्तेरिति भावः । ननु मास्तु द्वितीयादिव्यावृत्तसङ्गतिलाभः । तत्साधारण्येनैव प्रथमाध्यायसङ्गतिरस्त्वित्यत आह ॥ पादेति ॥ तथा सत्यविशेषात्कल्पतरुवत्पादसङ्गतेरपि वक्तव्यतया तामनभिधायास्या एव विशेषतो वचने कारणाभावाद्द्वितीयादिव्यावृत्तसङ्गत्यभिप्राये वाच्ये उक्तदोषतादवस्थ्यमिति भावः । ''अध्यायपादसङ्गतिस्त्वानन्दमयाधिकरणमारभ्यैव गवेषणीये''त्यानन्दमयाधिकरणप्राक्तनानामधिकरणानामध्यायाद्यसङ्गतिवर्णनं सुधाविरुद्धत्वादनुपपन्नमित्याक्षिपति ॥ नन्विति ॥ तत्रेति ॥ समन्वयसूत्र इत्यर्थः ॥ तस्या इति ॥ अध्यायान्तर्भावरूपसङ्गतेरित्यर्थः ॥ बाधकमेवोद्धृतमिति ॥ सूत्रे अशब्दं नेत्युक्तत्वात् । अन्यथा वाच्यमित्यवक्ष्यदिति भावः । तदभावे शब्दगोचरत्वाभावे । तत्र समन्वयसूत्रे । तत्प्रमाणस्य उपक्रमादिरूपस्य शक्तितात्पर्यलक्षणसम्बन्धप्रमाणस्य । किंत्वित्यस्य हेतुत्वेनोपन्यस्त इत्युत्तरेण सम्बन्धः । कथमसिद्धस्य हेतुत्वेनोपन्यास इत्यतोऽसिद्धस्यापि सिद्धत्वविवक्षयेति भावेनोक्तं सिद्धवदिति । अव्युत्पादितस्य कथं सिद्धत्वविवक्षापि येन तद्विवक्षया हेतुत्वेनोपन्यासः सङ्गच्छेतेत्यतो न व्युत्पादितत्वमेव तद्विवक्षायां प्रयोजकं किं नाम व्युत्पादयिष्यमाणत्वमपि । तदिह समन्वयस्य प्रागव्युत्पादितत्वेपि व्युत्पादयिष्यमाणत्वात्तत्प्रयुक्तसिद्धत्वविवक्षाया अप्रत्यूहत्वाद्युक्तस्तद्विवक्षया हेतुत्वेनोपन्यास इत्याशयेनोक्तं ॥ व्युत्पादयिष्यमाण इति ॥ सुधाकारैरुक्तः प्रपञ्चप्रपञ्चकभावोपि समन्वयसूत्रे हेतुत्वेनोपन्यस्तसमन्वयविवरणाभिप्रायको द्रष्टव्यः ॥ असम्भवाशङ्केति ॥ वाच्यत्वं समन्वयसम्भावकतयैवोक्तम् । न तु हेतुत्वेन । तदभावे कुतोन्वय इत्यनुव्याख्यानं तु कुतोन्वयसम्भावनेत्येवंपरतया योज्यम् । अत एव पूर्वपक्षटीकायां तद्वाच्यत्व एव सम्भवतीति सम्भवशब्दप्रयोग इति ध्येयम् । ननु ईक्षत्यधिकरणेनान्तर्भावलक्षणसङ्गत्यभावेपि समन्वयहेतुभूतवाच्यत्व-

धकत्वादौपोद्घातिकीसङ्गतिरस्त्येवेति सङ्गतिमात्रनिषेधिका टीकानुपपन्नेत्यरुच्याह ॥ यद्वेति यद्वा ननु समन्वये साधकानां बाधकाभावानां चाग्रे वचनादत्र च तदभावात्पाद-शेषानन्तर्भावेपि समन्वयसूत्रे साक्षात्समन्वयोपयोगितत्प्रतिज्ञायाः कृतत्वात् ईक्षत्यधिकरणे साक्षात्साधकवत्तत्सिद्ध्युपयोगिबाधकोद्धारस्य कृतत्वात्समन्वयाध्यायान्तर्भावो वक्तव्य न। न च प्रतिज्ञाबाधकोद्धारयोर्वक्ष्यमाणसाधकयुक्तिसापेक्षत्वेन तदनपेक्षसाधकत्वाभावान्न मन्वयसाधकान्तर्भाव इति वाच्यम् । तथा सति एतत्प्रतिज्ञाबाधकोद्धारानुपजीवनेन क्ष्यमाणहेतूनामपि समन्वयासाधकत्वेनोत्तरसूत्रसन्दर्भस्यापि तत्रानन्तर्भावापातादित्यरुचेराह यद्वेति ॥ पञ्चाधिकरणीति ॥ द्विगोरित्यनेन ङीपि यस्येतिचेत्यकारलोपे पञ्चाधिकरणी ब्दनिष्पत्तिरिति भावः । उक्तार्थस्य टीकाकृत्संमततां दर्शयति ॥ अत एवेति ॥ स्ततोर्वाक्तनाधिकरणपञ्चके समन्वयेक्षत्योः पादमात्रेण सङ्गत्यभावोऽन्येषु त्रिष्वध्याये-पीति वैरूप्यं अत एवेत्यर्थः ॥ समुदायैकवचनमिति ॥ अन्यथा नाधिकरणश्रुतिसङ्गती तेवदध्यायपादसङ्गती इति द्विवचनमेव ब्रूयादिति भावः ।

तात्पर्यचन्द्रिका

अध्यायपादपीठत्वादिति पञ्चाधिकरण्याः समन्वयविशेषाप्रतिपादकत्वादध्या-द्यन्तर्भावासम्भवेपि विचारकर्तव्यतायाः प्रथमं प्रतिपाद्यत्वाद्वक्ष्यमाणक्रमेण तुरधिकरण्या बद्धक्रमत्वात्तदनन्तरमेव समन्वये आकाङ्क्षोदयात्तदाकाङ्क्षोत्थापकतया मन्वयाध्यायस्य तदादिनामपादस्य चादौ निवेशो युक्त इत्यर्थः ॥ नाधिकरण-तिसङ्गती इति ॥ पूर्वाधिकरणतद्विषयवाक्याभ्यां सङ्गती नेत्यर्थः । एतेनाध्ययन-धिना सामान्यतः प्रयोजनवदर्थावबोधपरतां नीतैर्विशेषतश्च सन्दिह्यमानैर्वेदान्तै-चाराकाङ्क्षैराक्षेपादस्याधिकरणस्य श्रुतिसङ्गतिरिति कल्पतरूक्तं निरस्तम् । तिमूलत्वातिरिक्तायाः श्रुतिसङ्गतेरनुक्तत्वादिति ।

सन्देहबीजपूर्वस्य टीकादावेव कीर्तनात् ।
अस्माभिः पूर्वपक्षश्च सिद्धान्तश्च विविच्यते ॥
उपन्यासमुखेनैव टीकार्थोपि निरूप्यते ।
पूर्वपक्षादिमेयानामविक्षिप्तत्वसिद्धये ॥

प्रकाशिका – ननु पीठत्वं नामाधारत्वम् । न हि पञ्चाधिकरण्या अध्यायपादाधारतास्तीत्यतः पीठवत्पीठमिति भावेन तदुपपादयति ॥ पञ्चाधिकरण्या इति ॥ यद्वा पञ्चाधिकरण्या अध्यायाद्यनन्तर्भावे तदादौ निवेशो न युक्त इत्याशङ्कानिरासाय प्रवृत्तोयं ग्रन्थ इत्यभिप्रेत्य व्याचष्टे ॥ पञ्चाधिकरण्या इति ॥ वक्ष्यमाणेति ॥ प्रत्यधिकरणं वक्ष्यमाणरीत्या ईक्षत्यधिकरणस्यादिभागे वक्ष्यमाणरीत्या वा युक्तक्रमत्वादित्यर्थः । उत्तराधिकरणेन तयोः सत्त्वात्कथं नस्त इत्यत आह ॥ पूर्वेति ॥ एतस्य स्पष्टत्वाट्टीकायामेतदुक्तिरयुक्तेत्याशङ्क्य परमतप्रतिक्षेपस्तत्फलमिति भावेनाह ॥ एतेनेति ॥ सङ्गत्यभावकथनेनेत्यर्थः । स्वाध्यायोऽध्येतव्य इत्यस्य दृष्टार्थत्वेन स्वाध्यायाध्ययनेन फलवदर्थावबोधं भावयेदित्यर्थस्य पूर्वतन्त्रे निर्णीतत्वेन वेदान्तानामपि स्वाध्यायशब्दवाच्यत्वेन वेदान्ताध्ययनेन फलवदर्थावबोधं भावयेदित्यर्थपर्यवसनादर्थज्ञानं च विना विचारं न सम्भवतीति विचाराक्षेपादित्यर्थः ॥ विशेषत इति ॥ कीदृशार्थावबोधः सम्पाद्य इति सन्दिह्यमानैरित्यर्थः । शिष्यमनस्समाधानायाधिकरणरचनाप्रकारमाह ॥ सन्देहेति ॥ सन्देहस्य यद्बीजं कारणं तदेव पूर्वं यस्य तस्येत्यर्थः । शास्त्रादिसङ्गतिफलादिः पूर्वशब्दार्थः । आदिपदाद्भाष्ये । ननु व्याख्यार्थं प्रवृत्तस्य किमनेनेत्यत आह ॥ उपन्यासेति ॥ तत्र हेतुमाह ॥ पूर्वपक्षेति ॥

पाण्डुरङ्गि – नन्वध्यायाद्यनाधारत्वात् पञ्चाधिकरण्याः कथमध्यायादिपीठत्वमित्यतः पीठवत्पीठमिति गौणीमाश्रित्य तदुपपादयति ॥ पञ्चाधिकरण्या इति ॥ उत्तराधिकरणसङ्गतेः सत्त्वात्कथं तन्निषेध इत्यत आह ॥ पूर्वाधिकरणेति ॥ श्रुतिमूलत्वातिरिक्तेति ॥ इह टीकायां पूर्वाधिकरणतद्विषयवाक्यसङ्गत्यभावस्यैवोक्तत्वेन तत्रास्याप्रतिपक्षत्वादिति भावः । अधिकरणाङ्गतया पूर्वपक्षसिद्धान्तयोरिवावश्यं विवेचनीयस्य विषयादेरविवेचनेन प्रसक्तां न्यूनत्वशङ्कां तन्निमित्तोत्त्या परिहरन्नेव पूर्वपक्षादिविवेचनं प्रतिजानीते ॥ सन्देहेति ॥ पूर्वशब्देन विषयादिपरिग्रहः । विषयादेरित्यनुक्त्वा सन्देहबीजपूर्वस्येतिवचनं विषयादिपञ्चकान्तर्गतं सन्देहबीजमेव न प्रयोजनम् । तस्याधिकरणफलत्वेन तदवयवत्वाभावादिति ज्ञापनार्थम् । यत्तु न्यायामृते अखण्डार्थत्वभङ्गे परमते विषयादिपञ्चकाभावादितिप्रतिज्ञातविषयाद्यभावोपपादनावसरे अत्रापि च समन्वयाधिकरणे परमतनिरासावसरे प्रयोजनाभावप्रतिपादनं तत्तु प्रयोजनस्वविषयादिपञ्चकान्तर्भाव इत्येकदेशिमतमाश्रित्य कृतम् । अत एव तन्त्रचूडामण्यादिषु उक्तरूपमेकदेशिमतं प्रयोजनस्याधिकरणफलतया तदङ्गत्वाभावादिति

युक्त्या प्रदूष्य सन्देहबीजं पञ्चकान्तर्गतमिति मुख्यं मतमुपन्यस्तमिति द्रष्टव्यम् । टीकादावित्यादिपदेन भाष्यपरिग्रहः । उपन्यासमुखेनैव टीकार्थस्य कथने हेतुमाह ॥ पूर्वपक्षेति ॥ एवं टीकोक्ता सङ्गतिः समर्थिता ।

तात्पर्यचन्द्रिका

अत्र वेदार्थनिर्णायकन्यायग्रथनात्मकमिदं शास्त्रमनारम्भणीयमुतारम्भणीयमिति चिन्ता । तदर्थं न्यायानुसन्धानरूपविचारो न कर्तव्य उत कर्तव्य इति । तदर्थं विचार विधेर्विषयादिकं न सम्भवत्युत सम्भवतीति । तदर्थं विषयभूतं ब्रह्म किं प्रत्यगर्थभूतजीव एव उत तदन्यदिति । यदि ब्रह्म प्रत्यगर्थ एव तदा तस्य निश्चितत्वेन विषयाद्यसम्भवाच्छास्त्रमनारम्भणीयमिति पूर्वपक्षे फलफलिभावः । यदि तु ब्रह्म प्रत्यगर्थादन्यत्तदा प्रत्यगर्थस्य जीवस्य निश्चितत्वेपि ब्रह्मणो विषयत्वसम्भवाच्छास्त्रमारम्भणीयमिति सिद्धान्ते फलफलिभावः । एवमुत्तरत्रापि फलफलिभाव ऊह्यः । यत्रत्वस्पष्टस्तत्र वक्ष्यते ।

प्रकाशिका – अत्रेति ॥ एतदधिकरण इत्यर्थः । शास्त्रमित्यन्तं विषयः । अत्र सर्वत्र पूर्वोक्ता पूर्वपक्षकोटिः । पश्चात्तनी सिद्धान्तकोटिरित्यवसेयम् । यद्यपि टीकायां जिज्ञासाविषय इत्येवोक्तं न तु शास्त्रमिति तथापि सुधायां किमिदमारम्भणीयं न वेति शास्त्रं विषयतया स्वीकृत्य तादर्थ्येन जिज्ञासा कर्तव्या नवेत्युक्तत्वाट्टीकायामपि प्रारिप्सिततया चित्तसङ्गतशास्त्रे प्रवर्तनीयेत्यनेन प्रथमतः शास्त्र एव कर्तव्यत्वादिकोटिकसन्देहस्य सूचितत्वात् पूर्वपक्षोपसंहारे चातो न ब्रह्मजिज्ञासा कर्तव्येति नैतच्छास्त्रमारम्भणीयमिति जिज्ञासाया अकर्तव्यत्वस्य शास्त्रानारम्भहेतुत्वोक्त्या शास्त्रानारम्भोपसंहाराच्चैवमुक्तम् । जिज्ञासायाः साक्षाद्विषयत्वोक्तिस्तुटीकायां सूत्रे तस्या एव प्राधान्येनोपादानात् । सूत्रे च श्रुत्यनुसारात्सैवोपात्ता भाष्ये च तस्या एव कर्तव्यत्वसमर्थनाच्चेति । इदं प्रारिप्सिततया चित्तसङ्गतम् । वेदार्थेत्यादि तु वक्ष्यमाणनिर्विषयत्वरूपहेतुविशदीकरणायेति ध्येयम् । पूर्वपक्षादिप्रमेयस्य निष्कृष्टतया हृद्यारोहाय तदर्थचिन्ता आह ॥ तदर्थमिति ॥ यद्यप्ययं सन्देहो न ग्रन्थकर्तुः । सर्वज्ञत्वात्तस्य । नापि परस्य । शास्त्रस्यैवानाकलनात् । तथापि शास्त्रनिर्वृत्त्यनन्तरं तदृष्ट्वा परः सन्दिहीतेति तदीयसन्देहप्रदर्शनमेतदिति सुधायामेवोक्तम् । विचारविधेः

तद्विजिज्ञासस्वेत्यादिविधेरित्यर्थः । विषयादीत्यादिपदेन फलाधिकारसम्बन्धा ग्राह्याः ॥ विषयभूतं ब्रह्मेति ॥ विचारविधौ ब्रह्मपदश्रवणान्निर्धारणोक्तिः । पूर्वपूर्वकोटिद्वयं प्रत्युत्तरोत्तरकोटिद्वयस्य हेतुत्वमाह ॥ यदीति ॥ ननु तदर्थं विषयभूतं ब्रह्मेत्यत्र तदर्थं प्रयोजनभूतो मोक्षश्च किं कर्मसाध्य उत ज्ञानसाध्यः । यदि कर्मसाध्यस्तदा ज्ञानहेतुविचारो न कर्तव्यः । यदि ज्ञानसाध्यस्तदा विचारः कर्तव्य इति सापि कुतो नोपदर्शितेति चेत् विषयचिन्तोत्तरैव सोक्तप्रायेति वा स्पष्टत्वाद्वा विद्यैव त्वित्यादावग्रे तद्विचारस्य सेत्स्यमानत्वाद्वा सा नोक्ता । यद्वा यथा कर्मसाध्यत्वे विचारो व्यर्थः तथा ज्ञानसाध्यत्वेपि वक्ष्यमाणरीत्या ज्ञाने सत्यपि तदभावात्सा नोक्तेति । वस्तुतस्तु ब्रह्मपदव्यावर्त्यपूर्वपक्षेऽतःपदव्यावृत्त्यौपयिकत्वात्सा न वाच्यैवेति ।

पाण्डुरङ्गि – अधुना नैतच्छास्त्रमारम्भणीयमिति पूर्वपक्षोपसंहारटीकासूचितां सुधायां किमिदं शास्त्रमारम्भणीयं न वेति कण्ठोक्तां मूलचिन्तामाह ॥ अत्राधिकरणे वेदार्थनिर्णायकेत्यादि ॥ वेदत्वोपहितः सर्वोपीह विचार्यः । न तु परमत इवोपनिषद्भाग एवेति भावेन वेदार्थेत्युक्तम् । यद्यप्ययं संशयो न परस्य भवितुं युक्तः परेण शास्त्रस्याद्याप्यनुपलब्धेः। अनुपलब्धे च धर्मिणि संशयानुदयात् । नापि सूत्रकर्तुः । तस्य विशेषनिर्णयात् । अन्यथा निर्णायकसूत्रप्रणयनानुपपत्तेः । तथापि शास्त्रनिष्पत्त्यनन्तरं यदीदं शास्त्रं परेणोपलभ्येत तदा विशेषस्मृतिमता एवं सन्दिह्येतेति सूत्रकर्तुरेव स्वस्मिन्परकीयसंशयाहरणोपपत्तेरित्यन्यत्र विस्तरः । उपक्रमे टीकोक्ता तु तदर्थचिन्तेत्याह ॥ तदर्थमिति ॥ सन्देहटीकास्थो जिज्ञासाशब्दो भामतीमत इव नेच्छापरः । किन्तु विचारपर इति दर्शयितुं विचारपदम् । विचारोपि विवरणमत इव न श्रवणं किन्तु मननमित्याशयेनोक्तः ॥ न्यायानुसन्धानरूपेति ॥ टीकायां पूर्वं निर्दिष्टत्वात्कर्तव्यत्वं पूर्वपक्ष इति मन्दाशङ्कां निरस्यति ॥ न कर्तव्य उत कर्तव्य इति ॥

तात्पर्यचन्द्रिका

पूर्वपक्षस्तु । न शास्त्रमारम्भणीयम् । न्यायानुसन्धानात्मकविचाररूपजिज्ञासाया एवाकर्तव्यत्वात् । तदकर्तव्यत्वं च निर्विषयत्वादिहेतुभ्यः । तत्र तावद्विषयत्वेनाभिमतं ब्रह्म न जीवचैतन्याद्भिन्नं मानाभावात् । कर्मकाण्डस्य कर्मपरत्वात् ।

(तात्पर्यचन्द्रिका)

वेदान्तैश्चोपक्रमादिभिरद्वैतिरीत्याऽखण्डप्रत्यगात्ममात्रप्रत्यायनात् । तस्य चाहमिति स्वप्रकाशतया भासमानत्वात् । अन्यस्य च सत्यस्याभावात् । आत्मनश्चास्व-प्रकाशत्वे तत्प्रकाशः किं तार्किकरीत्या मानसानुभवेन किं वा प्राभाकररीत्या स्वप्रकाशसंविदाश्रयतया । नाद्यः । तस्यापि परप्रकाश्यत्वेनानवस्थानात् । कस्यचिदनुभवस्य स्वप्रकाशत्वे च लाघवादात्मन एव तदस्तु । न च ज्ञानं जिज्ञासितग्राह्यम् । जिज्ञासा च न सर्वत्रेति नानवस्थेति वाच्यम् । ज्ञानस्य सुखदुःखादिवज्जिज्ञासाभावेऽप्यनुभवात् । अन्यथा जिज्ञासायाः ज्ञानाख्यधर्मि-ज्ञानसाध्यत्वानुभवादनवस्था स्यात् । न च जिज्ञासा न ज्ञानधर्मिका किन्तु अहं ज्ञानी न वा घटो ज्ञातो नवेत्यात्मादिधर्मिकैवेति वाच्यम् । तादृशजिज्ञासाया अननुभवात् । ननु न ज्ञानमात्रमजिज्ञासितग्राह्यं येनानवस्था नापि जिज्ञासितग्राह्यं येनानुभवविरोधः । किन्तु किञ्चिज्ज्ञानं कदापि न ज्ञायत एवेति न कोपि दोष इति चेन्न । कदाप्यज्ञायमानज्ञानस्यासत्त्वापातात् । न द्वितीयः । सुषुप्तावात्मातिरि-क्तज्ञानाभावादात्मानुभवाभावेनैतावन्तं कालं सुखं सुप्तोस्मीत्यौत्तरिकानुस्मृत्यनुप-पत्तेः । किं चात्मन औत्तरिकानुस्मृत्यन्यथानुपपत्त्या संविद्रूपत्वान्न संविदाश्रयत्वम् ।

प्रकाशिका – पूर्वपूर्वस्योत्तरोत्तरफलत्वं व्यञ्जयन्पूर्वपक्षटीकां विवरितुमाह ॥ पूर्वपक्षस्त्विति ॥ निर्विषयत्वादीति ॥ विषयप्रयोजनाधिकारिसम्बन्धशून्यत्वरूपेभ्यष्टीकोक्ते-भ्यश्चतुर्भ्यो हेतुभ्य इत्यर्थः । तत्राद्यहेतुमुपपादयितुं विषयभूतं ब्रह्म जीवाद्भिन्नमभिन्नं वेति विकल्पौ हृदि कृत्वाद्यं निरस्यति ॥ तत्रेति ॥ मानाभावमुपपादयितुं प्रत्यक्षानुमानयोस्त-त्राप्रवृत्तेः प्रवर्तमानो वेदश्च कर्मकाण्डो ब्रह्मकाड इति द्विविध इति हृदि निधायाद्यं निराह ॥ कर्मकाण्डस्येति ॥ द्वितीयेत्वाह ॥ वेदान्तैरिति ॥ अद्वैतिरीत्येति प्रतिपादनाक्लेशायोक्तम् । अनेन ''प्रमाणाभावेने''त्यादि टीका विवृता । यद्यप्यत्र कृत्स्नस्यापि वेदस्य कार्यपरत्वान्न जीवातिरिक्तब्रह्मणि मानमित्यपि वक्तुं शक्यम् । सुधायां तथैवोक्तेः । तथापि सौत्रब्रह्मपदेन जीवभेदकपरेण व्यावर्त्यपूर्वपक्षस्यावश्यकतयैवमुक्तम् । सुधायां तथाप्रवृत्तेर्गतिर्वक्ष्यते । ननूपक्रमादिभिर्वेदान्तानामखण्डप्रत्यगात्मपरत्वसमर्थनपरस्य कस्यचिच्छास्त्रस्यानङ्गीकारे तत्सिद्धिरेव न स्यात् । तदङ्गीकारे तु तादृशं शास्त्रमङ्गीकृत्य विषयाभावेन पुनस्तस्या-नारम्भणीयत्वेन पूर्वपक्षो व्याहत इति चेत् मैवं तादृशशास्त्रानङ्गीकारेपि

वेदान्तानामुपक्रमादिभिर्वस्तुत आपाततो जातां जीवचैतन्यमात्रपरत्वप्रतीतिमुपेत्य पूर्वपक्षसम्भवेन व्याघाताप्रसक्तेः । जीवस्य चेत्यादेरर्थस्तस्य चेति ॥ प्रत्यगात्मन इत्यर्थः तथाचासन्दिग्धत्वान्न शास्त्रवेद्यतेति भावः । एतेनाभिन्नमिति द्वितीयो निरस्तः । ननु तस्य भानेपि ततोन्यदेव जडं वेद्यं स्यादित्यत आह ॥ अन्यस्य चेति ॥ अन्यथा शास्त्रस्यातत्त्वावेदकत्वेनाप्रामाण्यं स्यादिति भावः। यत्त्वहमित्यात्मनि भासमानेपि वेदान्तवेद्यं शुद्धं न भातीति मूर्खप्रलपनं तन्न । अहंप्रत्यये शुद्धो न भातीति कोर्थ इत्यादिना भामतीमतनिरासप्रस्तावएवास्य निरासात् । यदपि स्वप्रकाशस्याप्यविद्यावशान्न भानमिति यच्च स्वप्रकाशत्वात्स्फुरतीत्यादिचोद्यं तदपि तत्रोक्तरीत्यैव निरसनीयम् । अत एवास्य पूर्वं प्रपञ्चः । एतेनाक्षस्य बलवत्त्वात्तद्बाधिता वेदान्ता नाखण्डचैतन्यं वेदयितुमलमिति निरस्तम् । अद्वैतिमते तदभावात्तदाच्छादनेनापि पूर्वपक्षसम्भवाच्च । अत एव तत्सिद्धप्रामाण्याच्छादनेन पूर्वपक्षोग्रे स्फुटः । अत्र यद्यहंधीविरुद्धं शुद्धं प्रत्यगात्मानं बोधयेयुर्वेदान्तास्तर्हि बाधितार्था न विचार्या इत्यपि पूर्वपक्षयितुं शक्यम् । अत एव सुधायां ''नन्वहं कर्ता भोक्ता दोषसंसर्गीचाहंप्रत्यये प्रकाशते तद्विपरीतस्तु श्रुतिप्रतिपादितः प्रतिपत्तव्योऽतो जिज्ञासेति चेदेवं तर्हि जरद्गवादिवाक्यवत्पावकशैत्यानुमानवच्च प्रतीतिविरोधेन श्रुतिजिज्ञासयोराभासतापात'' इत्युक्तम् । तथाच बाधितार्थत्वेन निर्विषयत्वं सूपपादम् । शुद्धो न भातीति कोर्थ इत्याद्यनुसन्धानेनासन्दिग्धत्वोपपादनक्लेशोऽपि नास्ति । अक्षप्राबल्यं चानुकूलितं भवति । तथाप्यद्वैतिरीत्या प्रवृत्तन्यायविवरणानुसारिटीकानुसारेणैवमुक्तम् । सुधायास्तु कथमपि न विचार आरम्भणीय इत्यभिप्रायः । ''नचात्मनः स्वप्रकाशत्वे विवदितव्य''मित्यादिटीकां विवृणोति ॥ आत्मनश्चेति ॥ तार्किकेति ॥ अनेन ''नचायं मानस'' इत्यादिस्तार्किकमतनिरासपर इत्युक्तं भवति । प्राभाकरेत्येतत् न च स्वप्रकाशसंविदाश्रयतयेत्यस्य विवरणम् । तस्यापीत्यादेरर्थस्तस्यापीति । ज्ञानान्तरान्वेषणेनेति शेषः । कस्यचिदित्यादेर्युक्तिं वदन्नर्थमाह ॥ कस्यचिदिति ॥ जिज्ञासायामेवेति शङ्काग्रन्थं विवृणोति ॥ न चेति ॥ नसर्वत्रेति ॥ धर्मिज्ञानाद्यभावादिनेति भावः । अनुभवविरोधादिति हेतुवाक्यं विवृणोति ॥ ज्ञानस्येति ॥ घटज्ञानानन्तरं घटज्ञानं ज्ञास्यामीतीच्छाया अभावेपि घटमहं जानामीत्यनुभवादित्यर्थः । अनुभवे विवदमानं प्रति बाधकमाह ॥ अन्यथेति ॥ जिज्ञासितग्राह्यत्व इत्यर्थः । जिज्ञासा हि ज्ञानेच्छा सा यद्विषयिणी तज्ज्ञानसाध्या । धर्मिज्ञानसाध्यत्वात्तस्याः । धर्मि चेह ज्ञानमेव । तथाच धर्मिभूतज्ञानस्य ज्ञाने सति जिज्ञासा तच्च ज्ञानं जिज्ञासापूर्वं साच

(प्रकाशिका)

ज्ञानपूर्वेति पूर्वपूर्वजिज्ञासाज्ञानव्यक्तिपरंपरया त्वदभिमतजिज्ञासितग्राह्यत्वमपि न स्यादिति मूलक्षतेरनवस्थेत्यर्थः । ज्ञानसाध्यत्वानुभवादित्युक्त्याऽनवस्थानिरासाय ज्ञानपूर्वकत्वानङ्गीकारेऽनुभवविरोधादित्यपि टीकागतहेतुवाक्यार्थउक्तो भवति । अर्थान्तरमपि वक्तुमुक्तदोषपरिहाराय शङ्कामुट्टङ्कयति ॥ न चेति ॥ न ज्ञानधर्मिकेति ॥ तथाच न ज्ञानजिज्ञासाव्यक्तिपरंपरयानवस्थेति भावः । आत्मादिधर्मिकजिज्ञासायाश्चात्मादिज्ञानपूर्वकत्वेप्यात्मादिज्ञानस्य जिज्ञासापूर्वकत्वाभावान्नानवस्था । ज्ञानवत्तस्य जिज्ञासितग्राह्यत्वाभावादिति भावः । अत्र यद्यपि अहं ज्ञानीति जिज्ञासे घटो ज्ञात इति जिज्ञासे इत्येवात्मादिधर्मिकजिज्ञासाभिनयो युक्तः । न तु संशयाभिनयः । तथापि यद्धर्मिकः संशयस्तद्धर्मिकैव जिज्ञासा युक्तेति युक्तिं सूचयितुं संशयप्रदर्शनमित्यदोषः । नवेतीत्यनन्तरं संशयवज्जिज्ञासापि आत्मादिधर्मिकैवेति योज्यम् ॥ अननुभवादिति ॥ अनेन इत्थं नानुभवः किंत्वन्यथैवेत्येवमुक्तावनुभवविरोध इति टीकार्थ उक्तो भवति । न हीतिवाक्यस्य प्रकृतोपयोगादर्शनाच्छङ्कापूर्वं तद्वाक्यं विवृणोति ॥ नन्विति ॥ न च स्वप्रकाशेत्यादि विवृणोति ॥ न द्वितीय इति ॥ औत्तरिकेत्यादि विवृणोति ॥ सुषुप्ताविति ॥ ज्ञानाभावादिति ॥ मनस उपरतत्वादिति भावः । संविदात्मकत्वाच्चेति वाक्यं युक्तिं सूचयन्विवृणोति ॥ किञ्चेति ॥ अन्यथानुपपत्त्येति ॥ आत्मातिरिक्तज्ञानाभावादिति भावः ।

पाण्डुरङ्गि – पूर्वपक्षस्त्वित्यनेन नकर्तव्येति पूर्वः पक्ष इति वाक्यं पूर्वपक्षस्तु नकर्तव्येतीति योजितं भवति । टीकोक्तमधिकार्यादिचतुष्टयशून्यत्वं न समुदितं हेतुः एकैकस्याव्यभिचारात् । किन्तु प्रत्येकमित्याह ॥ हेतुभ्य इति ॥ अधिकारिणः प्राधान्येपि निरधिकारिकत्वादेर्निर्विषयत्वाधीनत्वस्य वक्ष्यमाणत्वात्पूर्वपक्षन्यायविवरणोक्तत्वाच्च निर्विषयत्वादीत्युक्तम् । सूत्रे प्रथममथशब्देनाधिकारस्य सूचनाट्टीकायामधिकार्यादीत्यधिकारिणः प्रथमं ग्रहणमिति गुरवः । न तावद्ब्रह्मविषय इति टीकायां ब्रह्माब्रह्मणोर्मध्ये ब्रह्म तावन्नविषय इत्यर्थो भाति न चासावुपपद्यते उत्तरत्र अब्रह्मणो विषयत्वानिरासादित्यत आह ॥ तत्र तावदिति ॥ तत्र विषयप्रयोजनयोर्मध्ये विषयस्तावन्न युक्त इत्येव टीकार्थः । ब्रह्मशब्दस्तु ब्रह्मण एव विषयत्वेनाभिमतत्वादिति भावः । जीवव्यतिरिक्तेश्वराभावादिति न्यायविवरणोक्तहेतुसाधनाय टीकोक्तः प्रमाणाभावोसिद्धः प्रत्यक्षानुमानयोस्तत्राप्रवृत्तावपि मीमांस्यस्य वेदस्यैव प्रमाणत्वसम्भवादित्यतः वेदोपि किं कर्मकाण्डरूपो वा तत्र प्रमाणमुत ब्रह्मकाण्डरूपोवेति विकल्पं मनसि निधाय क्रमेण दूषयति ॥ कर्मकाण्डस्येत्यादिना ॥ कथं

भूयसां वाक्यानां निर्विशेषैकात्मबोधकत्वं सङ्गच्छत इत्यत उक्तम् ॥ अद्वैतिरीत्येति ॥ युक्त्यसहमपि परैः सिद्धान्तितत्वादस्माभिः पूर्वपक्षितम् । न हि परेषां सिद्धान्तोस्मत्पूर्वपक्षत्वमपि नार्हतीत्यर्थः । जीवस्य चेति टीकायां जीवशब्दो न तद्वाच्यविशिष्टपरः तस्यास्वप्रकाशत्वात् किन्तु तल्लक्ष्यचिन्मात्रपर इति दर्शयितुं प्रकृतात्ममात्रपरामर्शकस्तस्येति तच्छब्दः। टीकायामसंदिग्धत्वादिति हेतुर्ब्रह्म जीवाभिन्नमिति द्वितीयपक्षसिद्धवत्करणेनैवोक्तः विपर्यस्तत्वादिविरोधिभासमानत्वस्योपलक्षकश्चेति दर्शयितुं द्वितीयपक्षदूषणपरा जीवस्येति या टीका तद्व्याख्यानरूपे तस्य चेति वाक्य एव भासमानत्वादित्युक्तम् । ननु टीकोक्तं शुद्धचितः प्रकाशमानत्वमयुक्तम् । तस्याः स्वप्रकाशत्वेप्यविद्यावृतत्वादित्यत आह ॥ अहमिति भासमानत्वादिति ॥ अहमर्थस्य चिदचित्संवलनात्मकत्वात्तद्भाने चिदपि भाति । अन्यथा तदधीनमचितोपि भानं न स्यादिति भावः । एतेन अहमित्युत्तरटीकाऽत्रापि हेतुत्वेन योजितेति ज्ञातव्यम् । ननु स्वरूपेण प्रतीयमानोप्यात्मा अद्वितीयत्वादिना सन्दिग्धोस्तीत्यत आह ॥ अन्यस्य च सत्यस्याभावादिति ॥ अनेन टीकास्थसत्यरूपवस्तुवाचिनोर्थशब्दस्य तात्पर्यमुक्तमिति ज्ञेयम् । स्वप्रकाशत्वाभावोपि द्वेधा । प्रकाशस्यैवाभावेन परप्रकाश्यत्वेन वा । तत्राद्योऽहमित्यनुभवादिति टीकानुवादरूपेण तत्प्रकाशस्य सिद्धवत्करणेन निरस्तः । द्वितीयदूषणपरां न चायं मानस इत्यादिटीकां विकल्पमुखेन व्याख्याति ॥ किं तार्किकरीत्येत्यादिना ॥ टीकोक्तं ज्ञायमानत्वं परप्रकाश्यत्वमेव । अन्यथाऽनवस्थायोगादित्याह ॥ परप्रकाश्यत्वेनेति ॥ अस्तु आत्मन एव तदिति टीकायां हेत्वनुक्तिमाशङ्क्य एवेत्यनेन ज्ञानान्तरं तस्मिन्स्वप्रकाशत्वं चेति कल्पनात्क्लृप्ते आत्मनि स्वप्रकाशत्वमात्रकल्पनं लघ्विति हेतुः सूचित इत्याह ॥ लाघवादिति ॥ जिज्ञासायामेवेति टीकोक्ता शङ्का न युक्ता । जिज्ञासाया अपि सार्वत्रिकत्वेऽनवस्थातादवस्थ्यादित्याशङ्क्य एवेत्यनेन तस्या असार्वत्रिकत्वं सूचितमित्याह ॥ जिज्ञासा च न सर्वत्रेति ॥ ज्ञानस्य सुखदुःखादिवदित्यादि ॥ अत्र जिज्ञासाभावेप्यनुभवादित्यनेन अनुभवविरोधादिति टीका जिज्ञासाभावेपि ज्ञानानुभवविरोधादिति धर्मिज्ञानसाध्यत्वानुभवादित्यनेन जिज्ञासाया धर्मिज्ञानसाध्यत्वानुभवविरोधादिति तादृशजिज्ञासाया अननुभवादित्यनेन अहं ज्ञानी न वेत्यादिजिज्ञासाभावानुभवविरोधादिति त्रेधा व्याख्याता भवति । अनवस्था स्यादित्यनेन त्वनुभवान्तरान्वेषणेनावस्थानादिति पूर्वटीकातोऽनवस्थानादित्यस्यानुभवविरोधादित्यत्रानुषङ्गो दर्शित इति ज्ञातव्यम् । अन्यथेति ॥ ज्ञानस्य जिज्ञासितग्राह्यत्वे ज्ञानरूपधर्मिणो

साण्डुरङ्गि)

ानेन ज्ञानविषयकजिज्ञासा तस्यां च सत्यां धर्मिभूतज्ञानस्य ज्ञानं अत्र व्यक्तिद्वयाङ्गीकारे न्योन्याश्रयः । त्रयाङ्गीकृतौ चक्रकम् । परंपराङ्गीकारे अनवस्थेति द्रष्टव्यम् ॥ नच जिज्ञासा न ज्ञानधर्मिकेति ॥ यद्यप्यत्रापि विशेषणीभूतज्ञानस्य ज्ञानमावश्यकम् । विशिष्टज्ञाने विशेषणज्ञानहेतुताया अन्वयव्यतिरेकाभ्यां प्राप्तत्वात् । तच्च ज्ञानस्य जिज्ञासितग्राह्यत्वाज्जिज्ञासायामेव सम्भवति । जिज्ञासा च तद्विषयकज्ञानसाध्येत्य-योन्याश्रयादि स्यादेव । तथापि धर्मिज्ञानपरंपराप्रयुक्तानवस्थापरिहाराभिप्रायेणेयं शङ्केति येयम् । वस्तुतो विशिष्टज्ञाने विशेषणज्ञानकारणताया अन्यत्र निरस्तत्वान्न तत्परंपरया-यनवस्थेति बोध्यम् । नह्यज्ञायमानेति टीकानुपपन्ना जिज्ञासिताजिज्ञासितग्राह्यत्वपक्षयो-नवस्थानुभवविरोधाभ्यां दूषितत्वात् पक्षान्तरस्याभावेन शङ्कानुदयादित्यत आह ॥ ननु न ानमात्रमित्यादि ॥ न किंचिन्मानमिति टीकोक्तः परिहारो न युक्तः कदाप्यज्ञायमान-ानस्य परं प्रतीष्टत्वादित्यत आह ॥ असत्त्वापातादिति ॥ औत्तरिकानुस्मृतीत्यादिटीकायां कृतोपयोगित्वात्सुषुप्तावात्मानुभवाभावप्रसङ्गादिति वक्तव्ये सौषुप्तिकानुभवाभावप्रसङ्गादिति ामान्योक्तिः किमर्थेत्याशङ्क्य कालाद्यनुभवाभावरूपानिष्टांतरापादनार्थमित्याह ॥ एतावन्तं ालमित्यादिना ॥ संविदात्मकत्वाच्चेति टीकोक्तहेतुसाधकत्वेनाप्यौत्तरिकानुस्मृतीत्यादि-ोकांयोजयति ॥ किंचात्मन इत्यादि ॥

तात्पर्यचन्द्रिका

अस्तु वा तार्किकादिरीत्याऽहमर्थप्रकाशः तथापि प्रत्यगात्मनो संदिग्ध-वादविषयता । टीकायां तु न्यायविवरणानुसारेण वस्तुस्थितिप्रदर्शनाय स्वप्रकाश-ोक्ता । अत एव सुधायां स्वप्रकाशतया वा स्वप्रकाशज्ञानाश्रयतया वा मानस-त्यक्षवेद्यतया वा सिद्धत्वेनेत्युक्तम् । एतेन कर्मकाण्डस्वेव ब्रह्मकाण्डस्याप्यर्थ-निर्णयाय विचार आवश्यक इति निरस्तम् । धर्मवद् ब्रह्मकाण्डार्थस्यात्मनः रप्रकाश्यत्वाभावात् । एतेनैव जीवचैतन्यस्वरूपस्यासन्दिग्धत्वेपि देहादिभिन्न-वानन्दाद्यात्मकत्वादिना सन्दिग्धत्वाद्विषयता । अन्यथा सिद्धान्तेप्युत्तरत्र जीव-विचारो न युक्तः स्यादिति निरस्तम् । सिद्धान्त इव पूर्वपक्षे जीवचैतन्यातिरिक्तस्य हादिभिन्नत्वादेः सत्यत्वाभावात् । केचित्तु जीवस्याकारान्तरेण संदिग्धतया विचारसम्भवेपि सिद्धांत्यभिमतजीवान्यब्रह्मविचाराक्षेप इत्याहुः । तन्न न्यायवि-रणविरोधात् । तावता शास्त्रानारम्भासिद्धेश्च ।

प्रकाशिका – यथाटीकं वर्णयित्वा सुधावाक्याभिप्रायं वक्तुं कल्पांतरमाह ॥ अस्तुवेति ॥ तर्हि टीकाविरोध इत्यत आह ॥ टीकायां त्विति ॥ ''जीवव्यतिरिक्तेश्वराभावात्तस्य स्वप्रकाशत्वान्न जिज्ञास्यते''ति न्यायविवरणानुसारेणेत्यर्थः । वस्तुस्थितीति न्यायविवरणेपि तथोक्तेरभिप्रायोक्तिः । अस्तु वेत्यस्य मूलमाह ॥ अत एवेति ॥ अनेन पूर्वोत्तर-प्रस्थानाविरोध उक्तो भवति । प्रकारान्तरेण विचारकर्तव्यत्वमाशङ्क्य निरस्यति ॥ एतेनेति ॥ एतेन विषयाभावेन । एतच्छब्दार्थं व्यनक्ति ॥ धर्मवदिति ॥ ननु जीवस्यासन्दिग्धत्वेपि देहादिविविक्तत्वेन विचार्यता स्यादेव । अत एव सुधायां जन्मादिसूत्रे जीवस्य स्वरूपतः प्रसिद्धत्वेपि देहादिविविक्तत्वेन न प्रसिद्धिरित्युक्तमित्याशङ्कां निरस्यति ॥ एतेनैवेति ॥ अद्वैतिरीत्येत्युक्तत्वेनेत्यर्थः ॥ उत्तरत्रेति ॥ ''ज्ञोत एवे''त्यादौ द्वितीये ॥ सत्यत्वा-भावादिति ॥ अन्यथा अतत्वावेदकं शास्त्रं स्यादिति भावः । जन्मादिसूत्रे च नाद्वैतिरीत्या पूर्वपक्ष इति सुधाशय इति भावः । ननु कुत एवं ''जीवस्य स्वरूपत'' इत्यादि सुधानुसारादत्रापि जीवविचारो नाक्षेप्यः किंतु जीवस्य कथंचिद्विचार्यत्वेपि सिद्धांत्यभिमत-जीवान्यब्रह्मविचारो न सम्भवति । तस्यैवाभावादित्येवात्रपूर्वपक्षोस्तु । अत एव सुधायामाद्यसूत्रे ''ईश्वरविषया जिज्ञासा भविष्यतीति चेन्न । तस्यैवाभावा''दित्युक्तमि-त्याशङ्कामुद्दंक्य निरस्यति ॥ केचित्त्विति ॥ न्यायविवरणे तस्य स्वप्रकाशत्वान्न जिज्ञास्य-तेत्युक्त्या जीवस्य सर्वथाऽविचार्यत्वोक्तेरिति भावः । तथाच न्यायविवरणानुसारिटीकायां न तथा वर्णनं युक्तमिति । न्यायविवरणमपि तथैव कथंचिद्योज्यतामित्यत आह ॥ तावतेति ॥ जीवान्यब्रह्मविचाराक्षेपमात्रेणेत्यर्थः । अत एव सुधायामादिसूत्रे जीवविचारोपि प्रत्याख्यायीति भावः ।

पाण्डुरङ्गि – नन्वत्र टीकायां पूर्वपक्षे परप्रकाश्यत्वनिषेधात्सुधायां तु तदङ्गीकारात् टीकाद्वयस्य परस्परं विरोध इत्याशंक्य अत्र वस्तुस्थितिप्रदर्शनपरन्यायविवरणानुसारेणात्यंता सन्दिग्धत्वोपपादकत्वात्स्वप्रकाशतोक्ता । सुधायां तु यत्किंचित्प्रकाशमात्रेण पूर्वपक्षनि-र्वाहात्किं स्वप्रकाशतोपपादनक्लेशेन । न्यायविवरणे स्वप्रकाशपदं तु शास्त्रं विनापि प्रकाशपरम् । अतो न विरोध इत्यभिप्रायेणाह ॥ अस्तुवेति ॥ प्रकारान्तरेण विचारस्य कर्तव्यत्वं परिहरति ॥ एतेनेति ॥ अत्र प्रमाणाश्रयणेन प्रवृत्तत्वाच्छंकाया अधिकत्वमिति ज्ञेयम् । न हि प्रकाशमानेर्थे इति टीकाभिप्रेतां युक्तिमेतच्छब्दार्थतयाऽतिदिशति । ननु जीवस्यासन्दिग्धत्वेपि देहादिविविक्तत्वेन विचार्यता स्यादेव । अत एव सुधायां जन्मादिसूत्रे

(पाण्डुरङ्गि)

जीवस्य स्वरूपतः सिद्धत्वेपि देहादिविविक्ततया न सिद्धिरित्युक्तमित्याशङ्कां निरस्यति ॥ एतेनैवेति ॥ अन्यथा जीवस्य देहादिभिन्नत्वानन्दाद्यात्मकत्वेनाप्यसंदिग्धत्वे ॥ उत्तरत्रेति ॥ ज्ञोत एवेत्यादावित्यर्थः ॥ सत्यत्वाभावादिति ॥ तथाच तत्प्रतिपादकस्यातत्वावेदकत्वापातादिति भावः । स्वोत्प्रेक्षितं पक्षान्तरमाशङ्क्य निराकरोति ॥ केचित्त्विति ॥ जीवस्याकारान्तरेण विषयत्वाङ्गीकारे तदविषयत्वोपपादकस्वप्रकाशत्वोपपादकन्यायविवरणविरोधः स्यादित्याह ॥ न्यायविवरणविरोधादिति ॥ न्यायविवरणमप्युक्ताभिप्रायेण कथंचिद्योज्यमिति वदन्तं प्रति बाधकान्तरमाह ॥ तावतेति ॥ सर्वथा निर्विषयत्वस्यैव शास्त्रानारम्भप्रयोजकत्वात्त्वत्पक्षे च जीवस्यैव विचार्यत्वसम्भवेन सर्वथा निर्विषयत्वाभावेन शास्त्रानारम्भासिद्धेरिति भावः ।

तात्पर्यचन्द्रिका

सिद्धचैतन्यमात्रबोधने श्रुतेरनुवादकत्वे च वायुक्षेपिष्टादिवाक्यवत् विद्वद्वाक्यवच्चन्यायप्राप्तत्वात्सह्यम् । वेदान्ताध्ययनं जपार्थमस्तु । एवं च यथाऽर्थवादाधिकरणेऽपौरुषेयत्वेप्यर्थवादानामक्रियार्थत्वेन विध्येकवाक्यत्वाभावादानर्थक्यमिति भाट्टमते पूर्वःपक्षः प्राभाकरमते चार्थवादानां विध्येकवाक्यत्वेपि हेतुसमर्पकत्वाद्धेतुसापेक्षत्वेन चोदनानामप्रामाण्यमिति पूर्वःपक्षः यथा वा परमते शास्त्रयोनिसूत्रे कारणवाक्यमनुमानप्राप्तकारणानुवादीति ईक्षत्यधिकरणे च साङ्ख्यस्मृतिप्राप्तकारणानुवादीति पूर्वःपक्षःतथेहापि स्वतःसिद्धप्रत्यगात्मानुवादका वेदान्ता न विचार्या इति पूर्वःपक्षः ।

प्रकाशिका – नन्वेवं वेदान्तानां सिद्धचैतन्यमात्रपरत्वे प्रागुक्तरीत्या ज्ञातज्ञापकत्वेनाप्रामाण्यं स्यात् । नचतद्युक्तम् । अपौरुषेयत्वेनादोषत्वात् । अतोतिरिक्तब्रह्मपरत्वमकामेनापि वाच्यमिति तद्विषयकत्वेन विचार आरम्भणीय इत्याशङ्क्य वैदिकदृष्टान्तेन तदुपपादयति ॥ सिद्धेति ॥ वायुक्षेपिष्टादिवाक्यवदिति ॥ ''वायुर्वैक्षेपिष्टादेवता वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिं गमयती''त्याद्यर्थवादवाक्यस्य क्षिप्रगामी वायुः स्वोचितेन भागेन तोषितो भागप्रदायैश्वर्यं प्रयच्छतीति मानान्तरप्राप्तक्षिप्रगामित्वादिरूपार्थानुवादकत्वं यथा तद्वदित्यर्थः। अत एवाद्येऽध्याये ''आम्नायस्य क्रियार्थत्वा''दिति द्वितीयपादीयाद्याधि-

करणेऽर्थवादानां भारतादिवद्भूतान्वाख्यानमात्रपर्यवसितानामक्रियार्थत्वेनाप्रामाण्यमाशङ्क्य चेतनप्रवर्तनारूपस्य विधेः प्रवृत्तिप्रतिबन्धकालस्यादिव्यावर्तनेन प्रवर्तनाशक्त्युत्तंभनायापेक्षितस्य प्राशस्त्यस्य लक्षणया समर्पणेन विध्येकवाक्यतया प्रामाण्यमित्युक्तमिति भावः ।

ननु वायुक्षेपिष्ठादिवाक्यस्य लक्षिते तात्पर्यविषयीभूते प्राशस्त्येऽर्थे न मानांतरावगतिरिति न तत्परत्वेऽनुवादकत्वम् । वेदान्तानां तात्पर्यविषयस्य शुद्धस्य स्वप्रकाशतया सिद्धत्वेन तत्परत्वेनुवादकत्वमेवेति दृष्टान्तो विषम इति चेन्न । वायुक्षेपिष्ठत्वांशस्यैव दृष्टान्तत्वेनाभिमतत्वात् । अत एवारुच्या विद्धदित्युदाहरणान्तरम् । अत एव ''अग्नये पवमानायाष्टाकपालं निर्वपे'' दित्यत्राग्नेः पवमानत्वरूपगुणवदत्र वायोः क्षेपिष्ठत्वरूपगुणविधानं किं न स्यादित्याशंकाव्यावर्तनाय विध्युद्देशबहिर्भावप्रदर्शनरूपन्यायस्य तद्बहिर्भावेपि ''एतमेव सन्तं वायवे नियुत्वत आलभेते''तिवद्वाक्यान्तरेण देवतागुणविधानं किं न स्यादित्याशङ्कापनुत्तये विधायकाख्याताश्रवणरूपन्यायस्यापेक्षणान्न्यायप्राप्तत्वादित्युक्तम् ॥ विद्धदिति ॥ ''य एवं विद्वान्पौर्णमासीं यजते य एवं विद्वानमावास्यां यजते'' इति वाक्ययोर्विद्धत्पदयुक्तत्वेन विद्धद्वाक्यशब्दितयोर्दर्शपूर्णमासशब्दितप्रकृताग्नेयादित्रिकद्वयानुवादकत्वं यथा तथेत्यर्थः । तथाहि । द्वितीयेध्याये ''प्रकरणं तु पौर्णमास्यां रूपावचनादिति द्वितीयपादीयतृतीयाधिकरणे । य एवं विद्वानिति वाक्यद्वयमुदाहृत्य किं पौर्णमास्यमावास्याशब्दितापूर्वकर्मद्वयविधायकं किं वा ''यदाग्नेयोष्टाकपालोऽमावास्यायां च पौर्णमास्यां चाच्युतोभवति । अग्नीषोमीयमेकादशकपालं पौर्णमासे प्रायच्छत् । उपांशु याजमन्तरा यजति । ऐंद्रं दध्यमावास्यायाम् । ऐंद्रं पयोमावास्याया''मिति प्रकृतस्याग्नेयादित्रिकद्वयस्यानुवादकमिति संशये ''सर्वस्मै वा एतद्यज्ञाय गृह्यते यद्ध्रुवायामाज्य'' मिति वाचनिकस्य ध्रौवाज्यस्य द्रव्यस्य ''वार्त्रघ्नीपौर्णमास्यामनूच्येते वृधन्वती अमावास्याया''मिति वाक्याभ्यां पौर्णमास्यमावास्यासंज्ञकयोः कर्मणोर्वार्त्रघ्न्यादिशब्दितानां ''अग्निर्वृत्राणि जंघन'' दित्यादिमन्त्राणां विधानान्मान्त्रवर्णिक्या देवतायाश्च लाभादनुवादत्वे वैयर्थ्यादपूर्वकर्मद्वयविधायकमित्याशङ्क्य कथंचिद्द्रव्यलाभेऽपि वार्त्रघ्न्यादिवाक्यद्वयस्याज्यभागयोर्लिङ्गक्रमाभ्यां पर्वद्वयेऽप्यव्यवस्थया प्राप्तानां मन्त्राणां व्यवस्थार्थत्वेन मन्त्रवर्णदेवताया अलाभात् ''दर्शपूर्णमासाभ्यां स्वर्गकामो यजेते''ति फलवाक्यगतयोर्दर्शपूर्णमासपदयोः प्रसिद्धार्थत्वसम्पादनेन प्रकृताग्नेयादित्रिकद्वयानुवादकस्य सफलत्वात्समुदायद्वयानुवाद इति सिद्धान्तितम् । तत्र यथा देवताभावादिन्यायप्राप्तमनुवादत्वं यथा वेदान्तानामन्यस्य सत्यस्याभावादित्यादिन्यायप्राप्त-

(प्रकाशिका)

मनुवादत्वं सह्यमित्यर्थः । यत्तु वायुक्षेपिष्ठादिवाक्यस्य विद्वद्वाक्यस्य चानुवादकत्वेऽपि विध्यपेक्षितप्राशस्त्यसमर्पणेनाद्यस्य फलवाक्यगतदर्शपूर्णमासपदप्रसिद्धार्थत्वसम्पादनेन द्वितीयस्य फलवत्त्वान्न वैयर्थ्यम् । वेदान्तानां शुद्धचैतन्यमात्रबोधनेनानुवादकत्वे तु तेन न किंचित्फलमिति वैषम्यकथनं तन्न । वेदान्ताध्ययनस्यादृष्टार्थत्वेनार्थाप्रतिपादने फलाभावकथनस्यानुचितत्वात् । अन्यथोत्कर्षसमजात्युत्तरत्वापत्तेः । अत एव तदध्ययनं जपार्थमित्यग्रे स्पष्टम् । दृष्टे सत्यदृष्टायोगाद्वायुक्षेपिष्ठादौ प्राशस्त्यादिफलमुक्तमिति । एतेन प्रमाणशिखामणीनां वेदान्तानां सिद्धबोधकत्वं सह्यं चेत्तदा पौरुषेयस्यास्य शास्त्रस्य सुतरां तत्सह्यमिति निर्विषयत्वेनानारम्भणीयत्वमयुक्तमिति मूर्खप्रलापो निरस्तः । तत्रेवात्रापि कस्यचिज्ज्ञातार्थज्ञापकस्य पौरुषेयस्य प्रेक्षावदुपादेयस्य दर्शनात् । अत एव श्रुतेरित्युक्तम् । किं च श्रुतेस्तथात्वेपि पौरुषेयस्य न तद्युक्तम् । उक्तं च सुधायां ''प्रीत्या मोक्षपरत्वाच्च तात्पर्यं नैव दूषणे । तद्विरोधेन मानत्व''मित्यनुव्याख्याव्याख्यावसरे ''पुरुषोहि परप्रयोजनेन प्रयुक्तो वाक्यमुच्चारयंस्तदीयहिताहितप्राप्तिपरिहारानुगुणार्थमेव वदेत् । तद्विरुद्धं तु वदन्ननवधेयवचनः स्यात् । अपौरुषेयं तु स्वभावादेवार्थं प्रतिपादयति प्रत्यक्षादिवदेवे''ति । ''शक्तिश्चैवान्विते स्वार्थे'' इत्येतद्व्याख्यावसरे चोक्तं ''पुरुषदोषोयं यज्ज्ञातज्ञापनाय शब्दोच्चारण''मित्यादि । वस्तुतस्तु न्यायनिबन्धनात्मकत्वाच्छास्त्रस्य सन्दिग्ध एव न्यायप्रवृत्तेरसन्दिग्धे तत्फलाभावान्नेदमारम्भणीयमित्युक्तौ न कोपि दोषः । किं च ''आत्मा ब्रह्मेत्यधीतः स्फुरति स तु सदे''त्यादि वदता त्वयाप्यक्षागमयोरेकविषयत्वमुपेत्यैव विचारशास्त्रस्य निर्विषयत्वेनानारम्भस्य पूर्वपक्षितत्वेन स्वव्याहतत्वाच्चेति । नन्वध्ययनविधिना कृत्स्नस्य वेदस्यार्थज्ञानपर्यंतत्वस्य व्यवस्थापनात् वेदान्तेष्वर्थज्ञानस्यान्यतो लाभादध्ययनं व्यर्थमित्यत आह ॥ वेदान्तेति ॥ दृष्टस्यायोगाज्जपद्वाराऽदृष्टमेव फलमिति भावः । अपौरुषेयतया प्राप्तप्रामाण्यानां कथमेवं ज्ञातज्ञापकत्वेनाविचार्यत्वमित्यतः पूर्वपक्षप्रमेयं दृष्टान्तपूर्वमुपपादयन्नुपसंहरति ॥ एवं चेति ॥ विषयाभावे सतीत्यर्थः ॥ अपौरुषेयत्वेपीति ॥ तर्कपादांत्याधिकरणन्यायेनेति भावः । अक्रियार्थत्वेन धर्माधर्माबोधकत्वेन ॥ भाट्टमत इति ॥ दर्शितः पूर्वपक्षः ॥ प्राभाकरमते चेति ॥ चोदनाप्रामाण्यनिरूपणस्याध्यायार्थतया सर्वेष्वधिकरणेषु तदप्रामाण्यपर्यन्ताः पूर्वपक्षा इति विध्येकवाक्यतामुपेत्य यस्माद्वायुः क्षेपिष्ठा देवता तस्माद्वायव्यश्वेतालम्भः कार्य इति हेतुसमर्पकतयान्वयाद्धेतुसापेक्षत्वेन चोदना नाम प्रामाण्यमित्यर्थः । चोदनानां विधिवाक्यानाम् ॥ अनुमानेति ॥ कार्यत्वाद्यनुमानेत्यर्थः ॥

ईक्षत्यधिकरण इति ॥ ''सदेव सोम्येदमग्र आसी''दित्यादिवाक्यप्रतीतं जगत्कारणं ब्रह्मोत प्रधानमिति सन्देहे बहुस्यामिति बहुभावश्रवणात्प्रधानमेव । तथाच सांख्यस्मृतिसिद्ध-जगत्कारणानुवादीनि कारणवाक्यानीति पूर्वपक्षो यथेत्यर्थः । यत्तु वेदान्तानां चैतन्य-ज्ञापकत्वेपि प्रामाण्यमङ्गीकृत्य विचारशास्त्रस्य चैतन्यविषयत्वे ज्ञातज्ञापकत्वेनाप्रामाण्यवादो गुरुनतिविषयस्य शिष्यनत्यविषयत्ववादमनुकरोतीति कस्यचित्प्रलपनम् । तत्तुच्छम् । अनुक्तोपालम्भात् । न हि वेदान्तानां चैतन्यबोधकत्वेऽप्यनधिगतार्थत्वेन प्रामाण्यमुपेत्य विचारशास्त्रस्याधिगतार्थत्वेनाप्रामाण्यमुक्तम् । किंतु वेदान्तानां तद्विचारशास्त्रस्य च शुद्ध-बोधकत्वे निश्चितार्थतयार्थज्ञानाय प्रेक्षावदनुपादेयत्वमेव । अत एव स्वतः सिद्धप्रत्यगात्मानु-वादका वेदान्ता न विचार्या इत्युक्तम् । वस्तुतस्तु वेदान्तानामगत्या चैतन्यबोधकत्वेन याथार्थ्यरूपप्रामाण्यसम्भवेपि स्वार्थस्य निश्चिततया तत्र सन्देहविपर्ययोरभावेन तन्निरा-सकविचारशास्त्रानपेक्षणाद्विचारशास्त्रमिदं न कर्तव्यमिति युक्तः पन्थाः ।

पाण्डुरङ्गि – ननु वेदान्तानां सिद्धचैतन्यमात्रबोधकत्वेऽनुवादत्वेन वैयर्थ्यं स्यात् । न च तद्युक्तम् । अपौरुषेयत्वेनादोषतया निश्चितप्रामाण्यस्यायोगात् । अतो विशिष्टार्थत्वमवश्यं कल्पनीयम् । ततश्च वेदस्यैव जीवव्यतिरिक्तेश्वरसद्भावे प्रमाणत्वेनातिरिक्तब्रह्मविषयत्व सम्भवेन विचारस्यारम्भणीयत्वं भविष्यतीत्यत आह ॥ सिद्धेति ॥ वायुक्षेपिष्ठादिवाक्यवदिति ॥ ''वायुर्वैक्षेपिष्ठा देवता वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिं गमयति'' इत्याद्यर्थवादवाक्यस्य क्षिप्रगामी वायुः स्वोचितेन भागेन तोषितो भागप्रदाय ऐश्वर्यं प्रयच्छतीति मानान्तरप्राप्तक्षिप्रगामित्वादिरूपार्थानुवादकत्वं यथा तद्वदित्यर्थः । अत एव प्रमाणलक्षणे अर्थवादचरणे ''आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमु-च्यते'' इति प्रथमाधिकरणे विधिभावनातदंशत्रयातिरिक्तार्थानां वायुर्वैक्षेपिष्ठादेवतेत्ये-वमादीनामर्थवादपदानां किं ''वायव्यं श्वेतमालभेत भूतिकामः'' इत्यादि विध्युद्देशैनैक-वाक्यतया धर्मप्रामाण्यमुत नेति चिन्तायां ''चोदनालक्षणोऽर्थो धर्मः । तस्य ज्ञानमुपदेशः । तद्भूतानां क्रियार्थेन समाम्नायः'' इत्युपक्रममध्ये परामर्शोपसंहारैः सर्वस्याप्याम्नायस्य क्रियार्थत्वावधारणात् भारतादिवद्भूतान्वाख्यानमात्रपर्यवसितानामर्थवादानां करणेतिकर्तव्य-ताविशिष्टभावनामात्रविधानचरितार्थेन विध्युद्देशेन सह परस्परं नैराकाङ्क्ष्यादेकवाक्यत्वा-सम्भवेनाक्रियार्थत्वादप्रामाण्यमिति पूर्वपक्षं प्रापय्य अध्ययनविधिवशात्कृत्स्नस्य वेदस्य प्रयोजनवदर्थपर्यवसानेनार्थवादानां प्रयोजनाकाङ्क्षायाः विधेरपि चेतनप्रवर्तनारूपस्य

(पाण्डुरङ्गि)

प्रवृत्तिप्रतिबन्धकालस्यादिव्यावर्तनेन प्रवर्तनाशक्त्युत्तंभनाय प्राशस्त्यापेक्षायाश्च सत्त्वादर्थवादानां लक्षणया प्राशस्त्यसमर्पणेन विध्येकवाक्यतया प्रामाण्यमिति सिद्धान्तितम् । यद्यपि वायुर्वैक्षेपिष्ठा देवतेत्यर्थवादवाक्यलक्षिततया तत्तात्पर्यविषयीभूतप्राशस्त्यस्य मानान्तरानवगतत्वान्न तेषां तत्रानुवादकत्वं तथापि तद्द्वारभूतस्य वायोःक्षेपिष्ठत्वस्य लौकिकप्रमाणावगततया मुखतोऽनुवादकत्वाभिप्रायेणानुवादकत्वोक्तिः । अत एव विद्वद्वाक्यवदित्युदाहरणान्तरम् । अत एव च ''अग्नये पवमानायाष्टाकपालं पुरोडाशं निर्वपे''दित्यत्राग्नेः पवमानत्वरूपगुणविधिवद्वायोः क्षेपिष्ठत्वरूपस्य गुणस्य विधानं किं न स्यादित्याशङ्कानिवर्तनाय विध्युद्देशबहिर्भावप्रदर्शनरूपस्य न्यायस्य तद्बहिर्भावेपि ''एतमेव सन्ततं वायवे नियुत्वत आलभेत'' इतिवद्वाक्यान्तरेण देवतागुणविधानं किं न स्यादित्याशङ्काव्यवर्तनाय विधायकाख्याताश्रवणरूपन्यायस्य चापेक्षणान्न्यायप्राप्तत्वादित्युक्तम् । विद्वदिति ॥ ''य एवं विद्वान्पौर्णमासीं यजते य एवं विद्वानमावास्यां यजत'' इति वाक्ययोर्विद्वत्पदयुक्तत्वेन विद्वद्वाक्यशब्दितयोर्दर्शपूर्णमासशब्दवाच्यप्रकृताग्नेयादित्रिकद्वयानुवादकत्वं यथातथेत्यर्थः । भेदलक्षणे ''प्रकरणं तु पौर्णमास्यां रूपावचना''दिति द्वितीयपादीयचतुर्थाधिकरणे दर्शपौर्णमासप्रकरणस्थं य एवं विद्वानिति वाक्यद्वयं किमपूर्वकर्मद्वयविधायकं किं वा प्रकृतस्याग्नेयादित्रिकद्वयस्यानुवादकमिति संशये अभ्यासाधिकरणन्यायेन विधिपुनश्श्रुत्याऽपूर्वकर्मद्वयविधायकम् । न च रूपालाभः शङ्कनीयः । ''सर्वस्मै वा एतद्यज्ञाय गृह्यते यद्ध्रुवायामाज्य''मिति वचनविहितस्य ध्रौवाज्यद्रव्यस्य ''वार्त्रघ्नीपौर्णमास्यामनूच्येते वृधन्वती अमावास्याया''मिति वाक्याभ्यां पौर्णमास्यमावास्यासंज्ञकयोरनयोः कर्मणोर्मन्त्रविधानान्मान्त्रवर्णिक्या देवतायाश्च लाभात् । नच मन्त्राणां लिङ्गक्रमाभ्यामाज्यभागयोर्विधानान्नात्र विनियोगः सम्भवतीति वाच्यम् । वाचनिकविनियोगसम्भवे लिङ्गक्रमाभ्यामाज्यभागयोर्विनियोगासम्भवात् । त्रिकद्वयानुवादकत्वपक्षे तु वाक्यद्वयमप्यनर्थकं स्यात् । तस्मादपूर्वकर्मद्वयविधायकमिति पूर्वपक्षे प्राप्ते कथंचिद्द्रव्यलाभेपि देवताया अलाभान्नास्यापूर्वकर्मद्वयविधायकत्वम् । न च मन्त्रवर्णात्तल्लाभः । वार्त्रघ्नी इत्यादि वाक्यद्वयस्य आज्यभागयोर्लिङ्गक्रमाभ्यां पर्वद्वयेप्यव्यवस्थया प्राप्तमन्त्रव्यवस्थार्थत्वेन लाघवाल्लिंगक्रमयोरबाधेनोपपत्तौ तद्बाधायोगात् । न चानुवादवैयर्थ्यम् । फलवाक्यगतयोर्दर्शपौर्णमामासपदयोः प्रसिद्धार्थत्वसम्पादनेन सफलत्वात् । तत्सम्पादनस्य च फलं आग्नेयादीनां षण्णां प्राधान्यं समिदादीनां च तदङ्गत्वम् । तस्माद्विद्वद्वाक्यं समुदायानु-

वादकमेवेति सिद्धान्तः । अत्र च देवताभावादिन्यायप्राप्तत्वाद्विद्वद्वाक्यस्य यथानुवादकत्वं तथा वेदान्तानामन्यस्य सत्यस्याभावादित्याद्युपदर्शितन्यायप्राप्तत्वादनुवादकत्वं सह्यमित्यर्थः । अत्र मीमांसकमते अर्थवादस्य पदत्वात्तं प्रति वाक्यस्यानुवादकत्वे नार्थवादवाक्यं दृष्टान्तः सम्भवतीति वाक्यस्यानुवादकत्वे दृष्टान्ततया विद्वद्वाक्यवदिति दृष्टान्तांतरमुपन्यस्तमिति गुरवः । नन्वर्थवादविद्वद्वाक्ययोः सफलानुवादकत्वादनुवादकत्वस्य तत्र दूषणत्वासम्भवेपि प्रकृते निष्फलानुवादकत्वादनुवादकत्वं दूषणमित्यत आह ॥ वेदान्ताध्ययनं त्विति ॥ तथाचास्यापि सफलानुवादत्वमिति भावः । नन्वध्ययनस्य जपार्थत्वेन सफलत्वेप्यपौरुषेयत्वेन प्रमाणस्य वेदान्तस्य कथमर्थासंस्पर्शइत्याशङ्क्याऽपौरुषेयत्वेपि निमित्तांतरादर्थासंस्पर्शे न पूर्वपक्षे दृष्टान्तचतुष्टयमाह ॥ एवं चेत्यादिना ॥ तत्र प्राभाकरोक्तावाद्यौ दृष्टान्तावर्थासंस्पर्शमात्रे । अद्वैत्युक्तावंत्यौ तु प्रस्तुतेऽनुवादकत्वेनार्थासंस्पर्शे इति ज्ञेयम् ।

तात्पर्यचन्द्रिका

यद्वा प्रमाणभूतवेदान्तवाक्यगतिर्न पूर्वपक्षिणा वाच्या । तदाच्छादनेन तत्प्रवृत्तेः। किंतु प्रमेयस्य ब्रह्मणोऽद्वैतिरीत्या स्वप्रकाशप्रत्यगात्माभेदान्न विचार्यतेति प्रमेयाश्रयणेनैव पूर्वपक्षः । अत्र चाद्ये पक्षे प्रमाणभूतवेदविचाररूपेणापि विचारस्याकर्तव्यताभिप्रेता । द्वितीये तु प्रमेयभूतब्रह्मविचाररूपेणैव । केचित्तु वेदमात्रस्य कार्यपरत्वान्न जीवादन्यद् ब्रह्मास्ति । जीवस्त्वसन्दिग्ध इति पूर्वपक्ष इत्याहुः । तन्न । प्राभाकररीत्या पूर्वपक्षकरणे न्यायविवरणे आत्मनः स्वप्रकाशत्वोक्त्ययोगात् । जीवस्य देहादिभिन्नत्वेन विचार्यत्वसम्भवेन शास्त्रानारम्भासिद्धेश्च । सुधायां त्वनुव्याख्याने सिद्धे व्युत्पत्त्यादेरतश्शब्दार्थत्वेनोक्तत्वात्तद्व्यावर्त्यपूर्वपक्षे कार्ये व्युत्पत्तिरुक्ता । इहतु टीकायां न्यायविवरणोक्तब्रह्मशब्दव्यावर्त्यपूर्वपक्ष उच्यत इति नेह सा वक्तव्या । अन्येतु आत्मनः स्वतःसिद्धत्वेपि प्रमाणतः सिद्धयभावात्तत्सिद्धयविषयत्वाद्वा तत्प्रत्यायकानां वेदान्तानां नानुवादकतेत्याहुः । तदपि न । तत एवात्मनो विषयत्वस्यापि सम्भवेन निर्विषयत्वपूर्वपक्षायोगात् ।

प्रकाशिका – तदाच्छादनेनेति ॥ न च ''न च तदाच्छादनेने''त्यग्रेतनग्रन्थविरोध इति वाच्यम् । तत्रोक्तबाधकस्यात्राभावात् । स्पष्टतायै तयोर्भेदमाह ॥ अत्र चेति ॥ ननु सुधायां

(प्रकाशिका)

''आगमस्तु कार्यनिष्ठो न निष्पन्नस्वरूपमीश्वरं शक्नोत्यवगमयितु''मित्यादिना वेदस्य कृत्स्नस्य कार्यपरत्वान्नेश्वरे मानमित्युक्तत्वेन प्राभाकररीत्या पूर्वपक्ष उक्तः । ''प्रमाणाभावेने''ति टीकायां स्वोक्तो हेतुरप्येवंरूपेण विवृत इति भाति । अत्र तूच्यते चिन्मात्रपरत्वादित्यद्वैतिरीत्येति तद्विरुद्धम् । एवं च वेदान्तानामननुवादकत्वं चानुकूलितं भवतीत्याशङ्कां सुधावाक्यतात्पर्यापरिज्ञानविजृम्भितां बाधकोक्तिपूर्वमभिप्रायकथनेन निरस्यति ॥ केचित्त्विति ॥ स्वप्रकाशत्वेति ॥ तन्मते वृत्तेरेव स्वप्रकाशत्वेनात्मनस्तदभावादिति भावः। ननु तत्र स्वप्रकाशत्वं वास्तवाभिप्रायेणोक्तं न तु तन्मतत्वेन । अत एव सुधायां ''स्वप्रकाशसंविदाश्रयतयावे''त्युक्तम् । न तु तत्रैव भार इत्याशङ्क्य बाधकान्तरमाह ॥ जीवस्येति ॥ यदि प्राभाकररीत्या पूर्वपक्षस्तर्हि तन्मतेऽद्वैतिमत इव देहादिभिन्नत्वादेर्मिथ्यात्वाभावेन जीवस्यासन्दिग्धत्वेपि देहादिभिन्नत्वस्य सत्यस्य विषयस्य सम्भवेन निर्विषयत्वेन शास्त्रानारम्भो न सिद्धः स्यादिति भावः । ननु सुधायां ''नन्वात्मा शरीराद्यतिरिक्तोऽहमित्यसन्दिग्धाविपर्यस्तसाक्षिप्रतीत्यैव निश्चित इति चेदेवंतर्हि तत एव न जिज्ञास्य'' इत्युक्त्या देहादिभिन्नत्वस्यापि निश्चितत्वेन तेनाप्यविचार्यत्वाच्छास्त्रानारम्भ सिद्धिरिति चेन्न । प्राभाकरमते तथानङ्गीकारात् । वास्तवाभिप्रायेणवा देहादिविविक्तत्वेनात्मना ज्ञानाज्ञानाभ्यामविचार्यत्वमिति भावेन वा सुधोपपत्तेः । अत एव सुधायां जन्मादिसूत्रे ''जीवस्य स्वरूपतः प्रसिद्धत्वेपि देहादितोऽतिविविक्ततया न प्रसिद्धि''रिति तेन रूपेण सन्दिग्धत्वोक्तिः स्पष्टेति भावः । आनन्दाद्यात्मकत्वाणुत्वमहत्त्वादिना विचार्यत्वसम्भवाच्च । एवं बाधकमुक्त्वा सुधाकूतमाह ॥ सुधायांत्विति ॥ सैव रीतिरत्राप्याश्रीयतामित्यत आह ॥ इहत्विति ॥ अद्वैतिरीत्या अभेद एव ब्रह्मशब्दव्यावर्त्य इति भावः । ननु यद्यद्वैतरीत्या पूर्वपक्षस्तर्हि नानुवादकत्वं वेदान्तानाम् । पूर्वं शुद्धगोचरान्तःकरणवृत्तेरभावात् । स्वप्रकाशत्वेपि स्वरूपज्ञानविषयत्वस्य कर्तृकर्मत्वविरोधेनानङ्गीकाराज्ज्ञातज्ञापकत्वाभावात् । अन्यथा भामतीमते जिज्ञासाधिकरणसिद्धान्तानुन्मेषः स्यात् । तथाचाननुवादकत्वं वेदान्तानामभ्युपेत्यैव पूर्वपक्षो वाच्य इत्युत्तानदृशां चोद्यमुट्टंक्य बाधकोक्त्या निरस्यति ॥ अन्येत्विति ॥ स्वतः सिद्धत्वेपि । स्वरूपज्ञानविषयत्वेपीत्यर्थः ॥ तत्सिद्धीति ॥ स्वरूपसिद्धीत्यर्थः ॥ तत एवेति ॥ आत्मनोऽज्ञातत्वादेवेत्यर्थः । ननु तन्मतेऽवेद्यत्वं स्वप्रकाशत्वमित्यङ्गीकारात् श्रुतितन्मीमांसयोर्निर्विषयत्वं युज्यते । अत एवोत्तरत्र ''यत्सत्यं नैव तद्वेद्यं यद्वेद्यं तच्च नैव सत् । इति ते समयस्तत्र कुत्रार्थे

शास्त्रमानते''ति भवतामेव वचनम् । अत एव मायावादखण्डनटीकायामवेद्यत्वं स्वप्रकाशत्व-मित्यङ्गीकाराद्वेदान्तानां वैयर्थ्यमित्युक्तम् । तथाच चैतन्यादन्यस्यासत्यत्वाच्चैतन्यस्य च सत्यस्यावेद्यत्वान्निर्विषयत्वेन वेदान्तानामविचार्यतया नेदं शास्त्रमारम्भणीयमित्येव पूर्वःपक्षः साधीयानिति चेन्न । टीकायामात्मनः स्वप्रकाशत्वेनासन्दिग्धत्वोपपादनविरोधात् । अवेद्यत्वे चैतन्यमवेद्यमित्यादिव्यवहारस्य स्वक्रियाविरोधेनायोगाच्च । कथं तर्ह्यनुवादकत्वसमर्थनमिति चेत् । अयमाशयः । यदुक्तं स्वतः सिद्धत्वेपि प्रमाणवृत्त्यभावादिति तन्न । अनुवादकत्वे हि ज्ञातमात्रज्ञापकत्वं तन्त्रम् । परमते शास्त्रयोन्यधिकरणपूर्वपक्षायोगापाताच्च । यदपि तत्सिद्ध्यविषयत्वादिति तदपि न । मामहं जानामीत्यनुभवविरोधात् । अन्यस्य च मिथ्यात्वेन तद्विषयत्वे भ्रान्तित्वापत्तेः मुक्तौ तदभावेन तद्विषयत्वायोगाच्च स्वरूपविषय-त्वावश्यंभावात् । अन्यथा स्वरूपचितो ज्ञानत्वस्य दुर्घटत्वात् । विस्तृतं चैतज्जडत्वहेतुभङ्गे । ननु तर्हि नेयमद्वैतिरीतिः । तन्मते स्वरूपचितः स्वविषयत्वानङ्गीकारात् । तथाच कथमद्वैतिरीत्येत्युक्तिरिति चेत् । अत्राहुः । न सर्वांशेऽद्वैतिरीतिरिति तस्याभिप्रायः । किन्तु वेदान्तानां चिन्मात्रपरत्व एव । अत एव पूर्वं ग्रन्थकृता तथैवोक्तम् । स्वप्रकाशसिद्धत्वो-क्तिस्तु सिद्धान्तदिशा वा न्यायप्राप्ततया वास्तवाभिप्रायेण वा युक्ता । अत एव सुधायां त्रेधापि सिद्धत्वमुक्तम् । अत एव चोत्तरत्र श्रवणविधेर्विचारविधित्वमद्वैत्यभिमतं प्रत्याख्याय मननविधेर्विचारविधित्वमुपेत्य गतिर्वक्ष्यते । अन्यथा श्रवणविधेरेव सा वक्तव्या स्यात् । ननु चैवं प्राभाकररीत्या वेदस्य कार्यपरत्वमुपेत्य स्वप्रकाशत्वोक्तेर्वास्तवत्वादिभाववर्णनं क्रिय-ताम्। एवं च सुधाचानुकूलिता भवति । अननुवादकत्वं चानुगृहीतं भवति । तथाच कृत्स्नस्य वेदस्य कार्यपरत्वेन जीवान्यब्रह्मणि मानाभावाज्जीवचैतन्यस्य च सिद्धान्तिदिशा वस्तुतो न्यायतो वा स्वप्रकाशत्वान्न जिज्ञास्यतेति पूर्वपक्षो युक्त इति चेन्न । एतावताऽतःशब्दव्यावर्त्यपूर्वपक्षलाभेपि ब्रह्मशब्दव्यावर्त्यपूर्वपक्षालाभात् । कार्यपरत्वनिरासस्य ब्रह्मशब्देनालाभात् । न च जीवान्यब्रह्मानङ्गीकाराद् ब्रह्मशब्दव्यावर्त्योपि पूर्वपक्षः सेत्स्य-तीति वाच्यम् । एवं तर्हि जीवस्य देहादिभिन्नत्वेन विचार्यत्वसंभवेन शास्त्रानारम्भा-सिद्धेरित्युक्तत्वादिति ॥ यद्वा परैरपि व्यवहारनिर्वाहकत्वं शुद्धचितोङ्गीकृतम् । तद्व्यवहारहेतु-त्वमेव तद्विषयत्वमिति वा''चित्सुखेन तत्स्वभावस्यापि स्फुरणस्य तद्विषयत्वमित्युक्त-त्वेने''त्यादिना न्यायामृते स्वप्रकाशत्वभङ्गादौ स्वविषयत्वस्य चितोपि चित्सुखमतत्वे-नोक्ततया तद्रीत्या तद्विषयत्वमिति वा पूर्वपक्ष्याशयः । यथोक्तं भावप्रकाशिकायां ग्रन्थकृतैव

(प्रकाशिका)

''अनतिरेके स्वप्रकाशत्वादात्मनस्सिद्धसाधनता'' इत्येतद्व्याख्यावसरे ''यद्यपि परैस्स्व-ग्रन्थेषु स्वप्रकाशात्ममात्रस्य स्वतस्सिद्धिसम्भवेने''ति ''स्वतस्सिद्धतायामपि तदुपपत्ते''रिति ''विज्ञानमेव स्वप्रकाशस्वभावं प्रकाशत'' इति ''स्वभावभेदादेवच स्वात्मनि व्यवहारं कुर्या''दिति च तत्र तत्र वदद्भिस्स्वप्रकाशस्यात्मनः स्वकर्मत्वाभावेपि स्वजन्यव्यवहार-विषयत्वयोग्यत्वलक्षणा स्वतस्सिद्धिरिष्यते । तादृशात्माभिन्नाद्वैतं बोधयतः शास्त्रस्य सिद्धसाधनत्वं पररीत्यैव वक्तुं शक्य''मित्यादि ॥ तथाचैवं निष्कर्षः । अद्वैतिरीत्या वेदान्तानामखण्डप्रत्यगात्मपरत्वं प्रत्यगात्मनश्च स्वप्रकाशसिद्धत्वं सिद्धांत्यभिमताद्यभिप्राये-णेति निर्विषयत्वादिति हेतुर्युक्त एवेति ।

तात्पर्यचन्द्रिका

नापि जिज्ञासायाः प्रयोजनमस्ति । प्रत्यग्रूपे ब्रह्मण्यहमिति ज्ञायमानेपि मोक्षानुपलम्भात् । विषयाद्यभावादेव नाधिकारी । नापि सम्बन्धः । ननु कथं तर्हि श्रोतव्य इति विचारविधानम् । न च तदाच्छादनेन पूर्वपक्षः । विचारविधि-वाक्यार्थनिर्णायकन्यायव्युत्पादकत्वादस्याधिकरणस्य तदाच्छादनायोगादिति चेन्न । वक्ष्यमाणरीत्या श्रवणस्य विचाररूपत्वाभावात् । मन्तव्यः सोन्वेष्टव्य इत्यादेश्च ब्रह्मपरतयाऽभिप्रेतवाक्यमध्यस्थतया विष्णुरुपांशु यष्टव्य इत्यादिवत्कृत्य प्रत्ययस्या-र्थत्वेनाप्युपपत्तेरविधायकत्वात् । नापि ''आत्मन्येवात्मानं पश्ये''दिति ''तद्विजि-ज्ञासस्वे''ति वा विधिः । मुख्यार्थयोर्ज्ञानेच्छयोरविधेयत्वात् । विधौ च लक्षणाया अन्याय्यत्वात् । अनयोरपि ब्रह्मपरतया ''यदभिघारयेद्वृद्रायास्ये पशून्निदध्या''दित्या-दिवल्लिङो विधिशक्तिप्रतिबन्धाच्च ।

प्रकाशिका – निष्प्रयोजनत्वादिति हेतुमादिपदोक्तं समर्थयते ॥ नापीति ॥ अभ्युदयस्य कर्मादिलघूपायसाध्यत्वान्मोक्ष एव जिज्ञासाफलत्वेन वाच्यः । स च न साक्षात्तत्फलम् । श्रुतत्यागाश्रुतकल्पनापत्तेः । किंतु ज्ञानद्वारा । तस्मिंश्च ज्ञाने सत्यपीदानीं मोक्षानुपलम्भान्न जिज्ञासाफलमित्यर्थः । एतेन ''नच जिज्ञासाया'' इत्यादिटीका विवृता । विषयाद्यभावादिति हेतुरुत्तरसाध्यद्वयेप्यन्वेति । तेन विषयेत्यादिटीका विवृता । एवं जिज्ञासाया निर्विषयत्वादिनाऽकर्तव्यत्वमुक्त्वा सुधावाक्यं विवरितुं तद्विधीनां गतिद्वयं

वक्तुमाक्षिपति ॥ नन्विति ॥ परैश्श्रवणविधेर्विचारविधित्वमङ्गीकृतम् । तद्रीत्या वा श्रवणादिरूपा जिज्ञासा कर्तव्येति सिद्धान्तटीकातात्पर्यापरिज्ञानिनो वा शङ्केति तदुदाहृतम् । ननु यथा प्रमाणभूतवेदान्तवाक्यगतिमनुक्त्वा तदाच्छादनेन पूर्वपक्षः तथेहाप्यस्तु । अत एव टीकायां तस्य गत्यनुक्तिरित्याशङ्क्य निरस्यति ॥ न चेति ॥ न्यायो विषयादिः । अत्रैव प्रमाणभूतवेदान्तवाक्याच्छादने बाधकाभावादिति भावः । एतेन विचारविधेराच्छादनस्य निरासात्प्रमाणभूतवेदान्तवाक्यप्रामाण्याच्छादनमपि न युक्तमिति कस्यचिन्मूर्खस्य प्रलपनं दूरीकृतं बोद्धव्यम् ॥ वक्ष्यमाणेति ॥ जिज्ञासापदार्थनिरूपणप्रस्ताव इति भावः । ननु ''मन्तव्यः सोन्वेष्टव्यः स विजिज्ञासितव्य'' इत्यादौ ''तव्यत्तव्यानीयर'' इति विधौ स्मृततव्यप्रत्ययान्तस्य तथा ''आत्मन्येवात्मानं पश्ये''दित्यादि लिङन्तस्य ''तद्विजिज्ञासस्वे''ति ''तमेवैकं जानथे''त्यादि लोडंतस्य च विधायकत्वसम्भवादित्याशङ्क्य तव्यप्रत्ययांतस्य गतिं तावदाह ॥ मन्तव्य इति ॥ इत्यादेरिति षष्ठ्यंतस्य मध्यस्थतयेत्यनेनान्वयः । ब्रह्मपरत्वेन प्रसिद्धबृहदारण्यकच्छांदोग्याद्युपनिषन्मध्यगतत्वेन वा तत्तदवान्तरप्रकरणगतब्रह्मपरवाक्यगतत्वेन वा बाधकेन तव्यप्रत्ययस्य विधिशक्तिप्रतिबन्धात् ''अर्हेकृत्यतृचश्चे''त्यर्हार्थे कृत्यप्रत्ययस्य विधानात् ''कृत्याः'' प्राङ्ण्वुल इति कृत्यसंज्ञकस्य तव्यस्यार्हार्थत्वसम्भवात् । तत्र दृष्टान्तो विष्णुरिति ॥ द्वितीयाध्याये द्वितीयपादे ''पौर्णमासीवदुपांशुयाजः स्या''दिति चतुर्थेधिकरणे ''जामिवा एतद्यज्ञस्य क्रियते यदन्वंचौ पुरोडाशावुपांशु याजमन्तरा यजति । विष्णुरुपांशु यष्टव्योऽजामित्वाय । प्रजापतिरुपांशु यष्टव्योऽजामित्वाय । अग्नीषोमावुपांशु यष्टव्यावजामित्वाये'' ति दर्शपूर्णमासयोः श्रुतं वाक्यमुदाहृत्य ''उपांशुयाजमन्तरायजती''त्ययं किं ''विष्णुरुपांशु यष्टव्य'' इत्यादिवाक्यविहितयागत्रयसमुदायानुवादः उत स्वातन्त्र्येण यागविधिरिति संशये देवताया अलाभेन यागविधित्वायोगात्तव्यप्रत्ययान्तविष्ण्वादिवाक्यविहितयागत्रयसमुदायानुवाद इति प्राप्ते आग्नेयाग्नीषोमीयपुरोडशद्वयनैरन्तर्यकृतस्य जामितादोषस्य वाक्योपक्रमे उपन्यासात् पुरोडाशयोरन्तराले किंचिद्विधास्यत इत्यवगमात् आग्नेयाग्नीषोमीयपुरोडाशयाज्यानुवाक्यायुगलयोर्मध्ये वैष्णवप्राजापत्याग्नीषोमीययाज्यानुवाक्यायुगलानां शाखाभेदेनाम्नानात्क्रमविनियुक्तमन्त्रवशेन देवताया लाभादन्तराशब्दघटितमेव वाक्यं विधायकम् । अजामित्वप्रशंसा च तत्रैवावकल्पते । विष्ण्वादिवाक्यं तु जामितादोषोपक्रमतन्निर्हरणान्तैकवाक्यमध्यस्थतया विधित्वे प्रतीतैकवाक्यताभङ्गप्रसङ्गादर्थवादः । तव्यप्रत्ययस्त्वर्हार्थ इति सिद्धान्तितम् ।

(प्रकाशिका)

तद्वदत्राप्युपक्रमोपसंहारैकरूप्यावगतैकवाक्यतानिर्वाहायार्हार्थो न विधिस्तव्यप्रत्यय इति भावः । ननु तव्यस्यार्हार्थेपि स्मरणात्तदन्तमविधायकमस्तु । लिङाद्यन्तं तु स्यादेव विधिरित्याशङ्क्य निरस्यति ॥ नापीति ॥ पश्येदित्यत्र प्रकृतिभागस्य ज्ञानं विजिज्ञासस्वेत्यत्र च सन्प्रत्ययस्य चेच्छा मुख्योऽर्थः। ''धातोः कर्मणः समानकर्तृकादिच्छायां वे''ति सन्विधानादिति भावः । ननु मुख्यार्थाभ्यां ज्ञानेच्छाभ्यां विचारं लक्षयित्वा तद्विधिरभ्युपगम्यतामित्यत आह ॥ विधौ चेति ॥ अत एव शबरस्वामिना''नविधौ परः शब्दार्थ'' इत्युक्तमिति भावः ॥ ब्रह्मपरतयेति ॥ ब्रह्मतात्पर्यकत्वेनेत्यर्थः ॥ यदभिघारयेदिति ॥ दशमे ''पूर्वैश्च तुल्यकालत्वा''दित्यष्टमपादीयपञ्चमाधिकरणे त्र्यम्बकनामकपुरोडाशानधिकृत्य ''अभिघार्या नाभिघार्या इति मीमांसन्ते यदभिघारयेद्रुद्रायास्ये पशून्निदध्याद्यन्नाभिघारयेन्न रुद्रायास्ये-पशुन्निदध्यात् । अथो खल्वाहुरभिघार्याएवे''ति चातुर्मास्येषु श्रुतं वचनमुदाहृत्य किमभिघारणानभिघारणयोर्विकल्पः उताभिघारणमेवेति संशये अभिघारणस्य विधेयत्वे विवादाभावादुपक्रमे अभिघार्या इति विधिः । यदभिघारयेदिति विध्यन्वयानर्हनिन्दाश्रवणाच्च नाभिघार्या इति प्रतिषेधः । अतस्तयोर्विकल्पः । सति चैवं प्रयोगदशायामन्यतरपरिग्रहायापतंती मीमांसा मीमांसन्त इत्यनूद्यत इति प्राप्ते मीमांसावरुद्धत्वेनाद्योऽभिघार्या इत्येष न विधिः । अंत्यस्त्वनन्यपरत्वाद्विधिः । आद्यवाक्यं तु तच्छेषत्वादर्थवादः । तत्समभिव्याहारात् । यदभिघारयेदिति निन्दाश्रवणमप्यभिघार्या एवेत्यस्य विधेःशेषत्वात्तत्रार्थवादः । एवमिदमभिघारणं प्रशस्तं यत्संतमपि दोषमविगणय्य कर्तव्यमित्येवं निन्दाया अपि प्रशस्ततरत्वज्ञापनार्थत्वात् । तस्मादभिघारणमेव न विकल्प इति सिद्धान्तितम् । अत्राभिघारयेदिति लिङो विधिशक्तिरभिघारणविधौ प्राशस्त्यसमर्पणपरत्वेन यथा प्रतिबध्यते तथा पश्येदित्यादिलिङोपि विधिशक्तिर्ब्रह्मपरत्वेन प्रतिबध्यत इत्यर्थः ।

पाण्डुरङ्गि – नापीति ॥ अनेन टीकायां ''नच जिज्ञासायाः प्रयोजनं'' इत्यत्र च शब्दोप्यर्थ इत्युक्तं भवति । ब्रह्मणः सिद्धत्वोपपादनार्थं प्रत्यग्रूप इति । एवं पूर्वटीकां तात्पर्यतो व्याख्याय इदानीं टीकोक्तपूर्वपक्षस्यानुत्थानमाशंक्य निरस्यति ॥ ननु कथमिति ॥ ननु श्रवणस्य विचाररूपत्वाभावेन श्रोतव्य इत्यस्य श्रवणविधित्वेन विचारविधित्वाभावात् कथं विचारविधायकत्वेन श्रोतव्य इति वाक्योदाहरणमात्रेति चेत् न । पूर्वपक्षित्वेन सम्प्रतिपन्नेनाद्वैतिना विचारस्यैव श्रवणरूपत्वाङ्गीकारेण तन्मतानुसारेणैव तद्वाक्यस्य विचारविधायकत्वशङ्कनेनादोषात् ।

तात्पर्यचन्द्रिका

एतेन ''तस्माद् ब्राह्मणः पाण्डित्य''मित्यादेरपि विचारविधित्वं निरस्तम् । विचारस्य ज्ञानहेतुताया अन्वयव्यतिरेकप्राप्तत्वेन विध्यनपेक्षणाच्च । नियमपरिसंख्ययोश्च आत्मनः शब्दैकगम्यतया साधनान्तरप्राप्त्यभावेनायोगात् । एतेनान्यपरतया प्रतीतस्यापि ''उपरि हि देवेभ्यो धारयती''त्यादेरिव तद्विजिज्ञासस्वेत्यादेरपि विधित्वमस्त्विति निरस्तम् । प्रकृतस्य त्वन्मते वस्तुतोन्यपरत्वात् । तद्वत्प्रकृतेऽप्राप्तेरभावाच्च ।

प्रकाशिका – ननु तस्माद् ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेदित्यादौ श्रवणं लब्ध्वा बाल्येन मननेन तिष्ठासेत् स्थातुमिच्छेत् मननं कुर्यादित्यस्ति विचारविधिरित्यत आह ॥ एतेनेति ॥ ब्रह्मपरतया विधिशक्तिप्रतिबन्धादित्युक्तत्वेनेत्यर्थः । विचारविधित्वेन शङ्कार्हस्य सर्वस्यापि वाक्यस्य साधारणं दूषणमाह ॥ विचारस्येति ॥ गान्धर्वादिविचारस्य षड्जादिज्ञानहेतुत्वदर्शनादिति भावः ॥ विधीति ॥ अप्राप्त एव विध्यपेक्षेति भावः । नन्वपूर्वविधेरयोगेपि यथा ''व्रीहीनवहन्ती''त्यादौ नखविदलनादिसाधनान्तरप्रयुक्तपाक्षिकत्वनिवृत्तिफलकनियमविधिः । यथावा ''अश्वाभिधानीमादत्त'' इत्यादावन्यनिवृत्तिफलकपरिसंख्याविधिः । तथा विचारेणैव ब्रह्मज्ञानं सम्पादयेदिति नियमादिविधिः स्यादित्यत आह ॥ नियमेति ॥ सत्यं यदि तत्रैव ब्रह्मज्ञाने विचारवत्साधनान्तरमपि स्यात् । न च तदस्ति । रूपादिहीनस्यात्मनः प्रत्यक्षाद्यविषयतया शब्दैकगम्यत्वादित्यर्थः । नन्वपूर्वसाधनेषु व्रीहिषु नखविदलनादेरप्राप्तावपि व्रीहिमात्रे तत्प्राप्त्या व्रीहीनवहन्तीति यथा नियमस्तथा निर्विशेषात्मनि मानान्तराप्राप्तावप्यात्ममात्रे तत्प्राप्त्या नियम इति चेन्न । व्रीहीनित्यत्र व्रीहिशब्दोऽपूर्वीयद्रव्यपरः । न तु व्रीहिपरः । अन्यथा यवेष्ववघात औपदेशिको न स्यात् । नीवारेषु च व्रीहिरूपद्वाराभावेनातिदिष्टोपि बाध्येतेति नवमे स्थापितत्वेनापूर्वीयद्रव्य एव नखविदलनादिप्राप्तेर्वाच्यत्वात् । किं च व्रीहिसामान्यइवापूर्वीयेष्वपि व्रीहिषु नियमादृष्टाजनकस्यापि नखविदलनस्य सम्भवोस्ति । इह च निर्विशेषसविशेषरूपविशिष्टद्वयानुगते विशेषाभावादिद्वारा वेदान्तवेद्येचिन्मात्रे मानान्तरप्राप्तिर्नेति कथं नियमादिविधिः । तदेतदुक्तम् ॥ शब्दैकगम्यतयेति ॥ ननु च यथा मन्त्रार्थज्ञानस्य तन्मूलककल्पसूत्रात्मीयग्रहणकवाक्यादि प्राप्त्या पक्षेऽप्राप्तमन्त्रसाध्यत्वं नियम्यते ''मन्त्रैरेव स्मृतिः साध्ये''ति । तथा

(प्रकाशिका)

वेदान्तमूलकसस्त्रीशूद्रसाधारणस्मृतिपुराणादिप्राप्त्या पक्षेऽप्राप्तविचारपरिपूरणार्थो नियम इति चेन्न । विना विचारं स्वातन्त्र्येण स्मृतिपुराणादिना तज्ज्ञानासिद्धया साधनान्तरत्वासिद्धेर्न नियमविधिः । तदेतदाह ॥ साधनान्तरेति ॥ एतेन श्रुत्यादिविचारस्यापातप्रतीतब्रह्म-तदन्यज्ञानसाधनत्वे प्राप्ते ''इत्यश्वाभिधानीमादत्त'' इतिवदेकस्योभयसम्बन्धप्राप्तावन्य-सम्बन्धनिवृत्तिफलकपरिसंख्येति निरस्तम् । श्रुत्यादिनाऽऽपाततोन्यप्रतीतावपि श्रुत्यादि-विचारस्यान्यज्ञानसाधनत्वाप्राप्तेरित्यलमियता । ननु ''उपरि हि देवेभ्यो धारयती'' त्यादेरधोधारणस्तुतिपरतया प्रतीयमानस्यापि विधिपरत्वं यथा तथा तद्विजिज्ञासस्वे-त्यादेर्ब्रह्मपरतया प्रतीयमानस्यापि तदस्त्वित्याशङ्कां निरस्यति ॥ एतेनेति ॥ ब्रह्मपर-त्वकथनेन ज्ञानहेतुतया विचारप्राप्तिकथनेन चेत्यर्थः । तृतीयेध्याये ''विधिस्तुधारणेऽपूर्व-त्वा''दिति चतुर्थपादीयपञ्चमाधिकरणे ''अधस्तात्समिधं धारयन्ननुद्रवेदुपरि हि देवेभ्यो धारयती''ति मृताग्निहोत्रे श्रुतं वाक्यमुदाहृत्य उपरि हि देवेभ्य इति किं जीवदग्निहोत्रे उपरिधारणविधिरुतानुवाद इति सन्देहे सर्वमभ्यर्हितं द्रव्यं प्रच्छाद्यैव देशान्तरं नेतव्यमित्या-च्छादनस्याचारप्राप्तत्वाद्धविर्गार्हपत्यादाहवनीयं नीयमानमाच्छादनमपेक्षत इति तत्रोच्यमा-नमुपरिसमिद्धारणं दृष्टार्थतालाभादाच्छादनार्थं विज्ञायत इत्यधस्ताद्धारणस्य स्तुत्यर्थ-तयानुवाद इति प्राप्ते ''स्रुग्दण्डेन समिधमुपसङ्गृह्ये''ति श्रवणाद्दण्डप्रदेशे धार्यमाणया समिधा हविःप्रच्छादनायोगात्तद्धारणस्यादृष्टार्थत्वेनार्थवशादप्राप्तमुपरिधारणमत्र विधीयत इति सिद्धांतितम् । एतच्छब्दार्थं द्वेधा विवृणोति ॥ प्रकृतस्येति ॥ उपरिहीति वाक्यस्यान्यपरतया प्रतीतावपि न वस्तुतोन्यपरत्वम् । विचारवाक्यस्य तु वस्तुतो ब्रह्मपरत्वेन वैषम्यादित्यर्थः ।

पाण्डुरङ्गि – एतेन तस्माद्ब्रह्मण इत्यादि ॥ अत्रात्मन्येवात्मानं पश्येत् तद्विजिज्ञास-स्वेत्यादाविव ज्ञानेच्छयोर्विधानाभावेन तत्प्रयुक्तदोषस्याभावात् विचारश्च लक्षणां विनाङ्गी-क्रियत इति तत्प्रयुक्तस्य विधौ लक्षणाया अन्याय्यत्वस्य चाभावादभ्यधिकाशङ्केयमिति ध्येयम् । तर्हि कथमतिदेश इति चेत् न । प्रतीतैकवाक्यताभङ्गरूपपूर्वोक्तबाधकस्यात्रापि समानत्वेनातिदेशोपपत्तेरिति भावः । साधारणदोषमप्याह ॥ विचारस्येति ॥ ''विधिरत्य-न्तमप्राप्तौ'' इति वचनात् ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यादेरिवापूर्वविधित्वासम्भवेपि व्रीहीनवहन्तीत्यादेरिव नियमविधिर्वा पञ्चपञ्चनखा भक्ष्याः इमामगृभ्णन्नशनामृतस्येत्यादेरिव परिसंख्याविधिर्वा किं न स्यादित्यत आह ॥ नियमेति ॥ पाक्षिकप्राप्तस्य विधिर्नियमविधिः नित्यप्राप्ते निषेध्यानिषेध्ययोः साधारण्ये विधिः परिसंख्या विधिरित्यर्थः ॥ वस्तुतोन्य-

(पाण्डुरङ्गि)

परत्वादिति ॥ ''उपरिहिदेवेभ्य'' इत्यस्य चान्यपरतया प्रतीतिमात्रं न तु वस्तुतोन्यपरत्वं तद्विजिज्ञासस्वेत्यादेश्च वस्तुतोन्यपरत्वमिति वैषम्यमिति भावः ।

तात्पर्यचन्द्रिका

नाप्यध्ययनविधेरर्थज्ञानपर्यन्ततया तदाक्षिप्तो विचार इति युक्तम् । स्वमते तस्य नित्यत्वेनार्थज्ञापनपर्यन्तत्वायोगात् । यद्वा स्वर्गकामाधिकरणपूर्वपक्षे विश्वजिदधिकरणपूर्वपक्षे च फलाभावेन नियोज्याभावेन च ''स्वर्गकामो यजेत विश्वजिता यजेते''त्यादिवाक्यमिव उक्तरीत्या विषयाद्यभावेनोपपत्तिविरोधात्तद्विजिज्ञासस्वेत्यादिकमप्रमाणम् । अत एवोक्तं विचारविधायकवाक्यानां गतिद्वयमभ्युपेत्य सुधायां तद्विजिज्ञासस्वेति श्रुत्यर्थस्याद्याप्यनिर्णीतत्वेनेत्युक्तम् । केचित्तु तद्विजिज्ञासस्वेत्यादिकं जीवात्मनो विचारविधायकं न तु ब्रह्मण इति सुधाभिप्राय इत्याहुः । तन्न । जीवस्यासन्दिग्धत्वप्रतिपादकन्यायविवरणविरोधस्य विचारमात्राक्षेपकपूर्वपक्षानानुगुण्यस्य चोक्तत्वात् । तदेतदभिप्रेत्योक्तं न्यायविवरणे ''जीवव्यतिरिक्तेश्वराभावात्तस्य च स्वप्रकाशत्वान्न जिज्ञास्यते''ति ।

प्रकाशिका – ननु स्वाध्यायोध्येतव्य इत्यध्ययनविधेः स्वाध्यायाध्ययनेन फलवदर्थज्ञानं भावयेदित्यर्थज्ञानपर्यन्तत्वस्य निर्णीतत्वात्स्वाध्यायस्यार्थज्ञानकरणत्वं विचारमन्तरा न सम्भवतीत्याक्षेपाद्विचारस्यावश्यकतेत्याशङ्क्य विवरणाभिमतं परिहारमाह ॥ नापीति ॥ स्वमत इति ॥ अद्वैतिमते ''स्वाध्यायस्य तथात्वेन हि समाचारेधिकाराच्चे''ति सूत्रे तदीयभाष्ये तस्य नित्यत्वोक्तेरिति भावः। एवं विचारवाक्यानामभ्युपेत्य मानत्वं गतिरुक्ता । अधुना सौत्रातश्शब्देन वेदप्रामाण्यस्यापि सूचनात्तदनुरोधेनाप्रामाण्येनैव पूर्वपक्षमाह ॥ यद्वेति ॥ षष्ठे ''द्रव्याणां कर्मसंयोगे गुणत्वेनाभिसम्बन्ध'' इत्याद्यपादीयाद्याधिकरणे ''स्वर्गकामो यजेते''त्यादिषु फलभोक्तृत्वरूपाधिकारोस्त्युत नेति विशये प्रत्ययोक्तभावनाया भाव्याकाङ्क्षायामेकपदश्रुत्या धात्वर्थस्य भाव्यत्वेनान्वये पदान्तरोपात्तस्वर्गस्य वाक्यप्रमाणकान्वयायोगात् । लोकप्रयोगात्स्वर्गशब्दितस्य चन्दनादेः क्रियासाधनत्वोपपत्तेः । साधनेचार्जनप्राप्तकामानुवादसम्भवाच्च यागएव भाव्यो न फलमिति फलाभावादप्रमाणमेवमादीति प्राप्ते । पदश्रुतेरपि प्रबलया प्रत्ययश्रुत्या भावनाया विध्युपरोधात्तस्य च चेतनप्रवर्तनारूपस्य

(प्रकाशिका)

पुमर्थभाव्यतां विनानुपपत्तेः । फलेच कामनास्वारस्यात्स्वर्गशब्दस्य प्रीतिवचनत्वेन चन्दनादिषु गौणत्वादत्र तद्ग्रहणे मानाभावाच्च स्वर्गएव भाव्यो न याग इत्यस्त्यधिकार इति सिद्धांतितम् । तथा चतुर्थे ''चोदनायां फलाश्रुतेः कर्ममात्रं प्रतीयेत नह्यशब्दं प्रतीयत'' इति तृतीयपादीयपञ्चमाधिकरणे ''विश्वजिता यजेते''त्यादिषु फलमस्ति नेति संशये फलस्याश्रवणाद्यागभाव्यताप्रतिपादनेन वाक्यस्य पूर्णतयाध्याहारानपेक्षणाच्च नास्ति फलमिति पुरुषप्रवृत्त्ययोगेन विध्यानर्थक्यादप्रमाणमेवमादीति प्राप्ते चेतनप्रवर्तनात्मकविध्यवरुद्धायां भावनायामपुमर्थस्य यागस्यान्वयायोगात्तदंशे वाक्यस्य साकाङ्क्षत्वात्तत्पूरणाय फलपदाध्याहारादस्ति विश्वजिदादीनां फलमिति सिद्धान्तितम् । अत्रोभयत्रापि यथाऽप्रामाण्यपर्यवसायी पूर्वः पक्षः । तथा तद्विजिज्ञासस्वेत्यादावपीत्यर्थः । भट्टमते स्वर्गकामशब्दस्य फलसमर्पकता प्राभाकरमते नियोज्य पुरुषसमर्पकतेत्युभयाभिप्रायेण फलाभावेन नियोज्याभावेन चेत्युक्तम् । विचारवाक्यानां गतिद्वयस्य टीकायामनुक्तेः कथमेवमित्यत आह ॥ अत एवेति ॥ उक्तमिति गतिद्वयविशेषणम् । अस्माभिरिति शेषः । वाक्यानां प्रामाण्येपि लिङादीनामविधायकत्वमप्रामाण्यमेव वेत्युक्तं गतिद्वयमित्यर्थः । सुधावाक्यस्यायमाशयः । विचारवाक्यगतलिङादीनां चन्द्रिकोक्तदिशाविधिशक्तिप्रतिबन्धेनाविधायकत्वादिति वा तत्र वक्ष्यमाणदिशा विषयाद्यभावेनाप्रामाण्येनाप्युपपत्तेरिति वेति । अत एव तत्र पूर्वपक्षोपसंहारे ''तदेवं विषयाद्यनुबन्धविधुरत्वान्न जिज्ञासाकर्तव्या तद्विधयोपि न प्रमाणमित्युक्तमिति भावः । यद्वा श्रुत्यर्थस्येति वाक्योपादानमुपलक्षणं तद्विधयोपि न प्रमाणमित्यपि वाक्यं ग्राह्यम् । तथाचाद्यवाक्येनाद्या गतिः उपसंहारवाक्येन द्वितीयागतिरुक्ता भवतीति भावः । यद्वा अंत्यानुसारादाद्यस्यार्थद्वयमाद्यानुसारादंत्यस्यार्थद्वयं प्रामाण्यपक्षे तद्विधयो न प्रमाणं न विचारविधायका इत्यर्थ इति भावः । यद्यपि ''विना विचारं श्रुत्यर्थस्ये''त्याद्येव सुधावाक्यं तथापि ''ननु तद्विजिज्ञासस्वे''ति शङ्काग्रन्थे सैव श्रुतिरुपात्तेति प्रकृतत्वाद्बुद्धिसौकर्याय तद्विजिज्ञासस्वेति श्रुत्यर्थस्येत्याद्यनुवादः कृत इति न दोषः । ननु सुधावाक्यस्य नायंभावः वक्ष्यमाणदिशा विषयाद्यभावेनाप्रामाण्येनाप्युपपत्त्या श्रुत्यर्थो न निर्णीत इति । किं तर्हि जीवविचारविधायकत्वेनाप्युपपत्त्या ब्रह्मविचारविधायकत्वेनानिर्णीत इत्येव । उपसंहारवाक्यमपि ब्रह्मविचारविधायकं नेत्यभिप्रायम् । अत एव सुधायां जन्माधिकरणे तथैव स्पष्टं विभावयिष्यतीत्युत्तानदृशां भ्रममुट्टंक्य निरस्यति ॥ केचित्त्विति ॥ उक्तमेव पुनः स्मारयति ॥ जीवस्येति ॥ अत्र टीकोक्तं पूर्वपक्षप्रमेयं न्यायविवरणानुसारीत्याह ॥ तदेतदिति ॥

पाण्डुरङ्गि – श्रोतव्य इत्यादिवाक्यानां प्रत्येकं किं जपार्थत्वाद्युक्तिक्लेशेन वेदान्तानामिव तेषामप्यप्रामाण्यमेव पूर्वपक्षोस्त्वित्याह ॥ यद्वा स्वर्गकामेत्यादिना ॥ फलाभावेनेति ॥ भट्टमतेन । नियोज्याभावेनेति । प्राभाकरमतेनेति ध्येयम् ॥ गतिद्वयमभ्युपेत्येति ॥ सुधायां जिज्ञासा कर्तव्या नवेति संशयोत्त्यवसरे श्रुत्यर्थस्याद्याप्यनिर्णीतत्वेनेत्युक्तत्वात् पूर्वपक्षावसरे गतिद्वयेनाविधायकत्वनिश्चय एव विवक्षित इति भावः । विचारविधिवाक्यानां नित्यविधितया अदृष्टार्थत्वेनाप्रामाण्येन वा पूर्वपक्षस्तथोत्त्यवष्टंभेन न कार्यः । तस्या अन्यपरत्वादिति केचिन्मतमुपन्यस्य निराकरोति ॥ केचित्त्विति ॥

तात्पर्यचन्द्रिका

एवं प्राप्ते सिद्धान्तितं भगवता सूत्रकारेण ॥ अथातो ब्रह्मजिज्ञासेति ॥ सिद्धान्तसंक्षेपस्तु ।

जिज्ञास्यं ब्रह्मशब्देन गुणपूर्त्यभिधायिना ।
अपूर्णत्वेनानुभूताज्जीवाद्भिन्नं प्रतीयते ॥

जिज्ञास्यमेव ब्रह्म । तद्विजिज्ञासस्व तद् ब्रह्मेत्यादिश्रुतेः । श्रौतब्रह्मशब्दोक्तया गुणपूर्त्याऽल्पगुणत्वेनानुभूयमानाज्जीवाद्भिन्नत्वेन संदिग्धत्वाच्च,

निर्दोषश्रुतिसाक्षिभ्यां प्रमिते ब्रह्मजीवयोः ।
गुणपूर्त्यल्पगुणते मिथ्येति च न युज्यते ॥

न केवलमथकस्मादुच्यते ब्रह्मेति बृहंतो ह्यस्मिन्गुणा इति श्रुत्या गुणपूर्तिर्ब्रह्मशब्दार्थः । किंतु ब्रह्मशब्दावयवशक्त्यापि । अपरिच्छेदेहि तस्यावयवशक्तिः परस्यापि संमता । गुणापरिच्छेदोपि चापरिच्छेद एव । न च सङ्कोचे हेतुरस्ति । अन्यथा कालमात्रापरिच्छेदस्तदर्थः स्यात् । वक्ष्यते चैतत्सौत्रब्रह्मशब्दव्याख्यानावसरे । टीकायां तु देशमात्रापरिच्छेदार्थत्वेपि तावतैवाणोर्जीवाद्भेदसिद्धेस्तदुपेत्योक्तम् ।

प्रकाशिका – सङ्ग्रहस्तु जीवान्यब्रह्मणोऽभावात्तस्य च स्वप्रभत्वतः । तज्ज्ञानान्मुक्त्यभावाच्च जिज्ञासा नावकल्पते । तथाहीत्याद्यल्पगुणत्वेनानुभवादित्यंतटीकां न्यायविवरण-

(प्रकाशिका)

विवरणपरां व्याख्यातुं पूर्वपक्षोपमर्दकं सिद्धांतप्रमेयं सङ्गृह्णाति ॥ जिज्ञास्यमिति ॥ यद्यपि ब्रह्मशब्दः पूर्णतामात्रवाची तथापि योग्यतया गुणानामन्वयः । अपूर्णत्वेनेति ॥ गुणैरिति सम्बन्धः । साध्यहेत्वोरप्रतीतेः कुत्रत्येन ब्रह्मशब्देनेत्यप्यप्रतीतेर्भिन्नत्वोक्तेरुपयोगादृष्टेश्च कारिकां व्याचष्टे ॥ जिज्ञास्यमेवेति ॥ श्रुत्युक्तापि जिज्ञासा न कार्या । असंदिग्धत्वेना-विषयत्वादित्युक्तमित्यत आह ॥ श्रौतेति ॥ अयमर्थः । ब्रह्मशब्दो गुणपूर्तिनिमित्तकः सन् तद्योग्यमपूर्वं वस्तु बोधयन् जीवापूर्णत्वानुभवसाहित्येन जीवाद्भिन्नमेव बोधयति यदा तदानीमेवापूर्णत्वेन जीवं गृह्णन्ननुभवो ब्रह्मपदोक्ताद्गुणपूर्णाद्भिस्तुनो भिन्नमेव गृह्णाति । ''शास्त्रगम्यपरेशानाद्भेदः स्वात्मन ईयते । अनुभूतिविरोधेन कथमेकत्वमुच्यते'' इति द्वितीयेनुव्याख्यानोक्तेः । एवं च श्रुतिसाक्षिभ्यां भेदे सिद्धे तदुपजीविनो जीवेशौ भिन्नौ विरुद्धधर्मकत्वाज्ज्वलानलवदित्यनुमानस्यापि सम्भवात्प्रत्यक्षानुमानशब्दरूपप्रमाणत्रितयेन भेदावगतेः जीवस्य स्वप्रकाशत्वेन सिद्धत्वेपि तद्भिन्नस्य ब्रह्मणस्तदभावेनागुणत्वाष्टगुण-त्वादिना वादिविप्रतिपत्त्या सन्दिग्धत्वाज्जिज्ञास्यमेव ब्रह्मेति । ननु गुणपूर्त्यादिविरुद्धधर्मस्य मिथ्यात्वात्तेन मिथ्याभेदसिद्धावपि वास्तवाभेदाप्रतिबन्धान्न विषयत्वं ब्रह्मण इत्याशङ्का-निवृत्त्यै प्राप्ता '' न च ब्रह्मणि गुणाध्यासः'' इत्यादि टीका । तदभिप्रायं सङ्गृह्णाति ॥ निर्दोषेति ॥ एतच्च श्रुतिसाक्षिणोर्विशेषणम् । एतच्चानादित्वेन ध्येयम् । श्रुतिः ब्रह्मपदरूपा । ब्रह्मजीवयोरित्युक्त्या टीकोपलक्षणमित्युक्तं भवति । टीकायां ''अथकस्मादुच्यत'' इति श्रुतिमुदाहृत्य गुणपूर्णत्वं ब्रह्मशब्दार्थ इत्युक्तम् । सुधायामवयवशक्त्या । तद्विरुध्यत इत्याशङ्कच द्वयमप्यभिप्रेतमित्याह ॥ न केवलमिति ॥ बृहिवृद्धाविति धातोः ''बृंहेरम् नलोपश्चे''ति मनिन्प्रत्ययेऽमागमेन लोपेच ब्रह्मेति रूपम् । वृद्धिश्च देशकालाभ्यामिव गुणतोपि ग्राह्या । सङ्कोचकाभावादित्यर्थः । अन्यथेति ॥ सङ्कोचकाभावेपि गुणापरिच्छेदस्य त्याग इत्यर्थः । ननु देशकालाभ्यामिव वस्तुतोऽपरिच्छेद एवापरिच्छेदशब्दार्थो न तु गुणाप-रिच्छेद इत्यत आह ॥ वक्ष्यत इति ॥ तर्हि ''देशापरिच्छेदेन च जीवभेदसिद्धे''रिति टीकाविरोध इत्यत आह ॥ टीकायां त्विति ॥ अत्र यत्केनचित्प्रलपितं सर्वेषां वेदान्तानां निर्विशेषचैतन्यरूपे ब्रह्मणि तात्पर्यमाश्रित्य कृतस्य पूर्वपक्षस्य निरासाय सर्ववेदान्त-प्रतिभटत्वेन प्रयुक्तोयं ब्रह्मशब्दो गुणपूर्तिनिमित्तः सन्नपि सर्वानपि वेदान्तानुपक्रमादि-दृढन्यायनिर्णीतादद्वैततात्पर्यात्प्रच्यावयितुं कथं शक्नुयात् । प्रत्युत स्वयमेव तद्गुणभूतत्वात्त-दनुगुणमेवाद्वैतवाद्यभिमततत्त्रिविधपरिच्छेदराहित्यरूपमर्थमवलम्बेत । अत एव ''नस्थान-

(प्रकाशिका)

तोपी''ति सूत्रे सुधायां ''सकलश्रुतिस्मृतीतिहासपुराणानां परमेश्वरस्याशेषदोषदूरत्वे महातात्पर्यात् ''कार्यकारणबद्धौता'' वित्यादिवाक्यं भगवतो दोषित्वे मानं ने''त्युक्तमिति । तदयुक्तम् । सकलवेदस्य विचारविधायकवाक्यानुगुण्येनैवार्थस्य वाच्यतया सर्वस्य तदधीनत्वेन राजाध्ययनविधिवत्तस्य प्राधान्येन तद्गततया विध्युद्देशगततया च श्रुतिरूपत्वाच्च ब्रह्मपदस्य बलवत्त्वात् । श्रुतेश्चाद्वैतबोधकवाक्येभ्यस्तदनुगुणोपक्रमादिलिङ्गेभ्यश्च प्राबल्यस्य ''श्रुति-लिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये परदौर्बल्यमर्थविप्रकर्षा''दिति पूर्वतन्त्रसूत्रे ''शब्दादेव प्रमित'' इति ब्रह्मसूत्रे च वक्ष्यमाणदिशा सिद्धत्वात् एकस्यापि ब्रह्मपदस्य धर्मिसमर्पकतयोपजीव्यत्वाच्च । उक्तं च विष्णुतत्वनिर्णये । ''द्विविधं बलवत्त्वं च बहुत्वाच्च स्वभावतः । तयोः स्वभावो बलवानुपजीव्यादिकश्च स'' इति । वस्त्वभेदो ब्रह्मशब्दार्थ इत्यस्याग्रे निरसिष्यमाणत्वेन निरवकाशत्वाच्च । अद्वैतवाक्यानां तदनुगुणोपक्रमादीनां च सावकाशत्वं चान्यत्र न्यायामृतादौ स्पष्टम् । किंच विचारविधायकनानावाक्येषु ॐब्रह्मात्म-नारायणादियौगिकशब्दानां सहस्रशः सत्त्वेन ब्रह्मपदस्य तादृशानेकश्रुतिसधीचीनत्वाच्च । एकैकस्यापि शब्दस्य ''नारायणं महाज्ञेयं नारायणोसौ परमो विचिंत्यः तद्विजिज्ञासस्व तद् ब्रह्म तपसा ब्रह्मविजिज्ञासस्वे'' त्यादिविचारविधायकनानावाक्येषु बहुशः श्रवणेन प्रत्येकं बाहुल्याच्च । नह्येकस्मिन्सूत्रे एकमेवोदाहरणम् । विश्वतोमुखत्वभङ्गप्रसङ्गात् । वक्ष्यति च इति युक्त्यंतरसूचकत्वादिति । अपि च गुणपूर्त्यर्थेकेन ब्रह्मपदेन विषयसिद्धिं वदता सूत्रकृता श्रुत्यनुभवानुमानानां भेदप्रमापकत्वस्य प्रागुक्तदिशोक्तत्वाच्च । प्रत्यक्षानुभवस्य च न वचनसहस्रमपि बाधकमित्यन्यत्र विस्तर इति यत्किंचिदेतदित्यास्तां विस्तरः । विस्तरस्तु गुरुपादकृतकण्टकोद्धारे द्रष्टव्यः । एतेन विषयाद्यभावेनोपपत्तिविरोधात्तद्विजिज्ञासस्वे-त्यादिकमप्रमाणमिति प्रागुक्तं निरस्तम् । विषयसिद्धेरुक्तत्वात्तदुक्त्यैव फलाधिकारि-सम्बन्धानां सत्त्वलाभाच्चेति ।

पाण्डुरङ्गि – एवं पूर्वपक्षमुज्जीव्य अधिकरणशरीरस्य सुग्रहत्वाय पूर्वपक्षसंदब्धतया सिद्धान्तं वक्तुं सौत्राथशब्दादिव्याख्यानरूपां टीकामुल्लंघ्य सिद्धान्तोक्तिरूपायाः तद् ब्रह्मपदप्रयोगेण परास्तमित्यादिटीकाया निष्ठामाह ॥ जिज्ञास्यं ब्रह्मशब्देनेत्यादिना ॥ अत्र जिज्ञास्यमित्यनेन श्रुतिसिद्धेन जिज्ञास्यजिज्ञासुभावेनापि भेद इति सौत्रजिज्ञासाशब्देन सूचितमिति दर्शितम् । ब्रह्मशब्देनेत्यनेन ब्रह्मेतिशब्द इति ब्रह्मणो वाचकः शब्द इति चार्थद्वयस्य विवक्षितत्वात् ''आत्मा वा अरे द्रष्टव्यः'' इत्यादि वाक्यस्थात्मशब्दैरपि

(पाण्डुरङ्गि)

गुणपूर्तिसिद्धिरिति दर्शितम् । न केवलं जीवस्य गुणपूर्त्या भेदः । किंतु देशापूर्त्यापीति भावेन सामान्यतो पूर्णत्वेनेत्युक्तम् । ननु भेदसिद्ध्यर्थं ब्रह्मणो गुणपूर्तिरिव सूत्रकृता जीवस्याल्पगुणतापि वक्तव्येत्याशंक्यानुभवसिद्धत्वान्न वक्तव्येति भावेनानुभूतादित्युक्तम् । पूर्तिभेदयोः श्रुत्यर्थाभ्यां ब्रह्मशब्दार्थत्वान्नानेकार्थतापीति भावेन पूर्त्यभिधायिनेति भिन्नं प्रतीयते इति चोक्तमिति ज्ञेयम् । तद् ब्रह्मेति जिज्ञास्ये ब्रह्मशब्दश्रवणादिति टीकया न केवलं विचारस्य कर्तव्यत्वेऽसंदिग्धत्वरूपं बाधकमुद्धृतं किंतु तद्विजिज्ञासस्वेति साधकं चोक्तमिति दर्शयितुं श्रुतेस्संदिग्धत्वाच्चेत्युक्तम् । टीकोक्तः परमार्थतोऽब्रह्मत्वप्रसङ्गः श्रुत्युक्तमपि ब्रह्मत्वमध्यस्तमिति वदन्तं प्रतीष्ट एवेति शङ्का ''निर्दोषश्रुतिसाक्षिभ्या''मिति श्लोकस्थायाः श्रुतेः निर्देषतोक्त्याऽपास्ता । तर्हि जीवे अल्पगुणत्वमध्यस्तमस्तीति शङ्कातु न्यायविवरणटीकयोरनुभवपदसूचितस्य साक्षिनिर्दोषत्वस्योक्त्याऽपास्तेति द्रष्टव्यम् । टीकोक्तो गुणापरिच्छेदस्य ब्रह्मशब्दार्थत्वाभावे श्रुतिविरोधः कृत्स्नावयवशक्तित्यागप्रसङ्गस्याप्युपलक्षक इत्याह ॥ न केवलमित्यादिना ॥ वक्ष्यते चैतदित्यनेन पूर्वोक्तं सिद्धांतसंक्षेपत्वमुपपादितमिति द्रष्टव्यम् । देशाद्यपरिच्छेदेनेति टीकायां जीवाणुत्वस्येत्युत्तरवाक्यानुसारेण देशमात्रापरिच्छेद एव हेतुर्विवक्षितः । आदिपदं तु जीवाद्भेदमात्रार्थं किमसंमतगुणापरिच्छेदोक्त्या संमतदेशाद्य-परिच्छेदेपि देशाद्यपरिच्छेद एव हेतुरिति दर्शयितुमित्याह ॥ देशमात्रेति ॥

तात्पर्यचन्द्रिका

नच मन्तव्य इत्यादेर्विष्णुरुपांशुयष्टव्य इत्यादिवदविधित्वमिति वाच्यम् । तत्र जामितादोषोपक्रमतन्निर्हरणांतैकवाक्यमध्यस्थानां विष्ण्वादिवाक्यानां विधित्वे प्रतीतैकवाक्यताभङ्गादेरिव प्रकृते बाधकस्याभावात् । अन्यथा ''स्वाध्यायोध्येतव्य'' इत्यत्राप्यर्हार्थत्वप्रसङ्गात् । प्रयाजादिवाक्यस्य स्वयमवान्तरवाक्यतया विधायकस्यापि पुनर्दर्शपूर्णमासादिवाक्येन वाक्यैकवाक्यतावत्प्रकृतेपि पृथग्विधायकस्यापि ब्रह्मपर-वाक्येन वाक्यैकवाक्यतोपपत्तेश्च । यदभिघारयेदित्यादौ ''अभिघार्यास्त्रैयंबका नाभिघार्या इति मीमांसन्त'' इति मीमांसासमभिव्याहारेणेव ''यस्योभयं हविरार्ति-मार्च्छे''दित्यादौ निमित्तत्वाभिधायकयच्छब्दादिनेवच तद्विजिज्ञासस्वेत्यादौ केनचि-द्विधिशक्तिप्रतिबन्धाभावाच्च । आत्मन्येवात्मानं पश्येदित्यादावपि दर्शनस्य लक्षितस्य विचारस्य वा विधिसम्भवाच्च । सति बाधके विधावपि लक्षणायाः स्वीकृतत्वाच्च ।

(तात्पर्यचन्द्रिका)

अध्ययनविधेरपि विचाराक्षेपकताया विचारविधेरपूर्वविधित्वादेश्च अन्यत्रोक्तत्वाच्चेति। तदेतदभिप्रेत्योक्तं न्यायविवरणे ''तद्विजिज्ञासस्व तद् ब्रह्मेति ब्रह्मशब्देन पूर्णगुणत्वोक्तेर्नानुभवसिद्धाल्पगुणजीवाभेद'' इति ।

प्रकाशिका – ननु प्रामाण्येपि तव्यादेरविधायकत्वमुक्तमित्यतस्तदुद्धरति ॥ न च मन्तव्य इत्यादेरिति ॥ जामिवा एतद्यज्ञस्य क्रियत इत्यादिवाक्ये जामितादोषोपक्रमादग्नीषोमावुपांशु यष्टव्यावित्यन्तेन जामितादोषनिर्हरणस्योपसंहाराच्च । तदन्तमेकं वाक्यमिति निर्णीतत्वेन मध्ये विष्णवादिवाक्यानां विधायकत्वे प्रतीतैकवाक्यता भज्येत । न ह्येवं प्रकृते बाधकमस्तीति भावः ॥ अन्यथेति ॥ बाधकाभावेप्यर्हार्थत्वे । नन्वत्रापि सर्वस्य ब्रह्मपरतया प्रतीतैकवाक्यताभङ्ग एव बाधक इत्यतो दृष्टान्तपूर्वमेकवाक्यतामाह ॥ प्रयाजादीति ॥ तृतीये ''असंयुक्तं प्रकरणादिति कर्तव्यतार्थितत्वा''दिति तृतीयपादीयचतुर्थाधिकरणे दर्शपूर्णमासयोः श्रुतानां समिदादिपञ्चप्रयाजानां परस्पराकाङ्क्षादिरूपेण प्रकरणेन विनियोगोस्त्युत नेति विशये स्वर्गकामस्य दर्शपूर्णमासौ कर्तव्यावित्यर्थपर्यवसानान्निरपेक्षं प्रधानवाक्यम् । समिधो यजतीत्यादेः फलाकाङ्क्षायामपि ''स स्वर्गःस्या'' दिति न्यायेन तल्लाभान्नैराकांक्ष्यान्न प्रकरणेन विनियोग इति प्राप्ते यदि दर्शपूर्णमासौ कर्तव्याविति वाक्यार्थःस्यात्तदा यागक्रियाया निर्ज्ञातप्रकारत्वात्स्यान्नैराकांक्ष्यम् । दर्शपूर्णमासाभ्यां स्वर्गः कार्य इति हि वाक्यार्थः । तत्र न ज्ञायते केन प्रकारेण ताभ्यां स्वर्गः कार्य इति । तेनास्तीति कर्तव्यताकाङ्क्षा । प्रयाजादेस्तु फलाकाङ्क्षा स्पष्टैवेति साकाङ्क्षयोः संनिहितयोरप्रत्यक्षैकवाक्यत्वमात्रकल्पनं फलांतरकल्पनाल्लघीयः । अतः प्रकरणेन समिदादीनां विनियोग इति सिद्धांतितम् ।

अत्र यथा प्रधानवाक्यैकवाक्यता अङ्गवाक्यानां विधायकत्वाविरोधिनी तथा ब्रह्मपरवाक्यैकवाक्यतापि न विचारविधित्वविरोधिनीत्यर्थः । मोक्षहेतुब्रह्मोत्कर्षज्ञानाय प्रवृत्तानामखिलवेदान्तानां विचारापेक्षणात् विचारविधिवाक्यैश्च ब्रह्मज्ञानोद्देशेन तत्करणवेदानुग्राहकतया विचारविधानाद् ब्रह्मपरवाक्यैकवाक्यत्वं द्रष्टव्यम् । यदपि लिङ्गादेरविधायकत्वमुक्तं तदप्युद्धरति ॥ यदभिधारयेदिति ॥ व्याख्यातप्रायमेतत् ॥ यस्योभयमिति ॥ द्वितीये ''विधिमन्त्रयोरैक्यार्थ्यमैकशब्द्यादि''त्याद्यपादीयसप्तमाधिकरणे ''यस्योभयं हविरार्तिमार्च्छेदैन्द्रं पञ्चशरावमोदनं निर्वपे''दित्यादिषु निमित्तप्रतिपादनेनाख्यातांतरैकवाक्य-

(प्रकाशिका)

तामागतेष्वाख्यातेषु विधायकत्वमस्त्युतनेति सन्देहे प्रसिद्धविधायकाख्यातैकरूप्याद्विधायकत्वमिति प्राप्ते निमित्तत्वावगमकेन यच्छब्देन विधिशक्तिप्रतिबन्धान्न विधायकमिति सिद्धान्तितम् । अत्रोभयत्र यथा मीमांसन्ते यस्य इति च विधिशक्तिप्रतिबन्धकत्वम् । प्रकृते तु यतो वेत्यादि पुराकल्पस्वरूपार्थवादेन विध्युन्नयनान्न कश्चित्प्रतिबन्ध इति भावः ॥ दर्शनस्येति ॥ ''पत्न्यवेक्षितमाज्यंभवति । विदुषा कर्मकर्तव्यम् । तस्मात्पश्येतनित्यशः'' इत्यादौ ज्ञानविधिदर्शनान्न प्रागुक्तदोषः । समर्थितं चैतन्न्यायामृते तृतीयपरिच्छेद इति भावः ॥ लक्षितस्येति ॥ ननु विधौ न लक्षणेत्युक्तमित्यत आह ॥ सतीति ॥ अत एव सोमेन यजेतेत्यादौ सोमेन यागं यागेन स्वर्गं कुर्यादिति वैयधिकरण्येनान्वये उद्देश्यत्वोपादेयत्वानुवाद्यत्वविधेयत्वप्रधानत्वगुणत्वरूपविरुद्धत्रिकद्वयापत्तिरूपबाधकेन सोमवता यागेनेति सामानाधिकरण्येनान्वयाय मत्वर्थलक्षणाया अङ्गीकृतत्वात् अन्वयानुपपत्तेस्तात्पर्यानुपपत्तेर्वा लक्षणाबीजस्य विध्यविधिसाधारण्याच्च शाबरवचनस्याप्यनुवादकमुख्यार्थत्वाय विधौ लक्षणा नन्याय्येत्येवंपरत्वादिति भावः । यदप्यध्ययनविधेर्नित्यत्वेन विचारानापेक्षकत्वं विचारस्य ज्ञानहेतुत्वप्राप्त्या विध्यनपेक्षत्वमुक्तं तद्ग्रथमप्युद्धरति ॥ अध्ययनविधेरिति ॥ न्यायामृते तृतीयपरिच्छेदे उक्तत्वादित्यर्थः । विस्तरभयान्नास्माभिरपि लिख्यत इति तत्रैवानुसन्धेयम् । उक्तं सिद्धान्तटीकाप्रमेयं न्यायविवरणमूलमित्याह ॥ तदेतदिति ॥ व्याख्यातप्रायमेतत् ॥

पाण्डुरङ्गि – सिद्धान्ते तद्विजिज्ञासस्वेति वाक्यस्थस्वपक्षसाधकब्रह्मशब्दोपेतत्वेन प्रथममुदाहरणस्य कृतत्वेपि पूर्वपक्षिकृततन्निराकरणक्रमानुसारेणैव तत्समर्थनं कर्तव्यमिति भावेन तत्र श्रोतव्य इत्यस्य विचारविधायकत्वेनानभिप्रेतत्वात्तस्य विचारविधायकत्वमसमर्थ्यैव मन्तव्य इत्यादेस्तत्समर्थयितुं शङ्कते ॥ न च मन्तव्य इति ॥ मध्यस्थानामिति ॥ यद्यपि राणकोदाहृते जामिवा एतद्यज्ञस्य क्रियते यदन्वंचौ पुरोडाशावुपाँशुयाजमन्तरा यजत्यजामित्वायाथो मिथुनत्वायेति तैत्तरीयशाखागते उपांशु याजवाक्ये मध्ये विष्ण्वादयो न पठ्यंते तथापि भाष्यकाररीत्याऽत्रोदाहृते वाक्येपि विष्ण्वादयो मध्ये पठ्यंत एवेति तथोक्तमिति न कोपि दोष इति ध्येयम् ॥ अन्यथेति ॥ बाधकाभावेपि विधायकत्वानङ्गीकार इत्यर्थः । ननु मन्तव्य इत्यादेरपि पूर्वोत्तरब्रह्मवाक्यमध्यस्थतया विधायकत्वे प्रतीतैकवाक्यताभङ्ग एव बाधक इत्यत आह ॥ प्रयाजादिवाक्यस्येति ॥ विधिशक्तीति ॥ एकवाक्यताभङ्गस्य निरस्तत्वादिति भावः ॥ अन्यत्रेति ॥ न्यायामृते तृतीयपरिच्छेद इत्यर्थः । एवमधिकरणशरीरं निर्णीतम् ।

तात्पर्यचन्द्रिका

नन्वत्रानुव्याख्याने "तत्र ताराथमूलत्व" मित्योंकारस्यसूत्रादित्वमुक्त्वा "ओ-तत्ववाची ह्योंकार" इति स व्याख्यातः । सुधायां च "स्रवत्यनोंकृतं ब्रह्म परस्ताच्च विशीर्यत इति श्रुतिबलात्प्रतिसूत्रं ब्रह्मविद्यात्वादाद्यन्तयोरोङ्कारस्योहः कार्यः । न चोह्यमानं वाक्यात्पृथक् । मन्त्रेष्वप्यूह्यमानस्य तदनवयवत्वप्रसङ्गात् । ओङ्कारार्थस्य प्रथमसूत्रवाक्यार्थे समन्वयेनावयवत्वनिश्चयाच्च । असंहिततया निर्देशस्तु सर्वसूत्रे-ष्वनुगतिसूचनार्थ" इत्युक्तम् । तत्कथम् । सूर्यायेत्यूहं प्रति अग्नय इत्यादेरिव प्रकृते स्थानिनोऽभावात् । यथोक्तं

"प्राकृतस्थानपतितपदार्थान्तरकार्यतः ।
ऊहः प्रयोगो विकृत ऊह्यमानतयोदित" इति ॥

नचोहशब्देनाध्याहारो लक्ष्यत इति वाच्यम् । "संयज्ञपतिराशिषा इषेत्वे" त्यादाविव साकाङ्क्षत्वाभावात् ।

किञ्च मन्त्रेष्वप्यूह्यमानस्य तदनवयवत्वमिष्टमेव । ऊहप्रवरनामधेयानाममन्त्र-त्वस्य द्वितीये सिद्धान्तितत्वात् । अपि च ओतत्वस्य न वाक्यार्थेऽन्वयः । ब्रह्मणः शब्दत उपसर्जनस्य पदान्तरोपात्तौ तत्वान्वयानुपपत्तेः । अपि चार्थप्रतीत्यर्थत्वे आदावेव प्रयोगेण चरितार्थत्वादन्ते प्रयोगवैयर्थ्यम् । किञ्च ओङ्कारस्योत्तरत्रानुषङ्गे अनुषक्तस्य "ङ्याप्प्रातिपदिका" दित्यादेः अच्छिद्रेण पवित्रेणेत्यादेः तनूर्वर्षिष्ठे-त्यादेश्च तत्र तत्रार्थान्वयदर्शनात्प्रकृतेप्योङ्कारार्थस्य जन्मादिसूत्रेष्वन्वयो वाच्यः । स चाशक्य इति । उच्यते ।

नात्रोहशब्दो मन्त्रसामसंस्कारोहइत्यादाविव कर्मव्युत्पत्त्या विचारपरः । किन्तु "अध्याहारस्तर्क ऊह" इति प्रसिद्धेर्भावव्युत्पत्त्याऽध्याहारवाचकः । अत एव टुप्टीकायां नवमे "ऊहोनाम तर्कणा साचैकरूपा मन्त्रसामसंस्कारेषु क्रियमाणे" त्यादिना तर्क एव मुख्य ऊहः । तद्विषयत्वान्मन्त्रादेरन्यथात्वमप्यूह इत्युक्तम् । तत्र च स्रवत्यनोङ्कृतमिति श्रुतिरेव मानम् । यद्यप्यत्र स्रवणविशरणपरिहाररूपा-

(तात्पर्यचन्द्रिका)

दृष्टफलार्थत्वं श्रुतं तथापि दृष्टस्यापेक्षितस्यार्थप्रत्ययस्यापि फलत्वसम्भावान्न तत्त्यागः। एवं च स्विष्टकृदादिवदोङ्कारोच्चारणमुभयार्थम् ।

प्रकाशिका –एवं सूत्राभिप्रेतं सिद्धान्तं समर्थ्येदानीं सूत्रावयवभूतान्योङ्कारादीनि पञ्चपदानि व्याचिकीर्षुरोङ्कारं तावद्व्याकर्तुं तस्यादित्वे संमतिं वदन् सुधाशयं स्फुटीचिकीर्षुस्तद्ग्रन्थमाक्षेप्तुमनुवदति ॥ नन्वित्यादिना ॥ सुधायां चेति ॥ ''सर्वत्रानुगतत्वेन पृथगोङ्क्रियतेऽखिलै''रित्येतद्व्याख्यावसर इति भावः । सुधावाक्यानां विक्षिप्तानां सङ्ग्रहेण क्वचिच्छब्दतः क्वचिदर्थतोऽनुवादोऽयम् । अवयवत्वे युक्त्यन्तरमाह ॥ ओङ्कारार्थस्येति ॥ नन्ववयवत्वे अथशब्दवत्संहिततया निर्देशःस्यादित्यत आह ॥ असंहिततयेति ॥ विश्लिष्टतयेत्यर्थः । अङ्गस्येति पाणिनिसूत्रवदिति भावः ॥ सूर्यायेति ॥ नवमे ''प्रकृतौ यथोत्पत्तिवचनमर्थाना''मिति तृतीयपादाद्याधिकरणे दर्शपूर्णमासयोः श्रुतोऽ''ग्नयेजुष्टं निर्वपामी''ति मन्त्रः ''सौर्यं चरुं निर्वपे''दिति विकृतौ चोदकप्राप्तः । तत्राग्निपदस्थाने सूर्यपदप्रक्षेपेणोहितव्यमुत नेति सन्देहे यथावस्थितस्वरूपस्यैवमन्त्रस्यचोदकेन प्रापितत्वादग्निपदेनैन्द्रीवत् गुणवृत्त्या सूर्यप्रकाशनसम्भवान्नोह इति प्राप्ते प्रकृतावग्निशब्दो न स्वरूपविवक्षयाऽऽम्नातः । अदृष्टार्थत्वापत्तेः । किन्तु देवतापदविवक्षया । दृष्टार्थतालाभात् । अतस्तेनैव रूपेण विकृतौ चोदकेन प्रापणादग्निपदस्य वैकृतदेवतापरत्वाभावात्तदुद्धारेण सूर्यपदप्रक्षेपेण चोहितव्यो मन्त्रः । ऐन्द्रीतु स्वरूपेण गार्हपत्ये विनियुक्तेति वैषम्यमिति सिद्धान्तितम् । तत्र यथा सौर्ययागे सूर्यपदस्य चोदकेन प्राप्ते देवस्यत्वेति मन्त्रेऽग्नय इति पदं स्थानिरूपं विद्यते न तथा प्रतिसूत्रमोङ्कारोहस्य स्थान्यस्तीत्यर्थः । इत्यादेरित्यादिपदेन नीवाराणामित्यूहं प्रति व्रीहीणां मेधसुमनस्यमान इति मन्त्रे व्रीहीणामित्यस्येवेति ग्राह्यम् ॥

यथोक्तमिति ॥ तन्त्रवार्तिक इति भावः । प्राकृतः प्रकृतियागीयोयः पदार्थः व्रीह्यग्निलक्षणद्रव्यदेवतारूपः तस्य स्थाने पतितं यत्पदार्थान्तरं विकृतियागसम्बन्धिनीवारसूर्यलक्षणद्रव्यदेवतारूपं तस्य यत्कार्यं प्राकृतकार्यतुल्यं तदर्थं विकृतोयः प्रयोगः सूर्यायेत्यादिरूपः स ऊह इत्युच्यते । कुतः ऊह्यमानतया ऊहविषयत्वादित्यर्थः ॥ संयज्ञपतिरिति ॥ द्वितीये ''व्यवायान्नानुषज्येत'' इत्याद्यपादीयांतिमाधिकरणे ''सं ते प्राणो वायुनागच्छतां संयजत्रैरङ्गानिसंयज्ञपतिराशिषे''ति मन्त्रेषु गच्छतामित्यस्य संयजत्रैरङ्गानीत्यत्र वचनभेदादननुषङ्गे संयज्ञपतिराशिषेत्यत्रापि किं तस्यैवानुषङ्ग उताध्याहार इति सन्देहे

बुद्धिविपरिवृत्तेरनुषङ्ग इतिप्राप्ते संयजत्रैरङ्गानीत्यत्रासम्बन्धेन बुद्धिविपरिवृत्तिभङ्गादनुषङ्गायोगे साकाङ्क्षत्वादध्याहार इति सिद्धान्तितम् । तथा तत्रैवाद्यपादे ''समेषु वाक्यभेदःस्या''दिति षोडशेधिकरणे इषेत्वेत्यादिषु किमेकमन्त्रत्वमुत मन्त्रभेद इति संशये अनुष्ठेयार्थाप्रकाशनात्-अदृष्टार्थत्वे चानेकादृष्टकल्पनापत्तेर्मन्त्रैक्यमिति प्राप्ते ''इषेत्वेति च्छिनत्ति ऊर्जेत्वेत्यनुमार्ष्टी''त्यादिना शाखाच्छेदनादिषु करणत्वेन विनियोगादर्थप्रकाशनरूपक्रियानिर्वर्तनेनैवकरणत्वस्यनिर्वाह्यत्वेन च्छेदनादिकं प्रति साकाङ्क्षत्वाच्छिनद्मीत्याद्यध्याहारेण वाक्यं पूरणीयमिति मन्त्रभेद इति सिद्धान्तितम् । तत्रोभयत्रापि क्रियापदाश्रवणात्तदाकाङ्क्षायामध्याहारः स्वीकृतः । नैवं सूत्रेष्वाकाङ्क्षेत्यध्याहारो न युक्त इत्यर्थः ॥ ऊहेत्यादि ॥ उक्त ऊहः । प्रवरः त्र्यार्षेयादिः । नामधेयं देवदत्तादि ॥ द्वितीय इति ॥ द्वितीयाद्यपादे । अनाम्नातेष्व मन्त्रत्वमाम्नातेषु हि विभागः स्यादिति दशमाधिकरणे ऊहप्रवरनामधेयानां मन्त्रत्वमस्त्युत नेति संशये मन्त्रैकवाक्यत्वेन तन्मध्यनिवेशान्मन्त्रकार्यकरत्वाच्च मन्त्रत्वमिति प्राप्ते रथघोषेण माहेन्द्रस्तोत्रमुपाकरोतीत्यादौ रथघोषादेरमन्त्रत्वेऽपि मन्त्रकार्यकरत्वेनानैकांत्यात् मन्त्रत्वस्याध्येतृप्रसिद्ध्यधीनत्वात्तस्याश्चाध्ययनकाले समाम्नातविषयत्वेन मन्त्रैकवाक्यताया अप्रयोजकत्वादमन्त्रत्वमिति सिद्धान्तितत्वादित्यर्थः । यद्यप्यत्रोह्यमानस्य मन्त्रैकवाक्यतया तदवयवत्वमुपेत्यैव तदपराधस्य ''यदक्तोयज्ञभ्रेषमागच्छेद्यद्यजुष्टोयज्ञ भ्रेषमागच्छे''दित्यादि मन्त्रवैकल्यप्रायश्चित्तानापादकत्वसिद्ध्यर्थममन्त्रत्वं व्यवस्थापितं सुधायां तु तदनवयवत्वमेवापादितं नत्वमन्त्रत्वमपीति नेष्टापादनं युक्तम् । तथाप्यमन्त्रत्वेन तदनवयवत्वं सुधावाक्याभिप्रेतमिति शङ्कितुर्हृदयमिति ध्येयम् ।

यदप्युक्तं ''ओङ्कारार्थस्य प्रथमसूत्रवाक्यार्थे समन्वयेने''त्यादि तदपि नेत्याह ॥ अपि चेति ॥ अधिकारानन्तरं फलवत्त्वाद् ब्रह्मविचारः कार्य इति वाक्यार्थे ओतत्वस्यान्वयाप्रतीतेरित्यर्थः । ननु वाक्यार्थे प्रतियोगिसमर्पकत्वेनान्वयायोगेपि ओतं यद्ब्रह्म तद्विचार इति ब्रह्मविशेषणत्वं स्यादित्यत आह ॥ ब्रह्मणः शब्दत इति ॥ उपसर्जनस्य जिज्ञासाविशेषणस्य । यदि ॐ ब्रह्मजिज्ञासेति समस्तं स्याद्यदिवा ब्रह्मणो जिज्ञासेति ब्रह्मपदं व्यस्तं स्यात् तदा ओतत्वस्य कथंचिद् ब्रह्मपदार्थान्वयः स्यात् न चैवमस्तीति भावः । यदपि स्रवत्यनोङ्कृतमित्यादि तदपि विरुध्यत इत्याह ॥ अपि चेति ॥ यच्चोक्तं ''असंहिततया निर्देशस्तु सर्वसूत्रेष्वनुगतिसूचनार्थ इति तच्च नेत्याह ॥ किञ्चेति ॥ ङ्याप्प्रातिपदिकादित्यादेरिति ॥ व्याकरणे तुर्याध्याये ''स्वौजसमौट्शस्टाभ्यांभिसि''

(प्रकाशिका)

त्याद्युत्तरसूत्रेऽनुवृत्तस्य ङ्याप्प्रातिपदिकादित्यस्य ङ्यंतादाबन्तात्प्रातिपदिकाच्च स्वादयः प्रत्यया भवन्तीत्यर्थो यथा दृश्यत इत्यर्थः ॥ अच्छिद्रेणेति ॥ द्वितीयाद्यपादे ''सर्वेषु'' इत्युपांत्याधिकरणे ''चित्पतिस्त्वापुनातु वाक्पतिस्त्वापुनातु देवस्त्वासवितापुनातु'' इति मन्त्रत्रयानन्तरमाम्नातः । ''अच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिः'' इत्ययं शेषः किं पूर्वयोरनुषज्यते किं वा परस्यैव शेष इति संशये शेषस्यानन्तरसम्बन्धमात्रेण नैराकाङ्क्ष्याच्चात्पूर्वयोश्च स्वत एवाकाङ्क्षाविरहान्नानुषङ्ग इति प्राप्ते पुनातुशब्दैकवाक्यतापन्नस्याच्छिद्रादेस्तत्करणद्वारेण पवनक्रियाप्रकाशनार्थत्वात् तस्य एव पूर्वमन्त्राभ्यामपि प्रकाश्यत्वात् प्रधानवशेनानुकर्षस्य न्याय्यत्वादनुषङ्ग इति सिद्धान्तितम् । तथा तत्रैव ''अनुषङ्गो वाक्यसमाप्तिः सर्वेषु तुल्ययोगित्वात्'' इति सप्तदशेऽधिकरणे ''याते अग्नेऽयाशया तनूर्वर्षिष्ठा गह्वरेष्ठोग्रं वचो अपावधीं त्वेषंवचो अपावधीं स्वाहा । याते अग्नेरजाशया याते अग्नेहराशये''ति ज्योतिष्टोमे श्रुतं मन्त्रत्रयमुदाहृत्य तत्रोत्तरयोर्लौकिकः शेषोऽध्याहार्यः किं वा पूर्वमन्त्रानन्तरपठितस्तनूर्वर्षिष्ठेत्यादिरनुषञ्जनीय इति संशये समाम्नायेन पूर्वत्रैव निबद्धस्य शेषस्यान्यत्र नयनायोगात्सकृदाम्नातस्य सर्वार्थत्वानुपपत्तेरानन्तर्यदेशविशेषाभ्यां विशेषग्रहणेन पूर्वशेषत्वावसायादनुषङ्गायोगे लौकिकस्य काप्यनिबद्धत्वेन सर्वार्थत्वादध्याहार इति प्राप्ते सर्वानन्तर्येण सकृत्पठितुमशक्यो बुद्धिविपरिवृत्तिमात्रेण साकाङ्क्षैः सर्वैः सम्बन्धसिद्धेः पुनः पुनरनाम्नातोऽयं शेषः सर्वार्थेनैवाम्नात इत्यवगमादनुषङ्गो न लौकिकस्याध्याहार इति सिद्धान्तितम् ।

अत्र यथा ''अच्छिद्रेण पवित्रेणे''त्यादेः पूर्वत्रानुषक्तस्य ''चित्पतिस्त्वापुना''त्विति पवनक्रियायां पवित्ररूपकरणसमर्पकतया तनूर्वर्षिष्ठेत्यादेश्च पश्चादनुषक्तस्य रजाशयाहराशयाशब्दितयोः रजतमयत्वहिरण्मयत्वविशेषणयोः तनूलक्षणविशेष्यार्पकतयाऽन्वयो दृष्टः तथा ''जन्माद्यस्ये''त्यादि सूत्रेष्वोङ्कारस्यान्वयो वाच्य इत्यर्थः । एवं पूर्वाद्युक्तान् षडपि दोषानुद्दिधीर्षुर्यत्तावदुक्तं प्राकृतस्थानिनोऽभावान्नोहत्वमिति तदुद्धरति ॥ नात्रोहेति ॥ अग्नये जुष्टमित्यादौ सूर्याय जुष्टमित्यादिर्मन्त्रोहः । यद्योन्यां तदुत्तरयोर्गायतीति कवतीषु रथंतरं गायतीत्यादिषु प्रकृतिग्रन्थे योनावाम्नातानां साम्नामुत्तरादिषु तत्तदानुगुण्येनान्यथा गानं सामोहः । व्रीहिषु श्रुतानामवहननादीनां वैकृतेषु नीवारादिष्वौचित्येनानुष्ठानं संस्कारोह इत्येतेषां निर्देशके ''मन्त्रसामसंस्कारोह'' इत्यादौ मीमांसकव्यवहारे ऊह्यत इति व्युत्पत्त्या यथा प्रयोगविकारपर ऊहशब्दो न तथा प्रकृते ऊह वितर्क इत्यस्माद्भावे घञि

लघूपधत्वाभावेन गुणाभावे चोह इति सिद्धेरध्याहारपर इत्यर्थः । वार्तिककृत्संमतिमाह ॥ अत एवेति ॥ यदत्रोक्तं साकाङ्क्षत्वभावादध्याहारे न मानमिति तत्राह ॥ तत्र चेति ॥ अध्याहार इत्यर्थः । ॐकारानुच्चारणे निन्दाश्रवणात्तदन्यथानुपपत्त्या तदुच्चारणविधेरुन्नयनादाकाङ्क्षाया अभावेपि विधिबलादध्याहार इति भावः । नन्वेवमदृष्टार्थतैव स्यान्नार्थप्रत्यायकत्वम् । तथाच सुधाविरोध इत्याशङ्कामुपक्षिप्य निरस्यति ॥ यद्यपीति ॥ दृष्टस्येति ॥ ॐकारादोतत्वरूपार्थप्रत्ययदर्शनादिति भावः ॥ अपेक्षितस्येति ॥ किन्तु ॐमित्येतदक्षरमित्यादिवक्ष्यमाणदिशेति भावः ॥ स्विष्टकृदिति ॥ चतुर्थे ''आश्रयिष्वविशेषेण भावोर्थः प्रतीयेत'' इत्याद्यपादीयसप्तमाधिकरणे स्विष्टकृदुत्तमप्रयाजपशुपुरोडाशादीनां दृष्टार्थत्वमेवोतादृष्टार्थत्वमपीति विशये प्रकृतदेवतास्मरणेन द्रव्यप्रतिपत्त्याच दृष्टार्थतालाभादेकेन प्रयोजनेन नैराकाङ्क्ष्याच्चानादृष्टार्थत्वकल्पनावकाश इति प्राप्ते । मन्त्रप्रक्षेपांशयोर्दृष्टार्थत्वेपि त्यागांशस्य दृष्टप्रयोजनाभावादृदृष्टार्थत्वमावश्यकमित्यंशभेदेनोभयार्थत्वमिति सिद्धान्तितम् । तद्वदोङ्कारोच्चारणस्यापि श्रुतिबलात्सामर्थ्याच्चोभयार्थत्वमित्यर्थः ।

ननु स्विष्टकृदादौ प्रक्षेपत्यागाद्यवच्छेदकभेदेनोभयार्थत्वं दृष्टम् । नैवमोङ्कारोच्चारणेऽवच्छेदकभेदः सम्भवति । येनोभयार्थत्वं स्यात् । किञ्च यत्रादृष्टार्थत्वं कल्प्यं तत्र दृष्टार्थत्वे सम्भवति नादृष्टार्थत्वमिष्यते । यथा स्वाध्यायोऽध्येतव्य इत्यादौ । यत्र मानांतरवशादृदृष्टार्थत्वमावश्यकं तत्र सम्भवदपेक्षितमपि नदृष्टार्थत्वमाद्रियते । यथा स्तौति शंसतीत्यादौ । अत एव द्वितीयाद्यपादे ''स्तुतशस्त्रयोस्तु संस्कारो याज्यावद्देवताभिधानत्वा''दिति षष्ठेधिकरणे तथैवोक्तम् । तथाच प्रकृते स्रवत्यनोङ्कृतमिति श्रुत्याऽदृष्टार्थत्वे आवश्यके प्रत्यायनार्थत्वानवकाशः । अतः कथमोङ्कारोच्चारणस्योभयार्थत्वमिति चेदुच्यते । स्तौति शंसतीत्यादौ देवताप्रकाशनरूपदृष्टप्रयोजनस्वीकारे गुणसम्बन्धाभिधानलक्षणस्तुतिरूपं विहन्यत इति श्रुतिबाधः स्यात् । अतस्तद्बलादृदृष्टार्थत्वं युक्तम् । उक्तं च ''सत्यं दृष्टार्थता युक्ता श्रुतिश्चेन्न विरुध्यते । देवतास्मरणार्थत्वे स्तुतिरूपं विहन्यत'' इति । प्रकृतेतु दृष्टार्थत्वाभ्युपगमे न काचित् श्रुतिर्बाध्यत इति । न च सामर्थ्यस्य दौर्बल्यमिति युक्तम् । न हि सूत्रेष्वाद्यन्तयोरोङ्कारमुच्चारयेदिति प्रत्यक्षो विधिरस्ति येन दौर्बल्यं सामर्थ्यस्य स्यात् । किं त्वनुच्चारणे निन्दाश्रवणान्यथानुपपत्त्योङ्कारोच्चारणविधिरुन्नेयः । सामर्थ्यं तु प्रत्यक्षम् । अतः श्रुतिसामर्थ्ययोस्तुल्यबलत्वादविरोधाच्चोभयार्थत्वम् । स्विष्टकृदाद्युदाहरणं तूभयार्थत्वसम्भवमात्र इति नकोपि दोषः ।

पाण्डुरङ्गि –अधुना यद्यपि पूर्वमुल्लङ्घितटीका व्याख्येया तथापि अनुव्याख्यानसुधयोः सूत्रस्थाथशब्दादप्योङ्कार आद्यावयव इत्युक्त्वा तस्य च व्याख्यातत्वात्तत्रानुपपत्तिमाशङ्क्य परिहर्तुं तदुक्तमनुवदति ॥ नन्वत्रानुव्याख्यान इति ॥ व्याख्यातत्वमात्रं नावयवत्वनिश्चायकं अतथाभूतानां भर्गादिशब्दानामपि व्याख्यातत्वात् । अन्यथा तेषामपि सूत्रावयवत्वं स्यादित्यत उक्तम् ॥ सूत्रादित्वमुक्त्वेति ॥ संयज्ञपतिरिति ॥ संयज्ञपतिराशिषेत्यत्र संते वायुर्वातेन गच्छतामिति पूर्वत्र श्रुतस्य एकवचनान्तस्य गच्छतामित्यस्य स्वान्वययोग्यत्वेन संयजत्रैरङ्गानीति मध्ये श्रुतेन बहुवचनान्तेन व्यवहिततयाऽनुषङ्गासम्भवेनाध्याहारात् श्रुताध्याहारः । इषेत्वेत्यत्रतु छेदने मन्त्रस्य विनियोगादश्रुतस्यैव च्छिनद्मीत्यस्याध्याहारादश्रुताध्याहारः । अत्राद्योऽनुषङ्गमात्रे दृष्टान्तः । द्वितीयस्तु प्रस्तुते अश्रुताध्याहारे द्वयमपि क्रियायां साकाङ्क्षम् । जिज्ञासासूत्रं तु ओङ्कारे निराकाङ्क्षमिति भावः ॥ ङ्याप्प्रातिपदिकादिति ॥ अत्राद्योऽनुषङ्गः । स्वरितेनाधिकार इति परिभाषासापेक्षोऽनुषङ्गमात्रे दृष्टान्तः । अन्त्यौ तु तन्निरपेक्षौ । तत्राप्युत्तरस्य शब्दस्य पूर्वत्रानुषङ्गरूपो द्वितीयो निरपेक्षानुषङ्गमात्रे । तृतीयस्तु प्रस्तुते निरपेक्षे निरपेक्षे पूर्वस्योत्तरत्रानुषङ्गे इति ज्ञेयम् ॥ स चाशक्य इति ॥

अयं भावः । प्रातिपदिकादित्यत्रास्य शेषस्य स्वौजसमौडित्यादेः शेषिणश्चाकाङ्क्षा । अच्छिद्रेण पवित्रेण वसोः सूर्यस्येत्यत्र अस्य शेषस्यैव क्रियायामाकाङ्क्षा । चित्पतिस्त्वा पुनात्विति शेषिणो निराकाङ्क्षत्वात् । अपावर्धी स्वाहेति स्वाहान्तपूर्वमन्त्रान्वितस्य विशेष्यसमर्पकस्य याशयेति विशेषणान्तरान्वितस्य शेषिण एवाकाङ्क्षा । तनूरिति शेषस्य निराकाङ्क्षत्वात् । प्रकृतेतु जिज्ञासासूत्रान्वितस्य ओङ्काररूपशेषस्य जन्मादिसूत्ररूपशेषिणश्च निराकाङ्क्षत्वेनार्थान्वयोऽशक्य इति । अध्याहारापरपर्यायतर्कस्यैव मुख्योहत्वं टुब्वार्तिककारस्यापि संमतमित्याह ॥ अत एवेति ॥ त्रिविधश्चोह इत्येतदयुक्तम् । कथम् । ऊहोनाम तर्कणा । साचैकरूपा मन्त्रसामसंस्कारेषु क्रियामाणा । सैव सा । न तस्याः कश्चिद्विशेषः । सामग्रहणानर्थक्यं च मन्त्रग्रहणेन संस्कारग्रहणेन चोक्तत्वात् । अत्र वर्णयन्ति । नैव वयमूहभेदं प्रतिजानीमः । किन्तु विषयमस्य निरूपयामः एषु त्रिषु वक्ष्यमाणेषु सम्भवतीति । तस्माद्विषयभेदः प्रदर्श्यते नतु रूपभेद इत्यन्तवाक्यसङ्ग्रहाय क्रियमाणेत्यादिनेत्यादिपदमिति द्रष्टव्यम् ॥

तात्पर्यचन्द्रिका

अत एव नान्ते प्रयोगवैयर्थ्यम् । नाप्युत्तरसूत्रे ओङ्कारार्थस्यानन्वयदोषः । तत्र दृष्टासम्भवेन केवलादृष्टार्थत्वोपपत्तेः । न चैकस्यैकत्रोच्चारणे दृष्टार्थे अन्यत्रापि तथात्वनियमः । मन्त्राणां प्रयोगकाले उच्चारणस्य दृष्टार्थत्वेऽपि जपकाले तस्या-दृष्टार्थत्वदर्शनात् । अन्वेनं मातेत्यादावेकवचनस्यैकपशुके दृष्टार्थत्वेऽपि बहुपशुकेऽदृष्टा-र्थत्वदर्शनाच्च । "नमाता वर्धत" इति श्रुत्या मात्रादिशब्दे ऊहनिषेधात् । अध्याह्रियमाणस्यापादितममन्त्रावयवत्वं च मन्त्रेण सहैककार्यकारित्वाभाव इति नेष्टापत्तिः । जिज्ञासान्विततया प्रथमं प्रतीतस्यौतत्वस्य तत्रासम्भवेन "सप्तदशारत्निर्वाजपेयस्य यूप"इत्यादाविवाङ्गावतारन्यायेन तदुपसर्जनब्रह्मान्वयसम्भ-वाच्च । अर्थवादार्थप्राशस्त्यस्य यजेतेत्यत्रोपसर्जनीभूतयागविशेषणत्वदर्शनाच्च । दण्डी प्रैषानन्वाहेत्यादौ दण्डस्योपसर्जनस्य विध्यन्वयदर्शनाच्च । उक्तं च वार्तिके "विशेषणपरत्वं च दण्डीत्यादिषु दर्शित"मिति ॥ न च ब्रह्मशब्देनैव विषयसूचनादोङ्कारवैयर्थ्यम् । न केवलं जिज्ञास्ये तद्विजिज्ञासस्व तद्ब्रह्मेत्यादौ ब्रह्मपदश्रवणात्तस्य जीवाद्भिन्नत्वेन जिज्ञास्यता । किन्तु"ओमित्यक्षरमुद्गीथमु-पासीते"त्यादौ जीवेष्वसम्भावितगुणपूर्तिवाचकोङ्कारादिश्रवणादपीति युक्त्यन्तरसूच-कत्वात् । अदृष्टार्थमादाववश्यं प्रयोक्तव्यत्वाच्च । यत्त्वध्ययनोपक्रमादावुच्चार्य-माणस्याप्योङ्कारस्य तदवयवत्वं सुधायामेवोक्तं तदपि तदुच्चारणस्यार्थानुसन्धान-द्वारैवाङ्गत्वमभिप्रेत्य ।

प्रकाशिका –यच्चोक्तमर्थप्रतीत्यर्थत्वे अन्ते प्रयोगवैयर्थ्यमिति तत्राह ॥ अत एवेति ॥ अदृष्टार्थमावश्यकत्वादेवेत्यर्थः । यदप्योङ्कारस्योत्तरत्रानुषङ्ग इत्यादि तदुद्धरति ॥ नापीति ॥ नन्वादौ दृष्टार्थत्वेनोच्चरितस्य द्वितीयादावदृष्टार्थत्वे वैरूप्यं स्यादित्याशङ्क्याह ॥ न चेति ॥ मन्त्राणामिति ॥ प्रथमे "तदर्थशास्त्रा"दिति द्वितीयपादीयान्तिमाधिकरणे क्रत्वङ्गभूतानां मन्त्राणां किमर्थप्रकाशनं दृष्टद्वारमुतादृष्टद्वारमिति संशये । उपायान्तरेणापि प्रयोग-वेलायामर्थप्रकाशनसम्भवात्तादर्थ्ये मन्त्राणां नित्यवदाम्नानानर्थक्यापत्तेः । मन्त्रप्रत्यायनाद-दृष्टकल्पनायामुच्चारण एवैतत्कल्पनौचित्यात् पुरुषव्यापारगोचरत्वेन तत्रैव फलाकाङ्क्षायाः सत्त्वाददृष्टार्था मन्त्रा इति प्राप्ते मन्त्रोच्चारणादनुष्ठेयस्मरणं तत्स्मरणात्प्रयोगः तस्मात्फल-

(प्रकाशिका)

मित्येवं दृष्टप्रयोजनलाभान्नादृष्टकल्पनावसरः । यस्तु मन्त्रेणैव स्मर्तव्यमिति नियमस्तस्य न दृष्टं किंचित् फलमित्यदृष्टं कल्प्यते । उच्चारणस्य तु दृष्टमेव फलम् । जपादौ विनियुक्तानां मन्त्राणामर्थप्रत्यायनानपेक्षतयाऽदृष्टार्थमुच्चारणमस्त्विति सिद्धांतितम् । अत्र यथा कर्मणि विनियुक्तानां मन्त्राणामुच्चारणस्य तदनुष्ठानकाले दृष्टार्थत्वं ''त्रिभिरनश्नन् पारायणैः पूतो भवती''त्यादिना पारायणादिषु नियुक्तानां तेषामेवोच्चारणस्यादृष्टार्थत्वं एवमोङ्कारोच्चारणस्यापि श्रुतिबलाददृष्टार्थत्वमित्यर्थः ॥ अन्वेनं मातेति ॥ मन्त्राधिकरण एव ऊह इति गुणसूत्रेणाग्नीषोमीयाच्चोदकेन पशुगणं प्राप्ते ''अन्वेनं माता मन्यतामनुपितानुभ्राते''-त्यध्रिगुप्रैषगतमात्रादिपदानामूहप्रतिषेधपरमेकवचनान्तं मात्रादिपदं न बहुवचनान्तरूपवृद्धिमाप्नुयादित्यर्थकं ''नमाता वर्धत'' इति वचनमन्यत्रोहास्तित्वावगमकतया मन्त्राणामर्थविवक्षायां लिङ्गमुपन्यस्तम् । अत्र यथा पशुगणे मात्रादिपदानामेकवचनान्तानामसमवेतार्थतयोच्चारणमदृष्टार्थमेवैकस्मिन् पशौ दृष्टार्थमित्येकस्यैव प्रयोगभेदेनोभयार्थत्वं तथा प्रकृतेऽपीत्यर्थः ।

अत्र यत्कश्चिदाह । पशुगणे मात्रादिपदानामेकवचनान्तानामसमवेतार्थत्वे स्यात्तदुच्चारणमदृष्टार्थम् । नत्वेतदस्ति । तेषां पशुपरेणैनमितिशब्देन सहान्वयाभावात् । किं त्वनुमन्यतामित्यनेनान्वयः । स च तत्तत्प्रतिसम्बन्धित्वाभिप्रायेण ''ये मानवा विगतरागपरापरज्ञा नारायणं सुरगुरुं सततं स्मरन्ति । ध्यानेन तेन हतकिल्बिषचेतनास्ते मातुः पयोधररसं न पुनः पिबन्ती''ति श्लोक इवैकवचनान्तत्वेप्यविरुद्धः । अतोऽर्थसमवायान्न तदुच्चारणमदृष्टार्थम् । नमाता वर्धत इति वचनं न्यायप्राप्तानूहानुवादमात्रं न प्राप्तोहप्रतिषेधार्थम् । उक्तं च राणके ''एकमात्रादिसम्बन्धे पशुभेदेऽपि मात्रादिशब्दोहस्यानाशङ्क्यत्वात् मात्रादिभेदेप्येकपशुसम्बन्धाभावात्सम्बन्धिभेदादेव तन्भेदसिद्धेर्न्यायादेवानूहावगते''रिति । अतो वचनबलादप्यदृष्टार्थत्वासम्भवात्कथमयं दृष्टान्त इति । तत्र ब्रूमः । साक्षात्पशुपरेदंशब्दान्वयाभावेऽपि बहुत्वेनावगततत्कर्मिकायामनुमतिक्रियायामेकस्य मात्रादेरन्वयासम्भवात्तदन्वयघटनाय बहुवचनान्तत्वेन तेषां पदानामूहावश्यंभावात् । मातुः पयोधररसमित्यादिकं तु गौणतयाप्युपपन्नम् । नेह तदाश्रयणे प्रमाणमस्ति । एवं चात्र वचनबलादेवानूहोङ्गीकार्यः । तस्मादेकवचनान्तानां तेषामुच्चारणं पशुगणेऽदृष्टार्थमित्यकामेनाप्याश्रयणीयमिति नादृष्टार्थानुपपत्तिरिति । राणकोक्तिस्त्वभ्युपगमवादादिना कथंचिन्नेया । ननु बयपशुके अन्वेनान्मातरो मन्यन्तामिति बहुवचनान्ततयोहे सति नादृष्टार्थत्वमित्यत आह ॥ नमातेति ॥ एकवचनान्तो

मातेति शब्दो मातर इति बहुवचनान्ततया न वर्धत इति श्रुत्यर्थः । अत एव महाभाष्ये ''बहुगणवतुडतिसङ्ख्ये''त्यत्र संज्ञार्थकोपि सङ्ख्याशब्दः ''ष्णान्ताष''डित्यत्रानुषक्तः संज्ञिपर इत्युक्तम् । अत ओङ्कारस्योभयार्थत्वं युक्तमिति । यच्चोक्तमूह्यमानस्य तदनवयवत्व-मिष्टमेवेति तदुद्धरति ॥ अध्याह्रियमाणस्येति ॥ वाक्यार्थप्रतीतिरूपैककार्यकारित्वाभावो वाऽदृष्टरूपैककार्यकारित्वाभावो वेत्यर्थः । अन्यथा संयज्ञपतिराशिषेत्यादावध्याहृतस्य गच्छतामित्यस्य तेन सहैककार्यकारित्वं न स्यादिति भावः । एतेन मन्त्रेषूह्यमानस्य संयज्ञपतिरित्यादावध्याह्रियमाणस्य तदनवयवत्वप्रसङ्गात् तेन सहैककार्यकारित्वाभाव-प्रसङ्गादिति सुधावाक्यार्थ उक्तो भवति । यद्यपि सुधायां मन्त्रानवयवत्वमात्रमापादितं नामन्त्रत्वमितीष्टापादनं सुपरिहरं तथाप्यापादनस्यामन्त्रत्वपर्यन्तत्वेपि नानुपपत्तिरिति प्रौढ्या परिहारान्तरमवोचदिति ध्येयम् ।

यदप्यवादि ओतत्वस्य नवाक्यार्थेन्वय इत्यादि तदयुक्तमित्याह ॥ जिज्ञासेति ॥ तृतीये ''आनर्थक्यात्तदङ्गे''ष्वित्याद्यपादीयाष्टमाधिकरणे ''सप्तदशारत्निर्वाजपेयस्य यूप'' इत्यत्रार-त्निसाप्तदश्यं किमूर्ध्वपात्रद्वारा वाजपेयाङ्गमुत यूपद्वारा पशुयागाङ्गमिति संशये अव्यवधा-नात्प्रधानत्वात् प्रकरणानुग्रहाच्च वाजपेयस्याङ्गम् । परिमाणस्य साक्षात्कर्मण्यनन्वयेपि तत्साधनीभूतोर्ध्वपात्रद्वारा तन्निर्वाहः । यूपशब्दोपि सादृश्यादूर्ध्वपात्रमात्रपर इति प्राप्ते देव-दत्तस्य नप्तेतिवत् परंपरासम्बन्धेपि षष्ठ्युपपत्त्या वाजपेयशब्देन पशुयागलक्षणानाश्रयणेपि वाजपेयस्य यूप इति व्यपदेशसम्भवात् श्रुतिसम्भवे यूपशब्दे ऊर्ध्वपात्रमात्रलक्षणाया अन्याय्यत्वाच्च श्रुत्यनुग्रहायाव्यवहितसम्बन्धादित्रयमनादृत्य यूपद्वारा पश्वङ्गत्वमेवाङ्गीकर्तुं युक्तमिति सिद्धान्तितम् । अत्र यथाऽरत्निसाप्तदश्यस्य प्रधानभूतवाजपेयाङ्गत्वेन प्रतीयमान-स्यापि तत्रान्वयासम्भवात्तदुपसर्जनीभूते पशुयागेन्वयः। एवमोतत्वस्यापि जिज्ञासाविशेष-णतया प्रतीतस्यापि तत्रान्वयायोगेन तदुपसर्जनब्रह्मान्वय इत्यर्थः ।

नन्वयं न्यायोऽङ्गाङ्गिभावविषयतया द्वितीये रेवत्यधिकरणेऽभिहित इति चेत् अत्रापि विशेषणस्य विशेष्यभूतजिज्ञासाङ्गतया तदङ्गभूतब्रह्मण्यन्वयादङ्गत्वस्य तदुपकारकत्व-रूपत्वादिति भावः । अत एवार्थवादेत्याद्युदाहरणान्तरमित्येके ॥ अर्थवादेति ॥ प्रत्ययो-पात्तायां भावनायां करणत्वेनोपसर्जनीभूते यागे प्रशस्तो याग इति विशेषणत्वे-नान्वयदर्शनाच्चेत्यर्थः ॥ दण्डी प्रैषानिति ॥ मैत्रावरुणो दण्डी भूत्वा

(प्रकाशिका)

मन्त्रविशेषाननुवदेदित्यर्थः । अत्र दण्डमैत्रावरुणसम्बन्धस्य प्रैषानुवचनसम्बन्धस्य च प्रतीयमानस्य ''क्रीते सोमे मैत्रावरुणाय दण्डं प्रायच्छति मैत्रावरुणः प्रेष्यति चानुचाहे''ति वाक्याभ्यां प्राप्तत्वेनाविधेयत्वात् स्थित्वोच्चैरनवानं प्रैषानुवचनं कुर्वतो मैत्रावरुणस्यावलंबनापेक्षायां मैत्रावरुणार्थत्वेनावगतस्य दण्डस्य तदुपकारद्वाराऽपेक्षायाः सत्वाच्च ''लोहितोष्णीषा ऋत्विजः प्रचरन्ती''त्यत्रेव प्रकृत्यर्थत्वेनोपसर्जनीभूते दण्डे प्रैषानुवचनसम्बन्धित्वेन विध्यन्वयदर्शनाच्चेत्यर्थः । विशेषणपरत्वं विधेरिति शेषः ॥ गुणपूर्तिवाचकोङ्कारादीति ॥ ''ओतत्ववाची ह्योङ्कारो वक्त्यसौ तद्गुणोतता''मित्यनुव्याख्यानरीत्येति भावः । आदिपदोपादानेन ओङ्कार उपलक्षणं नारायणादिपदादपीत्यपि सूचयति ।

नन्वोङ्कारस्य गुणपूर्तिवाचित्वे कथं ब्रह्मपदेनान्वयः । तस्यापि गुणपूर्तिवाचित्वेन गुणपूर्णं गुणपूर्णमित्यनन्वयादिति चेन्न । ''आत्मेति तूपगच्छन्ति ग्राहयन्ति चे''त्यत्रात्मशब्दस्याऽऽवृत्तिमाश्रित्य एकस्य यौगिकत्वमपरस्य रूढत्वमुपेत्य आत्मा विष्णुरात्मा स्वामीत्यर्थस्य सुधायां चतुर्थाद्यपादे उक्ततया तद्वदिहाप्योंब्रह्मशब्दयोरेकस्य यौगिकत्वमपरस्य रूढत्वमाश्रित्य ओं गुणपूर्णस्य ब्रह्मणो विष्णोः जिज्ञासेत्युक्तौ दोषाभावात् । न च द्वयोर्यौगिकत्वोक्तिविरोधो द्वाभ्यां विषयलाभोक्तिविरोधश्चेति वाच्यम् । द्वयोर्विष्णौ योगरूढत्वेनैकैकस्य योगांशं रूढ्यंशमुपादायान्वयोक्त्युपपत्तेः । ननु च सूत्रे ब्रह्मपदवदोंपदेन जिज्ञासायां कर्मकारकार्पणे ह्येवं युक्त्यंतरं सूचितं स्यान्नान्यथेति चेन्न । अन्योन्यविशेषणविशेष्यभावेन ओंब्रह्मपदयोःजिज्ञासायां कर्मकारकार्पणेनापि विशिष्टे जिज्ञास्यतान्वये नैतत्सूचनोपपत्तेः । इति युक्त्यन्तरेत्युपलक्षणम् । ''ओतत्ववाची ह्योङ्कारो वक्त्यसौ तद्गुणोतताम् । स एव ब्रह्मशब्दार्थो नारायणपदोदितः । स एव भर्गशब्दार्थो व्याहृतीनां च भूमतः । भावनाच्चैव सुत्वाच्च सोऽयं पुरुष इत्यपि । स एव सर्ववेदार्थो जिज्ञास्योऽयं विधीयते'' इत्यनुव्याख्यानोक्तरीत्या व्याहृतिगायत्रीपुरुषसूक्तद्वारावा ''तद्यथा सर्वाणि पर्णानि शङ्कुना सन्तृण्णान्येवमोङ्कारेणैव सर्वावाक् सन्तृण्णे''त्यादि श्रुत्या सुधोक्तरीत्या साक्षादेव वा मीमांसानुग्राह्यसर्ववेदरूपप्रमाणोक्त्यर्थत्वादित्यपि ग्राह्यम् । नन्वेवं ''नारायणोऽसौ परमो विचिन्त्य'' इत्यादौ श्रुतनारायणपदं हित्वा ॐकारप्रयोगे किं बीजमित्यत आह ॥ अदृष्टार्थमिति ॥ नैवं नारायणादिशब्द इति भावः । यदपि सुधायामखिलैर्वेदपाठकैरित्यादिना दृष्टान्तस्य साध्यविकलतेत्यन्तेनाध्ययनोपक्रमे उच्चार्यमाणस्योङ्कारस्य तदवयवत्वमुक्तं तदयुक्तं भाति । अध्ययनोपक्रमविरतिवैचित्र्येण तत्तत्स्थान-

परित्यागेनान्यान्यस्थानेऽखिलैः पठ्यमानस्य तस्य वेदवाक्यानवयवतायाः सुप्रसिद्धत्वात् । अन्यथा अध्ययनोपक्रमवैचित्र्येऽपि ''ओमिति ब्रह्मे''त्यादिवन्नियतस्थानतया पाठप्रसङ्ग इत्यत आह ॥ यत्त्विति ॥ ओङ्कारार्थस्यौतत्वादेः अधीयमानमन्त्रार्थेऽन्वयानुसन्धान-द्वारैवेत्यर्थः । यद्वा ''ओमिति ब्राह्मणः प्रवक्ष्यन्नाहे''त्यत्र तैत्तिरीये ''एवं स्वाध्याय-कृन्नाहे''ति भाष्योक्तदिशार्थानुसन्धानद्वारैवेत्यर्थः ।

पाण्डुरङ्गि – ननु स्विष्टकृद्यागस्य मन्त्रपाठहविःप्रक्षेपत्यागरूपांशत्रयवत्त्वेन तत्र मन्त्रपाठहविःप्रक्षेपयोर्द्रव्यदेवतासंस्कारकत्वेन त्यागस्य चादृष्टार्थत्वेनेत्यंशभेदेनैव दृष्टादृष्टार्थ-त्वेन विरोधाभावेपि प्रकृते एकस्यैवोङ्कारस्य दृष्टार्थत्वे तद्वदंशभेदाभावाद्विरोध एवेत्यरुचेराह ॥ मन्त्राणामिति ॥ न च एवमपि वैषम्यम् । तत्र विरोधपरिहारकस्य कालभेदस्येव प्रकृते कस्यापि तस्याभावादिति वाच्यम् । ब्रह्मशब्दान्वितत्वदशायां दृष्टार्थत्वस्य तदनन्वितत्व-दशायामदृष्टार्थत्वस्य चाङ्गीकारेण विरोधादिति भावः ॥ ब्रह्मान्वयसम्भवाच्चेति ॥ नन्वेवमुभयोरपि पूर्णत्वार्थत्वात् पूर्णं पूर्णमित्युक्तौ पौनरुक्त्यमिति चेन्न । एकस्य संज्ञात्वस्यान्यस्य च पूर्णार्थत्वस्याङ्गीकारेणापौनरुक्त्यात् । तथाचोक्तमृग्भाष्यटीकायाम् । परि॒यदि॑द्र॒ रोद॑सी उ॒भे अबु॑भोजीर्महि॒ना वि॒श्वत॑स्सीमिति ऋग्व्याख्यानावसरे एक इन्द्रशब्दः संज्ञा द्वितीयः परमैश्वर्यवचन इति ॥ वाजपेयस्य यूप इत्यादाविवेति ॥ अत्र यूप उपसर्जनस्यान्यान्वये दृष्टान्तः । यागः शब्दत उपसर्जनस्यान्वये दण्डस्तु प्रस्तुते शब्दत उपसर्जनस्य प्रातिपदिकार्थस्यान्वय इति द्रष्टव्यम् ।

तात्पर्यचन्द्रिका

सन्यायरत्नावल्यां तु ''ओङ्कारस्तु पृथगुच्चारितो वेदितव्यः । नाथशब्द-वत्सूत्रोपनिबद्ध''इति सूत्रात्पार्थक्यमेवोक्तम् । तत्रानुव्याख्याने ओतत्ववाचीत्यादिना तदर्थकथनं सर्ववेदव्याख्येयोङ्कारार्थवाचकश्रीनारायणपदवाच्यस्य सर्ववेदार्थत्वाच्छा-स्त्रविषयत्वमित्यभिप्रेत्य । न तु सूत्रार्थतया । अन्यथा भर्गादिपदानामपि सूत्रावय-वत्वं स्यात् । स एव भर्गशब्दार्थ इति तदर्थस्यापि कथनादिति भावः । यद्वा मास्तु ''स्रवत्यनोङ्कृत''मित्यनेन साधारणोङ्कारस्याद्यसूत्रावयवता । तथापि

(तात्पर्यचन्द्रिका)

''ओङ्कारश्चाथशब्दश्च तस्मात्प्राथमिकौ क्रमात् ।
तद्धेतुत्वं वदंश्चापि तृतीयोऽत उदाहृतः ।
अतश्च पूर्वमुच्चार्याः सर्व एते सतां मताः'' ॥ इति

भाष्योदाहृतस्मृत्याऽथातश्शब्दतुल्यतया आद्यसूत्रावयवताया उक्तत्वादनुव्याख्याने तत्रताराथमूलत्वमित्यथशब्दतुल्यतयोङ्कारस्य आद्यसूत्रावयवत्वोक्तिर्युक्ता । एवं च सन्न्यायरत्नावली स्रवतीत्यादिश्रुतिप्रापितसाधारणोङ्कारविषया । सुधातु ओङ्कारश्चेत्यादिस्मृतिप्रापितासाधारणोङ्कारविषयेति द्रष्टव्यम् । यद्वा सन्न्यायरत्नावल्युक्तं पृथक्त्वमूह्यमानत्वं न तु वाक्येऽनन्वय इत्यविरोध इत्यादि द्रष्टव्यम् ।

प्रकाशिका –एवं सुधोक्तमवयवत्वं समर्थ्य प्राचीनानुव्याख्यानटीकाशयमाह ॥ सन्न्यायरत्नावल्यां त्विति ॥ तुशब्दसूचितं सुधातो विशेषमाह ॥ ओङ्कारस्त्विति ॥ पृथगोङ्क्रियते इत्यस्यार्थः पृथगुच्चारितो वेदितव्य इति । ननु सूत्रानवयवत्वे ओतत्ववाची ह्योङ्कार इत्योङ्कारार्थोक्तिरसङ्गतेत्यत आह ॥ तत्रेति ॥ एतन्मत इत्यर्थः । वेदव्याख्येयो ह्योङ्कारः प्रसिद्धः । ओङ्कारेणैव सर्वावाक् सन्तृण्णेत्यादेः । तस्य च योऽयं गुणौतत्वरूपोऽर्थः तस्य वाचको नारायणशब्दः । तदर्थस्य सर्ववेदार्थत्वान्नारायणस्यैव शास्त्रविषयत्वमिति भावेनेत्यर्थः ॥ अन्यथेति ॥ सूत्रावयवस्यैवार्थकथने । ननु तर्हि वचनद्वयस्य प्रामाण्यादेकस्यैवावयवत्वानवयवत्वे कथं स्याताम् । न च व्रीहियववद्विकल्पः । वस्तुनि विकल्पायोगात् । न च ''विप्रतिषेधे परं'' इति परस्य प्राबल्यम् । पूर्वस्यापि नुटो नुमचिरतृज्वद्भावेभ्यः प्राबल्यदर्शनादित्याशङ्क्य भिन्नविषयतया न विरोध इत्याह ॥ यद्वेति ॥ अयमर्थः । यथा ह्यष्टाक्षरादावेक ओङ्कारस्तदवयवः अन्यौच द्वावदृष्टार्थौ एवमाद्यसूत्रेप्येकस्तदवयवःअन्यौचाद्यन्तयोरदृष्टार्थाविति त्रय ओङ्काराः । तत्राद्यस्यादृष्टार्थस्य तदनवयवत्वं अन्यस्य त्वोतत्वरूपार्थावबोधनेन तदवयवत्वमिति । अत्रादृष्टार्थकोङ्कारसत्त्वे मानमाह ॥ स्रवतीति ॥ दृष्टार्थकतत्सत्त्वे मानमाह ॥ ओङ्कारश्चेति ॥ ननु श्रुतिप्रापितोङ्कारस्य स्मृतिविषयत्वसम्भवान्नोङ्कारद्वयं कल्प्यमिति भावेनैकविषयत्वेप्यविरोधमाह ॥ यद्वेति ॥ पृथगुच्चारितो वेदितव्य इत्यस्य सर्वसूत्रेषूहनीयः नत्वेतत्सूत्रमात्रसम्बद्ध इत्यर्थः । नत्वेतत्सूत्रेऽन्वयप्रतियोगिसमर्पको नेत्यर्थः । एवं चानुव्याख्याने ओतत्वरूपार्थोक्तिरपि सङ्गच्छत इति भावः ।

ननु ''अथातश्शब्दपूर्वाणि सूत्राणि निखिलान्यपी''ति भाष्योदाहृतस्मृतौ अथातः शब्दयोरेव प्राथम्यं सिद्धवत्कृत्य ''कश्चार्थश्च तयोर्विद्व''न्नित्यादिना तयोरेव प्रश्नपरिहारयोः प्रवृत्तेः ''सूत्रेषु तु महाप्राज्ञास्तावेवादौ प्रयुंजत'' इत्यवधारणेनोङ्कारव्यवच्छेदपूर्वं तयोरेवादित्वोपसंहाराच्च कथमोङ्कारस्यादित्वमुपेत्यानुव्याख्याने व्याख्यातमिति चेन्न । उपक्रमादिना तयोः सूत्रावयवत्वस्यैव सिद्ध्या ओङ्कारस्याव्यवच्छेदादोङ्कारस्य माङ्गलिकत्वादिनाऽऽदित्वं ''ओङ्कारश्चाथशब्दश्च सिसृक्षोः परमाद्विष्णोः स्रवत्यनोङ्कृतं ब्रह्मे''त्याद्यनेकमानसिद्धमिति निश्चिन्वता अथातश्शब्दमात्रविषयकप्रश्ने कृते तत्रैव परिहार इत्युपपत्तेः । अत एव टीकायां मङ्गलोत्त्यादेः शब्दान्तरेण सम्भवादित्युक्तम् । तावेवादावित्युपसंहारस्थावधारणस्यापि ब्रह्मशब्दादिव्यवच्छेदकत्वोपपत्तेः । ब्रह्मशब्दाद्यपेक्षया तावेवेति तावादौ प्रयुञ्जत एवेति वा भिन्नक्रमेणाप्युपपत्तेः । विरोधाधिकरणन्यायेनोक्तश्रुतिविरोधेन तावेवेत्युपसंहारस्योक्तार्थानुसरणावश्यंभावाच्च । ओङ्कारव्यवच्छेदभ्रान्तिनिरासायैव सिसृक्षोरिति स्मृत्योंकारस्य मुख्यादित्वमथातःशब्दयोरमुख्यादित्वं चाभिधाय अतश्च पूर्वमुच्चार्या इति पूर्वोच्चारणविधानाच्च । ननु च ओङ्कारस्य सूत्रावयवत्वे सूत्रव्याख्यार्थं प्रवृत्तो भगवान्भाष्यकारः किमित्योङ्कारं हित्वाऽथादिपदान्येव व्याचख्याविति चेदत्राहुः । उत्तरप्रस्थाने व्याकरिष्यमाणत्वादिह त्यक्तम् । अत एवेहानुक्तमपि वर्णकान्तरं सूत्राणां तत्रोच्यत इति वा ओङ्कारार्थस्य च्छान्दोग्याद्युपनिषद्भाष्योदाहृतवचनैः व्यख्यातत्वान्नेह व्याख्यायत इति वेति । यद्वा पूर्वपक्षप्रापकाधिकार्याद्यभावरूपहेतुचतुष्टयनिरासस्य अथादिपदैरेव करणात्तेषामेवेह व्याख्यानम् । तावत एवोपयोगात् । ओङ्कारस्य त्वदृष्टार्थतयाऽवश्यकस्य दृष्टार्थोऽपि सम्भवतीत्यभिप्रेत्यानुव्याख्याने व्याख्यानमिति । अथशब्दादिवैलक्षण्यज्ञापनायेह अव्याख्यानमित्यप्याहुः । यदत्र केनचित्प्रलपितं ओङ्कारस्यादित्वे सूत्रावयवत्वे गुणपूर्त्यर्थत्वे स्रवत्यनोङ्कृतं ब्रह्मेत्यत्र ब्रह्मपदेन सूत्रग्रहणेच मानं नेत्यादि तत्सर्वस्य खण्डनं गुरुपादकृतन्यायमौक्तिकमालायां द्रष्टव्यम् ।

पाण्डुरङ्गि – सन्न्यायरत्नावलीमतमुपपादयितुमनुवदति । सन्न्यायरत्नेति ॥ नन्वेवमनुव्याख्याने तत्रताराथमूलत्वमित्यादिना सूत्रावयवत्वोक्तेः का गतिरित्यत उक्तम् ॥ सर्ववेदव्याख्येयेति ॥ अनेन ताराथौ मूले व्याख्येयतया यस्येति ताराथमूलं तद्भावस्ताराथमूलत्वमित्यनुव्याख्यानं व्याख्यातम् । अस्मिन्पक्षे सुधासन्न्यायरत्नावल्योर्विरोध इत्यरुच्याह ॥ यद्वेति ॥ नन्वस्मिन्पक्षे सुधायां ओङ्कारश्चाथशब्दश्चेत्यादिस्मृत्युदाहरणमकृत्वा

(पाण्डुरङ्गि)

स्रवत्यनोङ्कृतमिति स्मृत्युदाहरणमसङ्गतं ओङ्कारद्वयकल्पने गौरवं चेत्यरुचेराह ॥ यद्वेति ॥ तथाच सुधायाः सन्न्यायरत्नावलीव्याख्यानरूपत्वान्न विरोध इति भावः । एवमोङ्कारस्यानुव्याख्यानोक्तं सूत्रावयवत्वं समर्थितम् ।

तात्पर्यचन्द्रिका

ननु प्रतिवचनाद्यभावेन प्रश्नाद्यर्थत्वासम्भवेऽपि ''अथशब्दानुशासन'' मित्यादाविवारम्भरूपाधिकारार्थोऽथशब्दः कस्मान्न स्यात् । अत्र परेषां भाष्यं ''ब्रह्मजिज्ञासाया अनधिकार्यत्वा''दिति । तन्न । इच्छाया आरभ्यत्वासम्भवेपि विवरणरीत्या जिज्ञासाशब्दस्य विचारलक्षकत्वे तस्यारभ्यत्वसम्भवात् । ननु आनन्तर्याभिधानमुखेन शास्त्रीयस्याधिकारिणो न्यायतः समर्पणाभावे विचारो निरधिकारिकोऽननुष्ठेयः स्यादित्यधिकारितद्विशेषणप्रयोजनलाभायानन्तर्यार्थतेति चेत् । नताव-द्विचारविधौ त्वत्पक्षे मुमुक्षुरधिकारी मोक्षश्च फलमिति युक्तम् । विचारो मोक्षसाधनतया न प्राप्त इति तद्विधेरपूर्वविधित्वापातात् । मुमुक्षोरपि ज्ञानकामनां विना विचारेऽप्रवृत्तेः । त्वन्मते च वक्ष्यमाणरीत्या ज्ञानकामनानुपपत्तेश्च । नापि विचारविधौ ज्ञानकामोऽधिकारी ज्ञानं च फलमिति युक्तम् । अध्ययनविधेर्ज्ञानकामाधिकारं निषेधता त्वयाऽज्ञाते ज्ञाने कामनायोगात् ज्ञानज्ञाने च तदवच्छेदकविषयस्यापि ज्ञातत्वात्पुनस्तज्ज्ञाने कामनायोगादिति युक्त्या ज्ञानकामनानिषेधात् ।

ननु परोक्षज्ञाने कामनाऽयोगेपि परोक्षेण प्रतिबद्धापरोक्षेण वा ज्ञानेन ज्ञातब्रह्मावच्छिन्ने अपरोक्षज्ञाने अप्रतिबद्धापरोक्षज्ञाने वा कामनाश्रवणरूपविचारविध्यधिकारिविशेषणमिति चेन्न । इच्छाया अपरोक्षत्वात्तदवच्छेदकज्ञानावच्छेदकविषयस्याप्यपरोक्षत्वादिच्छासमकालवृत्त्यपरोक्षज्ञानस्य विचारसाध्यत्वानुपपत्तेः । अन्यानवच्छेदेनापरोक्षज्ञानस्य विचारसाध्यत्वे च तादृशपरोक्षज्ञाने कामना तस्य विचारसाध्यत्वं चास्तु ।

प्रकाशिका – एवमोङ्कारव्याख्यानं समर्थ्य अधिकारानन्तर्यार्थः अयमथशब्द इत्यथशब्दव्याख्यानं समर्थयितुमाक्षिपति ॥ नन्विति ॥ ''मङ्गलानन्तरारम्भप्रश्नकात्स्न्यैर्ष्वथो

अथे''त्यभिधानात् प्रतिवचनाभावेन ''अथ भगवन्तं ब्रूते''त्यादाविव प्रश्नार्थत्वायोगोपि कात्स्न्र्येन ब्रह्मविचारकरणस्य बाधेन तदर्थकत्वायोगेपि मङ्गलस्य वक्ष्यमाणदिशा वाच्यार्थत्वाभावेप्यारम्भार्थत्वं किं नस्यादित्यर्थः । आदिपदादथयोगानुशासनमित्यादेर्ग्रहणम् । एवमाक्षिप्तस्य स्वयं समाधानं करिष्यन्यदत्राद्वैतिनां परिहारभाष्यं ''तत्राथशब्द आनन्तर्यार्थः परिगृह्यते । नाधिकारार्थः । ब्रह्मजिज्ञासाया अनधिकार्यत्वात् । मङ्गलस्य च वाक्यार्थे समन्वयाभावादर्थान्तरप्रयुक्त एव ह्यथशब्दः श्रुत्या मङ्गलप्रयोजनो भवति । पूर्वप्रकृतापेक्षायाश्च फलत आनन्तर्याव्यतिरेका''दित्यन्तं भाष्यं क्रमेण दूषयितुमनधिकार्यत्वादित्युक्तं तावद्दूषयितुमनुवदति ॥ अत्रेति ॥ इच्छाया इति ॥ जिज्ञासापदमुख्यार्थभूतज्ञानेच्छाया इत्यर्थः । अत एव भामत्यां लक्षितविचारारम्भार्थत्वमथशब्दस्य भविष्यतीति मत्वा ''न च स्वार्थपरत्वस्योपपत्तौ सत्यामन्यार्थकल्पना युक्ते''ति तल्लक्षकत्वमेव निरस्तम् । अवतारितं च कल्पतरौ तथैवेति ॥ परभाष्यस्याभिप्रायान्तरमाशङ्कते ॥ नन्विति ॥ सत्यमेवं तथापि मन्मत एवेदं युज्यते न तु त्वन्मत इति भावेन तन्मतं दूषयितुं किं मुमुक्षरधिकारी मोक्षःफलं उत ब्रह्मज्ञानकामोधिकारी ब्रह्मज्ञानं च फलं अथापरोक्षज्ञानकामोऽधिकारी ब्रह्मापरोक्षज्ञानं च फलं यद्वा अप्रतिबद्धब्रह्मापरोक्षज्ञानकामोऽधिकारी तादृशज्ञानं च फलं अथवा ब्रह्मेतरानवच्छिन्नब्रह्मापरोक्षज्ञानकामोधिकारी तादृशज्ञानं च फलमिति पञ्चपक्षान्हृदि निधायाद्यं तावद्दूषयति ॥ न तावदिति ॥ ज्ञानहेतुत्वेन विचारस्य लोकतोऽवगमेपि मोक्षोद्देशेन विचारविधावपूर्वविधित्वमेव स्यात् । न चेष्टापत्तिः । त्वया नियमविधित्वाङ्गीकारादिति भावः । मोक्षःफलमित्यंशं निरस्य मुमुक्षुरधिकारीत्यंशं निरस्यति ॥ मुमुक्षोरिति ॥ विचारस्य ज्ञानद्वारेणैव मोक्षहेतुत्वादिति भावः । द्वितीयं निरस्यति ॥ नापीति ॥ अध्ययनेति ॥ स्वाध्यायोध्येतव्य इत्यस्य ज्ञानकामाधिकारिकत्वे ज्योतिष्टोमादिवत्काम्यतैव स्यात् । इष्यते च नित्यत्वम् । अतो ज्ञानकामाधिकारिकत्वं यया युक्त्या निरस्यते तयैव विचारविधावपि तदधिकारिकत्वस्य निरासादित्यर्थः । तामेव युक्तिमाह ॥ अज्ञात इति ॥ कामनायां धर्मिभूतज्ञानस्याज्ञाने कारणीभूतधर्मिज्ञानाभावात्कामनाया अयोगः । धर्मिभूतज्ञानस्य च ज्ञाने विषयमगृहीत्वा तदवच्छिन्नज्ञानग्रहणायोगाज्ज्ञानज्ञानेन विषयभूतधर्म्यादेरपि ग्रहणात्सिद्धे इच्छाविरहेण धर्मिज्ञानादौ न कामना सम्भवतीत्यर्थः ।

उक्तदोषपरिजिहीर्षया तृतीयचतुर्थौ शङ्कते ॥ नन्विति ॥ यदा परोक्षज्ञानेन ज्ञातं ब्रह्म तदा तदवच्छिन्नापरोक्षज्ञाने कामना यदात्वपरोक्षज्ञानेन ज्ञातं तदा तदवच्छिन्ना प्रतिबद्धा

(प्रकाशिका)

परोक्षज्ञाने कामना । एवं च धर्मिभूतज्ञानज्ञानस्य परोक्षत्वेऽपरोक्षत्वे वा न कश्चिद्दोष इति भावः । श्रवणरूपेति पररीत्या । एतच्च श्रवणसाध्यस्येत्यादिवक्ष्यमाणदूषणसौकर्याय । पक्षद्वयमप्येकेन दोषेण निराह ॥ इच्छाया इति ॥ कामनाया इच्छात्वादिति भावः । एवं चेच्छाविषयकमपरोक्षज्ञानं स्वविषयमिच्छां गृह्णत् इच्छाविषयं ज्ञानं तदवच्छेदकं ब्रह्मचाविषयीकृत्य नेच्छां विषयीकर्तुमलमिति इच्छाविषयापरोक्षज्ञानस्यैव ब्रह्मापरोक्ष-ज्ञानतया स्वविषयेऽप्रतिबद्धत्वेन ब्रह्मविषयका प्रतिबद्धापरोक्षतया चेच्छा समसमयवर्तिनो विचारसाध्यत्वानुपपत्तेरित्यर्थः । न केवलं परोक्षज्ञानस्येत्यपेरर्थः । पञ्चमं कल्पमाशङ्क्य च दोषमाह ॥ अन्येति ॥ तथा च नोक्तदोष इति भावः ॥ तादृशेति ॥ अत्रापि न पूर्वोक्तो दोषः पततीति भावः । नन्वस्तु तर्हि ब्रह्मान्यानवच्छिन्नपरोक्षज्ञानकामोधिकारी तादृशपरोक्षज्ञानं फलमिति चेन्न । अध्ययनविधावप्येतादृशार्थज्ञानकामाधिकारिकत्वसम्भवे तत्खण्डनानुपपत्तेः । अध्ययनविधेर्नित्यत्वायोगाच्चेति भावः ।

पाण्डुरङ्गि - इदानीमथशब्दाभिधेयोक्तिपरमानन्तर्यार्थश्चेतिभाष्यं व्यर्थं अभिधेयान्तरप्रस-क्तेस्तत्रानुपपत्तेश्चाभावादित्याशङ्क्य तत्र प्रसक्तिं तत्र परोक्तानुपपत्तिनिरासपूर्वकमनुपपत्तिमाह ॥ ननु प्रतिवचनादीति ॥ जिज्ञासाप्रारम्भ एवाथशब्दार्थः किं न स्यादिति वदन्प्रष्टव्यः इच्छायाः प्रारम्भो नाम कर्तव्यता उत प्रतिपाद्यता नाद्य इत्याह ॥ जिज्ञासाया इति ॥ इच्छाया विषयसौन्दर्यलभ्यत्वेनाकर्तव्यत्वादित्यर्थः । नद्वितीयइत्याह ॥ जिज्ञासाया इति ॥ पूर्वपक्षसिद्धान्ताभ्यामिच्छाप्रतिपादनस्य प्रत्यधिकरणमदृष्टेरित्यर्थः । इच्छाया आरभ्यत्वा-सम्भवेपीत्येतदप्येवमेव व्याख्येयम् ॥ आरभ्यत्वसम्भवादिति ॥ विचारस्योत्तरत्र शास्त्रेण प्रतिपाद्यमानत्वात्तत्रारम्भस्याथशब्दार्थत्वोपपत्तेरिति भावः । नन्वानन्तर्यार्थत्वेपि कथमधि-कारिविशेषणप्रयोजनलाभ इत्यत उक्तं आनन्तर्याभिधानमुखेनेति ॥ आनन्तर्येऽथशब्देनोक्ते योग्यतया तत्प्रतियोगित्वेनाधिकारलाभो नान्यथेत्यर्थः । न्यायतः सूत्रतः ॥ नतावदिति ॥ तथाचाधिकारितद्विशेषणप्रयोजनलाभायाङ्गीकृतमप्यानन्तर्यार्थत्वं परस्य व्यर्थमेव । वक्ष्यमाणरीत्याऽधिकारितद्विशेषणयोरेवासम्भवेनाथशब्देन तत्सूचनासम्भवादित्यर्थः ॥ अपूर्वविधित्वापातादिति ॥ तथाच विचारविधिर्नियमविधिरिति सिद्धान्तभङ्ग इति भावः ॥ वक्ष्यमाणेति ॥ ज्ञाते वा ज्ञाने कामनाऽज्ञाते वेत्यादिवक्ष्यमाणरीत्येत्यर्थः ।

(पाण्डुरङ्गि)

ननु न विचारविधौ मोक्षकामस्याधिकारित्वं मोक्षस्य च प्रयोजनत्वमङ्गीकुर्म येन विचारस्य मोक्षसाधनताया अप्राप्तत्वेन तद्विधेरपूर्वविधित्वापत्त्यापसिद्धान्तः स्यात् । किन्तु ज्ञानकामोधिकारी ज्ञानं च प्रयोजनमित्येवाङ्गीकुर्मः । तत्र च विचारस्य ज्ञानहेतुताया अन्वयव्यतिरेकाभ्यामेव प्राप्तत्वेन नापूर्वविधित्वमिति नापसिद्धान्त इत्यत आह ॥ नापीति ॥ अध्ययनविधेर्ज्ञानकामाधिकारिकत्वनिषेधकत्वादुक्तयुक्त्यैव विचारविधेरपि ज्ञानकामाधिकारिकत्वस्य निषेद्धुं शक्यत्वान्न तत्कामस्याधिकारित्वं ज्ञानस्य च प्रयोजनत्वमित्याह ॥ अध्ययनविधेरिति ॥ नन्वध्ययनविधौ ज्ञानकामनाया अधिकारिविशेषणत्वासम्भवेपि विचारविधावधिकारिविशेषणत्वं सम्भवत्येव । न च ज्ञानकामनायास्त्वया निषिद्धत्वात्कथं तदङ्गीकार इति वाच्यम् । मया परोक्षज्ञानकामनाया एव निषिद्धत्वात् । न च परोक्षज्ञानकामनानिषेधे तन्न्यायेनापरोक्षज्ञानकामनापि दूषयितुं शक्येति वाच्यम् । ज्ञात एवापरोक्षज्ञाने कामनाङ्गीकारात् । न च ज्ञानावच्छेदकत्वेन विषयस्यापि ज्ञातत्वात्पुनः कामनानुपपत्तिरेवेति वाच्यम् । अपरोक्षज्ञानस्य परोक्षतो ज्ञातस्यैव कामनाविषयत्वाङ्गीकारेण परोक्षज्ञानावच्छेदकब्रह्मणोपि परोक्षत एव ज्ञानप्राप्त्या तदापरोक्ष्याभावात् । यद्वा अप्रतिबद्धापरोक्षज्ञानकामनाया अधिकारिविशेषणत्वमप्रतिबद्धापरोक्षज्ञानस्यैव च प्रयोजनत्वमभ्युपगच्छामः । न च धर्मिज्ञानाभावेनाज्ञाते अप्रतिबद्धापरोक्षज्ञाने कामनाया अयोगात्तज्ज्ञाने च तदवच्छेदकविषयस्यापि ज्ञातत्वात्पुनः कामनानुपपत्तिरेवेति वाच्यम् । प्रतिबद्धापरोक्षज्ञानेनैव ज्ञाते अप्रतिबद्धापरोक्षज्ञाने कामनाङ्गीकारात्तदवच्छेदकविषयस्य प्रतिबद्धापरोक्षज्ञानप्राप्तावप्यप्रतिबद्धापरोक्षज्ञानस्यासिद्ध्या तत्कामनोपपत्तेरिति पूर्वोक्तदोषपरिजिहीर्षया तृतीयचतुर्थौ शङ्कते ॥ नन्विति ॥ यदा परोक्षज्ञानेन ज्ञातं तदा तदवच्छिन्नापरोक्षज्ञाने कामना । यदात्वपरोक्षज्ञानेन ज्ञातं तदा तदवच्छिन्नाप्रतिबद्धापरोक्षज्ञाने कामना । एवं च धर्मिभूतज्ञानस्य परोक्षत्वे वा न कश्चिद्दोष इति योजना ॥ इच्छाया इति ॥ ब्रह्मापरोक्षतो जानीयामित्येवंरूपेच्छाया इत्यर्थः । ज्ञानस्यापि वस्तुतोऽपरोक्षत्वेपि भट्टमते ज्ञाततानुमेयत्वात् परेण व्यवहारे भट्टनय इत्यङ्गीकुर्वता ज्ञानस्याऽऽपरोक्ष्यानभ्युपगमात् इच्छाया आपरोक्ष्यस्य सर्वाविवादात् प्रकृतज्ञानपरित्यागेनेच्छाग्रहणमेव कृतमिति ज्ञेयम् । प्रतिबद्धेत्यादिनोक्तं दूषयति ॥ अन्यानवच्छेदेनेति ॥ तादृशेति ॥ अन्यानवच्छिन्नेत्यर्थः ।

तात्पर्यचन्द्रिका

किञ्च श्रवणसाध्यस्य परोक्षज्ञानस्य प्रतिबद्धापरोक्षज्ञानस्य वा तस्मात्प्राग-सत्त्वेन तदधीनाया अपरोक्षज्ञानादौ कामनायाः श्रवणविध्यधिकारिविशेषण-त्वायोगः । न च कामनाहेतुपरोक्षज्ञानादिकं श्रवणात्प्रागापातप्रतीतिदशायामेव सिद्धमिति वाच्यम् । तस्यां दशायां निश्चयरूपस्य तस्याभावात् । न हि वेदान्तवेद्यं सर्वं परोक्षज्ञानादिना निश्चित्यापरोक्षाद्यर्थं मीमांसायां प्रवर्तते । सन्देहरूपस्य च तस्य तस्यां दशायां भावेपि सन्देहेन ज्ञातब्रह्मावच्छिन्नपरोक्षनिश्चय एव कामनोपपत्तिः । निश्चिते निश्चयकामनाया अदर्शनेन तस्यां निश्चयविषयविषयकसन्देहस्यैव हेतुत्वात् । किं च त्वत्पक्षे धर्मविचारस्योत्तरक्रतुविधिप्रयुक्तत्वेपि तज्ज्ञानकाम-नाहीनस्य विचारेऽप्रवृत्तेः धर्मादौ चापरोक्षज्ञानकामनानुपपत्तेः परोक्षज्ञाने च त्वया कामनानङ्गीकारात् धर्मादिविचारे न प्रवृत्तिः स्यात् । किं च सन्दिग्धस्थाण्वादि-विशेषापरोक्षज्ञानकामना तद्विशेषपरोक्षधीपूर्विका स्यात् । तस्मात्सामान्यतो ज्ञाते विशेषज्ञानकामनाया दर्शनात्तां प्रति तदेव हेतुः । अवच्छिन्नज्ञाने अवच्छेदकज्ञानस्य हेतुतापि हि दर्शनादेवेति तदुल्लङ्घने सापि न स्यात् । तस्मात्परोक्षज्ञाने कामनां निषेधतः परस्य मते ज्ञाने मोक्षेवा विचारप्रवृत्तिपर्यन्तकामनाऽयोगात्तत्काम-स्याधिकारिणस्तस्य फलस्य च सूचनं नानन्तर्यार्थेनाप्यथशब्देन ।

प्रकाशिका – अन्यानवच्छिन्नब्रह्मापरोक्षे कामना तादृशाप्रतिबद्धापरोक्षे वा कामना श्रवणरूपविचारविध्यधिकारिविशेषणमित्यत्र दोषान्तरमाह ॥ किञ्चेति ॥ तस्मात् श्रवणादित्यर्थः । तदधीनायाः परोक्षब्रह्मज्ञानाधीनाया अवच्छेदकस्य ब्रह्मणोऽज्ञाने तदव-च्छिन्नापरोक्षज्ञानादौ कामनायोगादिति भावः । ननु श्रवणात्प्रागापातधीदशायां तादृशं ज्ञानमस्तीत्याशङ्क्य निरस्यति ॥ न चेति ॥ तादृशं ज्ञानं निश्चयरूपमुत सन्देहरूपमिति विकल्पौ हृदि निधायाद्य आह ॥ तस्यामिति ॥ आपातदशायामित्यर्थः । तदेवोपपादयति ॥ न हीति ॥ द्वितीये त्वाह ॥ सन्देहेति ॥ तदुपपादयति ॥ निश्चित इति ॥ तस्यां निश्चितकामनायाम् । किञ्च यदि परोक्षज्ञानकामनां निषिध्यापरोक्षज्ञान एव कामनोच्येत तर्हि धर्ममीमांसायां न कोपि प्रवर्तेत । धर्मापरोक्षज्ञानकामनायोगात् । न च ''ज्ञात्वा कर्मसमाचरे''दिति ज्ञानोत्तरकर्मविधायकेन विधिना विचारं विना वेदार्थज्ञानासम्भवा-

द्विचारस्य कर्तव्यत्वं बोधितमिति तत एव तत्र प्रवृत्तिर्न तु धर्मज्ञानकामनाधीनेति वाच्यम् । एवमपि तज्ज्ञानकामना आवश्यकीति भावेनाह ॥ किञ्चेति ॥ अवच्छिन्नज्ञानकामनायामवच्छेदकज्ञानस्यावश्यकतया परोक्षेणावच्छेदके निश्चिते परोक्ष एव कामना युक्तेत्याशङ्कां दोषान्तरेण निरस्यति ॥ किञ्चेति ॥ न चेष्टापत्तिः । अनुभवविरोधादिति भावः । कथं तर्हि कामनेत्यत आह ॥ तस्मादिति ॥ कामनायाः काम्यमानज्ञानविषयविषयकनिश्चयपूर्वकत्वायोगादित्यर्थः । तां प्रति विशेषज्ञानकामनां प्रति । तदेव सामान्यज्ञानमेव । तदुल्लङ्घने दर्शनातिक्रमणे । सा अवच्छेदकज्ञानस्य हेतुता । विवरणमतदूषणमुपसंहरति ॥ तस्मादिति ॥ उक्तदूषणगणादित्यर्थः ॥ ज्ञान इति ॥ परोक्षेऽपरोक्षेवेत्यर्थः ॥ मोक्ष इति ॥ ज्ञानकामनापूर्वकत्वात् मोक्षकामनाया इति भावः ॥ विचारेति ॥ यावद्विचारे न प्रवर्तते तावद्विचारसाध्यपरोक्षादिनिश्चयाभावात्तदधीनाया अपरोक्षज्ञानकामनाया अयोगादित्यर्थः । तथाच विचारे प्रवृत्त्यनन्तरं परोक्षादिनिश्चयस्तस्मिन्सत्यपरोक्षादौ कामनया प्रवृत्तिरित्यन्योन्याश्रयः सूचितो भवति । तत्कामस्य ज्ञानादिकामस्य। तस्य ज्ञानादेः । तथाच नाधिकारादिसूचनायानन्तर्यार्थत्वमथशब्दस्येत्यधिकारार्थत्वमेव विवरणमते युक्तमिति ।

पाण्डुरङ्गि – पक्षद्वयमसाधारणदूषणेन दूषयित्वा साधारणदोषेणापि दूषयति ॥ किञ्चेति ॥ ननु श्रवणसाध्यपरोक्षज्ञानस्य प्रतिबद्धापरोक्षज्ञानस्य वा श्रवणात्प्रागसत्त्वेपि विचारात्प्राक् सत्त्वं सम्भवत्येव । श्रवणस्य विचाररूपत्वाभावात् । तथाच तदधीनाया अपरोक्षज्ञानकामनाया विचारविध्यधिकारिविशेषणत्वं भविष्यतीति नोक्तदोष इति चेन्न । स्यादेतत् यद्येवं श्रवणविचारयोर्भेदः परेणाभ्युपगतः स्यात् । नैतदस्ति । यतः श्रवणमेव विचार इत्येव हि परेणाभ्युपगम्यते । अत एव पूर्वं श्रवणरूपविचारविध्यधिकारिविशेषणमित्युक्तम् । तथाच नकाप्यनुपपत्तिरिति भावः । श्रवणात्प्रागापातप्रतीतिदशायां सिद्धं परोक्षज्ञानादिकं किं निश्चयरूपं वा सन्देहरूपं वा । नाद्य इत्याह ॥ तस्यां दशायामिति ॥ निश्चयस्य साधकबाधकभावाभावसाध्यत्वेन तत्सत्त्वे तस्यैव विचारत्वापत्त्या तदभावे च साधकबाधकभावाभावेन संशयस्य न्यायप्राप्तत्वेन निश्चयरूपस्य तस्यासम्भवादिति भावः । अत एव तस्यां दशायामित्युक्तम् ।

(पाण्डुरङ्गि)

न द्वितीय इत्याह ॥ सन्देहरूपस्येति ॥ किंच परोक्षज्ञाने कामनानङ्गीकारेऽध्ययनविधेरर्थज्ञानार्थत्वाभावेनादृष्टार्थत्वापत्त्या धर्मविचारस्याध्ययनप्रयुक्तत्वाभावादकर्तव्यत्वं स्यादित्याह ॥ किञ्चेति ॥ नन्वध्ययनस्यादृष्टार्थत्वेन धर्मविचारस्य तत्प्रयुक्तत्वाभावेपि नाकर्तव्यत्वम् । उत्तरविधिवाक्यैस्तावज्ज्योतिष्टोमादेः स्वर्गादिसाधनत्वं प्रतिपाद्यते । तथाचाननुष्ठितानां स्वर्गादिसाधनत्वानुपपत्त्या तदनुष्ठानमावश्यकम् । तच्च ज्ञानाभावे न सम्भवति । ज्ञानं च विचारमन्तराऽनुपपन्नं तमाक्षिपतीति धर्मविचारस्य कर्तव्यत्वसिद्धिरित्यत आह ॥ उत्तरेति ॥ ज्योतिष्टोमेनेत्यादेरुत्तरविधित्वं च स्वाध्यायोऽध्येतव्य इत्यध्ययनविध्यपेक्षया ज्ञेयम् । ननु न हि वेदान्तवेद्यं सर्वमित्युक्तमयुक्तं बाधकाभावेन तथा नियमसम्भवात् । तथाच परोक्षनिश्चयेन ज्ञातब्रह्मावच्छिन्नेऽपरोक्षज्ञाने कामनायाः सम्भवेऽपि निश्चयज्ञातधर्मावच्छिन्नपरोक्षज्ञानकामनैव निषिध्यत इत्यत आह ॥ किञ्चेति ॥ ननु ज्ञानकामस्य वा मोक्षकामस्य वाऽधिकारित्वस्य मोक्षस्य ज्ञानस्य वा प्रयोजनत्वस्य भवत्सिद्धान्तेऽङ्गीकारात्तन्निराकरणेऽपसिद्धान्त इत्याशङ्कामुपसंहारव्याजेन परिहरति ॥ तस्मादिति ॥ ननु विशेषज्ञाने ज्ञाते वा कामनाऽज्ञाते वा । नाद्यः । ज्ञानावच्छेदकत्वेन विशेषाणामपि ज्ञातत्वेन कामनानुपपत्तेः । तथादर्शनात् । अन्यथा ज्ञानस्य ज्ञातत्वेऽपि विषयस्यानवगतत्वस्यैव वक्तुं शक्यत्वेन ज्ञात एव ज्ञाने कामनोपपत्तेः । तत्रावच्छिन्नज्ञानेऽवच्छेदकज्ञानस्य हेतुत्वस्यापि दर्शनबलेनैव कल्प्यत्वेनैकत्र दर्शनोल्लङ्घने इतरत्रापि तदापत्तेरित्याह ॥ अवच्छिन्नज्ञान इति ॥ प्रकृताथशब्दार्थविचारासङ्गतिमाशङ्क्य पूर्वप्रकृतमुपसंहरति ॥ तस्मादिति ॥ विचारप्रवृत्तिपर्यन्तेति ॥ मोक्षमात्रकामनायाः सत्त्वेपि ज्ञानकामनांतरिततदविनाभूतविचारे प्रवृत्तेरसम्भवेन विचारसाध्यज्ञानसाध्यो मोक्षो मे भूयादिति विशिष्टकामनाऽसम्भवादित्यर्थः ।

तात्पर्यचन्द्रिका

भामतीरीत्या जिज्ञासाशब्दस्येच्छावाचकत्वेप्यार्थिकार्थेन विचारेणाध्याहृतस्य कर्तव्यपदस्येव श्रुतस्याधिकारार्थाथशब्दस्याप्यन्वयोस्तु । यथोक्तं कल्पतरौ ''आर्थिके चास्मिन्नर्थे कर्तव्यपदाध्याहार'' इति । न चार्थिकार्थेनाध्याहृतस्यैवान्वयो न तु श्रुतस्येत्यत्र नियामकमस्ति ''सौर्यं चरुं निर्वपेद् ब्रह्मवर्चसकाम'' इत्यादौ द्रव्यदेवतासम्बन्धाक्षिप्तेन यागेन ''यदाग्नेयोऽष्टाकपालो भवती''त्यादौ भवनाक्षिप्तभावनया

च विधिप्रत्ययान्वयदर्शनाच्च । तस्मादधिकारार्थ एवाथशब्दोऽस्त्विति । उच्यते । आरभ्यत इत्यनुक्त्वाप्यारब्धे इदमनेनारब्धमिति ज्ञातुं शक्यत्वादधिकार्याद्यसूचनापाताच्च नारम्भार्थः । अथशब्दानुशासनमित्यादौ तु व्याकरणेऽगान्तरव्यावृत्तस्याधिकारिविशेषणस्याभावेन तदानन्तर्यार्थत्वासम्भवात् मङ्गळप्रयोजनकोऽथशब्दोऽगत्याऽऽरम्भार्थः । मङ्गळप्रत्यायकत्वं त्वथशब्दस्याथेत्यनेन मङ्गळस्याप्रतीतेरधिकार्याद्यसूचनापातात् ''तस्मान्माङ्गलिकावुभौ'' इति स्मृतावोङ्काराथशब्दयोर्मङ्गलफलकत्वोक्तेश्चायुक्तम् ।

प्रकाशिका –भामतीमतेऽप्यधिकारार्थत्वं युक्तमित्याह ॥ भामतीति ॥ तन्मते ह्येवमर्थः। ब्रह्मजिज्ञासा ब्रह्मज्ञानेच्छा भवितुं युक्तेति श्रौतोर्थः । ज्ञानेच्छाहि सन्दिग्धे विषये निश्चयाय भवति निश्चयश्च विचारसाध्य इति विचारकर्तव्यत्वमार्थिकोऽर्थ इति । तथाच विचारः कर्तव्य इतिवदारभ्यत इत्यन्वयः सम्भवतीत्यर्थः । भामत्यामदृष्टेराह ॥ यथोक्तमिति ॥ कर्तव्यपदवैषम्यमाशङ्क्य हेत्वभावेन निरस्यति ॥ न चेति ॥ न केवलं नियामकाभावः दृश्यते च तथान्वय इत्याह ॥ सौर्यमिति ॥ द्वितीये ''संस्कारश्चाप्रकरणेऽकर्मशब्दत्वा''दिति तृतीयपादीयपञ्चमाधिकरणे ''सौर्यं चरुं निर्वपेद् ब्रह्मवर्चसकाम'' इत्यत्र दार्शपौर्णमासिके निर्वापेच चरुगुणविधिः किं वानिर्वापरूपकर्मान्तरविधिरुत यागविधिरिति सन्देहे गौरवान्नकर्मान्तरविधिः । अश्रुतत्वान्न यागविधिः । असति यागे देवतासम्बन्धायोगात्सौर्यमिति तेजोदेवत्यत्वादाग्नेयस्यानुवादः । चरुशब्दः स्थालीवचनः । स्थाल्यां निर्वपेदित्यर्थः । ब्रह्मवर्चसकाम इति । सर्वाकाम्यवाक्यप्राप्तफलानुवादः । अतो दार्शपोर्णमासिके निर्वापे चरुगुणविधिरिति प्राप्ते नित्यवत् श्रुतस्य फलपदस्य पाक्षिकानुवादत्वानर्थक्ययोरयोगात्फलविशिष्टंकर्मान्तरंयावदुक्तंविधीयत इत्याद्याशङ्कानिरासपूर्वकं द्वितीयशङ्कामुत्थाप्य निर्वापे देवतान्वयायोगेन तत्पदवैयर्थ्यप्रसङ्गाद्द्रव्यदेवतासम्बन्धानुमितो यागो विधीयते निर्वपतिस्तु तत्र चोदकप्राप्तानुवाद इति सिद्धान्तितम् । अत्र यथा निर्वपेदिति श्रुतस्य विधिप्रत्ययस्य सौर्यमिति द्रव्यदेवता सम्बन्धाक्षिप्तेन यागेनान्वयस्तथा प्रकृतेऽपीत्यर्थः ॥

यदाग्नेय इति ॥ ''यदाग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्यां चाच्युतो भवती''त्यत्र भावयितुर्व्यापारं विना स्वयमेव भावनायोगाद्भवतीत्युक्तभवनेन प्रयोजककर्तृव्यापारभूतभावनाया आक्षेपात्तया च भवतीति लेट्प्रत्ययरूपविधेरन्वयदर्शनादित्यर्थः । अत्राह ॥

(प्रकाशिका)

आक्षिप्तेन श्रुतस्यान्वयेन सौर्यवाक्यमुदाहरणम् । तत्राक्षिप्तस्य यागस्य भावनाविशेषणत्वेनाक्षिप्तविधिविधेयत्वावश्यंभावात् श्रुतविध्यन्वयानभ्युपगमाद्विशिष्टविधिस्थले प्रत्ययार्थतया श्रुतस्य विधेस्तदर्थभूतायां सकलविशेषणविशिष्टायां भावनायामेवान्वये विशेषणानि तदाक्षिप्तैर्विधिभिर्विधीयंत इति वार्तिककारमतानुवर्तिनां पन्थाः । अत एवानेकेषामर्थानां विधिसंस्पर्शावश्यंभावेपि विशिष्टविधिस्थले न वाक्यभेदः । प्राप्ताकर्मुवादेन गुणविधानस्थलेऽनेकगुणश्रवणे श्रुतस्य विधेरेकत्र संक्रान्तौ जातायामर्थापत्तिपरिक्षयेणेतरविध्याक्षेपानुन्मेषात्तत्रापि श्रुतस्य विधेर्व्यापारस्य वाच्यतया वाक्यभेद इति व्यवस्था सङ्गच्छते । एवं च सकलस्य भावनाविशेषणस्याक्षिप्तविधिविधेयत्वनियमान्न श्रुतस्याक्षिप्तेन सहान्वये सौर्यवाक्यमुदाहरणम् । अधिकरणं त्वाक्षिप्तविधिविधेयत्वाभिप्रायमस्तु । यदपि यदाग्नेय इत्यादि तदपि न भवत्युक्तभवनाक्षिप्तभावनायाः विध्यन्वयानर्हत्वात् । प्रयोजककर्तृव्यापारे हि प्रयोज्यकर्तुर्भाव्यत्वनियमेन भवनकर्तुराग्नेयाष्टाकपालशब्दाभ्यामुक्तस्य पुरोडाशस्य द्रव्यदेवतासम्बन्धाक्षिप्तस्य यागस्य वाऽपुमर्थस्यैव तस्यां भावनायामन्वयो वाच्यः । नह्यपुमर्थभाव्यकाभावनाविधामन्वयमर्हति । चेतनप्रवर्तनात्मकस्य विधेः पुमर्थभाव्यकभावनान्वयापेक्षितत्वादिति । उच्यते । श्रुतस्यैव विधेर्विशेषणेष्ववश्यं व्यापारो वाच्यः । तेषामाक्षिप्तविधिविधेयत्वे आक्षेपेण विशेषणविधौ सिद्धे विशिष्टविधिसिद्धिः तत्सिद्धौ च विशेषणविध्याक्षेपसिद्धिरित्यन्योन्याश्रयापत्तिरिति भामत्युक्तेस्तद्रीत्याऽऽद्योदाहरणस्य युक्तत्वात् । पश्चात्कल्प्यस्यापि विशेषणविधेः प्राक्प्रवृत्तत्वेनाकल्प्यत्वान्नेतरेतराश्रयापत्तिरिति पौर्णमास्यधिकरणराणकोक्तरीत्याऽऽक्षिप्तविधिविधेयत्वेऽपि न दोषः । यागेन विध्यन्वयदर्शनादित्यस्य विधिप्रत्ययार्थभूतप्रवर्तनारूपविध्यन्वयदर्शनादिति नार्थः किं तु तदर्थभूतायांभावनायांविध्यविरुद्धायामवच्छेदकत्वेनान्वयदर्शनादित्यर्थः । अङ्गीकृतश्चायमन्वयः सौर्यवाक्ये। तत्र हि प्रत्ययार्थभूताया भावनाया धात्वर्थानवच्छेदे विध्यन्वयायोगात्तदर्थमवच्छेदकधात्वर्थाकाङ्क्षायां समानपदोपात्तस्य निर्वापस्यान्वये तत्र देवतान्वयायोगेन तत्पदवैयर्थ्यापत्तेस्तत्सार्थकत्वाय द्रव्यदेवतासम्बन्धाक्षिप्तो यागस्तत्रावच्छेदकत्वेनान्वीयते ततश्च तद्विशिष्टाभावना श्रुतेन विधिना विधीयते । तदाक्षिप्तेन विधिना यागो विधीयत इति । यदपि यदाग्नेयोदाहरणकरणे दूषणं तन्न कृत्स्नस्वाध्यायप्रयोजनपर्यवसानापादकाध्ययनविधिप्रसादलब्धफलभावनाक्षिप्तयागभावनाया भवतीति पञ्चमलकाररूपविधिप्रत्ययार्थभूतप्रवर्तनात्मकविध्यन्वयदर्शनादित्यर्थादिति दिक् ॥

तस्मादिति ॥ परोक्तपरिहारासम्भवादित्यर्थः । स्वयं समाधत्ते ॥ उच्यत इत्यादिना ॥ अधिकार्यादीति ॥ आनन्तर्यार्थ एव तत्सूचनादिति भावः । एतेन

"त्वामस्मि वच्मि विदुषां समवायोत्र तिष्ठति ।
आत्मीयां मतिमास्थाय स्थितिमत्र विधेहि तत्" (काव्यप्रकाशे ४ उल्लासे)

इत्यादौ प्रतिज्ञापूर्वं वचनदर्शनेनोच्यमानस्यावश्यं कर्तव्यत्वमभिव्यनक्तीत्यालङ्कारिकरीत्याऽत्र प्रारम्भवचनं प्रारम्भोपयुक्ताधिकार्यादिसद्भावमभिव्यनक्तीति प्रारम्भार्थत्वेप्यथशब्दोऽर्थवानिति केनचिदुक्तं निरस्तम् । आनन्तर्याभिधानमुखेन विशिष्याधिकार्यादिलाभे सति सामान्यतस्तल्लाभोक्त्ययोगात् । "आनन्तर्येऽधिकारस्ये"ति स्मृतिविरोधाच्चेति ॥ कथं तर्हि महाभाष्ये आरम्भार्थत्वमथशब्दस्योक्तमत आह ॥ अथशब्देति ॥ अङ्गान्तरेति ॥ शिक्षाकल्पादितः ॥ अगत्येति ॥ तद्वाच्यार्थान्तराभावेनेत्यर्थः ॥ नन्वारम्भार्थत्वासम्भवेऽपि मङ्गळार्थकत्वं स्यादित्याशङ्क्य निरस्यति ॥ मङ्गळेति ॥ अयुक्तमित्यन्वयः । प्रयोगप्रत्ययाभ्यां हि शब्दार्थयोः सम्बन्धः । न चाथशब्दोच्चारणे शक्तलक्षणया वा मङ्गलं प्रतीयते । येन तत्प्रत्यायकत्वमथशब्दस्य स्यादित्यर्थः ॥ तस्मादिति ॥ "ॐकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा । कण्ठं भित्त्वा विनिर्यातौ तस्मान्माङ्गलिकावुभा" विति स्मृतौ प्रयोजनार्थकठकूप्रत्ययान्तप्रयोगेण मङ्गलफलकत्वोक्तेरित्यर्थः ।

पाण्डुरङ्गि – भामतीरीत्येति ॥ अनेनेच्छाया आरभ्यत्वासम्भवेऽपीति पूर्वमभ्युपगम्योक्तमिति ज्ञेयम् ॥ अधिकार्याद्यसूचनापातादिति ॥ आनन्तर्याभिधानमुखेन शास्त्रीयस्याधिकारिणो न्यायतः समर्पणाभावे विचारो निरधिकारिकोऽननुष्ठेयः स्यादित्यर्थः ॥ अङ्गान्तरव्यावृत्तस्येति ॥ अङ्गान्तरव्यावृत्ताथशब्दग्रहणप्रयोजकविशेषस्येत्यर्थः । अथापि स्यान्मङ्गळार्थ एवायमथशब्द इत्यत आह ॥ मङ्गळेति ॥

तात्पर्यचन्द्रिका

अन्येषां भाष्येतु "मङ्गलस्य च वाक्यार्थे समन्वयाभावा"दित्युक्तम् । तन्न । अपदार्थत्वहेतौ समन्वयाभावे भामत्यां "पदार्थ एवहि वाक्यार्थे समन्वीयते । स च वाच्यो लक्ष्यो वा । न चेह मङ्गलमथशब्दस्य वाच्यं लक्ष्यं वे"त्युक्तस्यापदार्थत्वस्य हेतुत्वेऽन्योन्याश्रयापातात् । नापि "न तावज्जिज्ञासायां मङ्गलं कर्त्रादिभावेन

(तात्पर्यचन्द्रिका)

वैयधिकरण्येनान्वेति । कर्त्रादिभावे मानाभावात् । कर्त्राद्यन्तरभावाच्च । नापि सामानाधिकरण्येन । जिज्ञासा मङ्गळमित्यर्थवादत्वप्रसङ्गा''दिति विवरणोक्तो हेतुः । सधूमो गिरिः साग्निक इति वत् ''ईक्षतेर्नाशब्द''मित्यत्र त्वत्पक्षेऽशब्दमितिवच्च मङ्गलत्वात्कर्तव्येति हेतुत्वेनान्वयोपपत्तेः । एतेन ब्रह्मजिज्ञासायां मङ्गळत्वं प्रसिद्धतरत्वान्नैव वक्तव्यमिति निरस्तम् । प्रसिद्धस्यैव हेतूकर्तव्यत्वात् ।

प्रकाशिका – स्वयं समाधायान्योक्तं निरस्यति ॥ अन्येषामिति ॥ भाष्योक्तसमन्वयाभावे व्याख्यातृद्वयोक्तं हेतुद्वयमपि क्रमेण निराह ॥ अपदार्थत्वेति ॥ भाष्ये हि मङ्गलस्यापदार्थत्वं साध्यं कृत्वा वाक्यार्थे समन्वयाभावो हेतूकृतः । भामत्यां तु समन्वयाभावं साध्यं कृत्वाऽपदार्थत्वं हेतूकृतम् । तथाच हेतुसिद्धौ साध्यसिद्धिः साध्यसिद्धौ हेतुसिद्धिरित्यन्योन्याश्रय इत्यर्थः ॥ नापीति ॥ विवरणोक्तो हेतुरित्यन्वयः ॥ कर्त्राद्यन्तरेति ॥ ''शान्तोदान्त'' इत्यादिश्रुत्या शमादिमतोधिकारिणो ब्रह्मणश्च कर्मणः सत्त्वादित्यर्थः ॥ अर्थवादत्वेति ॥ तस्य वैयर्थ्यादिति भावः ॥ सधूम इति ॥ सधूमत्वादित्यर्थः ॥ ईक्षतेरिति ॥ प्रधानं न जगत्कारणं अशब्दं हि तत् कारणवाक्याप्रतिपाद्यत्वादित्यर्थोक्तेरिति भावः ॥ अन्वयेति ॥ जिज्ञासाकर्तव्यत्वे हेतुसमर्पकत्वेन मङ्गलस्यान्वयसम्भवादथशब्दार्थत्वं मङ्गलस्य स्यादेवेति । वाक्यार्थे समन्वयाभावादिति भाष्योक्तो हेतुरप्रसिद्ध इति भावः । अत एव भामत्यां मङ्गलहेतुत्वात्प्रत्यहं ब्रह्मजिज्ञासेति सूत्रार्थः सम्पद्यत इत्युक्तम् ।

पाण्डुरङ्गि – अन्योन्याश्रयादिति ॥ ननु मङ्गळस्याथशब्दवाच्यत्वलक्ष्यत्वयोरभावेनापदार्थत्वान्नवाक्यार्थेसमन्वयइत्येव विवक्षितत्वान्नान्योन्याश्रय इति चेन्न । वाक्यार्थे समन्वयाभावादिति हेतुपरत्वेन भाष्योक्त्यस्वारस्यादिति भावः ॥ कर्त्रादिभावेनेति ॥ कर्तृत्वादिनेत्यर्थः । एवमुत्तरत्रापि द्रष्टव्यम् । ननु जिज्ञासायाः क्रियारूपत्वात् क्रियायाश्च कर्त्रादिसापेक्षत्वात् प्रकृतेच कर्त्राद्यन्तराभावेन क्रियात्वान्यथानुपपत्त्यैव मङ्गळस्यैव कर्त्रादित्वं कल्पनीयमिति कथं मानाभाव इत्यत आह ॥ कर्त्राद्यन्तरेति ॥ तथाचान्यथैवोपपत्त्या नान्यथानुपपत्तिर्मानमिति भावः । आकाङ्क्षाभावान्न कर्त्रादिभावेनान्वय इत्यभिप्रेत्य वाह ॥ कर्त्राद्यन्तरेति ॥ जिज्ञासा मङ्गळमितीति ॥ जिज्ञासा मङ्गळमिति प्रशंसापरतयाऽर्थवादत्वप्रसङ्गादित्यर्थः । न चार्थवादताऽस्येयम् । सूत्रस्य वाक्यार्थनिर्णयापेक्षितन्यायसूचकत्वादित्यर्थः । विवरणोक्तहेतुरित्यस्य नापीति पूर्वेणान्वयः ।

तात्पर्यचन्द्रिका

यदपि ''पूर्वप्रकृतापेक्षायाश्च फलत आनन्तर्याव्यतिरेका''दिति परेषां भाष्यं तस्य भामत्यनुसारेणाथशब्दस्य पूर्वप्रकृतापेक्षार्थत्वाशङ्कानिरासायानन्तर्यार्थ इव पूर्वप्रकृतापेक्षार्थत्वेपि जिज्ञासाहेतुभूतस्य पूर्वप्रकृतस्य लाभात् फलाभेदाद्व्यर्थ आनन्तर्यार्थत्वाग्रहोऽस्माकमिति यद्यर्थः तर्हिभाष्ये ''आनन्तर्यार्थः'' इत्युक्त्ययुक्तिः । सूत्रे कल्पान्तरानुपन्यासेन पूर्वप्रकृतापेक्षार्थत्वमशक्यशङ्कं च । किञ्च किं नित्यः शब्दोथानित्य इत्यादिकल्पान्तरोपन्यासेपि सामानाधिकरण्यार्थमनुषक्तस्य धर्मिणोऽनित्य इत्यत्रापेक्षायामपि न सोऽथशब्दार्थः । अन्यथा उतानित्य इत्यादावुतादेरपि पूर्वप्रकृतापेक्षार्थत्वं स्यात् । नापि प्रकृतादर्थादर्थान्तरत्वाशङ्कानिरासाय । अर्थान्तरत्वं हि यतः कुतश्चित्प्रकृताच्चेद्व्यर्थं पुष्कलकारणाच्चेदानन्तर्याभिधानं विनाकारणत्वासिद्धिः । आनन्तर्याभिधानेच प्रकृतादर्थादर्थान्तरत्वस्यान्तर्णीततया सिद्धिरिति विवरणोक्तोभिप्रायः । आनन्तर्यानभिधानेपि वैयर्थ्यपरिहारार्थमेव प्रकृतस्य हेतुत्वसिद्धेः । अन्यथा आनन्तर्यार्थत्वेपि तत्प्रतियोगिनो हेतुत्वासिद्धिः ।

ननु कारणादानन्तर्यं मुख्यमव्यवधेरव्यभिचाराच्चेति तदेवाथशब्दवाच्यमिति चेन्न । अव्यवधेरकारणादानन्तर्येपि सम्भवात् । अव्यभिचारित्वं तु न मुख्यत्वे हेतुः । चैत्रो गतोऽनन्तरमेव मैत्र आगत इत्यादावमुख्यत्वाभिमानाभावात् । अनन्यथासिद्धनियतानन्तरभावित्वादिरूपे कार्यलक्षणादौ नियतपदानर्थक्यप्रसङ्गाच्च । कारणस्य प्रकृतत्वं मुख्यमित्यपि सुवचत्वाच्च । पूर्वप्रकृतादर्थान्तरत्वाभिधानेप्यानन्तर्यार्थस्यान्तर्णीततया सिद्धेश्च । तस्मादस्यैवादिसूत्रत्वेन पूर्वप्रकृतार्थसाङ्कर्यशङ्कानुदयात् ''आनन्तर्येऽधिकारस्ये''ति भाष्योदाहृतस्मृतिविरोधादधिकार्याद्यसूचनप्रसङ्गाच्च न प्रकृतादर्थादर्थान्तरमथशब्दस्यार्थः ।

प्रकाशिका –प्रकृतापेक्षार्थत्वं वा प्रकृतादर्थादर्थान्तरपरत्वं वाऽथशब्दस्य किं नस्यादित्याशङ्क्य स्वयं समाधास्यन्परोक्तं समाधिमनूद्य निरस्यति ॥ यदपीत्यादिना ॥ तस्येत्यस्य भामत्यनुसारेण यद्यर्थ इत्यन्वयः । एवं हि भामत्यां व्याख्यातं ''अयमथशब्दो विनैवानन्तर्यार्थत्वं पूर्वप्रकृतापेक्षार्थो भविष्यति । यथा शब्दो नित्योथानित्य इत्यादौ

(प्रकाशिका)

पूर्वप्रकृतं शब्द इति पदमपेक्ष्य प्रथमपक्षोपन्यासपूर्वकं पक्षान्तरोपन्यासे पूर्वप्रकृतापेक्षोथशब्द इत्याशङ्कानिरासकमिदं भाष्य''मित्यवतार्य न वयमानन्तर्यार्थतां व्यसनितया रोचयामहे । किं तु ब्रह्मजिज्ञासाहेतुभूतपूर्वप्रकृतसिद्धये । सा च पूर्वप्रकृतापेक्षत्वेप्यथशब्दस्य सिद्ध्यतीति व्यर्थ आनन्तर्यार्थत्वावधारणाग्रहोऽस्माकमिति ॥ तर्हीति ॥ आनन्तर्यार्थत्वाग्रहाभाव इत्यर्थः । पूर्वप्रकृतापेक्षो वाऽऽनन्तर्यार्थो वेत्येवोक्तिस्स्यादिति भावः । नन्वत एवारुच्या भामत्यां ''परमार्थतस्तु कल्पान्तरोपन्यासे पूर्वप्रकृतापेक्षा । न चेह कल्पान्तरोपन्यास इति पारिशेष्यादानन्तर्यार्थ एव युक्त'' इत्युक्तमित्यत आह ॥ सूत्र इति ॥ अशक्यशङ्कमिति ॥ अनेनैतच्छङ्कानिरासाय प्रवृत्तो भाष्यकारस्तद्भाष्यव्याख्यार्थं प्रवृत्तो भवांश्चात्यन्तानभिज्ञ इत्युक्तं भवति । किंचाथशब्दस्य पूर्वप्रकृतापेक्षार्थत्वस्य क्वाप्यभावात्प्रकृते तच्छङ्कात्यन्तानुचितेत्यभिप्रेत्याह ॥ किं च किं नित्य इति ॥ सा पूर्वप्रकृतापेक्षा किन्तु पूर्वप्रकृतादर्थादर्थान्तरत्वमिति भावः । कुत एवमित्यत आह ॥ अन्यथेति ॥ आदिपदात् आहोस्वित् यद्वा इत्यादिग्रहः ॥ नापीति ॥ पूर्वप्रकृतादर्थादर्थान्तरत्वाशङ्कानिरासाय विवरणोक्तोभिप्राय इत्यन्वयः । प्रकृतादर्थान्तरत्वं हि यस्मात्कस्माच्चित् प्रकृतानुपयुक्तादर्थान्तरपरत्वं वोत विचारकर्तव्यतायामुपयुक्तात्पुष्कलकारणरूपात्प्रकृताद्वेति विकल्प्याद्ये व्यर्थमित्युत्तरम् । तस्यावचनेनापि सिद्धत्वादिति भावः ।

द्वितीयेत्वाह ॥ आनन्तर्याभिधानमिति ॥ पूर्वप्रकृतस्य कारणत्वं ह्यथशब्दस्यानन्तर्यार्थत्वे सत्येव लभ्यते । आनन्तर्यस्य कारणानन्तर्ये मुख्यत्वेनानन्तर्यप्रतियोगिनः प्रकृतस्य कारणत्वलाभादिति भावः । ननु प्रकृतादर्थादर्थान्तरत्वस्यापि वक्तव्यत्वादावृत्तिः स्यादित्यत आह ॥ आनन्तर्याभिधानेचेति ॥ एतदनन्तरमिदमित्युक्त्यैवार्थान्तरत्वस्य लाभात्पूर्वापरभावस्यार्थभेदप्रयुक्तत्वादित्यर्थः । आनन्तर्यार्थत्वेऽथशब्दस्योक्ते यथानन्तर्यप्रतियोगिनः प्रकृतस्य कारणत्वलाभस्तथा प्रकृतादर्थादर्थान्तरपरत्वेपि यतः कुतश्चित्प्रकृतादर्थादर्थान्तरपरत्वे प्रकृतानुपयोगेन वैयर्थ्यादेव विचारकर्तव्यतायामुपयुक्तात् पुष्कलकारणादेवार्थान्तरत्वस्य प्राप्त्या प्रकृतस्य हेतुत्वं लभ्यत इति तदर्थं नानन्तर्यार्थत्वाग्रहः कार्य इत्याह ॥ आनन्तर्याभिधानेपीति ॥ अयं च निर्वाहस्तवापि तुल्य इत्याह ॥ अन्यथेति ॥ एवमवचन इत्यर्थः । आनन्तर्यमपि द्वेधा । यस्मात्कस्माच्चित् विचारकर्तव्यतोपयुक्तकारणकलापाद्वा । तत्राद्यस्य वैयर्थ्यमेवोत्तरम् । सर्वस्यापि लोकस्य किंचित्करणानन्तरमेव कस्यचित्करणस्य स्वभावसिद्धत्वात् । अतो वैयर्थ्यपरिहारार्थमेव द्वितीयमेष्टव्य-

मित्याशयः । ननु नास्माकमेवं निर्वाहः । साक्षादेव हेतुत्वलाभात् । कारणानन्तर्यं हि मुख्यानंतर्यम् । कार्ये कारणानन्तर्यस्याव्यभिचारित्वात् । विजातीयेनाव्यवहितत्वाच्च । तथाच मुख्यामुख्ययोर्मुख्ये कार्यसम्प्रत्यय इति न्यायेनानन्तर्यवदथशब्दो मुख्यं कारणानन्तर्यमेव वदतीत्यानन्तर्यार्थकेनैवाथशब्देन प्रकृतस्य हेतुत्वं लभ्यत इति शङ्कते ॥ नन्विति ॥ सत्यमव्यवहितमानन्तर्यं मुख्यानन्तर्यमिति । तद्यदि कार्यकारणयोरेव स्यात्तदा स्यादेवं त्वदुक्तम् । न चैवम् । चैत्रो गतोऽथमैत्र आगत इत्यादावकारणकार्ययोः चैत्रगमनमैत्रागमनयोः अप्यव्यवहितानन्तर्यदर्शनेन मुख्यमानंतर्यं वदन्नप्ययमथशब्दो न कारणानन्तर्यं वक्तुं शक्नोतीति भावेन परिहरति ॥ अव्यवधेरिति ॥ अकारणाच्चैत्रगमनात्तदकार्ये मैत्रागमनादौ यदानन्तर्यं तत्राप्यव्यवधानस्य सम्भवादित्यर्थः । अत एव ''हलोनन्तराः संयोगः'' इत्यादौ अनन्तरा अव्यवहिता इत्यव्यवहितानन्तर्यं हलामाहेति भावः ॥ अमुख्यत्वेति ॥ यद्यव्यभिचारित्वमव्यवधानवन्मुख्यत्वे हेतुस्तर्हि व्यवहितानन्तर्ये यथाऽमुख्यत्वाभिमानस्तथा चैत्रो गत इत्यादौ स्यादित्यर्थः ॥ नियतपदेति ॥ अव्यभिचरितानन्तर्यरूपमुख्यानन्तर्यस्यैव ग्रहणसम्भवेनानियतानन्तर्यवति रासभादावतिव्याप्त्यभावादिति भावः । न चेष्टापत्तिः । सर्वतान्त्रिकविरोधादिति भावः । किञ्च यद्येवमपि कारणानन्तर्यं मुख्यमित्युच्येत तर्ह्यर्थान्तरत्वमपि न यतः कुतश्चित्प्रकृतान्मुख्यं किंत्वर्थान्तरं प्रति कारणभूतात्प्रकृतादेवेति साक्षादेव प्रकृतस्य हेतुत्वं सुवचमित्याह ॥ कारणस्येति ॥ तथाच पूर्वप्रकृतादर्थादर्थान्तरपरत्वेऽप्यथशब्दस्यानन्तर्यार्थत्वं विनैव पूर्वप्रकृतस्य विचारकर्तव्यतायां हेतुत्वं लभ्यत इति भावः । यदप्यानन्तर्याभिधानेऽर्थान्तरत्वस्यांतर्णीततया सिद्धिरिति तदपि सममित्याह ॥ पूर्वेति ॥ कथं तर्हि प्रकृतादर्थादर्थान्तरपरत्वस्य निरास इत्यतस्त्रिभिर्हेतुभिस्तमाह ॥ तस्मादिति ॥ परोक्तपरिहारस्यायोगादित्यर्थः ॥ अधिकार्यादीति ॥ आनन्तर्य एव तत्सूचनादिति भावः ।

पाण्डुरङ्गि – सूत्रे कल्पान्तरानुपन्यासेनेति ॥ किं नित्यः शब्दः अथानित्य इत्यादावनित्य इत्यादेरिवाथातोब्रह्मजिज्ञासेतिसूत्रे उत्तरत्र कल्पान्तरानुपन्यासात् अतो ब्रह्मजिज्ञासेत्यादिशब्दैरप्रतीतेः कल्पान्तराभावे च तत्सम्बन्धिन्याः प्रकृतापेक्षाया एवायोगादित्यर्थः । एवं भामत्यभिहितं भाष्याभिप्रायं प्रदूष्य विवरणोक्तमपि दूषयितुमाह ॥ नापीति ॥ प्रकृतादर्थादर्थान्तरपरत्वशङ्कानिरासायेति शङ्काग्रन्थस्यायमर्थः । नानन्तर्यमथशब्दार्थः । प्रकृतादर्थादर्थान्तरस्यापि तदर्थत्वात् । न च तस्य तदर्थत्वे मानाभावः ।

(पाण्डुरङ्गि)

यत्रार्थान्तरेऽभिहितेऽर्थान्तरविवक्षया ब्रवीति अथैवं मन्यस इति तत्रार्थान्तरत्वविवक्षयाप्यथशब्दः किं न स्यादिति ॥ अर्थान्तरत्वं हीति ॥ यत्किञ्चित्पूर्वप्रकृतं प्रकृतशब्दार्थः किं वा कार्यान्वियतप्राक् क्षणवृत्तितया प्रकृतप्रकृतशब्दार्थ इति विकल्पार्थः ॥ व्यर्थमिति ॥ अथशब्दस्य तदर्थत्वमिति शेषः । तावतापि तस्य हेतुत्वाभावादिति भावः ॥ आनन्तर्याभिधानमिति ॥ नियतप्राक्क्षणवर्तीदमिति ज्ञानं तदा स्यात् यदा तदनन्तरं नियमेनार्थान्तरमुत्पद्यते । तथाचावश्यापेक्षितमानन्तर्यमथशब्देनाभिधीयताम् । अर्थान्तरस्य चार्थात्सिद्धिरिति न तद्ग्रहणं युक्तमिति भावः ॥ अन्तर्णीततयेति ॥ स्वस्य स्वानन्तर्यासम्भवेनानन्तर्यधर्मिप्रतियोगिनोर्भेदसिद्धिरिति भावः । विवरणोक्तोऽभिप्राय इत्यस्य नापीति पूर्वेणान्वयः ॥ अन्यथेति ॥ अथशब्दस्यानन्तर्यार्थत्वेपि न पुष्कलकारणानन्तर्यं सिध्यति । पुष्कलकारणानन्तर्यस्याथशब्दादप्रतीतेरिति भावः ॥

ननु कारणादानन्तर्यमिति ॥ पुष्कलकारणात् फलस्यानन्तर्यमित्यर्थः । सामग्रीक्षणादुत्तरक्षणे कार्यस्यावश्यंभावनियमान्न कालव्यवहितत्वं व्यभिचरितत्वं च । अहेतुफलयोस्त्वानन्तर्यं कदाचिद्व्यभिचरति कदाचिद्व्यवधीयते चेति गौणमेव स्यात् । तथाच हेतुफलयोरेवानन्तर्यस्य मुख्यत्वात्तदेवाथशब्देनोत्सर्गतः प्रतीयते । गौणमुख्ययोर्मुख्ये सम्प्रत्ययादिति भावः ॥ नियतपदानर्थक्यप्रसङ्गादिति ॥ आनन्तर्यशब्दस्य कारणानन्तर्य एव मुख्यत्वेनातिव्याप्तेरेवाभावात् । अमुख्यार्थमादाय लक्षणस्यातिव्याप्तिमाशङ्क्य तत्परिहारे पदान्तरोपादानस्य चासाम्प्रदायिकत्वान्नियतपदवैयर्थ्यमिति भावः । किञ्च प्रकृतादर्थादर्थान्तरपरत्वं प्रदूष्यानन्तर्यार्थवर्णनमयुक्तम् । व्यर्थत्वात् । न च तस्य हेतुत्वलाभार्थमानंतर्यार्थत्वग्रहः । आनन्तर्यार्थत्वेपि तस्य हेतुत्वालाभात् । न च कारणानन्तर्यमेव मुख्यमिति तल्लाभ इति वाच्यम् । तथासति कारणस्य प्रकृतत्वं मुख्यमित्यपि वक्तुं शक्यत्वेन प्रकृतत्वोक्त्यैव तस्य हेतुत्वलाभेनार्थान्तरत्वस्यैव सम्भवादित्याह ॥ कारणस्य प्रकृतत्वमिति ॥ तथाचानन्तर्याभिधानेपि प्रकृतादर्थादर्थान्तरपरत्वमात्रोक्त्या कारणत्वसिद्धेर्व्यर्थ आनन्तर्यार्थत्वग्रह इति भावः । यद्यानन्तर्याभिधाने प्रकृतादर्थादर्थान्तरत्वस्यांतर्णीततया सिद्धेर्नार्थान्तरत्वं तर्हि प्रकृते तस्य पूर्वत्वोक्त्यैव तदपेक्षयार्थाऽन्तरस्य तदानन्तर्यलाभः तदभावे प्रकृतस्य पूर्वत्वायोगादित्यानन्तर्यस्याप्यन्तर्णीतत्वेन सिद्धत्वान्न तदर्थत्वमित्याह ॥ पूर्वप्रकृतादिति ॥ नन्वेवं भवतामपि पक्षे अथशब्दस्य प्रकृतादर्थादर्थान्तरपरत्वस्यैव सम्भवेन तत्परित्यागेनानन्तर्यार्थत्वोक्तेर्भाष्यकारीयाया अयुक्तत्वापत्त्या तदर्थत्वं निराकर्तव्यम् । तच्च ममापि सममित्याशङ्कामुपसंहारव्याजेन परिहरति ॥ तस्मादिति ॥

तात्पर्यचन्द्रिका

एवमानन्तर्यार्थत्वे स्थिते न तावत्तदानन्तर्यमध्ययनमात्रात् । ''शान्तोदान्त'' इत्यादिश्रुतिविरोधात् । नापि कर्मविचारात् । तदनन्तरं ब्रह्मजिज्ञासेत्यत्र क्रमे श्रुत्यर्थपठनस्थानमुख्यप्रवृत्तिक्रमाणां तत्प्रमाणानामन्यतमस्याभावात् । विस्तृतं चैतदन्यत्र ।

नापि परेषां भाष्योक्तात् ''नित्यानित्यवस्तुविवेक इहामुत्रार्थभोगविरागः शमदमादिसम्पत्तिर्मुमुक्षुत्वं चे''ति साधनचतुष्टयसम्पद्रूपादधिकारात् । तथाहि । नित्यानित्यवस्तुविवेको नाम किं ब्रह्मैव नित्यमन्यदनित्यमिति विवेकः किं वात्मानात्मसमुदाये नित्यत्वानित्यत्वे स्तो धर्मौ तयोश्च धर्मिभ्यां भवितव्यमिति निश्चयः । यद्वाऽनित्यस्य संसारस्य किञ्चिदधिष्ठानमस्तीति निश्चयो न तु ब्रह्मेति । नाद्यः । ज्ञातव्यस्य प्रागेव ज्ञाततया विचारवैफल्यात् । न च सगुणनिर्गुण-विवेकाखण्डसमन्वयाद्यर्थं शास्त्रमिति युक्तम् । भामत्यां नित्यानित्यशब्दयोः सत्यानृतपरत्वेनोक्ततया ब्रह्मैव सत्यमन्यदनृतमिति विवेकस्य प्रागेव सिद्धौ तदर्थस्य सगुणनिर्गुणविवेकादेरप्यनपेक्षितत्वात् । न हि श्रुतितात्पर्यधीः स्वरूपेणापेक्षिता । किन्तु ज्ञेयनिश्चायकतया । न चोक्तादन्यन्मुमुक्षुज्ञेयमस्ति । जीवब्रह्मभेदस्यापि ब्रह्मातिरिक्ततया तन्मिथ्यात्वस्य तदभेदस्यापि ब्रह्ममात्रतया तत्सत्त्वस्यापि तेनैव निश्चितत्वाच्च । न द्वितीयः । तन्मात्रेणानात्मप्रहारेऽनात्मविचारे प्रवृत्त्ययोगात् । ऐहिकामुष्मिकभोगविरागायोगाच्च । नांत्यः । ब्रह्मशब्दार्थत्वादेः प्रकारस्याज्ञानेपि वस्तुतो ब्रह्मणोऽनात्माधिष्ठानस्य शास्त्रवेद्यस्य ज्ञातत्वेन शास्त्रवैयर्थ्यात् ।

प्रकाशिका – एवं ''अधिकारानन्तर्यार्थश्चे''ति भाष्ये आनन्तर्यार्थ इत्यंशं समर्थ्याधिकारेत्यंशमपि समर्थयितुं प्रसक्तं प्रतिक्षिपति ॥ एवमिति ॥ मात्रपदेन शमादिव्युदासः ॥ शान्त इति ॥ ''तस्मादेवंविच्छान्तो दान्त उपरतस्तितिक्षुःसमाहितो भूत्वात्मन्येवात्मानं पश्ये''दिति श्रुतौ शान्तादिर्भूत्वा परमात्मानं स्वस्थितं विद्यादिति शमादीनां ब्रह्मज्ञानशेषतोक्तेरिति भावः ॥ कर्मविचारादिति ॥ आनन्तर्यमित्यस्यानुषङ्गः । तदनन्तरं कर्मविचारानन्तरम् ॥ श्रुतीति ॥ पूर्वतन्त्रे पञ्चमे आद्यपादे श्रुत्यादीनि क्रमेण षट् प्रमाणानि

(प्रकाशिका)

निरूपितानि । तथाहि । ''श्रुतिलक्षणमानुपूर्व्यं तत्प्रमाणत्वात्'' इत्याद्यनये ''हृदयस्याग्रेऽवद्यति अथ जिह्वायाः अथ वक्षसः । वेदं कृत्वा वेदिंकरोति । अध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयती''त्यादावथादिश्रुतिर्हृदयावदानाद्यानन्तर्ये मानमित्युक्तम् । तथा ''अर्थाच्चे''ति द्वितीयनये ''अग्निहोत्रं जुहोति यवागूं पचती''त्यादावग्निहोत्रस्य यवागूसाध्यत्वेन यवागूपाकानन्तरमेवाग्निहोत्रकरणे सामर्थ्यशब्दितमर्थरूपं मानमुक्तम् । तथा ''क्रमेण वा नियम्येत क्रत्वेकत्वे तद्गुणत्वा''दिति चतुर्थनये ''समिधो यजति तनूनपातं यजति इडो यजति बर्हिर्यजति स्वाहाकारं यजती'' त्यादौ पाठक्रम एवानुष्ठानक्रमे मानमित्युक्तम् । तथा ''स्थानाच्चोत्पत्तिसंयोगा''दिति षष्ठनये ज्योतिष्टोमविकृतिभूते साध्यस्कनामके यागविशेषे ''सह पशूनालभत'' इति श्रुत्या सहानुष्ठेयस्याग्नीषोमीयसवनीयानुबंध्यरूपपशुत्रयस्य मध्ये पूर्वं सवनीयस्यानुष्ठाने ''आश्विनं ग्रहं गृहीत्वा सवनीयं पशुमुपाकरोती''त्युत्पत्तिवाक्यावगताश्विनग्रहणसामीप्यरूपस्थानं प्रमाणमुक्तम् । तथा ''मुख्यक्रमेण वाऽङ्गानां तदर्थत्वा''दिति सप्तमे नये ''सारस्वतौ भवत'' इति विहिते ''पुमांस्त्रिये''त्येकशेषेण सरस्वतीदेवताकसरस्वद्देवताककर्मद्वयनिर्वापाद्यनुष्ठाने प्रधानक्रमापरपर्यायो मुख्यक्रमो मानमुक्तम् । तथा ''प्रवृत्त्या तुल्यकालानां गुणानां तदुपक्रमा''दिति पञ्चमनये ''सप्तदश प्राजापत्यान्पशूनालभते'' इति वाक्ये विहितसप्तदशपशुद्रव्यकसप्तदशयागाङ्गपश्वंगतया विहितेषु प्रोक्षणोपाकरणपर्यग्निकरणादिधर्मेषु सप्तदशपशुद्रव्ये प्रथममत्र पशौ प्रोक्षणमनन्तरमत्रेति विशेषे मानाभावेनेच्छयैव क्वचित्पशावादौ प्रोक्षणेऽनुष्ठिते प्रथमप्रवृत्तप्रोक्षणानुरोधेन तत्रैवोपाकरणाद्यनुष्ठाने नियामकः प्रोक्षणप्रवृत्तिक्रम इत्युक्तम् । तेषु नैकमपि कर्मविचारानन्तरं ब्रह्मविचार इत्यत्रास्तीत्यर्थः । विस्तरस्तु गुरुपादकृतन्यायमौक्तिकमालायां ध्येयः ॥

विस्तृतमिति ॥ तर्कताण्डवादाविति भावः । अतोधिकारानन्तर्यमेवाथशब्दार्थ इति स्थितम् । तत्राधिकारोपि ''भक्तिमान्परमे विष्णा'' वित्यादि भाष्यकारोक्त एव नान्य इति समर्थयितुं परोक्तमनूद्य दूषयति ॥ नापीति ॥ भाष्योक्तादधिकारादित्यन्वयः । आनन्तर्यमित्यनुषङ्गः । नित्यानित्यविवेकं तावद्दूषयितुं भामत्यनुसारेण त्रेधा विकल्पयति ॥ नित्येति ॥ विचारेति ॥ तेनापि ब्रह्मैकमेव नित्यमिति ज्ञानस्यैव सम्पाद्यत्वादिति भावः । ननु विचारो नोक्तज्ञानार्थः । किं त्विदं निर्गुणमिदं सगुणमिति विवेकार्थोऽखण्डे ब्रह्मणि समन्वयार्थो वा भेदभ्रमनिवृत्त्याद्यर्थो वेत्याशङ्क्य निराह ॥ न चेति ॥ तदर्थस्येति ॥ सगुणनिर्गुणविवेकादिर्हि ब्रह्मैकमेव सत्यमिति ज्ञानाय । तद्यदि विचारात्प्रागेव सिद्धं तदा

तदर्थकसगुणनिर्गुणविवेकाद्यर्थं विचारो व्यर्थ इत्यर्थः । तदुपपादयति ॥ न हीति ॥ विचारो हि तात्पर्यावधारणाय । तच्च ज्ञेयनिश्चयाय । ज्ञेयं च ब्रह्मैकमेव सत्यमन्यन्मिथ्येत्येतदेव । तच्च प्रागेव ज्ञातमिति विचारो व्यर्थ इति । ननु भेदासत्यत्वमभेदसत्यत्वं च ज्ञेयम् । तच्च प्राङ्न ज्ञातमित्यत आह ॥ जीवेति ॥ तदभेदस्य जीवब्रह्माभेदस्य ॥ तन्मात्रेणेति ॥ यद्यन्यदनित्यं ब्रह्मैकमेव नित्यमिति निश्चिनुयात्तदा ह्यन्यपरित्यागेन ब्रह्मविचारे प्रवृत्तिर्युज्यते। यदातु नित्यत्वानित्यत्वरूपं धर्मद्वयमस्ति तदाश्रयौ च द्वाविति निश्चयमात्रं तदा कथमात्मविचारे प्रवृत्तिः । किन्तु किं वा नित्यत्वाद्यधिष्ठानमिति सन्दिहानो नक्वापि प्रवर्तेतेति भावः । किञ्च भामतीमते विवेकस्य विरागहेतुतोक्तेरुक्तविवेकवतः पुंसः पशुपुत्राद्यैहिकभोगे स्वर्गाद्यामुष्मिकभोगे च कथं विरागः स्यादित्याह ॥ ऐहिकेति ॥ तत्र विरागस्य तदनित्यताज्ञानसाध्यत्वादिति भावः ॥ शास्त्रवैयर्थ्यादिति ॥ विचारशास्त्रमप्यसत्यसंसाराधिष्ठानस्य सत्यस्य ब्रह्मणो न ब्रह्मत्वप्रकारकज्ञानजनकम् । अखण्डार्थत्वहानेः । किंत्वधिष्ठानमात्रज्ञानजनकम् । तच्च ज्ञानं शास्त्रात्प्रागेवास्तीति व्यर्थं शास्त्रमित्यर्थः ।

पाण्डुरङ्गि – एवमथशब्दस्यारम्भाद्यर्थत्वं निरस्यानन्तर्यार्थत्वं स्थापयित्वा तदानन्तर्यं न परोक्ताध्ययनादिभ्यः किन्तु भाष्यकृदुक्ताधिकारादेवेति वक्तुमाह ॥ एवमिति ॥ तथाहीति ॥ अत्र धर्मविशिष्टधर्मिनिर्णयाभिप्रायेण प्रथमः कल्पः धर्ममात्रनिर्णयाभिप्रायेण द्वितीयः एकधर्मविशिष्टधर्मिनिर्णये सत्यन्यधर्ममात्रनिर्णयाभिप्रायेण तृतीय इति परप्रातिकूल्यौत्कट्यानुरोधेन विकल्पक्रम इति ध्येयम् । सगुणनिर्गुणविवेकार्थं वा अखण्डे समन्वयार्थं वाऽन्यार्थं वा शास्त्रमिति सङ्कीर्णोक्तं पक्षत्रयं साधारणदोषेण निराकृत्य द्वितीयमसाधारणदोषेणापि दूषयति ॥ न हीति ॥ तृतीयमसाधारणदोषेण दूषयति ॥ न चेति ॥ ननु च जीवब्रह्मभेदस्य मिथ्यात्वं वा जीवब्रह्माभेदस्य सत्यत्वं वा तिष्ठत्येवेति कथं मुमुक्षुज्ञेयमन्यन्नास्तीत्युच्यत इत्यत आह ॥ जीवब्रह्मभेदस्यापीति ॥

तात्पर्यचन्द्रिका

न च विवरणरीत्या नित्यानित्यशब्दौ ध्वंसप्रतियोग्यप्रतियोगिपरौ । ततश्च ब्रह्मज्ञानफलं स्थायि कर्मादिफलं त्वस्थायीति विवेको नित्यानित्यविवेक इति युक्तम्। प्रतिपन्नोपाधावत्यन्ताभावप्रतियोगित्वरूपबाध्यत्ववतोऽनात्मनो ध्वंसप्रति-

(तात्पर्यचन्द्रिका)

योगित्वायोगात् । पारमार्थिकत्वाकारेणात्यन्ताभावः स्वरूपेण तु ध्वंस इति चेन्न । पारमार्थिकत्वस्याबाध्यत्वरूपत्वेनान्योन्याश्रयात् । तथात्यन्ताभाव प्रतियोगित्वस्य निराकारे ब्रह्मण्यपि सम्भवाच्च । अतात्विके रूप्यादावनित्यत्वाव्यवहाराच्च । ''गौरनाद्यनन्तवती, एषोऽश्वत्थः सनातन'' इत्यादिश्रुत्यनुसाराय मोक्षेप्यतात्विकी अनुवृत्तिर्निवृत्तिस्तु तात्विकी । मुक्तेर्बन्धाद्वैषम्यं तु तात्विकनिवृत्तिमत्ता-मात्रेणेत्यापाताच्च । किञ्च विवेको भेदस्य तद्व्याप्तस्य वा ज्ञानं तस्य च भ्रमत्वे ब्रह्मविचारो न नित्यफलकः स्यात् । प्रमात्वे तु भेदः ससत्यस्स्यात् । तस्मात्परमते न नित्यानित्यवस्तुविवेको युक्तः ।

प्रकाशिका – न चेति ॥ एतन्मते चानात्मप्रहाणेनात्मविचारे प्रवृत्तिरैहिकादिभोग-विरागश्च युज्यत इति भावः ॥ प्रतिपन्नेति ॥ ''प्रतिपन्नोपाधावभावप्रतियोगित्वलक्षणस्य मिथ्यात्वस्ये''ति विवरणोक्तेस्तादृशस्य चासत्यत्वापत्त्या शशशृङ्गादेरिव ध्वंसायोगादिति भावः ॥ अन्योन्याश्रयादिति ॥ अबाध्यत्वं हि बाध्यत्वाभावः बाध्यत्वं चाबाध्यत्वाभाव इत्यन्योन्याश्रयादित्यर्थः ॥ तथेति ॥ पारमार्थिकत्वाकारेणेत्यर्थः ॥ अतात्विक इति ॥ तथाच कर्मादिफलस्य त्वयाऽतात्विकत्वेनाङ्गीकृतस्य न नित्यत्वमिति भावः । ननु ''भूयश्चान्ते विश्वमायानिवृत्ति''रिति निवृत्तिवाक्यस्य ''नेहनाने''त्यत्यन्ताभाववाक्यस्य च सत्त्वादेव द्वयमप्यङ्गीक्रियत इति चेत्तर्हि वचनान्तरमप्यनुसर्तव्यमिति भावेनाह ॥ गौरिति ॥ अविद्या आद्यन्तवती नेत्यर्थः । अश्वत्थः संसारः ॥ निवृत्तिरिति ॥ तद्बोधकश्रुत्यनु-सारायेति भावः ॥ मुक्तेरिति ॥ बन्धदशायामतात्विकानुवृत्तौ सत्यामपि न तात्विकनि-वृत्तिरिति विशेष इत्यर्थः ॥ भ्रमत्व इति ॥ यदि ब्रह्मज्ञानफलं नित्यमन्यफलमनित्यमिति ज्ञानं भ्रमस्तर्हि ब्रह्मज्ञानफलं न नित्यं स्यादिति कथं तद्विचारे प्रवर्तेत । इदं नित्यमिदमनित्यमिति भेदज्ञानस्य प्रमात्वे तद्विषयस्य सत्यत्वनियमेन भेदस्तात्विकः स्यादित्यर्थः । उपलक्षणमेतत् । तद्व्याप्तो धर्मोवा सत्यः स्यादित्यपि ग्राह्यम् ।

पाण्डुरङ्गि –प्रतिपन्नोपाधाविति ॥ यदत्यन्ताभावप्रतियोगि न तद्ध्वंसप्रतियोगि न तदत्यन्ताभावप्रतियोगीति व्याप्तेर्विद्यमानत्वेन कर्मादिफलस्यापि नित्यत्वमेवाङ्गीकर्तव्यमिति ब्रह्मज्ञानफलं नित्यं कर्मादिज्ञानफलमनित्यमिति विवेको नित्यानित्यविवेको नेत्यर्थः । ननु स्वरूपेणात्यन्ताभावप्रतियोगित्वे स्वरूपेण ध्वंसप्रतियोगित्वस्य विरुद्धत्वेपि तेन रूपेणा-

त्यन्ताभावप्रतियोगित्वस्यानङ्गीकारात् स्वरूपेण ध्वंसप्रतियोगित्वसम्भवेन उक्तनित्यानित्यवविवेकोपपत्तिरित्यभिप्रायेण शङ्कते ॥ पारमार्थिकत्वाकारेणेति ॥ तथेति ॥ पारमार्थिकत्वेनेत्यर्थः ॥ निराकार इति ॥ तथाच ब्रह्मणोऽपि स्वरूपेण ध्वंसप्रतियोगित्वोपपत्त्या पारमार्थिकत्वाकारेणात्यन्ताभावप्रतियोगित्वाविरोधे ब्रह्मज्ञानफलवत्कर्मादिफलस्य नित्यत्वापत्त्या तद्वद्ब्रह्मज्ञानफलस्य वाऽनित्यत्वापत्त्या ब्रह्मज्ञानफलं नित्यं कर्मादिज्ञानफलमिनित्यमिति विवेकानुपपत्तिरेवेति भावः ॥ अतात्विक इति ॥ तथाच पारमार्थिकत्वेनात्यन्ताभावप्रतियोगित्वेन वाच्यमिति पुनरुक्तविवेकानुपपत्तिरित्यर्थः । यद्वा तात्विकब्रह्मान्यस्य अतात्विकरूप्यादेरनित्यत्वाभावान्न ब्रह्मान्यत्सर्वमनित्यमिति विवेकानुपपत्तिरित्यर्थः ।

ननु च मिथ्यात्वस्यापि प्रमाणसिद्धत्वात् ''तद्धास्यान्ततः क्षीयत एवे''त्यादि प्रमाणैर्निवृत्तेरपि सिद्धत्वात्तदुभयान्यथानुपपत्त्या पारमार्थिकाकारेणात्यन्ताभावप्रतियोगित्वं स्वरूपेण तद्ध्वंस इत्यवश्यमङ्गीकार्यमिति ब्रह्मज्ञानफलं नित्यं कर्मादिज्ञानफलमनित्यमिति विवेको युक्त एवेत्यत आह ॥ गौरिति ॥ विद्येते आद्यन्तौ यस्या असावाद्यन्तवती । न आद्यन्तवती । इदमुक्तं भवति यद्युभयविधप्रमाणानुसारेण स्वरूपेण निवृत्तिः पारमार्थिकत्वाकारेणात्यन्ताभावप्रतियोगित्वं चेदमङ्गीक्रियते । तर्हि मुक्तौ निवृत्तिरनुवृत्तिश्चेत्यप्यङ्गीकार्यम् । श्रुत्योरविशेषात् । श्रुत्यवैशेष्ये तच्छत्यनादरणे कर्मफलक्षयश्रुतेरप्यनादरणापत्त्योक्तविवेकानुपपत्तिरेवेति । न च विरोधः । निवृत्तेस्तात्विकत्वेनानुवृत्तेश्चातात्विकत्वेनाविरोधात् । तदेतदाह ॥ अतात्विकीत्यादि ॥ नन्वेवं तात्किवकातात्विकनिवृत्त्यनुवृत्त्योर्बन्धमोक्षयोः साधारण्यान्मुक्तेर्बन्धाद्विशेषो न स्यादित्यत आह ॥ मुक्तेरिति ॥ बन्धदशायां तात्विकनिवृत्तिर्नेति भावः ॥ किञ्चेति ॥ प्रमात्वपक्षस्याद्वैतिनाङ्गीकर्तुमशक्यत्वात् भ्रमत्वे वाच्ये विपरीत एवोक्तविवेकः स्यादित्यर्थः ॥ तस्मादिति ॥ पारमार्थिकत्वेनेति विशेषणे उक्तरीत्या ब्रह्मणोपि तदापत्त्याऽत्यन्ताभावप्रतियोगित्वमात्रस्यैव वक्तव्यत्वेन तादृशस्य च ध्वंसप्रतियोगित्वासम्भवेन ब्रह्मज्ञानफलवत् कर्मज्ञानफलस्यापि नित्यत्वेन ब्रह्मज्ञानफलं स्थायि कर्मफलं त्वस्थायीति विवेकानुपपत्तिरेवेति भावः ।

तात्पर्यचन्द्रिका

नापीहामुत्रार्थभोगविरागः । विवरणे विषयैरपि नित्यमात्मस्वरूपसुखमेवाभिव्यज्यते न तु जन्यं सुखमस्तीत्युक्तत्वेन वैषयिकसुखेपि विरागायोगात् । मोक्षे रागवतस्तत्वतस्ततो भेदहीने भोगे विरागायोगाच्च । तत्वतस्तद्भेदहीनत्वेपि तदभेदहीनत्वमात्रेण विराग इति चेन्न । उभयाभावस्य व्याहतत्वात् । दृश्यते चापारमार्थिकस्यापि रूप्यस्य नेदं रूप्यमिति शुक्तिधर्मिकलौकिकपारमार्थिकभेदप्रतियोगित्वम् । शमदमादिसम्पत्तिरित्यत्र चादिशब्दो न युक्तः । तेन तितिक्षादेरेव ग्रहणं न तु विवेकादेरिति नियमहेतोस्तितिक्षाद्यनुगतस्य विवेकादिव्यावृत्तस्य चोपसङ्ग्राहकधर्मस्याभावात् ।

प्रकाशिका –एवं विवेकभाष्यं मतद्वयानुरोधेन निरस्येहामुत्रार्थभोगविराग इति भाष्यं निराह ॥ नापीति ॥ नन्वात्मरूपात्सुखाद्वैषयिकसुखस्याभेदेपि कल्पितभेदाद्विरागोपपत्तिरित्यत आह ॥ मोक्ष इति ॥ स्वरूपसुखरूपे मोक्षे इत्यर्थः । अधिष्ठानाध्यस्तयोरुभयाभावोपलम्भान्न व्याहतिरित्यत आह ॥ दृश्यत इति ॥ यद्वा अध्यस्तरूप्ये सत्यामपीच्छायां तद्भेदहीने शुक्तिशकले रागादर्शनेन तद्वन्मोक्षे रागवतोपि भोगे विरागो युज्यते इत्यतस्तत्रापि भेदाभावो सिद्ध इत्याह ॥ दृश्यते चेति ॥ एवमुक्तरीत्या मोक्ष इत्यादिविवरणदूषणतयैव योज्यम् । यद्वा स्वरूपसुखमेव वैषयिकमिति विवरणमत दोषमुक्त्वा येतु विषयैरन्तःकरणवृत्तिरूपं सुखं दुःखमिवातात्विकमेवोत्पद्यत इत्यङ्गीकुर्वते तत्पक्षेपि दोषमाह ॥ मोक्ष इति ॥ अविद्यानिवृत्त्यादिरूपे मोक्ष इत्यर्थः । विरागायोगे हेतुमाह ॥ तत्वत इति ॥ मोक्षाद्भोगस्याविद्यकभेदसत्त्वेऽपि तात्विकभेदस्य मिथ्यावादिनाऽनङ्गीकारादित्यर्थः । वह्नावयं न वह्निः किन्तु गुञ्जापुञ्ज इति मिथ्याभेदसत्त्वेऽपि तात्विकभेदाभावेन दाहस्यैव दृष्टेरिति भावः । नन्वग्नौ तात्विकभेदाभावेपि तात्विकस्याग्र्यभेदस्य सत्त्वाद्दाहो युक्तः । मोक्षस्य तु तात्विकस्यातात्विकेन वैषयिकसुखेन तत्वतोऽभेदायोगान्मोक्ष एव रागो न भोगे सम्भवतीति शङ्कते ॥ तत्वत इति ॥ ननूभयाभावस्य व्याहत्या भेदाभेदयोरन्यतरेण भाव्यमित्येतत्तात्विकधर्मिविषयं सुखं त्वतात्विकमतो न दोष इत्यत आह ॥ दृश्यत इति ॥ लौकिकेति ॥ शुक्तिसत्तासमानसत्ताको व्यावहारिक इत्यर्थः । तथाच तद्वदेव मोक्षसत्तासमानसत्ताकमोक्षगततात्विकभेद-

प्रतियोगित्वं वैषयिकसुखस्यैष्टव्यम् । तच्च त्वया सद्वैतभङ्गभिया नेष्यत इति तदभेदस्यैवापत्त्या विरागायोगो युक्त इति भावः । यद्वा सुखे न विरागः किन्तु भोग एवेत्यत आह मोक्ष इतीत्यवतार्य विवरणदूषणपरतयैव योज्यो मोक्ष इत्यादिग्रन्थः ।

एवं परमते विरागानुपपत्तिमुक्त्वाऽन्यदपि भाष्योक्तं निराह ॥ शमेति ॥ ननु ''शान्तोदान्त उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्ये''दित्येकश्रुत्युपात्तत्वमेव सङ्ग्राहकधर्म इति चेन्न । पश्येदित्यात्मज्ञानस्यापि ग्रहणापत्तेः । न चात्मज्ञानाङ्गतयोपात्तत्वं विवक्षितं तच्च भूत्वेत्यनेन शमादिपञ्चकस्यैवेति वाच्यम् । उपरतो विषयालंबुद्धिमानित्यनेन विरागस्य समाहितो यथावस्तुतत्वज्ञानीत्यनेन नित्यानित्यविवेकस्य च प्राप्त्या तयोः पार्थक्यायोगादिति भावः । अत एव तितिक्षाद्यनुगतस्येत्याद्याह । कथं तर्हि भाष्ये ''शमादिसंयुक्तो मध्यमः समुदाहृत'' इति आदिशब्द इति चेन्न । श्रुत्युक्तशमादिसर्वाशयेनोपपत्तेः । नह्यत्र नित्यानित्यविवेकादिपृथगुपादायादिशब्दः प्रयुक्तोऽस्ति । ''आब्रह्मस्तंबपर्यन्त''मित्यादिना वैराग्यस्य पृथगुक्तिस्तु वैराग्यप्राचुर्येणोत्त्योत्तमाधिकार्युपपत्तेः । तथा शान्तादिश्रुत्या नित्यानित्यविवेकस्य स्पष्टमप्रतीतेर्वैराग्यहेतुत्वालाभाच्च । सारासारविवेकादौ ''परीक्ष्य लोका''निति श्रुत्यन्तरोदाहरणं भाष्ये युक्तम् । कथं तर्हि ''एवं भूतैः प्रमाणैः पदार्थानां नित्यानित्यत्वादिकं निश्चित्य विषयेषु विरक्तस्य शमादिसम्पत्तिमत'' इत्यादि प्रमाणपद्धत्यादिप्रकरणे तत्र तत्र विवेकादिकं पृथगुक्त्वापि शमदमादीत्यादिशब्दोक्तिरिति चेन्न । हेतुहेतुमद्भावाभिव्यक्त्यर्थतया वा परप्रसिद्ध्या स्पष्टार्थतया वा ''शमदमाद्युपेतः स्या''दित्यत्र ''शान्तो भवेद्दान्तो भवेदनुकूलो भवेदाचार्यं परिचरे''दिति भाष्योदाहृतश्रुत्यन्तरोपात्तधर्माभिप्रायेण वोपपत्तेरिति दिक् ।

पाण्डुरङ्गि – नन्वाश्रयाभेदेनोभयाभावविरोधः । अन्यथा वंध्यासुतस्य शामत्वाभावे गौरवप्राप्तेरुभयाभावस्य विरुद्धत्वेनासम्भवादित्यत आह ॥ दृश्यतेचेति ॥ विपरीतेति ॥ मम विनाशो मास्त्विति विपरीतेच्छाया एव दर्शनेनेत्यर्थः ।

तात्पर्यचन्द्रिका

मुमुक्षाच न परपक्षे युक्ता । मोक्षस्य नित्यसिद्धात्ममात्रत्वेन तत्रेच्छायोगात् । वृत्त्युपलक्षितस्याप्यात्मनो वृत्तौ पश्चादिव पूर्वमपि सत्त्वाच्च । किं च किमहं मुक्तः

(तात्पर्यचन्द्रिका)

स्यामितीच्छा मुमुक्षा, चिन्मात्रं मुक्तं स्यादिति वा । नाद्यः । त्वन्मतेऽहमर्थस्य मुक्त्यनन्वयात् । नान्त्यः । जातेष्ट्यधिकारिणः पितुः पुत्रस्य स्वार्थत्वात्पुत्रः पूतादिः स्यादितीच्छावत्प्रकृते चिन्मात्रस्येच्छाश्रयाहमर्थार्थत्वाभावेन तादृशेच्छाया अदर्शनेन विपरीतेच्छाया एव च दर्शनेन ज्ञानस्यानिष्टफलत्वापातात् ।

प्रकाशिका – भाष्योक्तमन्यदपि निराह ॥ मुमुक्षाचेति ॥ ननु नात्ममात्रं मोक्षः । येनोक्तदोषः । किं त्वखण्डाकारवेदान्तजन्यचरमवृत्त्युपलक्षित एव । स च पूर्वं न सिद्ध इतीच्छा युक्तेत्यत आह ॥ वृत्तीति ॥ तथाच नेच्छोपपत्तिरिति भावः । ननु नात्ममात्रं मोक्षः किंत्वविद्यानिवृत्तिलक्षणः पञ्चमप्रकार आत्मान्यः । अतो न सदद्वैतभङ्गः । उक्तं च ''नसन्नासन्न सदसन्नानिर्वाच्यश्च तत्क्षय'' इतीति चेन्न । चतुर्थप्रकारस्यैवायोगेन पञ्चमप्रकारस्याप्ययोगात् । यदप्यविद्यानिवृत्तिरूपो मोक्ष आत्मान्यः सत्य एव । न चाद्वैतभङ्गः । अभावद्वैतस्याङ्गीकारात् । अतो मोक्षेच्छा युक्तेति तदप्यभावद्वैतस्य न्यायामृते निरासान्निरस्तम् । विस्तरस्तु चतुर्थपरिच्छेदे बोध्य इति भावः । एतन्मतसाधारण्येन दोषान्तरमाह ॥ किञ्चेति ॥ अहमर्थस्य मुक्तिः स्यादितीच्छावा उताहमर्थविशेष्यभूतस्य चिन्मात्रस्य मुक्तिस्स्यादितीच्छावेत्यर्थः ॥ मुक्त्यनन्वयादिति ॥ अहमर्थस्यानात्मत्वेन तद्विलयस्यैव मोक्षत्वादिति भावः ॥ अनिष्टेति ॥ चिन्मात्रं मुक्तं स्यादितीच्छाह्यहमर्थस्य वाच्या । चिन्मात्रस्येच्छायोगात् । तथाचान्यगतफलेच्छयाऽन्यस्य श्रवणादौ प्रवृत्त्ययोगेन न तथेच्छा सम्भवतीत्यहमर्थार्जितज्ञानस्याकाम्यमानचिन्मात्रमुक्तिफलकत्वेऽनिच्छाविषयफलकत्वं स्यादित्यर्थः ।

ननु जातेष्ट्यादौ पुत्रगतपूतत्वोद्देशेन पितुः प्रवृत्तिवद्भविष्यतीत्यतस्तद्वैलक्षण्यमाह ॥ जातेष्टीति ॥ चतुर्थस्य तृतीयपादे ''फलसंयोगस्त्वचोदिते नस्यादशेषभूतत्वा''दिति सप्तदशेधिकरणे ''वैश्वानरं द्वादशकपालं निर्वपेत्पुत्रे जात'' इति विधाय श्रुते ''यस्मिन्जात एतामिष्टिं निर्वपति पूत एव तेजस्व्यन्नाद इन्द्रियावी पशुमान्भवती''ति फलवाक्ये किं पूतत्वादिकमिष्टिकर्तुः पितुः फलमुत पुत्रस्येति विशयेऽन्यफले कर्मण्यन्यस्य प्रवर्तनायोगात्पितुरेव प्रवर्त्यत्वेन वि धविरोधात् ''अग्नीनादधीते''त्याधानवाक्यगतात्मनेपदेन अग्निसाध्यकर्मफलानामाधातृगामित्वनियमात् पितुरेव फलमिति प्राप्ते यस्मिन्जाते निर्वपति सपूतो भवतीति स्पष्टं पुत्रगामित्वावगमात्पुत्रफलमपि पितुरभिलषितमेवेति विधेरात्मनेपदस्य

चाविरोधात्पुत्रस्यैव फलमिति सिद्धान्तितम् । अत्र पुत्रस्य पितुरुपकारकत्वेन पित्रर्थत्वात्पुत्रगतपूतत्वादीच्छा पितुर्यथा सम्भवति न तथा प्रकृते । चिन्मात्रस्याहमर्थोपकारकत्वाभावेन अहमर्थार्थित्वाभावाच्चिन्मात्रगतमुक्तीच्छा नाहमर्थस्य युक्तेत्यर्थः । किञ्च चिन्मात्रं मुक्तं स्यादितीच्छाया अननुभवेनाहं मुक्तः स्यामितीच्छाया एवानुभूयमानत्वेनाकाम्यमानफलत्वं स्यादित्याह ॥ तादृशेति ॥

तात्पर्यचन्द्रिका

किञ्च किं भामतीरीत्या साधनचतुष्टये पूर्वपूर्वस्य उत्तरोत्तरहेतुत्वेन मुमुक्षैवाधिकारिविशेषणमन्यत्तद्धेतुभूतं किं वा विवरणैकदेशोक्तरीत्या मुमुक्षावद्विवेकादिरप्यधिकारिविशेषणम् । आद्ये मुमुक्षानन्तर्यमेवाथशब्दार्थः स्यान्न चतुष्टयानन्तर्यम् । अन्यथा विवेकहेत्वानन्तर्यमपि तदर्थः स्यात् । अन्त्येपि तत्किं सामर्थ्यादिरिवान्वयव्यतिरेकाभ्यां गम्यं किं वा गृहदाहादेरिव शास्त्रात् । नाद्यः । शमाद्यभावेपि मुमुक्षामात्रेण विचारदर्शनात् । ननु स विचारः शूद्रयागवन्न फलपर्यन्तस्तत्पर्यंतस्तु शमाद्यभावेनास्तीति चेन्न । तथापि विरागशमदमादिमुमुक्षासु सतीषु विवेकाभावेन फलपर्यन्तविचाराभावादर्शनात् ।

नान्त्यः । श्रुत्याद्यवगतशेषत्वस्यापि मन्त्रस्य वस्तुसामर्थ्यापरपर्याय- लिङ्गेनानुष्टेयप्रकाशनद्वारैव शेषत्ववदारुण्यादेरेकहायन्यादिद्रव्यावच्छेदद्वारेणैव क्रयशेषत्ववच्च विवेकादेरपि वैराग्यादिद्वारैव विचारहेतुत्वस्य न्याय्यत्वात् । ''परीक्ष्यलोका''निति श्रुति सिद्धत्वाच्च मुमुक्षावदधिकारिविशेषणत्वायोगात् । न हि यागे स्वर्गकामनावत्तद्धेतुभूतमप्यधिकारिविशेषणम् । अस्माकं तु मते यथा शास्त्रं विवेकादेरधिकारिविशेषणवैराग्यादिहेतुत्वं शमादेस्त्वधिकारिविशेषणत्वमिति विशेषणानां चतुष्त्वमिति परोक्तं न युक्तम् ।

प्रकाशिका – एवं साधनचतुष्टयं भाष्यकारीयं पृथङ्निरस्य प्रकारान्तरेणापि निरसितुं मतद्वयानुरोधेन विकल्पयति ॥ किञ्चकिमिति ॥ मुमुक्षानन्तर्यमेवेति ॥ तथा च ''अथशब्देन यथोक्तसाधनसम्पत्त्यानन्तर्यमुपदिश्यते'' इति तदीयभाष्यविरोध इति भावः । मुमुक्षानन्तर्योक्तौ तद्धेत्वानन्तर्यमपि लभ्यत इत्यत आह ॥ अन्यथेति ॥ तथाच भाष्ये

आनन्तर्यप्रतियोगित्वेन साधनचतुष्टयोक्तिरयुक्तेति भावः ॥ सामर्थ्यादेरिति ॥ अर्थी समर्थो विद्वानधिक्रियत इति न्यायेन सामर्थ्यादौ सति कर्माद्यनुष्ठानमन्यथा नेत्यन्वयव्यतिरेकाभ्यामर्थित्वादेरधिकारिविशेषणत्वं यथा एवं साधनचतुष्टयस्याप्यधिकारिविशेषणत्वं गम्यं किमित्यर्थः ॥ गृहदाहादेरिति ॥ ''यस्य गृहान् दहत्यग्नये क्षामवते पुरोडाशमष्टाकपालं निर्वपे''दिति क्षामवत्यामिष्टौ गृहदाहो निमित्तमधिकारिविशेषणं यथा शास्त्रादवगम्यते तथा मुमुक्षावद्विवेकादिरप्यधिकारिविशेषणं किं शास्त्राद्गम्यमित्यर्थः ॥ मुमुक्षामात्रेणेति ॥ तथाच व्यतिरेकव्यभिचारान्न शमादेरधिकारिविशेषणत्वमिति भावः ॥ स विचार इति ॥ मुमुक्षामात्रवत्कृतः ॥ विवेकाभावेनेति ॥ तथाच नित्यानित्यविवेकस्य नाधिकारिविशेषणत्वमिति भावः । न च तदभावे वैराग्यादिकमेव नेति वाच्यम् । तद्धेतुत्वस्य त्वयाऽनङ्गीकारादिति भावः ॥

श्रुतीति ॥ तृतीये ''लिङ्गक्रमसमाख्यानात्काम्ययुक्तं समाम्नान''मिति द्वितीयपादीयसप्तमेऽधिकरणे काम्ययाज्यानुवाक्याकाण्डमिति समाख्याते मन्त्रकाण्डे समाम्नातानां ''इन्द्राग्नीरोचनादिव'' इत्यादीनां मन्त्राणां किं लिङ्गेन सर्वत्र विनियोगः किं वा क्रमसमाख्याभ्यां काम्येष्टिकाण्डमिति समाख्यातेष्टिकाण्डे क्रमेणाम्नास्विष्टिष्विति संशये श्रुतिवदर्थप्रकाशनसामर्थ्यरूपलिङ्गस्यापि प्रमाणान्तरानपेक्षस्यैव विनियोजकत्वात् क्रमसमाख्याभ्यां बलवत्त्वाच्च तद्बाधेनार्थवशेन सर्वत्र विनियोग इति प्राप्ते मन्त्रप्रकाश्यानामिन्द्रादीनां कर्मणोन्यत्रापि प्रतीतेस्तत्स्वरूपमात्रप्रकाशनेन मन्त्राणां फलाप्राप्तेस्तत्प्राप्तये कर्मसम्बन्धापादकं प्रमाणान्तरमपेक्ष्य द्वारविशेषे लिङ्गविशेषस्य विनियोजकत्वमिति क्रमसमाख्यानुसारेण काम्येष्टिष्वेव विनियोग इति सिद्धान्तितम् । तथा तत्रैव ''अर्थैकत्वे द्रव्यगुणयोरैककर्म्यान्नियमस्स्या''दित्याद्यपादीयषष्ठेधिकरणे ज्योतिष्टोमे श्रुतं ''अरुणया पिङ्गाक्ष्यैकहायन्या सोमं क्रीणाती''ति वाक्यमुदाहृत्य किमारुण्यं वाक्यभेदाश्रयणेन प्राकरणिकसर्वद्रव्येषु निविशते किं वा क्रयेण सम्बन्ध्यैकहायन्यां निविशत इति संशये तृतीयया करणत्वावगमादमूर्तस्य गुणस्य क्रयाविनिर्वर्तनाशक्तेः क्रयसम्बन्धायोगाद्वाक्यभेदेन प्राकरणिक सर्वद्रव्ये निवेश इति प्राप्ते गुणस्य साक्षात्क्रयानिर्वर्तकत्वायोगेपि साधनीभूतद्रव्यावच्छेदद्वारा तत्सम्भवान्न वाक्यभेदो न्याय्य इत्येकहायन्यामेव निवेश इति सिद्धान्तितम् । अत्र लैङ्गिकविनियोगस्य सामान्यसम्बन्धघटकप्रमाणान्तरसापेक्षतया श्रुतिप्रकरणादिना सिद्धे तस्मिन् लिङ्गेनानुष्ठेयविशेषप्रकाशनद्वारा यथा मन्त्राणां कर्मशेषत्वं यथा वा तृतीयाश्रुत्याऽवगत-

क्रयशेषत्वस्याप्यारुण्यादेः क्रयसाधनैकहायनीद्रव्यावच्छेदद्वारेण तच्छेषत्वं तथा विवेकादेर्विचारहेतुत्वश्रवणेपि वैराग्यादिद्वारैव विचारहेतुत्वं न्याय्यम् । विवेकादेर्वैराग्यजनन एव सामर्थ्यादिति भावः । विचारविधिवाक्य एव विवेकादेः साक्षाद्धेतुत्वावगमेपि पारम्पर्यं न्याय्यमिति वक्तुं द्वितीयदृष्टान्तः ।

न केवलमिदं न्यायप्राप्तं श्रुतं चेत्याह ॥ परीक्ष्येति ॥ ''परीक्ष्य लोकान्कर्मचितान्ब्राह्मणो निर्वेदमाया''दित्यत्र लोकान् विष्णुलोकेतरान् कर्मोपादितानसारानित्यतया परीक्ष्य वैराग्यं प्राप्नुयादिति श्रुत्या विवेकस्य हेतुत्वलाभात् । समानकर्तृकयोः पूर्वकाले क्त्वाप्रत्ययस्मरणादिति भावः । ननु परम्परयापि विशेषणत्वलाभात्कथमयोग इत्यत आह ॥ मुमुक्षावदिति ॥ न साक्षादिति भावः । तद्धेतुभूतं कामनाहेतुभूतम् । अयं च दोषस्तवापि सम इत्यत आह । अस्माकमिति ॥ परीक्ष्येति श्रुतेर्विवेकस्य वैराग्यादिहेतुत्वमित्यर्थः । वक्ष्यमाणदिशा निदिध्यासनाङ्गत्वमेवेति भ्रमनिरासायाह ॥ शमादेस्त्विति ॥

पाण्डुरङ्गि –अधिकारिविशेषणहेतुस्तद्विशेषणं न भवतीत्यत्र व्याप्तौ दृष्टान्तमाह ॥ न हि याग इति ॥ यथा शास्त्रमिति ॥ तथाचान्वयव्यतिरेकपक्षोक्तदोषान्नोक्तश्रुतिविरोधो वाऽस्मदभिमत- प्रमाणाभावो वा नेति भावः । विवेकादेरित्यत्रादिशब्देन वैराग्यग्रहणम् । वैराग्यादिहेतुत्वमित्यत्र विष्णुपादैकसंश्रयत्वपरिग्रहः । इतिहासपुराणादिनेत्यत्रादिपदेन श्रुतिमूलहितैषिपित्रादिवाक्यश्रवणानां सङ्ग्रहः ॥

तात्पर्यचन्द्रिका

केचित्तु नित्यानित्यवस्तुविवेकादीनि न ब्रह्ममीमांसाधिकारिविशेषणानि । तेषां तत्साध्यत्वेनान्योन्याश्रयात् । न च ब्रह्मज्ञानफलमेव नित्यमन्यदनित्यमिति विवेको वैशेषिकादिशास्त्रान्तरात् । प्रथममेवाध्ययनविधिवश्यतया पुरुषस्य शास्त्रान्तरानवकाशात् । तत्रोक्तनित्यानित्यविवेकस्य वेदान्तविरुद्धत्वाच्च । नापीतिहासपुराणादिना । विचारात्प्राक् तेन तदनिश्चयात् । अन्यथा ब्रह्मनिश्चयोपि तेनैव स्यात् ।

शमदमादीनि तु निदिध्यासनाङ्गानि । ''तस्मादेवंविच्छान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्ये''दिति श्रुतावेवंविच्छब्देन शास्त्रजन्यज्ञानमनूद्य पश्येदिति निदिध्यासनाङ्गतया तेषां विधानात् । न तु विचाराङ्गानि ।

इहैव विचारशास्त्रे ''शमदमाद्युपेतः स्या''दित्यत्र तद्विधानादित्याहुः । तन्न । ''यत्त्वादौ श्रद्धया सिद्धं पुनर्न्यायेन साधित''मिति न्यायेन ''अनित्यत्वात्सदुःखत्वान्न धर्माद्याः परं सुखम् । मोक्ष एव परानन्दः'' इत्यादीतिहासादिना वा ''नास्त्यकृतः कृतेने''त्यादिश्रुतित आपाततो वा श्रुतिमूलहितैषिपित्रादिवाक्येन वा श्रवणेन वा मननात्मकविचारात्प्रागपि श्रद्धामात्रेण नित्यानित्यविवेकसिद्धेः । अन्यथा त्वन्मतेप्यपशूद्रमधिकारे ज्ञातेऽशूद्रस्यैतच्छास्त्रविचारे प्रवृत्तिः प्रवृत्तौ चैतच्छास्त्रेणापशूद्रमधिकार इत्यन्योन्याश्रयः स्यात् । तथाऽध्ययनविधावप्यधीते स्वाध्याये ''अष्टवर्षं ब्राह्मण''मित्यादिवाक्येनाष्टवर्षत्वादेरधिकारिविशेषणत्वज्ञानं तज्ज्ञाने चाध्ययने प्रवृत्तिरित्यन्योन्याश्रयः स्यात् । तथा ब्रह्मज्ञानस्यानन्तस्थिरफलत्वनिश्चये तदर्थिनो ब्रह्मविचारे निश्शङ्कप्रवृत्तिः विचारेण च तन्निश्चय इत्यन्योन्याश्रयः स्यात् ।

फलज्ञानं सम्भावनात्मकं चेद्विवेकोऽपि तथाऽस्तु । यद्यपि त्वन्मते पूर्वप्रवृत्तेन कर्मविचारेण । कर्मणामल्पास्थिरफलत्वं निश्चितं तथापि न तन्निश्चाय एव नित्यफलार्थिनो ब्रह्मविचारे प्रवृत्तिहेतुः । भिन्नविषयत्वात् । अतिप्रसङ्गाच्च । नापि कर्मणामल्पास्थिरफलत्वनिश्चयसहितो ब्रह्मज्ञानस्यापाततोऽनन्तस्थिरफलसन्देहस्तद्धेतुः । अन्यस्यानुपायत्वनिश्चयेन ततो निवृत्तिमात्रसिद्धावपि तस्योपायत्वानिश्चये तदुपेयार्थिनस्तत्र निश्शङ्कमप्रवृत्तेः । एवं विदिति वाक्येन शमादीनां निदिध्यासनाङ्गत्वेपि ''प्रशान्तचित्ताय शमान्विताय प्रोवाच तां तत्वतो ब्रह्मविद्या''मित्यादिवाक्यावगतं श्रवणाङ्गत्वं च न विरुद्धम् । किञ्च ''परीक्ष्य लोकान्कर्मचितान्ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन तद्विज्ञानार्थं सगुरुमेवाभिगच्छे''दित्यादौ विवेकादीनां श्रवणाङ्गोपसत्तेः पूर्वभावश्रुतेः कथं श्रवणानन्तरभावित्वम् । न च नित्यानित्यविवेकमात्रं विचारफलं येन तद्वैयर्थ्यं स्यात् । तस्मादथशब्दस्याधिकारानन्तर्यमेवार्थः तदर्थत्वं च स्वमत एव युक्तं न तु परमत इत्यभिप्रेत्याह भाष्यकारः ॥ अधिकारानन्तर्यार्थश्चेति ॥

प्रकाशिका – नित्यानित्येति ॥ आदिपदाच्छमादिग्रहः ॥ अन्योन्याश्रयादिति ॥ ब्रह्मज्ञानफलं नित्यमन्यफलमनित्यमिति विवेको विचारस्त्रसम्पाद्य इति कृत्वा विवेके सत्यधिकारसम्पत्त्या शास्त्रे प्रवृत्तिस्तत्प्रवृत्त्यनन्तरं च विवेकसम्पत्तिरित्यन्योन्याश्रयादित्यर्थः ॥ शास्त्रान्तरादिति । सिद्ध्यतीति शेषः । येन नान्योन्याश्रय इति भावः । विवेक इत्येव वक्तव्ये ब्रह्मज्ञानेत्यादिना तद्विवरणं तद्विरोधस्फोरणाय । अत एवाह ॥ तत्रोक्तेति ॥ नापीति ॥ विवेक इत्यनुषङ्गः । निरस्यति ॥ विचारादिति ॥ तथाच विचारे प्रवृत्त्यनन्तरं तेनेति हासाद्यर्थनिर्णये ततो विवेकसिद्धिस्तत्सिद्ध्यनन्तरं च विचारे प्रवृत्तिरित्यन्योन्याश्रय एवेत्यर्थः ॥ अन्यथेति ॥ विचारं विनैवापाततो विवेकसिद्धावित्यर्थः ।

शमादेरपि विचाराङ्गत्वं प्रागादिपदेन निरस्तमपि स्पष्टं निरस्यति ॥ शमेति ॥ यद्वा प्रागधिकारिविशेषणत्वं निरस्तम् । तदेव कुत इत्यतोऽनंगत्वादिति भावेनाङ्गत्वं निरस्यति ॥ शमेति ॥ शास्त्रजन्येति ॥ विचारजन्येत्यर्थः ॥ शमेति ॥ शमदमाद्युपेतः स्यात्तथापि तु ''तद्विधेस्तदङ्गतया तेषामवश्यानुष्ठेयत्वा''दिति सूत्रे तृतीये विधानादित्यर्थः । तथाच शास्त्रे प्रवृत्त्यनन्तरं शमादिविधिदृष्ट्या तत्सम्पादनं तत्सम्पत्त्यनन्तरं शास्त्रे प्रवृत्तिरित्यन्योन्याश्रय इति भावः । श्रद्धया आस्तिक्यबुद्ध्या । न्यायेनेत्यादि तृतीयांतानां विवेकसिद्धेरित्यन्वयः । धर्मादीनां परमसुखत्वाभावे हेतुद्वयमनित्यत्वादित्यादि । तथाच सयुक्तिकत्वान्निश्चायकत्वमस्येति भावः । संसारे परिवर्ततामिति वाक्यशेषः । अकृतो नित्यपुमर्थो मोक्षः कृतेन कर्मणा न सिद्ध्यतीत्यर्थः । ननु विनाविचारं श्रुत्यर्थो न निर्णीत इत्यत उक्तमापातत इति । वाक्येऽप्रामाण्यव्युदासायोक्तं श्रुतीति । श्रवणेन औपदेशिकवाक्यार्थग्रहणरूपेण ॥ सिद्धेरिति ॥ तथाच नान्योन्याश्रय इति भावः ॥ अपशूद्रमिति ॥ ''अपपरिबहिरंचवः पञ्चम्ये''त्यव्ययीभावः । ''शुगस्य तदनादरश्रवणा''दिति नये शूद्रस्याधिकारनिषेधादिति भावः ॥ अधिकार इति ॥ अधिकारज्ञानमित्यर्थः । अत उक्तैव रीतिरुपेयेति भावः ।

ननु न ब्रह्मज्ञानं नित्यफलमिति निश्चित्यात्र प्रवर्तते । येनोक्तदोषः । किन्तु प्रायेण नित्यफलं भवितुमर्हतीत्युत्कटकोटिकसंशयादेवेत्याशङ्क्य मोक्षोपि नित्योभवितुमर्हतीत्येवं रूपादेव ज्ञानादत्रापि प्रवृत्तिः स्यादित्याह ॥ फलेति ॥ भिन्नेति ॥ कर्मणामनित्यफलत्वनिश्चयेन नित्यपुमर्थिनः ततो निवृत्तावपि यावद्ब्रह्मज्ञानस्य न नित्यफलं निश्चितं तावद्ब्रह्मविचारे प्रवृत्तिर्न युक्तेत्यर्थः ॥ अतिप्रसङ्गाच्चेति ॥ वात्स्यायनादावपि प्रवृत्तिप्रसङ्गात् । कृषेर्धान्यफलकत्वनिश्चयेन ज्योतिष्टोमादौ स्वर्गार्थिनः प्रवृत्तिप्रसङ्गादित्यर्थः ॥

(प्रकाशिका)

निश्चयसहित इति ॥ अतो भिन्नविषयत्वमिति भावः । अन्यस्य कर्मणः । तस्य ब्रह्मज्ञानस्य । तत्र ब्रह्मज्ञानजनकविचारे । एतदुक्तं भवति । ब्रह्मज्ञानस्यानन्तस्थिरफलत्वसन्देहेन ब्रह्मविचारे सशङ्कप्रवृत्तौ सम्भवंत्यामपि न निश्शङ्कप्रवृत्तिः । तस्याश्च तथाविधफलहेतुत्वनिश्चयसाध्यत्वात् । तस्य च विचारमन्तरेणा सिद्धेरन्योन्याश्रयो दुर्वार इत्युक्तैव रीतिराश्रयणीयेति । एवं नित्यानित्यवस्तुविवेकस्य ब्रह्मविद्याधिकारिविशेषणत्वं समर्थ्य शमादेरपि तत्त्वं समर्थयते ॥ एवंविदितीति ॥ यथा ह्येकस्यैव दध्यादेर्वचनात् क्रत्वर्थत्वं पुरुषार्थत्वं च तद्वदिति भावः ॥ परीक्ष्येति ॥ कर्मापादितान् विष्णुलोकेतरान् लोकानसाराननित्यतया निश्चित्य ब्राह्मणो वैराग्यं सम्पादयेत् यतोऽकृतो मोक्षः कृतेन कर्मणा नसिद्धयति किं तु मानेन, तस्माद्विज्ञानार्थं गुरुमुपगच्छेदित्यर्थः ॥ श्रवणेति ॥ विचारानन्तरभावित्वमिति वाच्येऽप्येवमुक्तिस्तस्य श्रवणाङ्गत्वमप्यस्तीति वक्तुम् । ननु विवेकादेर्विचारात्प्राक् सिद्धत्वेन विचारोऽनर्थक इत्यत आह ॥ न चेति ॥ वासुदेवमहामहिमादेरपि वर्णनादिति भावः । प्रतिवचनाद्यभावेऽपीत्यादिना प्रतिपादितमर्थमुपसंहरन्भाष्यारूढं करोति ॥ तस्मादिति ॥ प्रारम्भाद्यर्थकत्वासम्भवादित्यर्थः। वादित्यर्थः ।

पाण्डुरङ्गि –यत्त्वादाविति ॥ अस्मिन्पक्षे ब्रह्मविचारवैयर्थ्यमिति परोक्तदोषपरिहाराय पुनर्न्यायेनेति न्यायांशोप्युदाहृतः ॥ अन्यथेति ॥ उक्तप्रकारैः परिहारानादरेण अधिकारिविशेषणानां शास्त्रसाध्यत्वमात्रेणोक्तान्योन्याश्रय इत्यर्थः । शास्त्रसाध्यस्य शास्त्रप्रवर्तकत्वं नेत्येवोक्तावन्योन्याश्रये व्याप्त्यङ्गीकारे आद्यस्तर्कः । तत्र व्याप्तिभङ्गश्च । अधिकारिविशेषणत्वे न विशेषणे त्वाह ॥ तथेति ॥ ब्रह्मविचाराधिकारिविशेषणत्वे त्वाह ॥ तथेति ॥ शमादीनां श्रवणाङ्गत्वं किं बाधकसद्भावान्नाङ्गीक्रियते साधकाभावाद्वा । नाद्यः । तदभावात्। न च श्रमादेर्निधिध्यासनाङ्गत्वप्रतिपादकैवंविच्छान्तोदान्तउपरतो भवेदिति श्रुतिरेव बाधिकेति वाच्यम् । तस्याः शमादेर्निदिध्यासनाङ्गत्वमात्रसाधकत्वेनान्याङ्गत्व निषेधकत्वाभावादित्याह ॥ एवंविदिति ॥ न द्वितीय इत्याह ॥ प्रशान्तेति ॥ एवं श्रवणाङ्गत्वं प्रसाध्य तदनङ्गीकारे बाधकमाह ॥ किञ्चेति ॥ नन्वेवं विचारवैयर्थ्यम् । तत्फलस्य ज्ञातत्वात् । तस्मात् श्रुतमप्यङ्गत्वं विचारवैयर्थ्यान्नाङ्गीकार्यमित्यत आह ॥ न चेति ॥

तात्पर्यचन्द्रिका

टीकायां तत्फलतयेति पाठः साधुः । न तु तत्परतयेति । विघ्नोत्सारणासाधारणकारणरूपस्य विष्णुस्मरणाथशब्दोच्चारणादेर्मङ्गळस्याशब्दार्थत्वेन तत्परत्वायोगात् । प्रशस्तरूपमङ्गळात्मकस्य ब्रह्मणोथशब्दावयवाकारार्थत्वेपि तस्येहाप्रस्तुतत्वात् । तस्याभिधेयमर्थमाहे''त्युत्तरग्रन्थाननु गुणत्वात् । मङ्गळप्रयोजनक इति सुधाग्रन्थविरोधाच्च । मङ्गळोक्त्यादेरिति टीकाया अपि विघ्ननिवर्तकशब्दोच्चारणादेरित्येवार्थः । अन्यथा ''शङ्खवीणावेणुध्वनिवत् श्रुतितोमाङ्गलिकत्वा''दिति सुधाविरोधात् । तत्परतयेति पाठेप्ययमेवार्थोनुसन्धेयः । एवं चाथशब्दो मङ्गलार्थ इति भाष्यस्याथशब्दो विघ्नोत्सारणासाधारणकारणात्मकानुष्ठेयविष्णुस्मरणाथशब्दोच्चारणरूपमङ्गलप्रयोजनकः प्रशस्तरूपाननुष्ठेयरूपविष्ण्वभिधायकश्चेत्यर्थद्वयं द्रष्टव्यम् ।

द्वितीयमाक्षिपतीति ॥ अवश्यवक्तव्यार्थत्वार्थाधिक्ययोस्तदभावयोश्च लोके शब्दान्तरेषु दर्शनादथशब्दे तत्संदेहेन प्रश्नमात्रमाद्यतृतीययोः । द्वितीये तु स्वरूपाधिक्यस्य शब्दान्तरेष्वदर्शनादथशब्दे तदाक्षेप इति भावः ।

कथंशब्दमाक्षेपपरतया व्याख्याय प्रश्नपरतयापि व्याचष्टे ॥ तृतीयेपि पृच्छतीति ॥ इति न्याय इति ॥ सामान्य व्याप्तिरेवानुसन्धेया । यथा देवेषु चतुर्मुख इति दृष्टान्तसम्भवात् । न तु यः शब्द इति विशेषव्याप्तिः । दृष्टान्ताभावादिति भावः । अत इत्यस्यातःशब्दपरत्वं हेतुपरत्वमसकृदावृत्तिं तृतीय उदाहृत इत्यनयोरावृत्तिं प्राथमिकावित्यस्य वचनव्यत्ययेनानुषङ्गं चाभिप्रेत्य व्याचष्टे ॥ अतश्च तृतीयतयेति ॥ महतश्चतुर्मुखादिति ॥ महत्तत्वाभिमानिनश्चतुर्मुखादित्यर्थः ॥

अयं वै लोकः प्रथमा महानाम्नीति ॥ विदामघवन्नित्यादिका ऋक् पृथिवीलोकस्थविष्णुवाचिकेत्यर्थः ॥ अरुच्येति ॥ सच्छूद्रस्य देहान्तरे वैदिकब्रह्मविद्याधिकारेपि नैतद्देहेऽधिकारः । देहान्तरेऽधिकारश्च नेदानीं प्रवृत्त्युपयोगी वृत्त्युपयोगीत्यरुच्येत्यर्थः । अध्ययनबललब्धापीति ॥ ''अवैष्णवस्य वेदेपि ह्यधिकारो न विद्यत''इत्यादेरित्यर्थः ॥ अन्यायाध्ययनेति ॥ अभक्तानधिकारिकृतत्वमन्यायत्वम् ।

भक्तिपूर्वकाध्ययन(वत्त्व)मिति ॥ शमादिकमप्यत्र विवक्षितम् ॥ उत्तरोक्ताप्राचुर्येणेति ॥ पूर्वपूर्वस्मिन्निति शेषः । ततश्चायमर्थः समानाधिकरणानां वेदाध्ययनशमादि-विष्णुपादैकसंश्रयत्वादीनां मध्ये यस्य शमादिविष्णुपादैकसंश्रयत्वादिके अप्रचुरे अध्ययनं तु प्रचुरं सोधमः । यस्य विष्णुपादसंश्रयत्वादिकमेवाप्रचुरमध्ययनशमादिके तु प्रचुरे स मध्यमः । यस्य तु विष्णुपादैकसंश्रयत्वादिकं प्रचुरमध्ययनशमादि-केत्वप्रचुरे स उत्तम इति ॥ यतोनारायणप्रसादमृते न मोक्ष इत्यादि ॥

प्रकाशिका – एवमथशब्दार्थं समर्थ्य ''यतो नारायणप्रसादमृते न मोक्ष'' इत्यन्ताथ-शब्दार्थप्रपञ्चनपरभाष्यटीकाक्षराणि दुर्घटार्थानि योजयति ॥ टीकायामिति ॥ तत्परतयेति क्वाचित्कपाठस्य लेखकदोषत्वं मन्वान आह ॥ तत्फलतयेति ॥ योगरूढिगौणलक्षणाभेद-भिन्नमुख्यामुख्यवृत्तिव्यतिरेकेण तात्पर्यवृत्त्यभावस्य कर्मनिर्णयादौ समर्थितत्वेन शब्दवृत्ति-विषयस्यैव तात्पर्यवृत्तिविषयतया मङ्गळस्य पूर्वोक्तरीत्या शब्दार्थत्वाभावेनाथशब्दस्य तत्पर-ताऽसम्भवादित्यर्थः । ननु ''अकारः परब्रह्माभिधायकः'' इति भाष्योदाहृतस्मृतेरकारस्य विष्णुवाचित्वात्तस्य च ''मङ्गळानां च मङ्गळ''मिति स्मृत्या परममङ्गळरूपत्वात्तत्परतयेति पाठ उपपद्यत इत्यत आह ॥ प्रशस्तेति ॥ नन्वेवं सिसृक्षोरिति भाष्यावतारिकायां मङ्गळोत्त्यादेरित्ययुक्तम् । तत्र मङ्गलस्योक्तिरभिधानं तस्य शब्दान्तरेणापि सम्भवादित्यर्थ-प्रतीतेरित्यत आह ॥ मङ्गळोत्त्यादेरिति ॥ इति पाठेपीति ॥ तत् मङ्गळं परं मुख्यं फलं यस्य तत्त्वेनेत्यर्थ उक्तो भवति । भाष्ये उदाहरिष्यमाणप्रमाणानुसारान्मङ्गलार्थ इति भाष्यं द्वेधा व्याचष्टे ॥ एवं चेति ॥ मङ्गलस्य फलत्वे सतीत्यर्थः ॥ अनुष्ठेयेति ॥ अथशब्देन जायमानविष्णुस्मृत्यादेः कृतिसाध्यत्वादिति भावः ॥ अननुष्ठेयेति ॥ विष्णोरकृतिसाध्यत्वा-दिति भावः । विष्णुवाचित्वोक्तिश्च मङ्गलफलकत्वोपपादनायेति ध्येयम् । उक्तं च तत्वप्रदीपे ''अथशब्दः श्रवणकीर्तनाभ्यां मङ्गलफलः । विष्णोः परममङ्गलस्य वाचकत्वेनाति-प्रियत्वा''दिति । एतेन क्वचित्तत्परतयेति पाठस्य मङ्गलरूपविष्णुपरतयेति अर्थः क्वचित्तत्फलतयेति पाठस्य मङ्गलफलकतयेत्यर्थ उक्तो भवतीति केचिदाहुः । एतेन यत्तु केनचिदुक्तं भाष्ये मङ्गलार्थोधिकारानन्तर्यार्थश्चेति चशब्दोनुपपन्नः । तुल्यार्थे हि समुच्चयः । यथा गोशब्दः सास्नावदर्थो जलार्थश्चेति । न चेहमङ्गलं वाच्यम् । येन चकारोपपत्तिः । मङ्गलफलकआनन्तर्यवाचक इत्येतावत एव सामञ्जस्यादिति तन्निरस्तम् । मङ्गलरूपविष्णव-

र्थकत्वस्यापि वर्णनात् । सकृत् श्रुतस्याप्यथशब्दस्य तन्त्रावृत्त्येकशेषाणामन्यतमाश्रयणे-नार्थद्वयोपपत्तेः । न केवलं मङ्गलफलकः किं त्वानन्तर्यवाचकश्चेति चशब्दोपपत्तेश्चेति । आद्यतृतीययोराक्षिपतीत्यनुक्त्वा द्वितीये तथोक्तौ को हेतुरत आह ॥ अवश्येति ॥ ''कथमुत्तमते''ति भाष्यस्थ कथंशब्दस्याक्षेपार्थत्वेन व्याख्यानात् ''तृतीये पृच्छती''ति कस्यार्थ इति न ज्ञायते अत आह ॥ कथंशब्दमिति ॥ ''सिसृक्षो''रिति भाष्यव्याख्या-नावसरे ''यत्स्वजातौ प्रथमं हरेर्निस्सरति तत्तत्रोत्तममिति न्यायोनुसन्धेय'' इत्युक्तम् । तत्रैवमेव व्याख्यनुसन्धानविधानेभिप्रायमाह ॥ इति न्याय इतीति ॥ ''तद्वैतुत्वं वदंश्चापि तृतीयोत उदाहृत'' इति भाष्येऽतश्च तृतीयोपि प्राथमिक इति टीकोक्ताशेषार्थाप्रतीतेराह ॥ अत इत्यस्येति ॥ यद्यप्यत इत्यस्यातःशब्दपरत्वं हेतुपरत्वं चेति सकृदावृत्तिरेव भाति तथापि यतस्तृतीयतयोदाहृत इत्यत्र उत्तम इत्यत्र च विशेष्याकाङ्क्षायामतश्शब्दपरस्यात इत्यस्यान्व-यादसकृदावृत्तिमित्युक्तम् ॥ वचनेति ॥ एकवचनान्तत्वेनेत्यर्थः । महतो महत्त्वगुणयुक्तादिति भ्रान्तिं निरस्यति ॥ महत्तत्वेति ॥ यद्यपि ''आन्महतः समानाधिकरण जातीययो''रिति स्मृतेर्महातत्वेति वाच्यं तथापि प्रमेयदीपिकायां ''महत आदिति स्थानिनः पूर्वमुदेशे कार्ये आन्महत इति निर्देशाद्वा जातीयसमानाधिकरणयोरित्यल्पाच्तरस्य पूर्वमुद्देशे कार्ये व्यत्यासेन निर्देशाद्वा ज्ञापकादात्त्वमनित्य''मित्युक्ततया वा द्वितीये चक्षिङः ख्याञ् इत्यत्र संज्ञाच्छन्दसोर्बहुलमिति वचनाद्वा महत्तत्वेति साधु । तथैव सुधोक्तेः । वाच्यवाचकभावस्य स्फुटमप्रतीतेराह ॥ विदामघवन्नित्यादिकेति ॥ परमैश्वर्यादिसम्पन्नमहार्थप्रतिपादकत्वेन महच्छब्दितेन्द्रादिनामास्यामस्तीति महानाम्नी संज्ञिता विदामघवन्नित्यादिका ऋक् अयं लोकशब्दाभ्यामभिधीयमानविष्णुवाचिकेति भावेनायं वै लोकः प्रथममहानाम्नीत्यादिब्राह्मणं प्रवृत्तमित्यर्थः । सच्छूद्रस्य मोक्षहेतुज्ञानावश्यंभावेन ब्रह्मविद्याधिकारित्वात्कथमरुचिरित्यत आह ॥ सच्छूद्रस्येति ॥ देहान्तरे विप्रदेहे । कथमध्ययनेन विष्णुभक्तेर्लाभ इत्यत आह ॥ अवैष्णवस्येति ॥ भक्तिपूर्वकाध्ययनमुपलक्षणमित्याह ॥ शमादिकमिति ॥ आकाङ्क्षितं पूरयति ॥ पूर्वपूर्वस्मिन्निति ॥ निष्कर्षति ॥ ततश्चेति ॥

पाण्डुरङ्गि – अशब्दार्थत्वेनेति ॥ अथेत्युक्ते अथशब्दोच्चारणत्व- प्रकारकस्य विष्णुस्मरणत्वप्रकारकस्य बोधस्याजननेन तस्याथशब्दवाच्यत्वाभावेनेत्यर्थः ॥ अकारेति ॥ ''अ इति ब्रह्मे''ति श्रुतिमभिप्रेत्यैतदुक्तमिति न ''तथौ प्राणात्मकौ प्रोक्ता''वित्यादि-विरोधः । तस्य प्रशस्तरूपमङ्गळात्मकस्य विष्णोः । इह ग्रन्थे विघ्नोत्सारणासाधारणका-

(पाण्डुरङ्गि)

रणत्वस्य ग्रन्थारम्भे प्रस्तुतत्वेन प्रशस्तरूपमङ्गळात्मकस्याप्रस्तुतत्वादित्यर्थः । ननु साधारणस्यापि विष्णोर्मङ्गळादिनिष्ठस्य विघ्नोत्सारणासाधारणकारणत्वस्यापि सत्त्वात्कथं तस्याप्रस्तुतत्वम् । तथाच तत्परतयेति पाठोपि युक्त एवेत्यत आह ॥ तस्याभिधेयमिति ॥ न तावतापि तस्याभिधेयत्वनिषेधः विशेषविधेः शेषनिषेधनान्तरीयकत्वं च विष्णावेवाथशब्दार्थत्वप्रतिपादक अः इत्यादि श्रुतिविरोधादयुक्तमित्यत आह ॥ मङ्गळप्रयोजनक इतीति ॥ ननु तत्परतयेति पाठःसाधुः टीकायामेवोत्तरत्राथशब्दस्य मङ्गळप्रतिपादकताया वक्ष्यमाणत्वादित्यत आह ॥ मङ्गळोत्त्यादेरिति टीकाया अपीति ॥ नन्वेवं तत्परतयेत्यपि मूलकोशेषु पाठो दृश्यते तस्य का गतिरित्यत आह ॥ तत्परतयेति पाठेपीति ॥ अयमेवेति ॥ परशब्द उद्देश्यपर इति भावः ।

नन्वेवं भाष्ये उत्तरत्र ब्रह्मणोथशब्दार्थत्वस्य वक्ष्यमाणत्वात्तद्विरोध इत्यतः सुधादेरनुष्ठेयमङ्गळाभिप्रायकत्वात् भाष्यस्य चाननुष्ठेयमङ्गळपरत्वात् न विरोध इति भावेनाह ॥ एवं चेति ॥ सुधायां तु प्रसिद्धलौकिकमङ्गलस्यैवाथशब्दवाच्यत्वमभिप्रेतमिति भावः । एवं च ''तथौ प्राणात्मकौ प्रोक्ता'' वित्यादि प्रमाणार्थस्यापि ''अथशब्दो मङ्गलार्थ'' इति भाष्येण ''परस्य ब्रह्मणो विष्णोः प्रसादा''दिति प्रमाणार्थस्यापि ''अतःशब्दो हेत्वर्थ'' इति भाष्येण सङ्ग्रह इत्यप्युक्तं भवति । शब्दान्तरस्य स्वरूपोत्तमत्वादर्शनादित्युक्त्या अवश्यवक्तव्यार्थत्वार्थाधिक्ययोर्दर्शनादिति सूचितं तत्स्पष्टयति ॥ अवश्यवक्तव्यार्थत्वेति ॥ अयं भावः । प्रश्नस्य सन्देहमूलत्वेन सन्देहस्य च कोटिद्वयप्रसिध्यादिमूलकत्वेन शब्दान्तरेऽवश्यवक्तव्यार्थत्वार्थाधिक्ययोस्तदभावयोश्च दर्शनेन कोटिप्रसिद्धिसत्वेन तन्मूलकसन्देहसम्भवेन तन्मूलकप्रश्नसम्भवेपि स्वरूपोत्तमत्वतदभावयोरदृष्टत्वेन कोट्यप्रसिध्या सन्देहासम्भवेन तन्मूलकप्रश्नस्यासम्भवेन द्वितीये आक्षेपः प्रथमतृतीययोः प्रश्नमात्रमिति । मूले कथमित्यस्यैकस्यैव शब्दस्य श्रवणात्तस्य च द्वितीयमाक्षिपतीत्यादिनाऽवतारितत्वात् तृतीये पृच्छतीत्यवतार्यं न प्रतीयते । न च तदेव पुनरपि व्याख्यायत इति वाच्यम् । व्याख्यानान्तरज्ञापकाथशब्दादेरभावादित्यतः तदुपपादयति ॥ कथंशब्दमिति ॥ ननु यत्स्वजातौ प्रथमं निस्सरति तत्तत्रोत्तममिति सामान्यव्याप्तिरेवानुसन्धेयेति टीकायामुक्तम् । तत्कुतः । विशेषव्याप्तेरेव सम्भवात् । न च विशेषव्याप्तौ दृष्टान्ताभावः । आगमगम्यव्याप्तौ दृष्टान्तानपेक्षणात् । सामान्यव्याप्त्यभिधावपि तदभावाच्चेत्यतस्तद्वाक्यं व्याचष्टे ॥ सामान्यव्याप्तिरेवेति ॥ महत्तत्वाभिमानिन इति ॥ न चात्र महच्छब्दः पूज्यत्वार्थकः किं न

स्यादिति वाच्यम् । तत्वप्रकरणविरोधात् । तत्वोत्पत्त्यसिद्ध्यापाताच्चेति भावः ॥ नैतदेह इति ॥ अनेन प्रायिकत्वादित्यत्राधिकारस्येति शेष उक्तो भवति । उत्तरोक्तस्य शमादेरुत्तरस्मिन्मध्यमादौ प्राचुर्यसत्त्वादाह ॥ पूर्वपूर्वस्मिन्निति ॥ अधमनिष्ठाध्ययनापेक्षया मध्यमादावध्ययनादेः प्राचुर्यात्कथं तस्य तत्राप्राचुर्यमित्यत आह ॥ ततश्चेति ॥ एतेन पूर्वस्मिन्नधमे उत्तरोक्तयोः पूर्वस्मिन्मध्यमे उत्तरोक्तस्योत्तरस्मिन्नुत्तमे चोक्तयोः पूर्वोक्तयोः अप्राचुर्यमिति उत्तरोक्तात् पूर्वोक्तयोरप्राचुर्यमिति वा तन्त्रेण योजनोक्ता भवति । अत्रोत्तरोक्तेति ग्रन्थस्वारस्येनास्यार्थस्याभिधानादधमोत्तमयोस्तत्रोक्तमात्रप्राचुर्येपि सङ्गृहीताद्यप्राचुर्येण मध्यमे तु सङ्गृहीतोक्तयोः प्राचुर्येणानुत्कृष्टस्याप्राचुर्येण वचनमुपपन्नमिति द्रष्टव्यम् । एवमथशब्दस्य परोक्तार्थनिरासेन भाष्यकृदुक्तोर्थः साधितः ।

तात्पर्यचन्द्रिका

ननु प्रकृतस्य हेतुत्ववाचकेनातःशब्देन कथमिदं लभ्यम् । अधिकारिविशेषणत्वेन मोक्षस्य प्रकृतत्वेपि तं प्रति नारायणप्रसादस्य साधनत्वादेरप्रकृतत्वेन तस्यात इत्यत्र प्रातिपदिकेन परामर्शासम्भवेन तस्य विचारकर्तव्यतायां हेतुत्वस्य विभक्त्योक्त्ययोगात् । मैवम् । यमेवैष वृणुत इत्यादि श्रुत्या प्रयोजनाभावप्रयुक्तानारम्भणीयत्वशङ्कानिरासहेतोरन्यस्याभावात् सुवेणावद्यतीत्यादौ द्रवद्रव्यमिति वद्यत इत्यादि भाष्योक्ताध्याहारेण शब्दतः प्रकृतत्वसम्भवात् । अत एव ''यत्रानवसर'' इति श्लोको यत इत्याद्यध्याहारसमर्थनपरतयापि व्याख्येयः ।

यद्वा जन्मादिसूत्रे प्रामाणिकत्वाज्जगत इदंशब्देन परामर्शवदत्रापि प्रसादादेर्मोक्षहेतुत्वादेः प्रामाणिकत्वादेतच्छब्देन परामर्शः । बुद्धिसंनिधानमेव हि प्रकृतत्वम् । अत एव ''तमेवं विद्वा''नित्यादिना तस्य प्रामाणिकता दर्शिता भाष्ये ।

यद्वा एतत्सूत्र निर्णेतव्येन ''नारायणोसौ परमो विचिंत्यो मुमुक्षुभिः कर्मपाशा''दित्यादि विचारविधिवाक्येनोपस्थापितत्वाद्विचारस्य मोक्षप्रयोजनकत्वमतः शब्दार्थः । व्याख्येये प्रकृतस्य व्याख्यानेऽत इति परामर्शसम्भवात् ।

(तात्पर्यचन्द्रिका)

यद्वा अनुव्याख्यानोक्तरीत्या मीमांसांगभूतब्रह्मतर्के प्रकृतत्वात्सिद्धे व्युत्पत्त्यादिकमिव विचारस्य मोक्षहेतुत्वमतःशब्दार्थः । यद्वा जन्मादिसूत्रे ब्रह्मणो विचारसाध्यज्ञानजन्यप्रसादद्वारा मोक्षदत्वस्य वक्ष्यमाणत्वात् ''अथैषज्योति''रित्यादौ वक्ष्यमाणेप्येतच्छब्ददर्शनाद्भगवत उक्तद्वारेण मोक्षदत्वस्यातःशब्दार्थत्वोपपत्तिः । यद्वा मुमुक्षारूपाधिकारानन्तरं विचारः कर्तव्य इत्यथब्रह्मजिज्ञासापदाभ्यामुक्ते विचारविध्यधिकारिविशेषणेच्छाविषयत्वेन लब्धं मोक्षस्य प्रयोजनत्वमत इति हेतूक्रियते ।

प्रकाशिका – एवमथशब्दव्याख्यानपरभाष्यटीकाभिप्रायं तदक्षरयोजनां च स्फुटीकृत्यातःशब्दार्थविवरणपरभाष्याभिप्रायं स्पष्टयितुमाक्षिपति ॥ नन्विति ॥ इदं मोक्षसाधनप्रसादसाधनज्ञानहेतुत्वम् । तदेव व्यनक्ति ॥ अधिकारीति ॥ अधिकारिविशेषणेच्छाविषयत्वेनेत्यर्थः । ज्ञानसाध्यत्वमादिपदार्थः ॥ प्रातिपदिकेनेति ॥ एतच्छब्दात्परपञ्चम्यास्तसिलादेशे ''एतदोश्'' इति प्रकृतिभागस्यैतच्छब्दस्याशादेशे अत इति रूपम् । तथा च प्रकृतपरामर्शकैतच्छब्दादेशेनाकारेण प्रकृतमुद्दिश्य तस्य तसिला हेतुत्वमुच्यते । न च प्रसादस्य मोक्षसाधनत्वं ज्ञानस्य प्रसादसाधनत्वं च प्रकृतम् । येन हेतुत्वमभिदध्यादित्यर्थः ॥ विभक्त्येति ॥ विभक्त्यादेशेन तसिलेत्यर्थः । उक्तशङ्कायाः सप्तधा परिहारमाह ॥ यमित्यादिना ॥ यमात्मा प्रसन्नस्सन्वृणुते तेनैव प्राप्य इति श्रुत्या ''न तादृशीप्रीति''रिति श्रुत्या ''द्रष्टव्यः श्रोतव्य'' इति श्रुत्याच प्रसादादिगतमोक्षादिहेतुत्वस्य शब्दतः प्रकृतत्वसम्भवादित्यन्वयः । बुद्धिस्थस्य हि परामर्शः । बुद्धिस्थत्वं च श्रुत्युक्तत्वात्सम्भवतीति भावः । यद्वा अध्याहारेण शब्दतः प्रकृतत्वसम्भवादित्येवान्वयः । अध्याहारस्य निरङ्कुशत्वाद्वैपरीत्येनाध्याहारः किं न स्यादित्यत उक्तमित्यादिश्रुत्येति । तथा च श्रुत्या अध्याहारेणेति अध्याहारे श्रुतिर्मूलमित्याशयेन व्यधिकरणे तृतीये । अध्याहारमूलभूतामर्थापत्तिं चाह ॥ प्रयोजनेति ॥ यद्वा शङ्कानिरासहेतोरन्यस्याभावादित्येतत्कुत इत्यत इत्यादिश्रुत्येत्यन्वेति । तथा चार्थापत्तिरेकैवाध्याहारे बीजमिति ध्येयम् । तत्र श्रौतं दृष्टान्तमाह ॥ स्रुवेणेति ॥ आद्ये ''अर्थाद्वा कल्पनैकदेशत्वा''दिति चतुर्थपादीयांतिमाधिकरणे ''स्रुवेणावद्यति स्वधितिनावद्यति हस्तेनावद्यति'' इत्युदाहृत्य द्रवद्रव्येष्वाज्यादिषु संहतेषु मांसादिषु पुरोडाशादिषु च किमविशेषेण विनियोगः किं वा यथासामर्थ्यमिति विशये विशेषाश्रवणादनियमे प्राप्ते अशक्यार्थे विध्ययोगादवश्यं विधायकशक्तिः सहकारिणीत्युपे-

यत्वाच्छक्तिसहायो विधिरेव यथा सामर्थ्यं विधेयं व्यवस्थापयतीति द्रवद्रव्यादिषु सुवादीनां विनियोग इति सिद्धान्तितम् । तत्र यथा सामर्थ्यानुसारेण विनियोगे सिद्धे सुवेण द्रवद्रव्यमवद्यतीत्याद्यध्याहारेण वाक्यं पूर्यते तथेहापि यमेवेत्यादिश्रुत्युक्तशङ्कानिरास हेतोरन्यस्याभावान्मोक्षहेतुप्रसादजनकज्ञानकारणत्वस्यैवोक्तशङ्कानिरसनसमर्थतया स एव भाष्योक्ताध्याहारेण पूर्यत इत्यर्थः । उक्तं च सुधायां ''जिज्ञासोत्थज्ञानजात्तत्प्रसादादेव मुच्यते'' इत्यत्र ''यद्यपि न सूत्राक्षरेभ्यो भगवत्प्रसादो लभ्यते । तथाप्यन्यथानुपपत्त्याङ्गीकरणीय'' इति । अन्यथानुपपत्त्याऽध्याहार इत्यत्र भाष्योदाहृतं वचनं संवादयति ॥ अत एवेति ॥ यस्माद्यत इत्यादिवाक्याध्याहारं विना विचारकर्तव्यत्वरूपार्थानुपपत्त्या यत इत्यध्याहारोऽत एवेत्यर्थः । न केवलं कर्तव्यपदाध्याहारसमर्थनपरतयेत्यपेरर्थः । अत एव तत्र वाक्यं वेत्युक्तिरिति भावः । श्लोकार्थस्तु टीकायां स्पष्टः । प्रामाणिकत्वात् प्रमाणेन बुद्धौ सन्निहितत्वात् । इदंशब्देन अस्येत्यनेन ।

ननु तत्रास्येत्येतत्प्रामाणिकत्वान्नजगत्परामर्शकम् । किन्तु ''यतो वा इमानि भूतानी''ति विषयवाक्यगतस्य जगद्वाचिन इमानीत्यस्य विपरिणामेन निर्देशः । न च तत्र जीवन्तीति श्रवणाद्भूतपदस्य चेतनमात्रपरत्वेन कृत्स्नजगत्तत्र न प्राप्तमिति वाच्यम् । भूतशब्दस्य सर्वचेतनपरत्वे तदभिमन्यमानमहदादिजडस्यापि प्राप्तेः । तेन विना तेषां जन्मायुक्तेः । अन्यथा कृत्स्नहेतुत्वस्य श्रुतावप्राप्तौ तद्व्याख्यारूपसूत्रे अस्येत्यनेन कृत्स्नलाभायोगाच्चेति चेन्न । इमानीत्यनेनापि प्रामाणिकत्वादेव जगत्परामर्शस्य वाच्यतया सूत्रेपि स एव न्यायोनुसर्तव्य इति तात्पर्यात् । अत एव सुधायां ''अस्य प्रत्यक्षादि-प्रमाणसिद्धतया प्रकृतस्य समस्त प्रपञ्चस्ये''त्युक्तम् । ज्ञानप्रसादहेतुत्वे क्रमेण आदिपद-द्वयग्राह्ये । प्रामाणिकत्वेप्यप्रकृतस्य कथं परामर्श इत्यत आह ॥ बुद्धीति ॥ प्रमाणमेव बुद्धौ सन्निधापकमिति भावः । किं तत्प्रमाणमित्याशङ्कामुक्तार्थे भाष्यसंवाददर्शनेन निरस्यति ॥ अत एवेति ॥ बुद्धिस्थपरामर्शकत्वादेवेत्यर्थः । प्रमाणार्थस्तु टीकायां स्पष्टः । एवं भाष्यपर्यालोचनया लब्धं समाधिद्वयमुक्तम् । तत्रापि यत इत्याद्यन्तरङ्गभाष्यलब्धमादावुक्तम् । उक्तार्थस्य प्रामाणिकत्वोक्तिपरबहिरङ्गभाष्यलब्धं पश्चात् । इदानीं बहिरङ्गतः प्राप्या तदाह ॥ एतत्सूत्रेति ॥ मोक्षप्रयोजनकत्वमिति ॥ प्रसादद्वारेति शेषः । ''यस्य प्रसादात्परमा-र्तिरूपादस्मात्संसारान्मुच्यते नापरेणे''ति पूर्वार्धेन तत्प्राप्तेः । यद्यप्यत्र ''तद्विजिज्ञासस्वे''ति श्रुतिरेवोदाहृता तथापि सूत्रस्यानेकशाखानिर्णायकत्वान्नानाशाखागतविचारविधायक-

(प्रकाशिका)

बहुवाक्यव्याख्यारूपत्वादेवमुक्तम् । एकस्योदाहरणं तूपलक्षणतयेति भावः ॥ प्रकृतस्येति ॥ बुद्धौ सन्निहितस्येत्यर्थः । ततोपि बहिरङ्गात्तत्प्राप्तिमाह ॥ अनुव्याख्यानेति ॥ ''कार्यता च न काचित्स्या''दि त्यादिना वेदस्य कार्यपरत्वादिकं निरस्य सिद्धे व्युत्पत्त्यादिसमर्थनेन ब्रह्मपरत्वं समर्थ्य ''एतत्सर्वं तर्कशास्त्रे ब्रह्मतर्के हि विस्तरात् । उक्तं विद्यात्पृथक्त्वात्तु संक्षेपेणात्र सूचितं'' इत्यादिना ब्रह्मतर्के सिद्धमत इति परामृश्यत इत्युक्तम् । तद्ब्रज्ज्ञान-प्रसादद्वारा मोक्षप्रयोजनकत्वं विचारस्य तत्रैव सिद्धमित्यत इति परामर्शोपपत्तिरित्यर्थः ।

ग्रन्थान्तरोक्तस्य ग्रन्थान्तरे कथं परामर्शोतिप्रसङ्गादित्यत उक्तम् ॥ मीमांसाङ्गेति ॥ तदङ्गत्वं च ''प्रमाणन्यायसच्छिक्षा क्रियते तर्कशास्त्रतः । मानन्यायैस्तु तत्सिद्धेर्मीमांसा मेयशोधन''मित्यनुव्याख्यानोक्तरीत्या ध्येयम् । तस्य च सूत्रकृतैव कृतत्वात्तत्रोक्तस्यात इति परामर्शो युक्त इति भावः । इदानीमन्तरङ्गभूतसूत्रादेव प्रकृतत्वमाह ॥ यद्वा जन्मादीति ॥ वक्ष्यमाणत्वादिति ॥ मोचकत्वेन विष्णुर्जिज्ञास्यश्चेद्बन्धकत्वेनाजिज्ञास्योपि स्यादिति प्राप्तेऽप्रसन्नस्य बन्धकत्वं प्रसादहेतोर्जिज्ञासायाः कर्तव्यत्वानुकूलमेव न तु प्रतिकूलमिति वर्णकान्तरस्य मोक्षदत्वाज्जिज्ञास्यमित्यनुव्याख्यानरीत्या वक्ष्यमाणत्वादित्यर्थः । अथैष इति ॥ अथैषज्योतिरथैष विश्वज्योतिः अथैष सर्वज्योति''रित्युक्त्वा ''एतेन सहस्रदक्षिणेन यजेते''त्युच्यते । तत्रैषज्योतिरित्वेतच्छब्दो वक्ष्यमाणसहस्रदक्षिणाकयागपरामर्शको यथा तथेत्यर्थः । अत एव द्वितीयस्य द्वितीये ''संज्ञाचोत्पत्तिसंयोगा''दित्यष्टमेधिकरणे अथैषज्योतिरित्याद्युदाहृत्य किं प्रकृतज्योतिष्टोम एव ज्योतिरादिशब्दैरुच्यते अथ कर्मान्तरमिति सन्दिह्यैतच्छब्दस्य प्रकृतगामित्वाज्ज्योतिष्टोम एव तैः शब्दैरुच्यते इति प्राप्ते एतच्छब्दस्य वक्ष्यमाणपरतयाप्युपपत्त्या संज्ञाभेदात्कर्मान्तराण्येवंनामकानीति सिद्धान्ति-तमिति भावः ॥ अतःशब्देति ॥ अतःशब्दप्रातिपदिकार्थत्वोपपत्तिरित्यर्थः । भिन्नसूत्रादप्य-न्तरङ्गेणाथशब्देन प्रकृतत्वमाह ॥ यद्वा मुमुक्षेति ॥ एवं चेच्छाविषयत्वेन लब्धं मोक्षफलत्वं प्रातिपदिकेन परामृश्य विभक्त्या हेतुत्वोक्तौ यमेवैष इत्यादिभाष्योक्त श्रुत्यादिबलाज्ज्ञा-नजन्यप्रसादद्वारैव तत्सेत्स्यति । यथा यागस्य स्वर्गहेतुत्वं श्रुतमपूर्वद्वारा यथावा ''व्रीहिभिर्यजेते''ति श्रुतं कारणत्वं प्रोक्षणावघातादिद्वारा निर्वाह्यते तद्वत् । आद्यपक्षे सर्वस्य सामर्थ्यलभ्यत्वमुक्तम् । अत्र तु ज्ञानप्रसादयोरेवेति भाव इति बोध्यम् । उक्तं च सुधायां ''अधिकारिविशेषणत्वेन प्रकृतो मोक्षः सम्बध्यत'' इति । तत्वप्रदीपे चोक्तं निश्शेषदुःखनिवृत्तिः परमसुखावाप्तिश्चेच्छाविषयत्वेन सदा हृदि कृता अत इत्युच्यत इति ॥

पाण्डुरङ्गि –इदानीं स्वीयेऽतःशब्दव्याख्यानेऽनुपपत्तिमाशङ्क्य परिहरति ॥ नन्विति ॥ विभक्त्योक्त्ययोगादिति ॥ प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थाभिधायकत्वादिति भावः ॥ प्रयोजनाभावप्रयुक्तेति ॥ विषयाभावप्रयुक्तप्रयोजनाभावशङ्कयाः विषयसमर्पकब्रह्मशब्देन निरासेपि एवंसत्यपिविषय इत्यादिवक्ष्यमाणस्वतन्त्रप्रयोजनाभावप्रयुक्तानारम्भणीयत्वशङ्का-निरासहेतोरतःशब्दान्यसौत्रपदस्य तत्सूचितयुक्तेर्वाभावात् अतःशब्दस्यैवापेक्षितश्रौतस्याध्याहार्यत्वादिति भावः । अत्र शब्दतः प्रकृतत्वस्य बुद्धिप्रकृतत्वापेक्षया बहिरङ्गत्वात्प्रथमतस्तस्य अनन्तरं तु बुद्धिप्रकृतत्वस्योक्तिः । प्रामाणिकत्वेन बुद्धिस्थत्वस्य प्रमाणाकाङ्क्षस्य प्रथमसूत्र-निर्णेयविचारविधिवाक्योपस्थितत्वापेक्षया बहिरङ्गत्वात्तदनन्तरं तस्योक्तिः कारणीभूतविचार-विधिवाक्यप्रकृतत्वापेक्षया मीमांसाङ्ग एव प्रकृतत्वस्य मुख्यत्वात्तदनन्तरन्तस्योक्तिः अङ्गप्रकृतत्वापेक्षया अङ्गिप्रकृतत्वं मुख्यमित्यभिप्रायेण तदनन्तरं तस्योक्तिः उत्तरसूत्रप्रकृतत्वापेक्षयाऽस्मिन्सूत्र एवार्थतो लब्धत्वात्तदनन्तरं तस्योक्तिः अर्थतो लब्धत्वापेक्षया साक्षादथशब्देनैवोपस्थापितत्वस्य मुख्यत्वात्तदन्ते तदुक्तिरिति पूर्वापेक्षयोत्तरोत्तरस्यां तदङ्गत्वाभिप्रायेण पक्षभेद इति ध्येयम् ॥ लब्धं मोक्षप्रयोजनत्वमिति ॥ विचारस्य मोक्षफलकत्वे लब्धे साक्षादसम्भवेनार्थापत्तिसिद्धप्रसादादेरप्यतःशब्देन हेतुत्वोक्ति-सम्भवान्नास्य पक्षस्य प्रकृतासङ्गतिरिति ।

तात्पर्यचन्द्रिका

न चात्र द्वितीयपक्षेऽधिकार्यादेरप्यतश्शब्देनैव परामर्शसम्भवादथशब्दादिवैयर्थ्यम् । शमादेरधिकारिविशेषणस्य सिद्धस्य प्रवृत्त्यङ्गत्वं प्रयोजनादेस्त्वसिद्धस्यापि बुद्धि-स्थस्य तत्रापि विषयस्य नासिद्धत्वनियमः प्रयोजनस्य तु तन्नियम इत्यादिविशेष-ज्ञापनार्थं पृथक्सूचनात् । यद्वा उपनिषद्भाष्यादिरूपसिद्धार्थकथनात्मकोपदेशाधीन-वाक्यार्थग्रहणात्मकस्य श्रवणस्य मननरूपजिज्ञासाधिकारिविशेषणत्वात् श्रवण-विषयस्य मोक्षप्रसादादिसाध्यसाधनभावस्याथशब्दोपस्थापितत्वाद्धेतुत्वयोग्यत्वाच्चात इति परामर्श इति ॥

अनुव्याख्यानेतु

(तात्पर्यचन्द्रिका)

''अतो यथार्थबन्धस्य विना विष्णुप्रसादतः ।
अनिवृत्तेस्तदर्थं हि जिज्ञासात्र विधीयते ।
प्रत्यक्षवच्च प्रामाण्यं स्वत एवागमस्य हि ।
व्युत्पत्तिः प्रथमा तस्माद्वर्तमानेऽगते ततः'' ।

इत्यादिना बन्धस्य मिथ्यात्वात्तन्निवृत्तेः प्रसादनैरपेक्ष्यान्न भगवत्प्रसादार्था जिज्ञासा मुमुक्षुणा कर्तव्येत्यादिशङ्कानिरासाय प्रयोजनसाधकं जगत्सत्यत्वादिकमप्यतःशब्देनोक्तम् । विषयसिद्धिहेतुयुक्तिष्वपि स्वप्रकाशप्रत्यगर्थाभिन्नत्वान्न विषयत्वमिति प्रमेये आरोपिताकारशङ्कानिरासकृद्या ब्रह्मपदसूचिता युक्तिस्तदतिरिक्ता 'शब्दस्य न प्रामाण्यं' प्रामाण्येपि सिद्धार्थे न प्रामाण्यमित्यादिका प्रमाणारोपिताकारशङ्कानिरासकृद्युक्तिरप्यतःशब्देनैव सूचिता ।

प्रकाशिका – न चात्रेति ॥ बहुपक्षेषु मध्ये । यद्वा सूत्र इत्यर्थः ॥ अधिकार्यादिरिति ॥ अधिकारिविषयप्रयोजनानां त्रयाणामपि मन्दमध्योत्तमत्वेनेत्यादिभाष्योक्तप्रमाणेन सिद्धत्वादतो जिज्ञासेत्येव सूत्रणीयं स्यादिति भावः । बुद्धिस्थस्य प्रवृत्त्यङ्गत्वमित्यन्वयः । तत्रापि विषयप्रयोजनयोरपि ॥ नासिद्धत्वनियम इति ॥ धर्मस्यासिद्धस्य ब्रह्मणः सिद्धस्य विषयत्वदृष्टेरिति भावः । यद्यप्येषा शङ्का तदनन्तरमेव कर्तव्या तथापि यथाधिकारिविशेषणेच्छाविषयत्वेन मोक्षस्य प्रयोजनत्वं लब्धं तथा ब्रह्मज्ञानफलं नित्यमन्यफलमनित्यमित्येवंभूतनित्यानित्यवस्तुविवेकरूपाधिकारविशेषणविषयत्वेन ब्रह्माख्यविषयस्याप्युपस्थापितत्वादत इति परामर्शे पृथक् ब्रह्मपदं नोपाददीतेति शङ्काया अपि निरासात् । तथा सप्तमेऽपि श्रवणविषयतया ब्रह्मणोऽथशब्देनोपस्थापनेनैवंविधशङ्कायास्तत्राप्युदयेन तन्निरासार्थत्वाच्चात्र कृता । अत एवांत्योपांत्ययोर्मध्य एवैतच्छङ्कासमाधानमित्याहुः । इत्यादिविशेषेत्यादिपदेन स्वरूपाधिक्यमङ्गलार्थकत्वविषयवाक्यविशेषसूचनादिविशेषपरिग्रहः । यद्वा ''तदेवं स्वर्गादिसाधने'' इत्यादिनाऽथादिपदानां भिन्नभिन्नशङ्कानिरासकत्वरूपो वक्ष्यमाणो विशेषो ग्राह्यः । अत इत्यनेनैव हेतुवाचिना त्रयाणां ग्रहणे सिद्धानामेव हेतुत्वमिति सर्वेषां सिद्धत्वमसिद्धत्वमेव वा ज्ञायेतेति भावः ।

प्रसादादेः सर्वस्यापि साक्षादथशब्देन लाभप्रकारमाह ॥ यद्वेति ॥ जिज्ञासैव श्रवणमिति मते तस्याधिकारिविशेषणत्वायोगात्तत्स्वरूपमुक्तमुपनिषद्भाष्यादीत्यादिना । सिद्धार्थेति मननाद्भेदोक्तिः न्यायनिर्णीतार्थेत्यर्थः । श्रवणविषयाणामनेकेषामथशब्देनोपस्थापितत्वादत इति परामर्शस्स्यादित्यत उक्तम् ॥ हेतुत्वयोग्यत्वाच्चेति ॥ नेतरत्तद्योग्यमित्याशयः । एवं भाष्योक्तं ज्ञानजन्यप्रसादद्वारा मोक्षप्रयोजनकत्वरूपमतःशब्दार्थं सप्तधा समर्थ्याधुना ''सूत्रे भाष्येऽनुभाष्येचे''ति प्रतिज्ञातार्थसिद्धयेऽनुव्याख्यानोक्तं फलसाधकहेतुविषयसाधकहेतुद्वय-परामर्शपरत्वमप्यनुव्याख्यान एव विक्षिप्य समर्थितं सङ्गृह्य स्पष्टीकरोति ॥ अनुव्या-ख्यानेत्यादिनामतान्तरमुक्तमित्यन्तेन ॥ अतः असत्यत्वे बाधकात्सत्यत्वाद्धेत्यर्थः । तदर्थं विष्णुप्रसादार्थम् । अत्र आद्यसूत्रे । प्रत्यक्षादिवदागमस्य प्रामाण्यं स्वत एव संशयविपर्ययाजनकत्वे सति ज्ञानजनकत्वादेवेत्यर्थः । तस्मात् वर्तमानार्थव्युत्पत्तेः कारण-त्वादनागताद्यर्थव्युत्पत्तेः कार्यत्वात् । वर्तमाने सिद्धे व्युत्पत्तिः प्रथमा । ततः पश्चात् । अगते अनागते व्युत्पत्तिरित्यर्थः । त्रीण्यपि वचनानि भिन्नभिन्नस्थानानि अतो नान्योन्य-मसङ्गतिर्दोषाय । यद्यपि व्युत्पत्तिरिति वाक्यं पूर्वं, प्रत्यक्षवच्चेति पश्चात्तनम् । तथापि वक्ष्यमाणदिशोपपादनसौकर्याय व्यत्यासेनोपन्यास इति न दोषः । इत्यादिनेत्यस्य अतःशब्दोनोक्तं अतःशब्देनैव सूचिता इत्युक्त्वा इत्यन्वयः । आद्यश्लोकस्याभिप्रायवर्णनं बन्धस्येत्यादि । उत्तरार्धयोर्विवरणं विषयसिद्धीत्यादि । शब्दस्य न प्रामाण्यमिति शङ्कानिरासः प्रत्यक्षवच्चेत्यनेनोपपदितः । व्युत्पत्तिरित्यनेन सिद्धार्थे प्रामाण्यं नेति शङ्कानिरास इति विवेकः ॥

प्रसादनैरपेक्ष्यादिति ॥ शुक्तिरूप्यादिनिवृत्तौ तथोपलम्भादिति भावः । न केवलं प्रयोजनमित्यपेरर्थः । सत्यस्यापि निवर्त्यत्वमादिपदार्थः । विषयसिद्धिहेतुयुक्तिषु गुणपूर्तिवेद-प्रामाण्यसिद्धार्थबोधकत्वादिरूपासु मध्ये या ब्रह्मपदसूचिता तददितरिक्ता युक्तिरतःशब्देनैव सूचितेत्यन्वयः । सङ्क्षिप्योक्तेत्यर्थः । तदतिरिक्ते युक्त्या न ब्रह्मपदवैयर्थ्यमिति भावः । एतेन सिद्धार्थे व्युत्पत्त्या प्रामाण्योपपादकानुव्याख्यानावतारिकासुधायां ''एवं मीमांसाप्रयोजन-समर्थनार्थत्वेनातःशब्दं द्वेधा व्याख्याय विषयसमर्थनपरतयापि व्याख्याती''त्युक्तत्वाद-तश्शब्देनैव विषयसिद्धेर्ब्रह्मेति व्यर्थमिति शङ्का निरस्ता ।

पाण्डुरङ्गि –न चात्रोते ।। यद्यपि द्वितीयपक्षानुपपत्तिशङ्कातत्परिहारौ तत्रैव सङ्गतौ तथापि तेनैव न्यायेन षष्ठेप्यनुपपत्तिशङ्कापरिहारौ तदेवमिति वक्ष्यमाणन्याये ज्ञेयाविति सूचयितुं षष्ठानन्तरं तदुक्तिरिति ज्ञेयम् । भाष्यानुव्याख्यानयोरर्थसाङ्कर्यशङ्कानिरासार्थभेदमाह ।। अनुव्याख्यानेत्विति ।। अनुव्याख्याने इत्युक्त्वा इति मतान्तरमुक्तमिति सम्बन्धः । अनुव्याख्यानोक्तशब्दार्थविशेषमाह अनुव्याख्याने त्वितीति वा ।

तात्पर्यचन्द्रिका

अपेक्षितार्थहेतुसूचकत्वादतःशब्दस्येत्युक्त्वा ''यतोऽनुभवतः सर्वं सिद्धमेतदतोपि चे''त्यादिना बुद्धौ विपरिवर्तमानं हि साक्षात्प्रकृतं ग्रन्थोक्तत्वं तु तल्लिङ्गं बन्धसत्यत्वादिकं चानुभवसिद्धत्वात् प्रकृतमिति मतान्तरमुक्त्वा ''अतस्तदर्थं सङ्क्षेपादत इत्यभ्यसूचय''दित्यादिना मीमांसाङ्गभूतब्रह्मतर्काख्यतर्कशास्त्रे सूत्रकृत्कृते प्रकृतो जिज्ञासाकर्तव्यत्वोपयोगी युक्तिकलापोऽतःशब्दार्थः । तर्कशास्त्रस्य मीमांसाङ्गत्वं च तन्निर्णीतस्वरूप संख्याबलादिभिः प्रमाणैरिह प्रमेयशोधनादिति मतान्तरमुक्तम् ।

तदेवं स्वर्गादिसाधने ज्योतिष्टोमादौ यथा तत्कामस्त्रैवर्णिकोधिकारी तथा विचारस्य सत्यपि विषये फले च मुमुक्षुः त्रैवर्णिकोधिकारी न तु शांत्यादिकमपि तद्विशेषणमितिशङ्का राजसूयादौ राजत्वादिरिव वचनाच्छांत्यादिरपि तद्विशेषणमिति सूचयताऽथशब्देन परिहृता । विषयप्रयोजनयोरभावान्निरधिकारित्वमिति शङ्का तु तत्समर्पकाभ्यामतश्शब्दब्रह्मशब्दाभ्यां निराकृता । एवं सत्यपि विषये जिज्ञासा न साक्षान्मोक्षहेतुः । नापि ज्ञानद्वारा । ''कर्मणाज्ञानमातनोती''त्यादिश्रुत्या कर्मणाऽपि सिद्धेः । किञ्च ज्ञानमपि न साक्षान्मोक्षहेतुः । नापि भगवत्प्रसादद्वारा । तस्य ''तत्कर्महरितोषंय''दित्यादिना कर्मणापि सिद्धेः । ज्ञानेनाज्ञाननिवृत्तौ प्रसादस्यानपेक्षितत्वाच्चेति शङ्का अतःशब्देन प्रसादादेर्मोक्षादिहेतुत्वं सूचयता परिहृता । अहमिति ब्रह्मणि ज्ञायमानेपि मोक्षानुपलंभान्निष्प्रप्रयोजनत्वमिति शङ्का तु विषयसूचकेन ब्रह्मपदेनैव निरस्तेति द्रष्टव्यम् ।

प्रकाशिका — ननु पक्षद्वयेप्यप्रकृतस्य कथमत इति परामर्शं इत्यतोऽनुव्याख्यान एव विक्षिप्योक्तं त्रेधा समाधानं दर्शयितुमेकं तावदाह ।। अपेक्षितेति ।। यद्यपीदमतो

यथार्थबन्धस्येति श्लोकाभिप्रायं कथयता सुधाकृतैव ''सेयमाशङ्काऽतःशब्देनापेक्षितार्थ-साधकहेतुसूचकेन निराकृते''त्यनेनोक्तम् । तथापि तदुक्तमेवानुव्याख्यानोक्तं मत्वैतदुक्तम् । समाध्यंन्तरे अप्याह । यत इत्यादिना ॥ नन्वनुभवसिद्धस्यापि कथं परामर्शः ग्रन्थतोऽप्रकृ-तत्वादित्यतोभिप्रायमाह ॥ बुद्धाविति ॥ बन्धसत्यत्वादिकमिति सर्वमित्यस्यार्थः । एतेन ''वेदप्रामाण्यादिक''मिति सुधास्थादिपदस्य बन्धसत्यत्वादिकमप्यर्थ उक्तो भवति । अतः ब्रह्मतर्के प्रकृतत्वात् । इत्यादिनेत्यस्योक्तमित्यन्वयः । अन्यत्र प्रकृतस्यान्यत्र कथं परामर्श इत्यत उक्तं मीमांसाङ्गेति । एककर्तृत्वाच्च तत्रत्यस्यात्र परामर्शो युक्त इति भावेनोक्तं सूत्रकृत्कृत इति । तन्निर्णीतेति प्रमाणन्यायसच्छिक्षेति श्लोकार्थोक्तिः ।

तदेवमतश्शब्दार्थं प्रस्थानद्वयोक्तं समर्थ्येदानीमथब्रह्मशब्दार्थविविक्तत्वेनातःशब्दार्थं निष्कर्षुमथादेरप्यर्थं वदन् ''भक्तिमान्परमेविष्णौ कर्मणा त्वधमः प्रोक्त'' इत्यादिभाष्य-स्योत्सूत्रत्वभ्रमनिरासायाथातःशब्दरूढत्वं टीकोक्तं स्फोरयन्नुपसंहरति ॥ तदेवमित्यादिना ॥ यद्वेह पूर्वपक्षे विषयाभावादेव नाधिकार्यादीत्युक्ततया विषयोपपादकब्रह्मपदेनैवाधि-कार्यादिसिद्धेर्ब्रह्मजिज्ञासेत्येव पूर्त्याऽथातःपदयोर्वैयर्थ्यमित्यतो भिन्नभिन्नशङ्कानिरासक-त्वात्सार्थक्यमिति भावेनाथादिपदव्यावर्त्यशङ्कापूर्वं तत्तदर्थं निष्कृष्याह ॥ तदेवमित्यादिना ॥ तत्कामः स्वर्गादिकामः ॥ त्रैवर्णिकेति ॥ उभयत्र कर्मब्रह्मतन्त्रगतापशूद्रनयन्यायेनेति भावः। ब्रह्मातःशब्दाभ्यामथशब्दस्यागतार्थत्वायोक्तम् ॥ सत्यपि विषये फले चेति ॥ राजत्वादि-रिवेति ॥ यथा राजा राजसूयेन यजेते''त्यत्र राजेति वचनाद्राजत्वं तत्राधिकारिविशेषणं यथावा ''ब्राह्मणो वाजपेयेन यजेते''त्यत्र ब्राह्मणत्वं तथा ''भक्तिमान्परमेविष्णा'' वित्यादिवचनाच्छांत्यादिरपि तद्विशेषणमिति भावः । एतेन भक्तिमान्परम इत्यादिभाष्यं नोत्सूत्रितमित्युक्तं भवति । एतेनैव शमादिकं नाधिकारिविशेषणमिति मन्यमानाः स्मृतिसूत्र-विरोधान्निरस्ताः ॥ अतश्शब्दब्रह्मशब्दाभ्यामिति ॥ यथायोगमन्वयः । तेनाथशब्देनैव निरधिकारिकत्वशङ्का निरासात्तयोर्वैयर्थ्यमिति निरस्तम् । अत एवेह ब्रह्मपदव्यावर्त्य-पूर्वपक्षस्यैव प्रपञ्चनादेवमेव निरधिकारिकत्वशङ्का पूर्वमुक्ता ।

नन्वतश्शब्दस्याधिकारिविशेषणत्वेन प्रकृतमोक्षार्थकत्वेपि सप्रयोजनकत्वेन विचारकर्त-व्यत्वे सम्भवति प्रसादाद्यर्थपरत्ववर्णनमयुक्तमित्यत आह ॥ एवमिति ॥ न केवलं निष्प्रयो-जनत्वाशङ्कानिरासकत्वमतश्शब्दस्य किन्तु वक्ष्यमाणशङ्काद्वयनिरासकत्वमपीति समुच्चयार्थ

(प्रकाशिका)

एवंशब्दः । यद्वा अतश्शब्दब्रह्मशब्दाभ्यामिति द्वयोः प्रत्येकमेवान्वयः । तत्र द्वयोर्यथाक्रमं प्रमाणप्रमेययोरारोपितान्यथाकारशङ्कानिवर्तनेन विषयसमर्पकत्वस्योक्तदिशा स्फुटत्वेन तदनुक्त्वा निष्प्रयोजनत्वशङ्का च ज्ञानादेः कर्मजन्यत्वादिप्रयुक्तैका, आत्मज्ञाने सत्यपि तदनुपलम्भकृतान्या तद्द्वयोरपि क्रमान्निवर्तनेन द्वयमपि प्रयोजनार्पकमित्येतद्व्यनक्ति ॥ एवमिति ॥ नसाक्षादिति ॥ तमेवमिति ज्ञानस्यैव मोक्षहेतुत्वश्रुतेः । ज्ञानजनन एव सामर्थ्याच्चेति भावः । कर्मणा सिद्धेरित्यस्य इतिशङ्केत्यनेनान्वयः ॥ न साक्षादिति ॥ ''यस्यप्रसादात्'' इत्यादि श्रुत्या प्रसादस्यैव तद्धेतुत्वश्रवणात् ''न हरिं विना । ज्ञानस्वभावतोपि स्यान्मुक्तिः कस्यापि हि क्वचित्'' इत्याद्यनुव्याख्यानोक्तदिशा स्वतोऽसामर्थ्याच्चेति भावः । प्रसादं विना ज्ञानादेवमोक्ष इत्यत्र युक्तिं चाह ॥ ज्ञानेनेति ॥ अज्ञाननिवृत्तेरेव मोक्षत्वात् । न हि दीपस्यान्धकारनिवृत्तावन्यापेक्षेति परैरङ्गीकारादिति भावः ॥ प्रसादादेरिति ॥ प्रसादज्ञानयोर्मोक्षप्रसादहेतुत्वमित्यर्थः । तथा ''श्रवणं मननं चैव कर्मणात्वधमः प्रोक्त'' इत्यादिभाष्योक्तदिशा कर्मणोऽतःकरणशुद्धिद्वारा परम्परयैव ज्ञानहेतुत्वं कर्मादिजन्यप्रसादादेर्मोक्षेतरहेतुत्वं च सूचयता इत्यप्यर्थः । तेन कर्मणेत्यादिकं भाष्यं नोत्सूत्रमिति ध्येयम् ॥ ब्रह्मपदेनैवेति ॥ अतो नातश्शब्दारूढत्वप्रतिपादनक्लेश इति भावः । अत एव पूर्वं ब्रह्मपदव्यावर्त्यपूर्वपक्षप्रपञ्चने निष्प्रयोजनत्वशङ्कैवमेवोक्तेति भावः ।

पाण्डुरङ्गि — ननु विषयाभावेनैव प्रयोजनादित्रितयस्य पूर्वपक्षितत्वात्सिद्धान्ते ब्रह्मशब्देन विषये साधिते अन्यत्रितयं सेत्स्यतीति किमधिकार्यादिसाधकेनाथशब्दादिनेत्याशङ्क्य ब्रह्मशब्दनिवर्त्याधिकारिप्रयोजनशङ्का अथशब्दातःशब्दनिवर्त्या त्वन्येति न वैयर्थ्यमित्याह ॥ तदेवमिति ॥ ननु शांत्यादिकमित्यत्रापि सिद्धान्त्यभिमताधिकाराभावाज्जिज्ञासाक्षेप एव पूर्वपक्षेऽभिप्रेतः ॥ अतश्शब्दब्रह्मशब्दाभ्यामिति ॥ अतश्शब्दब्रह्मशब्दाभ्यामेव निराकृतत्वेन न तदर्थमथशब्दो येन वैयर्थ्यमिति भावः ।

तात्पर्यचन्द्रिका

यद्यपि विषयादिकं समन्वयाध्यायादौ वक्ष्यते । तथापि शास्त्रेण विषयादिकं निश्चित्य शास्त्रे प्रवृत्तावन्योन्याश्रयादादौ तत्सूचनीयम् । अध्ययनविधिवाक्यवदेतत्सूत्रस्यापि शास्त्रान्तर्गतस्य शास्त्रारम्भप्रतिपादकेन स्वेनैवारम्भसिद्धेर्नानवस्था ।

यद्यपि विषयादिकमागमादेवापाततः प्रतीतं तथापि पूर्वपक्षोक्तन्यायेन तदभावशङ्कायां न्यायेनैतत्प्रतिपादयितुं सूत्रम् । एवं चाथशब्दलब्धहेतुत्वस्यैवातश्शब्देनोक्त्या भास्करस्येव नास्माकं पौनरुक्त्यम् । अधिकारिविशेषणस्य शमादेर्विचारकारकत्वस्याथशब्देन लाभेपि सप्रयोजनत्वादेर्विचारकर्तव्यता प्रमाणस्यातश्शब्देनोक्तेः ।

प्रकाशिका — नन्विदं सूत्रमनर्थकं विषयस्य पूर्वद्विके अधिकारफलयोरुत्तरद्विके प्रतिपादनेन तत एव तज्ज्ञानसम्भवादिति चोद्यमनूद्यावद्यति ॥ यद्यपीति ॥ ननु यथा शास्त्रप्रवर्तकमिदं सूत्रं तथैतत्सूत्रप्रवर्तकेनाप्यन्येन भाव्यम् । अन्यथैतत्सूत्रं विनापि शास्त्रे प्रवृत्तिप्रसङ्ग इत्याशङ्कां सदृष्टान्तं निराह ॥ अध्ययनेति ॥ यथा ''स्वाध्यायोऽध्येतव्य'' इति वाक्यं सर्ववेदाध्ययनप्रवर्तकं सत्स्वाध्ययनेपि प्रवर्तयति स्वाध्यायाध्ययनत्वादेव तथा विषयादिसत्त्वाच्छास्त्रमारभ्यमित्युक्तेऽस्यापि प्रागुक्तरीत्या शास्त्रान्तर्गतत्वादारम्भः सिध्यतीत्यर्थः । नन्वथापि श्रवणस्य विचाराधिकारिविशेषणत्वात्सिद्धार्थबोधकोपनिषद्भाष्यादिनैव विषयादिज्ञानसम्भवेनान्योन्याश्रयाभावादिदं सूत्रं व्यर्थमित्याशङ्कामनूद्य प्रत्याह ॥ यद्यपीति ॥ आपाततः विनैव विचारमित्यर्थः । एवं निष्कृष्यातश्शब्दार्थोक्तेरुपयोगमाह ॥ एवं चेति ॥ एवं हि तन्मतं अथशब्दस्तावदानन्तर्याभिधानमुखेन हेतुतयैव पूर्ववृत्तमवगमयति। आनन्तर्यमात्रस्य विफलत्वादिति । तथाचाथशब्देनैव प्रकृतस्य हेतुत्वसिद्धेरतश्शब्दस्य पुनरुक्तेत्यर्थः । नन्वथशब्दलब्धस्य हेतुत्वमार्थिकमिति चेत्सत्यम् । तथाप्यार्थिके तात्पर्यात् । तस्यैव च वाक्यार्थेऽन्वयात् । पूर्वतन्त्रेप्येवं व्याख्यातमिति चेत्किमतः । न हि पराङ्गं दग्धमिति स्वाङ्गदाहदुःखं निवर्तत इति भावः । तदेव व्यनक्ति ॥ अधिकारीति ॥ एतेन ''अथशब्दोहि जिज्ञासाजनकमधिकारिस्थं धर्ममनधिकारिकत्व शङ्कानिरासायानुवदति। अतश्शब्देन तु प्रयोजनसिद्धयङ्गभूतं न्यायकलापं सूत्रकारः स्वयमाचष्ट इति कुतः पौनरुक्त्य''मिति सुधावाक्यं विवृतं भवति । सप्रयोजनत्वादेरित्यनेन विषयप्रयोजनसिद्धयङ्गभूतमिति सुधास्थमुपलक्षणमित्युक्तं भवति । यद्वा सुधावाक्यमनुव्याख्यानानुसारि । इदं भाष्यटीकाद्यनुसारि । अत एव पूर्वमवादि अनुव्याख्याने प्रयोजनसाधकमप्यतश्शब्देनोक्तमिति ।

पाण्डुरङ्गि — सूत्रवैयर्थ्यं परिहरति ॥ यद्यपीति ॥ नन्वेवं प्रथमसूत्रारम्भ सिद्धयर्थमपि सूत्रान्तराद्यन्वेषणीयमित्यनवस्था स्यादित्यत आह ॥ अध्ययनविधिवाक्यवदिति ॥ तथापि

(पाण्डुरङ्गि)

विषयादिसिद्धिरागमादेव भविष्यतीति व्यर्थमेतदित्यत आह ॥ यद्यपीति ॥ एवं चाथातःशब्दौ व्याख्याय परेषामथातःशब्दयोरैकार्थ्येन पौनरुक्त्यमिव न स्वमते पौनरुक्त्यमित्याह ॥ एवं चेति ॥ ननु कथं न पौनरुक्त्यं स्वेनाप्यथशब्दोपस्थापितयुक्तिकलापस्यातश्शब्दार्थत्वेनोक्तत्वादित्यत आह ॥ अधिकारिविशेषणस्येति ॥ ननु सप्रयोजनत्वादिकथनं व्यर्थं जिज्ञासानुपयोगित्वादित्यत उक्तं विचारकर्तव्यताप्रमाणस्येति ॥

तात्पर्यचन्द्रिका

भामत्यां तु ब्रह्मशब्देन तत्प्रमाणं वेद उपस्थापितोऽत इति परामृश्यते । स च योग्यत्वात्तद्यथेहेत्यादिः । तथा च ब्रह्मज्ञानकर्मणोर्नित्यानित्यफलत्वप्रतिपादकादागमादिहामुत्र फलभोगविरागादि ततश्च ब्रह्मजिज्ञासा । एवं च नातश्शब्देन जिज्ञासां प्रति साधनकलापस्य हेतुतोच्यते । येन पौनरुक्त्यम् । किन्तु तत्स्वरूपालाभपरिहारोऽभिधीयत इत्युक्तम् । तन्न । हेतोर्विचारकर्तव्यत्वादिरूपसाध्यान्वयत्यागेन विरागादिसाधनान्वयायोगात् । अथशब्दार्थानन्तर्योपसर्जनस्य विरागस्यातश्शब्दोक्तहेत्वन्वयायोग्यत्वाच्च । अथशब्दोपस्थापितविरागेणैव स्वजनकस्य तद्यथेत्यादेर्वाक्यस्य साक्षादेवोपस्थापनसम्भवे ब्रह्मशब्देन परम्परयोपस्थापनोक्त्ययुक्तेश्च । विरागहेतुत्वेन त्वदभिप्रेतसत्यानृतविवेके नेहनानेत्यादेरेव हेतुतया वक्तव्यत्वेन तद्यथेत्याद्युक्त्ययुक्तेश्च ।

विवरणे तु अथशब्दगृहीताया एव साधनकलापस्य ब्रह्मविचारहेतुताया ''अक्षय्यं हवै चातुर्मास्ययाजिनः सुकृत'' मित्यादिनाऽपवादशङ्कायां प्राप्तायां तन्निराकरणं पुनरथशब्दोक्तहेतुत्वाभिधायिनाऽतश्शब्देन क्रियत इत्युक्तम् । तदपि न । अथशब्दोक्तानधिकाभिधायिनाऽपवादशङ्कानिरासेऽथशब्देनैव तन्निरासप्रसङ्गात् । हेतुत्वसाधकहेतोः कथन एवापवादशङ्कानिरासः न तूक्तस्यैव हेतुत्वस्य पदान्तरेण कथन इति दिक् ।

प्रकाशिका –परोक्तमतश्शब्दार्थं निराह ॥ भामत्यां त्विति ॥ अत इतीति ॥ अत इत्यत्र प्रातिपदिकेनेत्यर्थः । तर्हि सर्वे वेदान्तादा अतश्शब्देन परामृश्येरन्नित्यत आह ॥

योग्यत्वादिति ॥ अतश्शब्दोक्तहेतुत्वान्वये शक्तत्वादित्यर्थः । ''तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयत'' इत्यादिः कर्मणोऽनित्यफलकत्वबोधकः ''ब्रह्मविदाप्नोति पर''मित्यादिर्ब्रह्मज्ञानस्य नित्यफलत्वबोधकः ॥ एवं चेति ॥ यद्यपीदं भामत्यां न स्पष्टम् । तथापि कल्पतरावुक्तत्वादेवमुक्तम् ॥ तत्स्वरूपेति ॥ जिज्ञासां प्रति वैराग्यादिरूपसाधनकलापस्वरूपालाभपरिहार इत्यर्थः । अन्यथा अनुकूलवेदनीये लौकिके ''यन्नदुःखेन सम्भिन्न''मित्यादेर्दुःखासम्भिन्ने आमुष्मिके च सुखे न विरज्येतेति वैराग्यादि-स्वरूपं दुर्लभं स्यात् । अक्षय्यवाक्यान्नित्यत्वज्ञानेन विवेकोपि न स्यादिति भावः ॥

हेतोरिति ॥ अतो ब्रह्मजिज्ञासेत्यत्रातश्शब्दार्थस्य हेतोर्जिज्ञासाकर्तव्यत्वरूपप्रधान-साध्यान्वयः, तस्मादनित्यः शब्द इत्यादाविव स्पष्टं प्रतीयत इति प्रतीतस्यास्मदुक्तरीत्या योग्यस्य साक्षात्प्रधानसाध्यान्वयस्य त्यागेन जिज्ञासासाधनीभूतवैराग्यादिरूपाप्रधान-साध्यान्वयो न युक्त इत्यर्थः । यद्यपि तन्मते यथाश्रुते कर्तव्यपदाध्याहाराभावाज्जिज्ञासा कर्तव्येति नार्थः । तथापि जिज्ञासा ज्ञानेच्छा भवितुं युक्तेति श्रौतार्थे सति अर्थाद्विचारकर्तव्यत्वं प्राप्तमित्येवमुक्तम् । नन्वन्यस्याप्रकृतत्वादथशब्दार्थानन्तर्यप्रतियोगिनो वैराग्यादेरेवात इति हेतुत्वोक्तौ पौनरुक्त्यापत्तेर्ब्रह्मपदोपस्थापितप्रमाणस्यैव योग्यस्याथपदो-पस्थापितवैराग्यादौ हेतुत्वमुच्यत इति चेन्न । अन्यस्य प्रकृतत्वस्य प्रागेव बहुधा प्रति-पादितत्वात् । दोषान्तरं चाह ॥ अथशब्दार्थेति ॥ उपसर्जनस्य आनन्तर्यविशेषणस्य । ननु वैराग्यादेस्स्वरूपालाभे साधनाभावेन जिज्ञासायोगादेवमुक्तमित्यत आह ॥ अथशब्देति ॥ आनन्तर्यप्रतियोगित्वेनोपस्थापितेत्यर्थः ॥ सम्भवइति ॥ अत एव भगवता भाष्येऽथपद-व्याख्यावसर एव ''आब्रह्मस्तम्बपर्यन्त''मिति ''परीक्ष्य लोका'' नित्यादि प्रमाणमुक्त-मिति भावः ॥ परम्परयेति ॥ ब्रह्मोपस्थितिद्वारा प्रमाणस्योपस्थापनादिति भावः । यदपि योग्यत्वात्तद्यथेत्यादिरित्युक्तं तदपि नेत्याह ॥ विरागेति ॥ नित्यानित्यवस्तुविवेक इत्यादिभाष्यव्याख्यायां नित्यः प्रत्यगात्मेत्यादिना तथैव त्वयोक्तत्वादिति भावः ॥

विवरणेत्विति ॥ अथशब्दार्थानन्तर्यप्रतियोगिनो वैराग्यादिसाधनचतुष्टयस्यैवात इति हेतुत्वमुच्यते । अथ साधनकलापानन्तरं अतः साधनकलापादिति । न च कारणादानन्तर्य-स्याव्यवधेरभिचाराच्च मुख्यत्वेन, तेनैव वैराग्यादेर्हेतुत्वलाभात्पुनरुक्तिरिति वाच्यम् । अक्षय्यवाक्येन कर्मजन्यसुखस्य नित्यत्वावगमेन ब्रह्मज्ञानफलं नित्यमन्यफलमनित्यमिति

विवेकस्य तद्धेतुकवैराग्यादेश्चायोगेन विवेकादिसाधनकलापस्य न विचारहेतुत्वमित्यपवाद-शङ्कानिरासार्थत्वेनापौनरुक्त्यात् । दृश्यन्ते चापवादनिरासार्था अपि ''मृडमृदे''त्यादि विधय इति दूष्यांशस्यार्थः ॥ इति दिगिति ॥ अयं भावः । विचारकर्तव्यत्वरूपप्रधान-साध्येऽपेक्षितसप्रयोजनत्वादिस्वतन्त्रहेतुसमर्पणपरत्वसम्भवे आनन्तर्योपसर्जनस्यहेतुतया-प्राप्तस्यातश्शब्देन हेतुत्वोक्तेरयुक्तत्वात् । अथशब्दोपस्थापितवैराग्यादिनैव स्वजनकस्य कृतकत्वरूपोपपत्त्युपबृंहितत्वेन प्रबलस्य ''तद्यथेह कर्मचितोलोकः क्षीयत'' इत्यादिवाक्य-स्योपस्थापनेन तत एवापवादशङ्कानिराससम्भवाच्च जिज्ञासाकर्तव्यतायामपेक्षितहेतोरवश्यो-पन्यसनीयस्य सप्रयोजनत्वादेरनुपन्यासे जिज्ञासाकर्तव्यत्वासिद्धेश्च । अयं च दोषः प्राचीन-मतेपि बोध्यः । न च मतद्वयेपि जिज्ञासापदेनैव प्रयोजनादेर्विचारकर्तव्यताहेतोर्लाभ इति वाच्यम् । निरसिष्यमाणत्वात् । हेतुपरेणातःपदेनैव फलादेर्हेतोः कथनस्यौचित्याच्चेत्यादि ध्येयमिति ।

पाण्डुरङ्गि – एवं स्वीयमतःशब्दव्याख्यानं समर्थ्य परकीयतद्व्याख्यानमनूद्य दूषयति। भामत्यांत्विति ॥ तत्प्रमाणमिति ॥ ब्रह्मणि प्रमाणमित्यर्थः । ब्रह्मशब्दस्य वेदवाचकत्वेन तेन तदुपस्थापनमिति भावः । तर्हि सकलवेदान्ताः परामृश्येरन्नेत्याह ॥ योग्यत्वादिति ॥ अतःशब्दोक्तहेतुत्वसमर्थनयोग्यत्वादित्यर्थः । ननु तद्यथेहेत्यस्योपस्थानं कुत इत्यत आह ॥ स च योग्यत्वादिति ॥ ततश्चेति ॥ विरागादेरित्यर्थः ॥ किं त्विति ॥ तस्य शमादेर्यत्स्व-रूपं तस्यालाभः असिद्धिरित्यर्थः ॥ विरागादिसाधनान्वयायोगादिति ॥ विरागादिम-ज्जिज्ञासासाधनं तदन्वयायोग्यत्वादित्यर्थः । तथाच प्रधानसाध्येन स्वारसिकाकाङ्क्षायाः सत्वेन तेनैवातःशब्दस्यान्वयो न तु विरागादिसाधनेन । तेन स्वरसिकाकाङ्क्षाभावादिति भावः ॥ अथशब्दार्थेति ॥ तथाचान्यविशेषणत्वेनोपस्थितस्य नान्यविशेषणान्वये योग्यत्व-मिति भावः ॥ परम्परयेति ॥ ब्रह्मशब्देन तत्प्रमाणवेदोपस्थापनं तेन च तज्ज्ञानसाधन-वैराग्यसाधनवाक्योपस्थापनं तेन विरागसिद्धिरित्येवं परंपरयोपस्थापनोक्त्ययोगादित्यर्थः ।

किञ्च नेहनानेति वाक्यमेव त्वयोदाहर्तव्यम् । तस्यैव विरागहेतुसत्यानृतविवेकहेतुत्वेन त्वदभिमतत्वात् । न तु तद्यथेहेत्यादीत्याह ॥ विरागहेतुत्वेनेति ॥ विवरणोक्तपौनरुक्त्य-परिहारं दूषयितुमनुवदति ॥ विवरणेत्विति ॥ अक्षय्यं हवै चातुर्मास्ययाजिनः सुकृतं भवती-त्यादिश्रुत्या कर्मणामप्यनन्तस्थिरफलकत्वोक्त्या कर्मणामल्पास्थिरफलकत्वं ब्रह्मज्ञानस्य

स्थिरफलकत्वमित्येवंरूपजिज्ञासाहेतुभूतनित्यानित्यविवेकादेरभावान्न विचारः कर्तव्य इति भावः ॥ अपवादशङ्कायामिति ॥ चातुर्मास्यादिकमेव कर्तव्यं तेनैव मोक्षप्राप्तिर्भविष्यति किं ब्रह्मजिज्ञासया इत्यपवादशङ्कायामित्यर्थः ॥ अतश्शब्देनेति ॥ उक्तस्यैव पुनः शब्दान्तरेणोक्तौ दार्ढ्येन शङ्कानिराकरणं भवतीति भावः । अत्र वक्तव्यं किमथशब्देनोक्तमेवातःशब्देनोच्यते ततोधिकं किञ्चित् । नाद्य इत्याह ॥ अथशब्दोक्तेति ॥ ननूक्तस्यैव हेतुत्वस्य पदान्तरेण कथने दार्ढ्यहेतुत्वेन शङ्कानिराकरणमित्युक्तमत आह ॥ हेतुत्वसाधकेति ॥ वैराग्यादेर्जिज्ञासाहेतुत्वसाधकहेतोरित्यर्थः । द्वितीयं दूषयति ॥ दिगिति ॥ भिन्नार्थत्वे च तेनैव पौनरुक्त्यासम्भवे अपवादशङ्कानिराकरणमनर्थकं स्यादिति भावः ।

तात्पर्यचन्द्रिका

केचित्तु अथशब्दो जिज्ञासाविशेषणीभूतकालपरः । न हि ब्रह्मविचारस्य कर्तव्यतामात्रं साध्यं किन्तु धर्मजिज्ञासानन्तर्यविशिष्टम् । अतश्शब्दस्य तु तस्मिन्विशिष्टे साध्ये कर्मणामल्पास्थिरफलत्वनिर्णयसहितो ब्रह्मज्ञानस्यानन्तस्थिरफलताऽऽपातप्रतीतिरूपो विशिष्टो हेतुरर्थः । ततश्च सार्थकं पदद्वयमित्याहुः । तदपि न । अथ शब्दस्योक्तप्रतीत्यानन्तर्यार्थत्वेऽकारणादानन्तर्योक्तेर्वैयर्थ्येनाथशब्देनैव तस्याः हेतुत्वलाभादतःशब्दवैयर्थ्यात् । अथशब्दस्यान्यानन्तर्यार्थत्वे तु नोक्तप्रतीतिहेतुत्ववाचकत्वमतश्शब्दस्य । प्रकृतस्य हेतुत्वार्थोतश्शब्द इत्यस्य त्वन्मतस्य भङ्गात् । किं च सिद्धे व्युत्पत्त्यभावाद्विचाराकर्तव्यत्वे त्वद्रीत्या पूर्वपक्षिते ब्रह्मविचारकर्तव्यतामात्रं सिद्धान्तयितव्यम् । नतूक्तानन्तर्यविशिष्टम् । न हि सिद्धे व्युत्पत्त्यभावेऽन्यदापि विचारस्य कर्तव्यता सिध्यति । तदेवं —

अथशब्देनाधिकारमत इत्यमुना फलम् ।
ब्रह्मशब्देन विषयं सूचयामास सूत्रकृत् ॥

प्रकाशिका –कालपर इति ॥ अनन्तरकालपर इत्यर्थः । तदेवाह ॥ न हीति ॥ सार्थकमिति ॥ अथशब्दोक्तादधिकस्यैवातश्शब्देनोक्तेरिति भावः । उक्तं च ''अधीतसाङ्गसशिरस्के''त्यादि भाष्यव्याख्यावसरे श्रुतप्रकाशे ''न कर्तव्यतामात्रं साध्यधर्मः । अपि

(प्रकाशिका)

त्वानन्तर्यविशिष्टं कर्तव्यत्व''मिति । तथा ''कर्मविचारानन्तरं च ब्रह्मविचारस्य कर्तव्यत्वे कर्मणामल्पास्थिरफलत्वनिर्णयसहितानन्तस्थिरफलताऽऽपातप्रतीतिरित्ययं विशिष्टो हेतु'' रिति च । अत्र अतःशब्दोक्तो यो विशिष्टो हेतुस्तदानन्तर्यमथशब्देनोच्यते उत ''कर्मविचा-रानन्तरं तत एव हेतोर्ब्रह्मविचारः कर्तव्य'' इति भाष्यानुसारात्कर्मविचारानन्तर्यमिति विकल्पौ हृदि निधायाद्ये पौनरुक्त्यं तदवस्थमेवेत्याह ॥ अथशब्दस्येति ॥ तस्याः उक्तप्रतीतेः । ननु न वैयर्थ्यं अथ शब्देनोक्तप्रतीत्यानन्तर्यार्थकेन हेतुत्वलाभेऽपि तस्योक्तदिशाऽसिद्धिशङ्कायामतश्शब्देन तत्परिहारात् । अत एव श्रुतप्रकाशे एतदेवाशङ्क्य च ''अथशब्दाक्षिप्तहेत्वसिद्धिशङ्कापरिहारार्थत्वादतश्शब्दस्ये''ति समाहितमिति चेन्न । ''अथशब्दोक्तानधिकाभिधायिने''त्यादिना पूर्वग्रन्थेनैव तस्याः निरासादिति भावः । द्वितीये दोषमाह ॥ अथशब्दस्येति ॥ त्वन्मतस्येति ॥ ''अतश्शब्दो वृत्तस्य हेतुभावे'' इति भाष्ये ''प्रकृतपरामर्शिनैतच्छब्देने''त्यादिना श्रुतप्रकाशे च तथोक्तेरिति भावः । यदपि धर्मविचारानन्तर्यविशिष्टब्रह्मविचारकर्तव्यत्वं साध्यमिति तदपि नेत्याह ॥ किञ्चेति ॥ ननु विशिष्टाकर्तव्यत्वमेव पूर्वपक्ष्यत इत्यत आह ॥ न हीति ॥

पाण्डुरङ्गि – रामानुजमतं दूषयितुमनुवदति ॥ केचित्त्विति ॥ ननु ब्रह्मजिज्ञासाकर्त-व्यत्वमात्रस्य साध्यत्वात्कालपरत्वेऽथशब्दवैयर्थ्यं स्यादित्यत आह ॥ न हीति ॥ किंत्विति ॥ धर्मविचारवत एव ब्रह्मविचारेधिकारित्वात्तदानन्तर्यार्थत्वमथशब्दस्येति भावः ॥ अत-श्शब्दस्यत्विति ॥ ननु कर्मणामप्यनन्तस्थिरफलत्वात्तद्विचार एव स्यात्किं ब्रह्मविचारेणेत्यत उक्तं कर्मणामिति । ननु कर्मणामिव ब्रह्मज्ञानफलस्याप्यल्पास्थिरफलत्वात्किं तद्विचारेणेत्यत उक्तं ब्रह्मेति । हेतुसिद्ध्यर्थमाह ॥ आपातेति ॥ आपातप्रतीतिः श्रुत्येति शेषः । तद्रूप इत्यर्थः । अत्र वक्तव्यं धर्मजिज्ञासानन्तर्यमथशब्दार्थः कुत इति । न च धर्मविचारवत एव ब्रह्मविचारेऽधिकारित्वात्तदर्थत्वमथशब्दस्येति वाच्यम् । आदौ धर्मविचारः कर्तव्यः पश्चाद् ब्रह्मविचार इति क्रमे श्रुत्यादिरूपक्रमप्रमाणाभावात् । अथ कर्मणामल्पास्थिरफलत्वप्रतीत्यर्थं धर्मविचार आदौ कर्तव्य इति चेत् एवं सति कर्मणामल्पास्थिरफलकत्वप्रतीत्यानन्तर्यमेवाथ-शब्दार्थ उक्तः स्यात् । एवं च सति दूषणमाह ॥ अथ शब्दस्येति ॥ ननु अधिकारानन्त-र्यमथशब्दार्थोस्त्वित्यत आह ॥ अथशब्दस्यान्यानन्तर्यार्थत्वेत्विति ॥ उक्तप्रतीतेः कर्मणामल्पास्थिरफलत्वप्रतीतेः हेतुत्वं विचारकर्तव्यत्व इति शेषः । कुतो न हेतुत्ववाचकत्वमतःशब्दस्येत्यत आह ॥ प्रकृतस्येति ॥ धर्मजिज्ञासानन्तर्यविशिष्टब्रह्मविचार-

कर्तव्यत्वं साध्यमित्यत्र दूषणान्तरमाह ॥ किं चेति ॥ ननु धर्मविचारात्प्रागपि ब्रह्मविचारकर्तव्यत्वप्रतीतिः स्यात् । तदर्थमेवं साध्यं क्रियत इत्यत आह ॥ न हीति ॥ अन्यदापि धर्मविचारात्प्रागपि । उक्तमर्थं कारिकारूढं करोति ॥ तदेवमिति ॥ अतःशब्दब्रह्मशब्दयोर्विशेषतः फलविषयसूचकत्वोक्तिः प्राधान्यभिप्रायेण । अन्यथा प्रागतश्शब्दस्य विषयसिद्धिहेतुयुक्तिसूचकत्वेन विषयसूचकत्वस्योक्तत्वाद् ब्रह्मशब्दस्य निष्प्रयोजनत्वशङ्का स्यात् । प्राधान्येन फलसूचकत्वस्योक्तत्वान्न तद्विरोधः स्यादिति बोध्यम् ।

तात्पर्यचन्द्रिका

भामत्यां तु निश्चिते जिज्ञासायोगात्सन्दिग्धत्वेन ब्रह्मैव विषयः । ज्ञानमेवेच्छाविषयत्वेन प्रयोजनमिति जिज्ञासापदेनैव विषयप्रयोजने सूचिते इत्युक्तम् । तन्न । न हि पूर्वपक्षिणा ब्रह्मज्ञाने इच्छामङ्गीकृत्य तद्विचार आक्षिप्तः । किं तु विषयाद्यभावेनेच्छैव नोदेतुं युक्तेत्याक्षिप्तम् । न च तं प्रतीच्छाया विषयादिसाधनं युक्तम् । विवरणे तु अथशब्देनाधिकारी जिज्ञासापदेनेच्छाविषयत्वेन ब्रह्मज्ञानं प्रयोजनं अर्थादधिकारिविशेषणं मोक्षो ब्रह्मज्ञानफलं विषयश्च सूचित इत्युक्तम् । तदपि न । त्वन्मते जिज्ञासापदस्य विचारलक्षकत्वेनेच्छापरत्वस्याभावात् । न हि विषं बुभुक्षते, कूलं पिपतिषतीत्यनेन विषभक्षणादेरिष्टत्वसिद्धिः । प्रतीतस्यापि मुख्यार्थस्य त्यक्तत्वात् । पूर्वपक्षिणेच्छानङ्गीकाराच्च । त्वन्मते ज्ञानेच्छाऽसम्भवस्योक्तत्वाच्च । मुमुक्षाया अधिकारिविशेषणत्वनिरासाच्च । विषयसूचनं त्वसन्दिग्धादन्यसूचनं विना न शक्यम् । अन्यथा शास्त्रारम्भसामर्थ्यादेव वा कर्तव्यतोक्तिसामर्थ्यादेव वा तत्प्रयोजकविषयादिसूचनसम्भवाज्जिज्ञासापदादिना तत्सूचनोक्त्ययुक्तिरिति ।

प्रकाशिका –स्वयं ब्रह्मातःपदाभ्यां विषयफलसिद्धिमुक्त्वा जिज्ञासापदेन तल्लाभं निराह ॥ भामत्यां त्विति ॥ निश्चिते ज्ञानेच्छारूपजिज्ञासायोगाज्जिज्ञासापदोपादानेन जिज्ञास्यं ब्रह्म सन्दिग्धमिति सूचनात्तद्विषयः काम्यमानस्य च फलत्वेन जिज्ञासेत्यत्र प्रत्ययार्थभूतेच्छाविषयभूतं प्रकृत्यर्थरूपं ज्ञानं प्रधानप्रयोजनमित्यर्थः ॥ न हीति ॥ न च सर्वजनीनाहमनुभवसिद्ध आत्मा सन्दिग्धो वा सप्रयोजनो वा येन जिज्ञास्यः सन् विचारं प्रयुंजीतेति त्वदीयपूर्वपक्षोपसंहारे जिज्ञासाक्षेपपूर्वं विचारस्याक्षिप्तत्वादिति भावः ॥ न चेति ॥

ज्ञानेच्छायां सिद्धायां विषयप्रयोजनसिद्धिः तत्सिद्धौ च तत्सिद्धिरित्यन्योन्याश्रयादिति भावः ॥ प्रयोजनमिति ॥ अवान्तरप्रयोजनम् । न तु भामतीमत इव मुख्यमित्यर्थः ॥ सूचित इति ॥ जिज्ञासापदेनेत्यन्वयः । मोक्षफलं त्वथशब्देन ॥ न हीति ॥ विषं बुभुक्षत इत्येतच्छत्रु-गृहभोजननिषेधस्य लक्षकमिति न विषभोजनेच्छापरम् । कूलं पिपतिषतीत्येतत्कूलपतन-माशङ्कचत इत्येतत्परम् । न तु पतनेच्छापरम् । ''आशङ्कायां सन्वक्तव्य'' इति कात्यायन-स्मरणात् । तथाच तत्रोभयत्रान्यार्थपरत्वाद्विषभक्षणादेरिष्टत्वं नास्ति । तद्बज्ज्ञानमपि नेष्टमिति न प्रयोजनस्य तेन लाभ इति भावः ॥ पूर्वपक्षिणेति ॥ तथाचान्योन्याश्रय इति भावः ॥ उक्तत्वाच्चेति ॥ तदीयाथशब्दार्थखण्डनप्रस्तावे । ''न तावद्विचारविधौ मुमुक्षुरधि-कारी''त्यादिनेति भावः ॥ निरासाच्चेति ॥ ''मुमुक्षाच न परपक्षे युक्ते''त्यादिनेति भावः । यदपि जिज्ञासापदेन विषयसूचनमिति तदपि नेत्याह ॥ विषयेति ॥ यदसन्दिग्धं जीवादि ततोन्यस्येश्वरादेः सूचनं विना न शक्यम् । तच्च ब्रह्मपदेनैवेति भावः । अयं दोषो भामतीमतेपि ध्येयः । ननु जिज्ञासापदोपादानसामर्थ्यादेव तत्प्रयोजकसंशयादिलाभाद्विषया-दिसिद्धिर्भवति । अन्यथा तद्वैयर्थ्यमित्यत आह ॥ अन्यथेति ॥ जिज्ञासापदसामर्थ्यादेव तत्सूचन इत्यर्थः । शास्त्रारम्भप्रयोजकविषयादिसूचकमाद्यसूत्रं हित्वैव जन्मादिसूत्रमारभ्य शास्त्र आरब्धे सति यद्यत्र विषयादिकं न स्यात्तदापेक्षावान् सूत्रकारो नारभेत । आरभते चातोत्रास्ति विषयादीत्यारम्भसामर्थ्यादेव वा तथा जिज्ञासाया विषयाद्यभावे कर्तव्यतोक्त्य-योगात्तत्सामर्थ्यादेव वेत्यर्थः । उपलक्षणमेतत् । ''ईक्षतेर्नाशब्दं आनन्दमयोभ्यासा'' दित्यादौ साध्यनिर्देशसामर्थ्यादेव तत्प्रयोजकलाभादीक्षतेरभ्यासादिति हेतूपन्यासो व्यर्थ इत्यपि ध्येयम् । भामतीमते आक्षिप्तविचारकर्तव्यतासामर्थ्याभिप्रायेण वाक्यं योज्यम् । इतिशब्दोतश्शब्दव्याख्यासमाप्तौ ।

पाण्डुरङ्गि – ननु पदद्वयेन विषयप्रयोजनसूचनमयुक्तं एकेन जिज्ञासापदेनैवोभय-सूचनसम्भवेन पदद्वयेन तत्सूचनस्य गौरवकरत्वादिति भामत्यामुक्तत्वादित्यतस्तन्मतं दूषयितुमनुवदति ॥ भामत्यां त्विति ॥ पूर्वपक्षिणा इच्छया एवानङ्गीकृतत्वात्तद्विषय- त्वेन विषयादि साधनमयुक्तमित्याह ॥ न हीति ॥ विवरणमतं दूषयितुमनुवदति ॥ विवरणेत्विति ॥ ब्रह्मज्ञानफलं मोक्ष इत्यर्थः । ननु सन्प्रत्ययस्येच्छापरत्वात् जिज्ञासापदस्येच्छापरत्व-मित्यत आह ॥ न हीति ॥ ननु जिज्ञासापदस्य ज्ञानेच्छारूपो मुख्यार्थः प्रथमप्रतीतः । तथाच तद्विषयत्वेन विषयादिलाभ इत्यत आह ॥ प्रतीतस्यापीति ॥ पूर्वपक्षिणेति ॥

तथाचेच्छाविषयत्वेन विषयादिसाधनमयुक्तमिति भावः ॥ त्वन्मत इति ॥ न तावद्विचारविधौ काम इत्यनेनेति शेषः । जिज्ञासापदेन विषयसूचनमयुक्तमित्याह ॥ विषयेति ॥ असन्दिग्धात्पदार्थादन्योर्थः तत्सूचनं विनेत्यर्थः ।

तात्पर्यचन्द्रिका

ब्रह्मशब्दश्च ''अथ कस्मादुच्यते ब्रह्मेति बृहंतो ह्यस्मिन्गुणा'' इत्यादिश्रुतिबलाद्गुणपूर्त्यर्थः । परपक्षेऽखण्डस्य ब्रह्मपदलक्ष्यस्यैव जिज्ञास्यत्वात् श्रुतिसूत्रस्थब्रह्मपदस्यैव मुख्यार्थत्यागः । यच्च परैर्ब्रह्मणो जीवाद्भेदे तद्रूपविकलत्वेनाल्पत्वं स्यादिति निरङ्कुशमहत्त्वासिद्धेस्त्रिविधपरिच्छेदाभावरूपमहत्त्वार्थे न ब्रह्मपदेनैव जीवाभेदसिद्धिरित्युक्तम् । तन्न । तेनैव घटाद्यभेदप्रसङ्गात् । जीवस्वरूपस्य तात्विकत्वाद्घटादेश्चातथात्वाद्वैषम्यमिति चेन्न । देशकालयोरतात्विकत्वेपि गगनादाविव घटादौ तात्विकस्य वा स्वतुल्यसद्रूपस्य वा देशाद्यपरिच्छेदस्याभावेनाल्पत्ववदभेदस्यापरिच्छेदरूपत्वे वस्तुनो घटादेरतात्त्विकत्वेपि ब्रह्मणि तात्त्विकस्य स्वतुल्यसद्रूपस्य वा वस्त्वपरिच्छेदस्याभावेनाल्पत्वप्रसङ्गात् । न च परिच्छेदकस्य देशादेर्घट- तुल्यसद्रूपत्वाद्घटादेर्देशतोल्पता । ब्रह्मणि तु परिच्छेदकस्य घटादेर्वस्तुनः स्वतुल्यसद्रूपत्वाभावात्तदभेदाभावेपि न वस्तुतोल्पता । जीवस्य तु ब्रह्मतुल्यसद्रूपत्वात्तदभेदाभावे वस्तुतोल्पता स्यादिति वाच्यम् । तत्वतः सद्रूपे ब्रह्मणि व्यवहारतः सद्रूपदेशादिना परिच्छेदेपि महत्त्वसिद्धिप्रसङ्गात् । स्वतुल्यसद्रूपघटाद्यनात्मकेपि गगनादावल्पत्वबुद्ध्यभावाच्च । अन्यथा कालापरिच्छिन्नेपि परमाणत्वादौ देशपरिच्छेदेनाल्पत्वबुद्धिवदुभयापरिच्छिन्नेपि गगनादौ भेदमात्रेण परिच्छिन्नत्वबुद्धिः स्यात् ।

प्रकाशिका – एवमोमथातश्शब्दान् सम्यग्व्याख्याय द्वयोरपव्याख्यां च प्रत्याख्याय क्रमप्राप्तस्य ब्रह्मशब्दस्य परोक्तमर्थं निरसितुं भगवत्पादोक्तमर्थमाह ॥ ब्रह्मशब्दश्चेति ॥ ''ब्रह्मशब्देन पूर्णगुणत्वोक्ते''रिति न्यायविवरणोक्तेरिति भावः । यद्यपि देशकालापरिच्छेदोपि ब्रह्मपदार्थः तथापि तत्राविवादाद्वा गुणपूर्त्युक्त्यैव तस्यापि गुणस्य लाभाद्वा ''देशतः कालतश्चैवे''त्युपसंहारात् उपलक्षणत्वाद्वा न दोषः ॥ अखण्डस्येति ॥ ''अस्ति

(प्रकाशिका)

तावद् ब्रह्म नित्यशुद्धबुद्धमुक्तस्वभाव''मित्यादि परभाष्यादौ वर्णनादिति भावः । लक्ष्यत्वे हेतुरखण्डत्वम् । तच्च मुख्यार्थत्यागे । यद्यप्यत्र ब्रह्मशब्दस्य शिवादिपरत्वं प्रच्याव्य विष्णुपरत्वमपि समर्थनीयं तथापि भाष्यानुभाष्यादौ भगवत्पादैरेव बहुप्रमाणैः समर्थितत्वान्नेह तत्र पराक्रान्तम् । यद्वा निरङ्कुशगुणपूर्त्यर्थत्वोक्त्यैव भाष्याद्युदाहृतश्रुतिस्मृतिशतैरतादृशविवादिप्रहाणेन तादृशविष्णुपरत्वसिद्धेरेवमुक्तम् । यद्वा गुणपूर्त्यर्थत्वोक्तिमात्रेण जीवाद्भेदसिद्ध्या विषयसिद्धेस्तदेवोक्तम् । यद्वा लक्षणसूत्र एव तस्य व्युत्पाद्यत्वाच्च भाष्यादौ तदुक्तिः शिष्यहितायेत्याद्यूह्यम् ॥ श्रुतीति ॥ ''तद्विजिज्ञासस्व तद् ब्रह्मे''ति श्रुतिस्थस्येत्यर्थः । एवं ब्रह्मपदास्वारस्यमुक्त्वा यद् ब्रह्मपदस्य देशकालवस्तुपरिच्छेदलक्षणत्रिविधपरिच्छेदाभावरूपमहत्त्वमर्थ इत्युक्तं तदपि नेत्याह ॥ यच्चेति ॥ यद्वा न ब्रह्मशब्दमुख्यार्थत्यागः । अखण्डचैतन्यस्यैव ब्रह्मशब्दस्वरसार्थत्वादित्यतस्तदनूद्यैव निराह ॥ यच्चेति ॥ तेनैवेति ॥ उक्तरूपमहत्त्वार्थेन ब्रह्मपदेनैवेत्यर्थः । अन्यथा तद्रूपविकलत्वेन निरङ्कुशमहत्त्वासिद्धेः । न चेष्टापत्तिः । ब्रह्मणि जगद्व्यावृत्त्यभिलापादिति भावः ॥ वैषम्यमिति ॥ तात्विकेनाभेदाभाव एव महत्त्वासिद्धिरिति भावः । वैषम्यमप्रयोजकमित्याह ॥ देशेति ॥ यथा गगनादावतात्विकदेशकालाभ्यामपरिच्छेदस्य सत्त्वेन महत्त्वं तथा घटादौ तदपरिच्छेदस्याभावेनाल्पत्वं दृष्टं तद्वदतात्विकादपि घटादेरभेदरूपस्यापरिच्छेदस्य ब्रह्मण्यभावे निरङ्कुशमहत्त्वासिद्ध्याल्पत्वं स्यादित्यर्थः ॥ तात्विकस्येति ॥ सप्रकारकज्ञानाबाध्यस्येत्यर्थः । यद्येवंविधमपि घटाद्यपरिच्छेदं सर्वं खल्विदं ब्रह्मेति श्रुतेर्वैयात्यात्कश्चिदङ्गीकुर्यात्तदाह ॥ स्वतुल्येति ॥ ननु देशादेर्घटसमसत्ताकत्वाद्देशाद्यपरिच्छेदाभावे तस्याल्पत्वं युक्तम् । न तु ब्रह्मणि । तस्य घटादेश्च भिन्नसत्ताकत्वाज्जीवब्रह्मणोश्च समसत्ताकत्वेन महत्त्वसिद्ध्यै जीवापरिच्छेद एव वक्तव्यो न तु घटाद्यपरिच्छेद इत्याशङ्क्याह ॥ न चेति ॥ परिच्छेदकस्य घटादिनिष्ठपरिच्छेदनिरूपकस्य ॥ घटतुल्येति ॥ द्वयोर्व्यावहारिकत्वादिति भावः । घटादेरित्यनन्तरं देशाद्यपरिच्छेदाभाव इति योज्यम् ॥ न वस्तुतोल्पतेति ॥ न वस्त्वभेदाभावकृतमल्पत्वमित्यर्थः ॥ ब्रह्मतुल्येति ॥ द्वयोस्तात्विकत्वादिति भावः । वस्तुतोल्पतेत्युक्तार्थम् । स्वतुल्यसद्रूपनिरूपितापरिच्छेद एव महत्त्वप्रयोजको न तु भिन्नसत्ताकनिरूपित इत्ययं कल्पो न युक्तोन्वयव्यतिरेकव्यभिचारादिति भावेनाह ॥ तत्वत इति ॥ स्वभिन्नसत्ताकनिरूपितापरिच्छेदस्य महत्त्वाप्रयोजकत्वोक्तेरिति भावः । घटाद्यनात्मके घटाद्यपरिच्छेदरहिते । स्वतुल्यसद्रूपवस्त्वपरिच्छेदस्य महत्त्वप्रयोजकत्वे तत्राल्पत्वबुद्धिस्स्यात् । न चैवमस्ति ।

अतस्तद्वज्जीवानात्मकेपि ब्रह्मण्यल्पत्वबुद्ध्यभावोपपत्तिरिति भावः । ननु गगनादौ देशकालापरिच्छेदमात्रेण महत्त्वबुद्धिर्युक्तेत्यतस्तुल्यं ब्रह्मण्यपीति भावेन तदुपपादयति ॥ अन्यथेति ॥ स्वतुल्यसद्रूपवस्त्वपरिच्छेदाभावेनाल्पत्व इत्यर्थः ॥ भेदेति ॥ घटादिपरिच्छेदमात्रेणेत्यर्थः । इयता ग्रन्थेन परिच्छेदकस्य स्वतुल्यसद्रूपत्वमल्पत्वप्रयोजकमित्याशङ्क्य निरस्तम् ।

पाण्डुरङ्गि – ननु ब्रह्मशब्देन विषयं सूचयामासेत्ययुक्तं ब्रह्मशब्दस्य गुणपूर्त्यर्थत्वाभावेन विषयसूचना सम्भवादित्यत आह ॥ ब्रह्मशब्दश्चेति ॥ ब्रह्मशब्दोपि स्वमत एव स्वरसो न तु परमत इत्याह ॥ ब्रह्मशब्दश्चेति ॥ परोक्तां ब्रह्मशब्देनैव जीवाभेदसिद्धिमनूद्य दूषयति ॥ यच्च परैरिति ॥ तद्रूपविकलत्वेनेति ॥ जीवापरिच्छेदविकलत्वेनेत्यर्थः ॥ तेनैवेति ॥ ब्रह्मणो घटादिभ्यो भेदे घटापरिच्छेदविकलत्वेनेत्यर्थः । अन्यथा निरङ्कुशमहत्त्वं न स्यादिति भावः ॥ वैषम्यमिति ॥ तथाच घटाभेदाभावेप्यल्पत्वाभावेन निरङ्कुशमहत्त्वसिद्धेर्घटाद्यभेदसाधकस्तर्कोऽन्यथासिद्धः । जीवाभेदसाधकस्त्वनन्यथासिद्धः । तात्विकप्रतियोगिकाभेदाभावस्यैवाल्पत्वप्रयोजकत्वादिति भावः । तात्विकप्रतियोगिकाभेदाभावस्याल्पत्वे प्रयोजकत्वे देशादेरतात्विकत्वेनातात्विकदेशाद्यभेदाभावस्य गगनादौ सत्त्वेन तस्याप्यल्पत्वापत्त्या तात्विकप्रतियोगिकाभेदाभावस्याल्पत्वप्रयोजकत्वासम्भवेन स्वतुल्यसद्रूपस्यापरिच्छेदस्यैव महत्त्वे तदभावस्यैवाल्पत्वे प्रयोजकत्वेन वक्तव्यतया तत्र च स्वतुल्यसद्रूपप्रदेशाद्यपरिच्छेदस्य गगनादाविव घटादावभावेन तस्याल्पत्ववत् ब्रह्मणि स्वतुल्यसद्रूपस्य घटाद्यपरिच्छेदस्याभावेल्पत्वापत्त्या घटाद्यभेदोऽवश्यमङ्गीकार्य एवेत्याह ॥ देशकालयोरिति ॥ ननु भवत्पक्षे घटाद्यपरिच्छेदाभावेपि ब्रह्मणोल्पत्वाभावाद्व्याप्त्यभावः अन्यथानेनैव न्यायेन घटाद्यभेदापात इति शिष्यशङ्कानिरासायोक्तमभेदस्यापरिच्छेदरूपत्व इति । ब्रह्मण्यपि घटाद्यारोपस्य सत्वात्तात्विकस्येत्युक्तम् । स्वमतेन परं प्रति व्याप्त्यभावशङ्कापरिहारायोक्तं स्वतुल्यसद्रूपस्येति । उभयरीत्या गगनादाविवेत्युत्तरार्थं अत्र दृष्टान्तत्वेनोक्तम् । घटाद्यभेदाभावे प्रसक्तस्याल्पत्वस्य परिहारो द्वेधा । अभेदस्यापरिच्छेदत्वे घटाद्यभेदाङ्गीकारेण अभेदस्यापरिच्छेदत्वत्यागेन वेति। घटादिभेदाङ्गीकार इव जीवभेदेप्यल्पत्वाप्रसक्तेर्नोक्तजीवाभेदसिद्धिरिति विपर्यये पर्यवसानं द्रष्टव्यम् । तथाच स्वतुल्यसद्रूपस्य घटाद्यपरिच्छेदस्याभावेन तद्रूपविकलत्वेस्याल्पत्वं स्यादेवेति भावः ।

(पाण्डुरङ्गि)

ननु स्वतुल्यसद्रूपस्याऽपरिच्छेदस्याभावोनाल्पत्व हेतुः । येन घटादेः स्वतुल्यसद्रूपस्य देशाद्यपरिच्छेदस्याभावेनाल्पत्ववत् ब्रह्मणोपि स्वतुल्यसद्रूपस्य घटाद्यपरिच्छेदस्याभावेनाल्पत्वं स्यात् । न चैवम् । किं तु स्वतुल्यसद्रूपप्रतियोगिकपरिच्छेदाभावस्यैव तत्र प्रयोजकत्वम् । तथाच घटादौ स्वतुल्यसद्रूपदेशादिप्रतियोगिकपरिच्छेदस्य सत्त्वेन घटादेरल्पत्वेपि घटादेर्ब्रह्मतुल्यसद्रूपत्वाभावेन तत्कृतपरिच्छेदसत्त्वेपि ब्रह्मणो नाल्पत्वम् । जीवस्य तु ब्रह्मतुल्यसद्रूपत्वात्तत्कृतपरिच्छेदेऽल्पत्वं स्यादिति जीवाभेदाभावेऽल्पत्वप्राप्तावपि घटाद्य-परिच्छेदाभावेपि नाल्पत्वमिति भावेनाह ॥ न चेति ॥ तथाच घटादेरल्पत्वे स्वतुल्य-सद्रूपदेशाद्यपरिच्छेदाभावस्य प्रयोजकत्वात् स्वतुल्यसद्रूपस्य घटाद्यपरिच्छेदस्याभावेपि न ब्रह्मणोल्पत्वापत्तिरिति भावः । घटादेर्ब्रह्मतुल्यसद्रूपत्वाभावेन तत्कृतपरिच्छेदेपि तस्य स्वतुल्यसद्रूपत्वाभावमात्रेणाल्पत्वानापादकत्वे ब्रह्मणि देशादिपरिच्छेदेपि तस्य ब्रह्मतुल्य-सद्रूपत्वाभावमात्रेणैवाल्पत्वाभावसम्भवेन ब्रह्मणोपि देशादि- परिच्छेदोपि स्यादित्याह ॥ तत्वत इति ॥ स्वतुल्यसद्रूपत्वरूपविशेषाभावात् विशिष्टाभाव इत्यर्थः । किं च गगनादेः स्वतुल्यसद्रूपघटादिपरिच्छेदस्यैव सत्त्वेनाल्पत्वं स्यादित्याह ॥ स्वतुल्यसद्रूपेति ॥ अनेन परिच्छेदकस्य घटादेर्वस्तुनः स्वतुल्यसद्रूपत्वेपि तदपरिच्छेदाभावेपि गगनादेरनल्पत्ववत् ब्रह्मणोपि जीवस्य स्वतुल्यसद्रूपत्वेपि तदपरिच्छेदाभावेप्यल्पत्वाप्रसङ्गात् जीवाभेदासिद्धिः । अन्यथा गगनादेर्घटाद्यभेदोप्येवं स्यादित्युक्तं भवति । अल्पत्व- बुद्ध्यभावादिति ॥ अन्यथाल्पत्वं स्यादित्यर्थः । तदेवोपपादयति ॥ अन्यथेति ॥ देशाद्यपरिच्छेदेपि स्वतुल्य-सद्रूपवस्त्वपरिच्छेदाभावमात्रेण ब्रह्मणोल्पत्व इत्यर्थः । तस्मात्स्वतुल्यसद्रूपप्रतियोगिका-परिच्छेदाभाव-स्याल्पत्वप्रयोजकत्वासम्भवेन स्वतुल्यसद्रूपस्यापरिच्छेदस्याभाव एवाल्पत्व-प्रयोजक इति जीवाभेदवद्घटाभेदसयाप्यभावेऽल्पत्वं स्यादिति भावः ।

तात्पर्यचन्द्रिका

ननु घटादौ स्वतुल्यसद्रूपदेशादिपरिच्छेदोल्पत्वं ब्रह्मणि घटादिप्रतियोगिको भेदरूपो वस्तुपरिच्छेदो न स्वतुल्यसद्रूप इति नाल्पत्वमिति चेन्मैवम् । तथात्वे घटादिवज्जीवादपि स्वतुल्यसद्रूपभेदाभावमात्रेण महत्त्वसिद्ध्या जीवाभेदासिद्धेः । गगनादौ स्वतुल्यसद्रूपो देशाद्यपरिच्छेदो महत्त्वम् । न च ब्रह्मणि घटादिप्रतियोगिकोऽभेद रूपो परिच्छेदस्तथेति महत्त्वहानिप्रसङ्गाच्च । किञ्च

स्वतुल्यसद्रूपस्यापरिच्छेदस्याभावे तादृशपरिच्छेदः स्यादेव । तात्विकस्यातात्विकादपि स्वतुल्यसद्रूपभेदस्य नेदं रूप्यमिति दर्शनात् । तस्माद् ब्रह्मणो जगतो व्यावृत्तिमपरिच्छिन्नतां चाभिलषता भेदस्य परिच्छेदतैव त्याज्या । परिच्छिन्नाभेदेऽपरिच्छेदस्यैव सिद्धेः । किं च निरङ्कुशमहत्त्वार्थं ब्रह्मणः सर्वात्मकत्वे अल्पदेशादधिकदेशेऽल्पगुणादधिकगुणे च महत्त्वबुद्धिवदेकात्मकाद्गगनादितोऽनेकात्मकराश्यादौ महत्त्वबुद्धिस्स्यात् । अवयवानेकत्वेपि परिमाणोत्कर्षादिनैव महत्त्वम् । निबिडानेकावयवायः पिण्डादपि विरलाल्पावयवे तूलराश्यादौ महत्त्वबुद्धेः । किं चापरिच्छेदस्य ब्रह्मानन्यत्वे बृंहतिधात्वर्थस्य भावेपि प्रत्ययार्थाभावेनापरिच्छिन्नत्वासिद्धिः । अन्यत्वेपि तात्विकत्वे सुतरां । तद्रूपविकलत्वात् । अतात्विकत्वे तत्वतः परिच्छिन्नत्वापत्तिः । किं च वस्तुतोल्पे सत्येव तन्निरूपितमहत्त्वस्य वास्तवत्वमिति ब्रह्मशब्देनैव सद्वितीयत्वम् । देशाद्यपरिच्छेदेपि न देशादेर्वस्तुतोऽभावो हेतुः । घटादेरपि तत्प्रसङ्गात् । देशादेः सत्त्वेपि तत्परिच्छेदाभावमात्रेणापि तत्सिद्धेश्च । बौद्धाभिमतक्षणिकविज्ञानादेरपि वस्तुतः कालाद्यभावेनापरिच्छिन्नत्वप्रसङ्गाच्च । तस्मात् देशतः कालतश्चैव गुणतश्चापि पूर्णता । ब्रह्मता नतु भेदस्य राहित्यं ब्रह्मतेष्यते ॥ १ ॥ तदुक्तं ''देशतःकालतश्चैव गुणतश्च त्रिधातति''रिति । तदेतदभिप्रेत्योक्तं भाष्ये ''ब्रह्मशब्दश्च विष्णावेवे''ति । त्रिविधपूर्तिवाचकोहि विष्णुशब्दः ।

प्रकाशिका – इदानीं परिच्छेदस्य स्वतुल्यसद्रूपत्वमल्पत्व प्रयोजकमित्याशङ्कामुद्घाटयन्निरस्यति ॥ नन्विति ॥ न स्वतुल्यसद्रूप इति ॥ तात्विकस्य कस्यापि कर्मस्य ब्रह्मण्यभावादिति भावः ।स्वतुल्यसद्रूपभेदस्याल्पत्वे तादृशभेदाभावो महत्त्वमित्युक्तं स्यात् । तथाच जीवाभेदो न सिध्यतीत्याह ॥ तथात्व इति ॥ न च जीवात्तादृशभेदाभाव एवाभेद इति वाच्यम् । घटादेरपि तादृशभेदाभावेन घटाद्यभेदापातादिति भावः । वैपरीत्यमपि सुवचमित्याह ॥ गगनादाविति ॥ तथा स्वतुल्यसद्रूपः । ननु गगनादावपि तादृशदेशादिपरिच्छेदाभावेनैव महत्त्वं न तु तादृशापरिच्छेदेन येन ब्रह्मणि तादृशस्य घटाद्यपरिच्छेदस्याभावेन महत्त्वहानिःस्यादित्याशङ्क्यैवमपि ब्रह्मणि तादृशस्य घटादिपरिच्छेदस्याभावाभावेन महत्त्वहानिरवर्जनीयेति भावेनाह ॥ किञ्चेति ॥ यद्वा तादृशापरिच्छेदो

(प्रकाशिका)

महत्त्वमित्यापाद्य दूषितम् । इदानीं तादृशापरिच्छेदोऽल्पत्वमिति परोक्तरीत्यैव महत्त्वहानिरिति भावेन तादृशपरिच्छेदं ब्रह्मण्युपपादयति ॥ किञ्चेति ॥ अपरिच्छेदस्य घटाद्यपरिच्छेदस्य ।अभावे ब्रह्मणीति शेषः ॥ तादृशेति ॥ ब्रह्मतुल्यसद्रूपेत्यर्थः । तथाचाल्पत्वं स्यादिति शेषः । विरुद्धयोरेकस्यातात्विकेऽन्यस्य तात्विवकत्वनियमादिति भावः ।

ननु प्रतियोगिनो घटादेरतात्विकत्वात्तत्परिच्छेदापरिच्छेद योर्द्वयोरप्यतात्विकत्वमेव । विरुद्धयोरिति न्यायस्तु तात्विकप्रतियोगिस्थल एवेत्याशङ्क्य सर्वत्र दर्शनान्न सङ्कोचो न्यायस्येति भावेनाह ॥ तात्विकस्येति ॥ अप्रातिभासिकस्य । सप्रकारकज्ञानाबाध्यस्येति वा। शुक्तिशकलस्येति शेषः । वस्तुतो जीवाद्भेदेन ब्रह्मण्यपरिच्छिन्नत्वमित्येतदुपसंहारव्याजेनाह ॥ तस्मादिति ॥ यस्माद्भेदस्य परिच्छेदत्वे घटादितो भेदेन ब्रह्मणः परिच्छिन्नत्वं प्रसज्यते यस्माच्च परिच्छेदकस्य घटादेः स्वतुल्यसद्रूपत्वाभावेन वा परिच्छेदस्य स्वतुल्यसद्रूपत्वाभावेन वा तत्परिहर्तुं शक्यते तस्मादित्यर्थः । एवं बाधकोपदर्शनेन वस्तुभेदो न महत्त्वभञ्जको येन तत्सिद्धये जीवाभेदोऽभ्युपेयः स्यादित्युक्तं । इदानीं सत्यप्यनेकात्मकत्वे महत्त्वबुद्धेरदृष्टेरसत्यपि तस्मिन् तस्यादर्शनाद्व्यभिचारेण न वस्त्वभेदो महत्त्वमित्याह ॥ किञ्चेति ॥ अल्पदेशादधिकदेश इति बहुव्रीहिः । अल्पदेशावस्थितात् त्र्यणुकादितोधिकदेशावच्छिन्ने घटादावित्यर्थः । गुणो ज्ञानादिलक्षणः । पुंसीति शेषः ॥ अनेकेति ॥ अनेकभाषाभिन्नतत्समुदायरूपराश्यादावित्यर्थः । नन्ववयवप्राचुर्यवतोर्घटकपालयोर्महत्त्वाल्पत्वे दृष्टे इत्यतस्तत्राप्यन्यदेव प्रयोजकमित्याह ॥ अवयवेति ॥ अनेकाल्पावयवत्वे हेतू निबिडेति विरलेति । अस्तुवा देशकालापरिच्छेदवद्ब्रस्त्वपरिच्छेदो महत्त्वं तथापि सोयमपरिच्छेदः किं ब्रह्मणोऽभिन्न उतभिन्नः भिन्नत्वेपि तात्विकोऽतात्विको वेति विकल्पान्हृदि कृत्वा क्रमेण प्रत्याह ॥ किं चेति ॥ वस्त्वपरिच्छेदस्येत्यर्थः ॥ प्रत्ययार्थाभावेनेति ॥ बृहिवृद्धावित्यस्मात् ''बृंहेरन्नलोपश्चे''ति मनिन्प्रत्ययेन लोपेऽमागमे यणि च ब्रह्मेति वृद्धिशब्दितापरिच्छेदवदुच्यते । वृद्धिशब्दितापरिच्छेदरूपत्वेपि वृद्धिमत्त्वरूपमपरिच्छिन्नत्वं न स्यादित्यर्थः । सुतरां असंशयम् । अपरिच्छिन्नत्वासिद्धिरित्यन्वयः । तत्र हेतुस्तद्रूपेति । स्वतुल्यसद्रूपापरिच्छेदाख्यवस्त्वभेदशून्यत्वादित्यर्थः । ब्रह्मशब्दादभेदसिद्धिरित्युपन्यासो विरुद्ध इत्याह ॥ किं चेति ॥ सद्वितीयत्वे कथमपरिच्छिन्नत्वमित्यतस्तदुपपादयति ॥ देशादीति ॥ येन द्वितीयाभावे सत्येवापरिच्छिन्नत्वं ब्रह्मणः स्यादिति भावः । यद्वा घटादेरपि ब्रह्मण इव देशाद्यपरिच्छिन्नत्वप्रसङ्गादित्यर्थः । तदपरिच्छेदे तदभावो न हेतुः घटादौ व्यभिचारादित्युक्तम् । अप्रयोजकश्चेत्याह ॥ देशादेरिति ॥ तसिद्धेः अपरिच्छिन्नत्वसिद्धेः ।

अतिप्रसङ्गश्चेत्याह ॥ बौद्धेति ॥ विज्ञानवादिमते विज्ञानव्यतिरेकेण कालादिजगतोऽभावेन कालाद्यपरिच्छेदः स्यात् । न चेष्टापत्तिः । क्षणिकत्वोपगमादित्यर्थः । अतो द्वितीयसत्त्वेपि ब्रह्मणो परिच्छिन्नत्वं युक्तमित्यर्थः । यद्वा देशाद्यपरिच्छेदं ब्रह्मपदार्थं ब्रुवाणैर्ब्रह्मपदेनैव देशकालरूपद्वितीयसत्त्वमुपेतमित्याह ॥ देशादीत्यादिना ॥ वस्तुतस्तु देशाद्यपरिच्छेदे देशाद्यभावो न हेतुः किन्तु तस्मिन्सत्येव तदपरिच्छेदः तथा परिच्छिन्ने जीवादौ सत्येव तदपेक्षयाऽपरिच्छिन्नत्वं युज्यत इति भावेन दृष्टान्तमुपपादयति ॥ देशादीत्यादिना ॥ व्याख्यानं प्राग्वत् । तस्मादित्यस्य श्लोकेनान्वयः । चापिशब्दाः प्रत्येकमभिसम्बध्यन्ते । त्रिभिःपूर्णतेत्युक्तैवकारव्यावर्त्यमाह ॥ नत्विति ॥ तदुक्तमिति ॥ गीतातात्पर्ये द्वितीये । कथमस्मात्तल्लाभ इत्यत आह ॥ त्रिविधेति ॥ विष्लृव्याप्तावित्यस्य क्रुप्रत्यये रूपं विष्णुरिति । व्याप्तिश्च त्रेधा भवति । देशत इति वचनादिति भावः । यद्यप्ययं शिवादिव्यावृत्त्यर्थत्वेनोपात्तस्तद्रूपविशेष्यपरः । तथैव भाष्ये प्रतिपादनात् । तथापि विशेष्यं वदन्नुक्तत्रिविधपूर्त्यभिधानपूर्वमेव तद्वदति । सर्वशब्दानां योगपूर्वमेव भगवति वृत्तेरित्येवमुक्तम् । एतेनावश्यवक्तव्यं जीवभेदकं विषयसिद्ध्यङ्गं गुणपूर्णत्वं ब्रह्मपदार्थत्वेनानुक्त्वा विष्ण्वर्थत्वमनुपयुक्तमुच्यत इति भाष्येऽनौचित्यचोद्यं निरस्तम् । विष्ण्वर्थकत्वेन तल्लाभात् । न्यायविवरणे ब्रह्मशब्देन गुणपूर्णत्वोक्तेरुक्तत्वाच्च । विष्ण्वर्थकत्वं तु शिष्यहितायवा गुणपूर्तियोग्यत्वाय वेति नानुपयुक्तम् । एतेन ब्रह्मपदस्याभेदार्थकत्वान्नाभेदपूर्वपक्षोऽनेन निरस्यत इति कस्यचित्प्रलापोऽपोढः । उक्तरीत्याऽभेदार्थकत्वाभावात् । यदपि ब्रह्मशब्दस्योक्तत्रिविधपरिच्छेदराहित्यार्थकत्वमुपेत्य शिवपरत्वप्रलपनं तदपि भाष्याद्युदाहृतप्रमाणजालैर्निरस्तं ध्येयम् । ''पत्युरसामञ्जस्या''दिति सूत्रकृता कण्ठतः शिवस्यापूर्णत्वदोषवत्त्वयोरुक्तत्वाच्च । तस्य चानुव्याख्याने बहुप्रमाणोदाहरणेन प्रपञ्चनाच्च । विस्तरस्तु गुरुपादकृतन्यायमौक्तिकमालातोऽनुसन्धेयः ।

पाण्डुरङ्गि – ननु तथापि घटाद्यपरिच्छेदेपि नाल्पत्वं स्वतुल्यसद्रूपस्य परिच्छेदस्यैवाल्पत्वप्रयोजकत्वात् । घटादौ स्वतुल्यसद्रूपस्य देशादिपरिच्छेदस्यैवाल्पत्वप्रयोजकत्वात् ब्रह्मणश्च घटादिपरिच्छेदेपि तस्य स्वतुल्यसद्रूपत्वाभावेन तस्मिन्सत्यपि नाल्पत्वमिति शङ्कते ॥ नन्विति ॥ यद्यप्यत्रापि तत्वतः सद्रूपे ब्रह्मणि व्यवहारतः सद्रूपदेशादिना परिच्छेदेपि महत्त्वप्रसङ्गात् स्वतुल्यसद्रूपघटाद्यनात्मकेपि गगनादावल्पत्वबुद्ध्यभावाच्चेति पूर्वपक्षिणोक्तदूषणमवशिष्टमेव ।तथापि तन्निराकरणस्यैव मुख्यप्रयोजनत्वाभावात्परमप्रमेयमेव दूषयति ॥

(पाण्डुरङ्गि)

मैवमिति ॥ घटादौ स्वतुल्यसद्रूपस्य परिच्छेदस्यैवाल्पत्वेन दृष्टत्वात् ब्रह्मणि तदभावेनाल्पत्वाभावे गगनादौ स्वतुल्यसद्रूपापरिच्छेदस्यैव महत्वरूपत्वेन दृष्टत्वात् ब्रह्मणस्तदभावान्महत्वं न स्यादेवेत्याह ॥ गगनादाविति ॥ तथाच स्वतुल्यसद्रूपस्य परिच्छेदस्याल्पत्वप्रयोजकत्वे घटादिवज्जीवादपि स्वतुल्यसद्रूपपरिच्छेदाभावमात्रेण महत्वसिद्ध्या जीवाभेदासिद्ध्यापत्त्या जीवाभेदमभिलषतः स्वतुल्यसद्रूपस्य जीवापरिच्छेदस्याभावेऽल्पत्वापत्त्या जीवाभेदवत्स्वतुल्यसद्रूपस्य घटाद्यपरिच्छेदस्याभावेऽल्पत्वप्रसङ्गेन घटाभेदोप्यङ्गीकार्य एवेति युक्तमुक्तम् । ननु स्वतुल्यसद्रूपस्यापरिच्छेदस्याभावेऽल्पत्वापादानं निर्निबन्धनमित्याशङ्क्य परस्परविरुद्धयोरन्यतरनिषेधस्यान्यतरविधिना व्याप्तिमभिप्रेत्य विरुद्धत्वमेव व्यनक्ति ॥ किं चेति । अल्पत्वं च परिच्छेदस्तद्व्याप्तं वेत्यभिप्रायः । प्रतियोगिनोऽतात्विकत्वादेव न स्वतुल्यसद्रूपवस्तुप्रतियोगिकः परिच्छेद इत्यत आह ॥ तात्विकस्येति ॥ तेनैव घटाद्यभेदप्रसङ्गादित्यस्य विपर्यये पर्यवसानमाह ॥ तस्मादिति ॥ जीवाभेदसाधकपरोक्ततर्कस्यान्यथासिद्धिमाह ॥परिच्छिन्नादिति ॥

एवं तर्हि निरङ्कुशमहत्त्वसिद्ध्ये गुणोत्कर्षोपि नाङ्गीकार्योऽविशेषादित्यत आह ॥ किञ्चेति ॥ ननु गुणोत्कर्षादिवत्स्वल्पावयवारब्धघटाद्यपेक्षयाऽनेकावयवारब्धेऽपि घटे महत्त्वबुद्धेर्दृष्टत्वादनेकात्मकत्वस्यापि तत्र निमित्तत्वमित्यत आह ॥ अवयवानेकत्वेऽपीति ॥ तथाचात्राप्यधिकदेशत्वमेव तन्निमित्तमिति भावः । अवयवानेकत्वस्यैव तन्निमित्तत्वे बाधकमाह ॥ निबिडेति ॥ ननु तन्निरूपितमहत्त्वस्य वास्तवत्वे न निरूपकस्य महत्त्वमावश्यकम् । तदभावस्यैवात्र निमित्तत्वादित्यत आह ॥ देशाद्यपरिच्छेदेपीति ॥ घटादेरपीति ॥ तत्प्रसङ्गात् देशाद्यपरिच्छेदप्रसङ्गात् । देशादेरवास्तवत्वातिरिक्तस्य तत्प्रयोजकस्यानङ्गीकारादिति भावः । नन्वेवं वस्तुतस्तदभावस्या- प्रयोजकत्वे ब्रह्मणि देशापरिच्छेदोपि न स्यात् । देशादेः सत्त्वादित्यत आह ॥ देशादेरिति ॥ घटादेरपि तत्प्रसङ्गादित्युक्तं विशदयति ॥ बौद्धाभिमतेति ॥

तात्पर्यचन्द्रिका

अत्र परैः ब्रह्मणो जिज्ञासेति षष्ठीसमासः । न चतुर्थीसमासः । षष्ठी च कर्मणि । न तु शेषे । कर्मणि षष्ठ्याहि प्रतीत्यनुबन्धितया जिज्ञासापेक्षितकर्मणः

साक्षाल्लाभः । शेषषष्ठ्यां तु सामान्यद्वारेणेति कुसृष्टिः । शेषषष्ठीपक्षे तद्विजिज्ञास-स्वेति साक्षाज्जिज्ञासाकर्मत्वप्रतिपादकश्रुत्यननुगमश्चेति शेषषष्ठी निराकृता । तदयुक्तम् । परपक्षे विचारजन्यज्ञानाकर्मणो ब्रह्मणो विचारकर्मत्वायोगात् । अपरोक्ष-वृत्तिव्याप्यस्य फलव्याप्यत्वनियमाच्च । स्वपक्षे कर्मणि षष्ठ्यामपि प्रमाणसाधन-प्रयोजनादिपरिकरयुक्तस्यैव ब्रह्मणो जिज्ञासाकर्मत्वान्न प्रमाणादिविचारस्याप्रतिज्ञात-ताप्रसङ्गः । कृद्योगलक्षणाच्च षष्ठी समस्यत इति प्रतिप्रसवात्प्रतिपदविधाना षष्ठी न समस्यत इत्यस्य निषेधस्य नायं विषय इति ।

प्रकाशिका –क्रमप्राप्तं ब्रह्मजिज्ञासेत्यत्र समाशोधनं कर्तुं पराभिमतमनूद्य निरस्यति ॥ अत्र परैर्मायावादिभिरिति ॥निराकृतेत्यन्वयः । यद्यपि सिद्धांतेऽपि कर्मणि षष्ठ्या समासः । नात्र किञ्चित्परोक्तं विरोधि निरसनीयमस्ति तथापि तादृशसमासः सिद्धान्त एव युक्तो न तु परमत इति तद्भाष्यकारानौचित्यप्रदर्शनार्थं स्वभावोपन्यासः ॥ न चतुर्थीति ॥ वृत्तिकारैर्ब्रह्मणे जिज्ञासेति चतुर्थी समास उक्तः । स न सम्भवति । ''तादर्थ्यसमासे प्रकृतिविकृतिग्रहणं कर्तव्य''मिति कात्यायनवचनेन यूपदार्वादिष्वेव प्रकृतिविकारभूतेषु चतुर्थी समासनियमादिति भावः । षष्ठी च कर्मणीत्युक्तं व्यनक्ति ॥ कर्मणि षष्ठ्याहीति ॥ प्रतीतौ विशेषणत्वेन सम्बन्धितयेत्यर्थः । एतदुक्तं भवति । जिज्ञासेत्यत्रेच्छाया अनुबन्धिज्ञानम् । ज्ञानस्य ज्ञेयं ब्रह्म । न खलु ज्ञानं ज्ञेयं विना निरूप्यते । न च जिज्ञासा ज्ञानं विनेति प्रतीत्यनुबन्धित्वात् प्रथमं जिज्ञासाकर्मैवापेक्षते न तु सम्बन्धिमात्रमिति ॥ सामान्येति ॥ सम्बन्धसामान्यस्य विशेषनिष्ठत्वात् प्रसक्तनिषेधेन जिज्ञासाकर्मत्वलाभ इति कुसृष्टिरित्यर्थः । यद्यपि परपक्षे षष्ठ्याः कर्मत्वार्थकत्वस्यैव निरस्यत्वेन तदेवानुवदनीयम् । न तु शेषे षष्ठीनिरास प्रकारोपि । तस्यादूषणात् । तथापि तस्य सिद्धान्तेपि प्रतिपिपादयिषितत्वेन तदनुवाद इत्यदोषः ॥ विचारेति ॥ विचारस्य स्वविषयविषयकज्ञानजनकत्वेन स्वजन्य-ज्ञानस्य सकलकारकशक्तिविधुरब्रह्मकर्मकत्वायोगेन तस्यापि तत्कर्मकत्वायोगात् ।ननु कारकशक्तिविधुरस्यापि शास्त्रजन्यापरोक्षवृत्तिव्याप्यत्वेन कर्मत्वव्यपदेश इत्यत आह ॥ अपरोक्षेति ॥ फलेति ॥ वृत्त्युपहितचैतन्येत्यर्थः । फलव्याप्यत्वं तु कर्तृकर्मविरोधान्ना-ङ्गीक्रियत इति भावः । गान्धर्वशास्त्रविचारात् षड्जादिसाक्षात्कारदृष्टेर्ब्रह्मविचारात्तद-परोक्षवृत्तिर्जायत इत्यपरोक्षवृत्तिव्याप्यस्येत्युक्तम् ।

(प्रकाशिका)

ननु सिद्धान्तेपि कः समासः । न तावत्कर्मधारयः । ब्रह्मजिज्ञासयोरैक्यायोगेन वैयधिकरण्येन तदयोगात् । नापि द्वितीयातत्पुरुषः । श्रितादिभिरेव तस्य विधानात् । कृद्योगे द्वितीयायोगाच्च । नापि तृतीयातत्पुरुषः । ब्रह्मणो विषयत्वाप्राप्तेः । अत एव न पञ्चमीसमासोपि । नापि वृत्तिकाररीत्या चतुर्थीसमासः । प्रकृतिविकारभाव एव तादर्थ्यसमासस्य नियमितत्वात् । नापि सप्तमीसमासः । आधारसामान्यशक्तायास्तस्या विषयत्वरूपविशेषार्थकत्वे प्रतिपत्तिगौरवात् । सर्वत्र ''सप्तमी''त्यादियोगाविभागाश्रयणापाताच्च । षष्ठीसमासपक्षेपि न कर्मणि षष्ठ्या समास आश्रयितुं युक्तः । तथात्वे हि ब्रह्मस्वरूपमेव जिज्ञासायां कर्मतयाऽन्वेतीति ब्रह्मजिज्ञासैव प्रतिज्ञाता नतु प्रमाणादिजिज्ञासेत्यग्रे तेषां विचारो न युक्तः स्यात् । शेषषष्ठ्या तदाश्रयणे तु सम्बन्धमात्रं शेष इति साक्षात्पारम्पर्येण च ब्रह्मतत्प्रमाणादिजिज्ञासायाः ब्रह्मसम्बन्धित्वात्सर्वजिज्ञासा प्रतिज्ञाता भवति । तथाच ''कर्मणि षष्ठीपरिग्रहाय जिज्ञास्योयं विधीयत इत्युक्त''मिति सुधावाक्यानुपपत्तिरित्याशङ्क्य कर्मणि षष्ठीसमासं समर्थयते ॥ स्वपक्ष इति ॥ ब्रह्मजिज्ञासायां प्रतिज्ञातायां लक्षणप्रमाणादिजिज्ञासामन्तरेण तस्या अभावात्प्रधानब्रह्मजिज्ञासयैवार्थात्प्रमाणादिजिज्ञासापि लभ्यत इति भावः । अत एव परिकरयुक्तस्येति परिकरपदप्रयोगः । उक्तं च सुधायां ''तस्या विनाप्यभिधानेन लाभा''दित्यादि । ननु यदि षष्ठी कर्मणि न शेषे तर्हि ''कर्मणिचे''ति कर्मणि षष्ठ्यास्समासप्रतिषेधात्कथं समास इति चेन्न । ''उभयप्राप्तौ कर्मणी''त्यनेन विहितायास्तेन निषेधात् । इह च कर्मण एवोपादानं न तु कर्तुरित्युभयप्राप्त्यभावात् । यद्यथशब्दादधिकारिलाभात्कथंचित्कर्तृप्राप्तिं मन्यसे तर्हि ''अकाकारयोः प्रयोगेनेति वक्तव्य''मित्यकारप्रत्ययांतप्रयोगे ''उभयप्राप्ता''विति षष्ठ्यादिनिषेधादिह तेन न षष्ठीत्यवेहि । अत एव तत्र मञ्जर्यां धर्मजिज्ञासा देवदत्तस्येत्युदाहृतम् । जिज्ञासाशब्दस्याप्रत्ययादिति विहिताकारप्रत्ययान्तस्य कृदन्ततया ''कर्तृकर्मणोः कृतीत्ये''व षष्ठी । नन्वेवमपि ''प्रतिपदविधानाषष्ठी न समस्यत'' इति निषेधात्सर्पिषो ज्ञानमित्यादाविवेहापि षष्ठी समासो नस्यादित्यत आह ॥ कृद्योगेति ॥ ''कर्तृकर्मणोः कृती''त्यनेन विहितेत्यर्थः। प्रतिप्रसवः अपवादापवादः ॥ नायं विषय इति ॥ ''ज्ञोऽविदर्थस्य करण'' इति विहिता षष्ठी सर्पिषो ज्ञानमित्यत्रेति भावः ।

पाण्डुरङ्गि –परोक्ता कर्मणि षष्ठ्यपि तन्मते न युक्तेत्यनुवादपूर्वकमाह ॥ अत्र परैरिति ॥ प्रतीत्यनुबन्धितयेति ॥ प्रतिपत्तौ विशेषणत्वेनानुबध्यत इत्यनुबन्धः । स्वरूपेण

निरूपितायां जिज्ञासायां पश्चात्सम्बन्धिन्यपेक्षा । ब्रह्म ज्ञानद्वारा जिज्ञासास्वरूप-निरूपकमिति प्रथमोदिताकाङ्क्षावशेन ब्रह्म जिज्ञासया कर्मत्वेन सम्बध्यते । न तु सम्बन्धिमात्रतयेत्यर्थः । ननु विचारजन्यज्ञानकर्मत्वस्य ब्रह्मण्यभ्युपगमात्कर्मणि षष्ठ्युपपत्तिः । न चैवं दृश्यत्वापत्त्या मिथ्यात्वपत्तिरिति वाच्यम् । फलव्याप्यत्वरूपदृश्यत्वस्यैव तद्व्याप्यत्वाङ्गीकारेण ब्रह्मणस्तदापादनानुपपत्तेरित्यत आह ॥ अपरोक्षेति ॥ वृत्तिव्याप्यत्वमात्रस्यातीतादिसाधारण्ये तस्यापि फलव्याप्यत्वे विषयापरोक्षं स्यादित्यत उक्तमपरोक्षेति ॥ स्वपक्षे कर्मणि षष्ठीमुपपादयति ॥ स्वपक्ष इति ॥ कृद्योगलक्षणाचेति ॥ जिज्ञासापदस्य चाकारप्रत्ययान्तत्वात्कृद्योगः । यस्तु ''कर्मणिचे''ति कर्मणि षष्ठ्याः समासप्रतिषेधः स ''उभयप्राप्तौ कर्मणी''ति या कर्तृकर्मणोरपि सामर्थ्यादुभयप्राप्तौ कर्मण्येवेति नियमिता षष्ठी तद्विषयः । यथा आश्चर्यो गवां दोहोऽगोपेनेति । एवं ह्याश्चर्यं व्यज्यते । प्राप्यभावात् । कर्तृकर्मणोः कृत्येव षष्ठी तेन ब्रह्मजिज्ञासेत्युपपन्नः समासः ।

तात्पर्यचन्द्रिका

युक्त्यनुसन्धानात्मको मननापरनामको विचारो जिज्ञासा । सुधायां ''जिज्ञासानाम युक्त्यनुसन्धानात्मकविचारापरपर्यायं मनन''मित्युक्तत्वात् । न्यायनिबन्धनात्मकशास्त्रारम्भणीयत्वस्य न्यायानुसन्धानकर्तव्यतोक्तिमात्रेण सिद्धेश्च । नह्यौपदेशिकवाक्यार्थग्रहणलक्षणश्रवणस्य कर्तव्यता उक्तरूपशास्त्रस्यारम्भणीयत्वे हेतुः । ''श्रवणजं ज्ञानं पूर्ववृत्त''मिति सुधायां मीमांसातस्तस्य पूर्ववृत्तत्वेनोक्ततया शास्त्रस्यारम्भणीयत्वं विनापि तत्कर्तव्यतासिद्धेः । ''श्रवणादिरूपा जिज्ञासा कार्ये''ति टीकायां त्वतद्गुणसंविज्ञानबहुव्रीहिणा विचार एवोक्तः । अत एव ''विचारेपि तत्प्रयोगा''दित्युत्तरग्रन्थः । यद्वा यथा श्रवणनिदिध्यासने विहितत्वान्मुमुक्षुणा कार्ये तथा मननमपीति दृष्टान्ततया तयोरुपादानम् । न तु शास्त्रारम्भहेतुतया । अथवा निदिध्यासनस्याकर्तव्यत्वे तदङ्गमननस्यापि तथात्वात्परंपरया निदिध्यासनकर्तव्यता आरम्भणीयत्वे हेतुः । तथा प्रतिवाक्यार्थमयं वाक्यार्थो युक्त अन्यो वेति संशयादिनिरासकविचारशास्त्रव्युत्पाद्यन्यायावताराङ्गसन्देहकारणस्य यत्नसाध्यस्य प्रतिवाक्यमयमस्य वाक्यस्यार्थ इत्येवंरूपस्य श्रवणजज्ञानस्याभावे

(तात्पर्यचन्द्रिका)

शास्त्रारम्भासिद्धेस्तत्कर्तव्यताप्यारम्भणीयत्वे हेतुरेवेत्यारम्भसिध्यर्थमेव त्रितयकर्तव्यतोक्ता ।

प्रकाशिका – एवं समासार्थं निरूप्य क्रमप्राप्तजिज्ञासापदार्थं निरूपयति ॥ युक्त्यनुसन्धानेति ॥ भगवति शक्तितात्पर्यावधारणरूपसमन्वयादावुपक्रमादिरूपयुक्त्यनुसन्धानात्मकेत्यर्थः । टीकायामेवमनुक्तेराह ॥ सुधायामिति ॥ अत्र जिज्ञासाशब्देन तस्यैव ग्रहणे युक्तिं चाह ॥ न्यायेति ॥ मात्रेणेति ॥ न तु श्रवणस्यापि कर्तव्यतोक्तेत्यर्थः । येन श्रवणमपि जिज्ञासापदेनात्र ग्राह्यं स्यादिति भावः । तदेवाह ॥ न हीति ॥ विचारः श्रवणमिति परमतव्यावृत्त्यर्थमौपदेशिकेति । उपनिषद्भाष्यादिरूपोपदेश जातवाक्यार्थग्रहणेत्यर्थः ॥ उक्तेति ॥ न्यायनिबन्धनात्मकरूपेत्यर्थः । न्यायानुसन्धानस्य तन्निबन्धनात्मकशास्त्रं विना योगेन तत्कर्तव्यत्वमेव तदारम्भणीयत्वं प्रयोजयति न तु वाक्यार्थग्रहणं तस्य व्याख्यानादिरूपोपदेशापेक्षत्वादिति भावः । यद्यपि वक्ष्यमाणदिशा श्रवणकर्तव्यत्वमपि शास्त्रारम्भप्रयोजकं तथापि परम्परया तथात्वेपि न साक्षादिति भावः । श्रवणकर्तव्यत्वं न शास्त्रारम्भप्रयोजकमित्यत्र सुधासंमतिपूर्वकं हेतुमाह ॥ श्रवणजमिति ॥ टीकाविरोध इत्यतस्तद्वाक्यस्य चतुर्धा समाधिमाह ॥ श्रवणादीति ॥ तस्य गुणस्यान्यपदार्थविचारं प्रत्युपसर्जनीभूतस्य श्रवणस्यान्यपदार्थे संविज्ञानं यस्मिन् बहुव्रीहौ नास्ति सोऽयमतद्गुणसंविज्ञानबहुव्रीहिः । तथाच श्रवणस्य त्यागेनान्यपदार्थो विचार एव जिज्ञासापदार्थ उक्त इत्यर्थः । अस्मिन्पक्षे श्रवणपूर्वकत्वं मननस्य द्योतयितुमेवं निर्देश इति भावः । उपात्तस्याविवक्षायां ज्ञापकमाह ॥ अत एवेति ॥ तत्प्रयोगात् सन्नंतप्रयोगादित्यर्थः ॥

यद्वेति ॥ अस्मिन्पक्षे टीकायां श्रवणादीति श्रवणादेरिति च द्विःश्रवणशब्दप्रयोगस्वारस्यमादिपदोपात्तमननंनिदिध्यासनयोः स्वारस्यं विचारेपि तत्प्रयोगादिति टीकाच विचारार्थकत्वप्रदर्शनमुखेन छत्रिन्यायेन श्रवणनिदिध्यासनयोर्लक्षकतया त्रितयार्थत्वाभिप्रायेणोपपन्नेत्याशयः । जिज्ञासाशब्दस्य त्रितयार्थत्वेन त्रिषु कर्तव्यत्वान्वयेपि विचारकार्यत्वमेव शास्त्रारम्भहेतुर्नत्वितरकार्यत्वमपीत्यर्थः । ननु विषयाद्यभावेन मननाकर्तव्यत्वपूर्वपक्षोक्तौ तुल्यन्यायतया श्रवणादेरपि तथात्वप्राप्त्या कथं दृष्टान्तत्वमित्यत आह ॥ अथवेति ॥ तदङ्गेत्यकर्तव्यत्वे हेतुः । तदङ्गत्वं च न्यायामृते तृतीयपरिच्छेदे साधितमिति भावः । परम्परया मननकर्तव्यताद्वारा । आरम्भणीयत्वे शास्त्रस्येति शेषः । श्रवणकर्तव्यत्वस्याप्यारम्भहेतुत्वमाह ॥ तथेति ॥ यत्नेति ॥ न ह्यापातत एवैवंरूपं ज्ञानं भवतीति भावः ॥ हेतुरिति ॥ परम्परयेत्यन्वयः ।

पाण्डुरङ्गि – ननु सुधायां विचारापरपर्यायमननस्यैव जिज्ञासाशब्दार्थत्वेनोक्तत्वात् तद्विरोध इत्यतः सुधाटीकयोर्विरोधं परिहरति ॥ युक्त्यनुसन्धानात्मक इति ॥ ननु न श्रवणादिरूपाजिज्ञासेति टीकायामतद्गुणसंविज्ञानबहुव्रीहिणा विचारमात्रस्यैव जिज्ञासा-शब्दार्थत्वमभिप्रेतं तज्ज्ञापकाभावात् । न च विचारेऽपि तत्प्रयोगादित्युत्तरग्रन्थ एव तत्र मानमिति वाच्यम् । तस्येच्छाव्यतिरिक्तेप्यर्थे सन्नंतशब्दप्रयोगादित्येवंपरत्वेनाप्युपपन्नत्वादि-त्यरुच्या पक्षान्तरमाह ॥ यद्वेति ॥ अत्रापि दृष्टान्तत्वज्ञापकं टीकायां किमपि नास्ती-त्यरुचेराह ॥ अथवेति ॥ तदङ्गेति हेतुगर्भविशेषणम् । तथा च दर्शपूर्णमासयोरकर्तव्यत्वे प्रयाजादेरकर्तव्यत्ववत् अङ्गिभूतस्य निदिध्यासनस्याकर्तव्यत्वे मननस्याकर्तव्यत्वमिति भावः ॥ तथेति ॥ संशयादिनिरासको यो विचारशास्त्रव्युत्पाद्यो न्यायः तदवतारेऽगभूतो यः सन्देहः तत्कारणस्येत्यर्थः । तथाच श्रवणजज्ञानाभावे धर्मिज्ञानाभावेन तत्साध्यसन्दे-हासम्भवेन न्यायावतारासम्भवेन तद्व्यथनात्मक शास्त्रस्यानारम्भणीयत्वं स्यादिति भावः ।

तात्पर्यचन्द्रिका

यस्तु सर्वशाखाधिकरणे टीकायां श्रवणमनने कर्तव्ये इति प्रथमसूत्रे उक्तमित्यनुवादः स तदुत्तराधिकरणे निदिध्यासनस्य विचारयिष्यमाणत्वात्तत्र तयोरेव विचार्यत्वात्तदुपयोगितयैकदेशानुवादः । न तु प्रथमसूत्रे तन्मात्रोक्त्या । अत एवोपासनानाम ब्रह्मजिज्ञासेति त्रिविधोपासनाया जिज्ञासात्वं तत्रैवोक्तम् । न चैकस्य जिज्ञासाशब्दस्य श्रवणाद्यनेकार्थत्वायोगः । इच्छार्थो जिज्ञासाशब्दो विचारलक्षक इति पक्षे दोषाभावात् । मननरूपविचाराभिधायक इति पक्षे श्रवणादौ छत्रिवल्लक्षणोपपत्तेः । यद्वेह टीकायां जिज्ञासाविचारशब्दाभ्यां साक्षात्प्रमाणद्वारा वा चित्तस्य तत्प्रावण्यरूपा श्रवणादित्रयानुगतोपासना विवक्षिता । न तु सुधायामिव मननमिति युक्ता टीका । सुधायां तु सति मननकर्तव्यत्वे इतराकर्तव्यत्वेन शास्त्रानारम्भाभावात् तत्कर्तव्यतैवारम्भे हेतुरिति मननमेव जिज्ञासात्वेनोक्तमिति मनन- विधिमूलमेवेदं सूत्रम् । समानविषयत्वात् । न तु विवरणमत इव श्रवण-विधिमूलम् । विस्तृतं चैतदन्यत्र ।

प्रकाशिका — ननु यथाकथंचित् त्रितयकर्तव्यत्वस्याभिमतत्वे ''सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषा''दिति तृतीयतृतीयपादाद्याधिकरणे द्वयोरेव कर्तव्यत्वोक्त्यनुवादो विरुध्येतेत्यत आह ॥ यस्त्विति ॥ टीकोक्तत्रितयार्थत्वं साधयति ॥ न चेति ॥ इच्छार्थ इति ॥ ज्ञानांशस्यानुपयोगात्प्रत्ययार्थ एवोक्तः ॥ दोषाभावादिति ॥ श्रवणादित्रितयलक्षकत्वे बाधकाभावादिति भावः ॥ छत्रिवदिति ॥ यथा छत्र्यच्छत्रिसमुदाये छत्रिसाहचर्याच्छत्रिणो गच्छन्तीति लक्षणया छत्रिशब्दः तथाविचारे शक्तस्य तत्सहपठितयोर्लक्षणोपपत्तेरिति भावः। सुधायां पक्षद्वयस्याप्युक्तेः इतिपक्ष इति पक्षपदप्रयोगः । एतेन विचारेपीति टीकावाक्यं विचारशब्दस्योपलक्षणतया श्रवणादेरसन्वाच्यत्वेपि लक्षणया श्रवणादौ प्रयोगसम्भवादिति विचारे प्रयोगवशात्तत्र शक्तस्यापि छत्रिवल्लक्षणया श्रवणादौ प्रयोगसम्भवादिति च द्वेधा योज्यमित्युक्तं भवति । कथं तर्हि प्रस्थानद्वयस्य विरोधपरिहारः । अत्र त्रितयस्यापि विवक्षितत्वोक्तेरित्यतः सर्वशाखाधिकरणटीकानुसारेणाभिप्रायान्तरं वर्णयन्नुक्तपक्षत्रयेपि प्रस्थानद्वयविरोधं सुधाशयवर्णनेन परिहरति ॥ यद्वेति ॥ साक्षात् निदिध्यासनेन । प्रमाणद्वारा श्रवणमननाभ्याम् । तत्प्रावण्यं भगवदेकनिष्ठता ॥ अन्यत्रेति ॥ न्यायामृते तृतीयपरिच्छेद इत्यर्थः । तथाच जिज्ञासाशब्दस्य विचारमात्रार्थकत्वं प्रागुक्तं युक्तमिति भावः ।

पाण्डुरङ्गि — ननु त्रितयकर्तव्यत्वस्य प्रथमसूत्रार्थत्वे सर्वशाखाधिकरणीयटीकाविरोधः। तत्र श्रवणमननयोरेव कर्तव्यत्वस्य प्रथमसूत्रार्थत्वेनोक्तत्वादित्यत आह ॥ यस्त्विति ॥ तत्र तयोरेवेति ॥ श्रवणमननयोरित्यर्थः । स्वोक्ताभिप्राये उत्तरग्रन्थसंमतिमाह ॥ अत एवेति ॥ त्रितयकर्तव्यत्वस्य प्रथमसूत्रार्थत्वं यतोऽत एवेत्यर्थः ॥ छत्रिवदिति ॥ छत्रिपदस्य छत्र्यच्छत्रिसमुदाये लक्षणावत् जिज्ञासाशब्दस्य मननार्थत्वाज्जिज्ञासाशब्दस्य मननार्थकस्य श्रवणमननिदिध्यासनसमूहे लक्षणेति भावः । छत्रिवल्लक्षणायामरुच्याह ॥ यद्वेति ॥ तथाच साक्षात्परम्परया चित्तस्य तत्प्रावण्यरूपस्य श्रवणमननिदिध्यासनत्रितयानुगतत्वान्नैकवाक्यतानुपपत्तिरिति भावः । नन्वेवं तर्हि सुधाविरोध इत्यत आह ॥ सुधायां त्विति ॥ ननु श्रवणविधिमूलमेवेदं सूत्रमस्तु । न च समानविषयत्वाभावान्मूलमूलिभावोऽनुपपन्न इत्युक्तमिति वाच्यम् । अद्वितीये ब्रह्मणि वेदान्तानां शक्तितात्पर्यावधारणं श्रवणम् । तच्चोपक्रमोपसंहारादितात्पर्यलिङ्गविचाराधीनमिति विचारविधायकश्रवणविध्योरेकविषयत्वसम्भवादित्यत आह ॥ विस्तृतं चैतदिति ॥ न्यायामृते तृतीयपरिच्छेदे श्रवणविधेर्विवरणोक्तविचारविधायकत्वभङ्ग इत्यर्थः ।

तात्पर्यचन्द्रिका

यत्तु पञ्चपादीविवरणयोरुक्तम् । अवयवशक्त्या ज्ञानेच्छावाचिनो जिज्ञासाशब्दस्य विचारे लक्षणया प्रयोगप्रत्यययोरुपपत्तौ न शक्त्यन्तरकल्पनम् । अनन्यथासिद्धकार्यान्तराभावादिति जिज्ञासाशब्दो विचारे लाक्षणिको न तु रूढ इति । तन्न । यतः,

जिज्ञासाशब्दतो हीच्छामज्ञात्वैव विजानते ।
विचारं लौकिकास्तेन तत्रायं रूढ इष्यते ॥
अन्यथा मण्टपादीनां गृहादौ स्यान्न रूढता ।
गङ्गाशब्दात्तु तीरादि तद्धीपूर्वं प्रकाश्यते ॥

तथाहि । जिज्ञासाशब्दान्मीमांसाशब्दादिवेच्छाप्रतीत्यभावेपि विचारः प्रतीयते । अन्यथा बुभुत्सापदादपि विलम्बेन तद्धीसम्भवान्नियमेन विचारे जिज्ञासापदं न प्रयुज्येत । स्वीकृतश्च त्वयापि ''विचारसाध्यज्ञानेच्छा जिज्ञासाशब्दात्प्रतीयते । नोपदेशमात्रसाध्यज्ञानविषये''ति वदता विचारप्रतीतेरिच्छाप्रतीतिपूर्वकत्वाभावः । एवं च तद्विजिज्ञासस्वेत्यादावस्मिंश्च सूत्रे विधौ न लक्षणा ।

प्रकाशिका – जिज्ञासाशब्दस्य विचारे शक्तिं साधयितुं परोक्तं प्रतिक्षेपायानुवदति ॥ यत्त्विति ॥ प्रयोगप्रत्ययान्यथानुपपत्त्या हि शक्तिकल्पनम् । तौ चान्यथोपपन्नावित्यर्थः । प्रयोगप्रत्ययाभ्यामन्यदेव शक्तिकल्पकं किं न स्यादित्यत आह ॥ अनन्यथेति ॥ यतस्तत्र रूढ इष्यते परीक्षकैरतस्तन्नेत्यन्वयः । लौकिका इच्छामज्ञात्वैव व्यवधानं विनैव । विचारं विजानतेहि यस्मात्तेनेत्यर्थः । मण्टपादीनां मण्टपादि- शब्दानाम् । श्लोकं व्याचष्टे ॥ तथाहीति ॥ मानविचारण इत्यस्मात् ''मानूबधदान्ज्ञान्भ्यो दीर्घश्चाभ्यासस्ये''ति स्वार्थ एव सनोविधानादिच्छाप्रतीतिं विना विचारः प्रतीयत इति मीमांसा- शब्दादिवेत्युक्तम् । अत एव वृत्तौ मानेर्जिज्ञासायां सन्नित्युक्तमिति भावः । एतेनानन्यधीपूर्वकविचारप्रतीतिरूपानन्यथासिद्धकार्यं शक्तिकल्पकं वदता तादृशकार्यान्तराभावादिति हेतोरसिद्धिरुक्तेति ध्येयम् । नियमेन विचारे जिज्ञासापदप्रयोगोऽनन्यथासिद्धं कार्यं शक्तिकल्पकमित्यभिप्रेत्य तव्यतिरेकमुखेनोपपादयति ॥ अन्यथेति ॥ लक्षणया विचारप्रतीतावभिमता-

(प्रकाशिका)

यामित्यर्थः । धर्मबुभुत्सा ब्रह्मबुभुत्सेत्युक्तावपि बोधेच्छान्तर्णीतविचारलक्षणासम्भवेपि नियमेन जिज्ञासापदं न प्रयुज्येत । प्रयुज्यते च सर्वविशिष्टैरतस्तत्र रूढ इति भावः । एतेन झडिति प्रत्ययनियतप्रयोगयोरन्यथानुपपत्तिवर्णनेन प्रयोगप्रत्ययसामान्यस्यान्यथोपपत्तिवर्णनं न प्रकृतोपयुक्तमित्युक्तं भवति । अविलम्बेन विचारप्रतीतिः परस्यापि संमतेत्याह ॥ स्वीकृतश्चेति ॥ ज्ञानेच्छाधीदशायामेव ज्ञानहेतुत्वेन विचारस्यापि प्रतीतेर्नेच्छाज्ञानानन्तरं तद्धीरित्यर्थः ॥ ज्ञानविषयेति ॥ इच्छेत्यनुषङ्गः । एवं सति न विधौ परः शब्दार्थ इत्येतदप्यनुकूलितं भवतीत्याह ॥ एवं चेति ॥ तत्र रूढत्वे सतीत्यर्थः ।

पाण्डुरङ्गि – परोक्तजिज्ञासाशब्दस्य विचारे लक्षणादिकं ''न च श्रवणादेरसन्वाच्यते''ति टीकाविरुद्धत्वादनूद्य दूषयति ॥ यत्त्विति ॥ शक्त्यन्तरकल्पनमिति ॥ अवयवशक्त्यतिरिक्तसमुदायशक्तिरूपशक्त्यन्तरकल्पनमित्यर्थः । जिज्ञासाशब्दस्य विचारे शक्तिः किं प्रयोगप्रत्ययार्थं वाक्यार्थान्तरार्थं वा । नाद्य इत्याह ॥ विचार इति ॥ न द्वितीय इत्याह ॥ अनन्यथासिद्धेति ॥ जिज्ञासाशब्दादिच्छाप्रतीतौ सत्यामेवानुपपत्तिप्रतिसन्धानपूर्वं विचारः प्रतीयत इति कृत्वा लक्षणा स्वीक्रियते एवमेव वा । नाद्य इत्याह ॥ जिज्ञासाशब्दादिति ॥ स्वीकृतश्चेति ॥ एतच्चस्वयमेव विवरिष्यति किञ्चेत्यादिना ।

तात्पर्यचन्द्रिका

अन्यथा लोके मण्टपशब्दस्य मण्डपानकर्तृत्वरूपयौगिकार्थसम्बन्धाद्बृहविशेषे प्रवीणकुशलादिशब्दानां च प्रकृष्टवीणावदादिगतप्रागल्भ्यरूपगुणयोगादेव निपुणे वाजिशब्दस्य च वाजशब्दवाच्यान्नवत्सम्बन्धादेवाश्वजातौ प्रयोगसम्भवाद्रूढिर्न स्यात् । वेदे चापरिमितं देयमित्याधानप्रकरणे श्रुतस्यापरिमितशब्दस्य परिमितान्यरूपमुख्यार्थनिष्ठानेकत्वगुणयोगादेव बहुत्ववति प्रयोगसम्भवाद्रूढिर्न स्यात् । उक्ता च रूढिः षष्ठे न च प्रवीणादिशब्द इष्टापत्तिः । यौगिकार्थप्रतीत्यभावेपि नैपुण्यप्रतीतेः । न चैवं वैश्वदेवेन यजेतेत्यादौ वैश्वदेवीमामिक्षामिति वाक्यविहितयागे यौगिकस्य वैश्वदेवशब्दस्य वैश्वदेवावैश्वदेवसमुदाये गङ्गापदादेश्च तीरादौ लक्षणा न स्यात् । किन्तु रूढिरेव स्यादिति वाच्यम् । तत्र मुख्यार्थप्रतीतिपूर्वकमेवेतरप्रतीतेः । प्रकृते च तदभावादित्युक्तत्वात् । किञ्च त्वन्मते ज्ञानसामान्येच्छायाः काप्यभावादपरोक्षेच्छायां

च जिज्ञासाशब्दस्यावयवशक्त्यभावात्समुदायशक्तेः कल्प्यत्वाविशेषे विचारे समुदायशक्तिरपरोक्षेच्छायां च लक्षणेत्येव किं न स्यात् । एतेन जिज्ञासाशब्दवाच्ययेच्छयाऽऽक्षिप्तो विचार इह विधीयत इति विवरणाभिप्रेतं मतान्तरं निरस्तम् । विचाराक्षेपस्य भामतीनिरासावसरे निराकरिष्यमाणत्वाच्च । तस्माज्जिज्ञासाशब्दो विचारे रूढ एव ।

प्रकाशिका — द्वितीयश्लोकं व्याचष्टे ॥ अन्यथेति ॥ आदिपदार्थमाह ॥ प्रवीणेति ॥ मण्टपशब्दो मण्डं पिबतीति व्युत्पत्त्या मण्डपानकर्तरि मुख्यस्सन् तदधिष्ठितत्वरूपतत्सम्बन्धात् गृहविशेषे लाक्षणिकस्स्यान्नतु रूढः। तथा प्रवीणशब्दः प्रकृष्टवीणावति मुख्यस्सन् प्रकृष्टवीणावादनसमर्थगतप्रौढत्वरूपगुणयोगान्निपुणे गौणस्स्यान्न तु रूढः । तथा कुशलशब्दोपि कुशान् लुनातीति कुशच्छेत्तरि मुख्यस्सन् तद्वतवैदग्ध्यरूपगुणयोगान्निपुणे गौणो न तु रूढः स्यादित्यर्थः । वीणावदिति मतुप् नतु वतिः ॥ अन्नवदिति ॥ अन्नवान् पुरुषस्तत्सम्बन्धादित्यर्थः ॥ वेदे चेति ॥ षष्ठे ''अपरिमाणे शिष्टस्य संख्याप्रतिषेधस्तत्* श्रुतित्वा''दिति सप्तमपादीयदशमाधिकरणे आधाने श्रुतं ''एका देया द्वे देये षट् देयाः शतं देयं सहस्रं देयमपरिमितं देय''मिति वाक्यमुदाहृत्यापरिमितं देयमिति किं पूर्वोक्तैकादिपरिमाणनिषेध उतायमपि संख्यान्तरविधिरिति संशये अपरिमितशब्दस्यावयवशक्त्या परिमाणशून्यवाचित्वात्तस्य च दानायोगात्प्रकृतपरिमाणमनूद्य तस्य प्रतिषेधः क्रियत इति प्राप्ते अवयवशक्तेर्बलीयस्या समुदायशक्त्या तस्य स्वार्थवाचकत्वात्सुज्ञातपरिमाणेष्वपि बहुत्वमात्रेणापरिमितशब्दप्रयोगदृष्ट्या तस्या लब्धात्मकत्वादयमपि सन्निहितसहस्राधिकसंख्यान्तर विधिरिति सिद्धान्तितम् । अत्रानेकत्वगुणयोगनिमित्तं गौणत्वमनादृत्य रूढ्याश्रयणं कृतम् । तन्न स्यादित्यर्थः । इष्टापत्तिमाशङ्क्याह ॥ उक्ताचेति ॥ यौगिकार्थेति ॥ तथा च प्रतीतिविरोध इति भावः ।

उत्तरार्धं व्याख्यातुं शङ्कामुत्थापयति ॥ न चैवमिति ॥ ज्ञानेच्छायां यौगिकस्य विचारे रूढत्वमित्यर्थः । आद्ये चतुर्थपादे ''वैश्वदेवे विकल्प इति चे''दिति दशमेऽधिकरणे चिन्तितम् । चातुर्मास्येषु वैश्वदेववरुणप्रघाससाकमेधशुनासीरीयाख्यकर्मसमुदायेषु पर्वशब्दितेषु मध्ये वैश्वदेवपर्वणि श्रूयते ''आग्नेयमष्टाकपालं निर्वपति सोम्यं चरुं सावित्रं द्वादशकपालं सारस्वतं चरुं पौष्णं चरुं मारुतं सप्तकपालं वैश्वदेवीमामिक्षां द्यावापृथिव्यमेककपाल''मिति ।

(प्रकाशिका)

तत्सन्निधावाम्नातं ''वैश्वदेवेन यजेते''ति । तत्र किं यजेतेत्यनूदितानां प्रकृताग्नेयादियागानां वैश्वदेवशब्दो विश्वदेवाख्यदेवतारूपगुणविधिपरः किं वा तेषामेव नामधेयमिति संशये नामत्वे तस्याविधेयत्वाद्विधेयांतराभावाच्च वाक्यमिदमनर्थकं स्यादतो देवताविधिः ''आनर्थक्य-प्रतिहतानां विपरीतं बलाबल''मित्युत्पत्तिशिष्टाभिरप्यग्न्यादिदेवताभिर्विश्वेदेवता विकल्प्यन्त इति प्राप्ते वैश्वदेवशब्दस्य छत्रिन्यायेन लक्षणया यजेतेत्यनूदितप्रकृताग्नेयादि- वैश्वदेवावैश्व-देवयागसमुदायनामत्वेपि ''प्राचीनप्रवणे वैश्वदेवेन यजेते''त्यादिषु वैश्वदेवशब्देनाग्नेयादि-यागसमुदायग्रहणोपपत्त्या प्राचीनप्रवणसम्बन्धसिद्धेर्नानर्थक्यम् । अन्यथाऽऽमिक्षायागस्यैव प्राचीनप्रवणसम्बन्धः स्यात् । तस्मान्नामधेयमिति सिद्धांत इति । अत्रैकत्र योगिकस्यान्यत्र लक्षणा दृष्टा । सा नस्यादिति शङ्कार्थः । यद्यपि वैश्वदेवशब्दस्य ''यद्विश्वेदेवाः समयजन्त तद्वैश्वदेवस्य वैश्वदेवत्व''मिति वाक्यशेषाद्विश्वदेवयष्टृकत्वगुणयोगेन यौगिकत्वमपि सिद्धान्ते दर्शितं तथापि लाक्षणिकत्वपक्षस्याप्युक्तेरेवमुक्तम् । यद्वा तदीयदेवताधिकरणे देवतानां कर्मानधिकारोक्तेस्तद्विरुद्धादर्थवादलब्धयोगापेक्षयाऽऽमिक्षायागविधिमुखलब्धलक्षणैव ज्याय-सीति सिद्धान्तिनोऽभिमतमिति भावेनैवमुक्तिः ।वेदे दोषमाशङ्कच लोके चाशङ्कते ॥ गङ्गेति ॥ मुख्यार्थेति ॥ आमिक्षायागप्रवाहादिरूपमुख्यार्थधीपूर्वमेवेतरस्याग्नेयादियागतीरादेः प्रतीते-रित्यर्थः । एतेन तद्धीपूर्वमिति चतुर्थपादो व्याख्यातः । प्रकृते जिज्ञासाशब्दे । क्वापीति ॥ प्रागुक्तरीत्येति भावः ॥ अवयवशक्तीति ॥ ज्ञानसामान्येच्छायामेव तस्य शक्तेरिति भावः ॥ एतेनेति ॥ ज्ञानसामान्येच्छाया अभावेनापरोक्षेच्छायामवयवशक्त्यभावेन चेत्यर्थः । इच्छया ज्ञानेच्छया ॥ तस्मादिति ॥ व्याकरणविरोधस्तु समाधास्यत इति भावः ।

पाण्डुरङ्गि — आदिशब्दं विवृण्वन्नेव द्वितीयनिराकरणपरत्वेन द्वितीयकारिकां व्याचष्टे ॥ अन्यथेति ॥ अत्रापि मण्टपशब्दस्य मण्डपानकर्तृत्वरूपयोगेन गृहस्वामिनि वृत्तिः तत्सम्बन्धाद्गृहादौ प्रवृत्तिरिति लक्षणा स्यादिति भावः । इष्टापत्तिं परिहरति ॥ उक्ताचेति ॥ गङ्गाशब्दात्तु तीरादीति कारिकांशमवतारयति ॥ न चैवमिति ॥ नन्वेवं विचारस्यापीच्छा-प्रतीतिपूर्वकप्रतीतिकत्वे लाक्षणिकत्वं स्यादित्यत आह ॥ प्रकृतेचेति ॥ जिज्ञासा शब्दान्मी-मांसा शब्दादिवेच्छा प्रतीत्यभावेपि विचारः प्रतीयत इत्युक्तत्वादिति भावः । जिज्ञासाशब्द-स्यावयवशक्त्यतिरिक्तशक्त्यन्तरकल्पनामेवाङ्गीकृत्य परिहारः कृतः । इदानीं स्वीकृतश्चे-त्यादिना सूचितकल्पनाभावमेवाह ॥ किञ्च त्वन्मत इति ॥ जिज्ञासाशब्दस्य ज्ञानसामान्येच्छायां शक्तिः अपरोक्षेच्छायां वा । नाद्य इत्याह ॥ ज्ञानेति ॥ द्वितीयं दूषयति

॥ अपरोक्षेति ॥ नन्वनन्यलभ्ये हि शक्तिः कल्पनीया जिज्ञासापदादाक्षेपेणैव लाभसम्भवान्नानन्यलभ्यत्वमित्येतद्विवरणमतमतिदेशेन दूषयति ॥ एतेनेति ॥ इच्छाप्रतीत्यभावेपि जिज्ञासाशब्दाद्विचारप्रतीत्युपपादनेनेत्यर्थः ।

तात्पर्यचन्द्रिका

केचित्तु जिज्ञासाशब्दो रूढ्या लक्षणया वा विचारं नार्पयति । नाप्यर्थादाक्षिपति । किंत्विच्छार्थ एव । तथापीच्छायाः विषयवैलक्षण्याधीनत्वेनाविधेयत्वादिच्छां प्रति कर्मीभूतमिष्यमाणं विचारात्मकं तर्करूपं ज्ञानं विधेयम् । यद्यपि जिज्ञासा कर्तव्येति प्रत्ययार्थभूतेच्छायाः कर्तव्यत्वं भाति न तु ज्ञानस्य तथापि ''स्नात्वा भुञ्जीत प्राङ्मुखो भुञ्जीते''त्यत्र भुजिधातोर्विधिप्रत्ययान्तत्वेन भोजनस्य कर्तव्यत्वे प्रतीतेपि तस्य रागतः प्राप्तत्वेनाप्राप्तयोः स्नानप्राङ्मुखत्वयोर्विधेस्तात्पर्यम् । न चैतावता भुजिधातोः स्नाने रूढिः लक्षणा वा आक्षेपकतावास्ति । एवमिहापीच्छायाः अविधेयत्वाद्विचारात्मकं ज्ञानं विधेयं न तु जिज्ञासाशब्दस्य विचारे रूढ्यादिरित्याहुः । तन्न । स्नानादिकं हि प्राधान्येनाप्रतीतत्वाद्विधातुं युक्तम् । इह तु ज्ञानमिच्छां प्रति कर्मतया प्राधान्येन प्रतीतमिति कथं तद्विरोधिनी विधेयता । न हि स्वर्गकामपदेनेच्छाविषयतया प्रतीतः स्वर्गो विधेयः । किं च प्राङ्मुखो भुञ्जीतेत्यादौ विधेयप्राङ्मुखादेराश्रयमर्पयितुं भुजिधातुः सार्थकः । प्रकृते तु विधेयज्ञानं प्रतीच्छाया आश्रयत्वाद्यभावात्तद्विजिज्ञासस्वेति श्रुतौ सूत्रे च सन्प्रत्ययो व्यर्थः । किञ्च जानातेः प्रमितौ स्वारस्यात्सन्वाच्यायाः इच्छायाश्च प्रमितिरूपफलविषयत्वस्य स्वरसत्वान्न सन्नन्तजानातेस्तर्करूपज्ञानपरता । किं च त्वत्पक्षे विचारकर्तव्यतायामानान्तरप्राप्तत्वात् श्रोतव्यइत्यादिवाक्यवत्सूत्रमप्यनुवादकमेव स्यादिति कथं विधायकतोक्तिः। कथंचिदप्राप्तिसम्पादने तु श्रोतव्यइत्यादिरपि विधिः स्यात् । तस्माज्जिज्ञासाशब्दस्येच्छार्थत्वे विध्यसम्भवात्तद्विध्यर्थं स रूढ्या विचारपरः । तदेतदाह ॥ न च श्रवणादेरसन्वाच्यतेति ॥

प्रकाशिका –रूढ्येति सिद्धान्तदिशा । लक्षणयेति विवरणरीत्या । नापीति ॥ भामतीरीत्येति भावः । विचारात्मकमिति ॥ ''विचारात्मकं ज्ञानमेव तात्पर्यतो विधीयत''

इति । अत्र तर्करूपज्ञानं विधेयं तर्कानुगृहीतवाक्यजन्यप्रमितिरूपज्ञानं तु फलत्वान्नविधेय'' मिति च श्रुतप्रकाशोक्तशंकासमाधी अनुवदति ॥ यद्यपीति ॥ तस्य भोजनस्य ॥ अप्राप्तयोरिति ॥ नियमेनाप्राप्तयोरित्यर्थः ॥ स्नानेति ॥ स्नात्वैव भुञ्जीत प्राङ्मुख एव भुञ्जीतेति स्नानप्राङ्मुखत्वयोर्नियम इत्यर्थः । उक्तं च ''स्नानप्राङ्मुखत्वनियमयोरेव विधेस्तात्पर्य''मिति । दृष्टान्तवैषम्योपपादनपूर्वं विध्ययोग्यत्वेन दूषयति ॥ स्नानेति ॥ प्राधान्यज्ञापककामपदादेरभावादिति भावः । अङ्गीकृतं च प्राधान्यं श्रीभाष्ये ''इच्छाया इष्यमाणप्रधानत्वादिष्यमाणं ज्ञानमिह विधीयते'' इति ॥ तद्विरोधिनीति ॥ प्राधान्यविरोधिनीत्यर्थः। यद्यपि प्राधान्यविरोधि गुणत्वं न तु विधेयत्वम् । तस्यानुवाद्यत्वविरोधित्वात् । तथापि प्राधान्यस्यानुवाद्यत्वेन गुणत्वस्य विधेयत्वेन सामानाधिकरण्यनियमेन प्राधान्यविधेयत्वयोर्भिन्नाधिकरणतानियमात् विरोधिनीत्युक्तम् । ननु प्रवर्तनात्माविधिरिष्टे पुरुषं प्रवर्तयति । ज्ञानं चेष्टमिति सत्यपि प्राधान्ये तदेव विधेयमित्यतोऽतिप्रसङ्गमाह ॥ न हीति ॥ ''फलांशे भावनायास्तु प्रत्ययो न विधायक'' इति भाट्टोक्तेरिति भावः । अत एव चतुर्थाध्यायाद्यपादे ''यस्मिन्प्रीतिः पुरुषस्य तल्लिप्सार्थलक्षणाविभक्तत्वा''दिति द्वितीयेधिकरणे द्वितीये वर्णके फलांशे विधिव्यापारोऽस्त्युत नेति संशये विधेयभावनाविशेषणत्वात् करणादिवत्फलांशोपि विधीयत इति प्राप्तेरागतस्तत्र प्रवृत्तिसिद्धेर्न फलांशो विधीयत इत्युक्तम् ।

ननु यजेत स्वर्गकाम इत्यत्रेष्टसाधनं मानान्तराप्राप्तं सन्निहितं च धात्वर्थं परित्यज्य विप्रकृष्टरागप्राप्तस्वर्गविधानं न युज्यते । इह तु सन्निहितत्वादिष्टत्वाच्च युज्यत इति भावेनाह ॥ किञ्चेति ॥ यत्र हि गुणः कारकत्वमापद्यते स आश्रयः । यथा ''दध्नेन्द्रियकामस्य जुहुयादित्यत्र दधिरूपगुणस्य धात्वर्थो होमः । दध्ना होमनिर्वृत्तिद्वारेन्द्रियनिष्पत्तेः । तथाच प्राङ्मुखत्वादिकमपि भोजनरूपक्रियानिर्वृत्तिद्वाराऽऽयुष्यादिफलं जनयतीति निर्वर्त्यक्रियारूपाश्रयमनुवदितुं भुजिधातुः सार्थकः । इह तु ज्ञानेनेच्छानिर्वृत्तिद्वारा कस्यचिदजननेनाश्रयत्वायोगेन तदनुवादानुपपत्तेर्ब्रह्म ज्ञानमिति सूत्रविन्यासः स्यात् । तद्विजानीहीति श्रुतिविन्यासः स्यात् । न तु सन्नंतत्वेनेत्यर्थः । एतेन ''गुप्तिज्किद्भ्यःस''न्नित्यत्र सन्निति योगविभागमाश्रित्य जिज्ञासाशब्दे सनः स्वार्थिकत्ववर्णनं प्रत्युक्तम् । ब्रह्मज्ञानमित्येतावता पूर्त्या सनो व्यर्थत्वात् । योगविभागस्य क्लिष्टत्वाच्च । यदपि प्रमाजनकवाक्यानुग्राहकतर्करूपं ज्ञानं विधेयमित्युक्तं तदपि नेत्याह ॥ किं चेति ॥ प्रमितिरूपेति ॥ इतिकर्तव्यताभूततर्कानुगृहीतवेदान्तवाक्यजन्यप्रमारूपमीमांसाफलविषयत्वस्येत्यर्थः । उपलक्षणमेतत् ।

ज्ञानसामान्ये शक्तस्य जानातेस्तर्कज्ञानरूपविशेषपरत्वस्यानुचितत्वादित्यपि ध्येयम् । तर्करूपज्ञानस्य विधेयतोक्तिश्चायुक्तेत्याह ॥ किञ्चेति ॥ श्रवणविधिमूलत्वात् सूत्रस्य श्रोतव्य इत्यादिवाक्यवदित्युक्तम् । ननु जिज्ञासामात्रप्राप्तावपि कर्मविचारानन्तर्यविशिष्टं न प्राप्तमित्यत आह ॥ कथंचिदिति ॥ जिज्ञासाशब्दतो हीच्छामित्यादिनोक्तं टीकारूढं करोति ॥ तदेतदिति ॥ अतद्गुणसंविज्ञानबहुव्रीहिणा विचारस्यासन्वाच्यता सन्नंतजिज्ञासापदवाच्यत्वाभाव इत्यर्थः ।

पाण्डुरङ्गि – रामानुजमतं दूषयितुमनुवदति ॥ केचित्त्विति ॥ यद्यप्यत्र भामतीमतदूषणानन्तरं केषाञ्चित्पक्षो दूषणीयः । तथैव नियतत्वात् । तथापीच्छाया अविधेयत्वादिति टीकानिवर्त्यक्रमानुसारेणैवमुक्तमिति ध्येयम् । नन्विच्छाया अविधेयत्वात्तदर्थत्वे जिज्ञासापदवैयर्थ्यमित्यत आह ॥ तथापीति ॥ ज्ञानमात्रस्य विधेयत्वासम्भवादाह ॥ तर्करूपमिति ॥ तर्करूपमित्युत्तरत्र दूषणार्थमनूदितम् । विचारात्मकमित्यनेनैवाविधेयत्वशंकापरिहारात् ॥ तद्विरोधिनीति ॥ विधेयत्वस्य गुणत्वव्याप्यत्वेन प्राधान्यविरोधित्वमिति भावः । ननु प्राधान्येन सह विधेयत्वस्य विरोधः किमेवमेव वा उत यत्प्रति प्राधान्यं तत्प्रत्येव विधेयत्वं विरुद्धम् । नाद्यः । तथात्वे दर्शपूर्णमासयागस्यापि प्राधान्येन विधेयत्वानुपपत्तेः । न द्वितीयः । यागस्य सोमं प्रति प्राधान्येपि फलं प्रत्यप्राधान्येन विधेयत्ववत् । प्रकृते ज्ञानस्येच्छां प्रति प्राधान्येपि मोक्षरूपफलं प्रत्यप्राधान्याद्विधेयत्वं सम्भवतीत्यत आह ॥ किं चेति ॥ ननु ज्ञानमात्रस्य पुंतंत्रत्वाभावेनाविधेयत्वेपि तर्करूपज्ञानं पुंतंत्रत्वाद्विधेयम् । तथा चेष्यमाणतर्करूपज्ञानोपस्थापकत्वान्न सन्प्रत्ययवैयर्थ्यमित्यत आह ॥ सन्नंतजानातेरिति ॥ न च जानातेस्तर्कपरता युक्ता । यतोऽयं जानातिः सन्नंत इत्यर्थः । ननु जानातेः प्रमितौ स्वरसत्वेपि इच्छायाः प्रमितिरूपफलविषयत्वस्वारस्येपि फलीभूतज्ञानस्य विधातुमशक्यत्वात् सन्नंतजानातेस्तर्करूपज्ञानपरत्वमावश्यकमित्यत आह ॥ किंचेति ॥ मानान्तरप्राप्तत्वादिति ॥ सति विचारे ज्ञानमन्यथा नेत्यन्वयव्यतिरेकरूपमानान्तरप्राप्तत्वादित्यर्थः । तथापि मोक्षसाधनज्ञानसाधनरूपविशिष्टालौकिकवस्तुविचारप्रतिपादनस्याप्राप्तत्वात्सूत्रस्य विधायकत्वं स्यादित्यत आह ॥ कथंचिदिति ॥ जिज्ञासाशब्दस्य विचारे रूढिप्रतिपादनमुपसंहरति ॥ तस्मादिति ॥

तात्पर्यचन्द्रिका

नन्विच्छायामपि जिज्ञासापदप्रयोगादिच्छात्रजिज्ञासाशब्दार्थः किं न स्यादित्यत्राह ॥ इच्छाया अविधेयत्वादिति ॥ सुधायां तु ज्ञानेच्छांतर्णीतो विचारो जिज्ञासापदेन लक्ष्यत इति परमतमुक्त्वा यदि च जिज्ञासाशब्दो मीमांसाशब्दवद्विचार एवोपसंख्यायत इति स्वमतमुक्तं यद्वा सुधायां पक्षद्वयेपि जिज्ञासाशब्दस्य विचारपरत्वाविशेषादन्यतरनिर्धारणस्याप्रयोजनत्वात्पक्षद्वयोक्तिः । तदनुसारेणात्राप्यसन्वाच्यत्वेपि लक्षणया विचारेपि तत्प्रयोगान्मुख्यार्थस्य चेच्छाया अविधेयत्वादित्यपि योज्यम् ।

प्रकाशिका – ननु नानेन वाक्येन जिज्ञासाशब्दस्य तत्र शक्तताभिप्रायोऽवगन्तुं शक्यते विचारस्य सन्नंतावाच्यत्वेपि लक्षणया विचारेपि जिज्ञासितमित्यादिप्रयोगवदुपपत्तेरित्युत्तरवाक्यार्थसम्भवात् । अत एवेच्छाया अविधेयत्वादिति मुख्यार्थे विध्यनुपपत्तिर्लक्षणाबीजमाहेत्याशङ्क्य नेदं लक्षणाबीजोपपादनार्थं प्रवृत्तं येन पूर्वतनं परिहारवाक्यं लक्षणाभिप्रायेण वर्ण्येतेति भावेन प्रकारांतरेणावतारयति ॥ नन्विति ॥ सुधाविरोधमाशंक्याह ॥ सुधायां त्विति ॥ एवं च तद्वाक्यद्वयं स्वपरमतत्वेन योज्यमित्युक्तं भवति ॥ तथाच न विरोध इत्याशयः । नन्वेवं योजनायां न ज्ञापकमस्ति । अत एव प्रमेयदीपिकायां ''मा कर्मफलहेतुर्भूर्माते सङ्गोऽस्त्वकर्मणी''ति वाक्यभाष्यव्याख्यावसरे ''ज्ञानेच्छापूर्वको विचारो लक्ष्यत'' इति विचारे लक्षणा कण्ठोक्तेत्यत आह ॥ यद्वेति ॥ अत्रापीति ॥ टीकायामपीत्यर्थः ॥ इत्यपीति ॥ लक्षणापरयापीत्यर्थः ।

पाण्डुरङ्गि – ननु टीकायां श्रवणादौ सन्नंतपदलक्ष्यत्वेनैव जिज्ञासाशब्दप्रयोगो विवक्षितः । अन्यथा इच्छारूपमुख्यार्थानुपपत्तिकथनपरया ''इच्छाया अविधेयत्वा''दित्युत्तरटीकया विरोध इत्यतस्तद्वाक्यमन्यथा व्याचष्टे ॥ नंन्विच्छायामपीति ॥ नन्वेवं टीकायां विचारे रूढत्वमेव यद्यभिप्रेतं तर्हि सुधाविरोधः स्यात् । तत्र ज्ञानेच्छान्तर्णीतो विचारो लक्ष्यत इत्युक्तत्वादित्यत आह ॥ सुधायां त्विति ॥ उपसंख्यायत इति ॥ ''मान्बधदान्शान्भ्योदीर्घश्चे''त्यत्र मीमांसाशब्दो यथा वर्तते तथा जिज्ञासाशब्दोपि तत्र द्रष्टव्यः । ननु मूलव्याख्यानावसरे परोक्तिरनवसरपराहतेत्यस्वरसादाह ॥ यद्वेति ॥ तर्ह्येतट्टीकाविरोध इत्यत आह ॥ तदनुसारेणेति ॥ सुधानुसारेणेत्यर्थः ।

तात्पर्यचन्द्रिका

भामत्यां तु न जिज्ञासानाम विचारः । इच्छायां सन्विधानात् । न च शास्त्रप्रवृत्त्यङ्गविषयप्रयोजनसूचनेन स्वार्थपरत्वोपपत्तेर्विचारे लक्षणा युक्ता । एवं च मुमुक्षानन्तरं ब्रह्मजिज्ञासा भवितुं युक्तेत्येव श्रौतोऽर्थः । विचारस्त्वार्थिकोर्थः । ज्ञातुमिच्छाहि सन्दिग्धे विषये निर्णयाय भवति । निर्णयश्च विचारसाध्य इतीच्छा-निमित्तेन विचाराक्षेपात् । आर्थिके चास्मिन्नर्थे कर्तव्यपदाध्याहारादित्युक्तम् । तदपि न । विचारे रूढेरुक्तत्वात् । व्याकरणस्य च साधुत्वमात्रपरत्वात् । उक्तं हि

''यत्रार्थस्य विसंवादः प्रत्यक्षेणोपलभ्यते ।
स्वरसंस्कारमात्रार्था तत्र व्याकरणस्मृति''रिति ।

भवतीत्याद्यध्याहारस्य स्वतःसिद्धत्वेप्यनुवादत्वप्रसङ्गात् । तद्विजिज्ञासस्वेति श्रुत्यनुसारिणा च सूत्रेणेच्छाया अविधेयत्वेन लक्षणयापि विचारस्य विधेयत्वात् । विषयाद्यभावादिच्छाभावं वदन्तं प्रतीच्छया विषयादिसूचनोक्त्ययुक्तेश्च । किञ्चैवं सति तावन्मात्रेण नैराकाङ्क्ष्यान्नार्थिकविचारकर्तव्यतापरता युक्ता । शास्त्रारम्भवत्तस्य फलत्वेनैव सिद्धेः । कथं च विचारं विनेच्छाया अनुपपत्तिः । येन विचाराक्षेपकता । न हि कारणस्य कार्यं विनानुपपत्तिः । न चेच्छाविचारसामग्री । फलेच्छायां सत्यामपि साधनाननुष्ठानदर्शनात् । तस्माद्भामत्युक्तमयुक्तम् । तदेतदाह ॥ भवती-त्यादिकथनस्य वैयर्थ्यादित्यादिना ॥ एतेन कौमुद्यां यस्मादधिकारिणां ब्रह्मज्ञानेच्छा-सम्पन्ना तस्माद् ब्रह्मविचारः कर्तव्य इत्यवान्तरवाक्ये श्रुत्येच्छापरत्वेपि महावाक्ये लक्षणया विचारपर इत्युभयपरो जिज्ञासाशब्दः । अत एव विचारे लाक्षणिकोपि विषयादिसूचक इति यदुक्तं तदपि निरस्तम् । युगपद्वृत्तिद्वयप्रसङ्गात् । उक्तरीत्या विषयफलयोरन्यथैव सूचनसम्भवेन जिज्ञासाशब्दस्येच्छापरत्वे मानाभावाच्च । अध्याहारसापेक्षावांतरवाक्यभेदादिकल्पनानुपपत्तेश्च । तस्माज्जिज्ञासाशब्दो विचारपरः। नेच्छापर इति ॥

प्रकाशिका – लक्षणया विचारोत्र किं न स्यादित्यत आह ॥ न चेति ॥ तत्सूचना-प्रकारः प्रागेवोक्तः । कल्पतरूक्तं सूत्रार्थनिष्कर्षमनुवदति ॥ एवं चेति ॥ विचारस्यार्थि-

(प्रकाशिका)

कताप्रकारं कल्पतरूक्तमेवाह ॥ ज्ञातुमिति ॥ इच्छामुखेनेति भामत्युक्तमनुवदति ॥ इच्छानिमित्तेनेति ॥ इच्छारूपनिमित्तेनेत्यर्थः ॥ रूढेरिति ॥ तथाच विचारार्थकत्वेपि न स्वार्थपरित्याग इति भावः । तर्हि ''धातोः कर्मणः समानकर्तृकादिच्छायां वे''तीच्छार्थकसन्विधायकव्याकरणस्मृतिविरोध इत्यत आह ॥ व्याकरणस्येति ॥ घटं जिज्ञासते घटं बुभुत्सत इत्यादाविच्छार्थकत्वेन सनः सावकाशत्वादत्र चेच्छाबोधं विनैव विचारबोधेनार्थविसंवादस्य प्रागेव दर्शितत्वात् । ब्रह्मजिज्ञासाधर्मजिज्ञासेत्यादौ साधुत्वमात्रपरत्वं व्याकरणस्येत्यर्थः । यदपि एवं चेत्यादिना श्रौतार्थवर्णनं तदपि नेत्याह ॥ भवतीत्यादीति ॥ यदपि शास्त्रप्रवृत्त्यङ्गेत्यादि तदपि नेति प्रागुक्तं स्मारयति ॥ विषयादीति ॥ यदपि विचारस्त्वार्थिकोर्थ इत्यादि तदपि नेत्याह ॥ किं चेति ॥ यदपीच्छया विचाराक्षेप इति प्रागुक्तं तदपि नेत्याह ॥ कथं चेति ॥ इच्छाया विचारसाध्यज्ञानगोचरत्वेन तं प्रति कारणत्वेन कार्यरूपविचारं विनानुपपत्त्या तदाक्षेप उत सामग्रीत्वेन । आद्य आह ॥ न हीति ॥ केवलं दण्डे सत्यपि घटानुदयादिति भावः ॥ द्वितीय आह ॥ न चेच्छेति ॥ भामतिमतनिरासं टीकारूढं करोति ॥ तदेतदिति ॥ एतेन धर्मविचारानन्तरं शिवाराधनरूपधर्मानुष्ठानविशुद्धचित्तस्य विवेकादिसम्पत्त्या ब्रह्मज्ञानेच्छा भवतीति श्रौतोर्थः । तदिष्यमाणं ब्रह्मज्ञानं विचारमन्तरेण न भवतीति तत्स्वरूपप्रमाणादिविचारस्तदाक्षिप्तोर्थ इति शिवार्कमणिदीपिकोक्तं निरस्तमिति ध्येयम् । विस्तरस्तु न्यायमौक्तिकमालायां ध्येयः ॥ एतेनेति ॥ भामतीमतदूषणेनेत्यर्थः ॥ इच्छापरत्वेपीति ॥ जिज्ञासाशब्दस्येति शेषः । अधिकारिणां ब्रह्मज्ञानेच्छाभवतीत्यवान्तरवाक्यम् । यस्मादित्यादि महावाक्यप्रदर्शनम् । अत एव मुख्यार्थस्यापि सत्त्वादेव ॥ वृत्तिद्वयेति ॥ नन्ववान्तरवाक्ये विषयादिसूचनार्थं मुख्यवृत्तिरपि जिज्ञासाशब्दो महावाक्यआवर्तमानो लाक्षणिकोपि न दूष्यतीत्यनुशयेनाह ॥ उक्तेति ॥ यद्वा अगत्या गङ्गायां मीनघोषावित्यादाविववृत्तिद्वयमपि सह्यमित्यत आह ॥ उक्तेति ॥ अस्माभिरिति शेषः ॥ अध्याहारेति ॥ यस्मादित्यध्याहारेत्यर्थः । एवं सूत्रावयवपदानामर्थः सविस्तरं निरूपितः । सूत्रतात्पर्यं च निरूपितम् ।

पाण्डुरङ्गि –ननु जिज्ञासाशब्दस्य विचारे रूढिर्लक्षणा वा न स्वीकर्तव्या । आक्षेपादेव तल्लाभ इति भामतीमतं दूषयितुमनुवदति ॥ भामत्यां त्विति ॥ जिज्ञासाशब्दस्य विचारे योगो लक्षणा रूढिर्वा । नाद्य इत्याह ॥ इच्छायामिति ॥ ''धातोः समानकर्तृकादिच्छायां वे''ति सूत्रादित्यर्थः । न द्वितीय इत्याह ॥ न चेति ॥ ननु स्वार्थपरत्वे वैयर्थ्यमित्यत

उक्तम् ॥ शास्त्रप्रवृत्त्यङ्गेति ॥ कल्पकाभावात्तृतीयोपि नेत्याशयः । ननु प्रवर्तके सूत्रेऽवश्यमध्याहर्तव्यकर्तव्यपदान्वयार्थं युक्ता विचारे लक्षणेत्यत आह ॥ एवं चेत्यादिना ॥ इच्छानिमित्तेनेति ॥ इच्छालक्षणनिमित्तेन नैमित्तिकविचाराक्षेप इति भावः । इच्छामुखेनेति पाठपक्षे इच्छोपदर्शनमुखेनेत्यर्थः । नन्वाक्षिप्तस्य विचारस्य केनान्वय इत्यत आह ॥ आर्थिके चेति ॥ ननु रूढिपक्षेपीच्छायां सन्विधायकव्याकरणविरोध इत्यत आह ॥ व्याकरणस्य चेति ॥ किं च विचारे लक्षणावश्यमङ्गीकर्तव्या । अन्यथा अध्याहृतकर्तव्यपदान्वयानुपपत्तेः । न च तदध्याहार एवमास्त्विति वाच्यम् । तथा सति वाक्यस्य साकाङ्क्षत्वेनापूर्णत्वापत्त्या तस्यावश्यकत्वात् । नन्वस्ति भवत्योः सर्वत्र सम्बन्धेन न सूत्रस्य साकाङ्क्षत्वमित्युक्तमिति चेत्तत्राह ॥ भवतीत्याद्यध्याहारस्येति ॥ किं च जिज्ञासाशब्दस्य विचारलक्षकत्वमावश्यकम् । तद्धिजिज्ञासस्वेति श्रुताविच्छाया अविधेयत्वाज्जिज्ञासाशब्दस्य विचारपरत्वस्यैव वक्तव्यत्वेन तदनुसारिसूत्रेपि तस्यैव विधेयतया वक्तव्यत्वात् । अन्यथा श्रुतिसूत्रयोर्भिन्नविषयत्वं स्यादिति भावेनाह ॥ तद्धिजिज्ञासस्वेतीति ॥ ननु शास्त्रप्रवृत्त्यङ्गविषयप्रयोजनसूचनेनैव जिज्ञासाशब्दस्य स्वार्थभूतेच्छापरत्वोपपत्तौ किमर्थं विचारे लक्षणेत्यत आह ॥ विषयाद्यभावादिति ॥ इच्छया विचार आक्षिप्यत इत्येतदूषयति ॥ कथं चेति ॥ ननु इच्छाया विचारसामग्रीत्वात्तदभावे विचारानुपपत्तिरित्यत आह ॥ न चेति ॥ स्वोक्तं टीकारूढं करोति ॥ तदेतदिति ॥ ननु जिज्ञासापदस्य रूढलाक्षणिकार्थमात्रस्वीकरणमयुक्तम् । यौगिकार्थस्यापि सम्भवात् । न च यौगिकार्थस्य लाक्षणिकेनान्वय इति वाच्यम् । अवान्तरमहावाक्यविवक्षयाऽन्वयोपपत्तेरिति कौमुद्युक्तं दूषयितुमनुवदति ॥ एतेनेति ॥ श्रुत्या अवयवशक्त्येत्यर्थः ॥ अत एवेति ॥ इच्छापरत्वादेवेत्यर्थः । ननु मण्युक्तरीत्या युगपद्वृत्तिद्वयविरोधो न दूषणम् । किं च विषयादिसिध्यन्यथानुपपत्त्या इच्छापरत्वमावश्यकमित्यत आह ॥ उक्तरीत्येति ॥ ननु जिज्ञासाशब्दस्येच्छापरत्वमवश्यं स्वीकर्तव्यम् । बाधकाभावात् । न चानन्वयः । अवान्तरवाक्यादिविवक्षयान्वयोपपत्तेरित्यत आह ॥ अध्याहारेति ॥ तथाचाध्याहारस्यैव बाधकत्वान्नेयं कल्पना युक्तेति भावः ।

तात्पर्यचन्द्रिका

यत्तु परैरस्य शास्त्रस्य पूर्वतन्त्रेण गतार्थत्वमाशङ्क्य तत्र कार्यनिष्ठो वेदभागो विचारितः । इह तु वस्तुतत्वनिष्ठो विचार्यत इत्यगतार्थत्वमुक्तम् । तन्न ।

(तात्पर्यचन्द्रिका)

इहातत्वभूतोपास्यसविशेषब्रह्मविचारस्य उपासनापादे तद्विधिविचारस्य चायोगात् । न चोपासना मन्मत इव त्वन्मते मोक्षसाधनं येन फलसाधनादियुक्तब्रह्मविचारप्रतिज्ञानात्तद्विचारः सङ्गच्छेत । त्वन्मते ह्युपासनाया मानसत्वेन विद्यासाम्येप्यनित्यफलत्वाद्धेयत्वाच्च तद्वाक्यानामतत्वावेदकत्वादुद्गीथाद्युपासनानां कर्माश्रितत्वाच्च ''समुद्रं मनसा ध्यायीते''त्यादिवाक्यविहितसमुद्रध्यानादिवत्कर्मकाण्डएवोपासनाया विचारो युक्तः । निर्विशेषज्ञानार्थत्वादुपासनाया इह विचारे च यागादिनित्यकर्मणामपि तदर्थत्वान्मानससंकल्परूपतयोपासनावद्विद्यासाम्याच्च तद्विचारोपीहैव स्यात् । तस्मात्सर्वस्यापि वेदस्य ब्रह्मपरत्वात् सर्वोपीहैव विचार्यः । कर्मदेवमीमांसयोर्वेदैकदेशावान्तरतात्पर्यविषयकर्मदेवताविचार इति ।

प्रकाशिका – तत्र केचिदाहुः । ''अथातो धर्मजिज्ञासे''त्यनेन सकलवेदार्थविचारस्योक्तत्वाद्धर्मपदस्य वेदार्थोपलक्षकत्वाद् ब्रह्मज्ञानस्य चोदनालक्षणत्वेन ''चोदना लक्षणोर्थो धर्म'' इति धर्मरूपत्वाच्च सर्ववेदस्य तत्र विचारितत्वान्नेदमारम्भणीयमिति । अस्याः शङ्कायाः स्वमतेन परिहारं चिकीर्षुः परोक्तं निरस्यति ॥ यत्तु परैरिति ॥ कार्यनिष्ठः कर्मपरः ॥ वस्तुतत्वेति ॥ तात्विकवस्तुरूपब्रह्मपर इत्यर्थः ॥ सविशेषेति ॥ आद्योन्तरधिकरणादौ द्वितीयपादे च सविशेषब्रह्मणो तात्विकस्य विचारादित्यर्थः । ननु फलसाधनादियुक्तब्रह्मणो विचारस्य प्रतिज्ञातत्वात्तद्विचारो युक्त इत्याशङ्क्याह ॥ न चेति ॥ ननूपासनाया मनोवृत्तित्वेन विद्यानिभत्वादिहविचारो युक्त इत्यत आह ॥ त्वन्मते हीति ॥ अनित्येति ॥ तथाच नित्यफलसाधनविचारे तस्या निवेश इति भावः ॥ अतत्वेति ॥ नामादौ ब्रह्मत्वादेरतात्विकत्वादिति भावः । ननूपासनावाक्यस्य तत्कर्तव्यतामात्रपरत्वेन स्वार्थपरत्वाभावान्नैवमिति चेन्न । तत्कर्तव्यताया अपि तथात्वात् । न हि तत्वनिष्ठवाक्यविचारे तेषां विचारो युक्त इति भावः ॥ उद्गीथेति ॥ ''ॐमित्येतदक्षरमुद्गीथमुपासीते''त्यादीनां सामभक्तित्वादिति भावः । तदर्थत्वात् ज्ञानार्थत्वात् । ''कर्मणा ज्ञानमातनोती''त्यादेरिति भावः । कथं तर्हि गतार्थतानिरास इत्यतः स्वयमाह ॥ तस्मादिति ॥ ''शब्दजातस्य सर्वस्य यत्प्रमाणश्च निर्णय'' इति स्मृतेरिति भावः । उक्तं च सुधायामेवमेव समाधानं ''स एव सर्ववेदार्थ'' इत्यादि व्याख्यावसरे ।

पाण्डुरङ्गि – ननु पूर्वमीमांसया गतार्थत्वान्न ब्रह्ममीमांसाऽऽरब्धव्येत्यतः परोक्त-गतार्थत्वपरिहारं दूषयितुमनुवदति ॥ यदिति ॥ गतार्थत्वमिति ॥ सर्वस्यापि वेदस्य कर्मपरत्वेन कर्ममीमांसायामेव विचारितत्वेन ब्रह्ममीमांसावैयर्थ्यमितिभावः । तद्विधिविचार-स्येति ॥ सविशेषब्रह्मोपासनाविधिविचारस्येत्यर्थः । ननूपासनाया मोक्षसाधनत्वात्तद्विचार इह क्रियत इत्यत आह ॥ न चेति ॥ ननूपासनाया वस्तुतत्वविद्यया साकं मानसत्वेन साम्यान्न तद्विचारस्यात्रासङ्गतिरित्यत आह ॥ त्वन्मते हीति ॥ विद्यासाम्येपीति ॥ ज्ञानत्वेन रूपेण साम्येपीत्यर्थः । तथाच ज्ञानत्वसाम्यादिहविचारश्चेत्तर्ह्यनित्यफलत्वहेयत्वातत्वावेदकवेद्यत्वा-दिरूपेण कर्मसाम्यात्तत्रैव विचारः कर्तव्य इति भावः । उपासनाया मानसत्वेन विद्यासा-म्यात् । कर्मणां च विद्यासाम्याभावान्न तद्विचारस्यात्र सङ्गतिरित्यत आह ॥ मानससङ्कल्प-तयेति ॥ यागस्य देवतामुद्दिश्य द्रव्यत्यागरूपत्वात् त्यागस्य मानससङ्कल्पविशेषरूपत्वेन कर्मणामपि मानसत्वेन विद्यासाम्यात् तेषामप्यत्र विचार्यत्वापत्तिरिति भावः । स्वमते गतार्थत्वं परिहरति ॥ तस्मादिति ॥ तथाच पूर्वमीमांसादौ सर्ववेदविचाराभावान्न गतार्थत्वमिति भावः । सर्वस्याप्यत्र विचार्यत्वे कर्ममीमांसादेर्वैयर्थ्यमित्यत आह ॥ कर्मेति ॥ तथाच तयोर्महातात्पर्यविषयब्रह्मविचाराकरणान्नानयोर्गतार्थत्वमिति भावः ।

तात्पर्यचन्द्रिका

यदपि परैर्ब्रह्मणो जिज्ञास्यत्वार्थमेव प्रत्यगर्थेहमस्मीति प्रत्यक्त्वरूपेण सामान्येन प्रतिपत्तिः । चार्वाकादीनामहमर्थे देहेन्द्रियमनःशून्यब्रह्मत्वादिविप्रतिपत्तेः विशेषवि-प्रतिपत्तिश्चेत्युक्तम् । तद्व्यधिकरणम् । प्रत्यगर्थएव ब्रह्मेति चेदस्तु तावत् । तथापि न तावद्बिम्बं ब्रह्मजिज्ञासाधर्मि । प्रतिबिम्बे तु सामान्यप्रतिपत्त्यादीति युक्तम् । प्रतिबिम्बमात्रे विप्रतिपत्त्या बिम्बे जिज्ञासाऽदर्शनेन ब्रह्मोद्दिश्य प्रत्यगर्थाभेदादि-विधानाय ब्रह्मण्येव तयोर्वक्तव्यत्वात् । नापि देहत्वादिना विप्रतिपन्नः प्रतिबिम्बः प्रत्यगर्थ एव जिज्ञासाधर्मी प्रतीचो ब्रह्मत्वेन जिज्ञासाच ब्रह्मजिज्ञासेति युक्तम् । लोके निश्चितेन धर्मिणे वानिश्चितेन प्रकारेण विशिष्य विचारपदाप्रयोगेण सूत्रेऽश्रुत-प्रत्यक्पदकल्पनापातात् । धर्मजिज्ञासेत्यादाविव श्रुतस्य ब्रह्मपदस्य कस्य कथं विचार इति प्रथमाकाङ्क्षितप्रधानधर्मिपरत्वसम्भवे तत्त्यागेन तद्विपरीतप्रकारपरत्वायोगेन श्रुतहानापाताच्च । विरुद्धांशत्यागेन मुखमात्रस्येव चिन्मात्रस्यैवाभेदस्वीकारेण

विशिष्टयोर्बिम्बप्रतिबिम्बयोरभेदाभावेन ब्रह्माभेदविधानाय तस्योद्देश्यत्वासम्भवाच्च । किं च धर्मिण्यतदारोपनिवृत्त्यर्थत्वाल्लक्षणस्योत्तरसूत्रे प्रत्यगर्थ एव ब्रह्मत्वेन लक्षणीयं स्यात् । न हि वस्तुतः पुरुषे इदंत्वादिना ज्ञायमाने स्थाणुत्वाद्यारोपः करचरणादि-मानुपुरुष इति पुरुषलक्षणोक्त्या निवर्तते । किंत्वयं पुरुषइत्याद्युक्त्या । न च जिज्ञासुना प्रतीचो ब्रह्मत्वं निश्चितम् । येन ब्रह्मणि लक्षिते प्रतीचिब्रह्मलक्षण-विरोध्याकारो मिथ्येति ज्ञायेत । नापि लक्षणं प्रतीचो साधारणधर्मतया तेन निश्चितम् । येन ब्रह्मणि तत्कथनमुखेन ब्रह्माभेदो ज्ञाप्येत । त्वत्पक्षेपि ''शारीरश्चोभयेपि हि भेदेनैनमधीयते । प्राणभृच्च । अधिकं तु भेदनिर्देशा''दित्यादौ जन्मादिसूत्रोक्तलक्षणस्य जीवे निषेधात् ।

प्रकाशिका – ननु च यदि ब्रह्मप्रसिद्धं न जिज्ञासितव्यमथाप्रसिद्धं तर्हि न जिज्ञासितुं शक्यमित्याशङ्क्य जिज्ञासाधर्मिणि तदुपयुक्तसामान्यप्रतिपत्ति सिद्धिविशेषविप्रतिपत्ती स्वमतेन दर्शयिष्यन्परोक्ते अनूद्य निरस्यति ॥ यदपीति ॥ देहमात्रं चैतन्यविशिष्टमहमर्थ इति चार्वाकाः । इन्द्रियाण्येवेत्यपरे । मन एवेत्यन्ये । शून्यमेवेत्येके । ब्रह्मैवेति कश्चित् । एवं बहूनां नानात्वेन विप्रतिपत्तेरित्यर्थः ॥ तद्व्यधिकरणमिति ॥ अहमर्थे त्वंपदार्थे सामान्य-प्रतिपत्तिविशेषविप्रतिपत्त्योः सत्त्वेपि जिज्ञास्यब्रह्मणि तत्पदार्थे तयोरप्रदर्शनादिति भावः । नन्वत एव परभाष्ये ''आत्मा च ब्रह्मे''त्युक्तमित्याशङ्कते ॥ प्रत्यगर्थ एवेति ॥ उक्तं च भामत्यां ''तत्पदार्थस्य शब्दतस्त्वंपदार्थस्य प्रत्यक्षतः प्रसिद्धेस्त्वंपदार्थस्य तत्पदार्थ-ब्रह्मभावावगम'' इति । प्रत्यगर्थस्य ब्रह्माभेदो यद्यपि सौत्रब्रह्मपदेनैव निरस्तः । तथाप्यङ्गी-कृत्य दूषयति ॥ अस्त्विति ॥ तत्त्वंपदार्थयोस्तत्त्वमसीत्यनेनाभेदावगमो हि त्रेधा । तत्पदार्थं बिम्बभूतं ब्रह्मोद्दिश्य त्वंपदार्थप्रत्यगर्थाभेदविधानेन वा त्वंपदार्थमुद्दिश्य तत्पदार्थाभेदविधानेन वोभयत्र विरुद्धांशत्यागेनैक्यमात्रविधानेन वा । तत्राद्ये जिज्ञासाधर्मी तत्पदार्थो ब्रह्मैव । तस्य प्रत्यगभिन्नत्वेन जिज्ञासा ब्रह्मजिज्ञासा द्वितीये प्रत्यगर्थो जिज्ञासाधर्मी । तस्य ब्रह्मत्वेन जिज्ञासा ब्रह्मजिज्ञासा । तृतीये बिम्बमेव जिज्ञासाधर्मिविशेष्यमेकमिति तज्जिज्ञासा ब्रह्मजि-ज्ञासेति पक्षत्रयं हृदि निधायाद्यं निरस्यति ॥ तथापीति ॥ अभेदाङ्गीकारेपि वैयधिकरण्यमेवेत्यर्थः । तयोः सामान्यप्रसिद्धिविशेषविप्रतिपत्त्योः । द्वितीयमनूद्य निरस्यति ॥ नापीति ॥ प्रतीचः प्रत्यक्चैतन्यस्य । जिज्ञासाधर्मित्वेन निश्चितत्वात्पुरोवृत्तिजिज्ञा-

साधर्म्यजिज्ञासेत्यादिवत्प्रत्यग्जिज्ञासेत्येवसूत्रं स्यान्नतु ब्रह्मजिज्ञासेति । ब्रह्मत्वप्रकारस्यानिश्चितत्वादित्यर्थः ॥ श्रुतेति ॥ प्रकारार्थस्य ब्रह्मपदस्य हानिः स्यादित्यर्थः । किंचास्मिन्पक्षे प्रत्यगर्थं विशिष्टमुद्दिश्य विशिष्टब्रह्माभेदो विधेयः । न चैवं युक्तम् । चिन्मात्रैक्याङ्गीकारादित्याह ॥ विरुद्धेति ॥ तस्य प्रत्यगर्थस्य । तथाच प्रत्यगर्थे विशेष्यभूतं चिन्मात्रमेवोद्देश्यमिति तत्रैव सामान्यप्रसिद्ध्यादिदर्शनीयं न तु विशिष्ट इति तत्र तत्प्रदर्शनं व्यधिकरणमिति भावः । अयं दोष आद्यपक्षेपि समः । तत्रापि विशिष्टस्य ब्रह्मण उद्देश्यत्वासम्भवस्य वक्तुं शक्यत्वात् । तथाच ब्रह्माभेदेत्युपलक्षणम् । प्रत्यगभेदविधानायेत्यपि ग्राह्यम् । तस्येत्यस्य ब्रह्मण इत्यर्थः । तथा च तच्छब्देन तस्य प्रसिद्ध्युपदर्शनं व्यधिकरणमित्यपि ध्येयम् । एवं द्वितीये पक्षे ब्रह्मपदास्वारस्यमुक्त्वा द्वितीयसूत्रास्वारस्यमाह ॥ किं चेति ॥ जिज्ञास्येऽतदाकारारोपनिवृत्त्यर्थं लक्षणं प्रत्यगर्थश्च जिज्ञास्य इति तत्राब्रह्मत्वारोपनिवृत्तये प्रत्यग्ब्रह्मेति लक्षणसूत्रं स्यात् । न तु जन्मादिकारणत्वेन ब्रह्मलक्षणीयम् । तस्य व्यधिकरणत्वादित्यर्थः । ननु प्रत्यगर्थस्यैव वस्तुतो ब्रह्मत्वाद् ब्रह्मलक्षणोक्त्या प्रतीच्य तदाकारनिवृत्तिर्ज्ञायत इत्याशङ्क्य वैयधिकरण्यमेव दृष्टान्तेनाह ॥ न हीति ॥ तथाच प्रतीचिप्रत्यगर्थेऽहंत्वादिना ज्ञायमाने देहेन्द्रियाद्यात्मकत्वारोपो जगत्कारणं ब्रह्मेत्याद्युक्त्या न निवर्तते । किन्तु प्रत्यक् ब्रह्मेत्युक्त्येति भावः । तेन जिज्ञासुना ॥ ब्रह्मणीति ॥ प्रत्यगसाधारणधर्मतया ज्ञातस्य ब्रह्मणि कथने प्रत्यग्ब्रह्मणि कथने प्रत्यग्ब्रह्मणोरैक्यं ज्ञाप्येतेति भावः । प्रत्यगसाधारणधर्मत्वेनानिश्चितत्वे हेतुमाह ॥ त्वत्पक्षेपीति ॥

पाण्डुरङ्गि – ननु विचारे सामान्यविप्रतिपत्तिर्विशेषविप्रतिपत्तिश्च कारणम् । प्रकृते तदभावात्कथं ब्रह्मणो जिज्ञास्यत्वमित्यतः परोक्तं सामान्यप्रतिपत्त्यादिकं दूषयितुमनुवदति ॥ यदपि परैरिति ॥ तद्व्यधिकरणमिति ॥ सामान्यप्रतिपत्त्यादेर्जिज्ञास्यत्वसमानाधिकरणस्यैव दृष्टत्वेन जिज्ञास्यब्रह्मण्येव तयोर्वक्तव्यत्वेन प्रत्यगर्थे तदुपपादनस्य व्यधिकरणत्वादित्यर्थः । ननु न वैयधिकरण्यम् । प्रत्यगर्थस्यैव ब्रह्मत्वादित्याशयेन शङ्कते ॥ प्रत्यगर्थ एवेति ॥ अस्तु तावदिति ॥ वैयधिकरण्यपरिहार इति शेषः । प्रत्यगर्थ एव ब्रह्मेति वदतः कोऽभिप्रायः । ब्रह्मण एव जिज्ञासाधर्मित्वेपि ब्रह्मप्रत्यगर्थयोर्बिम्बप्रतिबिम्बभावेनैक्यात् प्रत्यगर्थे सामान्यप्रतिपत्त्यादिकं न व्यधिकरणमिति वा उत प्रत्यगर्थस्यैव जिज्ञासाधर्मित्वेन सामान्यप्रतिपत्त्यादेश्च तत्रैव सत्त्वेन न वैयधिकरण्यमिति अथवा चिन्मात्रे विप्रतिपत्तिः ब्रह्मण एव

(पाण्डुरङ्गि)

जिज्ञासाधर्मित्वमिति वा उत प्रत्यगर्थस्यैव जिज्ञासाधर्मित्वेन सामान्यप्रतिपत्त्यादेश्च तत्रैव सत्त्वेन न वैयधिकरण्यमिति अथवा चिन्मात्रे विप्रतिपत्तिः ब्रह्मण एव जिज्ञासाधर्मित्वमिति वा चिन्मात्रे विप्रतिपत्त्या चिन्मात्रमेव जिज्ञासाधर्मीति वा जिज्ञासाधर्मिणि ब्रह्मण्येव प्रतीचोन्यत्रवेति विप्रतिपत्त्या न वैयधिकरण्यमिति वा । नाद्य इत्याह ॥ न तावदिति ॥ प्रतिबिम्बमात्र इति ॥ बिम्बभूतब्रह्माभिन्नत्वेनाज्ञात इत्यर्थः । अयं भावः । प्रत्यगर्थ निष्ठ-विप्रतिपत्त्यादेर्ब्रह्मणो जिज्ञास्यत्वोपयुक्तत्वं तदा स्यात् यदि ब्रह्मणः प्रत्यगर्थाभेदो ज्ञायेत । अन्यथाऽतिप्रसङ्गात् । तज्ज्ञापनं च तज्जिज्ञासापूर्वमेव । जिज्ञासा च विप्रतिपत्त्यादिपूर्विका । तथा च तादृशजिज्ञासोपयुक्तविप्रतिपत्त्यादिकं ब्रह्मण्येव वाच्यमिति । न द्वितीय इत्याह ॥ नापीति ॥ देहत्वादिनेति ॥ आदिशब्देनेन्द्रियत्वादिकं ग्राह्यम् । ननु प्रत्यगर्थस्य जिज्ञासाधर्मित्वे ब्रह्मजिज्ञासेत्यनुपपन्नम् । तत्र ब्रह्मणो जिज्ञासाधर्मित्वस्य प्रतीतेरित्यत आह ॥ प्रतीच इति ॥ तथाच ब्रह्मशब्दो ब्रह्मत्वरूपप्रकारपरो न तु धर्मिपर इति भावः । एवं तर्हि लोके पुरोवर्तिविचारः कर्तव्य इति निश्चितधर्मिपुरस्कारेण विचारपदप्रयोगा-दनिश्चितप्रकारपुरस्कारेण विचारपदप्रयोगाभावेन ब्रह्मत्वरूपप्रकारस्य निश्चितत्वेन प्रत्यक् जिज्ञासेति सूत्रं स्यान्नतु ब्रह्मजिज्ञासेति । तथाश्रुतकल्पनं स्यादित्याह ॥ लोक इति ॥ न केवलमश्रुतकल्पनं श्रुत- हानमपीत्याह ॥ धर्मेति ॥ ननु जीवस्य ब्रह्मत्वाज्जीवमुद्दिश्य तस्य ब्रह्माभेदो बोध्यते । न च सिद्धत्वात्तद्बोधनमयुक्तमिति वाच्यम् । जीवत्वोपलक्षित-चिन्मात्राभेदस्यासिद्धत्वादित्यत आह ॥ किं चेति ॥ ननु प्रत्यगर्थस्य ब्रह्मत्वाद् ब्रह्मलक्षणे उक्ते जीवे धर्मिण्यारोपिता तदाकारनिवृत्तिर्भविष्यतीत्यत आह ॥ न हीति ॥ ननु पुरुषस्य निर्णीतत्वे लक्षणोक्तौ सत्यामभेदारोपनिवृत्तिवत् प्रकृतेपि ब्रह्मलक्षणोक्त्या तदारोप-निवृत्तिर्भविष्यतीत्यत आह ॥ न चेति ॥ ननु ब्रह्मलक्षणकथनमुखेन ब्रह्माभेद- ज्ञानार्थं लक्षणं कथ्यत इत्यत आह ॥ नापीति ॥ न केवलं ब्रह्मलक्षणं जीवेनोपपद्यते । अपि तु त्वयापि ब्रह्मलक्षणं जीवे निषिद्धमित्याह ॥ त्वत्पक्षेपीति ॥

तात्पर्यचन्द्रिका

अत एवोभयानुगतचिन्मात्रे तत्वंपदलक्ष्ये विप्रतिपत्तिः जिज्ञासाधर्मि तु बिम्बं ब्रह्मचिन्मात्रमेवेति प्रत्युक्तम् । विशेष्यमात्रे विप्रतिपत्त्या विशिष्टधर्मिकविचारा-दर्शनात् । विशिष्टस्य मुमुक्षुभिरविचार्यत्वाच्च । चिन्मात्रे देहत्वादिविप्रतिपत्तेर-

भावाच्च। सौत्रब्रह्मशब्दास्वारस्याच्च । अथ जिज्ञासाधर्मिणि ब्रह्मण्येव प्रतीचोन्यन्नवेति विप्रतिपत्तेर्न वैयधिकरण्यम् । तर्हि भवदीयभाष्ये इह सूत्रे प्रतीचिदेहत्वादिविप्रतिपत्त्युक्तिः । उत्तरसूत्रे जीवाद्भेदकस्य लक्षणस्योक्तिश्चायुक्ता ।

प्रकाशिका – एवं द्वितीयपक्षं निरस्येदानीं तत्त्वंपदलक्ष्यचिन्मात्रैक्यमिति तृतीयं निराह ॥ अत एवेति ॥ चिन्मात्र एव विप्रतिपत्त्या तत्रैक्यविधानं युक्तमिति भावः ॥ बिम्बं ब्रह्मेति ॥ तथाच ब्रह्मजिज्ञासेति व्यपदेशो लक्षणसूत्रं च युज्यत इति भावः । सामानाधिकरण्यायाह ॥ चिन्मात्रमेवेति ॥ अत एवेत्युक्तं वैयधिकरण्यं व्यनक्ति ॥ विशेष्येति ॥ विशिष्टस्येति ॥ तस्य मिथ्यात्वादिति भावः । निर्विशेषज्ञानार्थत्वेन विशिष्टविचारस्त्वंतरधिकरणे निरसिष्यत इति भावः ॥ चिन्मात्र इति ॥ तदीयभाष्ये त्वंपदार्थे विशिष्टेहमर्थ एव ''देहमात्रं चैतन्यविशिष्टमात्मेति प्राकृता जना'' इत्यादिना विप्रतिपत्त्युक्तेः । तत्पदार्थे च विशिष्ट एव ''अस्ति तद्व्यतिरिक्तईश्वरस्सर्वज्ञः सर्वशक्तिरिति केचि''दित्यादिना विप्रतिपत्त्युक्तेः चिन्मात्रे भावादित्यर्थः । एतेन चिन्मात्रमेव जिज्ञासाधर्मीति पक्षोपि प्रत्युक्तो ध्येयः ॥ ब्रह्मशब्देति ॥ चिन्मात्रमेव ब्रह्मेत्यङ्गीकारेण बिम्बे विशिष्टे जिज्ञासाधर्मिणि ब्रह्मशब्दो न स्वरस इत्यर्थः । ननु ''अस्ति तावद् ब्रह्म नित्यशुद्धे''त्यादि परभाष्ये भामत्यामागमादापाततो ब्रह्मणि सामान्यप्रसिद्ध्युक्तेः ''अस्ति तद्व्यतिरिक्त'' इत्यादिभाष्यव्याख्यावसरे च ''तत्पदार्थे विप्रतिपत्तिमाहे''त्यवतारिकापूर्वं जीवादिभिन्नत्वेन विप्रतिपत्त्युक्तेर्जिज्ञासाधर्मिणि ब्रह्मण्येव सामान्यप्रसिद्धिविशेषविप्रतिपत्ती स्त इति न कोपि दोष इत्याशङ्क्य निराह ॥ अथेति ॥ न वैयधिकरण्यमित्युपलक्षणम् । ब्रह्मजिज्ञासेति व्यपदेशश्च युक्त इति ध्येयम् ॥ तर्हीति ॥ नन्विह सूत्रे प्रतीचिदेहत्वादिविप्रतिपत्तिर्नायुक्ता । तस्या जिज्ञासाधर्मिब्रह्मणि विप्रतिपत्तिसूचन एव तात्पर्यात् । उक्तं च भामत्यां ''त्वंपदार्थविप्रतिपत्तिद्वारा तत्पदार्थे विप्रतिपत्तिं सूचयित्वे''ति । तथाच न दोष इति चेदयमाशयः । जीवभेदाभेदविप्रतिपत्तौ त्वन्मते ब्रह्मविचारपरे द्वितीयसूत्रे जीवाभेदस्यैव वाच्यत्वेन भेदकलक्षणोक्तिरयुक्तेति तत्कथनं व्यधिकरणम् । अत एवोक्तमुत्तरसूत्र इत्यादि । किं च ब्रह्मणि सामान्यप्रसिद्धिः किं विशिष्टे उत निर्विशेषे । नाद्यः । तस्य प्रत्यगभेदाभावेनोद्देश्यत्वाभावात्तदुद्दिश्य जीवाभेदविधानायोगात् । मुमुक्षुभिरजिज्ञास्यत्वाच्च । भाष्ये नित्यशुद्धबुद्धमुक्तस्वभावमित्यनौपाधिके ब्रह्मणि प्रसिद्धिप्रदर्शनायुक्तेश्च । न द्वितीयः । तत्र

विप्रतिपत्त्यभावात् । त्वयापि विशिष्ट एव तत्प्रदर्शनाच्च । ''सर्वज्ञं सर्वशक्तिसमन्वित''मिति विशिष्टे प्रसिद्धचुत्त्ययुक्तेश्च । तस्यावेद्यत्वेन शब्दात्प्रतीत्ययोगाच्च । एतेन वेदादेवापाततो ब्रह्म सविशेषं क्वचिन्निर्विशेषं च प्रतीतमिति विरुद्धवाक्यद्वयाद्विप्रतिपत्तिः । अत एव भाष्ये द्विविधब्रह्मरूपप्रदर्शनमिति निरस्तम् । भाष्ये केचिदिति वादिविप्रतिपत्त्युत्त्ययोगादिति । एतेनैतदधिकरणान्तर्गतं ''एतेनैतदपि परास्त''मित्यादिना ''नैवं सूत्रकार आहेत्यल'' मित्यंतं सामान्यप्रसिद्धयादिप्रदर्शकपरभाष्यखण्डनपरं सुधावाक्यं विवृतं भवति ।

पाण्डुरङ्गि – न तृतीयचतुर्थावित्याह ॥ अत एवेति ॥ तत्त्वंपदलक्ष्य इति ॥ प्रत्यगर्थ एव विप्रतिपत्त्यादेस्सत्त्वेन तदलक्ष्ये तदभावादित्यर्थः । अत एवेति परामृष्टं हेतुमाह ॥ विशेष्यमात्र इति ॥ चिन्मात्रं धर्मीत्युक्तं दूषयति ॥ चिन्मात्र इति ॥ तस्य देहादिभिन्नत्वादेर्निर्णीतत्वात् तद्विचारवैयर्थ्यमिति भावः ॥ सौत्रब्रह्मशब्देति ॥ ब्रह्मशब्दस्य विशिष्टपरत्वेन चिन्मात्रपरत्वेऽस्वारस्य- मित्यर्थः । नापि पञ्चम इत्याह ॥ अथेति ।

तात्पर्यचन्द्रिका

एतेन भास्करीयं जगत्कारणे प्रधानत्वादिविप्रतिपत्तिप्रदर्शनं निरस्तम् । आद्यसूत्रे कारणपदस्योत्तरसूत्रे तल्लक्षणस्य च कर्तव्यत्वप्रसङ्गात् । किं च ज्ञातं सामान्यतोऽज्ञातं विशेषेण विचार्यते । ज्ञाताज्ञातविभागस्तु निर्विशेषेन युज्यते । उक्तं चानुव्याख्याने ''इदमित्थमिति ज्ञानं जिज्ञासायाः प्रयोजन''मिति । तस्माद्वेदान्तादिनाऽऽपातप्रतीते ब्रह्मणि सगुणनिर्गुणाल्पगुणत्वादिना विप्रतिपत्तेर्जिज्ञास्यत्वमिति । तदुक्तमनुव्याख्याने-

''तस्माच्छास्त्रेण जिज्ञास्यमस्मदीयं गुणार्णवम् ।
वासुदेवाख्यमद्वन्द्वं परं ब्रह्माखिलोत्तम''मिति ॥ १ ॥

टीकाशेषाक्षरार्थस्तु नामानि सर्वाणीति श्रुतावनृतस्येत्यनेन ऋतशब्दवाच्याद्विष्णोरन्यद्विवक्षितमित्याह ॥ विष्णिवतरस्येति ॥ लक्ष्म्या ब्रह्मादीनां स्वाधीनत्वोक्तेरिति ॥ अस्य सूक्तस्यांभ्रणीदेवताकत्वात् अंभ्रण्याश्च लक्ष्मीमूर्तित्वादिति भावः ॥ हरिवंशत्रयेति ॥ हरिवंशे भागत्रयं विवक्षितम् । नटनं वंचनं वेति ॥

विद्यमानाकाराच्छादनेनाविद्यमानाकारान्तरप्रदर्शनं नटनम् । वञ्चनं त्वविद्यमानकथनम् । काप्यविद्यमानलिङ्गमूलान्वेषणादिकं अतथ्यम् । विष्ण्वादौ विद्यमानं रुद्रादिनिष्ठतयोच्यमानं स्वातन्त्र्यादिकं वितथ्यम् । शिष्टं सुगमम् । इति श्रीमद्ब्रह्मण्यतीर्थपूज्यपादशिष्यश्रीमद्व्यासतीर्थमुनिविरचितायां तात्पर्यचन्द्रिकायां जिज्ञासाधिकरणं सम्पूर्णम् ॥ १ ॥

प्रकाशिका – कारणजिज्ञासेत्येव स्यात् द्वितीयसूत्रेपि जिज्ञास्यस्य कारणस्यैव लक्षणं स्यात् न तु ब्रह्मण इत्यर्थः । विप्रतिपत्त्यभावाच्चिन्मात्रे न जिज्ञासेत्युक्तं इदानीं सामान्यज्ञानविशेषज्ञानाभ्यां जिज्ञासा न च ते निर्धर्मिके स्त इत्याह ॥ किं चेति ॥ विशेषेणाज्ञातमित्यन्वयः ॥ इदमित्थमिति ॥ इदमिति सामान्यज्ञानमित्थमिति विशेषज्ञानं वदता ज्ञानं सामान्यत इत्यादिसूचितमिति भावः । एवं परमते जिज्ञासोपयुक्तसामान्यप्रसिद्ध्यादि निरस्य स्वमतेन तदाह ॥ तस्मादिति ॥ आपातेति ॥ विचारात्प्रागेव सिद्धार्थबोधकोपनिषद्भाष्यादिना प्रतीत इत्यर्थः ॥ तदुक्तमिति ॥ ईक्षत्यधिकरण इति ध्येयम् । गुणार्णवमित्युक्त्या सगुणत्वादिप्रतिपत्तिः । वासुदेवमित्युक्त्या शिवत्वादिविप्रतिपत्तिः सूचिता । एवं पदान्तरैरपि द्रष्टव्यम् । दुर्गमानि कानिचिद्वाक्यानि व्यनक्ति ॥ टीकाशेषाक्षरार्थस्त्विति ॥ व्याख्यातावशिष्टाशेषेत्यर्थः । शेषाक्षरार्थ इति वा ॥ नामानीति ॥ विश्वेत्यस्यार्थानुवादः सर्वाणीति ॥ इति श्रीमद्राघवेन्द्रतीर्थपूज्यपादविरचिते तात्पर्यचन्द्रिकाप्रकाशे जिज्ञासाधिकरणं सम्पूर्णम् ॥ १ ॥

पाण्डुरङ्गि –आद्यसूत्रे कारणेति ॥ लोके निश्चितेन धर्मिणेवानिश्चितेन प्रकारेण विशिष्यविचारपदाप्रयोगेण सूत्रे अश्रुतकारणपदकल्पकापातात् ॥ उत्तरसूत्र इति ॥ धर्मिण्यतदारोपनिवृत्त्यर्थत्वाल्लक्षणस्योत्तरसूत्रे कारणमेव ब्रह्मत्वेन लक्षणीयं स्यादित्यर्थः । तथाच ब्रह्मलक्षणकथनमसङ्गतमिति भावः । किं च सामान्यतो ज्ञातस्य विशेषतोऽज्ञातस्य विषयत्वेन त्वन्मते सामान्यविशेषभावाभावान्न तस्य जिज्ञास्यतेत्याह ॥ किं चेति ॥ न च जिज्ञासाया निर्विशेषज्ञानसाधनत्वाज्जिज्ञासाऽऽवश्यकीति वाच्यम् । तत्तच्छब्दसमन्वयेन गुणविशेषलाभेन विशेषज्ञानस्यैव साधनत्वं न तु विशेष- ज्ञानस्येत्यत्रानुव्याख्यानसंमतिमाह ॥ उक्तंचेति ॥ ननु परोक्तसामान्यप्रतिपत्तिविशेषप्रतिपत्त्योर्दूषितत्वेन तयोरभावात् प्रयोजकाभावेन भवन्मते कथं विचारारम्भ इत्यत उपसंहारव्याजेन ते दर्शयति ॥ तस्मादिति ॥

(पाण्डुरङ्गि)

अत्रानुव्याख्यानसंमतिमाह ॥ तदुक्तमिति ॥श्रुतिस्थानृतशब्दस्य मिथ्यात्वमर्थः प्रतीयते तद्धारणाय टीकायामनृतस्य विष्णिवतरस्येति व्याख्यातं तत्कथं शब्दलभ्यमित्यत आह ॥ नामानीति ॥ ऋतशब्देति ॥

''ऋगताविति धातोस्तु पूर्वावगतवत्सदा ।
स्थितेर्ब्रह्मर्तमित्युक्तमनृतं परिणामत''॥

इति वचनादिति भावः । ननु ब्रह्मादीनां लक्ष्म्यधीनत्वं कुतः सूक्तद्रष्टृदेवताधीनत्वमेव किं न स्यादित्यत आह ॥ अस्येति ॥ भागत्रयमिति ॥ खिलाखिलपारिजातविवक्षयेत्यर्थः। नटनवंचनशब्दिते अतथ्यवितथ्येत्वर्थनिष्ठे इति भेद इति द्रष्टव्यम् ॥ इति श्रीमद्गुरुराजानुग्रह-पात्रभूतपांडुरंगीकेशवाचार्यविरचिते तात्पर्यचन्द्रिकाभावदीपे जिज्ञासाधिकरणं सम्पूर्णम् ॥१॥

अथ जन्माधिकरणम्

ॐ जन्माद्यस्य यतः ॐ ॥

जिज्ञासाकारणीभूतगुणपूर्तिप्रसिद्धये ।
जीवादिभेदकं विष्णोर्विश्वकर्तृत्वमुच्यते ॥

पूर्वोक्तजिज्ञासाक्षेपेणेह पूर्वपक्षोत्थानात्पूर्वाधिकरणेनाक्षेपिकी सङ्गतिः चिन्तायाः सफलत्वं च । सुधायां तु आद्यसूत्रे साधनादिसहितं ब्रह्मविचार्यमित्युक्तम् । तत्र साधनफलयोर्ब्रह्मज्ञानसाधनं ब्रह्मज्ञानफलमिति ब्रह्मोपहितत्वेन तज्ज्ञानाधीन-ज्ञानत्वात् ब्रह्मणश्च साधनादिज्ञानाधीनज्ञानत्वाभावादभ्यर्हितत्वाच्चादौ तज्जिज्ञासैव प्राप्ता । साच लक्षणप्रमाणाभ्याम् । तत्रापि लक्षणविशिष्टे प्रमाणाकाङ्क्षेति लक्षणस्य प्राथम्यमिति प्रकारान्तरेणाधिकरणसङ्गतिरुक्ता ।

प्रकाशिका – ॐ जन्माद्यस्य यतः ॐ ॥ पूर्वाधिकरणेन सङ्गतिप्रयोजने सूचयन्नधि-करणप्रमेयं सङ्गृह्णाति ॥ जिज्ञासेति ॥ श्लोकस्य द्विरूपतां व्यनक्ति ॥ पूर्वोक्तेति ॥ यावज्जीवभेदकं नोच्यते तावदत्र श्रुतौ रूढित्यागे बाधकाभावेन ब्रह्मपदाद्योगासिद्धया गुणपूर्त्यसिद्धेर्न जिज्ञासा युक्तेति पूर्वपक्षे तदाक्षेपात्सङ्गतिः । गुणपूर्तिप्रसिद्धिद्वारा

जिज्ञासासिद्धिः फलमित्यर्थः । यद्यपि ब्रह्मपदलब्धं गुणपूर्णत्वमेव भेदकं तथापि विश्वकर्तृत्वरूपधर्मेण समस्तवस्तुव्यावृत्ततयाऽवगत एव ब्रह्मणि पूर्णगुणत्वं सिध्यतीति तदुपपादकतयैतदुक्तिः । अत एव गुणपूर्तिप्रसिद्धय इत्युक्तम् । उक्तं च सुधायां ''अनेन लक्षणेन लक्षिते ब्रह्मणि समस्तगुणपूर्णत्वं प्रधानलक्षणं सिध्यती''ति । एतेन ''श्रुत्यादि-सङ्गतिस्त्वि''ति सङ्गतिटीका विवृता । सङ्गत्यन्तरमप्यत्रानुसन्धेयमिति भावेनाह ॥ सुधायांत्विति ॥ प्रकारान्तरेणेति ॥ तेन सुधाविरोधः प्रत्युक्तः ।

पाण्डुरङ्गि – ॐ जन्माद्यस्य यतः ॐ ॥ पूर्वाधिकरणसङ्गतत्वेनैतदधिकरण-प्रतिपाद्यमाह ॥ जिज्ञासेति ॥ तथापि का सङ्गतिरुक्तेति न प्रतीयते अत आह ॥ पूर्वोक्तेति ॥ ननु यद्यस्याधिकरणस्य पूर्वाधिकरणेन तदुक्तजिज्ञासाक्षेपेण पूर्वपक्षोत्थानेनाक्षेपकीसङ्गतिः सूच्यते तदा सुधाविरोधः स्यात् तत्र भिन्नाया एव सङ्गतेरुक्तत्वादित्यतः सुधोक्तस्य प्रकारान्तरत्वात् प्रकारान्तरस्य प्रकारान्तरादूषकत्वान्न विरोध इत्यभिप्रायेण सुधोक्तं प्रकारान्तरमाह ॥ सुधायां त्विति ॥ तत्र साधनफलयोरिति ॥ अननुसंहितोपाधेरुपहितप्रत्ययायोगादिति भावः ॥ प्रकारान्तरेणेति ॥ अनेन प्रपंच्यप्रपञ्चकभावलक्षणा सङ्गतिरुक्ता भवति ।

तात्पर्यचन्द्रिका

अत्र ''तद्विजिज्ञासस्व तद् ब्रह्मे''ति वाक्यस्थं ब्रह्म किं जीव उत विष्णुरिति चिन्ता । तदर्थं ब्रह्मशब्दस्य रूढ्यर्थजीवत्यागेन यौगिकार्थविष्णुग्रहणे हेतुर्नास्त्युतास्तीति । तदर्थं विध्युद्देशस्थब्रह्मशब्दस्वारस्याय ''यतो वे''त्यादि पूर्ववाक्यं किं जीवे कथंचिन्नेतुं शक्यमुताशक्यमिति । पूर्वपक्षस्तु जीव एवेदं ब्रह्म । ''बृहजाति-जीवे''त्यभिधानाद् ब्रह्मशब्दस्य तत्र रूढेः । विष्णौ तु यौगिकत्वात् । रूढेश्चावयवार्थनिरपेक्षायास्तत्सापेक्षयोगाद् बलीयस्त्वस्य रथकारादिशब्देषु स्थितत्वात् । प्रोक्षण्यादिशब्देषु तु क्लृप्तो योगः । अक्लृप्ता रूढिः । न च जीवेपि योगाङ्गीकाराद्रूढिरक्लृप्तेति वाच्यम् । यौगिकार्थस्य गुणपूर्तेर्जीवेऽसम्भवात् । सम्भवे वा जिज्ञास्यत्वेनाभिमतस्य जीवाद्भेदासिद्धेः । गुणपूर्तितोन्यस्य यौगिकार्थत्वे तु जिज्ञास्यस्यापि गुणपूर्त्यसिद्धिः ।

प्रकाशिका – इति वाक्यस्थमिति ॥ सुधायां क्वचिदपि विष्णुपरत्वानङ्गीकारेण पूर्वपक्ष-प्रवृत्तावपीह टीकायां तदेवेत्यादिवाक्यान्तरस्थब्रह्मशब्दस्य विष्णुपरत्वमुपेत्यैतद्वाक्यस्थस्य विष्णुपरत्वाक्षेप इति द्योतयितुमिति वाक्यस्थं ब्रह्म विषय इत्युक्तं । किं जीव इति ॥ जात्यादेरिहायोग्यतापराहतत्वादिति भावः । यदि जीवे नेतुं शक्यं तदा यौगिकार्थ-विष्णुग्रहणे हेतोरभावाद्रूढार्थो जीव एवेति पूर्वपक्षे फलफलिभावः । यदि तु जीवे नेतुमशक्यं तदा रूढ्यर्थत्यागेन यौगिकार्थग्रहणे हेतुरस्तीति विष्णुरेवेति सिद्धान्ते फलफलिभावः स्पष्ट इति भावः । एतेन विषयसंशयटीकापि विवृता । पूर्वपक्षटीकां व्यनक्ति ॥ जीव एवेति ॥ ''बृहजातिजीवकमलासनशब्दराशिष्वि''त्यभिधानादित्यर्थः । धातोः क्रियार्थकत्वेपि 'गडिवदनैकदेश'' इत्यादिवत्क्रियोपलक्षणत्वेन बृहतेर्जात्याद्यर्थत्वं युक्तमिति ध्येयम् । तत्र योगेनैव प्रवृत्तेरित्येतद्व्याचष्टे ॥ विष्णौत्विति ॥ रूढियोगयोश्चेति वाक्यं हेतुदृष्टान्तोक्त्या व्यनक्ति ॥ रूढेश्चेति ॥ वाक्यात्पदश्रुतेरिवेति भावः । षष्ठे ''वचनाद्रथकारस्याधान''-मित्याद्यपादीयोपांत्याधिकरणे वर्षासु रथकारोग्रीनादधीतेत्यत्र ब्राह्मणादीनामेव रथकरणे निमित्ते वर्षाकालविधिरुत रथकारसंज्ञस्यावांतरवर्णस्याधानांतरविधिरिति संशये त्रैवर्णिकानां वैदुष्यस्य स्वतो लाभात्कालमात्रविधौ च लाघवात्तेषामेव कालविधिर्नाविदुषोऽवान्तरवर्णस्य विशिष्टाधानविधिरिति प्राप्ते अवयवार्थपर्यालोचनसापेक्षयौगिकप्रसिद्ध्यपेक्षया तन्निरपेक्षतया समुदायप्रसिद्धेर्बलीयस्त्वाद्वचनबलादविदुषोप्यधिकारप्रतीतेरविघातादवान्तरवर्णस्यायमाधा-नांतरविधिरिति सिद्धांतितम् । अत्र रूढिबलीयस्त्वस्य व्युत्पादितत्वाद् ब्रह्मपदेपि सैव ग्राह्येत्यर्थः । नन्वेवमाद्ये चतुर्थपादे ''प्रोक्षणीष्वर्थसंयोगा''दित्यष्टमेधिकरणे रूढितोपि योगस्य बलवत्त्वोक्तिरयुक्तेत्यत आह ॥ प्रोक्षण्यादीति ॥ ''प्रोक्षणीरासादये''त्यादौ प्रोक्षणीशब्दः संस्कारनिमित्तकः किं वा जातिनिमित्तक उत यौगिक इति संशये संस्कृतास्वप्सु शास्त्रज्ञानां प्रयोगात्संस्कारनिमित्तत्वं प्राप्तमपोद्य बर्हिराज्यादिशब्दवदसंस्कृता-स्वपि क्वचित्प्रयोगाज्जात्यव्यभिचाराज्जातिनिमित्तता प्राप्ता । न च यौगिकत्वं युक्तम् । समुदायप्रतीतेर्बलीयस्त्वादिति प्राप्ते लब्धात्मिकाया एव रूढेर्योगाद् बलीयस्त्वम् । अश्वकर्णादिशब्देषु वृक्षादाववयवार्थासम्भव एव तस्या आत्मलाभः । अवयवार्थसत्त्वे तु तन्मात्रेणोपपत्तावदृष्टसमुदायशक्तिकल्पनायोगात् । प्रकृते चाप्सु प्रकृष्टो क्षणहेतुत्व-रूपावयवार्थसत्त्वेन रूढ्यनुन्मेषाद्यौगिकः प्रोक्षणीशब्द इति सिद्धान्तितम् । अत्राकृप्तरूढितः कृप्तयोगस्य बलवत्त्वोक्तावपि प्रकृते नैवमिति भावः । उक्तं च-

''रूढिर्लब्धात्मिका योगं बाधते न त्वलब्धिका ।
तत्रैव चात्मलाभोस्या यत्र नावयवार्थता ।''इति ।

जीवे रूढत्वादिति टीकोक्तं हेतुं साधयति ॥ न चेति ॥ बृहजातीत्यभिधानं तु योगेनाप्युपपन्नम् । एवं च विष्णौ कृप्तयोगेनाकृप्तरूढिर्बाधिष्यत इति भावः । जीवेङ्गीक्रियमाणो योगार्थः किं गुणपूर्तिरुतान्य इति विकल्पौ हृदि कृत्वाऽऽद्य आह ॥ यौगिकार्थस्येति ॥ तस्याल्पगुणत्वेनैव सिद्धेरिति भावः । अंत्य आह ॥ गुणपूर्तित इति ॥ देशाद्यपरिच्छेदरूपस्येत्यर्थः । अतो जीवे रूढिः कृप्तेति प्रोक्षणीशब्दवैषम्यमिति भावः ।

पाण्डुरङ्गि – ''किं विष्णुरुत जीव'' इति सन्देहटीकायां पूर्वनिर्दिष्टत्वाद्विष्णुरिति पूर्वपक्ष इति मन्दाशङ्कां निरस्यति ॥ किं जीव इति ॥ टीकाकृता त्वभ्यर्हितत्वात् प्रथमं विष्णुरिति कोटिर्निर्दिष्टेति द्रष्टव्यम् । इत्यभिधानादिति ॥ अनेन ''बृहजातिजीवकमलासने''ति ब्रह्मशब्दस्य जीवे रूढत्वादिति टीकायामभिधानादिति शेषः पूरणीय इत्युक्तं भवति । विष्णौ यौगिकत्वेपि प्रकृते ब्रह्मशब्देन विष्णुरेव ग्राह्यः किं न स्यादित्याशङ्कानिरासाय प्रवृत्ता ''रूढियोगयोश्च रूढेरेव बलवत्त्वा''दिति टीका । तत्र रूढेर्योगापेक्षया प्राबल्ये किं निमित्तं कश्चात्र दृष्टान्त इति शङ्कापरिहाराय निमित्तं दृष्टान्तं च दर्शयन्नेव रूढियोगयोश्चेत्यादिटीकां व्याचष्टे ॥ रूढेश्चेति ॥ अवयवार्थनिरपेक्षाया इति तत्र निमित्तकथनम् । रथकारादिष्विति दृष्टान्तप्रदर्शनम् । नन्वेवं रूढेरेव योगापेक्षया प्राबल्ये प्रोक्षण्यादिशब्दस्यापि रूढार्थत्वापत्त्या तस्य यौगिकार्थत्वप्रतिपादकाधिकरणविरोध इत्यत आह ॥ प्रोक्षण्यादीति ॥ कृप्ताकृप्तयोः कृप्ते कार्यसंप्रत्यय इति न्यायादिति भावः । योगेनैवेत्येवकारस्य तत्रैव योगेनेति भिन्नक्रममङ्गीकृत्य जीवे योगो निराकृतः टीकाकृतेति तन्निवर्त्याशङ्कामाह ॥ न चेति ॥ यौगिकार्थः किं गुणपूर्तिर्वाऽन्यो वा आद्ये स किं जीवे न सम्भवत्युत सम्भवतीति । नाद्य इत्याह ॥ यौगिकार्थस्येति ॥ न द्वितीय इत्याह ॥ सम्भवेवेति ॥ नाद्य इत्याह ॥ गुणपूर्तितोन्यस्येति ।

तात्पर्यचन्द्रिका

न च जिज्ञास्येपि रूढिः । तथात्वे गुणपूर्त्यसिद्धेः । न च योगरूढिः । ''बृहन्तो ह्यस्मिन्गुणा'' इति श्रुत्यनुसारिकृप्तावयवशक्त्यैवोपपत्तौ समुदायशक्तौ

मानाभावात् । ''तदेव ब्रह्म परमं कवीना''मित्यादेः केवलयोगेनाप्युपपत्तेः । न च पंकजादाविव योगोऽतिप्रसक्तः । येन योगरूढिः । अन्यत्र गुणपूर्तेरनङ्गीकारात् । अत एव टीकायां ''योगेनैवे''त्येवकारः । तथा च ''तदेव ब्रह्म परम''मित्यादौ रूढिबाधकसमुद्रशायित्वादिलिङ्गाद्विष्णुपरत्वेपि तद्विजिज्ञासस्वेत्यत्र न तत्परता । अत एव टीकायां ''यद्यपि ब्रह्मशब्दो विष्णौ प्रवर्तत'' इत्युक्तम् ।

प्रकाशिका – ''यद्यपि ब्रह्मशब्दो विष्णौ वर्तते तथापि तत्र तस्य योगेनैव प्रवृत्ते''रिति टीकागतैवकारस्य व्यावर्त्यशङ्कापूर्वं तात्पर्यमाह ॥ न च जिज्ञास्य इति ॥ विष्णावित्यर्थः ॥ असिद्धेरिति ॥ तथाच जीवाद्भेदो न सिद्ध्येत् । बृहंतो हीति श्रुतिविरोधाच्चेति भावः ॥ न चेति ॥ योगयुक्तरूढिरित्यर्थः । तथाच गुणपूर्तिलाभः केवलरूढ्यपेक्षया प्राबल्यं चेति भावः । रूढिवद्योगस्याप्रामाणिकत्वे कल्प्यत्वाविशेषाद्रूढिरेव कल्प्येतेत्यत उक्तं श्रुत्यनुसारिकृप्तेति । उक्तं च मीमांसकैः ।

''भवेतां यदि वृक्षस्य वाजिकर्णौ कथञ्चन ।
अकृप्तां समुदायस्य कः शक्तिं जातुकल्पये''दिति ।

ननु तदेवेति श्रुतौ कवीनां मते तदेव परं ब्रह्मेत्याहुरिति रूढिरुक्तेत्यत आह ॥ तदेवेति ॥ तर्हि पङ्कजादौ योगरूढिर्न स्यादित्यत आह ॥ न चेति ॥ तत्र पङ्कजनिकर्तृत्वस्य भेकादावपि सत्त्वेनैकान्ततस्तेन पद्मप्रतीत्ययोगाद्रूढिरङ्गीकृता । न चैवं प्रकृते योगोतिप्रसक्तः येन रूढिरपि स्यादित्यर्थः । एवं टीकोक्तो विष्णौ यौगिकत्वहेतुः समर्थितो भवति । यद्यपीत्यादिवाक्यं व्यनक्ति । तथाचेति ॥ न तत्परतेति ॥ वक्ष्यमाणदिशा बाधकाभावादिति भावः । ननु सुधायां क्वापि ब्रह्मशब्दो विष्णुपरो नेत्युक्तेः कथमेवमित्यत आह ॥ अत एवेति ॥ तथा प्रवृत्तावप्यत्र टीकायां क्वचिद्विष्णुपरत्वमुपेत्यैव प्रवृत्तेर्न दोष इति भावः । एतेन क्वचिद् ब्रह्मशब्दस्य योगेनापि विष्णुपरत्वे शाखांतराधिकरणन्यायेन प्रत्यभिज्ञानात्तद् ब्रह्मेत्यत्रापि विष्णुपरत्वं स्यादिति निरस्तम् । ''यमंतस्समुद्र'' इति पूर्ववाक्योक्तसमुद्रशायित्वरूपलिङ्गस्येवेह बाधकस्याभावादिति भावः । अत्र यद्यपि ''न च जीवेपी''त्यादिग्रन्थस्य ''ब्रह्मशब्दस्य तत्र रूढे''रित्युक्तहेत्वसिद्धिपरिहारार्थत्वात्तदानन्तर्यं तथा ''नच जिज्ञास्येपी''त्यादेश्च''विष्णौ यौगिकत्वा''दित्युक्तहेत्वसिद्धिनिरासार्थत्वात्तदानन्तर्यं तथा ''रूढेश्चे''त्यस्यैतदानन्तर्यं चोचितम् । हेत्वोः सिद्ध्यनन्तरमेव प्राबल्यादि-

जिज्ञासोदयात् । तथापि प्रोक्षण्यादिशब्दवैषम्यकथनाय ''न च जीवेपी''त्यस्य यथान्यासे युक्ते तत्सम्बद्धत्वात् ''न च जिज्ञास्येपीत्यस्यापि पश्चाद्भाव इति न दोषः ।

पाण्डुरङ्गि –यथास्थितमेवकारसम्बन्धमभिप्रेत्य तन्निवर्त्याशङ्कामाह ॥ न चेति ॥ योगेनेत्यस्य केवलयोगेनेत्यर्थमभिप्रेत्य तन्निवर्त्यमाह ॥ न चेति ॥ किं च योगमात्रेऽतिप्रसक्त एव रूढ्यङ्गीकारस्य पङ्कजादिशब्दे दृष्टत्वात्प्रकृते च योगमात्रस्यानतिप्रसक्ततया रूढ्यङ्गीकारो न युक्त इत्याह ॥ न चेति ॥

तात्पर्यचन्द्रिका

नन्वत्रापि जिज्ञास्यत्वमेव बाधकम् । न चास्यासन्दिग्धजीवपरतया जिज्ञास्यत्वमेवासिद्धमिति वाच्यम् । अन्योन्याश्रयात् । न च जीवस्यापि देहादन्यतया सन्दिग्धत्वेन जिज्ञास्यत्वं टीकायां पूर्वपक्षे जीवस्याजिज्ञास्यत्वोक्तिस्तु ब्रह्मवदतिगहनत्वं नेत्यभिप्रेत्य । अत एव सुधायां पूर्वपक्षे ''देहादितो विविक्ततया न प्रसिद्ध'' इति जिज्ञासाप्रयोजकमप्रसिद्धत्वमुक्तम् । ततश्च जिज्ञास्यत्वस्य जीवेपि सम्भवान्न तज्जीवपरत्वे बाधकमिति वाच्यम् । कथंचिज्जिज्ञासासम्भवेन तदाक्षेपेण पूर्वपक्षानुदयादिति चेन्न । विशिष्टाधिकारिकमोक्षफलकजीवान्यधर्मिकपूर्णगुणत्वप्रकारकपूर्वसूत्रोक्तजिज्ञासाक्षेपेणैव टीकाद्वयेपि पूर्वपक्षप्रवृत्तेः ।

प्रकाशिका – बाधकाभावान्नात्र ब्रह्मपरतेत्ययुक्तमिति शङ्कते ॥ नन्वत्रापीत्यादिना पूर्वपक्षादित्यंतेन ॥ ''तद्विजिज्ञासस्वे''त्यादिश्रुतावपीत्यर्थः । ''तस्य च स्वप्रकाशत्वेनासन्दिग्धत्वादजिज्ञास्यते''ति टीकां हृदि कृत्वा शङ्कते ॥ न चास्येति ॥ तद्विजिज्ञासस्वेति वाक्यस्येत्यर्थः ॥ जिज्ञास्यत्वमिति ॥ ब्रह्मशब्दार्थस्येति शेषः । तथाच नेदं बाधकमिति शङ्काभिप्रायः ॥ अन्योन्याश्रयादिति ॥ सिद्धे जीवपरत्वे जिज्ञास्यत्वासिद्धिः जिज्ञास्यत्वासिद्धौ बाधकाभावेन रूढ्या जीवपरत्वसिद्धिरित्यन्योन्याश्रयादित्यर्थः । एतेन टीकायामस्यासन्दिग्धजीवपरत्वमुपेत्याजिज्ञास्यत्वोक्तिरयुक्ता । प्रत्युत तद्विजिज्ञासस्वेत्युक्तजिज्ञास्यत्वेन जीवपरत्वस्य त्याग एव युक्तः । जीवस्य सन्दिग्धत्ववर्णनं वा कार्यमिति शङ्कितुर्हृदयमिति ध्येयम् । सुधानुरोधेन टीकाशयं वर्णयन्संदिग्धत्वोपवर्णनेन जिज्ञास्यत्वसम्भवमाशङ्कते ॥ न चेति ॥ इति वाच्यमित्यन्वयः ॥ कथंचिदिति ॥ देहादिविविक्तत्वेनेत्यर्थः । तथाच

(प्रकाशिका)

रूढ्या जीवपरत्वं वदता पूर्ववादिना तादृशपूर्वपक्षोदयार्थं तस्य जिज्ञासानर्हत्वाय टीकोक्तदिशाऽसन्दिग्धत्वमवश्यं वाच्यमिति श्रुतजिज्ञास्यत्वं रूढित्यागे बाधकं स्यादेव । सुधारीत्या टीकास्थाजिज्ञास्यत्वोक्तेरर्थान्तरवर्णनमसमञ्जसमिति भावः । एवं बाधक-शङ्काव्याजेन टीकयोर्विरोधोप्युद्धाटितः । सुधायामिव टीकायामपि जीवस्योक्तविधया सन्दिग्धत्वेन जिज्ञास्यत्वसम्भवेपि सिद्धांत्यभिमतविशिष्टजिज्ञासाया एवाक्षेप्यत्वेन जिज्ञासा-क्षेपेण पूर्वपक्षोदयो न विरुद्धः टीकाद्वयाविरोधश्चेति भावेन जिज्ञास्यत्वस्य बाधकत्वं परिहरति ॥ विशिष्टेति ॥ ''भक्तिमान्परमे विष्णा'' वित्युक्तविशेषणविशिष्टेत्यर्थः । अथादिशब्दोक्तान्येतानि जिज्ञासाविशेषणानि । प्रागुक्तानाक्षेपादफलेयं चिन्तेत्यत उक्तं पूर्वसूत्रोक्तेति ॥ तथाच टीकाद्वयेपि जीवस्य जिज्ञास्यत्वाङ्गीकारेण ''तद्विजिज्ञासस्वे''त्यस्य जीवपरत्वे जिज्ञास्यत्वं न बाधकम् । टीकायामजिज्ञास्यत्वोक्तिस्तु प्रागुक्ताभिप्राया । टीकयोरविरोधश्चेति ध्येयम् ।

पाण्डुरङ्गि –न चात्र तादृशं बाधकमस्तीत्यनेन पूर्वपक्षे बाधकं नास्तीत्युक्तं टीकायाम् । तदयुक्तम् । बाधकाभावस्यासिद्धत्वादित्यतस्त-द्भवत्किं जिज्ञास्यत्वं वा कारणत्वं वेति विकल्पं मनसि निधाय क्रमेण दूषयति ॥ नन्वित्यादिना ॥ न चास्येति ॥ तथाचेदं वाक्यं ब्रह्मशब्दार्थस्य न जिज्ञास्यत्वप्रतिपादकम् । असन्दिग्धजीवपरत्वादित्यर्थः ॥ अन्योन्याश्र-यादिति ॥ अस्य वाक्यस्यासन्दिग्धजीवपरत्वे सिद्धे जिज्ञास्यत्वपरत्वासिद्धिर्जिज्ञास्यत्वपर-त्वासिद्धौ चासन्दिग्धपरत्वसिद्धिरित्यन्योन्याश्रय इत्यर्थः ॥ अत एवेति ॥ देहान्यतया सन्दिग्धत्वादेवेत्यर्थः ॥ कथंचिदिति ॥ तथाचात्र जिज्ञासाक्षेपेण पूर्वपक्षस्योक्तत्वान्न जिज्ञा-स्यत्वं जीवस्येति जिज्ञास्यत्वमेव बाधकमिति भावः । सुधातु जिज्ञासाप्रयोजकाप्रसिद्धत्वपरा न । किं त्वप्रसिद्धत्वमात्रपरा । अन्यथा यादृशतादृशाप्रसिद्धत्वस्य सर्वत्र सुलभत्वेन सर्वजिज्ञास्यत्वापत्तेरिति भावः । विशिष्टाधिकारिकेति ॥ तथाच विशिष्टाधिकारिकत्वादि-प्रकारकजिज्ञासाक्षेपेण पूर्वपक्षस्य प्रवृत्तत्वात् एतादृशजिज्ञास्यत्वस्यात्र वाक्येऽप्रतीयमानत्वात् प्रतीयमानस्य च सिद्धांत्यनभिप्रेतत्वात् न जिज्ञास्यत्वं ब्रह्मशब्देन जीवग्रहणे बाधकमिति भावः ।

तात्पर्यचन्द्रिका

यद्वा इह टीकायां पूर्वपक्षे पूर्वाधिकरणपूर्वपक्षापत्त्या तद्विजिज्ञासस्वेत्यस्यापि पूर्वाधिकरणपूर्वपक्षन्यायेनाजिज्ञास्यत्वेप्युपपत्तेरजिज्ञास्यत्वेनैव पूर्वपक्षः । सुधायां तु देहाद्यन्यतया जीवस्य जिज्ञासामङ्गीकृत्यापि सिद्धांत्यभिप्रेतजिज्ञासाक्षिप्तेति द्रष्टव्यम् ।

प्रकाशिका – ''तस्य च स्वप्रकाशत्वेने''त्यादिटीकास्वारस्यानुसारात्कल्पान्तरमाह ॥ यद्वेति ॥ पूर्वपक्षापत्त्येति ॥ यथाहि पूर्वाधिकरणे जीवस्यासन्दिग्धत्वेन जिज्ञासामात्राक्षेपः । तथा ब्रह्मशब्दस्य रूढ्या जीवपरत्वात्तस्य चासन्दिग्धत्वाज्जिज्ञासा न युक्तेति पूर्वपक्षापत्त्येत्यर्थः । ननु पूर्वत्र हि जीवान्यद् ब्रह्माक्षिप्य जीवान्यसर्वासत्यत्वं चोपेत्य जीवस्य चासन्दिग्धत्वमुक्त्वाऽजिज्ञास्यत्वं पूर्वपक्षितम् । न चेह तथा । ''तदेवेत्यादौ योगेन विष्णुपरत्वमुपेत्यतद्विजिज्ञासस्वे''त्यत्रैव रूढ्या जीवपरत्वशङ्कनात् । न चेह जीवादन्यद्देहादिभिन्नत्वमसत्यम् । जीवपराभेदानङ्गीकारात् । येनान्यस्य जिज्ञासानर्हतया जीवस्य च स्वप्रकाशसिद्धतयाऽजिज्ञास्यत्वेन पूर्वपक्षः क्रियेतेति चेदयमाशयः । देहभिन्नत्वस्य जीवान्यस्य सत्यतया जिज्ञासार्हत्वेपि

''जातमात्रा मृगा गावो हस्तिनः पक्षिणो झषाः ।
भयाभयस्वभोगादौ कारणानि विजानते''।

इत्यनुव्याख्यानाद्युक्तदिशा तस्यापि चैतन्यवत्सिद्धतया सन्देहाभावेनाजिज्ञास्यत्वमिति । नन्वेवं कथं तर्हि सुधायां तेन रूपेण सन्दिग्धत्वोक्तिरिति चेदुच्यते । स्फुटतरविवेकाभावेन ''नैषां ममाहमितिधीः श्वसृगालभक्ष्ये'' इत्यादि व्यपदेशवदतिप्रसिद्धत्वाभावेन देहादिभिन्नत्वेन सन्दिग्धत्वमुपेत्य पूर्वपक्षः कृतः । अत एव तत्र ''देहादितो विविक्ततया नातिप्रसिद्ध'' इत्यतिशब्दप्रयोगः । वक्ष्यति च ''देहाद्यन्यतया जीवस्य जिज्ञास्यत्वमङ्गीकृत्यापी''त्यपिपदेनाभ्युपगमवादोयमिति । ननु तर्हि विचारविधेः का गतिरित्यतो वा अस्मिन्पक्षे जिज्ञास्यत्वबाधकाज्जीवपरत्वमेव त्यज्यतामित्यतो वाऽऽह ॥ तद्विजिज्ञासस्वेति ॥ अप्रामाण्येन वा प्रामाण्येपि ब्रह्मपरवाक्यमध्यस्थतया लोडादेर्विधिशक्तिप्रतिबन्धेन विचाराविधायकत्वेन वा ब्रह्मशब्दार्थस्याजिज्ञास्यत्वेपि जीवपरत्वे श्रुतेरुपपत्तेरित्यर्थः । अतो न जिज्ञास्यत्वं जीवपरत्वे बाधकम् । तस्यैवासिद्धेः । अन्योन्याश्रयोपि प्रागुक्तो नास्ति ।

(प्रकाशिका)

अन्यथैव जिज्ञासासिद्धेरुक्तत्वादिति भावः । सुधापक्षे तु जिज्ञास्यत्वस्य बाधकता शङ्कैव नास्ति जीवे तस्याङ्गीकारादिति भावेनाह ॥ सुधायां त्विति ॥ अपिपदेनाभ्युपगमवाद-सूचनात् टीकाविरोधः परिहृतो भवति ॥ सिद्धान्तीति ॥ विशिष्टाधिकारि-केत्याद्युक्तविशेषणयुक्तेत्यर्थः ।

पाण्डुरङ्गि – नन्वैवं जीवस्य जिज्ञास्यत्वमभ्युपगम्य सिद्धांत्यभिमतोक्तविशेषणकजि-ज्ञासाक्षेपे जीवस्य सर्वथा निर्विषयत्वप्रतिपादकस्वप्रकाशत्वादिति टीकाविरोधः स्यात् । तावता शास्त्रानारम्भश्च न स्यात् । सर्वथा विषयशून्यत्व एव हि स स्यादित्यत आह ॥ यद्वेति ॥ इह टीकायां पूर्वपक्षेऽजिज्ञास्यत्वेनैव पूर्वपक्ष इत्यन्वयः । ननु कथमजिज्ञास्यत्वेन पूर्वपक्ष इत्यत उक्तं पूर्वाधिकरणेति ॥ पूर्वाधिकरणे यः स्वप्रकाशत्वेनासन्दिग्धत्वान्न जीवस्य जिज्ञास्यत्वमिति पूर्व पक्षस्तस्यात्राप्यापत्त्या तादृशपूर्व पक्षोत्राप्याप्नोति यतोऽतोऽजिज्ञा-स्यत्वेन पूर्वपक्षः सुकर इत्यर्थः । ननु तर्हि तद्विजिज्ञासस्वेति जिज्ञासाविधायकवाक्यस्य का गतिरित्यत आह ॥ तद्विजिज्ञासस्वेत्यस्यापीति ॥ तथाच पूर्वाधिकरणे यथा तद्विजिज्ञा-सस्वेत्यादिरजिज्ञास्यत्वेनोपपत्तिः कृता तथात्राप्युपपत्तेः कर्तुं शक्यत्वादित्यर्थः । नन्विह टीकायामजिज्ञास्यत्वेन पूर्वपक्षकरणे सुधाविरोध इत्यत आह ॥ सुधायांत्विति ॥ एतट्टी-कायां जीवस्य देहादितोऽन्यत्वेन जिज्ञास्यत्वस्याविवक्षितत्वान्न सुधाविरोध इति भावः ।

तात्पर्यचन्द्रिका

न च जीवपरत्वे यतो वेत्यादिपूर्ववाक्योक्तकारणत्वमेव बाधकम् । विध्युद्देश-गतब्रह्मपदस्वारस्याय जीवस्याप्यदृष्टद्वारा वा जगतो जीवकल्पितत्वेन वा तत्र हेतुत्वोपपत्तेः । इमानीत्यनेन जीवकर्तृककार्यजातस्यैव निर्देशोपपत्तेश्च । अत एव ''आत्मा द्रष्टव्य'' इत्यादौ जिज्ञासाविधायकवाक्ये जीवे प्रसिद्धात्मपदप्रयोगः । अत एव वचनजात्यादिकमिह ब्रह्मशब्दार्थः । ब्रह्मणो निष्क्रियत्वेन कर्तृत्वस्यानिर्विकार-त्वेनोपादानत्वस्य चासम्भवेन कारणत्वस्य ब्रह्मपक्ष एव बाधकत्वाच्चेति ॥

प्रकाशिका – जिज्ञास्यत्वं न बाधकमि(त्याद्यु)त्युक्त्वा सिद्धांत्यभिमतं जगत्कारण-त्वमपि न बाधकमित्याह ॥ न चेति ॥ अदृष्टद्वारेति ॥ न्यायमतरीत्या सर्वस्यापि जीवोपभोग्यत्वेन जीवादृष्टनिमित्तत्वाददृष्टद्वारा जगति जीवस्य हेतुत्वम् । एकजीवमतरीत्या

सर्वस्य जीवकल्पितत्वेन तत्कल्पकत्वेन वा तत्र हेतुत्वमित्यर्थः । अन्यथा विध्युद्देशस्य प्रधानत्वात्तद्गतब्रह्मशब्दस्य रूढार्थत्यागलक्षणास्वारस्यं स्यादित्यर्थः । ननु टीकापक्षेतु तद्विजिज्ञासस्वेत्यस्य विचारविधित्वं नेति पूर्ववाक्य एवोक्तम् । अन्यथा जिज्ञास्यत्वस्यैव जीवपरत्वे बाधतापत्तेः । तथाच कथं विध्युद्देशगतेति । सत्यं सिद्धान्तिना विचारविधित्वमङ्गीकृतमिति तं प्रति पूर्वपक्षिणेत्थमापादनाददोषः । विध्युद्देश- पदेनोपसंहारो विवक्षित इत्येके । ननु अदृष्टद्वारा हेतुत्वेप्यत्र श्रुतं साक्षाद्धेतुत्वं न जीवस्येत्यत आह ॥ इमानीति ॥ प्रत्यक्षार्थनिर्देशकत्वादिदम इति भावः । एतेन ''जिज्ञास्यत्वमेव बाधक''मित्यादिना ग्रन्थेन । ''न च रूढित्यागेन योगाङ्गीकारो युक्तः । बाधकं विना मुख्यार्थत्यागायोगात् । न चात्र तादृशं बाधकमस्ती''ति टीकावाक्यं विवृतं भवति । अत्र ब्रह्मशब्दो जीवपर इत्यत्र सुधास्थादिपदोपात्तश्रुतिमाह ॥ अत एवेति ॥ आदिपदेन ''य आत्मा सोन्वेष्टव्य'' इत्यादिसुधोक्तवाक्यग्रहः । लक्षणमिति मत्वा ''आत्मा वा'' इत्युदाहृतम् । तेन ''तद्विजिज्ञासस्व य आत्मा'' इत्यनयोरेव तत्रोपादानात् ''बन्धमोक्षावपि ह्यासु श्रुतिषूक्ता हरेस्सदे''ति बहुवचनं कथमिति न चिंत्यमिति भावः । सुधायां तद्वाक्यस्याप्युदाहरणस्य फलं चोक्तं भवति । अन्यथात्र विष्णुविचारविधिस्तत्र जीवविचारविधिरिति विचारविधेर्नानार्थत्वं प्रसज्येत । अद्याप्यात्मशब्दस्य विष्णुनिष्ठताया अनिर्णयादिति भावः ।

ननु जीव इव जातिकमलासनादावपि रूढेर्जीव एवेति कथं निर्णयोत आह ॥ अत एव चेति ॥ आत्मपदप्रयोगादेवेत्यर्थः । एवं पूर्ववादी स्वपक्षे साधकमुक्त्वा बाधकं चोद्धृत्य सिद्धान्ते साधकाभावमुक्तप्रायं मत्वा बाधकमाह ॥ ब्रह्मण इति ॥ ''निष्कलं निष्क्रिय''-मिति श्रुतेर्निष्क्रियस्य कथं कृतिमत्त्वरूपकर्तृत्वमित्यर्थः । ''निर्विकारोक्षरः शुद्ध'' इत्यादेर्निर्विकारस्य कथं परिणामलक्षणविकारवत्त्वरूपोपादानत्वमित्यर्थः । ननु ''आनन्दमयोभ्यासा''दित्यत्रानन्दमयादेर्विष्णुत्वे ब्रह्मशब्दस्य हेतूकरणाद्विष्णुपरत्वं सिद्धम् । अन्यथा तत्र हेतोरसिद्ध्यापत्तेः । अत एव पादांत्यप्राणाधिकरणपूर्वपक्षचन्द्रिकायां ''उक्तं चानन्दमयाधिकरणे ब्रह्मशब्दस्य विष्णौ मुख्यत्व''मित्युक्तम् । तथाच कथं ब्रह्मशब्दो जीव इति पूर्वःपक्षः । तथा ''सर्वत्रप्रसिद्धोपदेशा''दित्यत्रापि विष्णौ प्रसिद्धस्य ब्रह्मशब्दस्योपदेशादिति हेतूकरणात्प्रसिद्धपदप्रयोगाच्च सिद्धंतस्य विष्ण्वर्थत्वम् । अत एव सिद्धान्ते द्युभ्वाद्यधिकरणे हेतूकृतात्मशब्दस्य विष्ण्वर्थत्वं सिद्धमि''त्यात्मावारे द्रष्टव्य'' इत्यत्रात्मशब्दो द्युभ्वाद्यधि-

करणन्यायेन विष्णुपर इति ग्रन्थकारो वक्ष्यति । न च तस्य वक्ष्यमाणत्वेन ततः पूर्वं विष्ण्वर्थत्वासिद्धेरेवं पूर्वपक्षोदय इति वाच्यम् । ज्योतिरधिकरणपूर्वपक्षचन्द्रिकायां ''यद्यपि वैश्वानरो जायमान'' इत्यग्निसूक्ते वैश्वानरश्रुतिर्जायमानत्वलिङ्गं चास्ति । तथापि विष्णौ श्रुतेः सावकाशताया वैश्वानराधिकरणे लिङ्गस्य सावकाशताया द्युभ्वाद्यधिकरणे कण्ठोक्तत्वान्न ताभ्यां पूर्वपक्षित''मिति वक्ष्यमाणत्वेनोत्तरत्र सिद्धत्वेपीह पूर्वपक्षानुदयादिति चेदत्र केचित् । योगरूढिभ्यां तस्य विष्णुपरत्वमिहैव सिद्धं तत्र हेतूक्रियते । न तु तत्रैव सिद्धम् । चन्द्रिकावाक्यं तु भाष्ये बहुवाक्योदाहरणात्तदभिप्रायेण नेयमित्याहुः । अन्यत्र योगेन विष्णुपरत्वेपीह वाक्ये रूढौ बाधकाभावेन रूढो जीव एवेति पूर्वपक्षोदय इति गुरुपादाः । एतेन यत्केनचित्प्रलपितं जीवे देहबृंहकत्वादिना योगेन ब्रह्मशब्दस्योपपत्तौ रूढौ मानाभावः। बृहजातीत्यादित्वप्रसिद्धम् । किं च ''ब्रह्मशब्दः परे विष्णा''वित्यादिस्मृतौ ''स्याच्चैकस्य ब्रह्मशब्दवत् परं जैमिनिर्मुख्यत्वा''दित्यादिसूत्रे च परब्रह्मशब्दस्य विष्णौ मुख्यत्वं सिद्धमिति कथं जीव इति पूर्वपक्ष इति तन्निरस्तम् । विष्णौ पुष्कलयोगेन मुख्यत्वमन्यत्र तदभावेनामुख्यत्वमिति सिद्धावपीह लोकरूढ्या जीवपरत्वे बाधकाभावादिति शङ्कनात् । एतच्छङ्कायाः क्वचिदवश्यं निराकार्यत्वाच्च । रूढाववान्तरभेदस्य तत्प्राबल्यस्य चाद्याप्यसिद्धेश्च । यदपि योगेनोपपत्तौ रूढौ मानं नेति तन्न । यौगिकार्थस्य गुणपूर्तेर्जीवेऽसम्भवादित्युक्तत्वात् । देहबृंहकत्वादिर्योगार्थ इत्यत्र मानाभावाच्च । सर्वज्ञतमेनोदाहृतस्य चिरंतनव्याकरणसिद्धाभिधानस्यार्वाचीनेनापलपितुमनुचितत्वाच्च यत्किञ्चिदेतत् ।

एतेन निरवकाशलिङ्गेन सावकाशश्रुतिबाधस्यांतरधिकरणे वक्ष्यमाणत्वान्निरवकाशकारणत्वलिङ्गेन सावकाशब्रह्मश्रुतेर्बाधसम्भवात्तेन गतार्थमिदम् । सावकाशश्रुत्या निरवकाशलिङ्गबाधायोगेन पूर्वपक्षानुदयश्चेति निरस्तम् । तादृशन्यायस्य तदधिकरणव्युत्पाद्यत्वेपीह तमेव न्यायं सिद्धवत्कृत्य कारणत्वरूपलिङ्गस्य निरवकाशतामात्रप्रतिपादनेनागतार्थत्वात्पूर्वपक्षे लिङ्गस्य निरवकाशतानभ्युपगमेन श्रुतेर्विध्युद्देशगतत्वेनोपसंहारगतत्वेन वा प्राबल्येन पूर्वपक्षोदयात् । ननु चैवमाकाशाधिकरणादाविवेहाप्यन्य इति प्राप्ते निरवकाशकारणत्वलिङ्गेन ब्रह्मशब्दस्य ब्रह्मपरत्वस्थापनेन ब्रह्मशब्दसमन्वयस्य सत्त्वात्पश्चाधिकरण्याः समन्वयाध्यायासङ्गतिरित्युक्तं विरुध्यत इति चेन्न । जिज्ञासासमर्थनद्वारा शास्त्रारम्भ एव तात्पर्येण तत्समन्वय एवातात्पर्यात् । तत्समन्वयफलस्य गुणपूर्तिलाभस्य ''तदेवपरम''मित्यादिश्रुत्यंतर एव सिद्धेरित्याद्यूह्यम् ।

सङ्ग्रहस्तु -

निर्बाधरूढेर्जीवोत्र ब्रह्मविष्णुर्न यौगिकः ।
योगाद्रूढेर्बलीयस्त्वं रथकारनये स्थितम् ॥

पाण्डुरङ्गि –विध्युद्देशगतेति ॥ न च सर्वकारणत्वरूपबाधकाद् ब्रह्मशब्दस्यैव जीवपरत्वं त्याज्यमिति वाच्यम् । ब्रह्मपदस्य विध्युद्देशगतत्वेन प्रधानत्वात्तत्स्वारस्यानुरोधेन कारणत्वस्यैव यथा कथंचिन्नेयत्वादिति भावः । अदृष्टद्वारा वा कल्पकत्वेन वा जीवस्य कारणत्वे जातादिपदानां मुख्यार्थत्यागापत्तिरित्यस्वरसाद्दोषांतरमाह ॥ इमानीति ॥ तद्विजिज्ञासस्व तद् ब्रह्मेतिवाक्यस्थब्रह्मपदस्य जीवपरत्वे समाख्यामाह ॥ अत एवेति ॥ ब्रह्मशब्दस्य जीवपरत्वादेवेत्यर्थः । यद्वा ''आत्मा वा अरे द्रष्टव्य'' इत्यादि-जिज्ञासावाक्ये जीवे प्रसिद्धात्मशब्दप्रयोगेण तत्र जीवस्यैव जिज्ञास्यत्वे सिद्धे तत्समाख्यानेन तद्विजिज्ञासस्वेत्यत्रापि जीवस्यैव जिज्ञास्यत्वे सिद्धे कारणवाक्यं यथाकथंचिज्जीवपरत्वेन व्याख्येयमित्याह ॥ अत एवेति ॥ युज्यत इति शेषः । अग्निमत्त्वादेव धूमवानितिवज्ज्ञातव्यम् ॥ अत एवेति ॥ आत्मा द्रष्टव्य इति जिज्ञासाविधायकवाक्ये जीवे प्रसिद्धात्मपदप्रयोगात्तद् ब्रह्मेत्यत्र ब्रह्मशब्दस्य जात्यादिपरत्वे तद्विरोधापत्तेरेवेत्यर्थः । तद्ब्रह्मेतिवाक्ये ब्रह्मशब्दस्य जीवपरत्वे कारणत्वं बाधकं न भवतीत्युपपाद्य विष्णुपरत्व एव तद्बाधकमिति भावेन कारणत्वं किं कर्तृत्वं वोपादानत्वं वेति विकल्प्य क्रमेण दूषयति ॥ ब्रह्मण इति ॥ आद्ये निष्क्रियत्वेनेति हेतुः । निर्विकारत्वेनेति द्वितीये हेतुः ।

तात्पर्यचन्द्रिका

सिद्धान्तस्तु । विष्णुरेव जिज्ञास्यं ब्रह्म । ''य'' इत्यादिभाष्योक्तश्रुतिभिर्विष्ण्वेकनिष्ठस्य कारणत्वस्य जिज्ञास्ये यतो वेत्यादिना श्रवणात् । तस्य च जीवेनुपपत्त्या रूढेरपि बाधात् । अदृष्टद्वारा वा कल्पकत्वेन वा जीवकारणत्वे जातादिपदानां मुख्यार्थत्यागापत्तेः । ''अभिसंविशंती''ति पदोक्तमुक्तप्राप्यत्वस्य च सर्वथानुपपत्तेः। ''यत इति येनेति यदिति तद्ब्रह्मे''ति च प्रतीतकारणैक्यस्य च बाधकाभावात् । इमानीति सर्वनाम्नश्च संकोचकाभावात् । जीवकर्तृतायाश्च ''इतरव्यपदेशा'' दित्यादिसूत्रेषु निराकरिष्यमाणत्वात् । जिज्ञास्ये श्रुतस्य चात्मशब्दस्य ''आत्मा

नारायणः पर'' इत्यादिश्रुत्या द्युभ्वाद्यधिकरणन्यायेन ब्रह्मशब्दवद्विष्णु- परताया एव न्याय्यत्वात् । अन्वेषणविधिवाक्योक्तापहतपाप्मत्वादीनां च जीवे शुद्धरूपाभिप्रायेण सम्भवशङ्कायामपि सत्यकामत्वादीनां सर्वथानुपपत्तेः । निष्क्रियत्वश्रुतेश्च ''स हि कर्तेति सत्यकर्मेति स इदं सर्वमसृजतेति स इमाँल्लोकानसृजतेति नामरूपे व्याकरो''दित्यादिकर्तृत्वश्रुतिबलात् । ''अकर्माऽक्लिष्टकारित्वा''दित्यादिस्मृत्यनुसारेणाक्लिष्टकारित्वादिनोपपत्तेश्च ।

प्रकाशिका – जगत्कारणत्वादिरूपाद्बाधकादेव रूढार्थत्यागेन विष्णुपरत्वं ब्रह्मशब्दस्येतिभावेन सिद्धान्तमाह ॥ सिद्धांतस्त्विति ॥

भाष्योक्तश्रुतिभिर्विष्णुमात्रगात्कारणत्वतः ।
बाधकाद्रूढिबाधेन विष्णुर्ब्रह्माभिधः श्रुतः ॥

इति सङ्ग्रहः ॥ य इतीति ॥ यद्यपि ''य उ त्रिधातु पृथिवी''मित्यत्र रक्षकत्वं ''चतुर्भिस्साक''मित्यत्र नियामकत्वं श्रुतं न तु कारणत्वम् । तथापि जनकस्यैव रक्षकत्वादिकमित्युत्सर्ग इति रक्षकत्वाद्युक्त्यैव कारणत्वं लब्धमिति वा ''यो नः पिता जनिते''त्यादिश्रुतौ ''उत्पत्तिस्थितिसंहारा'' इत्यादिस्मृतौ च साक्षात्कारणत्वस्योक्तेर्वैवमुक्तम् । श्रुत्यर्थस्तु टीकायां स्पष्टः । एतेन किं जन्मादिकं लक्षणमुत तत्कारणत्वम् । नाद्यः । तस्य प्रपञ्चधर्मत्वात् । नांत्यः । तस्याप्रसिद्धत्वादिति निरस्तम् । श्रुत्यादिषु प्रसिद्धस्य कारणत्वस्य लक्षणत्वादिति । ननु जीवेपि जगत्कारणत्वं युक्तमित्युक्तमत आह ॥ अदृष्टेति ॥ साक्षाज्जन्य एव जातादिपदप्रयोगादिति भावः । यदभिस्वेच्छया सम्यग्विशंतीत्यनेनोक्तमुक्तप्राप्यत्वस्यानुपपत्तेरित्यर्थः । कारणत्वादिलिङ्गजातस्य पक्षनिष्ठतामाह ॥ यत इतीति ॥ यद्वा केषाञ्चिन्मते वक्ष्यमाणदिशा विशेषणभेदे विशेष्यभेदमाशङ्क्याह ॥ यत इतीति ॥ यत्त्विमानीत्यनेन जीवकर्तृककार्यजातस्यैव निर्देश इत्युक्तं तन्नेत्याह ॥ इमानीति ॥ कतिपयकर्तृत्वमपि जीवस्य नेत्याह ॥ जीवेति ॥ स्वतन्त्रकर्तृताया इत्यर्थः । तेन ''कर्ता शास्त्रार्थवत्त्वा''दित्यनेन न विरोधः । युक्तिपादे ''इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्ति''रित्यधिकरणगतसूत्रेषु ''एतेन शिष्टा अपरिग्रहा अपि व्याख्याता''इति तत्पूर्वाधिकरणांतिमसूत्रे च समयपादेच ''अन्यथानुमितौ च ज्ञशक्तिवियोगा''दित्यत्र च

निराकरिष्यमाणत्वादित्यर्थः । सूत्रणामर्थस्तु भाष्यादौ स्पष्टः । वक्ष्यते चात्रापीति नात्र लिख्यते । उक्तं चानुव्याख्याने,-

''न हि जन्मादिहेतुत्वं जीवस्य जगतो भवेत् ।
हिताक्रियादिदोषं च वक्ष्यत्येव स्वयं प्रभु''रिति ॥

एतेन ''अतो ब्रह्मशब्दस्ये''त्यादि टीकाव्याख्याता । ब्रह्मशब्दस्य विष्णुपरत्वं समर्थ्य प्रागुक्तात्मशब्दस्यापि तदाह ॥ जिज्ञास्य इति ॥ ''आत्मा वा अरे द्रष्टव्यः य आत्मापहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोपिपासः सत्यकामः सत्यसंकल्पः सोन्वेष्टव्य'' इत्याद्यनेकवाक्यस्थस्येत्यर्थः । अत एव जिज्ञास्ये श्रुतस्येति सामान्येनोक्तिः । ''नारायणपरो ज्योतिरात्मा नारायणःपर'' इति तैत्तिरीयश्रुतिः ॥ द्युभ्वादीति ॥ ''द्युभ्वाद्यायतनं स्वशब्दा''दित्यत्रात्मशब्दादिति वक्तव्ये स्वशब्दादित्युक्तिस्तु स्वस्य विष्णोश्शब्द इत्यपि विग्रहाश्रयणेन ''तमेवैकं जानथ आत्मान''मित्यात्मशब्दस्य विष्ण्वेकनिष्ठत्वख्यापनायेति वक्ष्यते । तथाचात्मशब्दात् द्युभ्वाद्यायतनं विष्णुरित्युक्तन्यायेनेत्यर्थः ।

''जानथ आत्मान''मिति जिज्ञास्यत्वेन श्रुतात्मनो विष्णुत्वं ''अमृतस्यैषसेतु''रित्युत्तरवाक्यस्थमुक्तोपसृप्यत्वलिङ्गाधीनमिति न्यायेनेत्युक्तम् ॥ न्याय्यत्वादिति ॥ एकत्र निर्णीतशास्त्रार्थोन्यत्रापीति न्यायप्राप्तत्वादित्यर्थः । अन्यथा जिज्ञासावाक्यानां नानाधर्मिकजिज्ञासाविधायकत्वप्रसङ्ग इति भावः । य आत्मेति वाक्यगतात्मशब्दस्य जीवपरत्वे बाधकमप्याह ॥ अन्वेषणेति ॥ शङ्कायामपीत्यभ्युपगमवादः। तेषामपि जीवे स्वतोऽभावात् । यद्वक्ष्यति दहरनये ''अशनायादिकानन्ये तत्प्रसादात्तरंतिही''ति । सत्यकामत्वादीनामिति ॥ ''सत्यकामः परो नास्ती''त्याद्युक्तेरिति भावः । उक्तं च तत्र टीकायां ''अपहतपाप्मत्वादीनां कथंचिदन्यत्र वृत्तावपि न कथंचिदन्यत्र सत्यकामत्वादीत्याशयेनाह । सत्यकाम इती''ति । एतेन जन्मादिकारणत्वमुपलक्षणं जिज्ञासाविधिवाक्येषु यत्र यत्र जीवपरत्वे यद्बाधकमस्ति सत्यकामत्वादिकं ''ओमित्येतदक्षरमुद्गीथमुपासीते'' त्यादावुद्गीथत्वादिकं तत्सर्वं ग्राह्यमिति सूचयता ''सृष्टिः स्थितिश्च संहारो नियतिर्ज्ञानमावृतिः । बन्धमोक्षावपी''त्यनुव्याख्यानदिशा सुधायां सृष्टयादीनामेव बाधकत्वेनोपपादनमुपलक्षणम् । आत्मशब्देपि विष्णुपरत्वमुक्तदिशोपपाद्यमित्युक्तं भवति । उक्तं च सुधायां ''न चैकमेव सर्वत्र जिज्ञासाविधायकश्रुतिषु लक्षणं श्रूयत'' इत्यादि । एवं रूढित्यागे हेतुभूतं परपक्षे बाधकं

स्वपक्षे साधकं च समर्थ्य प्रागुक्तबाधकमुद्धरति ॥ निष्क्रियत्वश्रुतेश्चेति ॥ अक्लिष्टकारित्वादिनोपपत्तेश्चेत्यन्वयः । उक्तं च सुधायां ''भेदेनैव तु मुख्यार्थसम्भव'' इत्यस्य व्याख्यावसरे ''आगमस्याक्लिष्टकारित्वाद्यर्थतया सावकाशत्वा''दिति । केऽनायासेन कर्मकर्तर्यकर्तेति प्रयोगः । वेदेपि ''अपशवो वा अन्ये गो अश्वेभ्य'' इत्यत्र गवाश्वान्यपशुषु प्राशस्त्याभावेनापशव इति प्रयोगः । उक्तं चाद्ये ''तत्सिद्धिजातिसारूप्यप्रशंसाभूमलिङ्गसमवाया''दिति तत्सिद्धिपेटिकायाम् । तथाच निष्क्रियमिति प्रयाससाध्यक्रियानिषेधो न सामान्यक्रियानिषेध इत्यर्थः । वक्ष्यते च द्वितीये ''असद्व्यपदेशान्नेति चेन्न धर्मांतरेण वाक्यशेषात्'' इति सूत्रे ''नासदासी''दिति वाक्ये कारणासत्त्वमुच्यत इत्याशङ्क्य स्वातन्त्र्यादिधर्मान्तरेण निषेधो न स्वरूपेणेति ।

ननु तत्र मानान्तरबाधात् प्राशस्त्यस्वातन्त्र्यादिधर्मान्तरनिषेधो न स्वरूपेण । न चात्र बाधकमस्तीत्यत आह ॥ सहीति ॥ ''अथ वेशांतान्पुष्करिण्यस्स्रवंत्यस्सृजते सहिकर्ते''ति बृहदारण्यक श्रुतिः । ''सत्यकर्मा महात्मे''ति । तदनन्यत्वनयभाष्योक्तश्रुतिः । ''सतपोऽतप्यत सतपस्तप्त्वा इदं सर्वमसृजते''ति तैत्तिरीयश्रुतिः । ''स ऐक्षत लोकान्नुसृजा इति स इमाँल्लोकानसृजते''त्यैतरेयश्रुतिः । ''नामरूपे व्याकरो''दिति शब्दार्थात्मकप्रपञ्चकर्तृत्वार्थकछांदोग्यश्रुतिः । आदिशब्दा''त्सविश्वकृत्सहि सर्वस्य कर्ता कर्तारमीशं पुरुषं ब्रह्मयोनि''मित्यादेर्ग्रहः । ननु श्रुतित्वाविशेषे कर्तृत्वश्रुतेरेवान्यार्थता किं न स्यादिति चेन्न । कर्तृत्वश्रुतीनां बहुत्वेन बहुबाधस्यान्याय्यत्वात् । निषेधरूपतया निष्क्रियत्वश्रुतिः प्रबलेति चेत् न हिंस्यादिति निषेधवाक्यादपि यागीयहिंसावाक्यस्य बलवत्त्वदर्शनादिति । विस्तृतं चैतन्यायामृते । अत एवाह ॥ बलादिति ॥ किं च व्याख्यानतो विशेषप्रतिपत्तिरिति न्यायेन व्याख्यानरूपविवशेषवचनाच्चैवमेवेत्याह ॥ अकर्मेति ॥ ''अकर्माक्लिष्टकारित्वान्नित्यत्वादज एव चे''ति दशमतात्पर्योदाहृतब्रह्मतर्कस्मृत्यनुसारेणेत्यर्थः । सर्वेषां पञ्चम्यंतानां विष्णुरेव जिज्ञास्यं ब्रह्मेति पूर्वसाध्येनान्वयः ।

पाण्डुरङ्गि – ब्रह्मशब्दस्य विष्णौ योगमेवाश्रित्य जीवे रूढिमाश्रित्य रूढिबाधकसद्भावाद्यौगिकार्थपरत्वमेवेत्यभ्युपेत्य परोक्तं जीवे कारणत्वस्य सावकाशत्वेन रूढ्यबाधकत्वं तस्य विष्ण्वेकनिष्ठत्वसमर्थनेन निराकुर्वन् सिद्धान्तमाह ॥ सिद्धान्तस्त्विति ॥ ब्रह्मशब्दस्य जीवपरत्वे यतो वेत्यादिपूर्ववाक्योक्तकारणत्वानुपपत्तिः । न चेमानीत्यस्य जीवकर्तृककार्य-

जातपरामर्शकत्वान्नानुपपत्तिरिति वाच्यम् । बाधकाभावेन सङ्कोचासम्भवादित्याह ॥ इमानीति ॥ अन्यथा सर्वनामत्वमेव न स्यादिति भावः । एतावता जीवे यत्किञ्चित्कार्य-कर्तृत्वमङ्गीकृत्य बाधकाभावेन सङ्कोचानुपपत्त्या यतोवेत्यादि पूर्ववाक्योक्तकारणत्वं तद्ब्रह्मेति वाक्यस्थब्रह्मशब्दस्य जीवपरत्वे बाधकमित्युक्तं इदानीं यत्किञ्चित्कार्यकर्तृत्वमपि जीवेऽनुप-पन्नमित्याह ॥ जीवेति ॥ आत्मा द्रष्टव्य इत्यादौ जिज्ञासाविधिवाक्ये जीवे प्रसिद्धात्मपद-प्रयोगेण तद् ब्रह्मेति वाक्यस्थं ब्रह्मजीव एवेति यदुक्तं तत्र दृष्टान्त एवासम्प्रतिपन्न इति भावेनाह ॥ जिज्ञास्य इति ॥ किं चान्वेषणवाक्यस्थात्मशब्दो न जीवपरः तत्रापहतपाप्मत्वादीनामुक्तत्वात् । न च शुद्धाभिप्रायेण ते सम्भवन्तीति वाच्यम् । तथापि सत्यकामत्वादयः सर्वथा नोपपद्यंत इत्याह ॥ अन्वेषणविधिवाक्येति ॥ कारणत्वं ब्रह्मपक्ष एव बाधकमित्युक्तं परिहरति ॥ निष्क्रयत्वश्रुतिरिति ॥

तात्पर्यचन्द्रिका

न च यत इत्यादेः कारणानुवादेन जिज्ञासाविधायकत्वादनुवादे च यथा प्राप्ति-तात्पर्यान्मानान्तरेणास्मदादेर्यादृशं कारणत्वं प्राप्तं तत्परमेवेदं वाक्यमिति युक्तम्। अस्यानुवादकत्वेपि ''शास्त्रस्था वा तन्निमित्तत्वा''दिति न्यायेन भाष्योक्तश्रुतिप्राप्त-कारणपरत्वात्।

प्रकाशिका –कारणत्वपरं पूर्ववाक्यं प्रकारान्तरेण जीवे सावकाशमिति शङ्कते ॥ न चेति ॥ यादृशमिति ॥ पराधीनमल्पं चेत्यर्थः ॥ शास्त्रस्थावेति ॥ आद्ये तृतीयपादे ''तेष्वदर्शनाद्विरोधस्य समाविप्रतिपत्तिः स्या''दिति पञ्चमेधिकरणे ''यवमयश्चरुर्भवती''त्यत्र यवशब्दः किं दीर्घशूकपर उत प्रियंगुपर इति संशये उभयत्र परस्तुल्यबलवत्त्वाच्च विकल्प इति प्राप्ते एकत्र मुख्यत्वेऽन्यत्र गौणत्वेनाप्युपपत्तौ नोभयत्र शक्तिकल्पना युक्ता । न च नियामकाभावः । ''यत्रा(दा)न्या ओषधयो म्लायन्ते अथैते मोदमाना इवोत्तिष्ठन्ती''ति वाक्यशेषानुगुणशिष्टप्रयोगस्य दीर्घशूकविषयकस्य तदननुगुणप्रियंगुविषयम्लेच्छप्रयोगापेक्षया बलवत्त्वेन तत्रैव शक्तिकल्पनात् दीर्घशूक एव यवशब्दार्थ इति सिद्धान्तितम् । शास्त्रस्थाः शास्त्रीयव्यवहारा एव ग्राह्याः शास्त्रे । तन्मूलत्वाच्छ्रौतव्यवहाराणामिति शास्त्रस्था इति सिद्धान्तसूत्रस्यार्थः । अत्र यथा यवादिशब्दानां वाक्यशेषानुगुणार्थपरत्वं तथा य इत्यादि-भाष्योक्तश्रुतिप्राप्तकारणपरत्वमेव न्याय्यं न प्रत्यक्षादिप्राप्तास्मदादिकारणपरत्वमित्यर्थः । इदं

(प्रकाशिका)

च शाबरभाष्यादौ वाक्यशेषमुदाहृत्यार्थस्य निर्णीतत्वादेवमुक्तम् । यदा तु सन्दिग्धे तु वाक्यशेषादित्यनेन गतार्थत्वभिया तन्मूलकार्यप्रसिद्ध्या नार्यप्रसिद्धिबाधेनार्थनिर्णयः तदा श्रुतिप्राप्तेत्यस्य श्रुतिमूलविद्वत्प्रसिद्धिप्राप्तकारणपरत्वादित्यर्थः । तेन विद्वद्रूढेश्चेत्याद्यग्रे-तनवाक्याविरोधः । एतेन यदत्र केनचित्प्रलपितं स्वप्नमनोरथिकपदार्थानां सत्यतया हिरण्यगर्भादिजीवस्य स्वप्नादिभूगोळमहार्णवादिसर्वस्रष्टृत्वादिसम्भवेन यतो वेत्यादिवाक्यं तदनुवादकत्वेनाप्युपपन्नमिति तन्निरस्तम् ।

यतो वेत्यनेन वक्तृश्रोतृसाधारणस्थूलजगत्स्रष्टृत्वस्यैवानुवाद्यत्वात् । सर्वनाम्नः सङ्कोच-काभावादित्युक्तत्वान्न स्वप्नमनोरथादावसङ्कुचितसर्वस्रष्टृत्वं जीवस्य शङ्कार्हम् । परकीयस्वप्न-पदार्थेऽन्यस्याकर्तृत्वात् । ''संध्ये सृष्टिराहही''त्यादिना स्वाप्नादिपदार्थेष्वपीश्वरस्यैव कर्तृ-त्वोक्तेश्च । ''इतरव्यपदेशा''दित्यादिसूत्रेषु जीवस्य स्वतंत्रकर्तृताया निषिद्धत्वादित्युक्त-त्वाच्च । असङ्कुचितस्वतन्त्रश्रुतिप्रसिद्धमुख्यस्रष्टृत्वस्य यतो वेत्यनुवादसम्भवे तत्त्यागायोगाच्च । यदप्येकेनापि ब्रह्मशब्देन कारणत्वाद्यनेकलिङ्गस्य गौणत्ववर्णनं युक्तम् । पूर्वाधिकरणे एकेनापि ब्रह्मशब्देनानेकवेदान्तवाक्यानां बाधस्य सिद्धांते भाषितत्वादिति तत्तुच्छम् । एकेन सावकाशेनानेकनिरवकाशलिङ्गबाधायोगात् । पूर्वाधिकरणे त्वनेकस्यापि बाधेन सिद्धान्तो-त्थितिप्रकारस्तत्रैव प्रपञ्चितोस्माभिः । यच्चोक्तं यतो वेत्यादिवाक्योक्तकारणत्वस्य जीवेऽसम्भवेन ब्रह्मशब्दार्थत्वत्यागे अन्नमयादिकोशस्थानिरुद्धादिरूपेष्वपि ब्रह्मशब्दार्थ-त्वत्यागः स्यात् । ''एतन्नानावताराणां निधानं बीजमव्यय''मित्यादिस्मृत्या मूलरूपस्यैव जगत्कारणत्वेनावताररूपेषु तदभावात् । रूपाणां सविशेषाभिन्नत्वेपि तत्तद्व्यापाराणां व्यवस्थितत्वेन ''अन्नाद्वै प्रजाः प्रजायन्त'' इत्यादिनानूद्यमानजगत्कर्तृत्वस्य कोशस्था-निरुद्धादिरूपेष्वसम्भवादिति तत्स्वरूपभूतानादिमिथ्याज्ञानाविर्भावविजृम्भितमित्युपेक्षणीयम् । सर्वरूपाणां सर्वगुणयुक्तत्वेप्यनभिव्यक्तिमात्रेण तत्तद्व्यापाराणां व्यवस्थाङ्गीकारात् । ''अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तत'' इत्यादिस्मृतेः । ''नस्थानतोपि परस्योभयलिङ्गं सर्वत्रही''त्यादौ सर्वरूपाणां निर्दोषाशेषसद्गुणत्वस्य सूत्रकृतैव प्रतिपादितत्वादिति । यदपि मूलरूपाभेदेन कोशस्थरूपेषु कारणत्वसम्भवाज्जीवस्यापि तदभेदेन कारणत्वादिकं कथंचिद्योज्यमिति तदप्रमाणकमनेकमानविरुद्धं ''भोक्त्रापत्ते''रिति सूत्रकृतैव पूर्वपक्षितमि-त्यास्तामस्तकणबुसोत्पवनायास इति । एवं जीवे रूढित्यागे बाधकं यौगिकार्थविष्णुग्रहणे साधकं कारणत्वादिविष्णुलक्षणं सूत्रयता ब्रह्मशब्दस्य विष्णौ विद्वद्रूढिः सूचिता ।

पाण्डुरङ्गि –शास्त्रस्था वा तन्निमित्तत्वादितीति ॥ अस्य सूत्रस्यायमर्थः शास्त्रस्थपदं न यथाश्रुतभाष्यपक्ष इव वाक्यशेषरूपशास्त्रस्येत्येतदर्थकमात्रान्तमस्मिन्पक्षे । किंतु विसर्गांतम् । शास्त्रे विधिनिषेधरूपे ये तिष्ठंति तत्प्रधानाः तत्प्रतिपादितधर्माधर्मव्यवहारिण इति यावत् । तेषां या प्रतिपत्तिः सैवादरणीया स्यात् । तद्विषय एवार्थो मुख्य इत्यर्थः । तन्निमित्तकत्वान्मुख्यार्थनिमित्तकत्वाद्धर्माधर्मसिद्धेः । यद्वा अयमेव तस्य शब्दस्य मुख्योर्थ इति सिद्धेः । तन्निमित्तत्वात् अदृष्टार्थव्यवहाररूपशास्त्रस्थप्रसिद्धिनिमित्तकत्वात् प्रतिपादकत्वमात्रप्रसिद्धेः परमन्यलोकव्यवहारनिमित्तकत्वादिति । एवं ब्रह्मशब्दस्य जीवे रूढिं परमात्मनि च योगमाश्रित्य रूढिपक्षे यतो वेत्यादिपूर्ववाक्योक्तकारणत्वस्यैव बाधकत्वेन रूढार्थग्रहणासम्भवात् विष्णुरूपयौगिकार्थत्वमेव तद् ब्रह्मेति ब्रह्मशब्दस्येत्युपपादितम् ।

तात्पर्यचन्द्रिका

किंच कवीनां मते ''तदेव परमं ब्रह्मेत्याहु''रिति श्रुतौ विष्णौ विद्वद्रूढिरुक्ता । न हि चैत्रः परमधार्मिक इत्युक्ते धार्मिकत्वादन्येनाकारेण परमत्वं भाति । न च स्वस्यामुख्यत्वे मुख्यांतरे वा सति स्वस्य परमत्वम् । न चैवं गुणपूर्त्यलाभः । बृहंतो हीति श्रुत्या योगस्यापि सत्त्वात् । पङ्कजादौ रूढेरनतिप्रसङ्गेपि प्रमितत्वाद्योगवत्प्रकृते योगस्यानतिप्रसङ्गेपि तदेवेति श्रुत्या रूढेरपि सत्त्वाच्च । रूढिं विना परमपदोक्तमुख्यत्वानुपपत्तेः । उपपत्तौ वा तावतैव प्रकृतसिद्धेश्च । प्रयोगबाहुल्यरूपरूढेराहुरित्यनेनोक्तत्वाच्च । ननु न प्रयोगबाहुल्यं रूढिः किंतु समुदायशक्तिः । पङ्कजादेरपि पद्मत्वजात्यंशे समुदायशक्तिरेव । प्रयोगप्राचुर्येण झडिति तेन जातिप्रतीतेरिति चेत्तर्हीहापि भाष्ये वक्ष्यमाणश्रौतस्मार्तप्रयोगप्राचुर्येण विदुषां ब्रह्मशब्देन विष्णुव्यक्तिप्रतीतेस्तत्र समुदाशक्तिरस्तु ।

प्रकाशिका –''विद्वद्रूढिर्वैदिका स्यात्सा योगादेव लभ्यत'' इत्युक्तेः तां पूर्वनये भाष्यादौ प्रसङ्गादुक्तमिह पूर्वपक्षिणाऽऽक्षिप्तां समर्थयते ॥ किंचेति ॥ एतेन सूत्रे कारणत्वस्यैव लोकप्रसिद्धिबाधकत्वस्योक्तत्वेन विद्वत्प्रसिद्धेस्तद्बाधकत्वस्यानुक्तत्वाद्विद्वद्रूढ्यादिसमर्थनेन तया लोकप्रसिद्धिबाधोक्तेः सूत्रानानुगुण्यमिति कस्यचित्प्रलपनं प्रत्युक्तम् । योगार्थोपादानोक्तयैव सूत्रे तत्सूचनात् । अत एवेह टीकायां ''यद्यपि विष्णौ ब्रह्मशब्दो

(प्रकाशिका)

विद्वद्रूढियुक्तः । तथाप्यभ्युपगम्योक्तिरिय''मिति ग्रन्थेन विद्वद्रूढ्युक्त्यैवाज्ञरूढिबाधे वक्तव्ये सूत्रे कारणत्वाद्युक्त्या तद्बाधोक्तिर्विष्णौ रूढ्यभावाभ्युपगमवादेनेत्युक्तम् । विद्वद्रूढ्युक्त्यैव सूत्रे लोकरूढिबाधोक्तौ जिज्ञासाहेतुभूतगुणपूर्तिसिद्धिर्न स्यादित्यभ्युपगमवादप्रयोजनं ध्येयम् । यद्वा ''स विष्णुराह हि तं ब्रह्मेत्याचक्षते'' इति प्रयोगाबाहुल्यरूपरूढेर्देवमीमांसांतिम-सूत्रेभिऽहितत्वादिह तद्व्युत्पादनम् । तथाच सूत्रकृदभिप्रेतत्वात्तद्वर्णनमिह नानुचितमिति ध्येयम् । ''तदेवे''ति तच्छब्देन विष्णुरेव परामृश्यत इत्यस्य ''यमंतःसमुद्र'' इत्यादिभाष्ये ''अंभस्य पार इत्युक्तो नारायणपदोदित'' इत्यादिपूर्वनयांतिमानुव्याख्यानादौ च सिद्धत्वाद्रूढिव्युत्पादनांशस्यास्पष्टत्वात्परमपदोक्तमुख्यत्वान्यथानुपपत्त्या तद्ब्रह्मशब्दस्य रूढिं सिसाधयिषुः पारम्यं ब्रह्मत्व एवान्वेति नान्यत्रेति तावत्साधयति ॥ न हीति ॥ तथाच ब्रह्मशब्दार्थत्वेनैव परमत्वमिति भावः । ततः किमित्यत आह ॥ न चेति ॥ ततोपि किमिति चेद्रूढिं विना परमपदोक्तमुख्यत्वानुपपत्तेः रूढिस्सिद्धेति वक्ष्यमाणेन सम्बन्धः । तत्र बाधकमाशंक्य निरस्यति ॥ न चैवमिति ॥ रूढत्व इत्यर्थः । योगस्यानतिप्रसङ्गाद्रूढि-र्व्यर्थेत्युक्तमित्यत आह ॥ पङ्कजादाविति ॥ एवं बाधकं निरस्य प्रकृतमाह ॥ रूढिमिति ॥ रूढिरुक्तेति पूर्वेण पञ्चम्या अन्वयः ॥ तावतैवेति ॥ मुख्यत्वेनैव विष्णुपरत्वसिद्धेरित्यर्थः । उक्तं च सुधायां ''सिद्धत्वाद् ब्रह्मशब्दस्य विष्णौ स्पष्टतया श्रुता'' वित्येतद्व्याख्यावसरे ''मुख्यामुख्ययोर्हि मुख्यार्थस्तावद् ग्राह्यः । शक्तिवशात्तस्यैवादौ बुद्धौ सन्निधाना''दि-त्यादि। एवमर्थापत्त्या रूढिसिद्धिमुक्त्वा कण्ठतस्तामाह ॥ प्रयोगेति ॥ समुदायशक्तौ मानमाह ॥ प्रयोगप्राचुर्येणेति ॥ तेन पङ्कजपदेन । सा प्रतीतिरिहापि तुल्येत्याह ॥ तर्हीति ॥ ''प्रयोगमात्रबाहुल्यं रूढिरित्यभिधीयत'' इत्यनुव्याख्यानानुसारेण प्राचीनपक्षः । अयंतु ''बहुलातिप्रयोगतः । रूढमित्येव साध्यं स्या''दित्यनुव्याख्यानानुसारेण । अत्र प्रयोग-प्राचुर्येण समुदायशक्तिरूपरूढिसाधनात् । अस्मिन्पक्षे श्रुतावाहुरित्येतत्प्रयोगप्राचुर्यप्रदर्शन-परम् । तेन शक्तिः कल्प्येति भावः । यद्यपि न समुदायशक्ती रूढिः । एकाक्षरप्रत्ययादौ समुदायाभावात् । किंत्वखण्डशक्तिः। उक्तं च तर्कताण्डवे ''अखण्डशक्त्या प्रतिपादकत्वं रूढि''रिति । तथापि प्रयोगबाहुल्यातिरिक्तशक्तावेव तात्पर्यम् । यद्वा पररीत्या तुष्यतु दुर्जन इत्यभिधानमेतत् । एतेन भगवति विद्वद्रूढ्येत्यादिपूर्वाधिकरणटीकावाक्यं विवृतं भवति।

पाण्डुरङ्गि –इदानीं विष्णावपि रूढ एवायं ब्रह्मशब्द इत्यभिप्रायेण रूढिपक्षे गुणपूर्त्यसिद्धियोगानतिप्रसङ्गादिकं परोक्तं बाधकं परिहरति ॥ किञ्चेति ॥ नन्वेतावता कथं रूढिसिद्धिः । न च परमं ब्रह्मेत्युक्त्या विद्वद्रूढिसिद्धिः । परमत्वस्य प्रकारान्तरेणापि सम्भवादित्यत आह ॥ नहि चैत्र इति ॥ तत्र यथा धार्मिकत्वेनैव परमत्वं तथात्रापि ब्रह्मत्वेनैव परमत्वमिति भावः । नन्वस्तु ब्रह्मत्वेनैव परमत्वं कथं तावता रूढिरित्यत आह ॥ न च स्वस्येति ॥ ननु योगस्यातिप्रसक्तत्वे हि रूढिः स्वीकर्तव्या पङ्कजादिवत् । न चात्र योगोऽतिप्रसक्त इत्यत आह ॥ पङ्कजादाविति ॥ तथाच रूढेः प्रमितत्वाद्रूढिः स्वीक्रियते । अन्यथा पङ्कजादिपदेपि योगो न स्वीक्रियेतेति भावः । ननु ''तदेव ब्रह्म परमं कवीना''मित्यादेः केवलयोगेनाप्युपपन्नत्वात्कथं रूढिज्ञापकत्वमित्यत आह ॥ रूढिं विनेति ॥ उपपत्तौ वेति ॥ परमपदोक्तमुख्यत्वोपपत्तौ वेत्यर्थः ॥ तावतैवेति ॥ योगमात्रेणैवेत्यर्थः । प्रकृतसिद्धेः जिज्ञास्यस्य ब्रह्मत्वसिद्धेः । अनेन परमपदोक्तमुख्यत्वानुपपत्तिः प्रमाणत्वेनोदिता । तत्र प्रमाणान्तरं चाह ॥ प्रयोगेति ॥

तात्पर्यचन्द्रिका

विद्वद्रूढेश्च यवादिशब्दानां प्रियंग्वादिषु म्लेच्छप्रसिद्धितोपि दीर्घशूकेष्वार्यप्रसिद्धेरिव बालानां चित्रलिखितसिंहे सिंहप्रसिद्धिवद्दुर्बलाऽतोऽविद्वद्रूढितो बलीयस्त्वात् । पिकादिशब्दानां चार्यप्रसिध्यविरोध एव म्लेच्छप्रसिद्धितः कोकिलाद्यर्थत्वमुक्तं पिकनेमाधिकरणे । राजशब्दस्य पालनादिकर्तर्यार्याणां प्रयोगेपि ''राजाऽऽस'' इत्यार्यवरपाणिनिस्मृत्यनुगृहीतत्वात्क्षत्रियजातिविषया म्लेच्छप्रसिद्धिरेव ग्राह्येत्युक्तमवेष्टिनये । न चात्राविद्वद्रूढिः स्मृत्यनुगृहीता । प्रत्युत तदेवेति श्रौतावधारणविरुद्धा । अमुख्यत्वाविशेषेपि गौणलक्षणावृत्त्योः प्राभाकरमते गौण्या मतांतरे लक्षणाया ज्यायस्त्ववत् लक्षणात्वाविशेषेपि ''प्रोद्गातृणा''मित्यत्र बहिरङ्गषोडशर्त्विग्लक्षणातोंतरंगप्रस्तोत्रादिचतुष्टयलक्षणाया ज्यायस्त्ववत् लक्षणामात्रान्निरूढलक्षणाया ज्यायस्त्ववत् मुख्यत्वाविशेषेपि योगाद्रूढेर्ज्यायस्त्ववत् गवादिशब्दानामनेकार्थेषु रूढत्वेपि प्रकरणोपपदाद्यभावे सास्नादिमद्व्यक्तेरेव प्रतीतिवच्च रूढित्वाविशेषेपि विद्वद्रूढेरेवासम्भाविताज्ञानमूलाया बलीयस्त्वोपपत्तेश्च । ''नारायणोसौ परमो विचिंत्यः नारायणं महाज्ञेय''मित्यादिश्रुतौ जिज्ञास्ये नारायणशब्दश्रवणाच्चेति ।

(प्रकाशिका)

प्रकाशिका – ''विद्वदविद्वद्रूढ्योर्विद्वद्रूढेरेव मुख्यत्वा''दिति तत्रत्यटीकावाक्यं विवृण्वानोऽस्तु विद्वद्रूढिस्ततश्च किमित्यत आह ॥ विद्वद्रूढेश्चेति ॥ बलीयस्त्वादित्यन्वयः । तस्यापि विष्णुरेव ब्रह्मेति पूर्वसाध्येनान्वयः । तत्र वैदिकलौकिकौदृष्टान्तावाह ॥ यवादीति ॥ उक्तमधिकरणशरीरं प्राक् । यवादिशब्दानां प्रियंग्वादिष्वनार्यप्रसिद्धौ सत्यामपि तां बाधित्वाऽऽर्यप्रसिद्धिबलेन दीर्घशूकाद्यर्थत्वमुक्तमित्यार्यप्रसिद्धेर्बलीयस्त्वं यथेत्यर्थः । तत् सिद्धान्ते वाक्यशेषार्यप्रसिद्धचोर्द्वयोरप्युक्तत्वात् भाष्योक्तश्रुतिप्राप्तेत्यत्र च तदुदाहरणं न विरुद्धमिति ध्येयम् । बालानां अज्ञानाम् । अयं चाज्ञरूढेर्दौर्बल्ये दृष्टान्तः । ननु क्वचिदनार्यप्रसिद्धोप्यर्थो वेदे ग्राह्य इत्युक्तमित्यत आह ॥ पिकादीति ॥ आद्ये तृतीयपादे ''चोदितं तु प्रतीयेताविरोधात्प्रमाणेने''ति षष्ठेधिकरणे आर्यप्रसिद्धिहीनानां पिकनेमसत-तामरसादिशब्दानां किं निरुक्तादिवशेनार्थकल्पनमुत म्लेच्छप्रसिद्धचनुरोधेन कोकिलाद्यर्थ-त्वमिति संशये म्लेच्छेषु पदानामर्थानां च प्रायशो विप्लुतिदर्शनान्न तत्प्रसिद्धिर्मानम् । अतो निरुक्तादिद्वारार्थकल्पनमिति प्राप्ते श्रुतौ प्रयोगात्पदानि तावदविप्लुतानि । न च तेषामार्यप्रसिद्धः कश्चिदर्थोस्ति । यत्र मुख्यानि भूत्वा म्लेच्छेषु गौणानि विप्लुतिं गच्छेयुः । तस्मान्म्लेच्छप्रसिद्ध एवार्थोमीषामिति सिद्धान्तितम् । प्रकृते चार्यप्रसिद्धिशब्दितविद्वद्रूढि-विरोधोस्तीति भावः । ननु सत्यप्यार्यप्रसिद्धिविरोधे म्लेच्छप्रसिद्धेः क्वचिद्बलवत्त्वमुक्तमित्यत आह ॥ राजशब्दस्येति ॥ द्वितीये तृतीयपादे ''अवेष्टौ यज्ञसंयोगात् क्रतुप्रधानमुच्यत'' इति द्वितीयेधिकरणे राजसूयप्रकरणे ''आग्नेयमष्टाकपालं निर्वपति हिरण्यं दक्षिणे''ति विहितामवेष्टिनामिकामिष्टिं प्रकृत्य श्रुतं ''यदि ब्राह्मणो यजेत बार्हस्पत्यं मध्ये निधायाहुतिमाहुतिं हुत्वा तमभिधारयेत् । यदि राजन्य ऐंद्रम् । यदि वैश्यो वैश्वदेव''मिति वाक्यमुदाहृत्य ब्राह्मणादीनामवेष्टिनामकेष्टौ प्राप्तानां मध्ये निधानविशेषं प्रति निमित्तार्थानि वचनानि अप्राप्तानां प्रापकाणि वेति संशये ''राजा राजसूयेने''ति श्रुतस्य राजशब्द-स्यानार्यप्रसिद्धचा क्षत्रियत्वनिमित्तत्वेन रूढत्वावगमेपि तत्प्रसिद्धेरप्रामाण्यादार्यावर्तप्रसिद्धचा च ततो बलीयस्याजनपदरक्षणरूपराज्यकर्तृत्वनिमित्तत्वावगमेन वर्णत्रयसाधारणत्वादवेष्टौ प्राप्तानां निमित्तार्थानि वचनानीति प्राप्ते ''राजानमभिषेचये''दित्यभिषेकविधौ राज्ययोगा-त्प्रागेव क्षत्रिय एव प्रयोगाद्रूढ एव राजशब्दः ।

किं च पाणिनिरपि ''तस्य कर्मणी''त्यधिकृत्य ''पुरोहितादिभ्योयगि''ति राजशब्दा-द्यक्प्रत्ययेन राज्यशब्दनिष्पत्तिं ब्रुवन् रूढमेव मन्यते । अन्यथाऽन्योन्याश्रयापत्तेः । न च

पाणिनिस्मृतिरप्रमाणम् । अनार्यप्रसिद्धेर्मूलत्वसम्भवात् । अतोभियुक्तस्मृत्या सम्भवद्भौणभ्रांत्यादिमूलस्यार्यावर्तप्रयोगस्य बाधादभियुक्तस्मृत्यनुगृहीतानार्यद्राविडप्रसिद्ध्या राजशब्दो रूढ्या क्षत्रियवचन इति ब्राह्मणादाववेष्टौ प्राप्त्यभावादप्राप्तप्रापकाणि वचनानीति सिद्धांतितम् । तथाचार्यप्रसिद्धेर्बलवत्त्वमित्यस्य न विरोध इति भावः ॥ राजाऽऽस इति ॥ पञ्चमस्य प्रथमे ''पत्यंतपुरोहितादिभ्यो य''गिति सूत्रम् । तस्यार्थः । पत्यंतात्प्रातिपदिकात्पुरोहितादिभ्यश्च प्रातिपदिकेभ्यो भावकर्मणोरर्थे यक्प्रत्ययो भवति । सैनापत्यं पौरोहित्यमिति । तत्र पुरोहितादिगणपाठे ''राजाऽस'' इति पठितम् । तस्यायमर्थः । स इति समासस्य संज्ञा । राजा राजन्शब्दः । असे असमासे यकमुत्पादयति भावकर्मणोरिति । राज्ञो भावः कर्म वा राज्यम् । समासेत्वाधिराज्यम् । ब्राह्मणादित्वात् ष्यञेवेति । अवेष्टिनये अवेष्ट्यधिकरणे ॥ न चात्रेति ॥ ब्रह्मशब्द इत्यर्थः । ''ब्रह्माणि जीवाः सर्वेपी''ति वचनं त्वमुख्यवृत्त्याप्युपपन्नमिति भावः ॥ प्रत्युतेति ॥ उक्तं च —

''तदेव ब्रह्म परममिति सावधृतिर्जगौ ।
यतोतो ब्रह्मशब्दस्य तत्रैव नियतत्वत''

इत्यानन्दमयनयानुव्याख्याने । न चैवमपि नामधेयपादे ''बर्हिराज्ययोरसंस्कारे शब्दलाभादतच्छब्द'' इति सप्तमाधिकरणे बर्हिराज्यशब्दयोः संस्कृततृणविशेषाज्ययोर्याज्ञिकार्यप्रसिद्धौ सत्यामपि तां बाधित्वाऽनार्यप्रसिद्ध्या तृणाज्यसामान्यपरत्वमङ्गीकृतमिति वाच्यम् । संस्कृतमात्रे आर्यप्रयोगेपि तृणाज्यगतजातिं विना तत्राप्रयोगेण जातिनिमित्तत्वस्यार्याणामपि संमतत्वादसंस्कृते याज्ञिकाप्रयोगस्य प्रयोजनाभावेनोपपत्त्याऽनार्यप्रसिद्धेरार्यप्रसिद्ध्यविरोधात् । उक्तं च शास्त्रदीपिकायां ''नच शास्त्रस्थसर्वलोकविरोधः । तत्रापि जातेरनपगमादित्युक्त''मित्यादि । अत एव ग्रन्थकारैरपि पिकनेमाधिकरणतात्पर्योक्त्यैव तत्तात्पर्यमुक्तप्रायमिति त्यक्तमिति ध्येयम् । ननु रूढित्वाविशेषेपि कथमेकस्याः प्राबल्यमित्याशङ्कां दृष्टांतोक्तिपूर्वं हेतुं वदन्निरस्यति ॥ अमुख्यत्वेति ॥

यद्यपीदं ''समाकर्षा''दित्यधिकरणव्युत्पाद्यं तथापि शिष्यहिताय वक्ष्यमाणमेवेहोच्यते । नत्वेतदधिकरणप्रमेयतया । तथाच वक्ष्यति तत्रैव ग्रन्थकार इति ध्येयम् । मतान्तरे तर्कादिमते ॥ प्रोद्गातॄणामिति ॥ तृतीयस्य पञ्चमे पादे ''उद्गातृचमससमेकस्य श्रुतिसंयोगा''दित्यष्टमाधिकरणे ''प्रैतुहोतुश्चमसः प्रब्रह्मणः प्रोद्गातॄणां प्रयजमानस्य प्रैतुसदस्याना''मिति

(प्रकाशिका)

मन्त्रमुदाहृत्य चिन्तितम् । प्रोद्गातॄणामिति श्रुतं चमसमुद्गातैको भक्षयेदुत सर्वेऽथ सुब्रह्मण्या-दन्ये सामगायिनो यद्वा तत्सहिताश्चत्वार इति संशये उद्गातैको भक्षयेत् । प्रातिपदि-कार्थविरोधिनो बहुवचनार्थस्य बहुत्वस्याविवक्षितत्वादित्याद्यं पक्षमुक्त्वा लक्षणयार्थ-वत्त्वसम्भवेऽविवक्षायोगात् प्राकरणिकसर्वपुरुषेष्वविशेषाल्लक्षणेतिषोडशर्त्विजां भक्षणमिति द्वितीयमुत्थाप्य श्रुत्यर्थसम्भवे लक्षणायोगादुद्गायन्तीत्यवयवप्रसिद्ध्या गानकारिणामपसु-ब्रह्मण्यानां त्रयाणां च्छंदोगानां भक्षणमिति तृतीयमुपन्यस्य उत्पूर्वस्य गायतेः समुदाय-प्रसिद्धिरूपरूढ्या द्वितीयसामभक्तिविषयत्वेनोद्गातुरेव तद्गातृत्वेन योगेन त्रयाणामप्राप्त्या बहुवचनानुपपत्तेर्लक्षणाया आवश्यकत्वेनोद्गातृप्रवचनसम्बन्धावान्तरसाम्यात्सुब्रह्मण्यानां च्छन्दोगानां चतुर्णामपि भक्षणमिति चतुर्थः पक्षः स्थापितो भाष्ये । अत्र यथा बहिरङ्गसर्वषोडशक्रत्विग्लक्षणातोंतरंगप्रस्तोतृप्रोद्गातृप्रतिहर्तृसुब्रह्मण्यरूपचतुष्टयलक्षणाया ज्यायस्त्वं तद्वदित्यर्थः । अत्र यद्यपि वार्तिककारश्चतुर्थमपि पक्षं निरस्यैकस्तोत्रसम्बन्धस्य सदसि सन्निधानस्य भक्षणव्यापारस्य च ततोप्यंतरङ्गावान्तरसामान्यस्यानुरोधेन प्रस्तोत्रादिषु त्रिष्वेव लक्षणेत्यपसुब्रह्मण्यानां त्रयाणामेव भक्षणमिति पञ्चमं पक्षं सिद्धांतितवान् । तथापि भाष्ये चतुर्थस्य स्थापितत्वात्प्राभाकरैरङ्गीकाराच्च चतुष्टयेत्यवोचदिति ध्येयम् । यद्वा न चतुष्टये तात्पर्यम् । किंत्वंतरङ्गलक्षणायामेवेति न दोषः ॥ निरूढेति ॥ शीघ्रमर्थोपस्थापकत्वादिति भावः । रूढेरित्यत्राप्ययमेव हेतुरिति भावः ॥ अनेकार्थेष्विति ॥ ''स्वर्गेषु पशुवा''गित्यादिष्वित्यर्थः ॥ असम्भावितेति ॥ बलीयस्त्वे हेतूक्तिः । समाख्या-बलाच्च ब्रह्मशब्दार्थो विष्णुरित्याह ॥ नारायण इति ॥ ''यस्य प्रसादात्परमार्तिरूपादस्मात् संसारान्मुच्यते नापरेण । नारायणोसौ परमो विचिन्त्यो मुमुक्षुभिः कर्मपाशादमुष्मा''दिति पैङ्गिश्रुतिः । ''नारायणं महाज्ञेयं विश्वात्मानं परायण''मिति तैत्तिरीय श्रुतिः ।

अत्रापि पञ्चम्यतानां विष्णुरेव ब्रह्मेत्यन्वयः । जिज्ञासासूत्रे विचारविधायकनाना-वाक्यानामुदाहरणत्वेप्यविप्रतिपन्नवाक्यत्यागेन विप्रतिपन्नवाक्येषु कारणत्वादितत्तद्वाक्य-स्थविष्णुलक्षणप्रदर्शनमुखेन तत्तद्विध्युद्देशगतब्रह्मात्मादिशब्दस्य विष्णुपरत्वसमर्थनार्थमस्य लक्षणसूत्रस्य प्रवृत्तत्वात् ''नारायणोसा''वित्यादिश्रुतेश्च विष्णौ निरूढश्रुतिलिङ्गाद्युपेततया विष्ण्वर्थकत्वेन निर्णीतत्वाद्भवत्यत्र समाख्येति भावः । एतेन विध्युद्देशगतब्रह्मपदस्वार-स्यानुरोधात् ''यतोवे''ति पूर्ववाक्यस्यासङ्कुचितकारणत्वाद्युपेततया ब्रह्मपरत्वेपि पूर्वोत्तर-भागयोरविरोधाय जीवपरयोरभेद एव स्वीक्रियताम् । त्वन्मते जीवब्रह्मणोर्विरुद्धधर्मवतो-

रप्यभेदबोधने लौकिकविरोधदृष्टेरकिंचित्करत्वादीश्वरस्याचिंत्याद्भुतमहिम्नैव निरवयवत्वैकदेश-कर्तृत्वयोरिव शुष्कतर्कागोचरत्वेन सर्वविरोधसमाधानसम्भवादिति कस्यचित्प्रलपनं प्रत्युक्तम् । विष्णुग्रहणे महायोगविद्वद्रूढिभ्यां परममुख्यार्थस्यैव लाभेन विध्युद्देशास्वारस्याभावात् । जीवत्यागे भ्रांतेरेव त्यागेन श्रुत्यर्थाबाधाच्च । वक्ष्यति चाभिमानिनये युक्तिविरोधेन मृदादिशब्दैरभिमानिग्रहणे मुख्यार्थस्यैव ग्रहणेन श्रुत्यर्थाबाधादित्यादि । जीवपराभेदस्या-प्रामाणिकत्वानेकमानविरुद्धत्वयोरन्यत्र विस्तृतत्वाच्च । प्रामाणिकस्यैवाचिंत्यशक्त्या घटनाङ्गीकारात् । अल्पशक्तिजीवाभेदे चाचिंत्यशक्तेरेव हानिप्रसङ्गेन तयाऽभेदकृतविरोध-समाधानस्य कफोणिगुडायितत्वात् । ''नारायणोसा''वित्यादिसमाख्याश्रुतौ स्पष्टं भेदादेः प्रतिपादनाच्च यत्किञ्चिदेतत् । यदपीश्वरेऽचिंत्यशक्त्यैव शुष्कतर्कागोचरत्वेन सर्वविरोधम-पह्नुवानस्तस्य जीवाभेदतर्कागोचरत्वादि कथं विस्मरसीत्यादि वल्गनं तदपि प्रत्युक्तम् । तस्याप्रामाणिकत्वात् । अल्पशक्तिजीवाभेदे महैश्वर्यस्यैव हानेरित्यादेस्तत्र तत्र बहुधा प्रतिपादितत्वात् । तत्सर्वमनाकलयतो विरुद्धं चाकलयत आत्मीयदोषं सर्वज्ञतमग्रंथकर्त-र्यारोपयतस्तव महापातकिनः प्रतिवचनानर्हत्वादुपेक्षैव कार्येत्यास्तां तावत् ।

पाण्डुरङ्गि – अस्तु विष्णौ ब्रह्मशब्दस्य विद्वद्रूढिर्जीवे च रूढिमात्रं तथापि रूढजीव-रूपार्थत्वमेव ब्रह्मशब्दस्यास्तु कुतो विष्णुपरत्वमित्यतो रूढिमात्राद्विद्वद्रूढेर्बलवत्त्वाद्विष्णु-रूपार्थत्वमेवाङ्गीकार्यं न तु जीवपरत्वमित्यभिप्रायेण तत्र दृष्टान्तं दर्शयन्नाह ॥ विद्वद्रूढेश्चेति ॥ विद्वद्रूढेर्बलवत्त्वे यवादीति दृष्टान्तः । अविद्वद्रूढेर्दुर्बलत्वे बालानामिति दृष्टान्त इति द्रष्टव्यम् । ननु यदि रूढ्यपेक्षया विद्वद्रूढेर्बलवत्त्वं तर्हि पिकादिशब्दानां म्लेच्छादि-प्रसिद्धचनुसारेण कोकिलाद्यर्थत्वमेवेत्यर्थप्रतिपादकपिकनेमाधिकरणविरोधः स्यादित्यत आह ॥ पिकादिशब्दानामिति ॥ राजास इति ॥ राजशब्दोसे अससासे यकमुत्पादयति ॥ राज्ञो भावः कर्म वा राज्यम् । अस इति किम् । आधिराज्यम् । ब्राह्मणादित्वात्ष्यञ् ।

यद्यपि तत्र राजशब्दः पठ्यते तथाप्ययमेवास इति प्रतिषेधो ज्ञापयति अस्त्यत्र राजशब्दे तदन्तविधिरिति । अपर आह ब्राह्मणादेराकृतिगणत्वादेव तदन्तात्ष्यञ् सिद्धे राजशब्दस्य तत्र पाठे यका सह समावेशार्थ इति । तथा चावेष्ट्यधिकरणे शाबरभाष्ये उक्तं तस्य कर्मणि ष्यञिति । तदन्तादाकृतिगणत्वादेव ष्यञ्सिद्धिः । अथ राजन्शब्दपरिगणनं किमर्थं यका सह समावेशार्थ इति कोर्थः । केवलाद्वावपि भवत इति । अत एव

(पाण्डुरङ्गि)

केवलाद्भाष्ये षञुक्तिरिति भावः । ''पत्यन्तपुरोहितादिभ्योयगि''ति सूत्रस्थपुरोहितादि-गणपठितं राजास इत्येतत् । न तु पाणिनीयं पृथक् सूत्रम् । अत एव काशिकायां ''पत्यन्तपुरोहितादिभ्योय''गिति सूत्रं व्याख्याय सैनापत्यं पौरोहित्यमित्याद्युदाहृत्य च पुरोहितादिगणपाठमध्य एव राजास इत्येतत्पठितम् । राजशब्देन तदन्तविधिरिति चोक्तं मञ्जर्यामपि । एवं च ब्राह्मणादिपाठस्य समासे च रितार्थत्वादसमासे योगे भवतीति स्वमतमुक्त्वा अपर आह ॥ ब्राह्मणादेराकृतिगणत्वात्तदन्तात्ष्यञ् सिद्धे राजशब्दस्यात्र पाठो यका सह समावेशार्थ इति । तथा चावेष्ट्यधिकरणे शाबरभाष्ये उक्तं तस्य कर्मणि षञिति मतांतरमुक्तम् । सिद्धान्तकौमुदीकारस्तु इदमेव गणमध्यपठितं गृहीत्वा राजन्शब्दो समासे यकं लभत इत्यर्थः । राज्ञो भावः कर्म वा राज्यम् । समासे तु ब्राह्मणादित्वात्षञ् । आधिराज्यमिति व्याचख्यौ । तट्टीकायां तु यद्यपि ब्राह्मणादिषु राजन्शब्दः केवलः पठ्यते तथाप्ययमेव स इति प्रतिषेधो ज्ञापयति अस्त्यत्र राजन्शब्देन तदन्तविधिरिति । एवं च ब्राह्मणादिपाठस्य समासे चरितार्थत्वादसमासे विशेषविहितो यगेव भवतीति । अत एवावेष्टिनये राज्ञो भावः कर्म वा राज्यं ब्राह्मणादित्वात्ष्यञ् इति शाबरभाष्यं भट्टपादै-र्दूषितम् । केचित्तु भाष्यं समर्थयमाना इत्थमाहुः ब्राह्मणादेराकृतिगणत्वात्तदन्तादेव ष्यञ् सिद्धे राजन्शब्दस्य तत्र पाठो यका सह समावेशार्थ इति । तच्च हरदत्तमाधवाभ्यामे-कीयमतत्वेनोपनिबद्धमित्युक्तम् । कौमुदीटीकायां विश्वकर्मीयायामपि ''राजश्वशुराद्य''दिति सूत्रेण राज्ञो जातौ यत् राजन्यः क्षत्रिय इत्यत्र । ननु जनपदरक्षणात्मकराज्ययोगाद्राजा भवति । स चाक्षत्रियोपि सम्भाव्यत इति राज्ञो जातावित्यत्र क्षत्रियजातिरिति कथमुक्तमिति चेन्न । स्वतन्त्रो राजशब्दः क्षत्रियवचनो न राज्ययोगमपेक्षते । राज्ञो भावः कर्म वा राज्यमिति कात्र विनिगमनेति चेत्तस्य कर्मणीत्यत्र ''पत्यन्तपुरोहितादिभ्योय''गिति स्मरणस्य नियामकत्वादित्युक्तम् ।

ननु स्वतो दुर्बलाया अपि म्लेच्छप्रसिद्धेः स्मृत्यनुगृहीतत्वेनाविद्वद्रूढ्या ब्रह्मशब्दस्य जीवपरत्वमेव भवत्वित्यत आह ॥ न चात्रेति ॥ न केवलं तदननुगृहीतेत्येतावत् किंतु तद्विरुद्धा चेत्याह ॥ प्रत्युतेति ॥ ननु विद्वदविद्वद्रूढ्योः कथं तारतम्यं वृत्तौ तारतम्यस्य क्वाप्यदृष्टत्वादित्यत आह ॥ अमुख्यत्वेति ॥ गौण्या इत्यादि ॥ गौण्यां सादृश्यान्त-र्गणिकभेदे सत्यपि सादृश्यत्वेन रूपेणानुगते तात्पर्यमित्येकार्थघटादिशब्दादिवत्तात्पर्यविषये द्राग्धीः । लक्षणायां तु क्वचित्सम्बन्धे क्वचित्तद्धारा पूतत्वे क्वचिच्छीलत्वादाविति

वैरूप्यान्नानार्थकाक्षादिशब्दादिव विलम्बेन तद्धीरिति गौण्यपेक्षया लक्षणाया जघन्यत्वमिति भावः । गौण्यां सादृश्यं सर्वत्र विशेषणं लक्षणायां सम्बन्धस्तु क्वचिदेवेति लक्षणा जघन्येत्यप्याहुः । ननु गौणलक्षणयोर्भेदात्तत्र तारतम्येपि कथमेकस्यां वृत्तौ तारतम्यमित्यतो दृष्टान्तांतरमाह ॥ लक्षणेति ॥ मतांतर इति ॥ भट्टमते गौण्याः लक्षितलक्षणात्वात्तदपेक्षया लक्षणामात्रस्य ज्यायस्त्वमिति भावः । नन्वेवं लक्षणाया अमुख्यवृत्तित्वादमुख्यवृत्तौ तारतम्येपि विद्धदविद्धद्रूढ्योर्मुखवृत्तित्वात्कथं तारतम्यमित्यपरितोषाद्दृष्टान्तांतरमाह ॥ मुख्यत्वेति ॥ तथापि रूढावेव तारतम्यं नोपलब्धमित्यतो दृष्टान्तांतरमाह ॥ गवादि-शब्दानामिति ॥ यथा दिग्दृष्टिदीधितिस्वर्गवज्रवाग्बाणवारिभूलक्षणेषु नवस्वर्थेषु शक्त्य-विशेषेपि गोशब्दात्सास्नादिमदाकृतौ प्रयोगबाहुल्यादेव प्रथमप्रतीतिरिति भावः । रूढ्यपेक्षया विद्धद्रूढेरेव प्राबल्ये किं निमित्तमित्यत उक्तमसम्भावितेत्यादि । किं चासन्दिग्धजिज्ञासावाक्ये जिज्ञास्ये विष्णुवाचिनारायणशब्दप्रयोगात्तत्समाख्यानादत्रापि ब्रह्मशब्देन विष्णुरेवाभिप्रेत इत्याह ॥ नारायणोसाविति ॥

तात्पर्यचन्द्रिका

सुधायां तु ब्रह्मशब्दः किं प्रसिद्धजीवपर उतार्थान्तरपर इति संदिह्य अन्त्ये तस्यार्थस्य तद्वाचितायाः तत्र तात्पर्यस्य च कल्प्यत्वाद्गौरवम् । आद्ये तु लाघवम् । जीवस्याकल्प्यत्वात् । बृहजातिजीवेत्यभिधानाच्छक्तेरपि क्लृप्तत्वादबाधेन तात्पर्य-स्यापि सिद्धत्वादिति पूर्वपक्षितम् । तत्रात्रेव तद्ब्रह्मेति वाक्य एव ब्रह्मशब्दस्य न विष्णुपरत्वमिति न विवक्षितम् । किं तु सर्वत्र । अन्यथा सिद्धांतिनं प्रत्यर्थादेः कल्प्यत्वोक्तिरयुक्ता स्यात् । तत्रत्यं ''न हि ब्रह्मशब्दो गुणपूर्तिवाचीत्येतावता सर्वत्र तत्परो भवती''ति वाक्यं तु तत्पूर्वपक्षे क्वचिद्गुणपूर्तिवाचिताङ्गीकारेण न प्रवृत्तम् । किंतु ब्रह्मशब्दो गुणपूर्तिवाची न वेत्येव सन्दिह्यतां किं तात्पर्यसन्देहेनेति शङ्कायां वाचकत्वे सिद्धेपि तात्पर्यासिद्ध्या विवक्षितार्थासिद्धेर्नेत्थं सन्देहः किन्तु तात्पर्य-सन्देह एव दर्शनीय इति परिहर्तुम् । अत एवैतद्वाक्यसन्देहावसर एव कृतम् । ''तद् ब्रह्मेत्ययं ब्रह्मशब्द'' इति विशिष्यसंशयधर्मिनिर्देशस्तु पूर्वोक्तजिज्ञासाक्षेपेण सङ्गतिं दर्शयितुम् । नत्वत्रेव क्वचिद् ब्रह्मशब्दस्य विष्णुवाचित्वाङ्गीकारेण पूर्वपक्ष इति दर्शयितुम् । न च शक्त्यभावेपि लक्षणादिना तात्पर्यसम्भवात्सिद्धान्तिनं प्रति शक्तेः

(तात्पर्यचन्द्रिका)

कल्प्यत्वोक्तिरयुक्तेति वाच्यम् । लक्ष्येर्थे योगासम्भवेन तदधीनगुणपूर्त्यसिद्धेः सिद्धान्तिना लक्षणादेर्वक्तुमशक्यत्वात् । न चावयवशक्तेः कृत्स्नत्वेन कल्प्यत्वोक्त्ययुक्तिः । गुणपूर्तेरवाभावेन तत्र बृहतेः शक्त्यकृत्स्नेरिति ।

प्रकाशिका – एवं टीकातात्पर्यमुक्त्वा ''टीकासु च यदस्पष्ट''मिति प्रतिज्ञामनुसरन् सुधातात्पर्यं प्रतीतानुपपत्तिनिरासेनानूद्याह ॥ सुधायांत्विति ॥ जीवपर इत्यनेन ''प्रसिद्धार्थपर'' इत्यत्रार्थशब्दो जीवमात्रार्थ इत्युक्तं भवति । शक्तावभिधानादिति हेतुः । एवमनूदितस्य पूर्वपक्षस्याशयमाह ॥ तत्रेति ॥ सुधायामित्यर्थः । अत्रेव टीकायामिवेत्यर्थः ॥ सर्वत्रेति ॥ विष्णुपरत्वं नेति विवक्षितमित्यन्वयः । किमर्थमेवमित्यतोनुपपत्तिं स्वयमेवाह ॥ अन्यथेति ॥ यद्येवं तर्हि ''नहि ब्रह्मशब्द'' इत्यादिवाक्यमयुक्तम् । तत्र गुणपूर्तिवाचितया क्वचिद्विष्णुपरत्वमङ्गीकृत्य जिज्ञासावाक्य एव तदाक्षिप्यत इति प्रतीतेः । अत आह ॥ तत्रत्यं सुधागतमिति । वाक्यं त्वित्यन्वयः । तत्रैवं वाक्यक्रमः । ''तत्र सन्देहः । तद् ब्रह्मेत्ययं ब्रह्मशब्दः किं प्रसिद्धार्थपर उतार्थान्तरपर इति । न हि ब्रह्मशब्दो गुणपूर्तिवाचीत्येतावता सर्वत्र तत्परो भवति । शक्तितात्पर्ययोरन्यत्रापि सत्त्वा''दिति ॥ न वेति ॥ अर्थान्तरवाची वेत्यर्थः ॥ विवक्षितेति ॥ पूर्वपक्षे विवक्षितस्य जीवरूपार्थस्य सिद्धान्ते विवक्षितस्य ब्रह्मरूपार्थस्यासिद्धेरित्यर्थः । परिहर्तुं प्रवृत्तमित्यन्वयः । अत एव उक्ततात्पर्यकत्वादेवेत्यर्थः । नन्वेवं ''गुणपूर्तिवाचीत्येतावता तत्परो भवती''त्येतावतैव पूर्तौ ''सर्वत्रे''ति व्यर्थमिति चेद्वाचकत्वेन क्वचिद्वाच्ये तात्पर्यप्रसिद्धावपि सर्वत्र वाच्ये वाचकस्य तात्पर्यावश्यकत्वाभावेन प्रकृते ब्रह्मशब्दस्य पूर्वपक्ष्याद्यभिप्रेतार्थवाचकत्वसिद्धावपि तात्पर्यासिद्ध्या तात्पर्यसन्देहस्यैव दर्शनीयत्वादित्याशयात् ॥ अत्रेवेति ॥ टीकायामिवेत्यर्थः । अतः सर्वत्र ब्रह्मपदस्य विष्णुपरत्वाक्षेपेणैव पूर्वपक्ष इति स्थितम् । तत्रानूदिते पूर्वपक्षेऽनुपपत्तिमाशङ्क्याह ॥ न चेति ॥ सत्यं लक्षणयापि तात्पर्यं भवतीति तथापि सिद्धान्तिना तथाङ्गीकर्तुमशक्यत्वादेवमुक्तमित्यर्थः ॥ गुणपूर्तेरिति ॥ अर्थे सति तत्र शक्तिः शब्दस्य गुणपूर्तिरूपार्थेऽसम्भावनयाऽसति कथं तत्र शक्तिरित्यर्थः ।

पाण्डुरङ्गि – सुधायाः पूर्वोत्तरविरोधमाशङ्क्य परिहरति ॥ सुधायामिति ॥ अथेत्यर्थान्तरपरत्वे । तस्य अर्थान्तरस्य । तत्र सुधायाम् । अत्रेव टीकायामिव । नन्वेवं सुधाभिप्रायो वर्णयितुं न शक्यते । तथात्वे न हि ब्रह्मशब्दो गुणपूर्तिवाचीत्येतावतेत्याद्युत्तर-

ग्रन्थविरोधापत्तेः । तदनुसारेण क्वचिद् ब्रह्मशब्दस्य विष्णुपरत्वेपि जिज्ञासावाक्ये ब्रह्मशब्दस्य जीवपरत्वमित्येव सुधाभिप्रायप्रतीतेरित्यतस्तदन्यथासिद्धमित्याह ॥ तत्रत्यमिति ॥ ब्रह्मशब्दस्य क्वचिदपि विष्ण्वर्थकत्वं नास्तीति सुधाभिप्रायवर्णने बाधकान्तरमपि परिहरति ॥ तद् ब्रह्मेति ॥

तात्पर्यचन्द्रिका

सिद्धान्तस्तु —

''यन्न दुःखेन सम्भिन्नं न च ग्रस्तमनन्तरम् ।
अभिलाषोपनीतं च सुखं स्वर्गपदास्पद''मिति ।

श्रुतेः स्वर्गशब्दस्य चन्दनादिरूपप्रसिद्धार्थत्यागेनाप्रसिद्धार्थपरत्ववद् ब्रह्मशब्दस्यापि ''यतो वे''त्यादिवाक्यशेषात्प्रसिद्धार्थत्यागेनालौकिकार्थपरत्वोपपत्तिरिति । यद्वाऽलौकिकविशेष्यपरत्वे गौरवात्प्रसिद्धविशेष्यपरत्वे तु लाघवात्तदनुसारेण जीवेषु सम्भवद्गुणपूर्तिरेव प्रवृत्तिनिमित्तं न तु सिद्धांत्यभिप्रेतगुणपूर्तौ तात्पर्यमिति प्राप्ते कारणत्वेनैव बाधकेनालौकिकविशेष्यपरत्वं ततश्च सङ्कोचकाभावात्सर्वगुणपूर्तिरेव निमित्तमिति सिद्धान्त इति सुधाभिप्रायः । अत एव न्यायविवरणे अत्रोक्तं सुधोक्तं चाधिकरणशरीरमभिप्रेत्य ''न जीव एवायं ब्रह्मशब्दः । यतो वा इमानि भूतानि जायंत इत्यादिना जन्मादिकारणत्वस्यैव ब्रह्मलक्षणत्वोक्ते''रित्युक्तम् ।

प्रकाशिका –एवं पूर्वपक्षाशयोक्त्या नुपपत्तिं निरस्य दृष्टान्तोक्तिपूर्वं सिद्धान्ताशयमाह ॥ सिद्धान्तस्त्विति ॥ वाक्यशेषादिति ॥ जीवेऽसम्भावितकारणत्वबोधकादिति भावः । अलौकिकार्थो विष्णुरिति हृदयम् । पूर्वं ब्रह्मशब्दस्य गुणपूर्तिवाचित्वमेव नेत्याशयेन सुधाप्रवृत्तेत्युक्तं अधुना गुणपूर्तिवाचित्वमुपेत्य प्रवृत्तेत्याह ॥ यद्वेति ॥ अत एवेति ॥ सामान्यतः प्रवृत्तस्य न्यायविवरणस्याभिप्रायद्वयसम्भवात्तद्वर्णनमुभयत्र कृतमिति भावः ।

पाण्डुरङ्गि –सिद्धान्तसुधां दृष्टान्तेनोपपादयति ॥ सिद्धान्तस्त्विति ॥ ननु ब्रह्मशब्दस्यार्थान्तरं कल्प्यमित्युक्तमयुक्तम् । तस्य जगत्कारणं किंचिदस्तीत्याविपालगोपालमनुभवसिद्धत्वात् । तथाच तदर्थत्वे सुधाभिप्रायवर्णनमयुक्तमित्यस्वरसादाह ॥ यद्वेति ॥

(पाण्डुरङ्गि)

संकोचाभावादिति ॥ अलौकिकविशेष्यपरत्वे गौरवरूपसङ्कोचाभावादित्यर्थः । नन्वथ कस्मादुच्यते ब्रह्मेति बृहंतो ह्यस्मिन् गुणा इति श्रुत्या गुणपूर्तेः प्रमितत्वात्कथं गुणपूर्तेरेवाभावेनेत्युक्तमित्यत आह ॥ सम्भवद्गुणपूर्तिरेवेति ॥

तात्पर्यचन्द्रिका

अनुव्याख्याने तु मोक्षदत्वाद् ब्रह्मजिज्ञास्यमित्युक्तं प्रथमसूत्रे । तत्कथमिति शङ्कायामनेन सूत्रेण तदुपपाद्यत इत्युक्तम् । तत्रायं भावः । मोचकत्वेन विष्णुर्जिज्ञास्यश्चेद्बन्धकत्वेनाजिज्ञास्योपि स्यात् । न चायं न बन्धकः । जीवस्याबद्धत्वस्वबद्धत्वयोरयोगेनान्यबद्धत्वे वाच्ये अन्यस्य चेतनस्याचेतनस्य चेश्वराधीनत्वे पुनरीश्वरस्य बन्धकत्वेनाजिज्ञास्यता । अनधीनत्वे स्वानधीनकृताद्बन्धान्मोचकत्वं नेश्वरस्येति न जिज्ञास्यत्वमिति प्राप्ते अप्रसन्नस्य बन्धकत्वं प्रसादहेतोर्जिज्ञासायाः कर्तव्यत्वानुकूलमेव न तु प्रतिकूलम् । सूत्रे सृष्ट्यादिहेतुत्वोक्तिस्तु मोचकत्वसम्भावनार्थेति सिद्धान्त इति ।

प्रकाशिका – तृतीयाध्याये तृतीयपादस्यादौ ''कर्तव्या ब्रह्मजिज्ञासेत्युक्ते किमिति संशये ।

अत इत्युदितेप्यस्य विशेषानुक्तितः पुनः ।
सृष्टिबन्धनमोक्षादिकर्तृत्वस्य श्रुतत्वतः ।
यतो मोक्षादिदातासावतो जिज्ञास्य एव वः ।
इत्याह तत्परं ब्रह्म व्यासाख्यं ज्ञानरश्मिमत् ।
येनैव बन्धमोक्षः स्यात्सच जिज्ञासया गतः ।
सुप्रसन्नो भवेदीशो जिज्ञासाऽतोस्य मुक्तिदा ।

इत्यनुव्याख्यानाभिप्रेतं वर्णकान्तरमस्य सूत्रस्य तत्रास्फुटत्वाद्व्यनक्ति ॥ अनुव्याख्याने-त्विति ॥ तदुपपाद्यत इत्युक्तमित्यन्वयः । मोक्षदत्वादित्यादिकं ''कर्तव्ये''त्यादिश्लोकतात्पर्यानुवादः । तत्कथमित्यादिकं तु ''सृष्टिबन्धने''त्यादेस्तात्पर्यानुवादः । उक्तं च सुधायां ''यतो मोक्षादिदातासावतो वो युष्माकं मुमुक्षूणां जिज्ञास्य एवेत्येतमर्थं जन्मादिसूत्रेणाहेत्यर्थः'' इति । विष्णोरबन्धकत्वं हि त्रेधा । जीवस्याबद्धत्वेन वा

स्वबद्धत्वेन वा जीवेशाभ्यामन्यबद्धत्वेन वा । तत्राद्यौ निराह ।। जीवस्येति ।। दुःखित्वादि-दृष्टेरबद्धत्वायोगात् दुःखाद्यापत्त्या वाऽऽत्माश्रयापत्त्या वा स्वबद्धत्वायोगादित्यर्थः । तृतीयेप्यन्यश्चेतनोऽचेतनो वा द्वयमपीशाधीनमुतानधीनमिति हृदि कृत्वा क्रमेण निराह ।। अन्यस्येति ।। ''येनैव बन्धमोक्षःस्या''दिति श्लोकतात्पर्यमाह ।। अप्रसन्नस्येति ।। तर्हि मोक्षोऽस्य यत इति सूत्रविन्यासः स्यादित्यत आह ।। सूत्र इति ।

पाण्डुरङ्गि – ननु सुधायामनुव्याख्यानव्याख्यारूपायां कथमनुव्याख्यानोक्तपूर्वोत्तरपक्ष-विपरीतपूर्वोत्तरपक्षाभिधानम् । व्याख्यानव्याख्येययोर्विरोधापत्तेरित्यत आह ।। अनुव्याख्या-नेत्विति ।। कर्तव्या ब्रह्मजिज्ञासेत्युपासनापादीयानुव्याख्यान इत्यर्थः । तथाच वर्णकान्त-रत्वान्न व्याख्यानव्याख्येययोर्विरोध इति भावः । प्रथमसूत्रोक्तं मोक्षदत्वेन जिज्ञास्यत्वं द्वितीयेनोपपाद्यत इत्यनुव्याख्याने उक्तं तत्र तेन कथं तदुपपादनं कृतमित्यत आह ।। तत्रायं भाव इति ।। विशेषनुक्तितः इत्यनुव्याख्यानांशे स्वारस्यं निधायेदं वर्णकांतरमेवेति न सुधाविसंवादःशंकनीयः इति भावः ।

तात्पर्यचन्द्रिका

अत्र परैर्न तावदुपलभ्यमानं जगदेव ब्रह्मलक्षणम् । तस्यानित्याशुद्धपरिच्छि-न्नादिरूपस्य तद्विरुद्धब्रह्मलक्षणत्वानुपपत्तेः । नापि नित्यत्वकारणत्वादिर्ब्रह्मधर्मः । तस्यानुपलब्धेरिति प्राप्ते माभूदनुभूयमानं जगत्तद्धर्मतया तदात्मतया वा लक्षणम् । तदुत्पत्त्यादि तु भविष्यति । देशांतरप्राप्तिरिव सवितुर्व्रज्याया इति सिद्धान्तितम् । तन्न । जिज्ञास्यस्येतरव्यावृत्त्यर्थं लक्षणसूत्रेऽस्मद्रीत्याऽव्यावृत्तिपूर्वपक्षस्यै वोचित-त्वात् । अनित्यादिरूपस्य शब्दादेर्नित्यादिरूपाकाशादिलक्षणत्वदर्शनाच्च । जगत इव कारणत्वस्याप्यनात्मतयाऽऽत्मविरुद्धस्वभावत्वाच्च । जिज्ञास्यत्वेनाद्यसूत्रे प्रकृतस्य निर्विशेषब्रह्मणो भ्रमाधिष्ठानत्वेनाकारणत्वाच्च । अधिष्ठानत्वस्यैव विवक्षायां तु श्रुतिसूत्रयोर्जन्मोत्त्ययोगात् । देशान्तरप्राप्तेः सूर्यगत्यनुमापकत्वेऽपि तल्लक्षणत्वा-भावाच्च । न चात्र सूत्रे यतो वेत्यादिश्रुतौ वा उत्पत्त्यादिकमद्वितीये ब्रह्मणि लिङ्गत्वेनोच्यत इति त्वयापि स्वीकृतम् ।

प्रकाशिका –भाष्येऽस्पष्टत्वाद्भामत्युक्तमधिकरणशरीरमनुवदति ॥ अत्र परैरिति ॥ अत्र यतो वेत्यादिवाक्यं ब्रह्म लक्षयत्युत नेति कल्पतरूक्तः संशयो ध्येयः । दृश्यमानं जगदेव लक्षणं ब्रह्मण उत नित्यत्वादिस्तद्धर्मः । आद्य आह ॥ न तावदिति ॥ तस्य जगतः । द्वितीयमाशङ्क्याह ॥ नापीति ॥ प्रसिद्धं हि लक्षणं भवति नात्यंताप्रसिद्धमिति भावः । न जगद्ब्रह्मलक्षणं किंतु तत्प्रतिकारणत्वमिति लक्षणमुपपादयति ॥ माभूदिति ॥ तदात्मतया ज्ञानानन्दादिवत्तदैक्येन । भेदमुपेत्याह ॥ तद्धर्मतयेति ॥ तदुत्पत्त्यादित्विति ॥ जगत्तदुत्पन्नत्वेन स्वकारणं ब्रह्म लक्षयति ज्ञापयतीति कारणत्वं तु भवति लक्षणमिति भावः। व्रज्यायाः गतेरित्यर्थः । ''व्रजयजोर्भावे क्यप्'' । सूत्रानानुगुण्येन पूर्वपक्षं तावन्निराह ॥ जिज्ञास्यस्येति ॥ लक्षणं नाम सजातीयविजातीयव्यावर्तकम् । सूत्रे तदुक्तिरितरव्यावृत्त्यर्था । तथाच यथाऽश्वादिविवेकेन गोरज्ञाने तज्ज्ञानाय सास्नादिमत्त्वं लक्षणमुच्यते तथा ब्रह्मणो जीवप्रधानाद्यविवेकेन जीवादावपि ब्रह्मत्वबुद्धौ प्रसक्तायां तद्व्यावृत्त्यर्थं लक्षणमिति तन्निरस्यस्य सूत्रावतारिकरूपस्य पूर्वपक्षस्याव्यावृत्तिरूपस्यैव वाच्यत्वात्सूत्राननुगुणः पूर्वपक्ष इत्यर्थः । तादृशपूर्वपक्षो शक्य इत्येतन्निराह ॥ अस्मद्रीत्येति ॥ अयुक्तश्च पूर्वपक्ष इत्याह ॥ अनित्येति ॥ गुणैन्द्रियकादिरूपस्येत्यादिपदार्थः । पृथिवीत्वादेर्नित्यादिरूपस्यानित्यादिरूपपृथिवीलक्षणत्वदर्शनादित्यादिपदार्थः । तद्वद्विरुद्धधर्मकमपि जगद् ब्रह्मलक्षणं स्यादिति भावः । सिद्धांतोऽप्ययुक्त इत्याह ॥ जगत इति ॥ आत्मविरुद्धेति ॥ अनित्यत्वपरिच्छिन्नत्वरूपत्वादिति भावः । अत्र यद्यपि जगद्गतमुत्पत्त्यादिकं लक्षणं चेत्सूत्रे यत इति पदमयुक्तम् । न हि यतश्चैत्रजन्म स मैत्र इत्युक्ते चैत्रनिष्ठं जन्म मैत्रलक्षणं भवतीति केषाञ्चित्पक्षे वक्ष्यमाणो दोष इहापि तुल्यः । तथापि कल्पतरावुत्पत्त्यादीत्यस्य कारणपरत्वेन व्याख्यानात्प्रकारांतरेण दूषणमुक्तम् । एवं सिद्धांते पूर्वसूत्रासाङ्गत्यं चाह ॥ जिज्ञास्यत्वेनेति ॥ जन्मोक्तीति ॥ न ह्यधिष्ठानादध्यस्तं जायत इत्युच्यत इति भावः । यदत्र कश्चिदाह लक्षणस्योद्देशपूर्वकत्वादिह योद्देशा भावान्नलक्षणसूत्रमिदमिति तन्न । ब्रह्मजिज्ञासेति पूर्वसूत्र एव तस्योद्देशात् । न च तत् षष्ठचन्तत्वाज्जिज्ञासायां कर्मार्पकतया न लक्षणे उद्देश्यसमर्पकमिति वाच्यम् । ''प्रमाणप्रमेये''-त्यादिगौतमसूत्रे षष्ठचंतनिर्दिष्टानामप्युद्देश्यत्वदर्शनात् । नाममात्रेणेति मात्रपदेन लक्षणस्यैव व्यवच्छेद्यत्वात् । अत एव ''प्रथमोद्दिष्टस्य प्रमाणस्य लक्षणमाहे''त्यादितदीयोक्तिः । प्रमाणलक्षणटीकायामपि ''प्रमाणानामित्युद्देशे सिद्धे प्रमाणसामान्यलक्षणमाहे''त्युक्तिः । सूत्रे यत इत्युक्तेस्तद् ब्रह्मेत्यवश्यमनुषञ्जनीयत्वाच्च न कोपि दोषः ।

पाण्डुरङ्गि – तस्यानुपलब्धेरिति ॥ कारणवाक्य इति शेषः ॥ अनुभूयमानमिति ॥ जगत्तदात्मतया लक्षणं माभून्नित्यत्वादिकं तु तद्धर्मतयेत्यन्वयः । तदुत्पत्त्यादित्विति ॥ लक्षणमिति शेषः । ननु जगन्निष्ठस्योत्पत्त्यादेः कथं ब्रह्मलक्षणत्वमित्यत आह ॥ देशांतरप्राप्तिरिवेति ॥ व्रज्यायाः गतेरित्यर्थः । तथाच व्रज्यानिष्ठाया देशांतरनिष्ठाया अपि देशान्तरप्राप्तेर्व्रज्यालक्षणत्ववत्प्रकृतेपि जगदुत्पत्तेर्ब्रह्मलक्षणत्वोपपत्तिरित्यर्थः । यद्वा तदुत्पत्त्यादीति तदुत्पत्तिकारणत्वं लक्षणमित्यर्थः । देशांतरप्राप्तिस्तत्कारणत्वम् । ननु देशांतरप्राप्तिकारणत्वस्य सवितर्यपि विद्यमानत्वेनातिव्याप्तत्वात्कथं व्रज्यालक्षणत्वमिति चेन्न। देशांतरप्राप्त्यसाधारणत्वस्य विवक्षितत्वेन तस्य च व्रज्यायामेव सत्त्वेनाति-व्याप्त्यभावात् । सवितुःसमवायिकारणत्वेन साधारणत्वादिति भावः । कारणत्वं ब्रह्मलक्षणं न । ब्रह्मविरुद्धस्वभावत्वात् जगद्वत् । न च हेतुरसिद्धः । कारणत्वस्यानात्मत्वे-नात्मस्वरूपविरुद्धत्वात् । न चाप्रयोजकता । जगतोपि तल्लक्षणत्वापातादित्यभिप्रायेणाह ॥ जगत इवेति ॥ किं च जगत एव लक्षणत्वमस्तु । न च तद्विरुद्धस्वभावस्य कथं तल्लक्षणत्वमिति वाच्यम् । शब्दस्यानित्यत्वेन नित्यभूतगगनविरुद्धस्वभावत्वेपि गगन-लक्षणत्वदर्शनादित्याह ॥ शब्दादेरिति ॥ किंच उत्पत्तिर्जगन्निष्ठा कथं ब्रह्मलक्षणं स्यात् । न च देशांतरप्राप्तेः सूर्यगत्यनिष्ठाया अपि तल्लक्षणत्ववत्प्रकृतेपि ब्रह्मानिष्ठाया अप्युत्पत्त्यादे-र्ब्रह्मलक्षणत्वोपपत्तिरिति वाच्यम् । दृष्टान्तस्यैवासम्प्रतिपन्नत्वादित्याह ॥ देशांतरेति ॥ तदुत्पत्त्यादीत्यत्रोत्पत्त्यादिकमेव लक्षणत्वेनाभिप्रेतं तत्कारणत्वं वेति विकल्प्य पक्षद्वयं दूषयति ॥ जिज्ञास्यस्येति ॥ द्वितीयपक्षे दूषणान्तरमाह ॥ जिज्ञास्यत्वेनेति ॥ नन्वत्राप्यधिष्ठानत्वमेव विवक्षितं न कारणत्वमित्यत आह ॥ अधिष्ठानत्वस्यैवेति ॥ श्रुतिसूत्रयोः जायंते जन्मेति पदद्वयेन कारणत्वमेव प्रतीयते नाधिष्ठानत्वमिति भावः । अस्तु तर्हि कारणत्वस्यानुमापकत्वमेवेत्यत आह ॥ न चात्रेति ॥

तात्पर्यचन्द्रिका

केचित्तु न तावज्जन्मादयो विशेषणत्वेन लक्षयंति । विशेषणस्य स्वाश्रये सर्वविशेषधर्मव्यावर्तकत्वेनैकस्मिन्ननेकविशेषणायोगेनानेकविशेषणाश्रयस्य ब्रह्मणोऽनेकत्वप्रसङ्गात् । चैत्रः श्यामो युवा लोहिताक्ष इत्यादौ तु मानांतरवशादैक्यम् । न चात्रापि ब्रह्मशब्दैक्यात् ब्रह्मैक्यम् । खण्डो मुण्डः पूर्णभृंगो गौरित्युक्ते अज्ञातगोव्यक्तेः पुंसो

(तात्पर्यचन्द्रिका)

गोव्यक्तिबहुत्वस्येवात्रापि ब्रह्मव्यक्तिबहुत्वप्रतीतिप्रसङ्गात् । नाप्युपलक्षणतया । उपलक्ष्याकारांतराप्रतीतेः । तस्माज्जन्मादिवाक्यं न ब्रह्म लक्षयितुं शक्तमिति प्राप्ते । अस्तु तावद्विशेषणत्वम् । न च ब्रह्मणोऽनेकत्वप्रसङ्गः । विशेषणानां स्वविरोधि-धर्मव्यावर्तकत्वात् । जन्मादीनां तु कालभेदेनाविरोधात् । उपलक्षणत्वं वास्तु । बृहत्यर्थस्य पूर्णत्वस्योपलक्ष्यत्वादिति सिद्धांतयन्ति ।

प्रकाशिका –यथाश्रुतं रामानुजभाष्यमेवानुवदति ॥ केचित्त्वित्यादिना ॥ यतो वेत्यादि-वाक्याद् ब्रह्म लक्षणतः प्रतिपत्तुं शक्यते न वेति संशयोऽत्र द्रष्टव्यः । जन्मस्थितिप्रळयाः विशेषणत्वेन लक्षयंत्युतोपलक्षणत्वेन । नाद्य इत्याह ॥ नतावदिति ॥ विशेषणं हि स्वेतर-सर्वधर्मव्यावर्तकम् । उक्तं च द्वितीयस्य तृतीयपादाद्यनये ''विशेषणं व्यवच्छेत्तृविशेष्यव्यापि चोच्यते'' इति । तथाच जन्मादीनामैकाधिकरण्यायोगेन ब्रह्मविशेषणान्येतानि ब्रह्मणो नानात्वमापादयेयुरित्यर्थः । ननु चैत्रः श्यामो युवा लोहिताक्षः समानपरिमाण इत्यत्र विशेषणबहुत्वेऽप्येक एव चैत्रः प्रतीयते एवमत्राप्येकमेव ब्रह्म भवतीत्यत आह ॥ चैत्र इति ॥ मानांतरेति ॥ प्रत्यक्षेणैक्यप्रतीतेरेकस्मिन्नपि तत्रानेकविशेषणानामुपसंहारः । अन्यथा तत्राप्यनेकत्वमपरिहार्यम् । अत्रत्वेभिरेव लक्षणैर्लिलक्षयिषितत्वेन ब्रह्मणः प्रमाणांतरेणैक्यं नावगतमिति व्यावर्तकभेदेन ब्रह्मबहुत्वमवर्जनीयमिति भावः ॥ खण्ड इति ॥ गोपदैक्येपि खण्डत्वादिव्यावर्तकभेदे गोव्यक्तिबहुत्वप्रतीतिरिवात्रापि जायंते जीवंति प्रयंतीत्यादिव्यावर्त-कभेदेन ब्रह्मव्यक्तिबहुत्वप्रतीतिः स्यादित्यर्थः । द्वितीयं निराह ॥ नापीति ॥ उपलक्षणा-नामेकेनाकारेण प्रतिपन्नस्य केनचिदाकारांतरेण प्रतिपत्तिहेतुत्वं दृष्टं यत्रायं कासारः स देवदत्तकेदार इत्यादिषु । तथाच तद्वत्प्रकृते आकारांतरं न प्रतीतमिति नोपलक्षणत्वमिति भावः ॥ स्वविरोधीति ॥ स्वविरोध्यनेकविशेषणत्वं हि भेदमापादयति । खण्डतादयो हि विरोधादेव गोव्यक्तिभेदमापादयन्ति । जन्मादीनां कालभेदेनाविरोधादेकविशेषणत्वं युक्तमिति ॥ पूर्णत्वस्येति ॥ तथाच यत्पूर्णं तज्जन्मादिकारणमित्युपलक्षणत्वं जन्मादेर्युक्तमिति भावः ।

पाण्डुरङ्गि – जन्मादयः किं विशेषणत्वेन लक्षणमुतोपलक्ष्यत्वेन । नाद्य इत्याह ॥ विशेषणस्येति ॥ नन्वेवं चैत्रः श्यामो युवेत्यादावप्येकस्यानेकविशेषणाश्रयत्वेन भेदः स्यादित्यत आह ॥ चैत्र इति ॥ द्वितीयं दूषयति ॥ नापीति ॥ उपलक्ष्याकारेति ॥ उपलक्ष्यतावच्छेदकधर्मप्रतीतेरित्यर्थः । यद्वा उपलक्षणानामेकेनाकारेण प्रतिपन्नस्य

केनचिदाकारांतरेण प्रतिपत्तिहेतुत्वं हि दृष्टं यत्रायं कासारः स देवदत्तकेदार इत्यादिषु । न च तादृशाकारः प्रतीयत इति भावः । इदं तु तदीयभाष्य एव स्पष्टम् ॥ विशेषणानामिति ॥ तथाच विरुद्धविशेषणाश्रयस्यैवानेकत्वम् । प्रकृते तु जन्मादिकं न विरुद्धमिति भावः ।

तात्पर्यचन्द्रिका

तन्न । पूर्वपक्षानौचित्यस्योक्तत्वात् । किंच जन्मादय इत्यत्र जन्मादि- शब्देन कार्यावस्थागतोत्पत्त्यादिविवक्षायां तद्भेदेन तदनाश्रयब्रह्मभेदाशङ्का सूत्रे यत इति पदं चायुक्तम् । न हि यतश्चैत्रजन्म स मैत्र इत्युक्ते चैत्रनिष्ठजन्म मैत्रलक्षणं भवति । किं तु मैत्रगतं कारणत्वम् । कारणगतानां ''यतो येने''ति श्रौतपञ्चम्याद्युक्तानां जन्मादिकारणत्वानां विवक्षायामपि त्वन्मते सृष्ट्यादिकारणत्वानामेकस्मिन्नेवोपादाने दर्शनान्न भेदाशङ्का युक्ता । सिद्धांते कालभेदेनाविरोधोक्तिश्चायुक्ता । लयादिकाले ''सर्गाद्या भावशक्तय'' इत्यादिस्मृतिसिद्धायाः सामर्थ्यरूपायाः सृष्ट्यादिकारणतायाः सत्त्वात् । यादवप्रकाशीयेतु ''तद्विजिज्ञासस्वे''ति वाक्ये सांख्याभिमतप्रधानस्यापि ब्रह्मशब्दार्थत्वाज्जिज्ञास्यत्वमिति शङ्कानिरासाय जन्मादिसूत्रमित्युक्तम् । तत्र न तावत्प्रधानस्यैव जिज्ञास्यत्वशङ्कानिरासकं सूत्रम् । जीवस्यापि ब्रह्मशब्दार्थत्वेन जिज्ञास्यत्वशङ्कायाः कारणत्वाभावेन तन्निरासस्य च सम्भवात् । जीवप्रधानादीनां जिज्ञास्यत्वशङ्कानिरासार्थत्वं तु सूत्रस्यास्माकमिष्टम् ।

प्रकाशिका – उक्तत्वादिति ॥ ''जिज्ञास्यस्येतरव्यावृत्त्यर्थं लक्षणसूत्र'' इत्यादिनोक्तत्वादित्यर्थः । प्रकारांतरेण पूर्वपक्षं निराह ॥ किंचेति ॥ कार्यगतोत्पत्त्यादिकं ब्रह्मलक्षणमुत तत्कारणत्वं ब्रह्मगतमेव तल्लक्षणमिति विकल्प्याद्य आह ॥ कार्येति ॥ आशङ्केति ॥ अयुक्तेति योज्यम् । यत इति पदायोगमुपपादयति ॥ न हीति ॥ द्वितीयमनूद्य निराह ॥ कारणेति ॥ ब्रह्मगतानामित्यर्थः । यदपि सिद्धांते कालभेदेन जन्मादीनामविरोधापादनं तदपि तदीयभाष्योदाहृतस्मृतिविरोधादयुक्तमित्याह ॥ सिद्धांत इति ॥

''शक्तयः सर्वभावानामचिंत्यज्ञानगोचराः ।
यतोऽतो ब्रह्मणस्तास्तु सर्गाद्या भावशक्तय''।

(प्रकाशिका)

इति स्मृतिसिद्धाया इत्यर्थः । अचिंत्यज्ञानगोचराः अतर्क्यप्रमितिसिद्धाः । सर्गाद्याः सर्गादिगोचराः । भावशक्तयः वस्तुशक्तयः । ब्रह्मणो वस्तुशक्तय इति निर्देशो ब्रह्मतादात्म्यमितिवत् । यद्वा ब्रह्मणो भावशक्तयो वस्तुशक्तयः ब्रह्मणो वस्तुत्वप्रयुक्ताः निरुपाधिकाः शक्तय इत्यर्थः । यद्वा भावशब्दः स्वभावपरः । स्वाभाविक्यः शक्तय इत्यर्थः । इति श्रुतप्रकाशे व्याख्यातत्वेन स्वाभाविक्याः सर्वदा सत्त्वादिति भावः । एतेन यत्कश्चिदाह ''यतोवे''त्यादिवाक्योक्तं जन्मादिकं ब्रह्मलक्षणं भवितुमर्हति न वेति संशये तस्य जगन्निष्ठत्वेन ब्रह्मासंबद्धत्वात् ''सदेवसोम्य आनन्दाद्धचेव विज्ञानाद्धचेवे''त्यादिवाक्यान्तरेषु सदानन्दादेरपि जन्मादिहेतुत्वोक्त्या इदमित्थमिति शृंगग्राहिकया लक्ष्यनिर्धारणाशक्तत्वाच्च न लक्षणं भवितुमर्हतीति प्राप्ते तदसम्बद्धस्यापि चन्द्रस्य शाखाग्रवत्ताटस्थ्येन जन्मादिकं लक्षणं भवितुमर्हति । सदादिशब्दानां च कथंचिद् ब्रह्मशब्दिते शिव एव पर्यवसानादित्यादिसिद्धान्त इति तन्निरस्तम् । पूर्वसूत्रे ''परीक्ष्य लोका''नित्यादिवाक्यमुदाहरतस्तवेहान्योदाहरणस्यानुचितत्वेन यज्ज्ञानार्थं गुरूपसत्तिस्तद्ब्रह्मेत्येव लक्षणसूत्रत्वौचित्यात् । अत्रेव पूर्वत्रापि ब्रह्मजिज्ञासापदघटितसूत्रानुगुण्येन तद्घटितस्यास्यैवोदाहरणत्वे तत्रैव श्रुतं जन्मादिकं लक्षणं नवेति चिंतायाः सङ्गतत्वाच्च । सूत्रे यत इति कारणत्वस्याप्युक्त्या जन्मादिमात्रे चिंतायाः अयुक्तत्वाच्च । किं च सूत्रे लक्षणत्वोपपादकन्यायस्यानुक्त्या लक्षणीभूतजन्मादिकारणत्वमात्रस्यैवोक्त्या एवंविधपूर्वपक्षस्य सूत्रानानुगुण्याच्च । अस्मद्रीत्या ब्रह्मणि तदसिद्धिपूर्वपक्षस्यैव सूत्रानुगुण्याच्च । लक्ष्यासम्बद्धस्य मुख्यलक्षणत्वाभावेन सूत्रस्य गौणार्थत्वापाताच्च । ताटस्थ्यस्याग्रे निरसिष्यमाणत्वाच्चेत्याद्यूह्यम् । यदपि सकलकारणवाक्यस्थसदानन्दादिशब्दानां शिव एव पर्यवसानमिति वल्गनं तद्भाष्याद्युदाहृतानेकमानविरुद्धत्वात् ''पत्युरसामंजस्या''दिति सूत्रकृता निरसिष्यमाणत्वेनाज्ञत्वपारतंत्र्याद्यनेकन्यायविरुद्धत्वाच्चापेशलम् । विस्तरस्तु गुरुपादकृतपरतत्वप्रकाशिकादौ ध्येय इति । प्रधानस्यैव जिज्ञास्यत्वशङ्कानिरासकमुत जीवस्यापीति विकल्प्याद्यं निराह ॥ तत्रेति ॥ कुत इत्यतः पूर्वोत्तरपक्षन्यायस्य जीवेपि साम्यादित्याह ॥ जीवस्यापीति ॥ द्वितीयमभ्युपगच्छति ॥ जीवेति ॥ सूत्रस्येति ॥ ''य आत्मे''ति जिज्ञास्ये जीवासाधारणात्मपदाज्ज्ञात्यादेरिव न प्रधानस्यापि सन्देहनिविष्टत्वमिति हृदयम् । यद्वा न्यायविवरणटीकायां ''यद्वा जीव एवेति जात्यादेरप्युपलक्षणम् । एवशब्दस्तु भगवंतं व्यावर्तयती''त्यादिना जीवजात्यादेरपि व्यावर्त्यतया पूर्वपक्षस्याप्युक्त्या तदनुरोधेन पक्षांतरमभिप्रेत्यैवमुक्तिरिति ध्येयम् ॥

पाण्डुरङ्गि – पूर्वपक्षेति ॥ जिज्ञास्यस्येतरव्यावृत्त्यर्थं लक्षणसूत्रेऽस्मद्रीत्याऽव्यावृत्त्यैव पूर्वपक्षस्योचितत्वेनैतादृशपूर्वपक्षस्यानुचितत्वादित्यर्थः । किं च जन्मादय इत्यत्र जन्मादिशब्देन कार्यगतमुत्पत्त्यादिकं लक्षणत्वेनोच्यते उत कारणगतानि जन्मादिकारणत्वादीनि । नाद्य इत्याह ॥ किं चेति ॥ तदनाश्रयेति हेतुगर्भं विशेषणम् । सूत्रे यत इति पदानर्थक्यमुपपादयति ॥ नहीति ॥ लयादिकाल इति ॥ सृष्ट्यादिकारणतायाः शक्तिरूपत्वादिति भावः। लाघवाय सूत्रकृता जन्मादीति नपुंसकनिर्देशः कृतः तदुपपादनाय समाहारमाह ॥ उत्पत्तिस्थितिभङ्गमिति ॥ जन्म आदिर्ययोः स्थितिभङ्गयोस्तौ जन्मादीत्यन्यपदार्थो यदि विशेषरूपेण विविक्ष्यते तर्हि जन्मादी अस्येति निर्देशे गौरवं स्यात् । तन्मा भूदिति सामान्यविवक्षया नपुंसकप्रयोगः कृतः सूत्रकृता । अत्र नपुंसकैकवचनप्रयोगार्हत्वात् समाहारोऽत्राभिप्रेत इति भावः ।

तात्पर्यचन्द्रिका

यच्चोक्तं परैर्जन्मादीत्यत्रोत्पत्तिस्थितिभङ्गमेवोच्यते न त्वन्यत् । यतो वेत्यादिश्रुत्यनुसारादिति । तन्न । ''यतो वे''त्यत्र चतुर्णां ''तमेवैकं जानथे''त्यादौ ''यस्मिन्द्यौ''रिति स्थित्यादीनामेकैकस्यैव श्रवणात् । न चाभिसंविशंतीत्येतत्प्रलयपरम् । प्रयंतीत्यनेन पौनरुक्त्यापत्त्या तस्य मोक्षपरत्वात् । न च प्रयंतीत्यनेन सुषुप्तौ ब्रह्मप्राप्तिरुच्यते । तथापि चतुष्ट्वापरिहारात् । जगतो जन्माङ्गीकारेऽनित्यत्वापत्त्या मिथ्यात्वासिद्धेरुक्तत्वाच्च । तस्मात्सृष्ट्याद्यष्टकमेव जन्मादिपदार्थः । ''यतोवे''त्यत्र सृष्टिस्थितिप्रलयमोक्षाणां ''य आत्मानमन्तरो यमयति त्वं मुक्तिदो बन्धदोऽतो मतो नस्त्वं ज्ञानदोऽज्ञानदश्चासि विष्णो'' इत्यादौ नियमनादीनामप्युक्तेः । सूत्रकृतैव स्कान्देऽष्टकर्तृत्वस्य लक्षणत्वेनोक्तेश्च । न च नियत्यादीनां जन्मादावन्तर्भावः । स्वस्वव्यापारेषु प्रवृत्त्यादिरूपाणां नियत्यादीनां विनाशादेरिव जन्मादिमत्त्वेपि जन्मादिभ्यो भेदानुभवात् । मोक्षस्य बन्धध्वं सत्वे चोत्पत्तिरपि प्रागभावनिवृत्तिः स्यात् । ननूत्पत्तिः प्रागभावस्य ध्वंसो न तूत्पद्यमानस्येति चेत्तर्हि मोक्षोऽपि बंधस्य ध्वंसो नतु बद्धस्य । मोक्षस्य परमपुरुषार्थतया पृथग्वाच्यत्वाच्च ।

प्रकाशिका – पराभिमतं सूत्रार्थमपि निरस्यति ॥ यच्चोक्तमिति ॥ श्रुत्यनुसारादिति तात्पर्यनुवादः । उक्तं च तद्भाष्ये ''जन्मस्थितिभङ्गसमासार्थ'' इति ''यतो वेत्यादिवाक्ये जन्मस्थितिप्रलयानां क्रमदर्शना''दिति च ॥ चतुर्णामिति ॥ अभिसंविशंतीत्यनेन मोक्षोक्तेरिति भावः ॥ तमेवेति ॥ तस्याप्यत्र विषयत्वादुदाहृतम् । तथापीत्यभ्युपगमवादः । यदपि तद्गुणसंविज्ञानबहुव्रीहिमाश्रित्य जगतो जन्माङ्गीकरणं तदपि व्याहतमित्याह ॥ जगत इति ॥ तथाच स्थितिभङ्गावेवोपेयाविति भावः ॥ उक्तत्वाच्चेति ॥ जिज्ञासाधिकरणे विवरणाभिमतनित्यानित्यवस्तुविवेकखण्डनग्रन्थ इति भावः । तस्मात् श्रुत्यनुसारादित्यर्थः । एतेन केषांचित्पक्षोपि निरस्तः । यथोक्तं श्रीभाष्ये ''जन्मादीति सृष्टिस्थितिप्रलय''मिति । एतेनैवाद्यस्य चतुर्मुखस्य जन्म यत इति मतं आदिपदेन स्थितिमात्रं गृह्यत इति मतं च निरस्तम् । सर्वस्य श्रुत्यननुसारात् । एतेन ''अन्येतु जन्मादीति तद्गुणसंविज्ञानबहुव्रीहिमुपादाय सृष्टिस्थितिभङ्गं समासार्थ इति व्याकुर्वत'' इत्यादिसुधावाक्यं विवृतं भवति । तत्रानुदाहृतत्वात्ता एव श्रुतीराह ॥ यतो वेत्यादिना ॥ य आत्मानमिति ॥ आत्मानं जीवं तदभिमानिचतुर्मुखं वेत्यर्थः ।

नन्वत्र विचारविधेरश्रवणान्नेदं विषयवाक्यम् । तद्विधिवाक्यस्थलक्षणानामेवेह सूत्रे सङ्ग्रहात् । उक्तं च सुधायां ''न चैकमेव सर्वत्र जिज्ञासाविधायकश्रुतिषु लक्षणं श्रूयते । किंत्वासु ब्रह्मजिज्ञासाविधात्रीषु श्रुतिषु क्वचित्सृष्टिः क्वचित्स्थितिरित्यष्टकं जिज्ञास्याद्धरेर्विश्वस्योक्तमित्यनेकलक्षणोक्त्युपयोग'' इति ॥ अत्रापि चाग्रे विचारविधायकनानावाक्येत्यादि वक्ष्यति । तथाच कथमेतदुदाहरणम् । उच्यते । लक्षणसूत्रे श्रुतिवाक्यप्रसिद्धलक्षणस्य सङ्ग्रहो न विधिवाक्यस्थस्येति निर्बन्धः । अत एव तत्वप्रदीपे ''विवेश भूतानि चराचराणीत्यर्थान्नियमन''मित्यादिना तादृशवाक्यान्येवोदाहृतानि । उदाहृतं सुधावाक्यादिकं तु सम्भाविताभिप्रायम् । यद्वा अन्तर्यामिब्राह्मणोपक्रमे ''यो वै तत्काप्यसूत्रं विद्यात्तं चांतर्यामिणमिति स ब्रह्मवित्सलोकवि''दित्याद्यर्थवादात्तज्जिज्ञासाविधेरुन्नयनाद्विचारविधिवाक्यमेवैतदिति न दोषः ॥ त्वमिति ॥ यतो बन्धादिदाताऽतो नोस्माकं मतः विचारित इत्ययमप्यत्र विषय इति भावः । इयं च श्रुतिः गीतातात्पर्योदाहृतश्रुतिरिति ध्येयम् ॥ स्कान्द इति ॥ ''उत्पत्तिस्थितिसंहारा'' इति स्मृत्येति भावः । नन्वन्येषामपि भावविकाराणां त्रिष्वेवांतर्भाव इति परभाष्येऽतर्भावोक्तेर्नियत्यादीनां जन्मस्थितिभङ्गोपेतत्वेन तेनैव गृहीतेर्नपृथग्वाच्यतेत्याशङ्क्याह ॥ न चेति ॥ नियतिस्वरूपोक्तिः स्वस्वव्यापारेषु

प्रवृत्तिरिति । ज्ञानाज्ञाने तु व्यक्ते । सुखदुःखानुभवो बन्धः । नित्यानन्दानुभवो मोक्ष इति ध्येयम् । यथा विनाशस्य जन्मस्थितिमत्त्वेपि ताभ्यां भङ्गस्य पार्थक्यं यथा वा स्थितेर्जन्मभङ्गवत्त्वेपि ताभ्यां पार्थक्यं तथा नियत्यादीनां तत्त्रितयवत्त्वेपि तेभ्योपि भेदानुभवादित्यर्थः । मोक्षस्य भङ्गाभेदमाशङ्क्याह ॥ मोक्षस्येति ॥ तथाच भङ्गेनैवोत्पत्तेरपि ग्रहणं स्यादिति भावः ॥ उत्पद्यमानस्येति ॥ तथाच तद्ध्वंसो भङ्गपदार्थोन्यो वाच्य इति भावः ॥ बद्धस्येति ॥ बद्धस्य विशिष्टस्य पदार्थान्तरत्वेन तद्ध्वंसोप्यतिरिक्तो नाशपदार्थ इति वा बद्धपदं धर्मिसामान्यपरं तद्ध्वंसो नाशपदार्थोऽन्यो वाच्य इति वाभिप्रायः । भावरूपोप्यावश्यक इत्याह ॥ मोक्षस्येति ॥ अनिष्टनिवृत्तेः पुमर्थत्वेऽपीष्टप्राप्तेरेव मुख्यपुरुषार्थत्वमिति भावः ।

पाण्डुरङ्गि – यतो वेत्यादिश्रुत्यनुसाराद्वा त्रितयमुच्यते श्रुत्यंतरानुसाराद्वा । नाद्य इत्याह ॥ यतो वेत्यत्रेति ॥ द्वितीयं दूषयति ॥ तमेवैकमिति ॥ अत्र अमृतस्यैष सेतुरिति मुक्तप्राप्यत्वस्योक्तावप्युत्तरवाक्योक्तत्वेन विषयवाक्येऽनुक्तत्वात्तदभिप्रायेणैकैकस्येत्युक्तिरिति ज्ञेयम् ॥ जगतो जन्माङ्गीकार इति ॥ यद्यपि जगतो जन्माङ्गीकारमात्रेण मिथ्यात्वासिद्धिः शक्योपपादना । ध्वंसप्रतियोगित्ववत्प्रागभावप्रतियोगित्वस्याप्यत्यंताभावप्रतियोगित्वविरोधित्वात् । तथापि पूर्वं सविस्तरमुपपादितत्वेन तत्स्मारणार्थं भङ्गाङ्गीकारे मिथ्यात्वासिद्धेर्वक्तव्यत्वात् भङ्गमात्रोपादाने च प्रथमातिक्रमे कारणाभावात् जन्मस्थित्यङ्गीकारे तद्दूषणाभावप्रतीतेः स्थितिमात्रोपादाने च पूर्वोक्तस्मरणायोगात्त्रितयोपादानेपि साक्षात्तदप्रतीतेरेकैकस्यैव मिथ्यात्वप्रतिकूलताभावप्रतीतेश्च भङ्गशब्देन चरमांतःकरणवृत्त्या प्रपञ्चनिवृत्तिरविवक्षितेति शङ्कास्पदत्वाच्च साक्षाद्भङ्गमनुक्त्वा जन्माङ्गीकारेणानित्यत्वापादनमिति ज्ञेयम् । ननु यतो वेत्यादि श्रुत्युक्तत्वाच्चतुष्टयमेवास्तु न त्वन्यत् । तत्र प्रमाणाभावादित्यत आह ॥ यतो वेत्यत्रेति ॥ अष्टकस्य प्रामाणिकत्वेपि सूत्रकारेणाष्टकं विवक्षितमित्यत्र सूत्रकारीयं ज्ञापकमाह ॥ सूत्रकृतैवेति ॥ नन्वेकस्यापरत्रांतर्भावेनाष्टककर्तृत्वमेव न सम्भवतीत्याशङ्क्य निराकरोति ॥ न चेति ॥ जन्मपदार्थनियतिपदार्थयोरैक्याज्जन्मनो न पृथक्करणं नियतेरित्युच्यते उत नियतेरपि जन्मसद्भावाज्जन्मग्रहणेनैव तस्या अपि प्राप्तत्वादिति वा । नाद्यः । स्वस्वव्यापारेषु प्रवृत्त्यादिरूपत्वे पदार्थैक्याभावात् । न द्वितीयः । नियत्यादेर्जन्मादिमत्त्वेपि विनाशवद्भेदस्यानुभूयमानत्वादित्याह ॥ स्वस्वव्यापारेष्विति ॥ विनाशादेरित्यनेनान्यथा प्रागभावध्वंसरूपोत्पत्तेर्ध्वंसोत्पत्तिरूपविनाशस्य वा पृथग्ग्रहणं न स्यादिति सूचयति । यद्वा

(पाण्डुरङ्गि)

तर्ह्युत्पत्तिकारणत्वे उक्ते ध्वंसस्याप्युत्पत्तिमत्त्वेन ध्वंसकारणत्वस्यापि लब्धत्वेन तस्यापि पृथगवक्तव्यतया त्रितयकर्तृत्वं त्वत्पक्षेऽप्यनुपपन्नम् । न च तत्रावांतरविशेषेण पृथगुक्तिः । तर्हि प्रकृतेपि समानमिति भावेन प्रतिबंद्या समाधत्ते ॥ स्वस्वेति ॥ ननु संहारकारणत्वे मोक्षकारणत्वमेव लब्धम् । मोक्षस्य बन्धध्वंसरूपत्वात् । तथाच पृथक् तदभिधानमयुक्तमित्याशंक्य तर्हि ध्वंसकारणत्वेऽभिहिते उत्पत्तेरपि प्रागभावनिवृत्तिरूपत्वेन ध्वंसत्वेनोत्पत्तिकारणत्वस्यापि लब्धत्वेन त्रितयकारणत्वमपि न स्यादित्याह ॥ मोक्षस्येति ॥ उत्पद्यमानस्य उत्पत्तिविषयप्रागभावान्मुच्यमानस्य । प्रागभावप्रतियोगिन इति यावत् । न तु बद्धस्य बन्धान्मुच्यमानस्य । बन्धनिरूपकस्येति यावत् । एवं प्रतिबन्द्या मोक्षकर्तृत्वमप्यवश्यं पृथग्वाच्यमित्युपपाद्य प्रतिबन्द्यामुत्तरत्वं मन्यमानं प्रति पृथङ्मोक्षकारणत्वाभिधाने वास्तवं प्रकारमाह ॥ मोक्षस्येति ॥ परमेति ॥ जिज्ञासाहेतुत्वादित्यर्थः ।

तात्पर्यचन्द्रिका

अज्ञानं तु न बंधः । किं तु बंधकम् । ननु तथापि नियमनज्ञानादीनस्येत्यनेन विवक्षित्वा तेषामुत्पत्त्यादिके जन्मादिपदेनोक्ते नियमनादीन् प्रति जगत्प्रतीव ब्रह्मकारणं सिद्ध्यति । किं जन्मादीत्यत्र तद्ग्रहणेनेति चेन्न । अस्येत्यनेन निर्दिष्टधर्मिभूतजगत्सम्बन्धार्थं धर्माणां नियमनादीनां धर्मनिर्देशकेन जन्मादिपदेनैव ग्राह्यत्वात् । न चेत् परमतेऽस्येत्यनेन भङ्गं विवक्षित्वा तस्योत्पत्त्यादिके जन्मादिपदेनोक्ते भङ्गस्य ब्रह्मकारणं सिध्यति । किं जन्मादीत्यत्र भङ्गग्रहणेनेति स्यात् । नन्वेवमपि चेतनादिसम्बन्धिज्ञानादेर्ब्रह्मकार्यत्वे सिद्धेऽपि ज्ञानादिसम्बन्धिनियमादेर्ब्रह्मकारणं न सिध्यतीति चेन्न । यो यस्य धर्मः स तदाश्रित इत्युक्ते धर्मित्वे सति धर्मस्य रूपादेर्यथा धर्मत्वेन य इत्यनेन धर्मितया यस्येत्यनेन च ग्रहणं तथा ज्ञानादीनामष्टकांतर्गतत्वाज्जन्मादीत्यनेन गृहीतानामपि नियम्यत्वादिना रूपेणास्येत्यनेनापि ग्रहणात् । अन्यथा तवापि भङ्गसम्बन्धिजन्मादिकारणं ब्रह्म नसिद्ध्येत् । नित्यकर्मणि यस्य पुंसो यावदंगोपसंहारे शक्तिस्तत्प्रयोगे तावदंगोपेततेव ब्रह्मण्यपि यस्य वस्तुनः सृष्ट्याद्यष्टके यावत्सम्भवति तावद्धेतुताऽनुगतैव । यद्यपि चेतनस्थानि सुखदुःखादीन्यचेतनस्थानि वृद्ध्यादीन्यपि संति तथापि विचारविधायकनानावाक्यपरामर्शेन स्कांदे सूत्रकृतैवाष्टककर्तृत्वस्यैव लक्षणत्वेनोक्तत्वादत्रापि तस्यैव

विवक्षणीयत्वान्न दोषः । यद्वा सर्वैर्मुमुक्षुभिर्विशिष्याष्टककर्तृत्वस्येवान्यकर्तृत्वस्य ज्ञेयत्वनियमाभावान्ना- न्यदिहादिशब्दार्थः । उक्तं च -

"सृष्टिरक्षाहृतिज्ञाननियमाज्ञानबन्धनान् ।
मोक्षं च विष्णुतश्चैव ज्ञात्वा मुक्तिर्नचान्यथे"ति ।

अथवा विषयोपपादकगुणपूर्तिप्रसिद्धये जीवाद्भेदके प्रसिद्धे जन्मादित्रितयहेतु-त्वेऽभिहितेऽपि प्रयोजनसिद्धये मोक्षदत्वस्यापि वक्तव्यत्वात्तस्य च बन्धकत्वं विनाऽयोगात्तयोश्च तद्धेतुज्ञानाज्ञानदत्वं विनाऽनुपपत्तेस्त्रितयहेतुत्वस्यापि वक्तव्यत्वात् पुनश्च दीपस्तम इव ज्ञानं बन्धकाज्ञानं स्वभावादेव हंति किमीश्वरेणेति शङ्कायां दीपज्ञानादिस्वभावोपि भगवन्नियत इति वाच्यत्वात्प्रकृतोपयोगितयाऽष्टकोक्तिः । यथा च स्रष्टृत्वादावेकैकस्यैव लक्षणत्वोपपत्तावपि त्रितयोक्तिः स्थितिहेतुरन्य इति शङ्कानिरासार्थं वाऽनेकलक्षणसूचनार्थं वा तथाऽष्टकोक्तिरपि तदर्थमस्तु । न चोपादानत्वाय त्रितयोक्तिः । सृष्टिलयाभ्यामेव तत्सिद्धेः । सम्भवति च गुणपूर्तावनेकोपपादकोपन्यासः । तस्मादष्टकमेव जन्मादिशब्दार्थः ।

प्रकाशिका – अज्ञानबन्धयोर्भेदमाह ॥ अज्ञानं त्विति ॥ तथापीति ॥ जन्मादी-नामष्टानां भेदे सिद्धेपीत्यर्थः । यथाऽस्येत्यनेन जगतः परामर्शस्तथा पञ्च धर्मानपि परामृ-श्यास्य जन्मादित्रयं भवतीत्युक्ते जगत्कारणं ब्रह्म यथा सिध्यति तथा नियत्यादिकारणं सिध्यतीत्यर्थः ॥ अस्येत्यनेनेति ॥ अत्रास्येति धर्मिनिर्देशकं जन्मादीति धर्मनिर्देशकं तत्र नियमनादीनां धर्माणां धर्मिनिर्देशकेनैव ग्रहणे जन्मादित्रयसम्बन्धो जगतो नियमनादीनां च सिध्यति । तथापि जगतो नियमनादिधर्माणां च सम्बन्धो नोक्तः स्यात् । अतो धर्मनिर्देशकेन तेषां ग्रहणे तु जगत्सम्बन्धो जन्मादित्रयस्येव नियत्यादीनामपि सिध्यतीत्येवं ग्राह्यमित्यर्थः ॥ तस्येति ॥ अस्येत्युक्तस्येत्यर्थः । स्थितावप्ययं प्रसङ्गो बोध्यः । भङ्गमात्रे तदुक्तिस्तु सौत्रादिपदेन स्थितेरवश्यं ग्राह्यत्वाद्यथान्यासमुपेत्य । वस्तुतस्तु जन्मास्य यत इति सूत्रन्यासे लाघवमिष्टसिद्धिश्चेतीदमेवादिपदोच्चारणं ज्ञापकं धर्मिनिर्देशकेनास्येत्यनेन नियत्या-दिधर्माणामग्रहण इति यथोक्त एवार्थः सूत्रकृदभिमत इति ध्येयम् । ननु जन्मादित्रयस्य कृत्स्नजगत्सम्बन्धाद्धर्मनिर्देशकेन तस्यैव ग्रहणं युक्तम् । न तु ज्ञानादीनाम् । तेषां

(प्रकाशिका)

चेतनमात्रसम्बन्धित्वादिति चेत् तत्सम्बन्धार्थमपि जन्मादीत्यनेनैव ग्राह्यत्वात् । तन्मतेप्य-नादिजीवब्रह्मविभागादौ जन्मादेरयोगात् । अस्येत्यनेन जन्ममात्रविवक्षायां कृत्स्नस्थिति-कारणत्वासिद्धेः । सर्वनाम्नः सङ्कोचापत्तेश्चेति भावः । जन्मादीत्यनेन सर्वधर्माणां ग्रहणमि-त्यत्रापि बाधकमाशङ्कते ॥ नन्वेवमिति ॥ नियत्यादीनां जगत्सम्बन्धलाभेपीत्यर्थः । ज्ञाना-दिचतुर्णां च नियमेन जन्मादिसम्बन्धाबोधनादिति भावः ॥ रूपादेरिति ॥ रूपत्वादिकं प्रति धर्मीरूपरसादिर्घटादिकं प्रति धर्मश्चेत्यर्थः। उक्तरीतिस्त्वयापि वाच्येत्याह ॥ अन्यथेति ॥

ननु जन्मादित्रयमात्रविवक्षायां विश्वसम्बन्धिजन्मादिहेतुत्वमेकमनुगतं लभ्यते । अन्यथा क्वचिज्जन्मादिहेतुत्वं क्वचिज्ज्ञानादिहेतुत्वमित्यननुगतं स्यादित्यत आह ॥ नित्येति ॥ षष्ठे तृतीयपादे ''सर्वशक्तौ प्रवृत्तिः स्यात्तथाभूतोपदेशा''दित्याद्याधिकरणे ''यावज्जीवमग्निहोत्रं जुहोति यावज्जीवं दर्शपूर्णमासाभ्यां यजेते''त्यादौ किं सर्वाङ्गोपसंहारशक्तानामेवाधिकार उत यस्तु यावंति शक्नोत्युपसंहर्तुं तावद्भिरुपेतं प्रधानं कुर्वन्नधिक्रियेतेति सन्देहे अग्निहोत्रेण भावयेदित्युक्ते कथं भावयेदिति कथंभावाकांक्षायां सर्वाङ्गानां समुच्चयेन ग्रहणात्सर्वांगोपेतस्यैव प्रधानस्य फलवत्त्वेननांगहीनस्य तत्राधिकार इति प्राप्ते यावच्छब्दोपबद्धं हि जीवनं धातुसम्बन्धविहितेन णमुल्प्रत्ययेन सम्बन्धांतराभावात् निमित्तत्वेन यागानुरक्तां भावनां प्रत्यवगम्यते । निमित्तस्य चैतद्रूपं यत्तस्मिन्सति नैमित्तिकमवश्यं कार्यमित्यतः प्रधानानुरक्ता भावना स्ववाक्यश्रुतनिमित्तवशप्राप्तावश्यकत्वानुरोधेन यथासम्भवमङ्गानि गृह्णाति । तावतैव शास्त्रवशात्फलसिद्धिरिति यथाशक्तिप्रयोगेणैवाधिकार इति सिद्धांतितम् । यथा च तत्र यथा यत्र यावच्छक्यं तत्र तन्मात्राङ्गोपेतता तथात्रापीत्यर्थः । यद्येवमनुगमस्तर्हि जन्मादीत्यत्राष्ट-कग्रहणमिवान्येषां चेतनधर्माणां सुखदुःखेच्छाद्वेषादीनामचेतनधर्माणां वृद्धिपरिमाणा-पक्षयादीनां विवक्षायामप्युक्तदिशाऽनुगमसम्भवात्कुतो न ग्रहणमित्याशङ्क्य त्रेधा समाधिमाह ॥ यद्यपीत्यादिना अष्टकोक्तिरित्यंतेन । सुखादीनामन्तःकरणधर्मत्वेपि धनीतिवत्तत्स्वा-मित्वाच्चेतनस्थानीत्युक्तम् । सूत्रकृतोऽपि निमित्तोक्तिर्विचारविधायकेति । यद्यप्यन्वेषणादि-वाक्येष्वपहतपाप्मत्वसत्यकामत्वादिधर्माः श्रुतास्तथापि तेषां ब्रह्मपदोक्तगुणग्रहणेन गृहीते-स्तदुपपादकत्वमष्टानामेवेत्युक्तमिति ध्येयम् । अवश्यं ज्ञेयत्वान्मोक्षशास्त्रे एतदेव विवक्षितं नान्यदित्याह ॥ यद्वेति ॥ उक्तं चेति ॥ तात्पर्यनिर्णयाद्याध्याय इत्यर्थः । ल्युटष्टित्करणेन त्रिलिङ्गत्वस्य ज्ञापितत्वाद् बन्धनानिति साधुः । अष्टानामेव प्रकृतोपयोगादन्येषां तदभावाद-ग्रहणमिति भावेनाह ॥ अथवेति ॥ अयोगादिति ॥ अन्यबद्धत्वादेर्निरासादिति भावः ।

तयोः मोक्षबन्धदत्वयोः ॥ त्रितयेति ॥ बन्धज्ञानाज्ञानत्रितयेत्यर्थः । यद्वोक्तदिशा जन्मस्थितिभङ्गानां बन्धमोक्षयोः ज्ञानाज्ञानयोश्चैकैकसमुदायत्वं विवक्षित्वा तत्त्रितयहेतुत्वस्यापीत्युपसंहारः । नियतेरुपयोगमाह ॥ पुनश्चेति ॥ अत्राद्यः परिहारो भाष्योक्तस्कान्दस्मृत्या सूचितः । द्वितीयस्तु ''सृष्टिरक्षे''ति स्मृत्या । तृतीयस्तु ''यतो मोक्षादिदातासावतो जिज्ञास्य एव वा'' इत्यनेन

''नर्ते त्वत्क्रियते किंचिदित्यादेर्न हरिं विना ।
ज्ञानस्वभावतोऽपि स्यान्मुक्तिः कस्यापि हि क्वचित् ।''

इत्यादिना चानुव्याख्यानेन सूचित इत्याहुः । नन्वेकलक्षणोक्तावपीष्टसिद्धेर्नानेकोक्तिरर्थवतीत्यत आह ॥ यथाचेति ॥ परमत इति भावः ॥ सम्भवति चेति ॥ जन्ममात्रोक्तौ जगज्जन्मोपयुक्तानां केषांचिद्गुणानां लाभेपि स्थित्युपयुक्तगुणालाभात्सापि ग्राह्या । तथा संहर्तृत्वमोचकत्वादिप्रयोजकधर्माणां लाभाय स्रष्टृत्वादीनां स्वस्वप्रयोजकानेकगुणाक्षेपकत्वं तेषां ग्रहण एव सिध्यति नान्यथा । न हि चैत्रो रूपद्रष्टेत्युक्ते चक्षुष्मत्तेव श्रोत्रादिमत्ता सिध्यति । तथाच तत्र सर्वेन्द्रियवत्त्वप्रतिपादनाय तत्तदाक्षेपकरूपज्ञानशब्दज्ञानादिकं सर्वमुपपादकमुपादेयम् । तद्वत्सर्वगुणपूर्त्यर्थमनेकोपपादकोक्तिर्युक्तेति भावः । एतेन यदाह कश्चित् जन्मादिकारणत्ववद्गुणपूर्तेरपि विष्णौ श्रुतत्वान्न तत्रोपपादकापेक्षा । अन्यथा तत्राप्येवमित्यनवस्थापत्तेर्नेदं सूत्रमारभ्यम् । जन्मादिहेतुत्वस्यापि सत्यकामत्वादिवद्गुणतया ब्रह्मपदोक्तगुणपदेन ग्रहणेन तस्य द्वैरूप्यापाताच्च । किंचोपपाद्योपपादकयोर्द्वयोरपि श्रुत्येकसमधिगम्ययोस्तज्ज्ञन्यनिर्णयदशायां नोपपादकापेक्षा । आपातदशायां द्वयोरप्यनिर्णायकत्वं वैपरीत्यस्य वाऽपत्तिरिति तन्न । ब्रह्मपदश्रुत्या पूर्वप्रतीतस्य गुणपूर्णत्वस्यासम्भावनयाऽसत्त्वशङ्कायां वाक्यप्रमाणेनानंतरधीस्थेन जन्मादिहेतुत्वेनोपपादने दोषाभावात् । अन्यथा मीमांसाऽनारम्भापत्तेः । श्रौते श्रौतस्योपपादकत्वाद्धेतुत्वेन गुणपूर्त्युपपादनस्येव तया तदुपपादनस्याशक्यशङ्कत्वाच्च । ''परास्य शक्ति''रिति श्रुतौ परत्वस्य स्वाभाविकत्वादिना ''न हिद्रष्टुर्दृष्टेर्विपरिलोपो विद्यते अविनाशित्वा''दित्यादिश्रुतौ दृष्टेरभ्रांतित्वस्याविनाशित्वेनोपपादनदर्शनाच्च । सामान्याकारेणोपपाद्यकोटिनिविष्टस्यापि स्वाध्यायाध्ययनविध्यादिवद्विशेषाकारेणोपपादकत्वाविरोधाच्च । अस्यां दशायां तदन्यस्यैव गुणपदेन ग्रहणोपपत्तेश्च । ''कर्तृत्वात्सगुणं ब्रह्मे''ति भागवते सूत्रकृतैव स्पष्टमुपपादकत्वोक्तेश्चेति ।

पाण्डुरङ्गि – ननु तथाप्यज्ञानकारणत्वं न पृथग्वाच्यम् । अज्ञानस्य बन्धरूपत्वेन बन्धकारणत्वोक्त्यैवाज्ञानकारणत्वस्यापि लब्धत्वादित्यत आह ॥ अज्ञानं त्विति ॥ यद्यपि सुधायां स्वप्नाधिकरणे अविद्यादेरेव संसारत्वादित्यादिना बन्धत्वमुक्तं तथाप्यत्र दुःखमेव साक्षाद्बंध इत्यभिप्रेत्येदमुक्तम् । ननु तथापि जन्मादीत्यत्रादिपदेन नियमनादिग्रहणमयुक्तम् । न च तथात्वे नियमनादीन्प्रति ब्रह्म कारणं न सिध्येदिति वाच्यम् । अस्येत्यनेन नियमनादेरपि परामर्शेन तान्प्रत्यपि ब्रह्मकारणतासिद्धेरित्याशयेन शङ्कते ॥ ननु तथापीति ॥ जगतो धर्मित्वान्नियमनादीनां च धर्मत्वाद्धर्मधर्मिणोः सम्बन्धज्ञापनार्थं जन्मादिपदेन तद्ग्रहणमावश्यकमिति परिहरति ॥ अस्येत्यनेनेति ॥ विपक्षे बाधकमाह ॥ न चेदिति ॥ धर्मत्वेन घटं प्रतीति शेषः । धर्मितया रूपत्वं प्रतीति शेषः ॥ अस्येत्यनेनेति ॥ अस्य जगतो जन्मादि यतो भवतीत्युक्तत्वात्तदन्तर्गततया ज्ञानादेर्ग्रहणे तत्सम्बन्धिनियम्यत्वादेरपि तत्कार्यत्वं सिध्यतीति भावः । ननु सृष्टयाद्यष्टकस्य लक्ष्म्यादावभावेनाष्टककर्तृत्वस्य सर्वसाधारण्याभावात्कचित् सृष्टिकर्तृत्वं क्वचिन्मोक्षसाधनत्वमित्यादिकल्पनायामननुगमो दोष इत्यतः समासव्यासयोगत इत्यत्रोक्तमभ्युपेत्य दृष्टान्तेनोपपादयति ॥ नित्यकर्मणीति ॥ नन्वष्टककर्तृत्वमात्राभिधानमयुक्तम् । न च विचारविधायकवाक्योक्तत्वादेषां ग्रहणम् । अन्वेषणवाक्ये सत्यकामत्वादीनामपि विद्यमानत्वेन तेषामपि ग्रहणप्रसङ्गादित्यपरितोषात् परिहारांतरमाह ॥ यद्वेति ॥ अथवा ननु सूत्रकृतोपि विशिष्याष्टककर्तृत्वस्यैवोक्तौ किं निमित्तमित्यत आह ॥ यद्वेति ॥ मुमुक्षुभिः विधीयमानविचाराधिकारादिभिः । विशिष्टाधिकारिणां नियमसत्त्वात्सर्वैरित्युक्तम् । नन्वष्टककर्तृत्वस्येवावतारानवतारपञ्च-भेदादेरपि अवतारान् हरेर्ज्ञात्वेत्यादिना मुमुक्षुभिरवश्यं ज्ञेयत्वस्योक्तत्वात्तदनुक्त्वा प्रकृतेऽष्ट-ककर्तृत्वस्योक्तौ किं निमित्तमित्यस्वरसादाह ॥ अथवेति ॥ तथाच प्रकृतोपयुक्तत्वादेषामेव ग्रहणं युक्तमिति भावः ॥ तयोश्चेति ॥ बन्धमोक्षयोरित्यर्थः ॥ त्रितयहेतुत्वस्यापीति ॥ ज्ञानाज्ञानबंधरूपत्रितयहेतुत्वस्यापीत्यर्थः । नन्वत्र स्वारसिक्या आकाङ्क्षाया अभावा-दुत्थापिताकाङ्क्षायाश्चातिप्रसङ्गान्नाष्टककर्तृत्वस्यावश्यवक्तव्यतेत्याशङ्क्य तथात्वे त्रितयहेतु-त्वमपि न वक्तव्यम् । तत्रापि स्वारसिक्या आकाङ्क्षाया अभावात् । तदभावेप्युत्थापि-ताकाङ्क्षया त्रितयहेतुत्वस्यावश्यवक्तव्यत्वे प्रकृतेपि साम्यमित्याह ॥ यथाचेति ॥ ननु न स्थितिहेतुरन्य इति शङ्कानिरासाय त्रितयोक्तिरित्युच्यते येन तादृशोत्थापिताकाङ्क्षाया अन्यत्रापि साम्यादष्टकोक्तिरप्यावश्यकी स्यात् । किं नामोपादानत्वसिद्ध्यर्थमेव त्रितयोक्ति-

रित्याशङ्कते ॥ न चोपादानत्वायेति ॥ सृष्टिलयाभ्यामेवेति ॥ तथाच स्थितिकर्तृत्वोक्तेरुपादानार्थत्वाभावेन तत्रोत्थापिताकाङ्क्षाया एव वक्तव्यत्वात्तदंशे साम्यमेवेति भावः । अनेकलक्षणसूचनार्थं वेत्युक्तमुपपादयति ॥ सम्भवतिचेति ॥ अथवा एवं प्रतिबन्द्या अनेकलक्षणोपपादनमिति प्रतिपादितम् । वास्तवं परिहारं चाह ॥ सम्भवति चेति ॥

तात्पर्यचन्द्रिका

केचित्तु यतो वेत्यादिश्रुतौ प्रतिवाक्यं तद् ब्रह्मेत्यनुक्तेरनेकलक्षणवैयर्थ्याच्च जन्मादिहेतुत्वसमुदाय एकं लक्षणम् । अत एव सूत्रे जन्मादीत्येकवचनमित्याहुः । तन्न । व्यावर्त्याभावात् । न हि सर्वजगज्जन्मकारणं स्थित्याद्यकारणं च किंचिदस्ति । ननु जन्मादिहेतुत्वं निरतिशयबृहत्त्वस्योपलक्षकम् । न च तदुपलक्षणमेकेनैव युक्तम् । जन्ममात्रोक्तौ स्थित्याद्युपयोगिज्ञानाद्यभावेन निरतिशयबृहत्त्वासिद्धेः । अतः समुदायोक्तिरिति चेन्न । त्रितयोक्तावपि मोचकत्वोपयोगिशक्त्याद्यलाभात् । उपलक्षणस्योपलक्ष्योपपादकत्वानियमाच्च । उक्तशङ्कानिरासार्थमेवानेकलक्षणोक्तिसम्भवाच्च । प्रतिवाक्यं तद् ब्रह्मेत्यनुक्तिस्तु ब्रह्मव्यक्तिभेदशङ्कानिरासार्थमिति त्वयापि स्वीकृतम् । अन्यथा सत्यज्ञानादिवाक्येपि प्रतिपदं ब्रह्मपदाश्रवणान्निरुपाधिकसत्तायोगित्वनित्यासङ्कुचितज्ञानत्वापरिच्छिन्नगुणत्वरूपाणां सत्यत्वज्ञानत्वानंतत्वात्मकानां स्वरूपलक्षणानामपि प्रत्येकं लक्षणत्वं न स्यात् । सौत्रैकवचनादपि न समुदायस्य लक्षणता । यत्र सास्नादयः सा गौः ''हलोनंतराः संयोग'' इत्यादौ बहुवचनेपि समुदाये लक्षणत्वसंयोगसंज्ञादेः यस्य छत्रादिकं स राजा ''अजाद्यतष्टाप्'' इत्यादावेकवचनत्वेपि प्रत्येकं लक्षणत्वादेर्दर्शनाच्च । गर्गाः शतं दण्ड्यंतामित्यादौ समुदाय इव विप्रा भोज्यंतामित्यादौ प्रत्येकमपि वाक्यसमाप्तेर्दर्शनाच्च । तस्माज्जन्मादिहेतुत्वं प्रत्येकं लक्षणमिति ।

प्रकाशिका – ''सृष्टिस्स्थितिश्च संहारो नियतिर्ज्ञानमावृति''रित्यनुव्याख्याने असमासनिर्देशेन सूचितं जन्मादीनां प्रत्येकलक्षणत्वं साधयितुं परोक्तं निराह ॥ केचित्त्विति ॥ व्यावर्त्याभावादिति ॥ अत एव त्वद्भाष्ये ''जगद्धाचित्वा''दित्यत्र ''यस्य चैतत्कर्म स वेदितव्य'' इति वेद्यस्य ब्रह्मत्वे साध्ये जगज्जनकत्वस्य ''अक्षरमम्बरांतधृते''रित्यत्राक्षरस्य

(प्रकाशिका)

ब्रह्मत्वेऽबरांतधारकत्वरूपस्थितिहेतुत्वस्य ''अत्ता चराचरे''त्यत्रादनकर्तुर्ब्रह्मत्वे संहर्तृत्वस्य हेतुत्वेनोपन्यास इति भावः । एवमपि पूर्णत्वासिद्धिरित्याह ॥ त्रितयेति ॥ स्वीकृतमिति ॥ ब्रह्मशब्दैक्याद् ब्रह्मैक्यमिति वदता स्वीकृतमित्यर्थः । सत्यज्ञानादिशब्दार्थानामति-व्याप्तिशून्यत्वात्पृथग्लक्षणत्वमिति ज्ञापनाय तद्भाष्योक्तमेव तेषां स्वरूपमनुवदति ॥ निरुपाधिकेति ॥ एवंविधसत्यत्वं नामांतरभजनार्हावस्थांतरयोगित्वेन निरुपाधिकसत्त्वरहि-तयोर्जीवजडयोर्नास्तीति भावः ॥ नित्येति ॥ अनेन ज्ञानशून्यस्य जडस्य सङ्कुचितज्ञानस्य संसारिणः कदाचिदसंकुचितज्ञानस्य मुक्तस्य च व्यवच्छेदान्नातिव्याप्तिरस्येति भावः ॥ अपरिच्छिन्नेति ॥ अनेनाल्पगुणाः सर्वे व्यावृत्ता इति भावः । तत्र प्रत्येकं ब्रह्मपदावृत्ता-विहापि तद् ब्रह्मेत्यस्यावृत्तिरस्तु । आवृत्तौ ब्रह्मानेकत्वशङ्का तत्रापि तुल्येति । यदपि जन्मादीत्येकवचनादेकलक्षणत्वधीरिति तदप्यन्वयव्यतिरेकव्यभिचारान्नेत्याह ॥ सौत्रेति ॥ विशेषणत्वे व्यतिरेकव्यभिचारोक्तिर्यत्रेति । उपलक्षणत्वे तदुक्तिर्हलोनंतरा इति । यद्वा लौकिकवैदिकव्यभिचारस्थले एते । एवमग्रेपि ज्ञेयम् । ''हल'' इत्यत्र ''उभे अभ्यस्त''-मित्यादौ चैकवचनांतत्वाभावेपि ग्लानं ददते इत्यादौ संयोगाभ्यस्तसंज्ञे प्रति समुदायस्यैव संज्ञित्वं दृष्टम् । अन्यथा प्रत्येकं संज्ञित्वे निर्यातमित्यादावपि धातुयकारस्य संयोगसंज्ञा-प्रसङ्गेन ''संयोगादेरातोधातोर्यण्वत'' इति निष्ठानत्वं स्यात् । विस्तृतं चैतन्महाभाष्य इति भावः । सत्यप्येकवचने एकलक्षणत्वाभावादन्वयव्यभिचार इति भावेनाह ॥ यस्येति ॥ छत्रचामरादेः प्रत्येकं लक्षणत्वं तथा ''अजाद्यत'' इत्यत्र टापूप्रत्ययविधिं प्रत्यजादिगण-स्याकारांतस्य च । अजा एडकेत्यादौ सर्वेत्यादौ च प्रत्येकं निमित्तत्वं दृष्टम् । अन्यथा यस्य छत्रादयः स राजेति अजाद्यद्भ्यष्टाबिति निर्देशः स्यादित्यर्थः । आदिपदेन ''अदेङ्गुण'' इत्यादौ प्रत्येकं संज्ञादर्शनादिति ग्राह्यम् । ननु सास्नादौ प्रत्येकमतिव्याप्ते-र्बाधकात्समुदाये लक्षणत्वं तथा संयोगसंज्ञापि निर्यातमित्यादावतिप्रसङ्गादन्वर्थसंज्ञावि-ज्ञानाच्च समुदाये वर्तते । उक्तं च वृद्धिसूत्रकैयटे ''संयोगसंज्ञात्वन्वर्थत्वात्समुदाये प्रवर्तत'' इति । तथा प्रत्येकमभ्यस्तसंज्ञायां न्यनिजानीत्यत्र ''अभ्यस्तानामादि''रिति प्रत्येकमाद्यु-दात्तत्वप्रसङ्गबाधकादुभे ग्रहणबलाच्च समुदाये प्रवर्तते छत्रादिकमतिव्याप्त्यादिशून्यत्वात्प्रत्ये-कमेव लक्षणं ''अजाद्यत'' इत्यत्र सर्वेत्यादौ लक्ष्ये अकारांतादपि टापूप्रत्ययदर्शनात् अजादेरकारांतत्वाव्यभिचारेण तद्विशेषणत्वायोगाच्च प्रत्येकं निमित्तत्वम् ।

न च बाधकायत्तो व्यभिचारो दोषावहः । उक्तं चाचार्यैः ''व्यभिचार्यपवादेन मानमेव भविष्यती''ति चेत्तर्हीहापि वा व्यावर्त्याभावाद् बाधकात्प्रत्येकमेव लक्षणमस्तु । अत एव त्वयापि ''जगद्धाचित्वा''दित्यादौ प्रत्येकमेव हेतूकृतमिति भावः । ननु गर्गाः शतं दण्ड्यंतामित्यत्रापराधकर्तृषु गर्गेषु शतनिष्कदण्डनं न प्रत्येकं किन्तु समुदाये दृष्टम् । अत एव —

''प्रधानकर्मण्याख्ये येलादीनाहुर्द्विकर्मणाम् ।
अप्रधाने दुहादीनां प्यंते कर्तुश्च कर्मण''

इति वचनाद्गर्गाणामप्राधान्येन दण्ड्यंतामिति लकाराभिहितत्वात्प्रथमा । शतस्य च प्राधान्यादनभिहितत्वेन द्वितीया । विवृतं चैतद्बुद्धिसूत्रादौ तत्र तत्र महाभाष्ये ''समुदाये वाक्यपरिसमाप्तिः । तद्यथा गर्गाः शतं दण्ड्यंतामिति । अर्थिनश्च राजानो हिरण्येन भवंति। न च प्रत्येकं दण्डयन्ती''ति । तथाच तद्वदिहापि समुदाये लक्षणत्वमित्यत आह ॥ गर्गा इति ॥ अत्र वाक्यशब्दः प्रयोजकव्यापाररूपवाक्यार्थोक्तिद्वारा तत्फलभूतप्रयोज्य-व्यापाररूपभोजनलक्षकः । तथाच वाक्यार्थफलस्य भोजनस्यान्नादनादिरूपत्वेन तृप्तिफलत्वेन च प्रति विप्रं परिसमाप्तिदर्शनादित्यर्थः । उक्तं च कैयटे ''वाक्यशब्देन वाक्यार्थफल-मुच्यते'' इत्यादि । समुदायलक्षणत्वस्यैकवचनेनाज्ञापितत्वादयुक्तत्वाच्च प्रत्येकलक्षणत्वं न्याय्यमित्युपसंहरति ॥ तस्मादिति ॥

पाण्डुरङ्गि – किंचिदस्तीति ॥ येन तद्व्यावर्त्यं स्यादिति भावः ॥ उपलक्षकमिति ॥ ज्ञापकमित्यर्थः ॥ त्रितयोक्तावपीति ॥ तथाच निरतिशयबृहत्त्वासिद्धिस्तदवस्थेति भावः ॥ उपलक्षणस्येति ॥ उपलक्षणस्य काकादेर्गृहोपपादकत्वाभावात् । तेन विनानुपपद्यमानस्यैव तदुपपादकत्वादिति भावः ॥ उक्तशङ्केति ॥ त्रितयहेतुत्वोक्तावपि निरतिशयमहत्त्वा-सिद्धिरिति शङ्कानिरासार्थमेवानेकलक्षणोपादानमिति भावः । ननु तर्हि प्रतिवाक्यं तद् ब्रह्मेत्यनुक्तिः किमर्थमित्यत आह ॥ प्रतिवाक्यमिति ॥ ननु तर्हि सूत्रे एकवचनं न घटत इत्यत आह ॥ सौत्रैकवचनादपीति ॥ ननु गर्गाः शतं दण्ड्यन्तामित्यादौ दर्शनादेव समुदाये वाक्यपरिसमाप्तिः । एकवचनं तु न तद्धेतुत्वेनोच्यते येन व्यभिभचारः स्यादित्यत आह ॥ गर्गा इति ॥

तात्पर्यचन्द्रिका

यच्चोक्तं परैर्जन्मादिकारणत्वं तटस्थलक्षणं आनन्दादिरेव स्वरूपलक्षणमिति । तत्र न तावल्लक्ष्यगतागते स्वरूपतटस्थलक्षणे इति युक्तम् । काकादेर्गृहे कारणत्वस्य च ब्रह्मणि अध्यासतटस्थलक्षणस्य कारणत्रितयजन्यत्वस्य चाध्यासे सत्त्वेन स्वरूपलक्षणत्वापातात् । आनन्दादेः स्वरूपलक्षणत्वाभावप्रसङ्गाच्च । एतेन सत्यासत्ये स्वरूपतटस्थलक्षणे इति निरस्तम् । काकादेरध्यासतटस्थलक्षणस्य च गृहादावकल्पितत्वात् । ननु कारणतापि विशिष्टे न तु शुद्ध इति चेन्न । शुद्धेऽसतोऽसम्भवादिप्रसङ्गेन तल्लक्षणत्वायोगात् । न च लक्षणत्वस्यैवाभावे तद्विशेषतटस्थलक्षणत्वं युक्तम् । शाखाग्रस्थूलतारादिकं तु न चन्द्रारुंधत्यादिलक्षणत्वेनोच्यते । किं तु चन्द्रादिव्यक्तिं प्रदर्श्य स चन्द्र इत्यादिकं वक्तुम् । प्रकृते तु न तथा । शब्दैकगम्यशुद्धरूपस्य मानान्तरायोग्यत्वात् । न च यतो वेत्यादि वाक्यमेवाभिधया कारणत्वमुपस्थाप्य पुनस्तन्मुखेन लक्षणया कारणत्वरहितमानंदैकरसं शुद्धं बोधयतीति युक्तम् । सकृत्प्रयुक्ते वृत्तिद्वयायोगात् । केवललक्षणयैव शुद्धबोधनसम्भवेनाभिधया कारणत्वोपस्थापनवैयर्थ्याच्च ।

प्रकाशिका – ''जन्माद्यस्येति तेनैतद्विष्णोरेव स्वलक्षण''मित्यनुव्याख्यानोक्तं स्वरूपलक्षणत्वं समर्थयितुमद्वैत्युक्ततटस्थत्वमनूद्य निराह ॥ यच्चेति ॥ यथा चन्द्रस्य शाखाग्रंथतटस्थलक्षणं प्रकृष्टप्रकाशत्वं स्वरूपलक्षणं तद्वदिति भावः । अत्र यद्यपि तटस्थलक्षणमेवानुवदनीयं न स्वरूपलक्षणम् । तस्यानुमतत्वादविरोधित्वेनादूष्यत्वाच्च । तथापि तटस्थलक्षणं तत्रातिव्याप्तमिति वक्तुं वा तल्लक्षणमत्रास्तीति तद्वदिदमपि स्वरूपलक्षणमिति वक्तुं वा विभागण्वायमयुक्त इति वक्तुं वेति ध्येयम् । के ते स्वरूपतटस्थलक्षणे लक्ष्यगतागते वा सत्यासत्ये वा यावत्स्वबोध्यव्यावृत्तिभाव्यभाविनी वा यावल्लक्ष्यभाव्यभाविनी वा लक्ष्यांतर्गतानंतर्गतेव निरुपाधिकसोपाधिकरूपे वा स्वतो व्यावर्तकव्यावर्तकांतरोपस्थापकरूपे वा विशेषणोपलक्षणरूपे वेत्यष्टधा विकल्प्याद्यं निराह ॥ तत्रेति ॥ षष्ठ्यंतानां सत्त्वेनेत्यनेनान्वयः ॥ कारणेति ॥ दोषसंस्कारेन्द्रियसम्प्रयोगरूपकारणत्रितयेत्यर्थः ॥ आनन्दादेरिति ॥ तस्य ब्रह्मैक्येन तदनिष्ठत्वादिति भावः । एतेन तटस्थलक्षणलक्षणस्य लक्ष्यागतत्वस्य स्वरूपलक्षणे आनन्दादावतिव्याप्तिः । कारणत्वादावसम्भवश्चोक्त इति

ध्येयम् । द्वितीयं निराह ॥ एतेनेति ॥ लक्ष्ये अनध्यस्ताध्यस्तरूपे इत्यर्थः ॥ काकादेरिति ॥ तत्र तटस्थलक्षणमव्याप्तमित्युक्तं भवति । यदुक्तं ब्रह्मणि कारणत्वस्य सत्त्वेनेत्यादि तन्न। मायावच्छिन्नं ब्रह्म कारणमिति पक्षे कारणत्वस्य मायाविशिष्टगतत्वेन शुद्धगतत्वाभावादित्याशङ्क्य निरस्यति ॥ नन्विति ॥ आदिपदेनातिव्याप्तिः । शुद्धस्यैव जिज्ञास्यब्रह्मतया लक्ष्यत्वेनालक्ष्ये विशिष्टे गतत्वात् । उपलक्षणमेतत् । मायाब्रह्मणी सूत्रद्वयमिव रज्जौ कारणमिति पक्षे कारणत्वस्य ब्रह्मणि सत्त्वेन स्वरूपलक्षणत्वापत्तिः । मायायामतिव्याप्तिः । मायैव तु कारणं ब्रह्मत्वधिष्ठानमिति पक्षेऽसम्भवोतिव्याप्तिश्चेत्यपि बेध्यम् । स्वरूपलक्षणस्यैव लक्ष्यस्थत्वनियमो न तटस्थस्येत्यत आह ॥ न चेति ॥ असम्भवादिना लक्षणत्वस्यैवाभाव इत्यर्थः । कथं तर्हि लक्ष्यानिष्ठमपि शाखादिकं चन्द्रादि तटस्थलक्षणमित्यत आह ॥ शाखेति ॥ नन्विहापि तद् ब्रह्मेति वक्तुं यतो वेत्यनेन कारणत्वमुच्यते न तु लक्षणत्वेनेत्यत आह ॥ प्रकृतेत्विति ॥ ''किं लक्षणं पुनस्तद् ब्रह्मेत्यत आहे''ति त्वदीयभाष्ये लक्षणत्वोक्तिविरोधात् त्वदभिमते ब्रह्मणि ब्रह्मपदशक्तेरभावेन तद्बोधाय तदुक्त्ययोगाच्चेति भावः । किं च तस्य शुद्धस्य बोधनमपि चन्द्रादेरिव प्रत्यक्षेणाथशब्देन । आद्ये दोषमाह ॥ शब्दैकेति ॥ उपलक्षणमेतत् । प्रत्यक्षेण तद्बोधने शाखादेरिव प्रत्यक्षस्यैव कस्यचिज्ज्ञापकस्य वाच्यत्वेन तादृशकारणत्वोक्त्ययोगादित्यपि बोध्यम् । द्वितीयेपि यतो वेत्यादिना शब्देन शुद्धब्रह्मबोधं कृत्वा तद्ब्रह्मेति वक्तुं कारणत्वमत्रोच्यते अथ वाक्यांतरेण । आद्येपि यतो वेत्यादिना सर्वेण शब्दसमुदायेन तद्बोध उत यत इत्यनेनैवेति विकल्पान्हृदि कृत्वाऽऽद्यमनूद्य निराह ॥ न चेति ॥ अभिधयेति ॥ यत इत्यादिपदगताभिधयेत्यर्थः । तस्यापि लक्ष्यत्वे मुख्यस्यान्यस्याभावेन मुख्यार्थसम्बन्धाभावाद्वचनवृत्त्या कारणत्वप्रतीतेश्चेति भावः ॥ तन्मुखेनेति ॥ शाखामुखेन चन्द्रबोधनवदिति भावः ॥ लक्षणयेति ॥ मुख्यवृत्त्यैवंविधस्याप्रतीतेरिति भावः । वृत्तिद्वयेत्युपलक्षणम् । लक्षणायाः पदवृत्तित्वेन वाक्यस्य लक्षकत्वायोगात् । ''अर्धमन्तर्वेदी''त्यादौ वाक्ये लक्षकत्वस्याखण्डार्थत्वभङ्गे निरासात् । विरम्य व्यापारायोगाच्चेत्यपि ध्येयम् । ननु यथा गङ्गायां घोष इत्यत्र गङ्गापदं शक्त्या प्रवाहमुपस्थाप्य तीरमुपस्थापयति यथा वा वायुक्षेपिष्ठाद्यर्थवादः स्वार्थं शक्त्योपस्थाप्य प्राशस्त्यं लक्षयति तद्वदत्रापीति चेद्भ्रान्तोसि । न हि तत्र शब्द एव वृत्तिद्वयेन द्वयमप्युपस्थापयति । किं तु लक्षणया तीरादिकमेव । प्रत्येता तु शब्दतात्पर्यमजानन्पूर्वं प्रवाहादिप्रतीत्या तत्रानुपपत्तिं मन्वानस्तीरादि प्रत्येतीत्येव । न चैवं प्रकृते । जन्मादिसूत्रे

(प्रकाशिका)

कारणत्वस्य श्रुत्यर्थत्वेनैव कीर्तनादिति भावः ॥ केवलेति ॥ न च मुख्यार्थसम्बन्धार्थं तदुक्तिः । शुद्धस्यासङ्गत्वेन तीरे पूरसम्बन्धस्येव शुद्धे कारणत्वसम्बन्धाभावेन तदनपेक्षणादिति भावः ।

पाण्डुरङ्गि – जन्मादिकारणत्वस्य स्वरूपलक्षणत्वं व्यवस्थापयितुं परोक्ततटस्थलक्षणत्वं दूषयितुमनुवदति ॥ यच्चोक्तमिति ॥ आनन्दादेरिति ॥ स्वरूपत्वेन लक्ष्यांतर्गतत्वादित्यर्थः । सत्यासत्ये इत्यत्र सत्यशब्देनाकल्पितत्वमसत्यशब्देन कल्पितत्वं वक्तव्यम् । किं यत्र क्वचित्कल्पितत्वं तटस्थत्वमुत लक्ष्ये कल्पितत्वं वा । नाद्यः । आनन्दादेरनात्मनि कल्पितत्वेन तटस्थत्वापत्त्या स्वरूपत्वं न स्यात् । न द्वितीयः । लक्ष्यगतत्वस्य स्वरूपलक्षणत्वे कारणत्वस्य ब्रह्मणि सत्त्वेन तस्यापि स्वरूपलक्षणत्वं स्यादित्युक्तामतिव्याप्तिं परिहर्तुमाशङ्कते ॥ नन्विति ॥ असम्भवादीत्यत्रादिपदेनातिव्याप्तिर्ग्राह्या । कारणताविशिष्टे वर्तत इत्युक्तत्वादिति भावः । कारणत्वात्तत्स्वरूपलक्षणत्वमङ्गीकृत्य शुद्धेऽसत्वात्तटस्थत्वमित्यभिप्रायः । किं वा तदनङ्गीकृत्य शुद्धे तदभावमात्राभिप्रायः । नाद्यद्वितीयावित्याह ॥ असम्भवादिप्रसङ्गेनेति ॥ आदिशब्देनेतरभेदसाधने स्वरूपासिद्धिपरामर्श इत्यप्याहुः । आद्ये आदिपदोक्ताव्याप्तिर्द्वितीयेऽसम्भव इति विवेकः । ननु लक्ष्येऽसत्त्वेनासम्भवादिप्रसङ्गेन तस्य स्वरूपलक्षणत्वाभावेपि तटस्थलक्षणत्वं किं न स्यादित्यत आह ॥ न चेति ॥ ननु लक्ष्यानन्तर्गतस्यापि कारणत्वस्य तल्लक्षणत्वं स्यादेव चन्द्रारुंधत्याद्यगतस्यापि शाखाग्रस्थूलतारकादेश्चन्द्रारुंधत्यादिलक्षणत्वदर्शनादित्यतो दृष्टान्त एव विषम इत्याह ॥ शाखाग्रेति ॥ ननु जगत्कारणत्वमपि न ब्रह्मलक्षणत्वेनोच्यते ब्रह्मव्यक्तिं प्रदर्श्य तद्ब्रह्मेत्यादिवक्तुमेवेति नोक्तदोष इत्यत आह ॥ प्रकृतेत्विति ॥ तत्र चन्द्रज्ञानं प्रति कारणीभूतप्रत्यक्षादेरिव प्रकृते ब्रह्मज्ञानं प्रति कारणाभावादित्यर्थः । ननु प्रकृतेपि प्रत्यक्षमनुमानं वा ब्रह्मज्ञानसाधनं भवत्वित्यत आह ॥ शब्दैकगम्येति ॥ अन्यथा औपनिषदः पुरुष इति श्रुतिविरोधः स्यादिति भावः । यत्स्वरूपोपस्थापकं तत्तटस्थम् । कारणत्वादेश्च तादृशत्वात्स्वरूपलक्षणत्वं भविष्यतीत्याशङ्क्य निराकरोति ॥ न चेति ॥

तात्पर्यचन्द्रिका

एतेन यत इत्यनेनैव पदेन शुद्धप्रतीतिरिति निरस्तम् । शुद्धरूपस्य तेनैव सिद्धत्वेन शेषवैयर्थ्यात् । सत्यज्ञानादिवाक्यांतरेण शुद्धसिद्धौ तु कारणवाक्यवै-

यर्थ्यम् । न हि प्रकृष्टप्रकाशश्चंद्र इत्युक्त्वा शाखाग्रमपि दर्शयन्ति । न वा प्रकृष्ट-प्रकाशत्वादिज्ञानानुपायमन्यदेवोक्त्वा प्रकृष्टप्रकाशश्चन्द्र इति वदन्ति । न च जगत्कारणं ब्रह्मेत्यनुक्त्वाऽऽनन्दो ब्रह्मेति वक्तुमशक्यम् । नापि यावत्स्वप्रत्याय्य-व्यावृत्तिभाव्यभाविनी स्वरूपतटस्थलक्षणे । त्वन्मते यावद्व्यावृत्तिभाविव्यावर्तकांतरा-भावेनास्यैव यावद्व्यावृत्तिभावित्वावश्यंभावात् । अध्यासतटस्थलक्षणेऽतिव्याप्तेश्च । अत एव न यावल्लक्ष्यभाव्यभाविनी स्वरूपतटस्थलक्षणे । अलक्ष्यव्यावर्तकस्याभावे लक्ष्यस्यानवस्थानाच्च । न ह्यक्षीराव्यावर्तकहीनं क्षीरम् । नवा क्षीरदशायामसन्मा-धुर्यविशेषो न क्षीरस्य स्वरूपलक्षणम् । ''ईशानः प्रभुरव्ययः । अद्वैतः सर्वभावानां देवस्तुर्यो विभुः स्मृतः । तुरीयं तत्सर्वदृक्सदे''त्यादिश्रुत्या कारणत्वादेरपि यावल्लक्ष्यभावित्वाच्च ।

प्रकाशिका – द्वितीयं निराह ॥ एतेनेति ॥ तृतीयं प्रत्याह ॥ सत्येति ॥ उभाभ्यामपि ब्रह्मसिद्धिरस्त्विति चेत्किं साक्षादुत परंपरया । आद्य आह ॥ कारणेति ॥ अंत्य आह ॥ न चेति ॥ कारणत्वस्य स्वरूपलक्षणस्य ज्ञानेऽभिधाने वाऽनुपयोगात्तदुक्तिर्व्यर्थेत्यर्थः । तृतीयमाशङ्क्य प्रत्याह ॥ नापीति ॥ स्वबोध्यव्यावृत्तिर्यावत्पर्यंतं लक्ष्येऽस्ति तावत्तत्र वर्तमानं स्वरूपम् । तावदवर्तमानं तटस्थम् । अस्ति चेदं प्रकृष्टप्रकाशत्वे काकादौ चेति भावः ॥ व्यावर्तकांतरेति ॥ सत्यत्वादेर्लक्ष्याभेदे तटस्थत्वाभावादस्यैव स्वरूपलक्षणत्वमिति भावः ॥ अध्यासेति ॥ कारणत्रितयजन्यत्वस्य यावद्व्यावृत्तिसत्त्वादिति भावः । चतुर्थं निराचष्टे ॥ अत एवेति ॥ उक्तातिव्याप्तेरित्यर्थः ॥ अनवस्थानाच्चेति ॥ लक्षणं हि लक्ष्यस्यालक्ष्याद्व्यावर्तकं सत् स्वयं यावल्लक्ष्येऽस्ति तावल्लक्ष्यमलक्ष्याद् व्यावर्तयति । स्वस्यैवाभावे कथमितरव्यावृत्तस्वरूपं सल्लक्ष्यमवतिष्ठेत । अतो लक्षणं चेद्यावल्लक्ष्यभाव्येव वाच्यमिति कारणत्वस्यातथात्वे लक्षणत्वमेव नेति तटस्थत्वं दूरापेतम् । अतो यावल्लक्ष्यभावित्वं तस्योपेयमिति भावः । ननु सृष्टाद्यभावकालेऽसत्कारणत्वं कथं स्वरूपलक्षणं स्यादित्यत आह ॥ नवेति ॥ तद्दशायां ब्रह्मत्वस्यैवाभावादिति भावः । अङ्गीकृत्येदमुक्तम् । वस्तुतस्तु कारणं तादृगेव नेत्याह ॥ ईशान इति । माण्डूके'' 'प्रपञ्चोपशमं शिवमद्वैतं चतुर्थं मन्यन्त'' इति पूर्ववाक्ये प्रपञ्चोपशमशब्देन सर्वानिष्टनिवृत्ति-कारणत्वमुक्त्वा तत्रैवार्थे ''निवृत्तेः सर्वदुःखानामीशानः प्रभुरव्यय'' इत्यादिमन्त्रस्योक्त-

(प्रकाशिका)

तयाऽव्ययपदेन कारणत्वानपगमस्योक्तेर्निवृत्तेः सर्वदुःखानामित्यस्यान्वयाय कारणमिति पदस्यावश्यमध्याहार्यत्वात् । प्रभुपदस्य वा कारणत्वार्थत्वादिति भावः । उक्तं च भगवत्पादैः ''सर्वदुःखानां निवृत्तेः कारणभूतस्तुरीयो देव'' इति । तथाच सर्वदुःखानां निवृत्तेः कारणमीशानाममुक्तानामनश्नेष्टकः । अनितेः पचाद्यच् । अद्वैतः द्वैतशब्दितमिथ्याज्ञाननिवर्तकः । सर्वभावानां सर्वजीवानाम् । देवः प्राप्यः । गत्यर्थत्वाद्विवः । इति मन्त्रपदानामर्थो ध्येयः । ब्रह्मत्वेन पराङ्गीकृततुरीयपरत्वदर्शनायाद्वैत इत्यादिशेषोक्तिः । ''तुरीयं तत्सर्वदृक्सदे''ति कारणत्वाविनाभूतसार्वज्ञस्य ताटस्थ्येनाङ्गीकृतस्य सदातनत्वोक्तेरिति भावः । नचाव्ययत्वं सदातनत्वं च स्वरूपापेक्षयेति वाच्यम् । स्वरूपतथात्वस्य धर्मिग्राहकादिमानसिद्धत्वेन तदुक्तेर्वैयर्थ्यात् । श्रुतधर्मविशिष्टत्वेन तथात्वस्य सम्भवे तत्त्यागे हेत्वभावाच्च ।

पाण्डुरङ्गि – ननु सत्यज्ञानादिवाक्येन शुद्धसिद्धावपि कारणवाक्यवैयर्थ्यं कुत इत्यतो दृष्टांतदर्शनपूर्वकं तद्दर्शयति ॥ न हीति ॥ किं च जगत्कारणत्वं न वक्तव्यम् । प्रयोजनाभावात् । न च ब्रह्मज्ञानमेव प्रयोजनम् । कारणत्वस्य तज्ज्ञानानुपायत्वादित्यनुमाने यद्यज्ज्ञानानुपायं तत्तदर्थं न वक्तव्यमिति सामान्यव्याप्तिं मनसि निधाय तत्र दृष्टांतं दर्शयति ॥ न वेति ॥ यद्वा ननु शाखादिवत्स्वरूपलक्षणबोधनार्थमेव तटस्थलक्षणमुच्यते । न तु तदनन्तरं येन वैयर्थ्यं स्यादित्यत आह ॥ नवेति ॥ हेत्वसिद्धिं परिहरति ॥ न चेति ॥ नापि यावदिति ॥ स्वेन प्रत्याय्या ज्ञाप्या या व्यावृत्तिस्तत्पर्यंतं विद्यमानं यत्तत्स्वरूपलक्षणं यच्च ज्ञाप्यव्यावृत्तिपर्यंतं न विद्यते तत्तटस्थमित्यर्थः । अस्यैवेति ॥ कारणत्वस्यैवेत्यर्थः । नचानन्द एव व्यावर्तकः । तस्य स्वरूपमात्रत्वेन व्यावर्तकत्वाभावात् । स्वमत इव विशेषस्य परेणानङ्गीकृतत्वादिति भावः ॥ अध्यासेति ॥ कारणत्रितयजन्यत्वरूपेऽध्यासतटस्थलक्षणे स्वप्रत्याय्यव्यावृत्तिभावित्वेन स्वरूपत्वाभावेन तत्रातिव्याप्तेरित्यर्थः ॥ अत एवेति ॥ अध्यासतटस्थलक्षणे कारणत्रितयजन्यत्वे यावल्लक्ष्यभावित्वेन स्वरूपत्वाभावेनातिव्याप्तेरेवेत्यर्थः । भोगायतनत्वादेस्तु स्वभावादन्यदशायां व्यावर्तकांतरसद्भावादेवास्वरूपलक्षणत्वमङ्गीक्रियत इति बोध्यम् । किं च लक्षणस्य यावल्लक्ष्यभावित्वं लक्ष्यसत्तादशायां लक्षणस्यासत्त्वमिति वक्तव्यम् । तच्चायुक्तम् । लक्षणासत्त्वे तस्य लक्ष्यत्वाभावात् । तदानीमलक्ष्याद्व्यावर्तकाभावात् । एवं च सर्वस्यापि लक्षणस्य यावल्लक्ष्यभावित्वमेवेति कथमयं विभाग इत्याह ॥ लक्ष्येति ॥ ननु नायं नियमो यदलक्ष्याद्व्यावर्तकसत्व एव लक्ष्यता

तदभावे त्वलक्ष्यतेति । तथाच यावल्लक्ष्यभाव्यभावित्वाभ्यां भेदः सम्भवत्येवेत्यतोऽलक्ष्या-व्यावर्तकाभावेपि लक्ष्यत्वाङ्गीकारेऽतिप्रसङ्गमाह ॥ न हीति ॥ अत्रेशानत्वस्याव्ययत्वोक्त्या कारणत्वस्य यावल्लक्ष्यभावित्वमुक्तम् ।

तात्पर्यचन्द्रिका

नापि लक्ष्यांतर्गतानंतर्गते स्वरूपतटस्थे । अन्तर्गतपदेन लक्ष्यैकदेशोक्तौ लक्ष्यस्याखण्डत्वहानेः । अभेदोक्तौ तु प्रकृष्टप्रकाशत्वादेश्चन्द्रस्वरूपलक्षणत्वेन स्वीकृतस्यापि तन्न स्यात् । त्वया लक्षणवाक्यस्याखण्डार्थत्वाय प्रकृष्टत्वादेश्चन्द्र-प्रातिपदिकार्थाद्बहिर्भावस्योक्तत्वात् । प्रसिद्धस्यासाधारणधर्मस्य लक्षणत्वेनाप्रसिद्धस्य धर्मिणश्च लक्ष्यतया लक्षणस्य लक्ष्यमात्रत्वानुपपत्तेश्च । कारणत्वे लक्ष्यमात्रत्वरूप-स्वरूपलक्षणत्वस्य ममाप्यनभिलषितत्वाच्च । आनन्दत्वादेरपि धर्मत्वाच्च । आनन्दो लक्षणमिति चेत्तर्हि जगत्कारणं लक्षणमस्तु । कारणस्य सोपाधिकत्वेन निरुपाधि-कस्वरूपत्वाभावे आनन्दस्यापि तन्न स्यात् । त्वन्मते शुद्धे आनन्दत्व-जातेरभावेनानुकूलवेदनरूपस्य वा परमप्रेमास्पदस्य वा दुःखविरोधोपलक्षितस्वरूपस्य वा तस्य सोपाधिकत्वात् । एवं ज्ञानमप्यर्थप्रकाशात्मकत्वेन सोपाधिकमेव । भोजनस्य भोक्तृभोज्यसापेक्षत्ववज्ज्ञानस्य ज्ञातृज्ञेयसापेक्षत्वात् ।

प्रकाशिका – पञ्चमं निराह ॥ नापीति ॥ आनन्दकारणत्वयोः स्वरूपांतर्गतानन्तर्ग-तत्वात् स्वरूपतटस्थत्वे युक्ते इति भावः । अन्तर्गतपदार्थं द्वेधा विकल्प्य क्रमेण निराह ॥ अन्तर्गतेति ॥ तन्न स्यात् स्वरूपलक्षणत्वं नस्यादित्यर्थः । स्वरूपत्वे लक्षणत्वमेवायुक्त-मित्याह ॥ प्रसिद्धस्येति ॥ सिद्धान्ते तु सविशेषत्वेन न लक्ष्यमात्रत्वमिति भावेनाह ॥ कारणत्व इति ॥ आनन्दत्वादेरिति ॥ तथाच तस्यापि ताटस्थ्यं स्यादिति भावः ॥ तर्हीति ॥ ननु आनन्दस्य धर्मतया लक्षणत्वं युक्तम् । न तु कारणस्य । धर्मित्वादिति चेन्न । आनन्दस्य लक्ष्याभेदे धर्मत्वाभावात् । कारणस्य शक्तिरूपतया धर्मत्वाच्चेति भावः ॥ सोपाधिकत्वेनेति ॥ अनन्यथासिद्धत्वादिघटितरूपत्वाच्छक्तेरपि विषयनिरूप्यत्वाच्चेत्यर्थः। शुद्ध इति जात्यभावे हेतुगर्भम् । तस्य आनन्दस्येत्यर्थः । विवरणोक्तं ज्ञानस्य स्वरूपलक्षणत्वमपोहितुं सोपाधिकत्वमाह ॥ एवमिति ॥ तदेव व्यनक्ति ॥ भोजनस्येति ॥

(प्रकाशिका)

तथा सत्यत्वादिकमप्यात्यंतिकनिषेधाप्रतियोगित्वादिरूपतया सोपाधिकमेवेत्यपि ध्येयम् । ननु नित्यज्ञानस्य न ज्ञात्रादिसापेक्षत्वमिति चेत्तर्हि वेदवाचोऽपि वक्तृसापेक्षता न स्यात् । विस्तृतं चैतज्जडत्वहेतुभङ्ग इति भावः ।

पाण्डुरङ्गि – तन्न स्यादिति ॥ स्वरूपलक्षणत्वं नस्यादित्यर्थः । तदेव विशदयति ॥ त्वयेति ॥ ननु प्रसिद्ध्यप्रसिद्ध्योर्विरोधादेव न कारणत्वं स्वरूपलक्षणमित्यत आह ॥ कारणत्व इति ॥ लक्ष्याभिन्नत्वं न स्वरूपत्वम् । तथात्वे आनन्दत्वादेः स्वरूपलक्षणत्वाभावापातात् । तस्य धर्मत्वेन धर्मस्यात्यंतधर्म्यभिन्नत्वाभावादित्याह ॥ आनन्दत्वादेरिति ॥ यद्वा ननु कारणत्वस्य धर्मत्वान्न स्वरूपत्वमित्याह ॥ आनन्दत्वादेरपीति ॥ आनन्दस्यैव लक्षणत्वं भविष्यतीत्यत आह ॥ त्वन्मत इति ॥ शुद्ध इति हेतुगर्भम् ॥ आनन्दत्वजातेरभावेनेति ॥ अन्यथाऽखण्डत्वहानिः स्यादिति भावः । दुःखविरोधितेति पररीत्योक्तम् ।

तात्पर्यचन्द्रिका

एतेन यदुक्तं विवरणे विषयानवच्छिन्नमादित्यादिप्रकाशवदर्थप्रकाशनसमर्थं ज्ञानं स्वरूपलक्षणमिति तन्निरस्तम् । सामर्थ्यस्य शक्तिरूपत्वात् । विषयनिरूप्यत्वाच्च । जगज्जननादिसामर्थ्यस्यैव स्वरूपलक्षणत्वोपपत्तेश्च । स्वरूपप्रकाशत्वं नान्योपाधिकमिति चेन्न । स्वरूपस्य स्वावेद्यत्वात् । (स्व)व्यवहारयोग्यतायाश्च व्यवहारोपाधिकत्वात् । एतेन निरुपाधिकसोपाधिके स्वरूपतटस्थे इति निरस्तम् । प्रकृष्टप्रकाशत्वादेर्निकृष्टादिनिरूप्यतया मिथ्यार्थावभासत्वस्यापि मिथ्यार्थनिरूप्यतया तयोश्चन्द्राध्यासस्वरूपलक्षणत्वाभावापाताच्च । एतेन स्वयं व्यावर्तकं स्वरूपलक्षणम् । व्यावर्तकोपस्थापकं तु तटस्थम् । काकादिर्हि व्यावर्तकं संस्थानाद्युपस्थापयतीति निरस्तम् । त्वन्मते कारणत्वेनोपस्थाप्यव्यावर्तकांतराभावात् । स्वरूपमात्रस्य च जिज्ञासाधर्मित्वेन प्रागेवोपस्थितेः। एतेनैव कार्यान्वयिरूपं विशेषणं स्वरूपलक्षणम् । तदनन्वयिरूपोपलक्षणं तटस्थम् । आनन्दत्वादिकं हि तद्विजिज्ञासस्वेति वाक्यविहितजिज्ञासारूपकार्यान्वयि । तस्य मुमुक्षुज्ञेयत्वात् । न तु कारणतेति निरस्तम् । इतरव्यावृत्त्यर्थमानंदत्वादेरिव कारणत्वस्यापि जिज्ञास्यत्वात् । अन्यथा समन्वयाविरोधाध्याययोस्तद्व्युत्पादनं न स्यात् । न च ब्रह्मण्यानन्दत्वादेः कारणत्वादेश्चारोपि-

तत्वेऽविशिष्टेऽपि दुःखव्यावृत्तिरेव ज्ञेया नत्वकारणव्यावृत्तिरित्यत्र हेतुरस्ति । सुखस्वभावत्वादसुखव्यावृत्तौ कारणस्वभावत्वादकारणव्यावृत्तिरस्तु । ''देवस्यैष स्वभावोय''मित्यादिश्रुतेः। किंच जन्महेतुत्वेनैवोपलक्षणेनोपलक्ष्यज्ञानसिद्धेः स्थिति-हेतुत्वाद्युपलक्षणान्तरवैयर्थ्यम् । अस्मन्मतेतु जन्महेतुत्ववत्स्थितिहेतुत्वमपि मुमुक्षुणा ज्ञेयम् । नत्वन्यज्ञानोपक्षीणम् । तस्माद्ब्रह्मशब्दार्थगुणपूर्तिरूपस्वरूपलक्षणोपपादकं-

''शक्त्यः सर्वभावानामचिंत्यज्ञानगोचराः ।
यतोऽतो ब्रह्मणस्तास्तु सर्गाद्या भावशक्तयः ।''

इत्यादिवचनसिद्धं ''यतो येने''त्यादि कारकशक्तिवाचिपञ्चम्याद्युक्तजगज्जन्मा-दिसामर्थ्यमपि परमानन्दादिवद्यावल्लक्ष्यभाविरूपस्वरूपलक्षणमेव । वह्नेर्दाहशक्तिवत् । एष नित्यो महिमा स्वाभाविकी ज्ञानबलक्रियाचे''त्यादिश्रुतेः । किञ्च ।

असाधारणधर्मोहि लक्षणं परिकीर्त्यते ।
तच्च निर्धर्मकब्रह्मवादिनां युज्यते कथम् ॥ १ ॥

किञ्च —

स्वरूपं वा तटस्थं वा लक्षणं भेदकं मतम् ।
सजातीयाद्विजातीयात्तच्चाद्वैतिमते कथम् ॥ २ ॥
न च मिथ्याभेदसिध्यै मिथ्यालक्षणकीर्तनम् ।
मुमुक्षुं तत्वजिज्ञासुं प्रति शास्त्रेषु शोभते ॥ ३ ॥

न च कारणत्वे श्रुतेरतात्पर्यान्नाप्रामाण्यम् । तात्पर्यनिर्णायकैः सूत्रैः प्रत्यधि-करणं सदेवेत्यादिवाक्यं न प्रधानादिकारणत्वपरं किं तु ब्रह्मकारणत्वपरमि-त्युक्तेरिति ।

प्रकाशिका – विषयेति ॥ तथाच न सोपाधिकं ज्ञानमिति भावः ॥ शक्तीति ॥ तर्हि सैव लक्षणं न ज्ञानमिति भावः । अस्त्वित्यत आह ॥ विषयेति ॥ अर्थप्रकाशनशक्तिरिति विषयनिरूप्यत्वेन शक्तेरपि सोपाधिकत्वादित्यर्थः । किं स्वरूपावेदकप्रकाशत्वं स्वरूपव्य-

(प्रकाशिका)

वहारयोग्यत्वं वा न द्वयमपीत्याह ॥ स्वरूपस्येति ॥ षष्ठं निराह ॥ एतेनेति ॥ ज्ञानानन्दयोः सोपाधिकत्वकथनेनेत्यर्थः । दोषांतरमाह ॥ प्रकृष्टेति ॥ सप्तममनूद्य निरस्यति ॥ एतेनेति ॥ त्वन्मत इति ॥ तथाच कारणत्वं स्वरूपलक्षणं स्यादिति भावः ॥ प्रागेवेति ॥ कारणत्वज्ञानात्प्रागित्यर्थः । विशेषणादिस्वरूपं विवेचयन्नष्टमं निराह ॥ एतेनेति ॥ ज्ञेयत्वाज्ञेयत्वयोर्हेतुमाशङ्क्याह ॥ सुखेति ॥ व्यावृत्तिपदं ज्ञानपरम् । यद्वा ''विज्ञानमानन्दं ब्रह्मे''ति सामानाधिकरण्येन ब्रह्मणि सुखस्वरूपत्वादसुखव्यावृत्तिः सिध्यति न तु कारणत्वेनाकारणव्यावृत्तिः । येन तज्ज्ञानार्थं कारणत्वं ज्ञातव्यं स्यादित्यत आह ॥ सुखेति ॥ ब्रह्मणीति शेषः ॥ देवस्येति ॥ माण्डूके ''भोगार्थं सृष्टिरित्यन्य'' इति पूर्वप्रकृतसृष्टि-मयमिति परामृश्य एषः इच्छारूपः सर्गः देवस्य स्वभाव इत्युक्तेरिति भावः । इषु इच्छायामिति धातोर्भावे एष इति रूपम् । उपलक्षणत्वमङ्गीकृत्याप्याह ॥ किञ्चेति ॥

ज्ञेयमिति ॥ ब्रह्मणि प्रकारतयेति भावः । ''सृष्टिरक्षे''त्यादिप्रागुक्तस्मृतेरिति भावः ॥ तस्मादिति ॥ स्वरूपलक्षणमेवेत्यन्वयः । गुणपूर्तेरेव स्वरूपलक्षणत्वे किं कारणत्वेनेत्यत उक्तमुपपादकमिति ॥ तत्प्रकारः प्रागुक्तः । तर्हि तेनैवालं किं गुणपूर्त्येति चेन्न । ब्रह्मशब्दार्थतया तस्या एवादौ वाच्यत्वादिति भावः । सामर्थ्यरूपत्वे हेतुरित्यादिवचनेति ॥ तदर्थः प्रागुक्तः । किं तत्र तद्बोधकमित्यत उक्तं यत इति ॥ ''जनिकर्तुः प्रकृति''रिति विहितया यत इति पञ्चम्या ''कर्तृकरणयोस्तृतीये''ति कर्तरि विहितया येनेति तृतीयया कर्तृशक्तिरुच्यत इति ध्येयम् । जन्मादिकारणत्वं नाम जगज्जननपालनसंहारनियमनादि-शक्तिरित्युक्त्या फलोपधानस्याविवक्षितत्वात् पालनसंहरणादेरेकदा विरोध इति प्रत्युक्तम् । इदं कृत्स्नजननादिकमभिप्रेत्य । अन्यथा फलोपधानमपि सार्वकालिकमस्तीति ध्येयम् । दाहशक्तेर्यावल्लक्ष्यभावित्वं प्रत्यक्षसिद्धमित्यतोऽत्रापि श्रुतिसिद्धमित्याह ॥ एष नित्य इति ॥ काण्वश्रुतौ षष्ठे चतुर्थब्राह्मणे पूर्वं भगवतो महिमानमुक्त्वा ''तदेतदृचाभ्युक्त''मित्युदाहृते ''एषनित्यो महिमा ब्राह्मणस्य न कर्मणा वर्धते नोकनीया''निति मन्त्रे महिम्नो नित्यत्वोक्तेः ।

तथा ''परास्य शक्तिर्विविधैव श्रूयत'' इति साक्षाच्छक्तेः स्वाभाविकत्वश्रुतेरित्यर्थः । ज्ञानबलक्रियेति समाहारद्वन्द्वः । ''सनपुंसक''मिति क्लीबंतत्वं नाश्रितम् । यद्वा ज्ञानब-लाभ्यां सहिता क्रिया ज्ञानबलक्रियेति । आदिपदात् ''परेति यां प्राहुरजस्रशक्ति''-

मित्यादेर्ग्रहः । ''निर्गुणत्वं च तेनैव निषिद्धं प्रभुणा स्वय''मित्यनुव्याख्यानं हृदि कृत्वा ब्रह्मणो निर्धर्मकत्वमङ्गीकुर्वतां लक्षणसूत्रारम्भोऽयुक्त इत्याह ॥ किञ्चेति ॥ ''अतो जीवैक्यमपि स निराचक्रे जगद्गुरु''रित्यनुव्याख्यानं हृदि कृत्वा इतोपि न लक्षणसूत्रं युक्तमित्याह ॥ किं च स्वरूपं वेति ॥ यत्तु सुधायां ''एतत्सूत्रारम्भो जीवैक्यवादिनां स्यात्कथंचिद्यदीदं तटस्थं स्यात् । स्वरूपलक्षणमेवेति चोपपादित''मिति तटस्थव्यावर्तकत्वमुक्तं तत्त्वभ्युपेत्यवादेन । अत एवोत्तरत्र ''ननु तटस्थेनापि जगत्कारणत्वेन ब्रह्मणो जीवैक्यं निर्गुणत्वं च विरुध्यत'' इत्यादिना तस्य व्यावर्तकत्वमुपपाद्यत इति भावः । ''न च मिथ्यागुणत्वं स्यादनिर्वाच्यस्य दूषणा''दित्यनुव्याख्यानं हृदि निधायाह ॥ न च मिथ्येति ॥ येन लक्षणसूत्रारम्भः स्यात् । मिथ्यार्थकस्याप्रामाण्यादिति भावः । ''अनिर्वाच्यस्य दूषणा''दित्युपलक्षणमित्युक्तं भवति ।

पाण्डुरङ्गि – ज्ञानस्य सोपाधिकत्वेन निरुपाधिकब्रह्मस्वरूपत्वं न स्यादित्युक्तम् । तत्र विवरणोक्तं समाधानमनूद्य दूषयति ॥ एतेनेति ॥ शक्तिरूपत्वादिति ॥ शक्तेश्च सोपाधिकत्वादानंदादिवच्छुद्धाभेदानभ्युपगमादिति भावः । अर्थप्रकाशनसमर्थज्ञानस्य स्वरूपत्वं न युज्यते तस्यार्थनिरूप्यत्वादित्याह ॥ विषयेति ॥ स्वरूपप्रकाशत्वं नाम स्वविषयप्रकाशत्वं वा स्वव्यवहाराजननयोग्यत्वं वा । नाद्य इत्याह ॥ स्वरूपस्येति ॥ अन्यथा कर्तृकर्मविरोधापत्तेरिति भावः । नांत्य इत्याह ॥ स्वेति ॥ एतेनेति ॥ उक्तरीत्याऽऽनन्दादेः सोपाधिकत्वेनाव्याप्त्यापत्त्या कारणादेर्निरुपाधिकत्वेन तत्रातिव्याप्त्यापत्त्या चेत्यर्थः । प्रकृष्टप्रकाशत्वादेरित्यत्रादिपदेनाध्यासस्वरूपलक्षणस्य मिथ्यार्थावभासत्वस्य परिग्रहः । निकृष्टत्वादीत्यत्रादिपदेन मिथ्यार्थस्य परिग्रहः । कारणत्वेन किं स्वरूपमात्रत्वं वोपस्थाप्यं तदतिरिक्तं वा । न द्वितीय इत्याह ॥ व्यावर्तकेति ॥ नाद्य इत्याह ॥ स्वरूपमात्रस्येति ॥ ब्रह्मस्वरूपाज्ञाने धर्मिज्ञानाभावेन तन्मूलकसंशयासम्भवेन तन्मूलकजिज्ञासाया एवासम्भवेन जिज्ञासाप्रयोजकीभूतसंशयकारणीभूतधर्मिज्ञानत्वेन ब्रह्मज्ञानस्य पूर्वमेव सिद्धत्वेन तस्याप्युपस्थाप्यत्वानुपपत्तेरिति भावः । स्वरूपमात्रस्य व्यावर्तकत्वाभावाच्चेत्यपि बोध्यम् ॥ कार्येति ॥ कार्यान्वयवद्रूपं यद्विशेषणं तत्स्वरूपलक्षणं तदनन्वयिरूपं यदुपलक्षणं तत्तटस्थमित्यर्थः ॥ अन्यथेति ॥ कारणत्वस्याजिज्ञास्यत्व इत्यर्थः । नन्वानन्दो ब्रह्मेति व्यजानादित्यादिश्रुत्याऽऽनन्दादेर्ब्रह्मस्वरूपत्वेनासुखव्यावृत्तावपि कारणत्वस्य तत्स्वरूपत्वे प्रमाणाभावात्कारणत्वस्य न ब्रह्मस्वभावत्वं ततश्च नाकारणव्यावृत्तिरित्यतस्तत्र प्रमाणमाह ॥ देवस्यैष

इति ॥ ननु भवन्मतेऽपि वैयर्थ्यं तुल्यमेवेत्यत आह ॥ अस्मन्मत इति ॥ ननु कारणत्वस्य गुणपूर्तिरूपस्वरूपलक्षणोपपादकत्वमयुक्तं शक्तिसामर्थ्यापरपर्यायशब्दवाच्ये तस्मिन्मानाभावादित्यत आह ॥ इत्यादिवचनसिद्धमिति ॥ न चैतद्वचनं प्रतिबन्धकाभावपरतयाऽन्यथासिद्धमिति वाच्यम् । यतः सर्वभावानां बीजादिसर्वपदार्थानामचिंत्याः ज्ञानगोचराः चिंताविषयाः प्रत्यक्षरूपज्ञानाविषयाश्च अतः ब्रह्मणोपि ताः जगत्सर्जनादिविषयाः भावशक्तयः । अचिंत्यज्ञानगोचरा इत्यपि पाठः । तत्र नञ्र उभयत्रान्वयः । एकत्रान्वयेऽपि ज्ञानगोचरा इत्यस्य दिव्यदृष्टिगोचरा इत्यर्थः । नन्वत्र कारणत्ववाचकं किमस्तीत्यत आह ॥ यत इति ॥

ननु तथापि स्वरूपातिरिक्तशक्तिसद्भावे किं मानमित्यत आह ॥ एष नित्य इति ॥ न चानया श्रुत्या कथं स्वरूपातिरिक्तशक्तिलाभ इति वाच्यम् । ब्रह्मण इति षष्ठ्या स्वरूपातिरिक्तशक्तिसिद्धेर्न स्वरूपेणान्यथासिद्धिरिति भावः । नन्वेवमपि सहकारिपरत्वेनापि चरितार्थत्वान्नानया श्रुत्या शक्तिलाभ इत्यत आह ॥ स्वाभाविकीति ॥ तथाच ''न तस्य कार्यं करणं च विद्यत'' इति सहकारिनिषेधात् स्वाभाविकीत्युक्त्याच नागन्तुकसहकार्याद्यादायान्यथासिद्धिरिति भावः । एतच्च तर्कताण्डवे शक्तावर्थापत्तिपञ्चकनिरूपणग्रन्थे स्पष्टम् । यद्वा ननु सामर्थ्यस्य स्वरूपत्वस्यादृष्टत्वात्कथं जगज्जन्मादिसामर्थ्यस्य ब्रह्मस्वरूपत्वमित्यतस्तदृष्टान्तमाह ॥ वह्नेरिति ॥ ननु परमानन्दादेः स्वरूपत्वस्य प्रमाणेन सिद्धत्वात्तस्य स्वरूपलक्षणत्वेऽपि कारणत्वस्य तत्स्वरूपत्वे प्रमाणाभावात्कथं स्वाभाविकत्वमित्यत आह ॥ एष इति ॥ अनेन नित्यत्वमात्रसिद्धावपि न स्वरूपत्वमित्यतः स्वरूपत्वेऽपि प्रमाणमाह ॥ स्वाभाविकीति ॥ निर्धर्मिकब्रह्मवादिनस्तवमते असाधारणधर्मरूपलक्षणकथन- मयुक्तं चेत्याह ॥ किं चेति ॥ शास्त्रेष्विति ॥ यतो वेत्यादिष्वित्यर्थः । अन्यथा शास्त्रस्यातत्वावेदकत्वेनाप्रामाण्यापातादित्यर्थः । ननु तत्र तात्पर्याभावान्नाप्रामाण्यमिति शङ्कते ॥ न चेति ॥ सूत्रैरित्युक्तेरित्यन्वयः ।

तात्पर्यचन्द्रिका

केचित्तु यतोवेत्यादिवाक्येन प्रतिपन्नजन्मादिकारणत्वस्य ब्रह्मणः सकलेतरव्यावृत्तं स्वरूपं सत्यज्ञानादिवाक्येनाभिधीयते । न च कारणत्वेनैव लक्षणेन स्वेतरसर्वव्यावृत्तिसिद्धेः किं सत्यादिवाक्येनेति शङ्क्यम् । यथाहि घटस्य संस्थानविशेषादिना

स्वेतरसर्वव्यावृत्तत्वेपि गन्धवत्त्वात्पृथिवीजातीयत्वम् । एवं ब्रह्मणो जगत्कारणत्वेन स्वेतरव्यावृत्तत्वेपि जीवजडजातीयत्वमिति शङ्कायां यथाऽबादेर्गन्धाभावादपृथिवीत्वं तथा ब्रह्मणोपि सोपाधिकसत्त्वादेरभावान्न जीवजडजातीयत्वमिति दर्शयितुं निरुपाधिकसत्यत्वादिलक्षणोक्तेरित्याहुः ।

तन्न । संस्थानविशेषोहि घटं पटादिभ्य एव व्यावर्तयति । नतु पृथिवीमात्रात् । घटस्यापि पृथिवीत्वात् । एवं च संस्थानादिकं येभ्यः पटादिभ्यो व्यावर्तयति तद्विजातीयत्वमपि तेनैव सिद्धम् । अबादेरपि पृथिवीमात्रव्यावर्तकास्त्वादियोगादेव हि पृथिवीवैजात्यम् । यस्मात्तु पृथिवीजातीयात्संस्थानादिना वैजात्यं न सिध्यति तस्माद्व्यावर्तकत्वमपि संस्थानादेर्नास्ति । प्रकृते तु कारणत्वं जीवादिभ्यो ब्रह्म व्यावर्तयतीति कथं तेनाकारेणैभ्यो जीवादिभ्यो वैजात्यं तदन्तर्भावायोग्यत्वादिरूपं न सिध्येत् । तदनिष्ठजातियोगित्वं तु सत्यज्ञानत्वादिना लक्षणान्तरेणापि न सिध्यति । कारणत्ववन्निरुपाधिकसत्यत्वादेरप्यजातिरूपत्वात् । तस्मात्सत्यज्ञानत्वादिवत् कारणत्वमपि स्वेतरसर्वव्यावर्तकमिति । तदेतदभिप्रेत्योक्तमनुव्याख्याने-

"अस्योद्भवादिहेतुत्वं साक्षादेव स्वलक्षणम् ।
कृष्णध्यानच्छलेनैव स्वयं भागवतेऽब्रवी"दिति ।

टीकाक्षराथस्तु । भेदकाभावेन जिज्ञास्यता न सम्भवतीतीत्यत्रत्यस्येति शब्द-स्येति श्रुत्यादिसङ्गतिरिति पूर्वेणान्वयः । एवमुत्तरत्रापि द्रष्टव्यम् ॥ पर्यवर्तयदिति ॥ विपरिवर्तन इति धातोरिति भावः ॥ पञ्चाशन्मरुत इति ॥ एकोनपञ्चाशन्मरुतां मुख्यवायुना सह पञ्चाशत्त्वादिति भावः ॥ एकादशादित्या इति ॥ आदित्यानां द्वादशत्वेऽपि विष्णुव्यतिरिक्तानां नियम्यानामेकादशत्वादियमुक्तिः ।

तत्वप्रदीपेतु —

"आदित्या वसवो रुद्रा मरुतश्चाश्विनावपि ।
बृहस्पतिश्च कामश्च (मनु)मुनिर्दक्षो विनायकः ।

भृगुश्चैवानिरुद्धश्च धर्मो निर्ऋतिरेव च ।
कुबेरसहिता देवा नवतिः सम्प्रकीर्तिताः ।
अनन्तो गरुडो वायुश्चत्वारो ब्रह्मणा सह ।''

इति वचनानुसारेणेयं श्रुतिः प्रकारान्तरेण व्याख्याता । सृष्टिस्थितीत्यादि-भाष्यप्रयोजकव्यापारवाचिना सृष्ट्यादिशब्देन प्रयोज्यव्यापारो जन्मादिर्लक्ष्यते । लक्षणाप्रयोजनं ब्रह्मणः स्रष्टृत्वादिकमेव न तूपादानत्वमिति प्रदर्शनम् ॥ छ ॥ जन्माधिकरणं सम्पूर्णम् ॥ २ ॥

प्रकाशिका – यदुक्तं लक्षणमात्रं सजातीयविजातीयभेदकमिति तत्र सत्यत्वादिकमेव तथा न कारणत्वमिति यच्छ्रीभाष्यमतं तदनूद्य निरस्यति ॥ केचित्त्विति ॥ तन्मते सत्यत्वादिस्वरूपं प्रागेवोक्तम् । यथाभाष्यमनूद्य तत्र चोद्यपरिहारौ श्रुतप्रकाशोक्तावनुवदति ॥ नचेति ॥ कारणत्वेनेतरव्यावृत्तावपि नेतरवैजात्यं सिध्यति । तत्तु सत्यत्वादिनैवेति फलितार्थः । तत्र कारणत्वेनैवेतरव्यावृत्तिवद्वैजात्यमपि सिध्यतीति वक्तुं दृष्टान्तद्वयस्याप्युपपादनं विषयमित्याह ॥ संस्थानेति ॥ योगादेवेति ॥ न तु गन्धाभावादित्यर्थः । यद्यतो व्यावर्तकं तत्ततो वैजात्यापादकमित्येतत्संस्थानविशेषे प्रदर्श्ययद्यतो वैजात्यासम्पादकं तत्ततो व्यावर्तकमपि नेत्येतदपि तत्रैव व्युत्पादयति ॥ यस्मात्त्विति ॥ अनेन पराभिमतार्थे दृष्टान्तखण्डनव्याजेन यद्यतो व्यावर्तकं तत्ततो वैजात्यकरमिति स्वाभिमतव्याप्तिं दृष्टान्तस्थतयोपपाद्य दार्ष्टान्तिके योजयति ॥ प्रकृते त्विति ॥ तदेतदिति ॥ मतद्वयनिराकरणमपीत्यर्थः । अस्येति ॥ अस्य सर्वस्यापि विश्वस्योद्भवादिहेतुत्वं ब्रह्मणः स्वलक्षणमेवेति सूत्रकारो भागवते दशमस्कन्धेऽष्टसप्ततितमेऽध्याये ''यत्तत्परं ज्योतिरनन्यदद्वय''मित्यादिना स्पष्टमेव कृष्णध्यानव्याजेनाब्रवीदित्यर्थः । इतिशब्दस्यान्वयाप्रतीतेराह ॥ भेदकेति ॥ उत्तरत्रेति ॥ अधिकरणांतरेपीत्यर्थः । अवीविपदित्येतत्पर्यवर्तयदिति व्याख्यातम् । तत्राप्रसिद्धेः तत्वप्रदीपोक्तं धातुं पठति ॥ विपरिवर्तन इति ॥ विपइत्यस्माद्धातोर्णिचि ''णिश्रिद्रुस्रुभ्य'' इति चङि''चङी''ति द्विर्वचने ''दीर्घोलघो''रित्यभ्यासदीर्घत्वे अडागमादौ च सति रूपमित्यर्थः । एकोनपञ्चाशत्त्वप्रसिद्धेः कथं पञ्चाशत्त्वमित्यत आह ॥ एकोनेति ॥ चतुर्भिः साकमिति श्रुतेरर्थान्तरमपि बोध्यमिति भावेनाह ॥ तत्वप्रदीपेत्विति ॥ भगवन्निष्ठव्यापारस्यान्याधीनत्वप्रतीतेराह ॥ सृष्टीति ॥ इति जन्माधिकरणं सम्पूर्णम् ॥२॥

पाण्डुरङ्गि – ननु यद्यावर्तकं तदेव वैजात्यसम्पादकमित्यनुपपन्नम् । व्याप्त्यभावात् । अबादिगतसंस्थानविशेषस्य पृथिव्यादिव्यावर्तकत्वेपि तद्वैजात्यसम्पादकत्वाभावादित्यत आह ॥ अबादेरपीति ॥

तथाच अप्त्वादिजातेरेव व्यावर्तकत्वात्तस्या एव सिद्धिं प्रत्यपि प्रयोजकत्वसम्भवात्संस्थानविशेषस्य व्यावर्तकत्वान्न व्यभिचार इति यद्व्यावर्तकं तद्वैजात्यसम्पादकं भवत्येव यद्वैजात्यसम्पादकं न तद्व्यावर्तकमपि न भवतीति भावः । एतेन यथाहि घटस्य संस्थानविशेषादिना स्वेतरव्यावृत्तत्वेपि गन्धवत्त्वात्पृथिवीजातीयत्वमिति दृष्टान्तकथनमपि निरस्तम् । येनैव संस्थानविशेषेण घटस्य स्वेतरव्यावृत्तिसिद्धिस्तेनैव तद्वैजात्यस्य निषिद्धत्वात् । यदुक्तं सत्यज्ञानादिरूपाधिकलक्षणेन जीवादिवैजात्यं सिध्यतीति तत्र वैजात्यं नाम तदन्तर्भावायोग्यत्वं वा तदनिष्ठजातियोगित्वं वा । आद्यं दूषयति ॥ प्रकृतेत्विति ॥ द्वितीयं दूषयति ॥ तदनिष्ठजातियोगित्वं त्विति ॥ ननु सत्यज्ञानादिलक्षणकथनेन तदनिष्ठसत्यत्वादिजातियोगित्वं सिध्यतीत्यत आह ॥ कारणत्वादिवदिति ॥ धातोः धातुव्याख्यानादित्यर्थः ॥ तत्वप्रदीपेत्विति ॥ अत्र यद्यपि द्विनवतिसंख्याका देवाः प्रतीयंते तथापि अनन्तो गरुडो वायुरिति वायोः पृथग्ग्रहणेन मरुत्सु वायुपरित्यागेनाश्विनोरेकत्वविवक्षया च नवतित्वं द्रष्टव्यम् । अथवा मुनिरित्यपि बहुपाठदर्शनाद्दक्षविशेषणत्वेन मनुपरित्यागेनेत्यप्याहुः ॥छ॥ जन्माधिकरणं सम्पूर्णम् ॥

अथ शास्त्रयोनित्वाधिकरणम्

ॐ शास्त्रयोनित्वात् ॐ ॥ ३ ॥ उक्तस्य लक्षणस्यातिव्याप्तिनिरासाय प्रमाणमुच्यत इत्यनन्तरसङ्गतिः । नन्वेत''त्स्मृत्यनवकाशदोषे''ति स्मृत्यधिकरणेन पुनरुक्तम् । तत्रेवात्रापि सांख्यपाशुपतादिदुरागमानामपि निरासात् । न चेह कर्तृत्वादिकं विष्णोरन्यस्य वेति सन्देहः । तत्र तु विष्णोः कर्तृत्वादिकं युक्तमयुक्तं वेति ततो भेद इति वाच्यम् । एकेनैव सिद्धान्तेन सन्देहद्वयनिरासात् । सन्देहप्रकारभेदमात्रेण चाधिकरणभेदेऽतिप्रसङ्गात् । न च स्मृत्यनन्तर्गतयुक्तिविरोधपरिहारः तत्राप्यस्ति । एतेन तत्र समयविगानं सन्देहबीजं अत्र तु पूर्वन्यायप्रसिद्धी इति निरस्तम् । प्रसिद्धेरपि समयमूलत्वात् । नचात्रागमानामर्था-

न्निरासः । तत्र तु कण्ठत इत्येतावतैवापौनरुक्त्यम् । अनुमानस्यापि कारणे प्रामाण्यस्य कण्ठतो निषेधायाधिकरणांतरारम्भप्रसङ्गात् । न चेहानुमानस्यापि निरासान्न गतार्थतेति वाच्यम् । आगमांशे गतार्थत्वात् । अनेनाधिकरणेन तस्य गतार्थत्वापरिहाराच्च । न चात्र दृष्टफलेषु संवादेन प्रामाण्ये प्राप्ते दृष्टफलेष्वेव विसंवादेनाप्रामाण्यमिति सिद्धान्तः । तत्र तु सर्वज्ञत्वादिना प्रसिद्धप्रणीतत्वात्प्रामाण्ये प्राप्ते प्रबलस्मृत्यादिविरोधाद्विप्रलम्भमूलमप्रामाण्यमिति सिद्धान्त इति वाच्यम् । ''इतरेषां चानुपलब्धे''रिति सूत्रेण विसंवादस्य तत्रैवोक्तेः । नचोक्तसिद्धांतयोर्विनिमयादपौनरुक्त्यम् । अनुव्याख्यानविरोधात् । अत्र ह्यनुव्याख्यानं ''शैवाद्यागमसम्प्राप्तदृष्टगेन फलेनतु'' इति । तत्र तु ''आप्तैः प्रत्यक्षतो दृष्ट्वा'' इति ॥ न चेहानुमानमात्रनिरासादगतार्थतेति वाच्यम् । सौत्रशास्त्रपदेन दुरागमानामपि निरासात् । अस्मिन्नधिकरणेऽनुव्याख्याने,''तर्हि पाशुपतादिशास्त्रेण रुद्रादेः कारणत्वं स्या''दित्यादिटीकायां चागमावष्टंभेनापि पूर्वपक्षयित्वा तन्निरासाच्चेति ।

प्रकाशिका – ॐ शास्त्रयोनित्वात् ॐ ॥ सङ्गतिफले आह ॥ उक्तस्येति ॥ पूर्वोक्तमुपजीव्यास्य प्रवृत्तेरुपजीव्योपजीवकभावरूपा वा एतस्मिन्सति पूर्वप्रमेयसिद्धेर्हेतुहेतुमद्भावरूपा वा पूर्वोक्तमतिव्याप्तमित्याक्षिप्य समाधीयत इत्याक्षेपकीवेत्यर्थः । अतिव्याप्तिनिरासश्च फलमित्युक्तं भवति । अतिव्याप्तिप्रकारश्च वक्ष्यत इति भावः । इयं च टीकाया ''मन्यनिष्ठत्वनिरासा''दित्युक्त्या सूचिता सुधायां कण्ठोक्ताच । यत्तु न्यायविवरणटीकाया ''मतिव्यापकमित्यापाततः वस्तुतस्तु जीवविशेषे सम्भवान्नालौकिकं कल्पयितुमल''मित्यादिना विष्ण्वाख्यधर्म्यपलापेन पूर्वपक्षकरणं तत्तु पक्षांतरमभिप्रेत्येति ध्येयम् । अत एव तत्र पूर्वतनग्रन्थे ''साधारणं लक्षण''मित्यतिव्याप्तिरेव प्रदर्शितेति ध्येयम् । नन्वत्र कारणत्वं विष्णोरेव नान्यत्रेत्यत्र सूत्रेन किमपि प्रमाणमुच्यत इति चेन्न । जगत्कारणेऽनुमानं वा दुरागमोवा न मानं किं तु शास्त्रशब्दिताः सदागमा एव मानमित्युक्तौ विष्णुरेव जगत्कारणम् । न शिवादिरित्यतिव्याप्तिनिरासः फलिष्यतीति तात्पर्यात् । तथाच जगत्कारणे शास्त्ररूपं प्रमाणमुच्यत इत्यर्थः । स्मृत्यधिकरणेन द्वितीयाध्यायाद्याधिकरणेनेत्यर्थः । सन्देहभेदाद्वा तद्बीजभेदाद्वा निरसनीयभेदाद्वा पूर्वोत्तरपक्षन्यायभेदाद्वाऽपौनरुक्त्यमाशङ्क्याद्यं निराह ॥ न चेति ॥ इह तत्र टीकायां तथैव सन्देहोक्तेरिति भावः । एवमग्रेपि ध्येयम् ॥

एकेनेति ॥ विष्णोरेवेदं लक्षणमित्यत्रत्येनैकेन सिद्धांतेनातिव्याप्त्यसम्भवफलकपूर्व-पक्षप्रापकसन्देहद्वयस्यापि निरासस्सम्भवादित्यर्थः ॥ अतिप्रसङ्गादिति ॥ पूर्वनयेपि ब्रह्म-शब्दोक्तो जीवो विष्णुर्वेतिवद्विष्णौ युक्तो न वेत्यादिसन्देहसम्भवादित्यर्थः । युक्तिपादत्वात्तत्र युक्तिविरोधः परिहियत इत्यत आह ॥ न चेति ॥ स्मृतौ शिवादेः कारणत्वोक्तेरित्यादि-रूपाया युक्तेरत्रेव तत्रापि निरासादिति भावः । द्वितीयं प्रत्याह ॥ एतेनेति ॥ पूर्वन्यायेति ॥ पूर्वत्र कारणत्वस्य विष्णावुक्तत्वादिति भावः ॥ प्रसिद्धेरपीति ॥ अत्रापि तदेव बीजमिति भावः । तृतीयेपि निरसनीयः किमागम एवोतानुमानसमुच्चितोथानुमानमात्रम् । नाद्यः । आगमस्यात्रापि निरासादित्युक्तत्वात् । तत्र विशेषमाशंक्याह ॥ न चेति ॥ दुरागमा-नामित्यर्थः । कारणे शास्त्रं प्रमाणमित्युक्त्याऽर्थाद्दुरागमानां निरासः कृतः स्यात् । तत्र तु प्रबलवैष्णवस्मृतीनां निरवकाशतोक्त्या ''इतरेषां चानुपलब्धे''रित्यनेन विसंवादोक्त्या च कण्ठतो निरास इति भावः ॥ कण्ठत इति ॥ इह त्वर्थादिति भावः । ''कामाच्चे''ति ''तर्काप्रतिष्ठानादि''त्यत्र च तर्कस्याप्रामाण्यं कण्ठत उच्यत इति कारणे अधिकरणांतरेति चोक्तम् । तर्ह्यस्तु द्वितीयमित्याशङ्क्य निरस्यति ॥ न चेति ॥ तृतीयस्त्वग्रे निरसिष्यते ।

''शैवाद्यागमसम्प्राप्तदृष्टफलेन तु ।
तद्वाक्योपनयान्यच्च प्रमाणत्वेनुमीयते ।
ईशवाक्यत्वत इति चेत्तद्व्यभिचारिणा ।

अप्रामाण्यानुमा चस्या''दित्यत्रत्यमनुव्याख्यानं ''आप्तैः प्रत्यक्षतो दृष्ट्वे''त्यादि तत्रत्यं च हृदि कृत्वा चतुर्थमाशङ्क्य निराह ॥ न चेति । तथाच विसंवादविप्रलम्भ-मूलत्वादिरूपन्यायभेदाद्भेद इति भावः । ननु तर्हि विसंवादस्तत्र व्युत्पाद्योऽत्र तु विप्रलम्भमूलत्वम् । तावतापि न्यायभेदाद्भेदोऽस्तु । अत एवात्र भाष्यम् ।''अतोऽन्यो ग्रन्थविस्तारो नैवशास्त्रं कुवर्त्मत''दित्यादीत्याशङ्क्य निराह ॥ न चेति ॥ संवादेन प्रामाण्यमिति प्राप्ते विसंवादेनाप्रामाण्यमित्येतदत्रैवानुव्याख्याने प्रतीयते तत्रत्वाप्तैरिति पूर्वपक्षानुव्याख्याने ''इति चेद्यद्यशेषज्ञा रुद्राद्याहरिपूर्वकाः । किं नाशेषविद'' इति सिद्धांतानुव्याख्याने च विचार्यमाणे सर्वज्ञत्वात्प्रामाण्यं बलवद्विरोधादप्रामाण्यमित्येव प्रतीयत इति न विनिमयादपौनरुक्त्यमित्यर्थः । तथाच न्यायभेदोऽसिद्ध इति भावः । ननु ''अनुमानतोन्ये न कल्पनीया'' इत्यत्रत्यभाष्यानुरोधादनुमानमेवेह निरस्यते इति

(प्रकाशिका)

प्रागुक्ततृतीयमाशङ्क्याह ॥ न चेति ॥ सौत्रेति ॥ अनुमानस्य दुरागमानां च निरासाय शास्त्रपदम् । तस्याशास्त्रमात्रव्युदासकत्वादिति भावः ।

पाण्डुरङ्गि – ॐ शास्त्रयोनित्वात् ॐ ॥ सङ्गतिरिति ॥ आक्षेपिकीत्यर्थः । एतदिति ॥ अधिकरणमित्यर्थः । नन्वत्रानुमानेन लक्षणस्याप्यतिव्याप्तिमाशंक्य निराक्रियते तत्रागमेन तथाच कथं तयोः पौनरुक्त्यमित्यत आह ॥ तत्रेवेति ॥ सन्देहप्रकारभेदेनाधिकरणभेद इत्यत आह ॥ सन्देहेति ॥ एवं जिज्ञासाधिकरणेपि ब्रह्मजिज्ञास्यं नवा ब्रह्मजिज्ञासा कर्तव्या नवेति सन्देहप्रकारभेदस्य वक्तुं शक्यत्वेन जिज्ञासाधिकरणान्यपि अनेकानि स्युरित्यति-प्रसङ्गादित्यर्थः । ननु ऋगादिशास्त्रैकसमधिगम्यत्वात्कारणत्वस्य तदन्यदुरागमानां न कारणत्वे प्रामाण्यमित्येतदधिकरणसिद्धांतेन दुरागमादिना रुद्रादेः कारणत्वमित्येतदधिकर-णीयसन्देहनिरासेपि कारणत्वं युक्तमयुक्तं वेति सन्देहनिरासाभावात्कथमेकेनैव सिद्धांतेन सन्देहद्वयनिरास इत्यतः स्यादेतदेवं यदि तत्र स्मृत्यनन्तर्गतयुक्तिविरोधः परिहृतः स्यात् । नचैवं तासामपि युक्तीनां स्मृत्युक्तत्वे स्मृतीनामप्रामाण्ये तदुक्तयुक्तीनामप्रामाण्यात् स्मृतीनामप्रामाण्यप्रतिपादकेनानेन युक्तः सन्देहद्वयनिरास इत्याह ॥ नच स्मृत्यनन्तर्गतेति ॥ ननु सन्देहबीजभेदाद्भेद इत्यत आह ॥ एतेनेति ॥ प्रसिद्धरिति ॥ तथाच तस्य न भेदकत्वमिति भावः । तर्ह्यागमानां कण्ठतो निरासार्थं स्मृत्यधिकरणवदनुमानस्य कण्ठतो निरासायाधिकरणान्तरमपि क्रियेतेत्याह ॥ अनुमानस्यापीति ॥ आगमांश इति ॥ तेनास्येति शेषः ॥ अनेनेति ॥ स्मृत्यधिकरणापेक्षयाधिकविषयत्वेन तेनास्य पौनरुक्त्या-भावेपि एतदपेक्षया तस्याधिकविषयत्वाभावेनैतेनाधिकरणेन तस्य पौनरुक्त्यं स्यादित्यर्थः ॥ विनिमयादिति ॥ स्मृत्यधिकरणे दृष्टफलेषु संवादेन प्रामाण्ये प्राप्ते दृष्टफलेष्वेव विसंवादप्रदर्शनेनाप्रामाण्यमिति सिद्धान्तः । शास्त्रयोनित्वाधिकरणे सर्वज्ञत्वादिना प्रसिद्ध-प्रणीतत्वात्प्रामाण्यमिति प्राप्ते प्रबलस्मृत्या विरोधात् विप्रलम्भमूलकमप्रामाण्यमिति सिद्धान्त इति विनिमयादित्यर्थः । ननु सौत्रशास्त्रपदेनानुमानभेद विवक्ष्यत इत्यत आह ॥ अस्मिन्निति ॥ अन्यथा टीकानुव्याख्यानविरोधः स्यादिति भावः ।

तात्पर्यचन्द्रिका

उच्यते । तत्र पाशुपतादिस्मृत्या पूर्वपक्षे पञ्चरात्रादिस्मृत्या सिद्धान्तः । अत्र तु स्मृत्यनुमानाभ्यां पूर्वपक्षे श्रुत्यादिरूपेण शास्त्रेण । अत एव तत्र सूत्रे नान्यस्मृतीति

स्मृतिशब्दः । अत्र तु शास्त्रशब्दः । न च तर्हीह श्रुत्यादिना सिद्धांतिते पुनस्तत्र स्मृतिमात्रेण पूर्वपक्षानुदय इति शङ्क्यम् । गुणहीनायाः पिपीलिकालिपिनिभायाः श्रुतेर्गुणवत्या पाशुपतादिस्मृत्या विरोधेनान्यपरत्वे वाच्ये श्रुतिमूलपञ्चरात्रादि-स्मृतेरप्यन्यपरत्वं पाशुपतादेस्तु शिवादिप्रत्यक्षमूलत्वमिति तत्र पूर्वपक्षे प्राप्ते तिष्ठंतु तावत् श्रुतयः विष्ण्वादिप्रत्यक्षमूलाभिः पञ्चरात्रादिस्मृतिभिर्विवक्षितार्थ- सिद्धेरिति सिद्धांतोपपत्तेः ।

प्रकाशिका – चतुर्धा समाधास्यन् पूर्वोत्तरपक्षप्रापकहेतुभेदाद्भेद इति त्रेधा समाधातुमादौ सूत्रपदसूचितसमाधीनाह ॥ तत्रेति ॥ स्मृत्यधिकरण इत्यर्थः । आदिपदेन बौद्धार्हतादि । पञ्चरात्रादीति पुराणभारतादि ग्राह्यम् । ''स्मृत्यनुमानाभ्या''मिति भाष्येऽनुमानपदं स्मृतेः अनुव्याख्याने चागमपदमनुमानस्योपलक्षणमिति भावः ॥ श्रुत्यादीति ॥ श्रुतिस्मृतिरूपेणेत्यर्थः । शास्त्रपदस्योभयार्थत्वात् । अत एव भाष्ये ''ऋग्यजुःसामाथर्वाश्च भारतं पञ्चरात्रक''मित्यादिना स्मृतयश्चोपात्ता इति भावः ॥ गुणेति ॥ आप्तोक्तत्वगुणहीनाया इत्यर्थः । अत एव पिपीलिकालिपिनिभाया इति । वक्ष्यते चानुव्याख्याने -

''आप्तैः प्रत्यक्षतो दृष्ट्वा प्रोक्तमर्थं कथं श्रुतिः ।
पिपीलिकालिपिनिभा वारयेत्सर्वगा हि ते'' । इति । तथाच
''दुर्बलस्य प्रमाणस्य बलवानाश्रयो यदा ।
तदापि विपरीतत्वं शिष्टाकोपे यथोदितं'' ॥

इतिन्यायेन स्मृतेरपि बाधकत्वमिति भावः । ननु समन्वयनये पाशुपतादिस्मृत्या न वेदस्यार्थनिर्णयोपि तूपक्रमादिभिरेवेति निर्णीतत्वात्कथं स्मृत्या श्रुतेरन्यार्थत्ववर्णनेन पूर्वपक्ष इति चेन्न । स्मृतेः प्रत्यक्षमूलत्वेन प्रबलतया तद्विरोधेन निर्मूलश्रुतिप्रामाण्यायोगात् स्मृत्यनुसारेण श्रौतोपक्रमादिकं नेयम् । वक्ष्यते च तत्रैवमेवेत्याशयात् ।

पाण्डुरङ्गि – अधिकरणद्वयेपि सिद्धांतभेदान्न पौनरुक्त्यमित्याह ॥ उच्यत इति ॥ अधिकरणसिद्धांतहेतुभेद इत्यत्र ज्ञापकमाह ॥ अत एवेति ॥ सिद्धांतहेतुभेदो यतोऽत एवेत्यर्थः । ननु तर्हि श्रुतेः प्रबलत्वात्स्मृतेश्च दुर्बलत्वात्प्रबलप्रमाणेन सिद्धांतिते दुर्बलप्रमाणेन पूर्वपक्षो नोदेतीत्याशङ्क्य निषेधति ॥ न च तर्हीति ॥ उपलक्षणमेतत्

(पाण्डुरङ्गि)

सिद्धांतेपि स्मृत्यादेः सत्त्वेन पाशुपतादिमात्रेण न पूर्वपक्ष इत्यपि द्रष्टव्यम् । ननु पाशुपतादिस्मृत्यादेरपि श्रुतिमूलत्वादन्यपरत्वं स्यादत आह ॥ पाशुपतादेस्त्विति ॥ ननु श्रुतिपरित्यागेन स्मृतिभिः सिद्धांतकरणे ''पिपीलिकालिपिनिभे''त्यादि पूर्वपक्ष्युक्तं सिद्धांतिनोऽनुमतमिति स्यादित्यत आह ॥ तिष्ठंत्विति ॥ स्मृतिमात्रेण यदाऽभिमतार्थ-सिद्धिस्तदा किमु वक्तव्यं श्रुतिभिरिति तावच्छब्दार्थः ।

तात्पर्यचन्द्रिका

यद्वा अत्रानुमानेन पूर्वपक्षे तदयोग्यत्वेन सिद्धांतः । तत्र तु शैवाद्यागमेन पूर्वपक्षे तदप्रामाण्येन सिद्धांत इति भेदः । अत एवात्रा''नुमानत'' इति भाष्यं तत्रतु ''तेषां वचनविरोध'' इति ॥ यत्त्वनुव्याख्याने स्मृत्यधिकरणप्रमेयमिह शिष्यहिताय व्यवहृतं तदत्र शास्त्रपदेनानुमानस्य जगत्कारणतायामप्रामाण्ये दृष्टान्तीकृतस्य दुरागमस्याप्रामाण्यमुपपादयितुम् । अनेनैवाभिप्रायेणात्रभाष्ये ऋगादिकं शास्त्रं न तु शैवादिकमित्युक्तम् । अथवा तत्र दृष्टफलेषु संवादादिना प्रामाण्ये प्राप्तेऽतिहेयत्व-व्युत्पादनाय दृष्टफलेष्वेव बहुलं विसंवादादिनाऽप्रामाण्यं क्वचित्क्वचित्संवादस्तु काकतालीय इत्यागममात्रासाधारणन्यायव्युत्पादनम् । इह तु दृष्टफलेष्वंगीकृत्य प्रामाण्यमन्यत्र प्रामाण्यं चेत्कारणत्वेपि प्रामाण्यमिति प्राप्ते ''नावेदवि''दित्यादि श्रुतेः कारणत्वेन मानमित्यनुमानागमसाधारणन्यायव्युत्पादनम् । अत एवात्र ''कारणत्वस्य शास्त्रैकगम्यत्वा''दिति टीका । तत्र तु ''अवैदिकस्मृतीनामप्रमाण-त्वा''दिति ।

यद्वा अत्र विष्णोरन्येषां च कारणत्वमिति समुच्चयेन लक्षणस्यातिव्याप्त्या पूर्वपक्षे विष्णोरेवेत्यवधारणेन सिद्धांतः । तत्र तु विष्णोः कारणत्वं नेत्यसम्भवेन पूर्वपक्षेऽस्तीति सिद्धांतः । अत एवात्र टीकायां ''विष्णोरिवान्यस्याप्यस्ति नवे''ति सन्देहः । ''कारणत्वस्य भगवदेकनिष्ठत्वाभावा''दिति पूर्वपक्षोपसंहारश्च ॥ तत्र तु ''युक्तं नवे''त्येव सन्देहः । ''न विष्णोः कारणत्वं सिध्यती''ति पूर्वपक्षोप-संहारश्च । सुधाप्यत्र ''अतिव्याप्तिमाशङ्क्ये''ति तत्र तु ''शिवप्रभृतीनामेव कारणत्व''मिति । न्यायविवरणं चात्र ''न च रुद्रादौ सममेतल्लक्षण''मिति ।

प्रकाशिका – यद्वेति ॥ अस्मिन्पक्षे भाष्यं नोपलक्षणत्वेन व्याख्येयमिति भावः ॥ यत्त्विति ॥ तथाच तदधिकरणप्रमेयमेवेह दर्शितम् । नत्वेतदधिकरणार्थत्वेनेत्युक्तं भवति । कथमनेन शिष्यहिततेत्यतो दृष्टांतोपपादनेनेत्याह ॥ तदिति ॥ शास्त्रपदेनानुमानदुरागमयोरप्रामाण्यं भाति । अनुमानमात्राप्रामाण्ये शब्दयोनित्वादित्येव ब्रूयात् । तत्र च दुरागमाप्रामाण्यं स्मृत्यधिकरणसिद्धमिह शास्त्रपदेन सूच्यमानं सिद्धं साध्यतयोपकल्प्यत इत्यनुमानाप्रामाण्ये दृष्टांतत्वेनोपयुज्यते । तदनुपपादने चोक्तोर्थो न शिष्यहृद्यारोहत इति तद्वर्णनं शिष्यहितकरमिति भावः । अनेन सौत्रशास्त्रपदप्रयोगस्यापि गतिरुक्ता भवति । अनेनैवेति ॥ दृष्टान्ताभिप्रायेणेत्यर्थः ॥ भाष्य इति ॥ ''ऋग्यजुःसामाथर्वाश्चे''ति भाष्य इत्यर्थः । यत्तु सुधायामागमानुमानाभ्यां पूर्वपक्षकरणं तत्तु पक्षांतरमभिप्रेत्येति भावः । अस्मिन्पक्षे भाष्यानुभाष्यावतारिकाप्येवमेव दातव्येति भावः । इदानीं ''पाशुपतादिशास्त्रेण रुद्रादेः कारणत्वं स्या''दिति टीकावाक्यस्य सुधायां च ''पूर्वपक्षमारचयति शैवादी''त्युपक्रमस्य ''एवमागमादनुमानाच्चान्येषां जगज्जन्मादिकारणत्व''मित्युपसंहारादेश्च स्वारस्यानुरोधेन पक्षांतरमाह ॥ अथवेति ॥ अन्यत्रेति ॥ दृष्टफल इत्यर्थः । कारणत्वे मानं नेति पदच्छेदः । उभयत्र सुधायां तथोपलम्भेपि टीकायामनुपलम्भादाह ॥ अत एवेति ॥ शास्त्रैकेत्येकपदेनानुमानदुरागमयोर्व्यावर्त्यत्वादिति भावः । अस्मिन्पक्षे प्रत्यक्षस्यापि व्यावर्त्यत्वप्रतीतावपि तस्य जगत्कारणेऽप्रसक्तेर्न तेनेह पूर्वपक्षः कृतः । एवं च दुरागममात्रनिरासको न्यायस्तत्र अत्र तु दुरागमानुमाननिरासक इति न्यायभेदाद्भेद इत्युक्तं भवति। फलभेदाद्भेदमाह ॥ यद्वेति ॥ न च रुद्रादौ सममिति ॥ साधारणमित्यर्थः । तत्राद्यतृतीयचतुर्थेषु स्मृत्यनुमानाभ्यां पूर्वपक्षोभिप्रेत इति टीकाद्वयस्वारस्यं भाष्यानुव्याख्यानयोरुपलक्षणत्वकल्पनमेकं द्वितीये तु नोपलक्षकत्वकल्पनमिति भाष्यस्थानुमानपदस्वारस्यमिति ज्ञेयम् । नन्वंत्यपक्षे तत्रत्येन सिद्धान्तेन विष्णौ कारणत्वसत्त्वमात्रापादकेनात्रत्यपूर्वपक्षानिरासेपि अत्रत्येन तत्रत्यपूर्वपक्षनिरासस्सम्भवात्किं तेनेति चेन्न । तेन कारणत्वसत्त्वप्रसिद्धावेव विष्णोरेवान्यस्यापि वेति विचारावसरात् । भावार्थनयेन स्वर्गकामनयस्येवानेन तस्यावैयर्थ्यात् । दुरागमस्यास्रोक्तत्वेनाप्रामाण्यासम्भवात्प्रामाण्ये वाच्ये वेदप्रामाण्यापेक्षयाऽऽगमप्रामाण्यस्य बलवत्तया पूर्वपक्षे तन्निरासार्थत्वेन च सार्थक्यादिति ॥

पाण्डुरङ्गि – ननु शास्त्रयोनित्वाधिकरणे स्मृत्यनुमानाभ्यां पूर्वपक्ष इत्युक्तमयुक्तम् । तथासति ''अनुमानतोऽन्ये न कल्पनीया'' इति भाष्येण ''अनुमानेन रुद्रादेरपि कारणता

(पाण्डुरङ्गि)

साधनसौलभ्यात्'' इति टीकयाच विरोधः स्यात् । तदनुसारेणात्रानुमानमात्रनिरासकत्वस्यैव प्रतीयमानत्वादित्यस्वरसादाह ॥ यद्वेति ॥ तर्हि दुरागमप्रामाण्यव्युत्पादनपरमेतदधिकरणस्थमनुव्याख्यानमयुक्तमित्यत आह ॥ यत्त्विति ॥ अनेनैवेति ॥ अनुमानस्य जगत्कारणतायामप्रामाण्ये दृष्टान्तीकृतदुरागमाप्रामाण्योपपादनाभिप्रायेणैवेत्यर्थः । नन्वेतदयुक्तम् । तथासत्येतदधिकरणीयभाष्यटीकानुव्याख्यानसुधाविरोधः । तत्र दुरागमनिरासकत्वस्य स्पष्टं प्रतीयमानत्वात् । अन्यथा तु गौणत्वापत्तेः । किञ्च अनुमानमात्रनिरासे शास्त्रागम्यत्वादित्येव वक्तव्यम् । एकपदास्वारस्यं च टीकायां स्यात् । अपि च शास्त्रपदेनानुमानवद्दुरागमस्यापि निरासप्रतीतेर्नानुमानमात्रनिरासपरं सूत्रमित्यस्वरसादाह ॥ अथवेति ॥ तथाच साधारणासाधारणन्यायभेदव्युत्पादकत्वादधिकरणद्वयस्य न पौनरुक्त्यमिति भावः । स्मृत्यधिकरणे आगममात्रसाधारणन्यायव्युत्पादनं अत्र पुनरनुमानागमसाधारणन्यायव्युत्पादनमिति प्रमाणद्वारकप्रमेयभेदेनाधिकरणयोर्भेद उक्तः । इदानीं साक्षात्प्रमेयभेदेनैव भेदमुपपादयितुमाह ॥ यद्वेति ॥

तात्पर्यचन्द्रिका

यद्यप्यागमप्रामाण्यवादिनेहाप्यसम्भवो वक्तुं शक्यः । तथापि वक्ष्यमाणे श्रुतेः स्वतःप्रामाण्यविष्णुपरत्वे समबलतां चोपेत्य कालादिभेदेनाविरुद्धं द्वयोः कर्तृत्वं श्रुत्यादौ ''स इदं सर्वमसृजते''ति विष्ण्वादेः सर्वकारणत्वोक्तिस्तु तत्तत्कालसृज्याभिप्राया सर्वस्रष्टृत्वयोग्यताभिप्राया वा । त्वन्मतेप्यागामिन्यसृजतेत्यादिनिर्देशायोगात् । श्रुतौ शिवस्यागमे च विष्णोः कारणतानिषेधस्तु यथोदितहोमादिनिंदाऽनुदितहोमादिस्तुतिपरा । तथा विष्ण्वादेः कारणताविधिपर इति प्राप्ते प्रमाणत्वेनाङ्गीकृतश्रुतिपरिगृहीतया ''ऋग्यजु''रित्यादिभाष्योदाहृतया स्मृत्यैव दुरागमाप्रामाण्यमिति सिद्धान्तः । तत्र तु स्वप्रयोजकगुणप्रयुक्तस्य प्रामाण्यस्य मुख्यत्वादप्रामाण्यप्रयोजकदोषाभावप्रयुक्तस्य तु जघन्यत्वादागमविरोधे श्रुतेस्तद्गृहीतस्मृतेश्च न स्वार्थपरत्वं किं तु विस्पष्टागमानुसारेणास्पष्टश्रुत्यादिनेयमिति प्राप्ते प्रामाण्यस्य स्वतस्त्वेन सिद्धान्तः ।

प्रकाशिका – यद्यपीति ॥ पाशुपताद्यागमानां परमाप्तसर्वज्ञपशुपत्यादिप्रणीतत्वेन प्रमाणत्वात्तत्र रुद्रादेरेव कारणत्वोक्तेः न विष्णोः कारणत्वमिति वा प्रागुक्तन्याय-विवरणटीकोक्तरीत्या वा पूर्वपक्षयितुं शक्यत इत्यर्थः ॥ वक्ष्यमाणे इति ॥ ''न विलक्षण-त्वा''दित्यत्र स्वतः प्रामाण्यं ''तत्तु समन्वया''दित्यादौ विष्णुपरत्वं च वक्ष्यमाण-मुपेत्येत्यर्थः । समबलतां पाशुपतादिना श्रुत्यागमयोः ॥ तत्तत्कालेति ॥ यथा ''सर्वेभ्यः कामेभ्यो दर्शपूर्णमासा'' वित्यत्र सर्वशब्दो योग्यसर्वकामपरस्तथेति भावः । सङ्कोचापत्तेराह ॥ सर्वेति ॥ त्वन्मत इति ॥ असङ्कुचितसर्वस्रष्टृत्ववादिमत इत्यर्थः । लङो भूतार्थत्वादिति भावः ॥

यथोदितेत्यादि ॥ द्वितीये ''नामरूपविशेषनिन्दाशक्तिसमाप्तिवचनप्रायश्चित्तान्यार्थ-दर्शनाच्छाखांतरे कर्मभेदः स्या''दित्यंतमाधिकरणे अनेकशाखास्वाम्नातमग्निहोत्रादिकं भिन्नमभिन्नं वेति विशये नामरूपादिभेदात् ''प्रातः प्रातरनृतं ते वदंति पुरोदयाच्च जुह्वति येग्निहोत्रम् । दिवा कीर्त्यमदिवा कीर्तयंतः सूर्यो ज्योतिर्नतदाज्योतिरेषा''मिति ''यथाऽतिथये प्रद्रुतायान्नं हरेयुस्तादृक्तद्यदुदिते जुहोतीति च शाखाभेदेनोदितानु-दितहोमनिंदाश्रवणाच्च भिन्नमिति प्राप्ते एकस्यां विहितस्य कर्मणः शाखांतरे पुरुषांतरं प्रति विधिसम्भवान्निंदायाश्च न हि निंदाऽनिंद्यं निन्दितुं प्रवर्तते । अपि तु विधेयं स्तोतुमिति तत्तच्छाखाविहितकर्मस्तुतिपरत्वेनोपपत्तेर्न कर्मभेद इति सिद्धांतितं ''एकत्वेपि पराणी''ति सिद्धांतसूत्रे । तथाच तत्र यथेतरनिन्दा तत्तद्विधेयस्तुतिपरा तथेहापीत्यर्थः । तथाच पूर्वसूत्रेऽस्येत्यस्य विष्णुसृज्यप्रपञ्चमात्रपरताया वाच्यत्वेन कतिपयपदार्थमात्रकर्तृत्वस्य शिवादावपि सत्त्वाल्लक्षणमतिव्याप्तमिति वा वक्ष्यमाणदिशा सर्वकर्तृत्वेऽसम्भव इति वा पूर्वपक्ष्याशय इति भावः । एतेन ''तर्हि पाशुपतादिशास्त्रेण रुद्रादेः कारणत्वं स्या''दिति टीका आगमावष्टंभपूर्वपक्षसुधा चैवमेव वर्णनीयेत्युक्तं भवति । यदत्राह कश्चित् ''सदेव सोम्ये''त्यादिकारणवाक्यस्थावधारणेन कर्त्रंतरव्यवच्छेदात् ''एकमेवाद्वितीयं द्यावाभूमी जनयन्देव एक'' इत्यादावेकत्वोक्त्या नानाकर्तृकत्वस्य जगतो निषेधान्न कालादिभेदेनानेक-कर्तृत्वपूर्वपक्षो युक्त इति तन्न । तस्य श्रौतविष्णुकारणतामात्रपरत्वेन वा तत्कर्तृकसृष्टिदशायां कर्त्रंतरनिरासपरत्वेन वोपपत्तेः । अन्यथा निरवकाशस्मृतिप्रामाण्यविरोधादिति ॥ श्रुतीति ॥ श्रुतिसमानार्थकत्वात्तत्परिगृहीतत्वम् । श्रुतौ हि ''न ब्रह्मा न च शङ्कर'' इति ''नावेदवि''दित्यादिना शिवादिकारणत्वं तच्छास्त्रप्रामाण्यं च निरस्यत इति भावः । इदं च

(प्रकाशिका)

स्मृतित्वाविशेषात्कथमनया शैवस्मृतेरप्रामाण्यमिति शङ्कापनोदाय प्राबल्यार्थम् । ननु वेदस्य तुल्यबलतां मन्वानः कथं तदनुगृहीतस्मृतेः प्राबल्यमुपेयादिति चेदनेकत्वप्रयुक्तप्राबल्ये तात्पर्यात् । यद्वा अस्याः स्मृतेरप्रामाण्यशङ्कापनोदाय ''इतिहासपुराणः पञ्चमो वेदानां वेद'' इति पञ्चमवेदत्वेन श्रुतिपरिगृहीतत्वमुक्तम् । तथाच तुल्यबलत्वेपि तदुक्तार्थस्य ग्राह्यत्वात्तत्र च दुरागमाप्रामाण्यस्योक्तत्वान्न तेन रुद्रादेः कारणत्वमिति भावः । ननु न हि निन्देति न्यायात्प्रागुक्तदिशाऽस्यापि वचनस्य ऋगादिप्रामाण्यविधिपरत्वं न त्वागमाप्रामाण्यपरत्वमिति चेन्न । कल्पकाभावात् । उदितहोमादौ तु द्वयोरपि विहितत्वेनैकस्यापि बाधायोगात्तथाकल्पनम् । न चागमप्रामाण्यमेव कल्पकं तस्य हेतुदर्शनादिति जैमिनिसूत्रोक्तन्यायेन विप्रलम्भमूलत्वेनाप्युपपत्तेः । न चैतद्वचनवदागमः श्रुत्यनुगृहीतः । प्रत्युत तद्विरुद्धः । एतदप्याह ॥ श्रुतिपरिगृहीतयेति ॥ एवमागमाप्रामाण्येन सिद्धांते कथं तत्र तेन पूर्वपक्ष इत्यत आह ॥ तत्रत्विति ॥ अत्रोक्तमागमाप्रामाण्यमयुक्तम् । आप्तोक्तत्वादिति तत्प्रामाण्यमुपेत्य तत्प्रामाण्यस्य बलवत्त्वेन पूर्वपक्ष इत्यर्थः ॥ दोषाभावेति ॥ श्रुत्यादेः प्रामाण्यस्येति योज्यम् । स्मृतेः ऋग्यजुरित्यादिस्मृतेः । यद्वा पञ्चरात्रादिस्मृतेश्चेत्यर्थः । तथाचागमानुसारेण श्रुत्यादेर्नयने रुद्रादेरेव कारणत्वं प्राप्तं न विष्णोरित्यसम्भवो लक्षणस्येति पूर्वपक्ष्याशय इति भावः ॥

पाण्डुरङ्गि – ननु समुच्चयेन लक्षणस्यातिव्याप्त्या पूर्वपक्षकरणमयुक्तं पूर्वपक्षिणा शैवाद्यागमप्रामाण्याङ्गीकारेण तत्र विष्णोः कारणत्वनिषेधेना- सम्भवस्यैव वक्तुं शक्यत्वादित्यभिप्रायेण शङ्कते ॥ यद्यपीति ॥ ''वक्ष्यमाणे श्रुतेः स्वतः प्रामाण्य-विष्णुपरत्वे'' इति द्वितीयाद्विवचनम् । वक्ष्यमाणं यत् श्रुतेः स्वतः प्रामाण्यं तच्चाभ्युपेत्येति सम्बन्धः । तथाच पूर्वपक्षिणा श्रुतिप्रामाण्याङ्गीकारादेशकालव्यवस्थयाऽविरोधसम्भवाच्चाति-व्याप्त्या पूर्वपक्षो युक्त इति भावः । ननु द्वयोः कर्तृत्वे विष्णोः सर्वकारणत्व-प्रतिपादकश्रुतिविरोध इत्यत आह ॥ श्रुत्यादाविति ॥ नन्वेवं सर्वशब्दस्य सङ्कोचः स्यादित्यत आह ॥ सर्वेति ॥ न केवलं मयैव सर्वशब्दगतिर्वक्तव्या । किन्तु त्वयापि । अन्यथाऽऽगामिसर्जनस्याकृतत्वादसृजतेति भूतनिर्देशो न स्यादित्याह ॥ त्वन्मतेऽपीति ॥ ननु रुद्रस्य कर्तृत्वे तन्निषेधकश्रुतिविरोधः विष्णोः कर्तृत्वे च तन्निषेधकशैवाद्यागमविरोध इत्यत आह ॥ श्रुतावित्यादि ॥ अत्र श्रुतौ शिवस्यागमे च विष्णोः कारणत्वनिषेधस्तु विष्ण्वादेः कारणताविधिपर इति सम्बन्धः । तत्र विष्ण्वादेरित्यत्रादिपदेन रुद्रादेःपरिग्रहः ।

तथाच श्रुतौ शिवस्य कारणतानिषेधो विष्णोः कारणताविधिपरः आगमे विष्णोः कारणतानिषेधस्तु रुद्रस्य कारणताविधिपर इति योजना । नन्वन्यनिषेधस्यान्यविधिपरत्वमदृष्टं कथं कल्पनीयमित्यत आह ॥ यथेति ॥ अत्र प्रथमादिशब्देनानुदितहोमनिन्दापरिग्रहः । द्वितीयेनोदितहोमादिस्तुतिसङ्ग्रहः । ततश्च यथोदितहोमनिन्दाया अनुदितहोमस्तुतौ तात्पर्यमनुदितहोमनिन्दाया उदितहोमस्तुतौ तात्पर्यं तथेत्यर्थः ॥ स्वप्रयोजकेत्यादि ॥ स्वं प्रामाण्यं तत्प्रयोजकीभूतो यो गुणः तत्प्रयुक्तस्येत्यर्थः । अप्रामाण्यं प्रति प्रयोजकीभूतो यो दोषः तस्य यो अभावः तत्प्रयुक्तं यत्प्रामाण्यं तस्यामुख्यत्वात् । श्रुतिप्रामाण्यस्य स्वविरोध्यप्रामाण्यप्रयोजकदोषाभावप्रयुक्तत्वादमुख्यत्वमिति यावत् । अत्राद्यः पक्षः सूत्रानुसारेण ''शैवाद्यागमसम्प्राप्ते''त्यनुव्याख्यानानुसारेण एतत्सूत्रसिद्धांतभाष्यतट्टीकानुसारेण च । द्वितीयस्तु भाष्यमात्रानुसारेण । तृतीयः ''इतरेषां चानुपलब्धेः शैवाद्यागमसम्प्राप्ते''ति सूत्रानुव्याख्यानतट्टीकानुसारेण । तत्र प्रथमपक्षे गतार्थतापरिहारो मूल एव स्पष्टः । द्वितीयादौ तु तन्न्यायेनैवाभ्यधिकाशंकायाः प्रवृत्तेरगतार्थत्वं द्रष्टव्यम् । चतुर्थस्तु टीकानुसारेणेति द्रष्टव्यम् ।

तात्पर्यचन्द्रिका

किंचास्य समन्वयप्रस्तावायोक्तलक्षणे ब्रह्मणि प्रमाणप्रतिज्ञार्थत्वेन स्वपक्षसाधकोपन्यासपरत्वात्तस्य च समन्वयोपपादकाविरोधव्युत्पादनाय बाधकोद्धारपरत्वाद्वयमर्थवत् । अनुमानस्य त्वतिदुर्बलत्वान्न पृथङ्निरासः । ''रचनानुपपत्तेश्च नानुमानं पत्युरसामंजस्या''दित्यादौ तु प्रधानस्याचेतनत्वाच्छिवादेश्च जननादिदोषवत्त्वान्न कर्तृत्वयोग्यतेति वक्ष्यते । ननु तत्तदागमाप्रामाण्यमिति न तेनापि पुनरुक्तिः । एवमन्यत्रापि यथासम्भवं पौनरुक्त्या शङ्का समाधेया ।

प्रकाशिका – अस्तु वोभयोरतिव्याप्तिनिरासकत्वं वाऽसम्भवनिरासकत्वं वा । सर्वथा द्वयमपि सार्थकमित्याह ॥ किंचेति ॥ प्रस्तावाय प्रारम्भाय । शास्त्रस्य ब्रह्मणि प्रमाणत्वेनाप्रतिज्ञाने उपक्रमादिभिर्ब्रह्मपरत्वमुत्तरसूत्रे प्रतिज्ञाय प्रतिवाक्यं तत्परत्वव्युत्पादनमग्रेतनमसङ्गतं स्यादिति भावः । एवं च न्यायविवरणटीकायामिहातिव्याप्त्यसम्भवाभ्यां पूर्वपक्षकरणं युक्तमिति भावः । ननु आगममूलकातिव्याप्त्यसम्भवफलपूर्वपक्षद्वयनिरासाया-

(प्रकाशिका)

धिकरणद्वयवत् अनुमानमूलकतद्वयफलकपूर्वपक्षद्वयनिरासायाप्यधिकरणद्वयं स्यादित्यत आह ॥ अनुमानस्य त्विति ॥ अत एव न्यायविवरणटीकायामागमानुमानमूलातिव्याप्ति-पक्षमुक्त्वा ''यद्वा सह मानेनानुमानेन वर्तत इति समम् । तथाचातिव्यापकमित्यापाततः'' इत्यादिनाऽनुमानमूलकासम्भवपूर्वपक्षोपीहैवोक्त इति भावः । यद्वा प्रागुक्तद्वितीयपक्षेऽनु-मानस्य कारणे स्वातन्त्र्येण प्रामाण्यशङ्कानिरासलाभेपि पक्षांतरेष्वलाभेन तस्यापि पृथक्प्रमाणत्वात्कचिज्जगत्कारणे प्रामाण्यमाशङ्क्य पृथङ्निरसनीयमित्यत आह ॥ अनुमानस्य त्विति ॥ नन्वेवमपि सांख्याधिकरणे सांख्यस्मृतेः पाशुपताधिकरणे पाशुप-तस्मृतेः ''उत्पत्त्यसम्भवा''दित्यत्र शाक्तेयागमस्य प्रामाण्यनिरासात्पौनरुक्त्यमित्यत आह ॥ रचनेति ॥ नन्वेवमपि ''श्रुतेस्तु शब्दमूलत्वा''दित्यत्र तर्काप्रामाण्योक्तेस्तेन गतार्थमिदम् । अत्रागमस्यापि निरासेप्यनुमानांशे गतत्वापरिहारात् । अनेन तस्य गतार्थत्वाच्चेत्यत आह ॥ एवमिति ॥ श्रुतेस्त्वित्यत्राप्यनेन पौनरुक्त्या शङ्कात्र तर्कस्य साधकत्वनिरासस्तत्र बाधकत्वनिरास इति समाधेयेत्यर्थः । अत एव तत्र भाष्यं ''शब्दमूलत्वाच्च न युक्तिविरोध'' इति । वक्ष्यते च ग्रन्थकृतापि ''शास्त्रयोनौ ब्रह्मण्यसाध-कस्यापि तर्कस्य बाधकत्वा''दित्यादि । यद्वा अधिकरणान्तरेष्वपि गतार्थत्वा-शङ्कासमाधाने ऊहनीये इत्याह ॥ एवमिति ॥ प्रदर्शितश्च पूर्वत्र तत्प्रकारः । उत्तरत्रापि यथा स्थानं तत्र तत्र दर्शयिष्यामः ।

पाण्डुरङ्गि – तृतीयपक्षे तेनास्यागतार्थत्वेप्यनेन तद्गतार्थं भवेदेव तन्न्यायभेदमात्रेण निरस्तस्य पुनर्निरासायोगादित्यत आह ॥ किंचेति ॥ यद्वा पक्षचतुष्टयेप्यभ्यधिकाशङ्कायाः प्रवृत्तेर्न गतार्थत्वमित्युक्तं प्रकारान्तरेणापि गतार्थतां परिहरति ॥ किंचेति ॥ यद्वेत्युक्तावस्यापि पूर्वोक्तपक्षचतुष्टयपक्षसमत्वप्रतीतिः स्यादित्यतः किंचेत्युक्तम् । यद्वा पक्षचतुष्टयस्य सूत्राद्यारूढत्वादस्य च तदारूढत्वेन स्पष्टमप्रतीतेस्तदपेक्षया वैलक्षण्यद्योतनाय यद्वेत्यनुक्त्वा किं चेति वैलक्षण्यप्रयोगः । एतदभावे तस्योक्तौ विरोधशङ्कासमाधान-रूपस्यानुत्थानादेतदनन्तरं च तस्योपमर्देनैव पूर्वपक्षोत्थानादुभयोः सार्थक्यमिति भावः । नन्वेवमनुमानस्यापि कारणे प्रामाण्यस्य कण्ठतो निराकरणार्थमप्यधिकरणान्तरमारम्भणीयं स्यादित्यत आह ॥ अनुमानस्येति ॥ अधिकरणान्तरेणापि पौनरुक्त्यं न्यायवैषम्य-प्रदर्शनमुखेन परिहरति ॥ रचनेति ॥ तथापि ''इतरव्यपदेशा''दित्यादौ पौनरुक्त्यमित्यत आह ॥ एवमिति ॥ नन्वेवमपि समयपादे समयनिरासात्तेन गतार्थत्वं स्यादित्यतो वाह ॥ एवमिति ॥ तथापि प्रपञ्चप्रपञ्चकभावाङ्गीकारान्न गतार्थत्वमिति भावः ।

तात्पर्यचन्द्रिका

अत्र जगत्कारणत्वं किमन्यस्यापि किं वा विष्णोरेवेति चिन्ता । तदर्थं कारणत्वं किमनुमानादिविषयत्वयोग्यमुतायोग्यमिति । आगमावष्टम्भेन पूर्वपक्षः पौनरुक्त्यनिरासससमय एवोक्तः । अनुमानावष्टम्भेन पूर्वपक्षस्तु अनुमानेन रुद्रादीनामपि कारणतासिद्धेरतिव्याप्तिः । न चानुमानमप्रमाणमतिप्रसङ्गादिति युक्तम् । व्याघातात् । न चान्यत्र प्रमाणमपि जगत्कारणे न प्रमाणम् । नियामकाभावात् । नह्युपमानादिवदनुमानं नियतविषयम् । यद्यपि कार्यत्वाद्यनुमानात्कर्तृमात्रं सिध्यति न तु शिवादिः कर्तेति । कर्तृमात्रं च विष्णोः कर्तृत्वाविरोधि । लोकप्रसिध्यादेरुभयत्र तुल्यत्वात् । तथाप्यनुमानं स्वप्रामाण्यनिषेधकश्रुत्युक्ते कर्तरि न पर्यवस्यति । किंत्वागमोक्ते कर्तरीत्यतिव्याप्तिः । यद्वा शिवो जगज्जन्मादिकर्ता सर्वज्ञत्वादित्यादिव्यतिरेकिणा तत्सिद्धिः । सर्वज्ञत्वादिकं चागमसिद्धमित्यागमसहायेनानुमानेनेह पूर्वपक्षः ।

प्रकाशिका – ''तज्जगज्जन्मादिकारणत्वं विषय''इत्यादिटीकां व्याचष्टे ॥ अत्रेत्यादिना ॥ अयोग्यमिति ॥ अनुमानादिविषयत्वस्येत्यनुषङ्गः । यदि तद्योग्यं तदा वक्ष्यमाणदिशा रुद्रादेरपि यद्ययोग्यं तदा विष्णोरेवेति फलफलिभावः स्पष्ट इति भावः । सूत्रेऽनुमानाद्ययोग्यत्वे ''नावेदवि''दित्यादिमानानुक्तेर्जगत्कारणं शास्त्रयोग्यमित्येवोक्तेः टीकादावनुमानाद्ययोग्यत्वे मानाभावादित्याद्यनुक्त्वाऽऽनुमानिकत्वस्यैव हेतूकृतत्वाच्चिंताद्वयमेवोक्तं न त्वयोग्यत्वे मानमस्त्युत नेत्यादिचिन्तापि । एवमग्रेपि ॥ उक्त इति ॥ तथापि वक्ष्यमाणे इत्यादिनेति भावः ॥ अनुमानेनेति ॥ क्षित्यादिकं सकर्तृकं कार्यत्वाद्घटवदित्याद्यनुमानेनेत्यर्थः ॥ अतिप्रसङ्गादिति ॥ ''वस्तुत्वात्तुरगःशृङ्गी''त्यादिवक्ष्यमाणदिशेति भावः ॥ व्याघातादिति ॥ अतिप्रसङ्गादित्यनुमानं प्रमाणं चेत्तर्ह्यनुमानप्रामाण्यमुपेत्य तन्निषेधे स्वक्रियाविरोधात् । अप्रमाणं चेदनुमानाप्रामाण्यव्याघातात् विघातादित्यर्थः । नियतविषयत्वमेव नियामकमित्यत आह ॥ नहीति ॥ उपमानं हि वाच्यवाचकसम्बन्ध एव मानम् । नान्यत्र । नह्येवमनुमानमित्यर्थः । अनुमानादुपमानादेर्भेदमुपेत्यैवमुक्तिः । सुधोक्तानुमानेष्वनुपपत्तिमाशङ्क्याह ॥ यद्यपीति ॥ विमतं कर्म प्रयत्नाधारजं कर्मत्वात्संमतवदित्यादि तत्रोक्तान्यनुमानान्यादिपदार्थः । प्रसिद्ध्या शिवादिः स्यादित्यत आह ॥ लोकेति

(प्रकाशिका)

॥ स्वप्रामाण्येति ॥ ''नैषा तर्केण नावेदविन्मनुत'' इत्यादिश्रुतिर्विष्णुकर्तृत्वेऽनुमान-प्रामाण्यं निषेधतीति तदुक्ते विष्णुकर्तृत्वे न पर्यवस्यति । किंत्वागमं सहायीकृत्य शिवकर्तृत्वं साधयति । यतो वेत्यादिवाक्यं च विष्णुकर्तृत्वमाहेति रुद्रादावतिव्याप्तिरित्यर्थः । एतेन ''इत्याद्यनुमानैर्विश्वोदयस्थितिलयकर्तरि सामान्यतः सिद्धे अस्मदादीनां तदसम्भवाच्छिव एव परिशेषात्कर्ता सिध्यती''ति सुधायामसम्भवादित्यस्यास्मदादीत्यादिपदोक्तविष्ण्वाख्ये श्रुत्युक्ते कर्तरि पर्यवसानासम्भवादित्यर्थ उक्तो भवति । सुधायां परिशेषादिति व्यतिरेक्युपलक्षणमिति भावेन व्यतिरेकिप्रकारमाह ॥ यद्वेति ॥ सुधायां ''विचित्रकार्यानुगुणः सार्वज्ञादिमानेव सिध्यती''त्यादिना कर्तृत्वेन सार्वज्ञसाधनं परिशेषपक्ष एवेति भावेनाह ॥ सर्वज्ञत्वादिकं चेति ॥ शैवागमसिद्धमित्यर्थः । आगमप्रामाण्यं च ''शैवाद्यागमे''त्यादेर्व्याख्यावसरे सुधोक्तिदि-शेवेत्याशयः । ''अनुमानाच्चे''ति सुधावाक्यस्यागममूलानुमानाच्चेत्यर्थः ।

पाण्डुरङ्गि – अतिव्याप्त्या पूर्वपक्षे चिंताप्रकारमाह ॥ अत्रेति ॥ नन्वेवमग्रेऽनुमाना-वष्टम्भेन पूर्वपक्ष एव विवृत्तौ नत्वागमावष्टम्भेन तथाच न्यूनतेत्यत आह ॥ आगमेति ॥ कालादिभेदेनाविरुद्धं द्वयोः कारणत्वमित्यादिनोक्तः ॥ नचानुमानमिति ॥ ''सर्वत्र शक्यते कर्तुमागमं हि विनानुमे''त्यादेरित्यर्थः ॥ व्याघातादिति ॥ अनुमानमप्रमाणमति-प्रसङ्गादित्यनुमानं मानं न वा । आद्येऽनुमानप्रामाण्यस्याङ्गीकृतत्वेनानुमानं प्रमाणं नेत्युच्य-माने व्याघातः । द्वितीये पूर्वानुमानप्रामाण्यस्याङ्गीकृतत्वादनुमानं न प्रमाणमिति व्याहत-मित्यर्थः । ननु नानुमानस्याप्रामाण्यमुच्यते येन व्याघातः किं तु विषयविशेषे तन्न प्रमाणमित्युच्यत इत्याशङ्क्य तन्निषेधति ॥ न चेति ॥ ननूपमानस्य सङ्केतमात्रग्राहकत्वेन नियतविषयत्ववदनुमानस्यापि नियतविषयत्वान्नानुमानं जगत्कारणत्वे मानमित्यत आह ॥ न हीति ॥ ननु क्षित्यादिकं सकर्तृकं कार्यत्वादित्यनुमानेन रुद्रादिनिष्ठकर्तृत्वसिद्धेर्लक्षणमति-व्याप्तमित्ययुक्तम् । तस्य सामान्यतः कर्तृत्वमात्रसाधकत्वेन रुद्रादिनिष्ठकर्तृत्वासाधकत्वात् । कर्तृत्वमात्रस्य विष्णुकर्तृत्वाविरोधित्वादित्यभिप्रायेण शङ्कते ॥ यद्यपीति ॥ ननु शिवकर्तृत्वस्य लोकप्रसिद्धत्वात्तत्रानुमानपर्यवसानमित्यत आह ॥ लोकेति ॥ परिहरति ॥ तथापीति ॥ ननु श्रुतेरनुमानप्रामाण्यनिषेधकत्वं किं सर्वानुमानप्रामाण्यनिषेधकत्वमथवा स्वविरुद्धानुमानप्रामाण्यनिषेधकत्वम् । नाद्यः । तथात्वे मीमांसावैयर्थ्यप्रसङ्गात् । न द्वितीयः। तस्य पाशुपतागमेष्वपि विद्यमानत्वात् । तथाच कथं तदुक्ते कर्तर्यनुमानपर्यवसानमित्यरुचेराह ॥ यद्वेति ॥ अनुमितेर्व्यापकतावच्छेदकविषयत्वमात्रनियमात्कथमनुमाने कर्तृविशेषसिद्धिः ।

तस्याचेतनत्वेन विरोधाविरोधचिन्तायाः अयोगात् । तदर्थमागमानुसरणे चानुमानमात्रेण पूर्वपक्ष इत्युक्तिविरोध इत्यतो वाह ॥ यद्वेति ॥ यद्वा असम्भवपर्यवसायिनं पूर्वपक्षमुक्त्वाऽतिव्याप्तिपर्यवसायिनं पूर्वपक्षमाह ॥ यद्वेति ॥

तात्पर्यचन्द्रिका

यद्वा महाकल्पत्वं कल्पत्वव्याप्यधर्मेण स्वाश्रयसमानजातीयकल्पवृत्त्यादिकार्यकर्तृभिन्नकर्तृकादिकार्यवद्वृत्ति । कल्पत्वव्याप्यत्वात् । अवान्तरकल्पत्ववत् । एवं महाकल्पभेदेन कर्तृभेदवत्पालकादिभेदोप्यनुमेयः । तथा जगत्संहर्तृत्वं जगत्स्रष्ट्रेकनिष्ठम् । संहारशक्तित्वात् । घटसंहारशक्तिवदिति स्रष्टृसंहर्त्रोर्भेदसिद्धिः । तथा महीमहीधरादि नानाकर्तृकम् । विचित्रकार्यत्वात् । प्रासादादिवत् । एवं च सर्वजगज्जन्मादिकर्तृत्वं लक्षणं चेदसम्भवः कतिपयकर्तृत्वं चेदतिव्याप्तिः । यद्वा सर्वजगन्निर्माणादिशक्तिः स्वमात्रवृत्तिधर्मेण स्वसमानजातीयशक्त्याश्रयभिन्नाश्रिता । निर्माणादिशक्तित्वात् । घटनिर्माणादिशक्तिवत् । जगत्कर्तृत्वं विष्णिवतरवृत्ति । कर्तृत्वव्याप्यत्वात् । घटकर्तृत्ववत् । इत्याद्यनुमानैरनेकेषां सर्वजन्मादिकर्तृणां साधकैर्विष्णिवतरसर्वजगत्कर्तृसिद्धावितरेषां प्रसिद्धशिवाद्यन्यत्वे गौरवादतिव्याप्तिः । यद्वा कार्यत्वाद्यनुमानेन नित्यज्ञानेच्छाप्रयत्नमात्रवतो नित्यप्रयत्नमात्रवतो वा कर्तुः सिद्धेः त्वया च तस्य विष्णुत्वानङ्गीकारात्संहर्तृत्वादिना रुद्रादिशब्दोदिते तस्मिन्नेवातिव्याप्तिः । न च विष्णोरन्यस्य कारणत्वनिषेधकोदाहृतश्रुतिविरोधः । तासामुक्तयुक्तिविरोधेन विष्णोःकारणत्वविधिपरत्वादिति केवलानुमानेनैव पूर्वपक्ष इति । तदेतदभिप्रेत्योक्तं टीकाया ''मनुमानेन रुद्रादेरपि कारणते''त्यादि ।

प्रकाशिका – एवं सुधोक्तकार्यत्वाद्यनुमानस्य द्वैधाभिप्रायमुक्त्वा सामान्यानुमानमेवातिव्याप्तिफलकं कर्तृभेदसाधकमिति स्वयमेवाह ॥ यद्वेति ॥ यद्वा सुधास्थमुपलक्षणं मत्वाऽऽगमसहायानुमानमूलकमेकं पक्षमुक्त्वा केवलानुमानमूलकपक्षद्वयमाह ॥ यद्वेति ॥ अत एव टीकायां ''अनुमानेन रुद्रादेरपि कारणतासाधनसौलभ्या''दितिसामान्योनोक्तम् । न्यायविवरणटीकायामपि ''रीत्यंतरेणानुमानमपि रुद्रादेर्जगत्कारणत्व'' इत्युक्तिरिति भावः। कल्पत्वव्याप्यधर्मेण महाकल्पत्वरूपधर्मेण स्वाश्रयसमानजातीयः महाकल्पत्वाश्रयजाती-

(प्रकाशिका)

योऽन्यो महाकल्पः तद्वृत्तियदादिकार्यं तत्कर्तृभिन्नः कर्ता यस्य तादृशादिकार्यवद्वृत्ति तत्र विद्यमानमित्यर्थः । अयं महाकल्पोऽन्यमहाकल्पनिष्ठादिकर्तृभिन्नादिकर्तृमानिति निष्कृष्टार्थः। महाकल्प इत्येव पक्षकरणे महाकल्पत्वावच्छिन्नस्य सर्वस्य पक्षतापत्त्या समानजातीयेत्याद्ययुक्तिः । एकस्य पक्षत्वार्थमयमिति विशेषणे नियामकाभावाद्धर्म एव पक्षीकृतः । स्वाश्रयसमानजातीयादेरेवोक्तौ कल्पत्वेन सजातीयस्यावांतरकल्पस्यापि ग्रहणापत्त्या महाकल्पावान्तरकल्पयोः कर्तृभेदस्याङ्गीकारेण सिद्धसाधनता । अत उक्तं कल्पत्वव्याप्तेति । कल्पवृत्तीत्यादेरेवोक्तौ स एव दोषः । अतःपूर्वविशेषणम् । कल्पवृत्तिकार्येत्याद्युक्तावावान्तरकार्यकर्तृकुलालादिभिन्नादिकार्यकर्तृमत्त्वस्य महाकल्पेप्यङ्गीकारादादिकार्येत्युक्तम् । एतदर्थमेव पश्चादादीति विशेषणम् । आदिकार्यकर्तृकेत्युक्तौ कर्त्रैक्येनोपपत्तेर्भिन्नेत्युक्तिः ॥ अवान्तरेति ॥ कल्पत्वव्याप्येनावान्तरकल्पत्वेन साध्यं बोध्यम् । तत्र कर्तृभेदः सिद्ध इति भावः ॥ एवमिति ॥ कर्तृपदद्वयस्थाने पातृपदद्वयप्रक्षेपेण पालकभेदः संहर्तृपदद्वयप्रक्षेपेण संहर्तृभेदःसिद्ध इत्यर्थः । कर्त्रादिनानात्वं कल्पभेदेन प्रसाध्यैकस्मिन्नपि कल्पे कर्त्रपेक्षया संहर्तान्य इत्याह ॥ तथेति ॥ स्रष्टृनिष्ठं नेत्येवोक्तौ घटस्य स्रष्टैव यदि संहर्ता तदा तत्र व्यभिचारः स्यादत एकेत्युक्तं स्रष्टृसंहर्त्रोरिति ॥ न स्रष्टैव संहर्ता किंत्वन्योपीत्येवं भेदसिद्धिरित्यर्थः । एकस्मिन्नपि कल्पे कर्तृभेदं साधयति ॥ तथा महीति ॥ प्रासादप्राकारारामपरिखादिष्वनेककर्तृता दर्शनाद्दृष्टान्तः । एवं नानाकर्त्रादिसिद्धावप्यन्यस्य कृत्स्नकर्तृत्वाप्राप्त्यातिव्याप्तिप्रकारस्यास्फुटत्वादाह ॥ एवं चेति ॥ पक्षभेदेनातिव्याप्तिमुक्त्वा केवलातिव्याप्तिलाभप्रकारमाह ॥ यद्वेति ॥ आदिपदात्पालनादिशक्तिः । फलोपधानस्यानेकेष्वसम्भवाच्छक्तिः पक्षीकृता । स्वमात्रवृत्तिर्यो धर्मस्तादृशशक्तित्वमेव तेन समानजातीया शक्तिः सैव तदाश्रयो विष्णुः तद्भिन्नमाश्रितेत्यर्थः । यद्वा तादृशधर्मेण समानजातीया पुरुषांतरनिष्ठा शक्तिः । तदाश्रयशिवादिभिन्नविष्ण्वाश्रितेत्यर्थः । सर्वजगन्निर्मातृत्वं विष्णोरितरत्रापि वर्तत इति फलितार्थः ।

शक्त्याश्रयेत्याद्युक्तौ तादृशकुलालभिन्नविष्ण्वाश्रितत्वस्य सिद्धत्वाद्विशेषणम् । स्वसमानेत्याद्युक्तावपि शक्तित्वेन साजात्यमादाय प्रागुक्तदोषः । अतः स्वमात्रेति ॥ घटेति ॥ घटत्वावच्छिन्नघटनिर्मातृणामनेकत्वादिति भावः । विशिष्याह ॥ जगत्कर्तृत्वमिति ॥ सर्वजगज्जननसामर्थ्यमित्यर्थः । एवं सत्यतिव्याप्तिप्रकारमाह ॥ इत्यादीति ॥ सर्वजगत्पालनसामर्थ्यरूपं पालकत्वं विष्णिवतरवृत्तिपालकत्वव्याप्यत्वात् गोपालकत्वादिवदित्यादि-

रादिपदार्थः । विष्णिवतरे सर्वजगत्कर्तारः तत्सिद्धावित्यर्थः । शिवाद्यन्यत्वे शिवहिरण्यगर्भाद्यन्यत्व इत्यर्थः । शिवादन्यत्वे गौरवादिति शैवाः हिरण्यगर्भादन्यत्वे गौरवादिति हैरण्यगर्भा इत्येवं तत्तद्वादिरीत्येति बोध्यम् । शिवादन्यत्व इति पाठे उपलक्षणं बोध्यम् । तेन रुद्रादीनामिति नोपक्रमविरोधः ॥ अतिव्याप्तिरिति ॥ सर्वजगन्निर्माणेत्याद्युक्तानुमानैरितरकर्तृत्वमात्रसिद्धावपि यतो वेत्यादिश्रुतिप्राप्तविष्णुकर्तृत्वस्य निवारणे तेषामशक्तत्वादपवादशङ्कांतराभावाच्च जगज्जननादिसामर्थ्यस्य प्राग्लक्षणत्वेनोक्ततयाऽनेकेषां कृत्स्नजगज्जननादिफलोपधानविरोधेपि तत्सामर्थ्यस्य सार्वकालिकस्याप्यविरोधात्कृत्स्नजगज्जननादिसामर्थ्यस्य श्रुत्यादिभिर्विष्णाविवोक्तानुमानैर्हिरण्यगर्भादावपि प्राप्त्या लक्ष्यालक्ष्यवृत्तित्वेनातिव्याप्तिरित्यर्थः । पूर्वं सुधोक्तं कार्यत्वाद्यनुमानं कर्तृसामान्यपरं सत् परिशेषादिसहकृतं तद्विशेषपरमित्युक्तम् । इदानीं केवलं तदेव कर्तृविशेषसाधकमित्याह ॥ यद्धेति ॥ ज्ञानचिकीर्षाकृतिमज्जन्यमिति साध्यमभिप्रेत्याह ॥ नित्येति ॥ नित्यत्वं पक्षधर्मताबललभ्यं त्रयाणां विशेषणम् । ननु कार्यत्वं कृतिमात्रमाक्षिपति न तु ज्ञानेच्छे इत्यत आह ॥ नित्यप्रयत्नेति ॥ त्वया सिद्धांतिना । विष्णोरनंतगुणत्वादिति भावः । एतेना''स्मदादीनां तदसम्भवा''दिति सुधावाक्यस्यास्मदादीत्यादिपदोक्तविष्णोः तदसम्भवाज्ज्ञानेच्छाप्रयत्नादिमात्रत्वरूपकर्तृत्वासम्भवादित्यप्यर्थ उक्तो भवति । तावता शिवः कुत इत्यत आह ॥ संहर्तृत्वादिना निमित्तेनेति ॥ रोदयति सर्वानिति रुद्र इति संहर्तृत्वलाभ इति भावः । आदिपदाज्जगज्जननपालनादिना भवशङ्करादिशब्दोदित इति ग्राह्यम् । इदं च टीकागतरुद्रपदार्थवर्णनमिति बोध्यम् ॥ अतिव्याप्तिरिति ॥ प्रागुक्ताशयो ध्येयः । एवं जगज्जननादिना विरिञ्चादिशब्दोदिते तस्मिन्नेवातिव्याप्तिरित्यादिरूपेण हैरण्यगर्भादीनामपि प्रत्यवस्थानं ध्येयमिति भावः । इयता ग्रन्थेना''नुमानेने''त्यादिटीका विवृता ।

''नचोदाहृते''त्यादिटीकां विवृणोति ॥ न चेति ॥ ''एको दाधारेति न ते महित्वं यो नः पिता जनिता एक एवे''त्यादिश्रुतिविरोध इत्यर्थः ॥ कारणत्वविधीति ॥ उदितहोमादिनिन्दावन्नहि निन्दा निन्द्यमिति न्यायेनेति भावः । अनेन युक्तिविरुद्धार्थे शिवादिकारणतानिषेधे तात्पर्यायोगादिति टीकार्थ उक्तो भवति ॥ केवलेति ॥ महाकल्पत्वमित्यादिपक्षत्रयोक्तेरिति भावः । एतेन ज्ञानेच्छाप्रयत्नादिमात्रवतो विष्णुत्वाभाववच्छिवादित्वमपि न युक्तम् । तस्यापि शैवाद्यागमेनानन्तगुणत्वात् । उक्तं च सुधायां ''शिवस्य जगज्जन्मादिकारणत्वसार्वज्ञसर्वशक्तित्वाद्यशेषगुणपूर्णत्वं निरवद्यत्वं च प्रतिपादयन्ती''ति ।

तन्निरस्तम् । आगममनादृत्य केवलानुमानेनैव पूर्वपक्षात् । इयता कृतं प्रतिपादनं कस्य व्याख्यानमित्यत आह ॥ तदेतदिति ॥ आगमसहायानुमानेन केवलानुमानेन च कृतं पूर्वपक्षद्वयमित्यर्थः । सङ्ग्रहस्तु —

आगमादनुमानाद्वा कर्तृत्वं विष्णुभिन्नगम् ।
अतिव्याप्तमतो नैतद्विष्णोरेव स्वलक्षणमिति ।

पाण्डुरङ्गि – एवं स्मृत्यनुमानाभ्यां पूर्वपक्षमुक्त्वाऽनुमानमात्रेणापि पूर्वपक्षमाह ॥ यद्वेति ॥ ननु सर्वज्ञत्वहेतुरसिद्धः । न च पाशुपताद्यागमेनैव तत्सिद्धिरिति वाच्यम् । सिद्धांतिना तस्य प्रामाण्यानङ्गीकारात् । अन्यथा शिवत्वस्य सिद्धत्वात्तन्निषेधानुपपत्तिरित्यनुशयाद्वाह ॥ यद्वेति ॥ महाकल्पत्वमिति ॥ कल्पत्वव्याप्यो यो धर्मः महाकल्पत्वरूपः यत्र महाकल्पत्वं तत्र कल्पत्वमिति नियमात् तेन स्वाश्रयसमानजातीयः स्वस्य महाकल्पत्वस्य योयमाश्रयः महाकल्पः तत्समानजातीयं यन्महाकल्पान्तरं तद्वृत्ति यदादिकार्यं तस्य यःकर्ता तद्भिन्नः कर्ता यस्य एवं भूतं यदादिकार्यं तद्वान्महाकल्पः तद्वृत्तिभवितुमर्हतीत्यर्थः । अत्र चाद्य-विशेषणाभावे अवान्तरकल्पसमानजातीयावांतरकल्पवृत्त्यादिकार्याणां भिन्नकर्तृकत्वस्य सिद्धान्तेपि स्वीकारात्सिद्धसाधनं स्यात् । तदर्थमाद्यं विशेषणम् । अत्राद्यविशेषणाभावे महाकल्पत्वाश्रयीभूतमहाकल्पेन सह कल्पत्वरूपधर्मेण समानजातीयो योवान्तरकल्पः तद्वृत्त्यादिकार्यकर्तृस्वायम्भुवमनुभिन्नकर्तृकादिकार्यवन्महाकल्पवृत्तित्वेन साध्योपपत्त्या महा-कल्पावान्तरकल्पयोः कर्तृभेदस्य च सिद्धांतिनाङ्गीकृतत्वेन महाकल्पभेदेनैव कर्तृभेदस्य चासिद्धेरर्थान्तरता वा स्यात् । तत्परिहारार्थमाद्यं विशेषणम् । तथाच कल्पत्वेन महाकल्पावांतरकल्पयोः समानजातीयत्वेपि कल्पत्वव्याप्यधर्मेण समानजातीयत्वस्य विवक्षितत्वात् कल्पत्वस्य कल्पत्वव्याप्यत्वाभावाद्व्याप्यव्यापकभावस्य भेदसापेक्षत्वात्कल्प-त्वव्याप्यधर्मो महाकल्पत्वमवान्तरकल्पत्वं च तत्र पक्षे कल्पत्वव्याप्येन महाकल्परूपधर्मेण महाकल्पत्वाश्रयीभूतमहाकल्पसमानजातीयमहाकल्पभेदेन कर्तृभेदसिद्धिः । दृष्टान्ते च कल्पत्वव्याप्यावान्तरकल्पत्वरूपधर्मेण समानजातीयावान्तरवैवस्वतमनुकल्पवृत्त्यादिकार्य कर्तृभिन्नस्वायम्भुवमनुकर्तृकादिकार्यवत्स्वायम्भुवकल्पवृत्तित्वेन साध्यपर्यवसानं द्रष्टव्यम् ॥ एवमिति ॥ कर्तृपदस्थाने पालकसंहर्तृपदप्रक्षेपेणेत्यर्थः । ततश्चैवं प्रयोगः महाकल्पत्वं कल्पत्वव्याप्यधर्मेण स्वाश्रयसमानजातीयकल्पवृत्त्यादिकार्यपालकभिन्नपालकादिकार्यवद्वृत्ति-

कल्पत्वव्याप्यधर्मत्वात् अवान्तरकल्पत्ववदिति । एवं चानुमानेन महाकल्पभेदेन पालकभेदसिद्धिरिति भावः । कार्यत्वाद्यनुमानस्यापि केवलस्य केवलस्य शिवादेः जगत्कर्तृत्वे प्रामाण्यमित्याह ॥ यद्वेति ॥ ''नचोदाहृतश्रुतिविरोध''इति टीकां व्याख्याति ॥ न चेति ॥

तात्पर्यचन्द्रिका

सिद्धान्तस्तु —

चक्षुरादि यथाऽशक्तं रसगन्धादिवस्तुषु ।
अनुमाऽपि तथाऽशक्ता धर्मब्रह्मादिवस्तुषु ।

''नहि धर्मादिनिश्चयोनुमानेने''ति टीकयैव महाकल्पत्वमित्याद्यनुमानेषु श्रुतिबाधादेः ''शशादीनां विषाणित्वादौ च कर्तुं शक्यत्वा''दिति टीकायां चातिप्रसङ्गस्योक्तत्वात् अनुव्याख्यानेच-

''वस्तुत्वात्तुरगः शृङ्गी पुष्पवत्खं सुतैर्युता ।
चित्रिणी च रसः षष्ठो रसत्वात्सोत्तरो भवेत् ।''

इत्यतिप्रसङ्गस्य प्रपञ्चितत्वादन्यत्र कार्यत्वादिहेतूनां सप्रपञ्चं निरासात् ''नावेदवि''दित्यादिश्रुत्या जगत्कारणेऽनुमानप्रामाण्यनिषेधाच्च नानुमानं जगत्कारणे प्रमाणमिति । आगमाश्रयपूर्वपक्षनिरासस्तु पौनरुक्त्यपरिहारावसर एव विवृतः ।

प्रकाशिका – अनुमानावलम्बिपूर्वपक्षनिरासकं ''यदि कारणमानुमानिकं स्या''दित्यादिसिद्धान्तटीकाप्रमेयं सङ्गृह्णाति ॥ चक्षुरादीति ॥ अशक्तमिति च्छेदः । यथा धर्मादावशक्ता तथा ब्रह्मणीति धर्मादेर्दृष्टान्तत्वेनोक्तिः । तस्य चोदनैकप्रमाणकत्वं ''चोदना लक्षणोर्थो धर्म'' इति जैमिनिसूत्रसिद्धमिति भावः । स्वातन्त्र्येणाशक्तेत्यर्थः । तेन न मीमांसाव्याघातः । प्रागुक्तानुमानानि टीकादावेव निरस्तानीति भावेन तद्वाक्यानि पठति ॥ न हीति ॥ श्रुतीति ॥ अयोग्यत्वोक्त्या तत्र प्रवर्तमाना नाबाधितत्वादिति भावः । आदिपदेन व्याप्त्यादिशून्यत्वसोपाधिकत्वादिग्रहः । श्रुतेर्नित्यनिर्दोषत्वेन स्वतः प्रामाण्येन च ''प्राबल्यमागमस्यैव जात्या तेषु त्रिषु स्मृत''मिति वचनसिद्धं प्राबल्यमिति भावः । कथमतिप्रसङ्ग इत्यत आह ॥ अनुव्याख्यानेचेति ॥ खमाकाशम् । चित्रिणी वन्ध्या । षष्ठो

रसः सोत्तरः सप्तमरसोपेत इत्यर्थः । रसत्वात्पूर्वरसवत् । रसमात्रस्य पक्षत्वे पूर्वरसमादाय सिद्धसाधनता । अतः षष्ठ इति । ननु वस्तुत्वं घटादौ व्यभिचारीति चेन्न । तस्यापि पक्षत्वात् । न च प्रत्यक्षादिबाधः । क्षित्यादिकर्तुरपि साम्यात् । स चायोग्यश्चेच्छृङ्गमपि तथास्तु । शृङ्गं महत्त्वे सत्युद्भूतरूपवच्चेत्कर्तापि कुलालादिरिव तादृग्देहवानिति कथमयोग्यः । अदेहोसाविति चेच्छृङ्गमपि रूपहीनं स्यात् । शृङ्गं रूपवदेवेति चेत्कर्तापि देहवानेवेति भावः । एवमन्यान्यपि समर्थनीयानि ॥ अन्यत्रेति ॥ तत्वनिर्णयतर्क-ताण्डवादावित्यर्थः । नावेदविदित्यादिश्रुत्यर्थष्टीकायां स्पष्टः ॥ नानुमानमिति ॥ तथाचाति-व्याप्त्यभावाद्विष्णोरेवेदं लक्षणं सिद्धमिति भावः । यदत्र कश्चिदाह त्वन्मते अनुमानस्य स्वतो जगत्कर्त्रसाधकत्वेपि तात्पर्यलिङ्गत्वात् श्रुतेरेक एवार्थ इति नियमाभावाच्च उक्तनानाकर्तृ-साधकानुमानानुरोधेन सृष्टिवाक्यानां रुद्रादिनानाकर्त्रर्थकत्वोपपत्तौ नानुमाननिरासो युक्तः । शब्दानां व्यवस्थितैकार्थकत्वमौत्सर्गिकं वक्तृविवक्षाविनियोगाद्यपवादसत्त्वेनेकार्थत्वमिति सर्वतांत्रिकमर्यादामुल्लंघ्य स्वकल्पितानेकार्थत्वसिद्धयै स्वेच्छयैव श्रुतिषु योगरूढ्यादि-भिरनेकार्थत्वमुपगच्छतो वसन्तादिवाक्य इवान्यथा पदविभागादिना सर्वत्रानेकार्थ-त्वमनिवार्यमिति स्यादेवानेकस्रष्टृपरत्वं सृष्टिवाक्यानामिति ॥ तन्न । प्रत्यक्षाद्यमूलानामनु-मानानामदृष्टार्थासाधकत्वे तात्पर्यधीहेतुत्वस्यापि दूरापास्तत्वात् । टीकाद्युक्तरीत्या श्रुतिबाधितानां तद्विरुद्धार्थानां तात्पर्यलिङ्गत्वस्याशक्यशङ्कत्वाच्च । ''शुष्कतर्कं तु वर्जयेत् तस्मात्सानपगा श्रुतेः कामाच्चे''त्यादिस्मृतिसूत्रैः शुष्कतर्काणां तात्पर्यालिङ्गत्वस्योक्तत्वाच्च । ''श्रुतिस्मृतिसहायं य''दित्यादिस्मृत्या च प्रमाणान्तरमूलकयुक्तेरेव तल्लिङ्गत्वोक्तेः । उक्तं च टीकायां ''सत्यमस्त्येवानुमानस्यौपनिषदपदार्थनिश्चायकत्वं श्रुत्यादिसहकारियुक्तस्य । न तु नियतप्रामाण्यं स्वातन्त्र्येण दृष्टार्थनिश्चायकत्वम् । तादृशं च प्रकृत''मितीति । न चैतान्यनुमानानि श्रुत्यादिपरिगृहीतानि । प्रत्युतै''कमेवाद्वितीयं एको दाधारे''त्यादि-श्रुतिस्मृतिविरुद्धानि । तादृशैस्तर्कैः श्रुतितात्पर्यं कल्पयतः तवैवेयं शोभा न तु परीक्षकाणाम् । यत्तु श्रुतेरेकार्थत्वनियमाभावादित्यादि तन्न । प्रमाणवशेन क्वचिदनेकार्थत्वे सर्वत्र तथात्वापादकाभावात् । मानवशेनानेकार्थत्वस्य ''ज्योतिरुपक्रमा''दित्यत्र वक्ष्यमाण-दिशा सर्वतांत्रिकसिद्धत्वात् । अपूर्वपदविभागस्यापि तत्रोक्तमानपूर्वकत्वात् । न हि सृष्टादिवाक्यानामनेककर्त्रर्थत्वे प्रमाणमस्ति । प्रत्युतै ''कमेवाद्वितीयं द्यावाभूमी जनयन्देव एकः एको दाधार यो नः पिता जनिता एक एव न ब्रह्मा न च शङ्करः एकः पुरस्ताद्य इदं

बभूव तस्मात्सहरिरेकराट् स्रष्टा पाता तथैवात्ता निखिलस्यैक एव''त्वित्यादि श्रुतिस्मृतिविरोधः । सर्वेषां स्वातन्त्र्यास्वातन्त्र्ययोरन्योन्यनियमनायोगेनैकमत्या योगाज्जगत्सृष्ट्यादिप्रतिहतिरित्यादियुक्तिविरोधश्च । हरेरन्येषां पारतन्त्र्याद्यनेकदोषयुक्तताया: कर्तृत्वादिविरोधिन्याः पत्युरादिनयोक्तानेकमानसिद्धत्वाच्च । यत्तु कर्त्रैक्यश्रुतिरेकैकस्यैव कर्तुर्बहुस्यामित्यादिश्रुतिप्रसक्तानेकभवननिरासेनाप्यर्थवतीति नानेककर्तृविरोधिनी । अत एव त्वयापि निष्प्रपञ्चब्रह्मापलापव्यसनिना ''नेहनाने''त्यादिश्रुतिर्विष्णववयवगुणकर्मरूपभेदशङ्कावारणेनार्थवतीत्युक्तमिति तदपि न । ''एकमेवाद्वितीयं जनिता एकएवे''त्यादिसावधारणश्रुत्युक्तकारणैकत्वस्य स्वाश्रयप्रतियोगिकभेदासमानाधिकरणरूपतया तद्विरोधेनानेककर्तृसिद्धेरवायोगेनैकैकस्यानेकभवनशङ्कानुदयात् । नेहनानेत्यादौ न्यायामृताद्युक्तरीत्या गुणकर्मादिभेदस्य प्राकरणिकप्रसक्तिवत् ''एको दाधारे''त्यादावेकैकस्य बहुभवनप्रसक्तेरभावाच्च । कर्तुर्बहुभवनस्य ''यदेकमव्यक्तमनन्तरूप''मित्यादिश्रुत्युक्तत्वेन तन्निरासायोगाच्च । ''न ब्रह्मा न च शङ्करः अन्योल्पस्य वा न वे''ति विशिष्य कर्त्रंतरनिषेधाच्च । अत एव ''आत्मेत्येवोपासीते''त्यादिविधौ तत्तदधिकारिविशेषं प्रति तत्तद्योग्यगुणप्रतीतिवत् सृष्टिवाक्येपि शैववैष्णवाद्यधिकारिविशेषं प्रति शिवादिनानास्रष्टृधीरस्त्विति निरस्तम् । आत्मनि तत्तद्योग्यगुणानां सत्त्ववन्नानास्रष्टृसत्त्वाभावात् । तत्तदीयानादिमिथ्याज्ञानवासनया तवान्यस्यापि शिवादिषु स्रष्टृत्वप्रतीतावपि तस्यानेकमानविरोधेन भ्रान्तित्वकल्पनावश्यं भावाच्च । तत्तत्पुरुषं प्रति शिव एव जगत्कर्ता नान्य इत्यादिबोधने पुरुषभेदेनानुष्ठानवद्भस्तुस्वरूपभेदायोगेनाप्रामाण्यापाताच्च । ननु त्वन्मते पुराणेषु रामकृष्णादिरूपभेदोक्तेर्लौकिकभ्रान्तिसिद्धभेदानुवादित्ववत्तत्तदनादिसमयसिद्धशिवादिकर्त्रैक्यानुवादित्वेनापि कर्त्रैक्यश्रुतिर्युक्तेति न कर्तृनानात्वविरोधिनी । न चैवं तत्रेव कर्त्रैक्यश्रुतावप्यसदर्थत्वप्रसङ्ग इति वाच्यम् । त्वन्मते यस्य यावद्दर्शने योग्यता तं प्रति तावन्तमेव सातिशयं ब्रह्मानन्दैकदेशं निरतिशयतया भूमब्रह्मादिशब्दो वक्तीत्यभ्युपगमवत् शैववैष्णवादीन् प्रति विरुद्धनानाकर्तृबोधकत्वं सृष्टिवाक्येप्युपगम्यतामिति चेत् सम्यक्तवमूर्धानमध्यारोहदुन्मादः । यदविद्यमानान्यप्रामाण्यकराणि पूर्वोत्तरानुसन्धानहीनान्येव बहुलमभाषथाः । सातिशयं निरतिशयत्वेन भूमादिशब्दो वक्तीत्यस्यैवासत्त्वादित्यलमियता । अन्यदपि तदुर्भाषणनिराकरणं गुरुपादकृतकण्टकोद्धारादौ बोध्यम् । ''शास्त्रं योनिः प्रमाणमस्ये''ति भाष्योक्तं बहुव्रीहिं समर्थयितुं परोक्तं दूषयति ॥ अत्रेति ॥ समस्यमानपदार्थत्यागेनान्यपदार्थप्रधानबहुव्रीह्यपेक्षया

(प्रकाशिका)

तत्पुरुषस्य तदत्यागेनोत्तरपदार्थप्रधानस्य बलवत्त्वादिति भावः । अत्रेदमधिकरणशरीर ''मस्य महतो भूतस्य निश्वसितमेतद्यद्ग्वेदो यजुर्वेद'' इत्यादि वाक्यं ब्रह्मणो वेदकर्तृत्वेन सर्वज्ञत्वं न साधयति उत साधयतीति संशये ब्रह्मणो वेदकर्तृत्वे वेदस्य सापेक्षत्वेनाप्रामाण्य-प्रसङ्गान्न साधयतीति प्राप्ते साधयत्येवेति सिद्धान्तः । तथाहि । कर्तृमत्त्वेन वेदस्य सापेक्षत्वं किं पुरुषनिर्वर्त्यत्वमात्रादभिनवानुपूर्वीरचनाद्वा मानान्तरोपलब्धार्थविषयरचनाद्वा कतिपय-कालविरतसर्वसम्प्रदायस्य वेदस्यैकपुरुषनिस्सरणाद्वा । नाद्यः । तवापि संमतत्वात् । नित्यानां विभूनां वर्णानां कालतो देशतो वा पौर्वापर्यायोगेनाभिव्यक्तिधर्मानुपूर्व्याः कृतत्वात् । द्वितीये क्रमान्यत्वं वा विसदृशक्रमत्वं वा । नाद्यः । अध्यापकोच्चरितानुपूर्वी सदृशानुपूर्व्या एव माणवकेनानुकरणेन तवापि संमतत्वात् । न द्वितीयः । मयाप्यनङ्गी-कारात् । अत एव न तृतीयः । चतुर्थस्तूपेयते । न चैतावता सापेक्षत्वमस्तीति । तदेतदधिकरणशरीरमग्रे निरसिष्यतः सूत्रार्थं तावन्निरसितुमयमनुवादः । तत्रैव वक्ष्यमाणत्वेपि वक्ष्यमाणसूत्रार्थदूषणस्य सुज्ञानायात्रैवाधिकरणशरीरमवोचाम ।

पाण्डुरङ्गि – धर्मब्रह्मादिवस्तुनोऽनुमानायोग्यत्वे व्याप्तिपक्षधर्मतोपेतपूर्वोक्तानुमानानां का गतिरित्यत आह ॥ नहीति ॥ अतिप्रसङ्गस्य आभाससाम्यस्येत्यर्थः ॥ अन्यत्रेति ॥ ''नानुमानं परेशितुः। शक्तं विज्ञापन'' इत्याद्यनुव्याख्यानादावित्यर्थः । अन्यत्र विष्णुतत्व-निर्णयादावित्यप्याहुः ॥ आगमाश्रयेति ॥ प्रमाणत्वेनाङ्गीकृतश्रुतिपरिगृहीतयेत्यनेनेति शेषः।

तात्पर्यचन्द्रिका

अत्र परेषां भाष्ये शास्त्रस्य योनिरिति विग्रहमाश्रित्य ''ऋगादिकारणत्वं ब्रह्मण इहोच्यते । पूर्वसूत्रेऽर्थलब्धस्य सार्वज्ञस्य स्फोरणार्थमित्युक्तम् । तन्न । लक्षणानन्तर-मवश्यापेक्षितप्रमाणपरत्वसम्भवेऽन्यपरत्वायोगात् । त्वदभिमतभ्रमाधिष्ठानत्वरूप-कारणत्वेन सार्वज्ञालाभाच्च । पूर्वसूत्रेऽर्थलब्धसर्वशक्त्यादित्यागेन सार्वज्ञस्यैव स्फोरणे निमित्ताभावाच्च । सांख्याभिमताचेतनकारणतायाश्च चेतनत्वमात्रेण निषेधसम्भ-वात्। सांख्यानङ्गीकृतेन शास्त्रयोनित्वेन सार्वज्ञस्य साधनायोगाच्च । श्रुत्या शास्त्रयोनित्वं तेन सार्वज्ञं प्रसाध्य तेन प्रधानस्य कारणतानिषेधाद्वरं श्रुत्यैव तन्निषेधः । जगन्निर्माणेनास्फुटीकृतस्य सार्वज्ञस्य तदेकदेशशास्त्रनिर्माणेन स्फुटी-करणायोगाच्च ।

प्रकाशिका – शिष्याणां धर्मशासनाच्छास्त्रमिति भामत्युक्तयोगं हृदि कृत्वाह ॥ ऋगिति ॥ पूर्वासङ्गतिं निराह ॥ पूर्वेति ॥ विचित्रजगत्कृतिः सार्वज्ञं विना न युक्तेत्यर्थादाक्षिप्तं सार्वज्ञमिह समर्थ्यत इत्यर्थः । एवमपि पूर्वासङ्गतिरित्याह ॥ लक्षणेति ॥ लक्षणप्रमाणाभ्यां वस्तुसिद्धया लक्षणानन्तरं तद्विशिष्टे प्रमाणं जिज्ञासितमिति मद्रीत्या तथैव वाच्यमित्यर्थः । सत्यं प्रमाणं जिज्ञासितमिति तथापि सार्वज्ञमपि समर्थनीयम् । अन्यथा प्रागुक्तकारणत्वस्यैवासिद्धेः । न ह्यल्पज्ञस्यैवंविधविश्वनिर्माणं शक्यमिति चेत् किं कारणत्वेनाक्षिप्तं सार्वज्ञं किं जिज्ञासितशुद्धस्योत विशिष्टस्येश्वरस्य । नाद्य इत्याह ॥ त्वदभिमतेति ॥ शुद्धस्य कारणत्वं नामोपादानत्वम् । तच्च न परिणामित्वम् । निर्विकार-श्रुतिव्याकोपात् । किं तु विवर्ताधिष्ठानत्वम् । न चैतत्सार्वज्ञाक्षेपकमित्यर्थः । भावसाधनः कर्मसाधनश्च भ्रमशब्दः । द्वितीय आह ॥ पूर्वेति ॥ त्वद्भाष्ये हि ''जन्मस्थितिभङ्गं यतः सर्वज्ञात्सर्वशक्तेः कारणाद्भवती''त्युक्त्या सर्वशक्तेरप्युपक्षिप्तत्वात् । भामत्यां च परिमित-ज्ञानशक्तिभिर्ज्ञातुं कर्तुं वाऽशक्यत्वा''दित्युक्तेरिति भावः । एतेन ''तत्रार्थलब्ध-शक्त्याद्यस्फुटीकृत्य सार्वज्ञमात्रस्फुटीकरणे विशेषकारणाभावा''दिति टीकार्थ उक्तः । तत्राथ जगत्कारणत्वं प्रधानादिव्युदासेन ब्रह्मण्येव साधयितुं हेतुत्वेनोक्तं सार्वज्ञं शास्त्रयोनित्वेन साध्यत इति चेन्न । असिद्धिप्रसङ्गात् । ''नहि ब्रह्मणो जगत्कारणत्वमनङ्गीकुर्वाणो वेदकारणत्वमङ्गीकरोती''ति सुधोक्ते शङ्कोत्तरे आह ॥ सांख्येति ॥ सार्वज्ञस्यापि चेतनत्वार्थत्वादिति भावः । असिद्धीति सुधास्थमुपलक्षणं बोध्यम् ॥ अयोगाच्चेति ॥ असिद्धिप्रसङ्गादिति भावः । ''आगमेन साध्यत इति चेत्तर्हि जगत्कारणत्वमेव तेन किं न साध्यत'' इति सुधां विवृणोति ॥ श्रुत्येति ॥ ''अस्य महत'' इत्यादिश्रुत्येत्यर्थः । उपलक्षणमेतत् । ईक्षत्यधिकरणेन जन्माधिकरणस्य गतार्थत्वं च सुधोक्तं ज्ञेयम् । ''अनन्तजगन्निर्माणोक्त्याऽस्फुटीभूते''त्यादिटीकार्थमाह ॥ जगन्निर्माणेनेति ॥

पाण्डुरङ्गि – ननु भाष्ये शास्त्रं योनिर्यस्येति बहुव्रीहिराश्रितः । तत्र समासप्राबल्या-त्तत्पुरुष एव किं न स्यात् । परैरपि तस्य स्वीकृतत्वादित्यतः परोक्तं विग्रहं दूषयितुमनुवदति ॥ अत्र परेषां भाष्य इति ॥ नन्वत्र ऋगादिकारणत्ववचनं प्रकृतानुपयुक्तमित्यत आह ॥ पूर्वसूत्र इति ॥ लक्षणानन्तरमिति ॥ लक्षणप्रमाणाभ्यां वस्तुसिद्धिरिति न्यायादिति भावः । अवश्यापेक्षितेति ॥ शकंध्वादेराकृतिगणत्वादाङ्पूर्वकोत्तरपदेन पररूपम् । ''कृत्यलुटो बहुल''मिति बाहुलकाद्वा कृत्यपरकत्वाभावेप्यवश्यमंत्यलोपो द्रष्टव्यः । तेन ''लुंपेदवश्यमः

(पाण्डुरङ्गि)

कृत्ये'' इत्युक्तत्वात्प्रकृते कृत्यप्रत्ययपरकत्वाभावात्कथमिति चोद्यानवकाशः । किं च ब्रह्मण उपादानत्वं हि त्वयोच्यते । तद्धि तत्राधिष्ठानत्वरूपं कारणत्वमेव । तथाच तेन कथं सार्वज्ञसिद्धिः । एवं चार्थलब्धस्य सार्वज्ञस्य स्फोरणार्थमित्येतदप्ययुक्तमित्याह ॥ त्वदभिमतेति ॥ ननु कारणत्वं न भ्रमाधिष्ठानत्वं येन सार्वज्ञलाभः किंतूपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वरूपं कर्तृत्वमेव विवक्ष्यते तथा च कथं न सार्वज्ञलाभ इत्यत आह ॥ पूर्वसूत्र इति ॥ तथाच यथा ज्ञानाद्यभावे कर्तृत्वानुपपत्तिस्तथा शक्त्याद्यभावेपि कर्तृत्वं न सम्भवतीति तदप्यर्थलब्धमिति भावः । नन्वस्तु सर्वशक्त्यादेरर्थतो लाभः तथापि सांख्याभिमताचेतनकारणत्वनिषेधार्थं सार्वज्ञमुपपाद्यत इत्यत आह ॥ सांख्येति ॥ चेतनत्वसमर्थनार्थमेव सार्वज्ञमुपपाद्यत इत्यत आह ॥ श्रुत्येति ॥ तथाचैवं परंपराकल्पनायां कल्पनागौरवमिति भावः । किंच पूर्वसूत्रेणैव सार्वज्ञस्य स्फुटीकृतत्वादेतदधिकरणं व्यर्थमित्याह ॥ जगदिति ॥ तथाचैवं समासकरणमयुक्तमिति भावः ।

तात्पर्यचन्द्रिका

अत्र भामतीविवरणयोः ''जगत्कारणत्वेन सिद्धे सार्वज्ञे शास्त्रयोनित्वं हेत्वंतरमुच्यते । वेदः स्वविषयादधिकविषयकज्ञानवत्प्रणीतः । वाक्यप्रमाणत्वात् । पाणिन्यादिशास्त्रव''दित्युक्तम् । तन्न । एकार्थमात्रज्ञेन प्रयुक्तस्यानेकार्थस्य शब्दस्याबाधितानेकार्थबोधकत्वदर्शनात् । नन्वन्योर्थो न तात्पर्यविषय इति चेत्तर्हि प्राशस्त्यपरार्थवादप्रतीतवायुक्षेपिष्ठादिसंसर्गज्ञं ब्रह्म न स्यात् । पदार्थज्ञानं विना पदप्रयोगायोगेपि संसर्गज्ञानासिद्धेः । मानांतरप्राप्ते संसर्गेऽवांतरतात्पर्यस्याप्यभावात् । किञ्च वेदस्यातत्वे तात्पर्ये प्रामाण्यायोगात्तत्वे चिन्मात्रे तात्पर्याद् ब्रह्मापि तन्मात्रज्ञं स्यात् । किंच प्रत्यक्षादिसिद्धस्य घटादेर्निष्प्रयोजनस्य गङ्गावालुकेयत्तादेश्च शास्त्राविषयत्वात्तज्ज्ञं ब्रह्म न स्यात् । अपि च न तावदर्थमुपलभ्य रचयितृत्वं प्रणेतृत्वम् । पौरुषेयत्वापातात् । नाप्यध्यापकवदुच्चारयितृत्वमात्रम् । तेन सार्वज्ञासिद्धेः। किंच स्वव्यतिरिक्तोपदेश्यपुरुषगोचरस्य भ्रमस्य भ्रान्तिसिद्धशरीरादेश्चाभावे उच्चारणायोगात्तस्य चासार्वज्ञं विनाऽसम्भवाच्छास्त्रयोनित्वमसार्वज्ञ एव हेतुः ।

प्रकाशिका – यथाश्रुतं भाष्यं निरस्य व्याख्यातृमतमनूद्य निराह ॥ अत्रेति ॥ हेत्वंतरमिति ॥ तथाच पौनरुक्त्यमिति भावः । उक्तं च भामत्यादौ ''न केवलं जगद्योनित्वादस्य भगवतः सर्वज्ञता । शास्त्रयोनित्वादित्यपि बोद्धव्ये''त्यादि ॥ कथमनेन सार्वज्ञलाभ इत्यतः कल्पतरूक्तमनुमानप्रकारमनुवदति ॥ वेद इति ॥ स्वस्य वेदस्य यावान्विषयः तावद्विषयकज्ञानवता ततोधिकविषयज्ञानवता च प्रणीत इति साध्यार्थः । प्रमाणवाक्यत्वादिति हेत्वर्थः । यद्यपि तत्र ब्रह्म वेदविषयादधिकविषयज्ञम् । तत्कर्तृत्वात् । यो यद्वाक्यप्रमाणकर्ता स तद्विषयादधिकविषयज्ञो यथा पाणिनिरित्येवोक्तम् । न तु वेदपक्षकम् । सुधायामपि तथैवोदाहरणोपनयनिगमनानुवादात् । तथाप्यर्थाभेदाद् बोधसौकर्यायैवमुक्तम् । यद्वा यत्तस्यानुमानान्तरम् । अयं घटः एतदन्यासर्ववित्कर्तृकत्वानधिकरणैतदन्यावेदत्वानधिकरणसकर्तृकान्यः घटत्वात् घटांतरवदिति । तस्यापि सङ्ग्रहायोभयानुमानतात्पर्यलब्धमिदमिति न दोषः । हेतोः सर्वविषयकवेदरूपपक्षधर्मताबलात्सार्वज्ञलाभ इति भावः ॥ एकार्थेति ॥ गौरस्त्यक्षमस्तीत्यादिवाक्यस्येत्यर्थः । साध्याभावात्तत्र व्यभिचार इति भावः । अबाधितेति प्रमाणवाक्यत्वरूपहेतुसद्भावार्थमुक्तम् । ननु यावान्स्वतात्पर्यविषयस्तज्ज्ञानवता ततोधिकज्ञानवता च प्रणीत इति साध्यार्थो विवक्षितः । उक्तस्थले चैकार्थस्यैव तात्पर्यविषयतया तज्ज्ञानवत्प्रणीतत्वस्य सत्त्वान्न व्यभिचार इति शङ्कते ॥ नन्विति ॥ एवं तर्ह्यर्थवादानां प्राशस्त्य एव तात्पर्यात् संसर्गे तात्पर्याभावात्तज्ज्ञानं ब्रह्मणो न स्यात् । तथाच सार्वज्ञासिद्धिरित्याह ॥ तर्हीति ॥ अन्यथानुपपत्त्या तज्ज्ञानसिद्धिः पदार्थज्ञानवदित्यत आह ॥ पदार्थेति ॥ ननु संसर्गज्ञानाभावे आनुपूर्वीविशेषविशिष्टतया पदप्रयोगो न युक्त इति चेन्न । त्वयार्थमुपलभ्य रचितत्वस्यानङ्गीकारात् । बहुकालविरतानुपूर्वीविशेषस्यादिकाल उच्चारणमात्रमित्यङ्गीकारेण तत्र संसर्गज्ञानस्यानुपयोगात् । तात्पर्यविषयेति विवक्षायां सार्वज्ञासिद्धिं प्रकारान्तरेणाह ॥ किंचेति ॥ प्रत्यक्षेति ॥ अप्राप्ते शास्त्रमर्थवदिति भावः ॥ गङ्गेति ॥ स प्रयोजनस्यैव शास्त्रार्थत्वादिति भावः । एवं स्वविषयादधिकविषयकज्ञानवदित्यंशपर्यालोचनया सार्वज्ञासिद्धिमुक्त्वेदानीं प्रणीतत्वपर्यालोचनेनापि ''किं चेदं शास्त्रे''त्यादि टीकाद्युक्तदिशा तदसिद्धिमाह ॥ अपि चेति ॥ एतेन शास्त्रयोनित्वमर्थमुपलभ्य रचयितृत्वं चेदसिद्धिः । उच्चारयितृत्वं चेदप्रयोजकमित्युक्तं भवति । टीकाद्युक्तमुपलक्षणमिति भावेन शास्त्रयोनित्वं सार्वज्ञे विरुद्धं चेत्याह ॥ किंचेति ॥ असार्वज्ञमिति ॥ विशेषादर्शनजन्यत्वाद्भ्रमस्येति भावः । एवेति साध्याभावव्याप्तत्वमाह ॥

पाण्डुरङ्गि – ननु नेदं सूत्रं व्यर्थं पूर्वसूत्रोक्तजगत्कारणत्वेन सिद्धसार्वज्ञे हेत्वंतराभिधायकत्वादिति भामतीविवरणयोरुक्तं दूषयितुमनुवदति ॥ अत्रेति ॥ कथमनेन हेत्वंतरमुच्यत इत्यतस्तद्दर्शयति ॥ वेद इति ॥ अत्र वेदो विज्ञानवत्प्रणीत इत्युक्ते न सर्वज्ञप्रणीततासिद्धिः तदर्थं स्वविषयादिति विशेषणम् । न च वेदस्य स्वविषयादधिकतरविषयविज्ञानवत्प्रणीतत्वं बाधितमिति शङ्क्यम् । इक्षुक्षीरगुडादीनां माधुर्यवैशेष्यस्याभिधानाविषयीकृतत्वेपि प्रमाणान्तरविषयत्वं दृष्टम् । ततश्च वेदस्य स्वविषयादधिकतरविषयज्ञानवत्प्रणीतत्वं सम्भवतीत्यर्थः । वाक्यप्रमाणत्वात् प्रमाणवाक्यत्वादित्यर्थः । प्रत्यक्षं व्यावर्तयति वाक्येति । अनाप्तोक्तिं व्यावर्तयति प्रमाणत्वादिति । अत्र स्वविषयादधिकज्ञानवत्प्रणीतत्वमात्रं न साध्यम् । तथात्वे यावत्स्वविषयज्ञानत्वं प्रणेतरि नसिध्येत् । न चाधिकज्ञानवत्त्वोक्त्या तत्सिद्धिरिति वाच्यम् । अधिकशब्देन स्वविषयस्यैव गृहीतत्वेन तेन तदलाभात् । किं तु यावत्स्वविषयादधिकज्ञानवत्प्रणीतत्वमेव साध्यमिति वाच्यम् । तथा च व्यभिचार इत्याह ॥ एकार्थमात्रेति ॥ अयमर्थः । एकार्थमात्रज्ञेन प्रयुक्ते वाक्ये व्यभिचारः । तादृशवाक्यस्य प्रमाणवाक्यत्वेन हेतोस्तत्र सद्भावात् । स्वशब्देनैकार्थमात्रज्ञप्रयुक्तं वाक्यं तस्य ये विषया अनेकेऽर्थाः तदपेक्षया येऽधिकविषयाः एकार्थमात्रज्ञप्रणीतवाक्याप्रतिपाद्यत्वे सति प्रमाणान्तरवेद्याः । तेषां यज्ज्ञानं तद्वत्प्रणीतत्वं साध्यं च तत्र नास्ति । तस्यैकार्थमात्रज्ञत्वेन यावत्तद्वाक्यार्थज्ञानाभावेनोक्तसाध्यस्य तत्राभावादिति । ननु स्वविषयादधिकविषयज्ञानवत्प्रणीतत्वमात्रं न साध्यम् । किंतु स्वतात्पर्यविषयादधिकविषयज्ञानवत्प्रणीतत्वमेव । तच्चैकार्थमात्रज्ञप्रयुक्तवाक्ये तिष्ठत्येव । स्वशब्देनैकार्थमात्रज्ञप्रयुक्तं वाक्यम् । तद्वाक्याप्रतिपाद्यत्वे सत्यनुभवादिरूपप्रमाणान्तरवेद्योर्थः । तज्ज्ञानवत्प्रणीतत्वस्य तत्र सद्भावात् । तथाच न व्यभिचार इति शङ्कते ॥ नन्विति ॥ तर्हि ब्रह्मणो वायुक्षेपिष्ठादिवाक्यसंसर्गज्ञानं न स्यात् । तत्संसर्गस्य वायुक्षेपिष्ठादिवाक्यतात्पर्याविषयत्वात् । अर्थवादानां लक्षणया प्राशस्त्यप्रतिपादकत्वेन तत्रैव तात्पर्येण संसर्गेऽतात्पर्यात् । न च संसर्गस्य तात्पर्यविषयीभूतार्थापेक्षयाधिकविषयत्वेन तज्ज्ञत्वं ब्रह्मणः किं न स्यादिति वाच्यम् । अधिकविषयशब्देन तद्वाक्याप्रतिपाद्यत्वे सत्यनुभवादिप्रमाणान्तरवेद्यत्वस्यैव विवक्षणेन वायुक्षेपिष्ठादिसंसर्गस्य ''वायुर्वैक्षेपिष्ठा देवता'' इत्याद्यर्थवादवाक्यप्रतिपाद्यत्वेन तदप्रतिपाद्यत्वाभावेनानुभवादिप्रमाणान्तरवेद्यत्वेनाधिकविषयत्वाभावेन तेनापि रूपेण ब्रह्मणः संसर्गज्ञानस्य वक्तुमशक्यत्वादित्याह ॥ तर्हीति ॥

ननु च पदप्रयोगान्यथानुपपत्त्यैव ब्रह्मणो वायुक्षेपिष्ठादिवाक्यसंसर्गज्ञत्वं भविष्यति । पदार्थज्ञानपूर्वकत्वात्पदप्रयोगस्य । पदार्थज्ञानाभावे पदप्रयोगायोगादित्यत आह ॥ पदार्थज्ञानं विनेति ॥ पदप्रयोगेण पदार्थाज्ञानमेवानुपपन्नम् । न तु संसर्गाज्ञानम् । तस्य वायुक्षेपिष्ठादिपदार्थत्वाभावादित्यर्थः । ननु शुकादेः पदार्थज्ञानाभावेपि पदश्रवणमात्रेण पदप्रयोगदर्शनात्कथमेतत् । अन्यथा वाक्यप्रयोगान्यथानुपपत्त्या वाक्यार्थज्ञानमपि सिध्येदिति चेन्न । पदानां पदार्थज्ञानाभावे स्वतंत्रप्रयोगानुपपत्तेः । संसर्गज्ञानासिद्धेरिति पदस्य विभक्त्यंतत्वात् विभक्तेश्च प्रातिपदिकसंज्ञापेक्षत्वात् तस्याश्चार्थज्ञानसापेक्षत्वादिति बोध्यम् । स्यादेतदेवं यदि संसर्गे सर्वथा तात्पर्याभावं ब्रूमः । प्राशस्त्ये मुख्यतात्पर्यसद्भावेपि संसर्गेऽवान्तरतात्पर्यस्याभ्युपगमात् । तथाच ब्रह्मणः संसर्गज्ञत्वं स्यादेवेत्यत आह ॥ मानान्तरेति ॥ मानान्तरेति हेतुगर्भं विशेषणम् । अन्यथा सिद्धार्थबोधकत्वेन वाक्यस्यानुपादेयत्वं न स्यादिति भावः । नन्वर्थवादार्थभूतः संसर्गो मानान्तरप्राप्त इति न नियमः । तदप्राप्तसंसर्गस्यापि सम्भवात् । किंच येन रूपेण संसर्गस्य मानान्तरप्राप्तत्वं तदन्येन रूपेण तात्पर्यसम्भवान्न सार्वज्ञालाभ इत्यत आह ॥ किंचेति ॥ संसर्गस्यातत्वत्वादिति भावः ॥ तत्व इति ॥ एवं च चिन्मात्रं चिन्मात्रज्ञमित्युक्तं स्यात् । तथाचावेद्यत्वासंभवस्सार्वज्ञालाभश्चेति भावः । ब्रह्मापीति ॥ स्वशब्देन वेदः तत्तात्पर्य विषयो ब्रह्म तदपेक्षयाऽधिकज्ञानवद्ब्रह्म तत्प्रणीतत्वे वेदस्य सिद्धेऽपि ब्रह्मणो न सार्वज्ञं सेत्स्यति । ब्रह्मणो ब्रह्ममात्रज्ञत्वेन सार्वज्ञालाभादिति भावः । नन्वस्ति संसर्गे तात्पर्यम् । न च श्रुतितात्पर्यविषयत्वे सत्यत्वं स्यादिति वाच्यम् । महातात्पर्यविषयस्यैव सत्यत्वेनावान्तरतात्पर्यविषयस्य संसर्गस्य सत्यत्वानापातादित्यत आह ॥ किंचेति ॥ ''अतोर्थान्तरमुक्तानुपयुक्त''मिति टीकायां केवलं शास्त्रयोनित्वं सार्वज्ञेऽनुपयुक्तमित्येव नाभिप्रेतं किंतु सार्वज्ञाद्यभावसाधकं चेत्यभिप्रायेण तद्वाक्यव्याख्यानपूर्वकं तदुक्तां युक्तिमाह ॥ किंचेति ॥ तस्यचेति ॥ भ्रमादेरित्यर्थः ।

तात्पर्यचन्द्रिका

विवरणे तु ''यथा दीपगता प्रकाशनशक्तिस्तदुपादाने वह्नौ तथा वेदगता सर्वप्रकाशनशक्तिस्तदुपादाने ब्रह्मणि । कार्योपादानयोरेकशक्तित्वादित्युक्तम् । तन्न । कारणेऽदृष्टस्यापि शक्तिविशेषस्य कार्ये दर्शनात् । किं च त्वन्मतेंऽधकारदहनादेरपि

ब्रह्मोपादानकत्वात्तद्गता प्रकाशनदाहादिशक्तिमद्ब्रह्म स्यात् । अविद्यापि शास्त्रोपादानमिति सापि सर्वज्ञा स्यात् । किंच परिणामिपरिणामयोरेकशक्तित्वेपि कथमधिष्ठानाध्यस्तयोस्तत् । एतेनाधिष्ठानस्य ब्रह्मणो विज्ञानशक्तिविवर्तरूपं शास्त्रमिति निरस्तम् । अविद्याकाशादेरपि तद्विवर्तत्वेन शास्त्रवत्सर्वप्रकाशकत्वापातात् । रज्ज्वामपि भयकंपादिशक्तेर्ब्रह्मण्यप्यावरणविक्षेपादिशक्तेः प्रसङ्गाच्च । बाह्यागमानामपि ब्रह्मविवर्ततया तदर्थज्ञत्वे ब्रह्मणो भ्रान्तत्वप्रसङ्गाच्च । अपि च त्वया कार्योपादानयोरेकशक्तित्वस्योक्तत्वाद्भेदः स्वयमज्ञ एव जीवान्प्रति प्रकाशक इति ब्रह्मापि तथा स्यात् । तथाच सार्वज्ञार्थं यत्नेऽत्यंताज्ञत्वमेवापन्नम् । किंच जन्मादिकारणत्वेनैवोपलक्षणेनोपलक्ष्यस्वरूपसिद्धेः किं निर्विशेषत्व- प्रतिकूलसार्वज्ञस्फोरणादिना ।

प्रकाशिका – ॥ अदृष्टस्येति ॥ मृत्पिण्डेऽदृष्टस्य जलाहरण- सामर्थ्यस्य घटादौ दर्शनादिति भावः । वेदोपादानत्वेन ब्रह्मणः सर्वप्रकाशशक्तिमत्त्वरूपं सार्वज्ञं चेदंधकारोपादानत्वादसार्वज्ञमपि स्यात् । एवं च त्वदुक्तिर्व्याहतेति भावेनाह ॥ किञ्चेति ॥ दाहादीति ॥ तथाच ब्रह्मणो विभुत्वेन सर्वदाहप्रसङ्ग इति भावः । उपादानत्वस्य त्वन्मतेऽधिष्ठानत्वरूपत्वात्तत्र च नैवमुक्तिर्युक्तेत्याह ॥ किंचेति ॥ एतेन ''रज्जौ भुजंगवद् ब्रह्मण्यारोपितो वेद इति चे''दिति सुधावाक्यात्पूर्वं परिणामपक्षदूषणमपि योज्यमित्युक्तं भवति । ''कथं चैवं सति सार्वज्ञसिद्धि''रित्यादिसुधावाक्यं हृदि कृत्वाह ॥ एतेनेति ॥ तदेवाह ॥ अविद्येति ॥ विवरणमतेपि शास्त्रयोनित्वं सार्वज्ञे विरुद्धमित्याह ॥ ब्रह्मेति ॥ प्रकारान्तरेण विरुद्धत्वमुपपादयन् ''किं च वेदे ज्ञानकारणशक्ति''रित्यादिसुधोक्तमाह ॥ अपि चेति ॥

पाण्डुरङ्गि – ननु नैतत्सूत्रवैयर्थ्यम् । प्रकारान्तरेण सार्वज्ञसाधकत्वात् । तत्र हि शास्त्रोपादानत्वं ब्रह्मण उच्यते । उपादानोपादेययोरेकशक्तिमत्वात् उपादेयगतसर्वप्रकाशनशक्तेर्ब्रह्मनिष्ठत्वात् सार्वज्ञलाभ इति विवरणमतं दूषयितुमनुवदति ॥ कारण इति ॥ ननु कार्यगतसर्वप्रकाशनशक्तेः कारणनिष्ठत्वाभावे तस्याकस्मिकत्वं स्यादतः कारणनिष्ठत्वमावश्यकमेवेति सार्वज्ञं लभ्यत एवेत्यत आह ॥ किंचेति ॥ यदि वेदगता सर्वप्रकाशनशक्तिर्ब्रह्मण्यङ्गीक्रियते कार्यकारणयोरेकशक्तित्वात् तर्हि कार्यकारणयोरेकशक्तित्वादेवाविद्याया अपि सर्वज्ञत्वमङ्गीकार्यं स्यात् । तत्कार्यभूतशास्त्रस्य सर्वप्रकाशकत्वात् । अन्यथा ब्रह्मणोपि तन्न स्यादित्याह ॥ अविद्यापीति ॥ नन्वविद्याया अचेतनत्वाद्भेदोपादा-

नत्वेपि न सार्वज्ञम् । ब्रह्मणश्चेतनत्वात्सार्वज्ञलाभ इत्यत आह ॥ किं चेति ॥ अत्र हि ब्रह्मणः शास्त्रं प्रति कारणत्वं न परिणामित्वं निर्विकारत्वात् । किंत्वारोपाधिष्ठानत्वम् । तथाच शास्त्रारोपाधिष्ठानत्वेपि न ब्रह्मणः सर्वज्ञत्वम् । अन्यथा शुक्ते रजतारोपाधिष्ठानत्वेन शुक्तिरजतयोरप्येकशक्तित्वं स्यादित्यतिप्रसङ्गादिति भावः ॥ एतेनेति ॥ तथाच सार्वज्ञलाभ इति भावः । एतेनेत्यतिदिष्टं दूषणमाह ॥ अविद्याकाशादेरिति ॥ न च ब्रह्मणि शक्तिद्वयमङ्गीक्रियते । तत्र विज्ञानशक्तिविवर्तरूपं शास्त्रं सच्छक्तिविवर्तरूपमविद्याकाशादीति नाकाशादेः सर्वप्रकाशत्वापात इति वाच्यम् । निर्विशेषत्वाङ्गीकारेण शक्तिद्वयकल्पने प्रमाणाभावादिति भावः । अध्यस्तगतशक्तेरधिष्ठानगतत्वेऽतिप्रसङ्गमाह ॥ रज्ज्वामपीति ॥ किं च यदि ब्रह्मणो वेदोपादानत्वेन वेदार्थज्ञत्वात्सर्वज्ञतासिद्धिः तर्हि बौद्धागमानामपि ब्रह्मोपादानकत्वात्तदर्थज्ञत्वे भ्रांतत्वं स्यादित्याह ॥ बाह्यागमानामपीति ॥ ननु बाह्यागमार्थज्ञत्वेपि ब्रह्मणो न भ्रान्तत्वम् । विधिरूपतया तदर्थज्ञत्वे हि भ्रांतत्वं स्यात् । किंतु निषेध्यरूपतया तदर्थज्ञत्वम् । तथाच न भ्रांतत्वप्रसङ्गः । किं च भ्रान्तिकल्पितजगद्धेतुत्वेपि यथा न भ्रांतत्वं तथा बाह्यागमार्थज्ञत्वेपि न भ्रांतत्वमित्यत आह ॥ अपिचेति ॥ तथा स्यादिति ॥ स्वयमज्ञ एव जीवान्प्रति प्रकाशकमिति स्यात् । ननु वेदस्याचेतनत्वादज्ञत्वेन प्रकाशकत्वेपि ब्रह्मणश्चेतनत्वात् ज्ञत्वेनैव प्रकाशकत्वमित्यत आह ॥ किंचेति ॥ तथाच सूत्रवैयर्थ्यं तदवस्थमिति भावः ॥

तात्पर्यचन्द्रिका

ननु तर्हि पूर्वसूत्रोक्तसर्वकारणत्वाक्षेपे तत्समाधानार्थमिदमस्तु । उक्तं हि कल्पतरौ

''अथवा वेदनित्यत्वाद् ब्रह्मणो विश्वयोनिता ।
नेति शङ्कामपाकर्तुं शास्त्रयोनित्वमुच्यत''।

इतीति चेन्न । अस्य श्रुतीनां परस्परविरोधपरिहारेण ''यावद्विकार''मित्यादिसूत्रोक्तैर्भिन्नत्वादिसाधारणहेतुभिर्ब्रह्मेतरसर्वानित्यत्वप्रतिपादके वियत्पादे वक्तव्यत्वात् । किंचाध्यापकेपि पूर्वपूर्वसदृशानुपूर्वीरचयितृत्वस्य भावादभिनवानुपूर्वीरचयितृत्वादेश्च ब्रह्मण्यप्यभावादध्यापकादधिकस्य शास्त्रयोनित्वस्य ब्रह्मण्यसिद्धिः । ननु बहुकाल-

(तात्पर्यचन्द्रिका)

विरतसम्प्रदायस्य वेदस्य सर्गादावकस्मान्निस्सरणं ब्रह्मण्यधिकमिति चेन्न । जन्मादिसूत्रेऽस्येत्यनेन शास्त्रस्यापि विवक्षायां घटादिकं प्रति प्रसिद्धकर्तृत्वस्याकाशादीन्प्रतीव लौकिकप्रमाणवाक्यं प्रति प्रसिद्धकर्तृत्वस्य शास्त्रं प्रति वक्तव्यतया निस्सरणावधित्वस्यानुक्तत्वेनेह तत्समर्थनायोगात् । एतेनैव ''अस्यमहत'' इत्यादिवेदवाक्यं ब्रह्मणो वेदकर्तृत्वेन सर्वज्ञत्वं न साधयति वेदस्य सापेक्षत्वप्रसङ्गादिति पूर्वपक्षे साधयति अर्थमुपलभ्य रचयितृत्वस्याभावात् । उच्चारयितृत्वमात्रस्य च सापेक्षत्वानापादकत्वादिति परेषामधिकरणमपास्तम् । ''अस्य महत'' इत्यादेरनुमानरूपत्वाभावाच्च ॥

प्रकाशिका – ''जगत्कारणत्वेन सर्वज्ञत्वं न सिद्ध्यति । वेदाकर्तृत्वादित्याशङ्क्येदमुक्तमिति चे''दित्यादिसुधावाक्यं विवृण्वानः पक्षान्तरमाशङ्कते ॥ नन्विति ॥ तथाच नोक्तदोष इति भावः ॥ यावदिति ॥ ''यावद्विकारं तु विभागो लोकव''दिति वियदधिकरणगुणसूत्रे विक्रियमाणं सर्वं कार्यं विभागः विभक्तत्वात् । भिन्नत्वात् । लोकवत् घटवदिति त्वन्मते व्याख्यातत्वादिति भावः । आदिपदेन ''आकाशस्य ब्रह्मकार्यत्वाभावे तद्व्यतिरेकापत्त्यैकविज्ञानेन सर्वविज्ञानप्रतिज्ञाहानिः । प्रतिज्ञा हि ''यथा सोम्यैकेन मृत्पिण्डेने''त्यादिशब्दैरव्यतिरेकाभिप्राया'' इत्यादिना ''प्रतिज्ञाहानिरव्यतिरेकाच्छब्देभ्य'' इत्यादिसूत्रोक्तप्रतिज्ञाहान्यादिहेतवो ग्राह्याः ॥ वियत्पाद इति ॥ अन्यथा वियदादावप्येवमाशङ्कायामत्रैव तन्निरासः स्यादिति भावः । अत्र यत्केनचिदुक्तं तदग्रे निरसिष्यते । उपलक्षणमेतत् । ''वेदकर्तृत्वे सूत्रे प्रमाणानुक्तेः शास्त्रयोनित्वादिति प्रतिज्ञामात्रत्वप्रसङ्गा''दिति सुधोक्तमपि ध्येयम् । सुधोक्तमुपलक्षणमिति मत्वा दोषान्तरमाह ॥ किंचेति ॥ असिद्धिरिति ॥ तथाच कथं तेनोक्तशङ्कानिरास इति भावः । तत्सिद्धांतोक्तमाशङ्क्य निराह ॥ नन्विति ॥ एवं सूत्रार्थं निरस्य तदधिकरणशरीरमपि निराह ॥ एतेनेति ॥ ''लक्षणानन्तरमवश्यापेक्षिते''त्यादिनोक्तदूषणजातेनेत्यर्थः । विस्तृतं प्राक् तदधिकरणशरीरमस्माभिः । सिद्धांतमनुवदति ॥ साधयतीति ॥ ''अस्य महत'' इत्यादिवाक्यं वेदकर्तृत्वेन सर्वज्ञत्वमनुमानविधया साधयतीत्यर्थः ।

पाण्डुरङ्गि – ननु न सूत्रवैयर्थ्यम् । तस्य सार्वज्ञासाधकत्वेपि पूर्वसूत्रोक्तजगज्जन्मादिकारणत्वं किं सर्वकारणत्वं कतिपयकारणत्वं वा नाद्यः वेदस्य नित्यत्वेन

(पाण्डुरङ्गि)

सर्वकारणत्वासम्भवात् नांत्यः तथात्वे लक्षणस्यातिव्याप्तिरिति पूर्वाक्षेपे तत्समाधानार्थं प्रवृत्तत्वादित्याशङ्कते ॥ नन्विति ॥ अस्येति ॥ तथाचात्रासङ्गतमेतदधिकरणमिति भावः । ननु देवताधिकरणवत्प्रासङ्गिकमेतदित्यत आह ॥ किंचाध्यापकेपीति ॥ अध्यापकादधिकस्य शास्त्रयोनित्वस्यासिद्धिरित्येतदसिद्धमिति शङ्कते ॥ नन्विति ॥ अत्राप्यकस्मान्निस्सरणं न समर्थनीयम् । तस्य जन्मादिसूत्रेऽनुक्तत्वात् । तत्र हि अस्येत्यनेन घटादौ प्रसिद्धं कर्तृत्वं यथाकाशादावुच्यते तथा लोकसिद्धं प्रमाणवाक्यं प्रति यत्कर्तृत्वं तस्यैव वक्तव्यत्वादित्याह ॥ जन्मादीति ॥ निस्सारणेति ॥ निस्सारणविषयेऽवधित्वस्य ॥ एतेनैवेति ॥ उच्चारयितृत्वं न पूर्वसदृशानुपूर्वीरचयितृत्वम् । अध्यापकसाधारण्यात् । नाप्यभिनवानुपूर्वीरचयितृत्वम् । ब्रह्मण्यप्यभावात् । नापि बहुकालविरतसम्प्रदायस्य वेदस्य सर्गादावकस्मान्निस्सारणावधित्वम्। तस्य पूर्वमनुक्तत्वेन प्रकृतासङ्गतत्वादित्युपपादनेनेत्यर्थः ॥ वेदस्येति ॥ अस्येत्यनेन ब्रह्म सर्वज्ञं वेदकर्तृत्वादिति हि सार्वज्ञं साधनीयम् । तत्र कर्तृत्वं नामार्थमुपलभ्य रचितत्वम् । एवं चार्थोपलम्भापेक्षा स्यादिति सापेक्षत्वं स्यादित्यर्थः । किं च सत्यनुमानरूपत्वे एवं पूर्वपक्षयित्वा सिद्धांतयितव्यम् । तदेव नेत्याह ॥ अस्यमहत इति ॥

तात्पर्यचन्द्रिका

केचित्तु जगत्कारणं न वेदवाक्यप्रतिपाद्यम् । अनुमानेन सिद्धेः । तथाच वाक्यानामनुमानप्राप्तानुवादित्वेनाविचार्यत्वमिति प्राप्ते अत्यन्तातीन्द्रियत्वेन प्रत्यक्षाद्यविषयत्वात् कार्यत्वाद्यनुमानानां दुष्टत्वेनेश्वरासाधकत्वाच्च वेदान्तवेद्यत्वमित्यननुवादकानां वेदान्तानां विचार्यत्वमिति सिद्धान्त इत्याहुः । तत्र ब्रूमः । ''यतो वे''त्यादिवाक्यं प्रसिद्धार्थयच्छब्दयोगाद्वाक्यान्तरसिद्धकारणत्वानुवादेन तस्य लक्षणत्वविधायकमिति हि ते मतम् । यथोक्तं ''यच्छब्दयोगात्कारणत्वमनूद्यत'' इति ''ब्रह्मलक्षणत्वमेवास्य वाक्यस्य विधेय''मिति च । एवं च कारणत्वस्याऽऽनुमानिकत्वेपि तदनुवादेन लक्षणत्वविधायकस्य ''यतो वे''त्यादेरनुवादकत्वासिद्धेस्तत्सिध्यर्थं कारणत्वस्य ब्रह्मलक्षणत्वमानुमानिकमिति पूर्वपक्षयितव्यं तदेव च शास्त्रयोनीति सिद्धांतयितव्यं स्यात् । किंच कारणवाक्यस्यानुवादकत्वेपि ''सत्यकामः सत्यसङ्कल्पः हिरण्यश्मश्रुर्हिरण्यनख'' इत्यादीनामकारणवाक्यानां विचारः पूर्वपक्षेपि सेत्स्यत्येव । न च जिज्ञासासूत्रे कारणवाक्यस्यैव विचारः

(तात्पर्यचन्द्रिका)

प्रतिज्ञातः । येनेह पूर्वपक्षे स आक्षिप्येत । किंचास्य सूत्रस्य जन्मादिसूत्रस्य च कारणमात्रविचारसाधकत्वे कारणाकारणवाक्यविचारसाधकाद्यचतुर्थसूत्रमध्यस्थत्वमयुक्तम् ।

प्रकाशिका – रामानुजमतं निराह ॥ केचित्त्विति ॥ यतो वेत्यादिवाक्यं किं ब्रह्मणि प्रमाणमुत नेत्यादिश्रुतप्रकाशिकोक्तसंशयो ध्येयः ॥ अनुमानेनेति ॥ कार्यत्वाद्यनुमानेनेत्यर्थः। अप्राप्त एव शास्त्रमर्थवदिति भावः ॥ दुष्टत्वेनेति ॥ जीवानामेव विचित्रज्ञानशक्तिमतां प्रत्येकं कृत्स्नजगन्निर्मातृत्वासम्भवेपि प्रासादादिकर्तृणामिवैकदेशनिर्माणेन मिलित्वा कृत्स्नजगन्निर्मातृत्वोपपत्त्यादिना दुष्टत्वेनेत्यर्थः ॥ यथोक्तमिति ॥ श्रुतप्रकाश इति शेषः ॥ असिद्धेरिति ॥ अन्यथा स्वर्गकामो यजेतेत्यादेरनुवादकत्वं स्यात् । स्वर्गांशेऽनुवादादिति भावः । अस्तु वा कथंचित्कारणवाक्यानामनुवादकत्वं तथापि न विचाराक्षेपो युक्त इत्याह ॥ किंचेति ॥ विचार इति ॥ जीवो वा ब्रह्म वेत्यादिविचार इत्यर्थः । न च तत्र विचारप्रसक्तिरेव नेति वाच्यम् । दहराधिकरणे सत्यकामवाक्यस्य अन्तराधिकरणे हिरण्यश्मश्रुवाक्यस्य त्वन्मते विचारयिष्यमाणत्वात् । न च कारणत्ववत् सत्यकामत्वादिकमप्यानुमानिकमिति पूर्वःपक्षः । त्वया कारणत्व एव पूर्वपक्षितत्वात् । कारणत्वे कार्यत्ववत्सत्यकामत्वादिव्याप्यलिङ्गाभावाच्चेति भावः ॥ न च जिज्ञासेति ॥ तथात्वे अन्तराद्यधिकरणायोगादिति भावः । ननु जन्मादिसूत्रे कारणवाक्यमात्रविचारसाधनादत्रापि तन्मात्रमाक्षिप्य समाधीयत इत्यत आह ॥ किंचेति ॥

पाण्डुरङ्गि – अस्त्वनुमानेन सिद्धिः तथापि वेदवाक्यप्रतिपाद्यत्वं कुतो नेत्यत आह ॥ तथाचेति ॥ अकार्यस्यैव विचार्यत्वादिति भावः । अत्र किं प्रत्यक्षसिद्धव्याप्तिकेन विमतमीश्वरकर्तृकं कार्यत्वादित्येवंरूपानुमानेन जगत्कारणसिद्धिः उत ईश्वरो जगत्कर्ता इति प्रत्यक्षसिद्धपक्षकेन यद्वा कार्यत्वाद्यनुमानेन नोभयमित्याह ॥ अत्यंतातीन्द्रियेति ॥ प्रत्यक्षमादिमूलं यस्य प्रत्यक्षसिद्धपक्षकं तत्सिद्धव्याप्तिकं वा तदविषयत्वादित्यर्थः । तृतीयं प्रत्याह ॥ कार्यत्वादीति ॥ एवंविधाधिकरणवचनं सिद्धान्तविरुद्धमित्याशयेन तत्सिद्धांतं दर्शयति ॥ यतो वेत्यादिना ॥ तत्सिध्यर्थमिति ॥ अनुवादकत्वसिद्ध्यर्थमित्यर्थः । ननु कारणत्वस्य ब्रह्मलक्षणत्वमानुमानिकमित्यत्रैवोक्तस्य पूर्वपक्षस्य तात्पर्यमित्यत आह ॥ किं चेति ॥ किमत्र सर्ववाक्यविचार आक्षिप्यते उत कारणवाक्यविचार एव । नाद्य इत्याह ॥

कारणवाक्यस्येति ॥ सत्यसंकल्पत्वहिरण्यश्मश्रुत्वादेरन्यतोऽप्राप्तत्वादिति भावः । द्वितीयं प्रत्याह ॥ न चेति ॥ ननु जिज्ञासासूत्रे सर्ववाक्यविचारस्य प्रतिज्ञातत्वात्तदन्तर्गत-वाक्यविचार एवाक्षिप्यत इत्यत आह ॥ किंचेति ॥

तात्पर्यचन्द्रिका

एतेनैवाद्वैतिनां शास्त्रं योनिः ज्ञप्तिकारणमस्येति विग्रहाश्रयणेन पूर्वोक्तलक्षण-स्यानुमानतोपमर्दनेनागमोपदर्शनार्थमिदमधिकरणमिति वर्णकान्तरं निरस्तम् । प्रमेये विशेषाभावे प्रमाणे विवादायोगात् । किंचाद्यसूत्रे ब्रह्मशब्देन बृहत्त्वादिधर्मवत्तया द्वितीयसूत्रे च कारणत्वादिधर्मवत्तयोक्ते उत्तरत्रापि ''ईक्षतेर्नाशब्दं अन्तस्तद्धर्मोप-देशात् आकाशस्तल्लिङ्गा''दित्यादावीक्षितृत्वादिभिस्तैस्तैरसाधारणधर्मैः कारणत्वादि-विशिष्टतया तत्तद्वाक्यार्थत्वेन वक्ष्यमाणे ब्रह्मणि शास्त्रं प्रमाणं किं वा बृहत्त्व-कारणत्वादिधर्मरहिते पञ्चमाध्यायसिद्धे त्वदभिप्रेते शून्यब्रह्मणि । नाद्यः । तस्यातात्विकत्वात् । न च तत्वजिज्ञासुं प्रत्यादित एव शास्त्रस्यातत्वावेदकत्वं वक्तुं युक्तम् । अंत्ये तु पूर्वोत्तराविरोधाय न ब्रह्मजिज्ञासा न जन्माद्यस्य यतः अनीक्षतेरित्यादिः सूत्रविन्यासः स्यात् । उक्तं चानुव्याख्याने

''सर्वधर्मोज्झितस्यास्य किं शास्त्रेणाधिगम्यते ।
मिथ्याधर्मविधातुश्च वेदस्यैवाप्रमाणते''ति ॥

किं च

यत्सत्यं नैव तद्वेद्यं यद्वेद्यं तच्च नैव सत् ।
इति ते समयस्तत्र कुत्रार्थे शास्त्रमानता ।

आधुनिकरीत्या फलव्याप्यत्वं दृश्यत्वं इति कल्पने प्रतिवाद्यसिद्धिर्नित्यातीन्द्रियेषु वाद्यसिद्धिरप्रयोजकता च । अपि च शास्त्रपदेनानुमानवदुरागमस्यापि निरासप्रतीते-र्नानुमानमात्रनिरासपरं सूत्रम्।

प्रकाशिका – ''अथवा यथोक्तमृग्वेदादिशास्त्रं योनिः कारणं प्रमाणं यस्य ब्रह्मण'' इत्यपि परभाष्योक्तं निराह ॥ एतेनेति ॥ अतिव्याप्त्यादिरूपफलाभावेनेत्यर्थः । तदेव

(प्रकाशिका)

व्यनक्ति ॥ प्रमेय इति ॥ आनुमानिकत्वे वेदान्तानामनुवादकत्वेनाविचार्यत्वं प्राप्तं तन्निरसितुमिदमित्यनुशयेनाह ॥ किं चेति ॥ परस्य शुद्ध एव शास्त्रयोनित्वाङ्गीकारेपि विशिष्टकल्पोपन्यासः सम्भावितत्वेन वा विशिष्ट एव शास्त्रयोनित्वं त्वयापि वाच्यम् । तस्यैवाध्यायचतुष्टयार्थत्वात् । न तु शुद्ध इति युक्तिसूचनार्थं वेति ध्येयम् । अत एव विशिष्टे शुद्धे वा शास्त्रं प्रमाणमित्येव वक्तव्ये तस्य प्रपञ्चः । पञ्चमेत्युपहासः ॥ वक्तुमिति ॥ सूत्रकृतेति शेषः ॥ पूर्वोत्तरेति ॥ अस्य सूत्रस्येति शेषः । ब्रह्मशब्दस्य विशिष्टार्थत्वादिति भावः ॥ उक्तं चेति ॥ उक्तं पक्षद्वयदूषणमाद्यस्य चतुर्थपादे उक्तमित्यर्थः । अत एव तत्र निरस्तप्रायत्वादेवेह टीकाद्वयेन तद्वर्णकं निरस्तम् ॥ नैव तद्वेद्यमिति ॥ अन्यथा दृश्यत्वस्य व्यभिचारापत्तेरिति भावः । ननु सत्यस्य शुद्धस्य वृत्तिविषयत्वरूपवेद्यत्वाङ्गीकारान्न दोषः । न च दृश्यत्वस्य व्यभिचारः । तस्य फलव्याप्यत्वरूपत्वात् । वृत्तिप्रतिफलितचैतन्यस्य फलत्वात् । तस्य शुद्धेऽभावादित्यत आह ॥ आधुनिकेति ॥ प्रतिवादीति ॥ प्रपञ्चे तस्य सत्त्ववादिभिरनङ्गीकारादिति भावः ॥ वादीति ॥ उभयवाद्यसिद्धिरित्यर्थः ॥ अप्रयोजकतेति ॥ फलस्य कल्पितत्वेनाधिष्ठानत्वायोगेन दृग्दृश्ययोः सम्बन्धान्तरानुपपत्त्याऽऽध्यात्मिक-सम्बन्धसिद्धिरित्याद्यनुकूलतर्कस्य व्याप्यत्वपक्षेऽयोगादिति भावः ॥ नानुमानमात्रेति ॥ अन्यथा शब्दयोनित्वादित्येव ब्रूयात् । सार्धमात्रालाभेन लाघवादिति भावः । अयं च दोषो मतद्वयेपि समः ॥

पाण्डुरङ्गि – एतेनेति ॥ अद्वैतिनां वर्णकांतरं निरस्तमित्यन्वयः । आनुमानता अनुमानसिद्धता । तस्यानिरासेनेत्यर्थः । आगमोपदर्शनार्थं आगमसिद्धत्वोपदर्शनार्थम् । अनुमानेनापि कारणता ब्रह्मण एव सिध्यत्यन्यस्य वा । नाद्य इत्याह ॥ प्रमेय इति ॥ तथाच ब्रह्मकारणतासिद्धिर्यथागमेन एवमनुमानेनापि भवतीति प्रमेये विशेषाभावादनुमानं निराकृत्यागमोपदर्शनमयुक्तमित्यर्थः । न द्वितीयः । एवं ह्यतिव्याप्त्या पूर्वपक्षे आगमेन सिद्धान्त इत्युक्तं स्यात् । तथाचास्मन्मतप्रवेश एव स्यादिति भावः ॥ पूर्वोत्तरेति ॥ अथातो ब्रह्मजिज्ञासेति पूर्वस्यानन्दमयोभ्यासादित्याद्युत्तरस्य चेत्यर्थः । ननु यत्सत्यं नैव तद्वेद्यमित्ययुक्तम् । सत्यस्य ब्रह्मणः शास्त्रवेद्यत्वाङ्गीकारात् । तथाच न शास्त्रस्या-तत्वावेदकत्वम् । न चैवं ब्रह्मणोपि दृश्यत्वापत्त्या मिथ्यात्वं स्यात् । अन्यथा मिथ्यात्व-साधकानुमानस्य तत्रैव व्यभिचारः स्यादिति वाच्यम् । मिथ्यात्वे वृत्तिव्याप्यत्वस्याऽप्रयोज-कत्वात् । तत्प्रयोजकीभूतफलव्याप्यत्वस्य ब्रह्मण्यभावेन व्यभिचाराभावात् । वृत्तिव्याप्य-

त्वाच्च शास्त्रवेद्यत्वस्यापि सम्भवादित्यत आह ॥ आधुनिकेति ॥ प्रतिवाद्यसिद्धिरिति ॥ प्रतिवादिना त्वदभिमतस्य वृत्त्यभिव्यक्ताधिष्ठानचैतन्यस्य विषयत्वस्य वा वृत्तिप्रतिबिम्बित-चैतन्यस्य वा कुत्राप्यनङ्गीकाराद्व्यवहाररूपफलव्याप्यत्वस्य च ब्रह्मण्यपि सत्त्वादिति भावः ॥ नित्येति ॥ अपरोक्षवृत्त्यैव चैतन्यप्रतिफलनादेरङ्गीकृतत्वेन नित्यातीन्द्रियत्वेनैत-द्विषयाऽपरोक्षवृत्तेरेवाभावेन परोक्षवृत्त्यापि प्रतिफलनाद्यभ्युपगमेऽपरोक्षैकरसचैतन्यसम्बन्धेन नित्यातीन्द्रियादेरप्यपरोक्षत्वापत्त्या तत्र फलव्याप्यत्वाभावेन वाद्यसिद्धिरित्यर्थः ॥ अप्रयोजकतेति ॥ नित्यातीन्द्रियादेः फलव्याप्यत्वाभावेपि मिथ्यात्ववद्ब्रह्मणोपि फलव्या-प्यत्वाभावे मिथ्यात्वोपपत्त्याऽप्रयोजकतापि स्यादित्यर्थः ।

तात्पर्यचन्द्रिका

यादवप्रकाशीये तु यतो वेत्यादिवाक्येन कारणत्वमनूद्य ब्रह्मज्ञानं विधेयम् । अन्यथा वाक्यभेदापातात् । तच्च युक्तम् । कारणत्वस्य मानान्तरेणाप्राप्तेरिति शङ्कायां ''सदेव सोम्ये''त्यादिशास्त्रान्तरेण प्राप्तिरस्तीति वक्तुं शास्त्रयोनिसूत्रमित्युक्तं तन्न । लक्षणानन्तरमत्याकाङ्क्षितप्रमाणपरत्वसम्भवेऽन्यपरत्वायोगादित्युक्तत्वात् । शास्त्र-योनित्वहेतोः पूर्वसूत्रोक्तप्रस्तुतब्रह्मकारणत्वरूपसाध्यान्वयसम्भवेऽनुवादकत्व-रूपाध्याहृतसाध्यान्वयायोगाच्च । अयं च दोषो मतान्तरेपि समः । अद्वैतिमते पूर्वसूत्रे कण्ठोक्तकारणत्वत्यागेनार्थाक्षिप्तसार्वज्ञान्वयात् । केषाञ्चित्पक्षे व्यवहिता-द्यसूत्रोक्तविचारकर्तव्यतयाऽन्वयात् ।

प्रकाशिका — अन्यथेति ॥ जगत्कारणत्वस्य ब्रह्मज्ञानस्य च विधौ वाक्यभेदा-दित्यर्थः । सम इत्युक्तमेवाह ॥ अद्वैतीति ॥ यत्कश्चिदाह यतो वेत्यादिवाक्य-मनुमानप्राप्तकारणानुवादित्वादमानमिति प्राप्ते शास्त्रप्रामाण्यादेव जगज्जन्मादिकारणं ब्रह्म नत्वनुमानप्रामाण्यादिति व्यवस्थापयितुमिदं सूत्रम् । तदर्थश्च योनिपदस्य ज्ञप्तिहेत्वर्थकत्वेपि षष्ठीतत्पुरुषो न बहुव्रीहिः । समासप्राबल्यात् । शास्त्रस्य योनित्वं शास्त्रयोनित्वं तस्मा-च्छास्त्रस्य प्रामाण्यात् जगज्जन्मादिलक्षणं ब्रह्म भवतीति । तथा शास्त्रस्य योनित्वाद्वेदस्य कर्तृत्वात्सर्वज्ञं ब्रह्मेत्यद्वैत्युक्तं वर्णकान्तरमप्यत्र ग्राह्यमिति । तन्न । सौत्रशास्त्रपदेन दुरागमस्यापि निरासप्रतीत्याऽनुमानमात्रनिरासस्य सौत्रशास्त्रपदविरुद्धत्वात् । सूत्रे

(प्रकाशिका)

तत्पुरुषाश्रयणे पक्षधर्मताया अलाभेन काकस्य काष्ण्यार्द्धवलः प्रासाद इतिवद्वैयधिकरण्यापत्त्या तदर्थं बहुव्रीरवश्यमाश्रयणीयत्वात् । योनित्वशब्दस्य गुणवाचित्वेन तेन ''पूरणगुणे''त्यादिसूत्रेण षष्ठीसमासनिषेधाच्च । गत्यन्तरे सति ''संज्ञाप्रमाणत्वा''दित्यादिज्ञापकेन समाधानस्य क्लिष्टत्वाच्च । जगत्कारणत्वरूपप्रकृतसाध्येनान्वयसम्भवे जन्मादिलक्षणं ब्रह्मेति साध्याध्याहारायोगाच्च । किंचानुमानं यतो वेत्यादिवाक्योक्तमेव कर्तारमनुमापयति ततोन्यं वा । आद्ये विरोधो नेतीयं चिंता व्यर्था । तस्य श्रुत्यनुग्राहकत्वेन दार्ढ्यहेतुत्वात् । नांत्यः । अनुवादकत्वाप्राप्त्या श्रुत्यप्रामाण्यायोगेन ग्रन्थकृदुक्तरीत्याऽतिव्याप्त्यादिना पूर्वपक्षस्यौचित्याच्च । ''आत्मैकस्तु जनार्दनः दत्तं दुर्वाससं सोममात्मेशब्रह्मसम्भवान् आत्मब्रह्मादयः शब्दास्तमृते विष्णुमव्ययम् । न सम्भवन्ति स्वातंत्र्यात्स्व इति प्रोक्त आत्मायं चाततत्वतः आततत्वाच्च मातृत्वादात्मेति परमो हरिः'' इत्यादिश्रुतिस्मृतिभिरात्मभूरिति चतुर्मुखजनके विष्णौ प्रसिद्धात्मघटित ''नावेदवि''दित्यादिश्रुतेः शिवस्य शास्त्रैकगम्यत्वे उदाहरणत्वायोगेन सिद्धान्तस्यानुदयाच्च । उक्तं चानुव्याख्याने ''विष्णवावेवात्मशब्दस्य रूढत्वान्नशिवादिकान् । श्रुतिर्वक्ती''ति ''सर्वोत्कर्षे देवदेवस्य विष्णोः ततो वेदास्तत्पराः सर्व एवे''त्यादिश्रुतिभिः ''नारायणपरा वेदाः वेदैश्च सर्वैरहमेव वेद्यः वेदे रामायणे चैव यो मामेवमसंमूढो जानाति पुरुषोत्तमम् । स सर्ववित् मुख्यं च सर्ववेदानां तात्पर्यं श्रीपतेः परम् । उत्कर्षेत्विति सर्वज्ञं सर्वकर्तारं नारायणमनामयम् । सर्वोत्तमं ज्ञापयंति महातात्पर्यमत्र हि । सर्वेषामेव वेदाना''मित्यादिस्मृतिभिः ''ऋगाद्या भारतं चैवे''त्युपक्रम्य ''ज्ञेय एतैः सदायुक्तैः केवलागमविज्ञेय'' इति पठितया स्पष्टस्मृत्या च प्रत्यधिकरणं भाष्योक्तश्रुत्यादिभिर्विष्णवेकनिष्ठश्रुतिलिङ्गादिन्यायैश्च विरुद्धत्वाच्च ''ईशानः सर्वविद्याना''मित्यादावीशानादिनाम्नः ''शब्दादेवे''ति सूत्रोक्तरीत्या ''यो देवानां नामधा'' इति श्रुत्या ''अजस्य नाभावि''ति पद्मनाभत्वलिङ्गोपेतया विष्णुपरत्वोपपत्तेरिति दिक् । अद्वैत्युक्तवर्णकांतरांगीकरणं तु ग्रन्थकृदुक्तानेकदूषणपराहतम् । यदत्र कल्पतरूक्तकल्पे ''आनुषङ्गिकार्थत्वान्न पृथक्सङ्गत्यपेक्षेति वियत्पादे निवेश इति दूषणमसङ्गत''मिति भाषणं तन्न । सूत्रार्थत्वेनैव वर्ण्यमानस्यानुषङ्गिकत्वाभावादिति ।

पाण्डुरङ्गि — अन्यथेति ॥ उभयविधान इत्यर्थः ॥ शास्त्रेति ॥ अनुवृत्ताश्रुतयोर्मध्येऽनुवृत्तस्यैव समीचीनत्वादिति भावः । कथं मतान्तरेऽयं दोष इत्यतस्तं दर्शयति ॥ अद्वैतिमत इति ॥

तात्पर्यचन्द्रिका

टीकाक्षरार्थस्तु ॥ ऐक्याभिप्रायाभावे पञ्चरात्राधिक्यकथनमिति ॥ वेदारण्यकशब्देन पञ्चरात्रस्याविवक्षायां "एतेष्वेतद्विशिष्यत" इति निर्धारणायोगः । पञ्चरात्रस्य प्रागनिर्देशात् । वेदविरुद्धतया निर्दिष्टसाङ्ख्याद्यैक्यमभिप्रेत्य साङ्ख्यादिशब्देन पञ्चरात्रविवक्षायां तु पञ्चरात्रादेर्वेदादप्याधिक्यमुक्तं स्यात् । न च तद्युक्तम् । वेदविरोधेनालब्धप्रामाण्यस्य तस्य वेदाधिक्यस्य दूरनिरस्तत्वात् । वेदारण्यकशब्देन पञ्चरात्रविवक्षातु वेदारण्यकैक्याभिप्रायं विना न युक्तेत्यर्थः । यद्वा अदृष्टविषयस्य पौरुषेयवाक्यस्य पञ्चरात्रस्य वेदैकार्थत्वरूपवेदमूलत्वाभावे प्रामाण्यरूपमाधिक्यं न स्यादित्याधिक्योक्त्यन्यथानुपपत्त्या वेदमूलत्वसिद्धिरित्यर्थः । किं नोच्यत इति प्रश्नस्योत्तरमाह ॥ पञ्चरात्रप्रामाण्यसिद्ध्यर्थमिति ॥ वेदप्रामाण्योक्तौ हि न पञ्चरात्रप्रामाण्यसिद्धिः । न ह्यदृष्टविषयस्यापि वेदस्यापौरुषेयस्य प्रामाण्यं पञ्चरात्रप्रामाण्यं विनानुपपन्नम् । न च मूलप्रामाण्योक्तौ मूलिनोपि तत्सिद्धिः । वेदपञ्चरात्रयोर्मूलमूलिभावस्याद्याप्यसिद्धेरिति भावः ॥ पञ्चरात्रप्रामाण्योक्ताविति ॥ पञ्चरात्रस्यावेदमूलत्वे मूलस्य वेदस्याप्रामाण्ये वा प्रामाण्यायोगात्पञ्चरात्रप्रामाण्योक्तौ वेदप्रामाण्यसिद्धिरित्यर्थः ॥ समासप्राबल्यादिति ॥ समस्यमानपदार्थत्यागेनान्यपदार्थप्रधानाद्बहुव्रीहेस्तत्पुरुषस्य तदत्यागेनोत्तरपदार्थप्रधानस्य प्राबल्यमिति भावः ॥ छ ॥ शास्त्रयोनित्वाधिकरणं सम्पूर्णम् ॥ ३ ॥

प्रकाशिका — पञ्चरात्राधिक्योक्तौ कथं वेदपञ्चरात्रयोरैक्यलाभ इत्यत आह ॥ ऐक्येति ॥ निर्धारणेति ॥ "ज्ञानेष्वेतेषु राजेन्द्र सर्वेष्वेतद्विशिष्यते" इत्यत्रैतेष्विति निर्धारणार्थकसप्तम्यंतैतच्छब्दपरामृष्टानां मध्य एव किंचिदेतच्छब्देन परामृश्य "विशिष्यत" इत्यतिशयितत्वेन वाच्यतया पञ्चरात्रस्य पृथक्प्रागनिर्देशेन वेदारण्यपदेनाप्यग्रहणे निर्धार-

(प्रकाशिका)

णार्थकसप्तम्ययोग इत्यर्थः । ननु सांख्याद्यैक्यबुद्ध्या सांख्यादिपदेनैव पञ्चरात्रविवक्षाऽस्त्वित्यत आह ॥ वेदेति ॥ पञ्चरात्रादेः पञ्चरात्रसांख्यादेः ॥ ऐक्येति ॥ एकार्थकत्वाभिप्रायं विनेत्यर्थः । पूर्वं निर्धारणान्यथानुपपत्त्या वेदारण्यपदेन पञ्चरात्रस्य ग्रहणं तदन्यथानुपपत्त्या तयोरैक्यसिद्धिरित्युक्तं इदानीमाधिक्योक्त्यन्यथानुपपत्त्यैव तत्सिद्धिरित्याह ॥ यद्वेति ॥ वेदमूलत्वेत्यैक्यपदार्थविवरणम् । ''वेदस्यैव प्रामाण्यं किं नोच्यते पञ्चरात्रप्रामाण्यसिद्धर्थ'' मित्येतत्सर्वं चोद्यवाक्यमिव भाति । तदयुक्तम् । वेदप्रामाण्येपि पञ्चरात्रप्रामाण्यस्य निर्बीजत्वेन चोद्यानवकाशात् । अग्रे परिहारानुक्तेश्च । वेदप्रामाण्ये पञ्चरात्रप्रामाण्यासिद्धिप्रकाररूपं परिहारमनुक्त्वा पञ्चरात्रप्रामाण्येन वेदप्रामाण्योपपादनासङ्गतेश्चेत्यतः इदमेव प्रश्नोत्तरत्वेन भिन्नवाक्यमभिप्रेत्य व्याचष्टे ॥ किं नोच्यत इति ॥ किंशब्दमात्रं हित्वा पूर्ववाक्यं सर्वमुत्तरत्रानुषंजनीयम् । परिहाराशयं व्यनक्ति ॥ वेदेति ॥ वेदप्रामाण्येन पञ्चरात्रप्रामाण्यं किमर्थापत्त्योत मूलस्योक्तं मूलिनोपि सेत्स्यतीति व्याप्तिबलात् । न द्वयमपि सम्भवतीत्याह ॥ नहीति ॥ ननु यदि वेदप्रामाण्येन पञ्चरात्रादिप्रामाण्यं न सिद्ध्येत्तर्ह्येतत्प्रामाण्येन कथं वेदस्य तत्सिद्धिरित्यतः प्रवृत्तं पञ्चरात्रेत्यादि । तद्व्यनक्ति ॥ पञ्चरात्रेति ॥ बहुव्रीहेरन्यपदार्थे लाक्षणिकत्वात्तत्पुरुषसमासे तदभावात्ततोपि प्राबल्यमिति भाति । बहुव्रीहौ लक्षणायाः तर्काताण्डवे निरासादतोऽन्यथा प्राबल्यमुपपादयति ॥ समस्यमानेति ॥ उत्तरपदार्थप्रधानत्वात्तत्पुरुषस्येति भावः॥ शास्त्रयोनित्वाधिकरणं सम्पूर्णम् ॥३॥

पाण्डुरङ्गि — न चैक्याभिप्रायाभावे आधिक्यकथनमसङ्गतम् । कुतः । न चाप्रकृतत्वादिति वाच्यम् । अप्रकृतस्यैवाधिक्यकथनसम्भवात् । सांख्याद्यैक्याभिप्रायेण पदान्तरेणापि परामर्शसम्भवादित्यतो व्याचष्टे ॥ वेदारण्यकशब्देनेत्यादिना ॥ सांख्यादौ पञ्चरात्रस्य प्रविष्टत्वान्निर्धारणं भविष्यतीत्यत आह ॥ पञ्चरात्रस्येति ॥ ननु पञ्चरात्रस्य सांख्याद्यैक्यात्सांख्यादिशब्देन तस्य विवक्षितत्वेन प्रकृतत्वान्निर्धारणं भविष्यतीत्यत आह ॥ वेदेति ॥ हेतुगर्भमेतत् । तथाच वेदविरुद्धत्वे प्रामाण्यमेव न सम्भवतीति भावः । ननु पञ्चरात्रस्य दृष्टमात्रविषयत्वेन प्रत्यक्षसंवादेनैव प्रामाण्यं भविष्यतीत्यैक्याभिप्रायः किमर्थमित्यत आह ॥ यद्वेति ॥ ननु पञ्चरात्रस्यापौरुषेयत्वात्प्रामाण्यं भविष्यतीत्यत उक्तम् ॥ पोरुषेयेति ॥ ''पञ्चरात्रप्रामाण्यसिद्ध्यर्थ''मित्येतच्छङ्काग्रन्थान्तर्गतमिति प्रतीयते । तदयुक्तम् । तथात्वे परिहाराभावप्रसङ्गात् । न चोत्तरवाक्यमेव परिहारवाक्यमिति वाच्यम् । तस्य शङ्कान्तरोत्तरत्वेनैतच्छङ्कापरिहारत्वाभावादित्यतो ''वेदस्यैव प्रामाण्यं किं नोच्यत''

इत्येतावदेव प्रश्नवाक्यं ''पञ्चरात्रप्रामाण्यसिद्ध्यर्थ''मित्येतत्तु परिहारवाक्यमित्याशयेनाह ॥ किंनोच्यत इति प्रश्नस्योत्तरमाहेति ॥ ननु पञ्चरात्रप्रामाण्यसिद्ध्यर्थं वेदप्रामाण्यमेवोच्यतामत आह ॥ वेदप्रामाण्योक्तौ हीति ॥ ननु पञ्चरात्रप्रामाण्यसिद्ध्यर्थं तत्प्रामाण्योक्तिवद्वेदप्रामाण्यसिद्ध्यर्थं तदुक्तिरप्यावश्यकीत्यत आह टीकायाम् ॥ पञ्चरात्रेत्यादि ॥ तत्र वाक्यार्थानुपपत्तिं दर्शयति ॥ पञ्चरात्रस्येत्यादिना ॥ भाष्ये शास्त्रं योनिर्ज्ञप्तिकारणं यस्येति बहुव्रीहिरित्युक्तम् । तदाक्षिप्तं टीकायां ''समासप्राबल्या''दित्यादिना । तत्र समासप्राबल्यं कथमिति न प्रतीयते । अत आह ॥ समस्यमानेति ॥ छ ॥ शास्त्रयोनित्वाधिकरणं सम्पूर्णम् ॥ ३ ॥

समन्वयाधिकरणम्

ॐ तत्तुसमन्वयात् ॐ ॥ शास्त्रयोनित्वेन कारणत्वस्य नातिव्याप्तिरिति पूर्वाधिकरणफलाक्षेपाद्वा पूर्वाधिकरणसिद्धं कारणस्य शास्त्रयोनित्वं विष्णोरन्यस्य वेति विशेषविचाराद्वाऽनन्तरसङ्गतिः । अत्र शास्त्रयोनित्वं किमन्यस्यापि किं वा विष्णोरेवेति चिन्ता । तदर्थं वेदतात्पर्यनिश्चयः किं शैवागमादिना किंवोपक्रमादिनेति । तदर्थमुपक्रमादेर्बलाबलव्यवस्था न सम्भवत्युत सम्भवतीति । पूर्वपक्षस्तु । कारणत्वस्य शास्त्रयोनित्वेऽप्यतिव्याप्तिः शैवाद्यागमाद्भेदव्याख्यानरूपा(द्वेदजप्रतीत्यनुगुणा) न्मानांतराविरुद्धाद्रुद्रादेः कारणत्वे वेदतात्पर्यनिश्चयात् । काव्यादिव्याख्यानादिव काव्यस्य । तदुक्तं ''व्याख्यानतो विशेषप्रतिपत्ति''रिति । उक्तं ह्यागमेषु ''ज्ञात्वा शिवं शांतिमत्यंतमेतीत्यादिशास्त्रं शिवस्य मोक्षदत्वादिपर''मिति । न च प्रमाणभूतव्याख्येयप्रतीत्यनुसारिव्याख्यान प्रामाण्ये मानांतराविरोधं विना हेत्वंतरापेक्षास्ति । न च कारणत्वमिव शास्त्रतात्पर्यमपि शास्त्रगम्यम् । आत्माश्रयात् । येन शैवागमादिः तात्पर्यानिश्चायकः स्यात् । सर्वे वेदा यत्पदमामनंतीत्यादिश्रुतिरपि शिवे वेदतात्पर्यमित्येवंपरतयाऽऽगमैरेव व्याख्याता । न चैवं पञ्चरात्रादिना विष्णावपि तात्पर्यनिश्चयापत्तिः । तथापि सिद्धांत्यभिप्रेतावधारणासिद्धेः ।

प्रकाशिका — ॐ तत्तुसमन्वयात् ॐ । संगतिफले आह ॥ शास्त्रेति ॥ इति यत्पूर्वाधिकरणफलं तस्याक्षेपादाक्षेपिकी सङ्गतिः । इयं सुधोक्ता । अन्यामपि स्वयमाह ॥ पूर्वेति ॥ पूर्वमुपजीव्यास्य प्रवृत्तेरुपजीव्योपजीवकभावरूपेत्यर्थः । अतिव्याप्तिनिरास एवात्रापि फलमित्युक्तं भवति । पूर्वत्रात्र च फलैक्येपि प्रापकभेदादधिकरणभेद इति बोध्यम् । सङ्गतिटीका व्याख्यातप्रायेति मत्वा ''तत्कारणत्वेने''त्यादि विषयसंशयटीकां व्यनक्ति ॥ अत्रेत्यादिना ॥ शास्त्रयोनित्वं शास्त्रतात्पर्यविषयत्वम् । कारणत्वेनेति शेषः ॥ शैवेति ॥ शैवहैरण्यगर्भसांख्यसौरशाक्तेयपञ्चरात्राद्यागमेनेत्यर्थः । अत एव वक्ष्यति ''न चैवं पञ्चरात्रादिना विष्णावपी''त्यादि । अत एव शास्त्रपदस्य वेदतदनुसारिपरस्य प्रस्तुतत्वेपि तदनुसारिणो निर्णायकत्वेन पृथक्करणाय ''वेदतात्पर्ये''ति वेदपदोक्तिः । तेन शैवादिना वेदतात्पर्यनिश्चयेन्यस्यैव कारणत्वावगमादन्यस्यापीत्याद्यचिंतायामपि पदायोग इति निरस्तम् । पञ्चरात्रादिना विष्णोरपि प्राप्तेः । यद्युपक्रमादीनां बलाबलव्यवस्था न सम्भवति तदा तैस्तात्पर्यानिश्चयाच्छैवपञ्चरात्रादिनैव तन्निश्चयादन्यस्यापीति पूर्वपक्षे फलम् । यदातु सम्भवति तदा तैरेव तात्पर्यनिर्णयाद्विष्णोरेवेति सिद्धान्ते फलमिति बोध्यम् । इयं चिंतापरम्परा न्यायविवरणमूलकपूर्वपक्षोपयुक्ता । भाष्योक्तपूर्वपक्षोपयुक्ता तु आद्य चिंतानन्तरं तदर्थं किं वेदस्यापातप्रतीत एवार्थ उत पूर्वापरविमर्शजन्यधीसिद्धः । तदर्थमापातप्रतीतार्थत्यागे वेदार्थो बाधितो भवत्युत नेत्येवं ध्येया । न चैवं द्वयोर्निरस्यत्वेऽधिकरणभेदः । उपक्रमादिलिङ्गकस्तात्पर्यनिर्णय इति सिद्धांतन्यायेनैकेनानेकेषां निरासेपि तद्भेदाधीनाधिकरणभेदस्येहानाशंक्यत्वात् । अत एव निराकार्यभेदाद्भेद इति कस्यचिदुक्तिरपास्ता । इदं च सुधाकारमते बोध्यम् । टीकाकृन्मतेतु प्रतीतिसमुच्चितस्यैवागमस्य प्रापकतया विशिष्टस्यैकस्यैव निरस्यतया न भेदशङ्कापीति ध्येयम् । एतन्मते शैवाद्यागमादिनेत्यत्रापातप्रतीतिविशिष्टेनेत्यर्थः । पूर्वाक्षेपपूर्वं न्यायविवरणोक्तपूर्वपक्षमारचयति ॥ कारणत्वस्येति ॥ एतेन ''रुद्रादीनामपी''त्यादि टीका व्याख्याता । शैवादेरप्रामाण्यमाशङ्क्याह ॥ वेदव्याख्यानेति ॥ तथाच वक्ष्यति ''प्रमाणभूते''त्यादि ॥ मानान्तरेति ॥ ''न हि रुद्रादे''रित्यादिना वक्ष्यमाणदिशेति भावः ॥ तदुक्तमिति ॥ ''व्याख्यानतो विशेषप्रतिपत्तिर्नहि सन्देहादलक्षणं भवतीति न्यायः ''लण्णि''त्यत्र सूत्रे णित्करणेन ज्ञापित'' इत्युक्तं महाभाष्ये । इत्यादिशास्त्रमित्यादिपदात् ''हिरण्यगर्भः समवर्ततात्रे'' इत्यादिशास्त्रं ग्राह्यम् । शिवस्य शिवादेरित्यर्थः । एतेन ''शैवाद्यागमादित्यादिना

पाशुपतशास्त्रेषु रुद्रादिर्जगत्कारणत्वेन वेदादिवेद्य इति निगादितत्वा''दिति टीका व्याख्याता। अप्रामाण्यमाशङ्क्य प्रागुक्तव्याख्यानपदतात्पर्यं विवृणोति ॥ न चेति ॥ यद्यपि टीकायां ''न च तस्याप्रामाण्येनासाधकत्व''मित्यादिनाऽऽगमाप्रामाण्यमाशङ्क्यप्रतीति-साहित्येन प्रामाण्यमुपपादितं तथापि सुधायां ''न शास्त्रतात्पर्यावगतावापातप्रतीतिर्वा व्याख्यातृवचनं वालिङ्ग''मिति द्वयोः स्वतंत्रहेतुत्वोक्तेस्तत्समर्थनाय प्रतीतिनैरपेक्ष्येण प्रामाण्योपपादनमित्यदोषः ।

ननु कारणत्ववत्तात्पर्यमपि ''सर्वेवेदा'' इत्यादिशास्त्रगम्यम् । अतो नान्येषामपि प्रसक्तिरित्यत आह ॥ न चेति ॥ आत्माश्रयादिति ॥ तात्पर्यज्ञानस्य शास्त्रार्थज्ञाने हेतुत्वात्तस्य च शास्त्रजन्यत्वे तात्पर्यस्यापि शास्त्रार्थतापत्त्या शास्त्रार्थज्ञाने शास्त्रार्थज्ञानं हेतुरिति स्यादित्यर्थः । ननु सर्वशास्त्रतात्पर्यनिश्चयः ''सर्वे वेदा यत्पदमामनंति तपांसि सर्वाणि च यद्वदंति । यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं सङ्ग्रहेण ब्रवीमी''त्युपक्रम्य ''तद्विष्णोः परमं पद''मित्युक्तेर्विष्णावेव सर्ववेदतात्पर्यमनेनावगम्यते । एतद्वाक्यतात्पर्यं त्वन्येनास्तु । नैतावताऽऽत्माश्रय इत्यतस्तात्पर्यस्य शास्त्रगम्यत्वमुपेत्याह ॥ सर्वेवेदा इति ॥ शिवे शिवादौ । विष्णोः परमं पदं प्राप्यं शिवादिरूपमित्येवंरूपतया तस्यार्थ इति भावः । यथाच ''वेदैश्च सर्वैरहमेव वेद्य'' इत्यादि शास्त्रबलाद्वेदादिकं विष्णोः प्रतिपादकमिष्यत'' इति न्यायविवरणटीकां हृदि कृत्वाह ॥ न चैवमिति ॥ अवधारणेति ॥ विष्णोरेव जगत्कारणत्वेन शास्त्रयोनित्वमित्यवधारणासिद्धेरित्यर्थः । एतच्च सौत्रावधारणार्थतु-शब्दव्यावर्त्यमिति बोध्यम् ।

पाण्डुरङ्गि — ॐ तत्तुसमन्वयात् ॐ ॥ अनन्तरसङ्गतिं दर्शयति ॥ शास्त्रयोनित्वेनेति ॥ पूर्वपक्षोपसंहारटीकानुसारेणाद्या सङ्गतिः सन्देहटीकानुसारेण द्वितीयेति बोध्यम् । फलाक्षेपात्सङ्गतिरित्युक्तम् । तत्राक्षेपं दर्शयंश्चिंताप्रकारमाह ॥ अत्रेति ॥ फलाक्षेपमुप-पादयति ॥ पूर्वपक्षस्त्विति ॥ कारणत्वस्येति ॥ रुद्रस्यापि शास्त्रे कारणत्वस्य प्रतिपादनादिति भावः । ननु शास्त्रेण रुद्रस्य कारणत्वे प्रतिपादितेपि शास्त्रस्य रुद्रकारणत्वे तात्पर्याभावान्नातिव्याप्तिरित्यत आह ॥ शैवाद्यागमादिति ॥ अत्र शैवाद्यागमाद्रुद्रादेः कारणत्वे वेदतात्पर्यनिश्चयादित्यन्वयः । शैवाद्यागमादेः शास्त्रतात्पर्यनिश्चायकत्वं किं तेनासम्बन्धात् तद्विरुद्धत्वाद्वा मानांतरविरोधाद्वेति विकल्प्य क्रमेण दूषयति ॥

वेदव्याख्यानरूपादित्यादिना ॥ मानांतरेति ॥ न च विष्णुकर्तृत्वप्रतिपादकमानांतरविरुद्धत्वात्कथं तदविरुद्धत्वमिति वाच्यम् । शैवाद्यागमविरोधेन तस्य स्वार्थे तात्पर्याभावाद्देशकालव्यवस्थयोभयकारणत्वस्य वक्ष्यमाणत्वेन तद्विरोधाभावाच्चेति भावः । अप्रयोजकतां परिहरति ॥ काव्यादीति ॥ हेत्वसिद्धिं परिहरति ॥ उक्तं हीति ॥ अथवा कालादीत्यनेन व्याप्तिमुपपाद्याप्रयोजकतां परिहरति ॥ उक्तं हीति ॥

विशेषप्रतिपत्तिः तात्पर्यार्थप्रतिपत्तिरित्यर्थः । व्याख्यानस्याप्रामाण्यं द्वेधा । व्याख्येयाप्रामाण्येन वा प्रमाणांतरविरोधेन वा । तत्र प्रकृते न व्याख्येयाप्रामाण्यम् । वेदस्य प्रमाणत्वात् । न द्वितीयः । तदभावादित्याह ॥ न चेति ॥ ननु कारणस्येव शास्त्रतात्पर्यस्यापि शास्त्रैकसमधिगम्यत्वेन शैवाद्यागमानां च शास्त्रत्वेन शास्त्रतात्पर्यनिश्चायकत्वमित्यत आह ॥ न चेति ॥ यद्वाऽन्यथानुपपत्त्या च शैवाद्यागमस्यैव तात्पर्यनिश्चायकत्वमावश्यकमित्यभिप्रेत्याह ॥ न चेति ॥ तथाहि ॥ तात्पर्यनिश्चायकं किं शास्त्रं किं वोपक्रमादिकम् । आद्येपि स्वतात्पर्यनिश्चायकं स्वयमेव वा साध्यायोध्येतव्य इत्यादिवत्सर्वे वेदा इति साधारणमेव वा । नाद्य इत्याह ॥ आत्माश्रयादिति ॥ अनिश्चिततात्पर्यकस्य शास्त्रस्य तात्पर्यनिश्चायकत्वायोगान्निश्चिततात्पर्यकस्यैव शास्त्रस्य तात्पर्यनिश्चायकत्वं वाच्यम् । तथाच शास्त्रतात्पर्यनिश्चयार्थं शास्त्रतात्पर्यनिश्चयापेक्षायामात्माश्रय इति भावः । न द्वितीय इत्याह ॥ सर्व इति ॥ ननु पञ्चरात्रादिना विष्णुकारणत्वे वेदतात्पर्यनिश्चयात्कथं रुद्रकारणत्वे वेदतात्पर्यनिश्चय इत्याशङ्क्य परिहरति ॥ न चेति ॥ अवधारणेति ॥ विष्णुरेव कारणत्वादिना शास्त्रवेद्य इत्यवधारणासिद्धेरित्यर्थः ।

तात्पर्यचन्द्रिका

उपक्रमादितु न तात्पर्यनिश्चायकम् । अश्वप्रतिग्रहेष्टिरुपक्रमाद्दातुरुपसंहारात् प्रतिग्रहीतुरिति प्रसङ्गात् । परस्परविरोधे मानांतरविरोधं विनैकेनान्यस्य बाधस्त्वयुक्तः । द्वयोरपि शास्त्रैकदेशत्वेन तुल्यत्वात् । न चानुपसंजातविरोधित्वेन पूर्वस्योपक्रमस्य बलीयस्त्वेनोपसंहारस्यास्वारस्यम् । अपच्छेदादौ परबलीयस्त्वस्यापि स्वीकारात् । न चोपसंहारस्य व्याख्यानरूपतया बलीयस्त्वेनेतरास्वारस्यम् । वेदोपक्रमाद्यधिकरणेषूपक्रमबलीयस्त्वस्याप्युक्तेः । पौरुषेयवाक्ये तु विवक्षानुसारेणान्यत्रेयम् । अभ्यासोपि न तात्पर्यधीहेतुः । असकृदुक्तेर्वैयर्थ्यात् । अन्यथा समिधो

यजतीत्यादावभ्यासात्कर्मभेदो न स्यात् । पौनरुक्त्यं च न क्वापि दोषः स्यात् । मानांतराग्राह्यार्थत्वरूपाऽपूर्वतापि न तात्पर्यधीहेतुः । श्रुतिमूलस्मृत्या सर्वज्ञत्वादिसाधकसर्वकर्तृत्वाद्यनुमानेन जगत्सत्यत्वजीवेशभेदादिग्राहिप्रत्यक्षेण च गृहीतार्थायाः श्रुतेरतात्पर्यप्रसङ्गात् । फलमपि न तात्पर्यधीहेतुः । अश्रुतफलानां नित्यादिवाक्यानामतात्पर्यापातात् । अफले श्रुतितात्पर्यानुपपत्त्या च फलकल्पनेन्योन्याश्रयात्। एवमर्थवादोपि । लोके वेदे चार्थवादहीनानामपि तात्पर्यदृष्टेः । उपपत्तिरपि श्रुत्युक्ता वानुक्ता वा । न द्वयमपि । सापेक्षत्वेनानपेक्षत्वरूपप्रामाण्यहानेः । अत एव ''तेन ह्यन्नं क्रियत'' इत्यादिहेतुवन्निगदार्थवादस्य हेतुसमर्पकत्वेऽप्रामाण्यप्रसङ्गात्तत्त्यागः। तस्मान्नोपक्रमादिना तात्पर्यनिश्चयः । किं तु सर्वज्ञप्रणीतागमादेव ।

प्रकाशिका — एवं सौत्रान्वयपदव्यावर्त्ययोर्व्याख्यानप्रतीतिमूलयोर्मध्ये व्याख्यानमूलं पूर्वपक्षं प्रपञ्च्य प्रतीतिमूलमग्रे प्रपञ्चयिष्यन्संशब्दव्यावर्त्य ''मुपक्रमादीनामपि क्वचित्तात्पर्यव्यभिचारदर्शनात्कथं लिङ्गत्व''मिति संक्षिप्य सुधोक्तं प्रपञ्चयति ॥ उपक्रमादित्विति ॥ येन विष्णोरेव तन्निश्चयापत्तिरिति भावः । तदेव प्रपञ्चयति ॥ अश्वेति ॥ ''प्रजापतिर्वरुणायाश्वमनयत् स स्वांदेवतामार्च्छत् सपर्यदीर्यत स एतं वारुणं चतुष्कपालमपश्यत् तन्निरवपत् ततो वै सवरुणपाशादमुच्यते''त्युपक्रमे प्रजापतिर्वरुणायेति दातृत्वेनोक्तः प्रजापतिः स्वांदेवतां वरुणग्रहरूपामार्च्छत् । प्रजापतिरश्वं दत्वा जलोदरव्याधिमाप्नोदित्यर्थः । स प्रजापतिः पर्यदीर्यतेत्यादिना दातुरिष्टिः प्रतीयते । ''यावतोश्वान्प्रतिगृह्णीयात्तावतो वारुणांश्चतुष्कपालान्निर्वपे''दित्युपसंहारे स्पष्टं प्रतिग्रहीतुरिष्टिरिति प्रतीयत इत्यर्थः । नन्वन्योन्यविरोधे एकेनान्यबाधोस्त्वित्यत आह ॥ परस्परेति ॥ तुल्यबलयोर्बाध्यबाधकभावायोगादिति भावः । उपक्रमस्य प्राबल्यमाशंक्य निराह ॥ न चेति ॥ तदोपसंहारकृतविरोधानुपस्थितेरिति भावः । अधिकरणशरीरमग्रे वक्ष्यामः । अपच्छेदादाविति ॥ षष्ठे ''पूर्वापर्ये पूर्वदौर्बल्यं प्रकृतिव''दिति पञ्चमपादीयाष्टादशाधिकरणे चिंतितम्। ज्योतिष्टोमे ''यदि प्रतिहर्तापच्छिंद्यात्सर्ववेदसं दद्यात् । यद्युद्गातापच्छिंद्याददक्षिणं तं यज्ञमिष्ट्वा तेन पुनर्यजेत तत्र तद्द्याद्यत्पूर्वस्मिन्दास्यन्स्या''दित्यपच्छेदद्वये प्रायश्चित्तद्वयं श्रुतम् । अस्यायमर्थः । प्रातः सवने बहिष्पवमानेन स्तोष्यमाणा ऋत्विजः शालाया बहिः प्रसर्पति । तदैकस्य पृष्ठतोन्य इत्येवं पिपीलिकापङ्क्त्याकारेण गन्तव्यम् । तत्र पुरोगन्तुः

कच्छं गृहीत्वैव पृष्ठतोन्यो गच्छेत् । एवं सति यदि दैवात्प्रतिहर्ता स्वगृहीतं कच्छं मुंचेत्तदा तस्मिन्नेव प्रयोगे सर्वस्वं दद्यात् । यद्युद्गाता मुंचेत्तदा दक्षिणामदत्वा प्रक्रांतयज्ञं समाप्य पुनस्तेन यक्ष्यन्पूर्वं यदीरितं द्रव्यं तद्दद्यादिति । तत्रानुपूर्व्येण द्वयोरपच्छेदे किं पूर्वोत्पन्ननिमित्तं प्रायश्चित्तं कार्यमुत विकल्पोथोत्तरनिमित्तमिति संशये पूर्वनिमित्तमसंजातविरोधिनिर्विघ्नमवगम्यत इति तद्बलीयस्त्वं विकल्पो वा । द्वयोरपि प्रामाण्यादिति प्राप्ते नात्र पूर्वेणोत्तरस्य ज्ञानस्योत्पत्तिः शक्यते विरोद्धुम् । प्रत्यक्षवाक्येन तदुत्पद्यत एव । तच्च जायमानं स्वविरुद्धं पूर्वज्ञानं बाधमानमेवोत्पद्यते । तेनैवोत्पन्नमपि पूर्वज्ञानं मिथ्या भवति । बाधितत्वात् । अतः परप्राबल्यादुत्तरनिमित्तमेव प्रायश्चित्तं कार्यमिति सिद्धांत इति ॥ आदिपदेन ''संदिग्धेतु वाक्यशेषा''दित्यादिग्रहः ॥ वेदोपक्रमेति ॥ तृतीये ''श्रुतेर्जाताधिकारः स्या''दिति तृतीयपादीयाद्याधिकरणे ''प्रजापतिरकामयत प्रजाः सृजेयेति । सतपोतप्यत । तस्मात्तेपानात्त्रयोदेवा असृज्यंत । अग्निर्वायुरादित्यस्ते तपोतप्यन्त । तेभ्यस्तेपानेभ्यस्त्रयो वेदा असृज्यन्त । अग्नेर्ऋग्वेदो वायोर्यजुर्वेद आदित्यात्सामवेद'' इत्युपक्रम्य ज्योतिष्टोमप्रकरणे श्रुतं ''उच्चैर्ऋचाक्रियते उच्चैः साम्ना उपांशु यजुषे''ति वाक्यमुदाहृत्य किमुच्चैष्त्वादयो मन्त्रधर्माः किं वा वेदधर्मा इति संशये विधिवाक्ये मन्त्रवाचिनामृगादिशब्दानां प्रयोगान्मंत्रधर्मा उच्चैष्त्वादयः तथाच यजुर्वेदोत्पन्ना अध्वर्युणा प्रयुज्यमाना अप्यृच उच्चैरेवोच्चरितव्या इति प्राप्ते असंजातविरोधित्वेन प्रबलमुपक्रममनुसृत्य तद्भशेनोपसंहारस्य नेतव्यत्वादुपक्रमगतवेदपदानुसारेण विध्युद्देशगतानामप्यृगादिशब्दानां वेदपरत्वे सति ऋचोपि यजुर्वेदोत्पन्ना उपांशु पठनीया इति सिद्धांतितम् । नन्वेवं शैवादिभिरपि तात्पर्यनिश्चयो नस्यात् । अनिश्चिततात्पर्याणां तेषां वेदतात्पर्यानिश्चायकत्वात्। तत्तात्पर्यनिश्चयस्य च शैवादिभिरेव जनने आत्माश्रयापत्त्योपक्रमादेरेव तत्रानुसर्तव्यत्वात् । तेषां चोक्तदिशा बलाबलव्यवस्थाऽयोगादित्यत आह ॥ पौरुषेयेति ॥ वेदेच वक्तुरभावादिति भावः ॥ समिधो यजतीति ॥ द्वितीयस्य द्वितीये पादे ''एकस्यैव पुनः श्रुतिरविशेषादनर्थकं हि स्या''दिति द्वितीयेधिकरणे ''समिधो यजति तनूनपातं यजती''त्यादि पञ्चकृत्वोभ्यस्तं यजतिपदं धात्वर्थावच्छिन्नामेकां भावनां वक्त्युत प्रत्यभ्यासंभावनाभेदमिति संशये प्रकृतिप्रत्यययोः पुनः पुनः श्रवणात्सन्निधिकृतप्रत्यभिज्ञावशाच्छब्दाभेदेऽर्थभेदस्यालीकत्वात्स एव यागः सैव च भावनैकैवेति प्राप्ते अप्रवृत्तप्रवर्तनात्मकविधिविरोधापत्त्या पुनः श्रवणरूपाभ्यासाद्यागभावनयोर्भेद इति सिद्धान्तितम् । अभ्यासस्यतात्पर्य धीहेतुत्वे यागभावनारूपकर्मभेदो न स्यादित्यर्थः ।

पौनरुक्त्यं चेति ॥ अन्यथेत्यनुकर्षः । वक्ष्यमाणदूषणसौकर्यायापूर्वतास्वरूपं विवृण्वंस्तदहेतुत्वमाह ॥ मानांतरेति ॥ बहुव्रीहिः स्मृतिगृहीतार्थाया धर्माधर्मादिबोधकश्रुतेः अनुमानगृहीतार्थायाः सार्वज्ञश्रुतेः प्रत्यक्षगृहीतार्थाया विश्वसत्यत्वादिश्रुतेरित्यर्थः । स्वार्थ इति शेषः । फलवत्त्वरूपफलस्यापि तन्नेत्याह ॥ फलमपीति ॥ नित्यनैमित्तिककर्मबोधकानामित्यर्थः । अफले फलरहिते कर्मणीत्यर्थः । सिद्धे तात्पर्ये तद्बलात्स्वर्गादिरूपफलकल्पना फलवत्त्वेन च तात्पर्यकल्पनेत्यन्योन्याश्रयादित्यर्थः ॥ एवमिति ॥ न तात्पर्यधीहेतुरित्यनुकर्षः ॥ दृष्टेरिति ॥ तथाच व्यभिचारान्न हेतुरित्यर्थः ॥ सापेक्षत्वेनेति ॥ श्रुतेर्युक्तिसापेक्षत्वेनेत्यर्थः ॥ अनपेक्षत्वरूपेति ॥ उक्तं च तर्कपादे जैमिन्याचार्यैः ''औत्पत्तिकस्तु शब्दस्यार्थे न सम्बन्धस्तस्य ज्ञानमुपदेशोऽव्यतिरेकश्चार्थेऽनुपलब्धे तत्प्रमाणं बादरायणस्यानपेक्षत्वा''दितीति भावः ॥ अत एवेति ॥ आद्ये ''हेतुर्वा स्यादर्थवत्त्वोपपत्तिभ्या''मिति द्वितीयपादे तृतीयेधिकरणे ''शूर्पेण जुहोति तेन ह्यन्नं क्रियत'' इत्युदाहृत्य शूर्पेण होमे कर्तव्येऽन्नकरणत्वं हेतुरुतार्थवाद इति संशये लक्षणयाहि प्राशस्त्यपरत्वमतोन्नकरणत्वं हेतुरिति प्राप्ते वेदेनोच्यमानस्य शूर्पहोमसाधनत्वस्य हेतुसापेक्षत्वे वेदस्याप्रामाण्यापत्तेः प्ररोचनार्थमर्थवादस्यापेक्षितत्वात् ''तेन ह्यन्नं क्रियते'' इत्ययमर्थवाद इति सिद्धांतितम् ॥ अप्रामाण्येति ॥ तेन हीति वाक्यसमर्पितहेतुसापेक्षत्वेन शूर्पेणेति विध्युद्देशस्याप्रामाण्यप्रसङ्गात् तस्य हेतुसमर्पकत्वत्याग इति वा तेन हीत्यस्यैव हेतुत्वोपपादकव्यास्यादिबोधकमानांतरसापेक्षत्वापातेन वा तत्त्याग इत्यर्थः । एवं समन्वयपदाभ्यां व्यावर्त्य न्यायविवरणोक्तं पूर्वपक्षमुपसंहरति ॥ तस्मादिति ॥ बलाबलानिरूपणाद्व्यभिचारात् श्रुत्यप्रामाण्यापाताच्चेत्यर्थः ।

पाण्डुरङ्गि — ननूपक्रमादेस्तात्पर्यनिश्चायकत्वेनोपक्रमादिनाच तात्पर्यविचारे क्रियमाणे विष्णोरेव कारणत्वे सर्वशास्त्रतात्पर्यं प्रतिपाद्यत इति कथं रुद्रादेः कारणत्वे शास्त्रतात्पर्यमित्यतः स्यादेतदेवं यद्युपक्रमादेर्निर्णायकत्वं स्यात्तदेव नास्तीत्याह ॥ उपक्रमादीति ॥ ननु तत्रैकेनापरबाधः किं न स्यादित्यत आह ॥ परस्परेति ॥ ननूपक्रमस्योपसंहारापेक्षया प्रबलत्वात्तेनोपसंहारबाधः किं न स्यादित्यत आह ॥ द्वयोरपीति ॥ तथाच बाधकत्वप्रयोजकस्याधिकबलत्वस्याभावान्नैकेनापरबाध इति भावः। ननूपक्रम एवास्तूपसंहारबाधकः। अनुपसंजातविरोधित्वेन बलवत्तया बाधकत्वसम्भवादित्याशंक्य निषेधति ॥ न चेति ॥ इतरास्वारस्यमिति ॥ उपक्रम स्वारस्यमित्यर्थः । नन्वनिश्चिततात्पर्यस्य शैवाद्यागमादे-

(पाण्डुरङ्गि)

स्तात्पर्यानिश्चायकत्वेन तत्र तात्पर्यनिश्चयस्यावश्यकत्वात् तस्य चोपक्रमादिभिर्विना प्रकारान्तरेणासम्भवात्तैरेव वक्तव्यत्वात् तत्रानुपपत्तिपरिहारस्यापि यथाकथंचित्कर्तव्यत्वात्तैरेव तात्पर्यनिश्चयोस्तु । अन्यथा गौरवापत्तेरित्यत आह ॥ पौरुषेयवाक्ये त्विति ॥ विवक्षानुसारेणेति हेतुगर्भम् । तथाच पौरुषेयवाक्ये वक्तृविवक्षायाः सत्त्वादेकानुसारेणान्यत्रेतुं शक्यते । प्रकृतेतु वेदस्यापौरुषेयत्वेन वक्तृविवक्षाया असम्भवान्नैकानुसारेणापरं नेतुं शक्यमित्यर्थः । ननु मास्तूपक्रमोपसंहारयोस्तात्पर्यनिश्चायकत्वं तथाप्यभ्यासस्य तात्पर्य-निश्चायकत्वं स्यादित्यत आह ॥ अभ्यासोपीति ॥ अथवा अभ्यासंलक्षणकथन-बीजयुक्तिमाह ॥ असकृदुक्तेरिति ॥ वैयर्थ्यात् निष्प्रयोजनत्वादित्यर्थः । ननु निष्प्रयोजनत्वमसिद्धम् । तात्पर्यनिश्चयस्यैव प्रयोजनस्य सद्भावादित्यत आह ॥ अन्यथेति ॥ असकृदुक्तेस्तात्पर्यनिश्चायकत्वे समिधो यजतीत्यादावप्यसकृदुक्तेस्तात्पर्य- निश्चायकत्वापत्त्या वैयर्थ्याभावेन तदन्यथानुपपत्त्या कर्मभेदो न स्यादित्यर्थः ॥ पौनरुक्त्यं चेति ॥ तत्रापि तात्पर्यनिश्चायकत्वस्य वक्तुं शक्यत्वादित्यर्थः ॥ मानांतरेति ॥ सर्वदाशब्दार्थकथनमेतत् । श्रुतेरतात्पर्येति ॥ ''यः सर्वज्ञ'' इत्यादिश्रुतेः सार्वज्ञे ''विश्वं सत्य''मित्यादि-श्रुतेर्विश्वसत्यत्वे ''द्वासुपर्णे''त्यादेर्जीवभेदादौ तात्पर्यं न स्यादित्यर्थः । अस्तु तर्हि फलस्य तात्पर्यनिश्चायकत्वमत आह ॥ फलमपीति ॥ नित्यादिवाक्यानामिति ॥ अहरहः संध्यामुपासीतेत्यादीनामित्यर्थः । आदिपदेन नैमित्तिकवाक्यग्रहणम् । ननु नित्यादि-वाक्येष्वपि श्रुतितात्पर्यान्यथानुपपत्त्या फलं कल्प्यत इत्यत आह ॥ अफल इति ॥ अन्योन्याश्रयादिति ॥ फले सिद्धे तात्पर्यज्ञापकस्य विद्यमानत्वात् श्रुतितात्पर्यसिद्धिः श्रुतितात्पर्ये सिद्धे निष्फले तदसम्भवेन फलसिद्धिरित्यन्योन्याश्रयापातादित्यर्थः । तथाप्यर्थवाद एव तात्पर्यधीहेतुर्भविष्यतीत्यत आह ॥ एवमिति ॥ एवमित्यतिदिष्टं दूषणमाह ॥ लोक इति ॥ अत एवेति ॥ श्रुत्युक्ताया अनुक्ताया वोपपत्तेस्तात्पर्यनिश्चायकत्वे तत्सापेक्षत्वेनानपेक्षत्वलक्षणप्रामाण्यहानेरेवेत्यर्थः ।

तात्पर्यचन्द्रिका

यद्वा शास्त्राद्रुद्रादेः कारणता तावद्भाति । तत्र शास्त्रतात्पर्यं चाबाधितप्रतीत्या निश्चीयते । न हि रुद्रादेः कारणत्वे शास्त्रादन्यद्बाधकमस्ति । नैषा तर्केणेत्यादिश्रुत्या कारणतायामशास्त्रस्य साधकताया इव बाधकताया अप्यभावात् । नापि विष्णोः कारणत्वसाधकं रुद्रादेः कारणत्वनिषेधकं वा शास्त्रं बाधकम् । वैपरीत्यस्यापि

सम्भवात् । पूर्ववादिनश्च सिद्धांत्यभिमतविष्ण्वेकनिष्ठत्वनिश्चयविघटनेन कृतार्थत्वात्। कालादिभेदेन विष्णोः कारणत्वस्य रुद्रादेः तदभावस्य चोपपत्तेश्च । अबाधोपपत्तौ च बाधस्यान्याय्यत्वात् । पक्षे बाधस्य च षोडशिग्रहणाग्रहणयोरिव न्यायप्राप्तत्वात् । यदि च पौरुषेयेण पूर्वापरपरामर्शेन शब्दस्वरसप्रतीतत्यागः तदा पुरुषोत्प्रेक्षयाऽपौरुषेयः शब्दो बाध्येत । एवं च विष्णोरेव कारणत्वे सर्वैः कारणवाक्यैः प्रतिपाद्यत्वस्य हेतुत्वेऽसिद्धिः । कतिपयप्रतिपाद्यत्वस्य हेतुत्वे तु व्यभिचार इति । अत्र चाद्यपूर्वपक्षो ''न च पाशुपतशास्त्रोदितत्वादि शास्त्रप्रतिपाद्यत्वे कारण''मिति न्यायविवरणोक्तः । द्वितीयस्तु ''अज्ञानां प्रतीयमान''मिति भाष्योक्तः । अत एव सुधायां ''न शास्त्रतात्पर्यावगतावापातप्रतीतिर्वा व्याख्यातृवचनं वा लिङ्ग''मित्युक्तम् । अत्र तु टीकायां न्यायविवरणे आदिपदेन प्रतीतेरप्युक्तत्वाद्भाष्ये प्रतीत्या पाशुपतादिशास्त्रस्याप्युपलक्षणात् प्रतीतिसध्रीचीनागमेनैक एव दृढः पूर्वपक्षो दर्शितः ।

प्रकाशिका — वेदजन्यापातप्रतीतिमूलं भाष्योक्तमन्वयपदव्यावर्त्यं पूर्वपक्षांतरमाह ॥ यद्वेति ॥ शास्त्रात् ''ज्ञात्वा शिवं'''हिरण्यगर्भं'' इत्यादिवेदरूपात् । रुद्रादिकारणत्वम् । शास्त्रतात्पर्यविषयरूपशास्त्रयोनि । शास्त्रजन्यप्रतीतिविषयत्वात् । विष्णुकारणत्ववदिति प्रयोगो बोध्यः। ननु प्रतीतेस्तात्पर्यविषयाविषयकतया भ्रांतित्वेनाप्युपपत्त्या कथं तेन तत्साधनमित्यतस्तदविनाभूतत्वं तस्याह ॥ तत्रेति ॥ रुद्रादिकारणत्व इत्यर्थः । यद्यपि टीकायामापातप्रतीतिरेव पूर्वपक्षमूलत्वेनोक्ता न तस्यास्तात्पर्यार्थविषयकत्वमपि तथापि सुधाभिप्रेतस्वतंत्रसाधनत्वनिर्वाहाय तदप्यत्रोच्यत इत्यदोषः । वाक्यजन्यप्रतीतेर्हि वाक्यतात्पर्यार्थविषयकत्वमौत्सर्गिकम् । क्वचित्तु बाधकादपोद्यते । इहच तद्बाधकं वेदरूपशास्त्रादन्यत्, शिवादिर्न जगत्कर्ता । जननपारतन्त्र्यादि- दोषित्वाच्चैत्रवदित्यनुमानं वा विष्णुकारणत्वादिबोधकं ''न ते विष्ण''वित्यादिशास्त्रं वा। आद्यं तु न बाधकमित्याह ॥ न हीति ॥ तदेवाह ॥ नैषेति ॥ एषा जगत्कारणविषया मतिस्तर्केणानेयाऽपनेया च न भवतीति साधकबाधकत्वयोरपि निरासादिति भावः । अशास्त्रस्य शास्त्रादन्यस्यानुमानादेः ।

द्वितीयं निराह ॥ नापीति ॥ वैपरीत्यस्येति ॥ ''एक एव रुद्रो न द्वितीयाय तस्थे'' इत्यादेः शिवादिकारणत्वसाधकस्य विष्णुकारणत्वनिषेधकस्य शास्त्रस्य सत्त्वात् तच्छास्त्रं

(प्रकाशिका)

विष्णुकारणत्वे बाधकमिति वैपरीत्यस्यापि संभवादित्यर्थः । तथाच वाक्यद्वयं प्रागुक्तदिशा तत्तत्कारणत्वपरमिति भावः । नन्वेवमपि पूर्वपक्षे विष्णुकारणत्वानिरासात्कथ-मिष्टसिद्धिरित्यत आह ॥ पूर्ववादिन इति ॥ नन्वेवमन्योन्यं कारणत्वसाधकबाधकशास्त्रस्य का गतिरित्यत आह ॥ कालादीति ॥ सर्वमसृजतेति विष्ण्वादेः सर्वकारणत्वोक्तिः तत्तत्कालसृज्याभिप्राया सर्वस्रष्टृत्वयोग्यताभिप्राया वेति भावः । ननु विष्णुकारणत्वदशायां तद्बोधकशास्त्रस्य प्रामाण्येऽपि रुद्रकारणत्वबोधकस्य प्रामाण्यानापत्त्या बाधस्यावश्यकत्वे सर्वथैव बाधमुपेत्य विष्णोरेव कारणत्वमुपेयतामित्यत आह ॥ अबाधेति ॥ बाधस्य आत्यंतिकबाधस्य । मीमांसकैरनभ्युपेतत्वादित्यर्थः ॥ षोडशीति ॥ दशमे ''शिष्टिप्रतिषेधः-स्या''दित्यष्टमपादीयतृतीयाधिकरणे अतिरात्रनामके ज्योतिष्टोमसंस्थाविशेषे ''अतिरात्रे षोडशिनं गृह्णाती''ति विधाय श्रुते''नातिरात्रे षोडशिनं गृह्णाती''ति वाक्ये नञ्पर्युदासोऽर्थवादोवा प्रतिषेधोवेति संशये ''यजतिषु येयजामहं करोति नानूयाजे'' ष्वित्यत्रानूयाजभिन्नेष्वितिवन्नञ् पर्युदासः ''नतौ पशौ करोति न सोमे अध्वरे'' इत्यत्र सोमे यथा नाज्यभागौ तथा पशावपीति न सोम इतिवदर्थवादो वेति प्राप्ते अतिरात्रभिन्न इति पर्युदासे प्रागुक्तविधेर्निर्विषयत्वापत्तेः षोडशिनिषेधेन षोडशिन एव स्तुतौ व्याघातेनार्थवादत्वायोगादन्यशेषत्वाभावाच्च तदुभयासम्भवात्प्रतिषेध एवायं अगत्या ग्रहणाग्रहणयोर्विकल्पः । प्रतिषेधार्थवत्त्वायाकरणेऽपि क्रतुसिद्धिरस्तीति कल्प्यते विध्यर्थ-वत्त्वाय चानुष्ठाने फलभूयस्त्वमित्युभयोपपत्तिरिति सिद्धांतितम् । अत्र यथा विहितप्रतिषिद्धत्वरूपन्यायप्राप्तत्वात्पक्षे बाधः सह्यः तथा विष्णुतदितरयोः कारणत्वबोधक-शास्त्रद्वयप्रामाण्यरूपन्यायप्राप्तत्वात्पक्षे बाधः सह्य इत्यर्थः । प्रागुक्तप्रयोगे व्याप्तिमुपपाद्य विपक्षे बाधकमाह ॥ यदिचेति ॥ पूर्वपक्षद्वयेपि टीकादावस्फुटत्वात्फलमाह ॥ एवं चेति ॥ विष्णुस्स्वयमेव कारणं तथा शास्त्रयोनित्वादिति प्रागुक्तहेतावन्यस्यापि कारणत्वेनैकदेश-बोध्यत्वादसिद्धिरित्यर्थः ॥ व्यभिचार इति ॥ रुद्रादावपि कारणत्वेन कतिपयशास्त्र-बोध्यत्वरूपहेतुसत्त्वात्स्वयमेव कारणमिति साध्यं नेति व्यभिचार इति भावः । तथाचान्यस्यापि कारणत्वं प्राप्तमिति पूर्ववदतिव्याप्तिरिति पूर्वाधिकरणफलाक्षेप इति भावः । एतेन ''पाशुपताद्युक्तिप्रतीतिभ्यामन्येषामपि कारणत्वेन शास्त्रयोनित्वे जगत्कारणत्वं न विष्णोरेव लक्षण''मिति टीका व्याख्याता । पञ्चरात्राद्युक्तिप्रतीतिभ्यां विष्णोः कारणत्वेन शास्त्रयोनित्ववदित्यप्यादौ योज्यमित्युक्तं भवति । भाष्ये अदर्शनात्पूर्वपक्षद्वयमूलमाह

॥ अत्रचेति ॥ टीकारीत्यैक एव कुतो नोक्त इत्यतस्तत्र स्पष्टां सिद्धांतसुधासम्मतिमाह ॥ अत एवेति ॥ वाशब्दात्पूर्वपक्षो ज्ञाप्य इति भावः । टीकायामेवं न दृश्यत इत्यतः पक्षांतरमेतदिति भावेन तत्र भाष्याद्यानुकूल्यं दर्शयंष्टीकोक्तपक्षमाह ॥ अत्रतु टीकायामिति ॥ न्यायविवरणटीकाप्युपलक्ष्यते ।

पाण्डुरङ्गि — न्यायविवरणे आदिपदेन प्रतीतेरप्युक्तत्वाद्भाष्ये प्रतीत्या शास्त्रस्याप्युपलक्षणा तदुभयानुसारेण प्रवृत्तटीकानुसारेण पूर्वपक्षमुक्त्वा सुधायां ''न शास्त्रतात्पर्यावगतावापातप्रतीतिर्वा व्याख्यातृवचनं वा लिङ्ग''मित्युभयोरपि प्रत्येकं पूर्वपक्षप्रापकत्वेनोक्तत्वात्तदनुसारेणापातप्रतीतिमात्रस्यापि पूर्वपक्षप्रापकत्वमाह ॥ यद्वेति ॥ यद्वा अस्मिन्पक्षे ''अज्ञानां प्रतीयमानमपी''ति भाष्यस्य ''न शास्त्रतात्पर्यावगतावापातप्रतीतिर्वा व्याख्यातृवचनं वा लिङ्ग''मित्युभयोः समकक्षत्वप्रतिपादकसुधायाश्चास्वारस्यं मनसि निधाय तदनुसारेण पूर्वपक्षमाह ॥ यद्वेति ॥ न चाबाधितप्रतीत्येत्ययुक्तम् । बाधस्यैव प्रतीयमानत्वादिति वाच्यम् । बाधकं हि भवच्छास्त्रं वा तदतिरिक्तं वा । नांत्य इत्याह ॥ न हीति ॥ तत्र हेतुर्नैषा तर्केणेति । ''आपनेया'' इत्यस्यानेया उत्पाद्याऽपनेया निराकार्याच नेत्यर्थद्वयमभिप्रेत्याह ॥ साधकताया इवेति ॥ नाद्य इत्याह ॥ नापीति ॥ वैपरीत्यस्येति ॥ तस्य विष्णुपरत्व उपक्रमादेर्दूषितत्वेन प्रतीतेरेवानुसर्तव्यत्वात्तत्रैव शैवशास्त्रस्य बाधकत्वप्रसङ्गादित्यर्थः । व्यवस्थोक्तौ तु ममापि तुल्यमिति भावः । एवं सतीष्टासिद्धिमाशंक्याह ॥ पूर्वेति ॥ नन्वेवमुभयोरेकदैव कारणत्वे विरोध इत्यत आह ॥ कालादिभेदेनेति ॥ यद्वा किं च नोभयमप्यप्रमाणं व्यवस्थांगीकारादित्याह ॥ कालादीति ॥ नन्वेकेनापरबाध एव किं न स्यादित्यत आह ॥ अबाधेति ॥ ननु यस्मिन्काले रुद्रस्य कारणत्वं तस्मिन्काले विष्णोर्नेति पक्षे बाधः स्यादित्यत आह ॥ पक्ष इति ॥ उपक्रमादीनामेव तात्पर्यनिश्चायकत्वमित्यत्र दूषणान्तरमाह ॥ यदि चेति ॥ एतावता फलितं दूषणमाह ॥ एवं चेति ॥ आद्यपूर्वपक्षस्य भाष्येऽनुक्तत्वाद्भाष्यकारानभिप्रेतोऽयं पूर्वपक्ष इत्यत आह ॥ अत्र चेति ॥ तथाच भाष्येऽनुक्तत्वेपि न्यायविवरण उक्तत्वान्न भाष्यकारानभिप्रेत इति भावः । द्वितीयपूर्वपक्षे न केवलं भाष्यं नियामकं किं तु सुधापीत्याह ॥ अत एवेति ॥ सुधायामुभयोरपि समप्रधानभावेनोक्तत्वादिति भावः । एवं सुधोक्तं पूर्वपक्षद्वयमुपपाद्य ''पाशुपताद्युक्तिप्रतीतिभ्या''मिति टीकाविरोधपरिहाराय तस्या अभिप्रायमाह ॥ अत्रत्विति ॥

तात्पर्यचन्द्रिका

सिद्धांतस्तु ।

व्याख्यातृवचनानां यैर्लिङ्गैस्तात्पर्यनिश्चयः ।
उपक्रमाद्यैस्तैरेव श्रुतितात्पर्यनिर्णयः ।
आपातजप्रत्ययाश्च परस्परविरोधिनः ।
अविरुद्धा प्रतीतिस्तु पूर्वापरविमर्शजा ॥

अनिश्चिततात्पर्यस्यागमस्य शास्त्रतात्पर्यानिश्चायकत्वादुपक्रमादिभिरागमतात्पर्यनिश्चये वेदेऽपि तैरेव लोके कृतैस्तन्निश्चयोस्तु । न हि मानांतराविरुद्धापातधीविषयेष्युपक्रमाद्यननुगुणे व्याख्यानेनापि तात्पर्यम् । अन्यथा परेणापि कालादिभेदेन वाक्यद्वयविरोधो न परिहार्यः स्यात् । न च लोके वक्त्रुपदेशेन वा तन्मूलव्याख्यानेन वा तात्पर्यधीर्न तूपक्रमादिनेति शङ्क्यम् । वक्तरि तात्पर्यमनुपदिश्य नष्टेपि तात्पर्यधीदर्शनात् । यत्तूक्तमापातप्रतीतत्यागे शब्द एव बाधितः स्यादिति चेन्न ।

आपाततो भ्रमप्राप्तमर्थं हित्वा विमर्शतः ।
गहनश्रुतितात्पर्यविषयोऽन्विष्यते यतः ॥

एवं चापातप्रतीतत्यागे पुरुषे भ्रान्तिरेव त्यक्ता भवति । न वेदार्थः । कुतः ।

न हीक्षुलेहनेनैव ज्ञात इक्षुरसो भवेत् ।
न चेक्षुदण्डं निष्पीड्य लब्धो नेक्षुरसो भवेत् ॥

नह्यनंतशाखात्मकत्वात्स्वरूपेणैवापरिच्छेद्यो नानानिगमनिरुक्तव्याकरणादिना विना दुर्बोधपदार्थो नानान्यायकलापं च विना दुरधिगमवाक्यार्थश्च वेदः सुबोधार्थः । तदुक्तं वार्तिके -

"अन्य एवैकदेशेन शास्त्रस्यार्थः प्रतीयते ।
अन्यश्च परिपूर्णेन समस्तांगोपसंहृतौ ॥
पौर्वापर्यपरामृष्टः शब्दोऽन्यां कुरुते मतिम् ।" इति ॥

एतेन पुराणादेरप्यापातप्रतीतार्थं वदंतो निरस्ताः ।

प्रकाशिका — अन्वीयंते शक्तितात्पर्यगोचरेण सम्बध्यन्ते तथा ज्ञायंत इति यावत् । वाक्यान्येतेनोपक्रमादिलिङ्गसमुदायेनेति सौत्रयौगिकान्वयपदेनोपक्रमादीनामेव तात्पर्यधीहेतुत्वं न तु व्याख्यानप्रतीत्योरित्युक्तम् । तत्र हेतुं वदन् पूर्वपक्षद्वयं क्रमेण निराह ॥ व्याख्यात्रिति ॥ आपातजेति च । उपक्रमादेरुपजीव्यत्वाद्व्याख्यानस्य तदुपजीवकत्वात् तथा आपात-प्रतीतार्थस्य पूर्वापरविरुद्धत्वादुपक्रमादिपरामृष्टस्याविरुद्धत्वादुपक्रमादेरेव तात्पर्यधीहेतुत्वं न तु व्याख्यानप्रतीत्योरित्युक्तं भवति । तदुपजीव्यत्वं व्यंजयन्नाद्यं श्लोकं व्याचष्टे ॥ अनिश्चितेति ॥ आगमादेवागमतात्पर्यनिश्चये आत्माश्रयादिति भावः । लोके पौरुषेयवाक्ये । ननूपक्रमादिनाऽऽगमतात्पर्यनिर्णयेपि मानांतराविरुद्धापातप्रतीते वेदार्थे तेनैव तात्पर्यधीर-स्त्वित्यत आह ॥ नहीति ॥ निश्चीयत इति शेषः । अन्यथा तादृशेपि तात्पर्यनिर्णये ॥ वाक्यद्वयेति ॥ विष्णुतदितरकारणत्वबोधकवाक्यद्वये उपपत्तिविरोध इत्यर्थः । यदुक्तमुप-क्रमादिभिरागमतात्पर्यनिश्चय इति तदाक्षिप्य निराह ॥ न चेति ॥ नष्टेपीति ॥ तत्र द्वयोरप्यभावेन व्यभिचारादुपक्रमादेरेवाव्यभिचारादुक्तमुपजीव्यत्वं युक्तमिति भावः । उक्तं च सुधायां ''अत उपजीव्यत्वादुपक्रमादीनामेव तात्पर्यलिङ्गत्व''मिति ॥

द्वितीयश्लोक आपातप्रतीतत्यागे विमर्शप्रतीतग्रहणे विरोधाविरोधौ हेतू उक्तौ । तत्र प्रागुक्तदोषमुद्धरति ॥ यत्त्विति ॥ आपातत इति ॥ गहनतात्पर्यार्थस्यान्विष्यमाणत्वान्न शब्दबाध इत्यर्थः । प्रतीतस्य वेदार्थस्य त्यागात्कथं न तद्बाध इत्यत आह ॥ एवंचेति॥ तात्पर्यार्थोपादाने सतीत्यर्थः। गहनतात्पर्यार्थस्यैव वेदार्थत्वं नत्वनीदृशस्येत्यत्र को हेतुरिति भावेन कुत इति प्रश्ने यथेक्षुनिपीडनेन लब्धस्येक्षुरसत्वं दृष्टं न त्वनीदृशस्य तथेति भावेन दृष्टान्तं तावदाह ॥ न हीति ॥ ननु तत्र कठिनत्वात्पीडनापेक्षा न त्विहेत्यतोस्यापि दुर्बोधत्वादिना काठिन्यं हेतुमाह ॥ न ह्यनंतेति ॥ स्वरूपपदार्थवाक्यार्थानां दुर्ग्रहत्वादित्यर्थः ॥ अन्य इति ॥ महावाक्यैकदेशभूतेनांगवाक्येन प्रधानवाक्येन च तत्तत्कर्तव्यतारूपः शास्त्रार्थैकदेशः प्रतीयते प्रधाने सर्वाङ्गोपसंहारे कर्तव्येंगवाक्यैर्वाक्यैकवाक्यतामुपगतेन परिपूर्णेन प्रधानवाक्येन सांगप्रधानकर्तव्यतारूपोन्यः परिपूर्णः शास्त्रार्थः प्रतीयते इति पूर्वापरपर्यालोचनावशात्प्रथमोत्पन्नप्रतीतेरन्यां प्रतीतिं शब्दः करोतीति तदभियुक्तोक्तार्थ इव निगमन्यायादिसमस्तवेदांगोपसंहारे सति परिपूर्णार्थः प्रतीयत इत्यपि तस्यार्थः प्रतीयत इत्युक्तार्थे संमतिरियमिति वदन्ति ॥ एतेनेति ॥ आपातप्रतीतादेः पूर्वापरविरुद्धत्वादिनेत्यर्थः ।

पाण्डुरङ्गि — व्याख्यानेन वेदतात्पर्यनिश्चय इत्युक्तम् । तत्र प्रष्टव्यम् । व्याख्यानस्यापि तात्पर्यनिर्णयः किं व्याख्यानांतरेणोतोपक्रमादिना । नाद्यः । अनवस्थापातात् । न द्वितीयः । एवं हि तद्धेतोरेवेति न्यायेन सिद्धांतयति ॥ सिद्धांतस्त्विति ॥ ननु नोपक्रमादीनां तात्पर्यनिश्चायकत्वम् । तेषां विरुद्धप्रतीतिजनकत्वादित्यत आह ॥ आपातजेति ॥ यद्वा द्वितीयं पूर्वपक्षं प्रत्याह ॥ आपातजेति ॥ तथाचापाततोर्थप्रत्ययस्य परस्परविरुद्धत्वेन पूर्वोत्तरपरामर्शेन सावकाशत्वनिरवकाशत्वादिना विचारितोपक्रमादेर्जातायाः प्रतीतेर्विरुद्धत्वाभावाद्युक्तं तात्पर्यनिर्णायकत्वमिति भावः । यद्वा नोपक्रमादिना व्याख्यातृवचनतात्पर्यनिश्चयः । प्रतीतिमात्रेणैव तात्पर्यनिर्णयोपपत्तेरिति चेत् । अत्र वक्तव्यम् । किमापातजप्रतीतिमात्रं तात्पर्यनिश्चायकमविरुद्धा प्रतीतिर्वा । नाद्य इत्याह ॥ आपातजेति ॥ न द्वितीय इत्याह ॥॥ अविरुद्धेति ॥ तथाचाविरुद्धप्रतीतेरुपक्रमादिसापेक्षत्वान्नोपक्रमादिकं विना तात्पर्यनिश्चय इति भावः ।

ननु व्याख्यातृवचनतात्पर्यनिश्चयार्थमुपक्रमाद्यपेक्षा यदि स्यात्तदा तेनैव वेदतात्पर्यनिश्चयोपपत्तौ व्याख्यातृवचनमनर्थकं स्यात् । न चैवम् । अनिश्चिततात्पर्यकस्यैव व्याख्यातृवचनस्य वेदतात्पर्यनिश्चायकत्वाङ्गीकारादित्यत आह ॥ अनिश्चितेति ॥ अन्यथाऽनिश्चिततात्पर्यकस्यापि वेदस्यार्थनिश्चायकत्वोपपत्तौ तात्पर्यनिश्चयार्थं व्याख्यानमप्यनपेक्षं स्यादिति भावः । ननु नोपक्रमादिना तात्पर्यनिश्चयः । मानांतराविरुद्धापातप्रतीतेर्थे व्याख्यानेन तात्पर्यनिश्चयसम्भवादित्यत आह ॥ न हीति ॥ तथाच सत्यपि व्याख्याने उपक्रमाद्यानुगुण्याभावे तात्पर्यनिश्चयाभावाद्व्याख्यानाभावेप्युपक्रमाद्यानुगुण्यसत्त्वेन तन्निश्चयादन्वयतो व्यतिरेकतश्च व्यभिचारान्न व्याख्यानस्य तात्पर्यनिश्चायकत्वं किंतूपक्रमादेरेवेति भावः । व्याख्यानेनोपक्रमादेरन्यथासिद्धेस्त्याग इत्यतो वाह ॥ नहीति ॥ अन्यथेति ॥ मानांतराविरुद्धापातधीविषये उपक्रमाद्यननुगुणे व्याख्याने न तात्पर्यनिश्चयांगीकार इत्यर्थः । ननु व्यभिचारेण यथा व्याख्यानस्य तात्पर्यनिश्चायकत्वाभावः तथोपक्रमाद्यानुगुण्याभावेपि वक्त्रुपदेशेन वा वक्त्रुपदेशमूलकव्याख्यानेन वा तात्पर्यनिश्चयेन व्यभिचारान्नोपक्रमादीनामपि तात्पर्यनिश्चायकत्वमिति । अत्र प्रष्टव्यम् । आपातप्रतीतार्थत्यागे वा शब्दबाधः सर्वथा त्यागे वा । नाद्य इत्याह ॥ आपातत इति ॥ तथाचापातभ्रमप्राप्तपरित्यागे शब्दबाधस्याभावान्नायं बाध इति भावः । न द्वितीय इत्याह ॥ गहन इति ॥ तथाच सर्वथार्थत्यागाभावान्न शब्दबाध इति भावः । नन्वापातप्रतीतत्यागे शब्दो बाधित एव स्यात् । आपातप्रतीतस्य

स्वरसप्राप्तत्वात् । तथाच न पूर्वोत्तरपरामर्शसिद्धार्थो ग्राह्य इत्याक्षिपति । कुत इति ॥ नन्वापातप्रतीतार्थत्याग एव वेदार्थत्याग इत्याक्षिपति ॥ कुत इति ॥ उत्तरमाह ॥ नहीति ॥ ननु वेदार्थस्य सुबोधत्वात्तदर्थज्ञानाय नोपक्रमापेक्षेत्यत आह ॥ न हीति ॥ वेदस्य सुबोधार्थत्वं किं स्वरूपेणाल्पत्वादुतान्यानपेक्ष्येण सुबोधार्थत्वाद्यद्वा तादृशवाक्यार्थत्वात् । नाद्य इत्याह ॥ अनंतेति ॥ द्वितीयं प्रत्याह ॥ नानेति ॥ तृतीयं निराह ॥ नानान्यायेति ॥ पूर्वोत्तरपरामर्शेन विचारितो यः स एव वेदार्थ इत्यत्र भट्टवार्तिकसंमतमाह ॥ तदुक्तमिति ॥ अयमर्थः । महावाक्यैकदेशभूतेनांगवाक्येन प्रधानवाक्येन च तत्तत्कर्तव्यतारूपशास्त्रार्थैकदेशः प्रतीयते । प्रधाने सर्वांगोपसंहारे कर्तव्ये अंगवाक्यैर्वाक्यैकवाक्यतामुपगतेन परिपूर्णेन प्रधानवाक्येन सांगप्रधानकर्तव्यतारूपोन्यः परिपूर्णः शास्त्रार्थः प्रतीयते । पूर्वापरपर्यालोचनया प्रथमोत्पन्नप्रतीतितोन्यां प्रतीतिं शब्दः करोति चेति । नन्वथापि नोपक्रमादिना वेदतात्पर्य-निश्चयः । पुराणादिनापि तन्निश्चयोपपत्तेरित्यत आह ॥ एतेनेति ॥ आपातप्रतीते-र्विरुद्धायास्तात्पर्यनिश्चायकत्वाभावेनाविरुद्धप्रतीतेश्चोपक्रमादिसापेक्षत्वेनोपक्रमादेरावश्यकत्व-कथनेनेत्यर्थः ।

तात्पर्यचन्द्रिका

उपक्रमादयोपि सावकाशत्वनिरवकाशत्वादिनाऽऽलोचिताः तात्पर्यप्रमापकाः । तात्पर्यज्ञानं च साक्षात्प्रतिबंधनिरासेन वा शाब्दधीहेतुः । उपक्रमादीनि च शेषत्वादौ श्रुतिलिङ्गादीनीव तात्पर्ये प्रत्येकं प्रमाणानीत्येकैकस्याननुगमेपि न दोषः । न ह्येकमनेकलिंगैर्न साध्यते ।

प्रकाशिका — एवं श्लोकद्वयव्याख्यानेन पूर्वपक्षद्वयं निरस्येदानीं ''उपक्रमादितु न तात्पर्यनिश्चायक''मिति पूर्ववाद्युक्तं निरसितुं सौत्रसंशब्दोक्तसम्यक्त्वं विवृणोति ॥ उपक्रमादयोपीति ॥ उक्तं च सुधायां ''नोपक्रमादिमात्रं लिङ्गं येन व्यभिचारः किं तु सम्यक्प्रविचारलक्षणावांतरव्यापारोपेता एवे''त्यादितात्पर्यधीरेव व्यर्थेत्यत आह ॥ तात्पर्येति ॥ तात्पर्यज्ञानस्य शाब्दज्ञानानियामकत्वे हि नानार्थे श्लिष्टे च विनिगमकाभावेनार्थविशेषधीर्न स्यात् । यष्टीः प्रवेशयेत्यादावन्वयानुपपत्त्यभावेन लक्षणाच न स्यादिति भावः ॥ प्रतिबंधेति ॥ संशयादिरूपेत्यर्थः । तदर्थमुपक्रमाद्यालोचनमावश्यकमिति भावः । तात्पर्यं च तत्प्रमिति-शेषत्वमिति तर्कताण्डवे स्पष्टम् । अश्रुतफलानामित्यादिना प्रागुक्तं व्यभिचारमुद्धर्तुमाह ॥

(प्रकाशिका)

उपक्रमादीनि चेति ॥ यथा शेषशेषिभावे श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्या अन्योन्यनैरपेक्ष्येण प्रमाणं तथोपक्रमादयोपि प्रत्येकं तात्पर्ये प्रमाणानीति क्वचित्फलाद्यश्रवणेप्यन्यस्य सत्त्वात्तात्पर्यधीस्तत्रापि स्यादेवेति भावः । यद्यपि लिङ्गस्य श्रुत्याद्यन्यतमसापेक्षत्वेनैव प्रामाण्यमुक्तं ''लिङ्गक्रमसमाम्नाना''दिति काम्येष्ट्यधिकरणम् । तथापि यत्रैकान्तिकं कारणत्वं तत्र लिङ्गादपि तादर्थ्यम् । यथार्थज्ञानस्यानुष्ठानोपयोगित्वं यथा चात्मज्ञानस्य सांपरायफलककर्मोपयोगित्वमिति भावेनेयमुक्तिरिति ध्येयम् । प्रागुक्तारुणाधिकरणे श्रुतिविनियोगः प्रागुक्तमंत्रस्रुवाधिकरणयोर्लिङ्गविनियोगः प्रागुक्तवेदोपक्रमाधिकरणे वाक्यविनियोगः तत्रैव पादे ''असंयुक्तं प्रकरणा''दिति चतुर्थेधिकरणे प्रकरणेन तत्रैव ''क्रमश्च देशसामान्या''दिति पञ्चमेधिकरणे स्थानेन ''आख्या चैवं तदर्थत्वा''दिति षष्ठेधिकरणे समाख्ययाविनियोगो ध्येयः । विस्तरस्तु गुरुपादकृतन्यायाध्वदीपिकायां ध्येयः । एकस्मिंस्तात्पर्यरूपेर्थे किमनेकलिङ्गैः कृत्यमित्यत आह ॥ न हीति ॥ भिन्नवाक्यस्थैर्लिङ्गैरित्यर्थः । धूमालोकादिना वह्निसाधनदर्शनादिति भावः । एकत्र वाक्ये उपक्रमाद्यनेकलिङ्गमेलने सत्येकेनार्थनिश्चये किमन्यैरित्यत आह ॥ न हीतीत्येके ॥

पाण्डुरङ्गि — ननूपक्रमादीनां परस्परविरोधेनाप्रामाण्यात्कथं तेषां तात्पर्यनिश्चायकत्वमित्यत आह ॥ उपक्रमादयोपीति ॥ आलोचितानां न भ्रमजनकत्वमित्यभिप्रायेण प्रमापका इत्युक्तम् । आदिपदेन स्वभावप्राबल्यदौर्बल्यपरिग्रहः । तथाच यत्र विरोधस्तत्र सावकाशत्वनिरवकाशत्वादिना विचारे कृते सति निरवकाशेन प्रबलेन सावकाशस्य बाधेन तात्पर्यप्रमा भवतीति भावः । नन्वस्तूपक्रमादीनां तात्पर्यनिर्णायकत्वं तथापि तात्पर्यज्ञानस्य क्वोपयोग इत्यत आह ॥ तात्पर्यज्ञानं चेति ॥ यद्वा वेदस्योपक्रमादिसापेक्षत्वे प्राभाकररीत्या हेतुसापेक्षत्वेन निरपेक्षत्वलक्षणप्रामाण्यहानिरित्यत आह ॥ तात्पर्यज्ञानं चेति ॥ चशब्दोऽवधारणे । एवं चोपक्रमादेस्तात्पर्यनिश्चायकत्वेन शाब्दधीहेतुत्वाभावान्न प्राभाकररीत्या हेतुसापेक्षत्वेनाप्रामाण्यं वेदस्येत्यर्थः । आपातजशाब्दबोधस्य तात्पर्यधीहेतुत्वेपीदमित्थमेवेत्यस्येह विवक्षितत्वान्न परस्पराश्रयत्वमिति भावः । यद्वा प्रसङ्गादाह ॥ तात्पर्यज्ञानं चेति ॥ तात्पर्यज्ञानफलकथनस्य प्रकृतानुपयुक्तत्वात् ॥ साक्षादिति ॥ तात्पर्यज्ञाने सति शाब्दबोधोऽन्यथा नेत्यन्वयव्यतिरेकाभ्यामित्यर्थः । ननु क्वचित्तात्पर्यज्ञानाभावे शाब्दबोधस्य जायमानत्वात्कथं तस्य शाब्दधीहेतुत्वमत आह ॥ प्रतिबन्धेति ॥ यद्वा ननु न तात्पर्यज्ञानं शाब्दधीहेतुः । अन्योन्याश्रयात् । सति हि तात्पर्यज्ञाने

शाब्दज्ञानकारणसद्भावाच्छाब्दज्ञानं शाब्दज्ञाने च सति तात्पर्यनिश्चय इति । तत्कथं तात्पर्यज्ञानं शाब्दज्ञाने हेतुरित्यस्वरसादाह ॥ प्रतिबन्धेति ॥

ननु नोपक्रमादीनां तात्पर्यनिश्चायकत्वम् । क्वचिदुपक्रमसद्भावेप्युपसंहारस्याभावात् । तत्सद्भावेपि वाऽभ्यासादेरभावादित्यतः नोपक्रमादीनां सप्तानां मिलित्वा तात्पर्यनिश्चायकत्वं किंतु श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां प्रत्येकं शेषत्वादौ प्रमाणत्ववत्प्रत्येकमेवेत्यतो नाननुगम इत्याह ॥ उपक्रमादीनि चेति ॥ ननु तात्पर्यज्ञानत्वरूपानुगतकार्यतावच्छेदकावच्छिन्नं प्रत्युपक्रमत्वादेरननुगतत्वेनानुगतकारणतावच्छेदकावच्छिन्नत्वाभावान्नोपक्रमादेः कारणत्वमित्यतो वाह ॥ उपक्रमादीनि चेति ॥ तृणारणिमणिन्यायेन वैजात्यमिति भावः ॥ शेषत्वादाविति ॥ पदान्तरनिरपेक्षः शब्दः श्रुतिः । वस्तुसामर्थ्यं लिङ्गम् । यथा बर्हिर्देवसदनं दामीति मन्त्रस्य बर्हिर्लवनप्रकाशनसामर्थ्यं तेन बर्हिर्लवने तस्य विनियोगः । पदसंघातो वाक्यम् । यथा ''यजेत स्वर्गकाम'' इति ॥ तेन यागस्य स्वर्गशेषता । न ह्यत्र यागस्य शेषत्वे तृतीयाश्रुतिः स्वर्गस्य शेषित्वे द्वितीयाश्रुतिर्वास्ति । किंतु समभिव्याहारादेव साधनतायाः प्रतीतेः । इतिकर्तव्यताकांक्षा प्रकरणम् । तेन प्रयाजादेर्दर्शपूर्णमासशेषता । तुल्यप्रदेशत्वं स्थानम् । तेन ''अग्नेरहं देवयज्ययाऽन्नादो भूयासम् । अग्नीषोमयोरहं देवयज्यया वृत्रहा भूयास''मित्यनुमन्त्रणमन्त्रयोर्लिंगावगताग्नेयाग्नीषोमीययागशेषभावयोर्मध्ये समाम्नातस्य ''दृब्धिरस्य दृब्धो भूयास''मिति मन्त्रस्याग्नेयाग्नीषोमयोर्मध्ये विहितोपांशुयाजं प्रति शेषता । समाख्यानामयौगिकी संज्ञा । यथा होतृचमस इति होतुश्चमसलक्षणशेषता । ननु यत्रैकस्मिन्नर्थ उपक्रमादिसप्तकमस्ति तत्रैकेन तात्पर्यनिर्णयस्य जातत्वादन्येषां न तात्पर्यनिश्चायकत्वम् । सिद्धेः प्रतिबन्धकत्वादित्यत आह ॥ न ह्येकमिति ॥ सिषाधयिषयान्येषां साधकत्वमिति भावः ।

तात्पर्यचन्द्रिका

दुरधिगमेऽसम्भावितेऽर्थे तात्पर्याभावाशङ्कानिरासार्थमसकृदुक्तिश्चार्थवती । यत्र शपथरूपत्वं वा प्रकृतोपयोगिप्रमेयांतरकथनेन पुनस्तदुपसंहाररूपत्वं वाधिकविवक्षादिकं वा नास्ति केवलं ज्ञातज्ञापकता तत्र पौनरुक्त्यं दोषः । ''समिधो यजतीडो यजती''त्यादावसकृदुक्तेर्भिन्नप्रकारत्वेनैकप्रकारासकृदुक्तिरूपतात्पर्यलिङ्गाभ्यासाभावात् पञ्चप्रयाजा इति संख्याभेदस्य समिदादिनामभेदस्य च सत्त्वाच्चाऽविशेषपुनः

श्रुतिरूपाभ्यासात्कर्मभेदः । यत्रत्वसकृदुक्तिरेकप्रकारा उक्तं च बाधकं नास्ति तत्राभ्यासात् ''अहो दर्शनीया अहो दर्शनीया'' इत्यादिसिद्धार्थवाक्य इव ''एह्येहि फुल्लांबुजपत्रनेत्र बध्यतां बध्यतां बाल'' इत्यादि साध्यार्थवाक्येपि तात्पर्यधीर्दृष्टैव ।

प्रकाशिका — उपक्रमादिसप्तकस्य साधारण्येन तात्पर्यधीहेतुत्वमुक्त्वा प्रत्येकं तत्सिषाधयिषुरुपक्रमोपसंहारयोर्वक्तव्यविशेषाभावादभ्यासस्य प्रागुक्तदोषमुद्धरंस्तद्धीहेतुत्वमाह ॥ दुरधिगम इति ॥ यदुक्तं पौनरुक्त्यं न क्वचिद्दोषः स्यादिति तदुद्धरति ॥ यत्रेति ॥ ''सत्यं सत्यं पुनः सत्यं, सत्यं भिदा सत्यं भिदे''त्यादाविवेत्यर्थः ॥ प्रकृतेति ॥ ''सर्वधर्मोपपत्तेश्चे''त्यादाविवेत्यर्थः । तत्र हि प्रकृतसर्वगुणपूर्णत्वोपयोगियुक्त्यविरोधमुक्त्वा गुणपूर्णत्वस्य निगमनात् ॥ अधिकेति ॥ ''अर्भकौकस्त्वा''दित्यत्र शंकितस्यैव ''अल्पश्रुते''रित्यत्र पुनःशङ्का अंशस्यापि व्याप्तत्वं वक्तुं यथा तथेत्यर्थः । आदिपदात् ''व्याख्याता व्याख्याता'' इत्यादाविव प्रागुक्तप्रमेयावधारणरूपं प्रयोजनं यत्र नास्तीत्यादि गृह्यते । यदपि समिधो यजतीत्यादावभ्यासात्कर्मभेदो न स्यादित्युक्तं तत्राह ॥ समिध इति ॥ एकप्रकारेति ॥ ''एकप्रकारासकृदुक्तिरभ्यास'' इति टीकोक्तेरिति भावः । तथाच तस्य तत्र व्यभिचारो नेति भावः । न च तत्रापि यजत्यंशे तादृग्ऱूप्यमस्तीति वाच्यम् । एकदेशमात्रेण तथात्वस्यातिप्रसङ्गित्वादिति भावः । कथं तत्र कर्मभेद इत्यत आह ॥ पञ्चेति ॥ ''तिस्र आहुतीर्जुहोति सप्तदश प्राजापत्यान्पशूनालभते'' इत्यादाविव संख्यया वा ''अथैष ज्योतिरित्यादाविव सामिसमिदादिनामभेदेन वा कर्मभेदेऽभ्युच्चयत्वेन ''एकस्यैव पुनः श्रुतिरविशेषा''दिति सूत्रेऽभ्यासेन कर्मभेद उक्त इत्यर्थः । ननु कुत एवमभ्यासद्वैविध्यम् । मीमांसकोक्ताभ्यास एवास्तु । तस्य सिद्धार्थ एव तात्पर्यधीहेतुत्वं न साध्यार्थे वाक्य इत्येवोच्यतामित्यत आह ॥ यत्रत्विति ॥ अभ्यासात्तात्पर्यधीरित्यन्वयः ॥ उक्तं चेति ॥ शपथरूपत्वादिकं संख्याभेदादिकं वेत्यर्थः । अहो इत्यादि लौकिकं वाक्यम् ।

पाण्डुरङ्गि — अभ्यासो न तात्पर्यनिश्चायकः । असकृदुक्ते वैयर्थ्यादित्युक्तम् । तत्र वैयर्थ्यमेवासिद्धम् । तात्पर्याभावशङ्कानिरासरूपप्रयोजनसद्भावादित्याह ॥ दुरधिगमेति ॥ तात्पर्यशङ्कोपपादनार्थं दुरधिगमेऽसम्भावित इति विशेषणम् । न केवलमेकोक्तिरर्थवती चार्थः । नन्वेवं पौनरुक्त्यं क्वापि दोषो न स्यात् । सर्वत्रापि तात्पर्याभावशङ्कानिरासकत्वस्य वक्तुं शक्यत्वादित्यत आह ॥ यत्रेति ॥ नन्वसकृदुक्तेस्तात्पर्यनिश्चायकत्वं न सम्भवति ।

तथात्वे समिधो यजतीत्यादावप्यसकृदुक्तेर्वैयर्थ्यापत्त्या तदन्यथानुपपत्त्या कर्मभेदसिद्धिर्न स्यादित्यत आह ॥ समिधो यजतीति ॥ समित्त्वेट्त्वादिभिन्नप्रकारत्वेनेत्यर्थः । तात्पर्यलिङ्गाभ्यासेति ॥ तात्पर्यलिङ्गभूतो योऽभ्यासः तदभावादित्यर्थः । अयं भावः । अभ्यासस्य तात्पर्यनिश्चायकत्वं सम्भवति । न चैवं समिधो यजतीत्यादौ तत्प्रसङ्गः । तत्रैकप्रकारासकृदुक्तिरूपाभ्यासाभावात् । तादृशस्यैव तात्पर्यनिश्चायकत्वात् । तत्र विद्यमानस्याविशेषपुनःश्रवणस्य तात्पर्यानिश्चायकत्वात् । तथाचैकप्रकारासकृदुक्तिरूपाभ्यासस्य तात्पर्यनिश्चायकत्वे समिधो यजतीत्यादावविशेषपुनः श्रवणरूपासकृदुक्तिवैयर्थ्यान्यथानुपपत्त्या कर्मभेदः सम्भवतीति नैतदभ्यासस्य तात्पर्यनिश्चायकत्वे बाधकमिति ॥ अविशेषपुनःश्रुतिरूपाभ्यासादिति ॥ अविशेषक्रियापदाभ्यासादित्यर्थः । न चानंदमयाधिकरण उक्ताभ्यासाभावेपि तात्पर्यवत्समिध इत्यादावपि किं न स्यादिति वाच्यम् । तत्रापि ब्रह्मशब्दमात्रस्यैव हेतुत्वात् । अभ्यासशब्दस्य चोपलक्षितेषु भागासिद्धिवारणेनोपलक्ष्यत्वज्ञापनार्थत्वात् । ननु न संख्याभेदस्य कर्मभेदप्रयोजकत्वम् । एकादशप्रयाजा इत्यादावेकादशत्वसंख्याया आवृत्त्यैवोपपत्तिवत्प्रकृतेपि पञ्चत्वसंख्याया आवृत्त्यैवोपपत्तेः । नापि नामभेदात्कर्मभेदः । एकस्थानेऽनेकनामवत्त्वसम्भवेन ततः कर्मभेदासम्भवात् । तथाच कथमनयोः कर्मभेदप्रयोजकत्वमिति चेन्मैवम् । संख्याभेदस्य कर्मभेदप्रयोजकत्वमवश्यमङ्गीकर्तव्यम् । अन्यथा ''सप्तदशप्राजापत्यान्पशूनालभते तिस्र आहुतीर्जुहोती''त्यादौ सप्तदशत्वादेरप्यावृत्त्यैवोपपत्तौ सप्तदशपश्वालम्भनं न स्यात् । न चैकादशप्रयाजा इत्यत्र कथमिति वाच्यम् । तत्र पञ्चभिर्वाक्यैः पञ्चप्रयाजाविधानेनैकादशत्वविधायकत्वाभावेनागत्या वृत्तिपरत्वाङ्गीकारात् । नामभेदस्यापि कर्मभेदप्रयोजकत्वमावश्यकम् । एकस्यानेकनामकथनवैयर्थ्यात् । अथैषज्योतिरित्यादौ नामभेदेन कर्मभेदस्य स्वीकृतत्वाच्च । ननु चाविशेषपुनःश्रुतिरूपाभ्यासस्यैव तात्पर्यनिश्चायकत्वमङ्गीकर्तव्यम् । न चैवं समिधो यजतीत्यादावपि तादृशाभ्याससद्भावेन तत्राभ्यासस्य तात्पर्यनिश्चायकत्वापत्त्या कर्मभेदो न सिध्येदिति वाच्यम् । सिद्धार्थ एव वाक्ये तादृशाभ्यासस्य तात्पर्यनिश्चायकत्वेन साध्यार्थवाक्ये तात्पर्यनिश्चायकत्वाभावेन कर्मभेदोपपत्तेः । एवं च किमेकप्रकारासकृदुक्तिरूपाभ्यासस्य तात्पर्यनिश्चायकत्वकल्पनयेत्यत आह ॥ अत्रत्विति ॥ उक्तं च बाधकं पञ्चप्रयाजा इज्यंत इति संख्याभेदसमिदादिनामभेदरूपबाधकमित्यर्थः । दर्शनीया सुंदरी ।

तात्पर्यचन्द्रिका

अपूर्वता तु स्वबोधनीयपुरुषगताज्ञानादिविरोधिना स्वानुपजीविमानांतरेणाग्राह्यार्थत्वम् । वेदार्थस्य धर्माधर्मादेरीश्वरसार्वज्ञादेश्च स्वोपजीविना स्मृतिवाक्येन सर्वकर्तृत्वाद्यनुमानेन च ग्राह्यत्वेपि । तयोर्वेदोपजीवित्वाद्वेदस्यापूर्वता । वेदार्थस्य वेदानुपजीवीश्वरप्रत्यक्षग्राह्यत्वेपीश्वरस्य वेदबोधनीयत्वाभावाद्वेदबोधनीयास्मदादिगताज्ञानं प्रति चेश्वरज्ञानस्याविरोधित्वाद्वेदस्यापूर्वता । प्रत्यक्षग्राह्येर्थे प्राक्प्रवृत्तस्य शब्दस्य तदगृहीतार्थत्वेपि तद्ग्राह्यार्थत्वादपूर्वत्वाभावः । अत एवावघातादेर्वैतुष्यसाधनताया वेदानुपजीविमानांतरग्राह्यत्वेन ''व्रीहीनवहंती''त्यादेरपूर्वविधित्वासम्भवान्नियमविधित्वमाश्रितम् । अत एव च ''इमामगृभ्णन्रशनामृतस्ये''त्यादेः स्वरूपसिध्यादौ स्वानुपजीविना मंथरगामिना मंत्रसामर्थ्यरूपेण लिङ्गेन गृहीतार्थत्वाभावेपि ग्राह्यार्थत्वेनापूर्वविधित्वासम्भवात्परिसंख्यात्वमुक्तम् । ''य एवं विद्वा''नित्याद्यनुवादस्य स्वानुपजीविना पुरोवादरूपेणाग्नेयादिवाक्येनागृहीतार्थत्वाभावा(न गृहीतार्थत्वा)दपूर्वार्थत्वाभावः । ''दध्ना जुहोती''त्यादेश्च गुणविधेः स्वानुपजीविना ''अग्निहोत्रं जुहोती''त्यादिना ग्राह्यार्थत्वान्न होमांशेऽपूर्वता । किं तु तदग्राह्यदध्यादौ । एवं देवतासहितकर्मविधायकस्य ब्राह्मणवाक्यस्य स्वविहिते कर्मणि देवतार्पकं समानशाखास्थं शाखांतरस्थं वा मन्त्रं प्रत्युपजीव्यत्वाद्देवतांशेप्यपूर्वता । मन्त्रस्य तु तदंशेनापूर्वता । किं तु ब्राह्मणाप्राप्तदेवतागुणादौ । भिन्नशाखास्थयोश्चैककर्मविधायकयोर्वाक्ययोर्मध्ये यत्र वाक्ये द्रव्यदेवताख्ययागरूपं वा इतिकर्तव्यताभूयस्त्वं वा तत्रैव कर्मविधिः । इतरस्य तु तदनुवादेनेति कर्तव्यताविधायकत्वमिति स्वीकारात् । इतिकर्तव्यताविधायकस्य कर्मविधायकोपजीवित्वान्न कर्मांशेऽपूर्वता । किंत्विति कर्तव्यतांशे । यदि शाखाद्वयस्थे वाक्यद्वयेपि द्रव्यदेवताख्यरूपं वेति कर्तव्यतासाम्यं वा तत्र मीमांसकमते एकस्मिन्यजुरादिरूपे वेदे आध्वर्यवौद्गात्रादिसर्वकर्मानुपदेशेन ''स त्रिभिर्विधीयत'' इति वचनात्रयीं विना सर्वांगोपेतकर्मानवगतेर्वेदत्रयस्याध्येतव्यत्वनियमवदेकैकस्यां तैत्तिरीयादिरूपायां शाखायां सर्वाध्वर्यवादिकर्मोपदेशेन काण्वादिशाखांतरस्याध्येतव्यत्वनियमाभावात्तत्तच्छाखाध्यायिनं प्रति तत्तद्वाक्यस्य व्यवस्थाया बोधकत्वादपूर्वतापि व्यवस्थितैव ।

अस्मन्मते तु शाखाभेदोऽशक्तविषय इति तृतीये वक्ष्यमाणत्वाच्छक्तान्प्रति मीमांसकमते वेदद्वयस्थवाक्यद्वयवच्छाखाद्वयस्थवाक्यद्वयेपि क्रयवाक्यवदव्यवस्थित-विकल्पेन विधायकत्वम् । अशक्तान्प्रति तु व्यवस्थितविकल्पेन विधायकत्व-मित्यपूर्वतापि व्यवस्थितैव । अत एव स्मृतीनां स्वानुपजीविवेदग्राह्यार्थत्वेपि वेदे नानाशाखास्वस्पष्टं विक्षिप्योक्तस्य स्मृतिभिरिव वेदेन स्मृतिबोधनीयैरस्मदादिभिर-ग्राह्यत्वादपूर्वता । अपूर्वत्वाभावेपि वा सप्रयोजनत्वात्स्मृतीनां विद्वद्वाक्यवदनु-वाद्यपरता । एवं वादिविप्रतिपत्तिजन्यातत्वावेदकत्वशङ्काकलंकितेनासर्वविषयेण प्रत्यक्षेण ''विश्वं सत्य''मित्यादिवाक्येनेव जगत्सत्यत्वाप्राप्तेस्तद्वाक्यस्यापूर्वता । तदभावेपि वा सप्रयोजनत्वात्तात्पर्यम् । तदेतदभिप्रेत्यान्यत्र टीकाकारैः प्राचुर्येण ''मानांतराप्राप्तिरपूर्वते''त्युक्तम् । अत्रापि टीकायामेतदेवाभिप्रेतम् ।

प्रकाशिका — प्रागुक्तदोषास्पृष्टतया अपूर्वतां निर्वक्ति ॥ अपूर्वतात्विति ॥ स्वेति ॥ यस्य वाक्यस्यापूर्वतोच्यते तद्वाक्यं स्वशब्देन गृह्यते । स्वानुपजीविनेत्यस्य व्यावर्त्यं स्वयमेवाह ॥ वेदार्थस्येति ॥ एतेन प्रागुक्तदोषो निरस्तो भवति । स्वबोधनीयेत्यादि-पदकृत्यमाह ॥ वेदार्थस्येति ॥ एतेन धर्मित्वेन वा प्रतियोगित्वेन वा ग्राह्येश्वरांशे वेदोपजीव्यास्मदादिगतप्रत्यक्षादिना ग्राह्यजीवेशभेदार्थकस्य वेदस्यापूर्वतोक्ता भवति । उक्तं चैतद्भेदादि- श्रुतेरनुवादकत्वभङ्गे । अगृहीतेत्यनुक्त्वाऽग्राह्यार्थत्वमित्युक्तेः फलमाह ॥ प्रत्यक्षेति ॥ उक्तापूर्वत्वं मीमांसकसंमतमित्याह ॥ अत एवेति ॥ चतुर्थे द्वितीयपादे ''संस्कारे च तत्प्रधानत्वा''दित्येकादशेऽधिकरणे ''व्रीहीनवहंती''त्ययं किं विधिरुतानुवाद इति संशये पुरोडाशप्रकृतित्वेन ''व्रीहिभि''रिति वाक्ये व्रीहिविधानाद्वैतुष्यार्थ-मर्थाक्षिप्तावहननानुवाद इति प्राप्ते वैतुष्ये नखविदलनादिसाधनांतरस्यापि सम्भवान्न नियमेनावहननाक्षेपोऽतो प्राप्तांशपरिपूरणेन नियमार्थो विधिरिति सिद्धांतितम् ॥ मानांतरेति ॥ अन्वयव्यतिरेकसग्रीचीनप्रत्यक्षेत्यर्थः ॥ नियमेति ॥ अवघातेनैव व्रीहींस्तुषविमुक्तान्कु-र्यान्नान्येनेत्येवंरूपनियमेत्यर्थः ॥ इमामिति ॥ आद्ये मन्त्राधिकरणे ''परिसंख्ये''ति गुणसूत्रविषयतया ''इमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्ते'' इत्युदाहृत्य रशनाग्रहण-प्रकाशनसामर्थ्यरूपलिङ्गेनाश्वरशनाग्रहणे मन्त्रस्य नियतप्राप्तिसत्त्वेनापूर्वनियमविध्योरसम्भवेन लिङ्गाविशेषाद्गर्दभरशनाग्रहणेपि प्राप्तिप्रसक्तौ तन्निवर्तनरूपपरिसंख्याविधिरित्युक्तम् ।

(प्रकाशिका)

गृहीतार्थत्वाभावे हेतुर्मंथरेति । श्रुतिकल्पनाद्वारा लिङ्गस्य विनियोजकत्वेन विलम्बितत्वात्ततः प्रागेव ब्राह्मणं प्रवर्तत इति भावः ॥ य एवं विद्वानिति ॥ विद्वद्वाक्यद्वयस्याग्नेयादित्रिकद्विकानुवादत्वमाद्यसूत्रे विवृतम् । अत एवेति पदमिहोत्तरत्र चानुवर्तनीयम् । अग्राह्यार्थत्वाभावोपपादनायागृहीतार्थत्वाभावादित्युक्तम् । गृहीतार्थत्वादित्येव क्वचित्पाठः ॥

गुणविधेरिति ॥ दधिरूपगुणविधेरित्यर्थः । द्वितीये ''आधाराग्निहोत्रमरूपत्वा''दिति द्वितीयपादीयं पञ्चमाधिकरणे ''दध्ना जुहोति ऊर्ध्वमाघारयती''त्यादिकं किं गुणविशिष्टकर्मविधिरुत गुणमात्रविधिरिति संशये ''अग्निहोत्रं जुहोती''त्यादौ द्रव्यदेवताख्यरूपापरिज्ञानेन कर्मविध्ययोगाद्दध्यादिवाक्यैस्तदनुवादेन गुणविध्यसंभवाद्गुणविशिष्टकर्मविधिरिति प्राप्ते दध्यादिवाक्योक्तदध्यादिद्रव्यस्य ''अग्निर्ज्योति''रिति मांत्रवर्णिकदेवतायाश्च परिज्ञानेनाग्निहोत्रवाक्ये कर्मविधिसंभवात्तद्विहितकर्मानुवादेन गुणविधिरयमिति सिद्धांतितम् । स्वानुपजीविनेति ॥ तस्य स्वतन्त्रविधित्वादिति भावः । एवं चोक्तमपूर्वतालक्षणं दध्यादौ नाव्याप्तं होमे नातिव्याप्तमिति भावः ॥ एवं देवतेति ॥ आद्ये तुर्यपादे ''तद्गुणास्तु विधेरन्नविभागाद्विधानार्थेन चेदन्येन शिष्टा'' इति षष्ठेधिकरणे ''यदाग्नेयोष्टाकपालोऽमावास्यायां पौर्णमास्यां चाच्युतो भवती''त्युदाहृत्य किमाग्नेयशब्दः कर्मनाम किं वाऽग्न्याख्यगुणविधिरिति संशये द्रव्यदेवतारूपानेकगुणविधौ वाक्यभेदादष्टाकपालद्रव्यकमाग्नेयनामकं कर्ममात्रं विधीयत इति प्राप्ते द्रव्यलाभेपि देवताया अलाभादाग्नेयशब्देनैव देवता विधेया । विशिष्टकर्मविधानाच्चार्थापत्त्यानेकेषामपि गुणानां विधिसिद्ध्या वाक्यभेदाभावाद्गुणविधिरिति सिद्धांतितम् । उपजीव्यत्वोपपादनाय स्वविहिते कर्मणि देवतार्पकमित्युक्तम् । अष्टाकपालो भवतीत्यत्र पुरुषव्यापारानुत्त्यानुष्ठानाय मन्त्राकांक्षाविरहात् सत्यामपि तस्यां पुरोडाशमात्रविषयस्य व्यापारस्य देवतावाचिमन्त्रसम्बन्धायोग्यत्वात्तत्सम्बन्धायोक्तदिशा द्रव्यदेवतासम्बन्धेन कर्मणि स्वेन विहिते देवतार्थको मन्त्रः पश्चादन्वेतीति तं प्रत्यस्योपजीव्यत्वमित्यर्थः ॥ समानेति ॥ ऐंद्राग्नमेकादशकपालमित्यादि काम्येष्टयंगभूतं ''उभावामिन्द्राग्नी'' इत्यादिसमानशाखास्थं मन्त्रं प्रति । तथा आग्नेयेष्टयंगभूतं ''अग्निर्मूर्धादिवः ककु''दित्यादिशाखांतरस्थं मन्त्रं प्रतीत्यर्थः ॥ देवतागुणादाविति ॥ दिवोमूर्धत्वककुत्पतित्वादिरूपगुणादावित्यर्थः । स्थलांतरेप्युक्तरूपापूर्वतातदभावौ दर्शयति ॥ भिन्नशाखेति ॥ स्वीकारादित्यंतेन । ''भूयस्त्वेनोभयश्रुतिः'' इति तृतीयाध्यायतृतीयपादस्थतृतीयाधिकरणार्थोपन्यासः । तत्र ह्येवमुक्तम् । यजुर्वेदे सामवेदे च समाम्नाते

ज्योतिष्टोमे किं वेदनिमित्तः स्वरो ग्राह्य इति विशये अविशेषादनियमे प्राप्ते यजुर्वेदे द्रव्यदेवतयोः श्रवणेन निष्कृष्टकर्मस्वरूपज्ञानसम्भवादितिकर्तव्यताभूयस्त्वदर्शनाच्च तत्रैव विधिरित्यवसीयते । वेदांतरे तु स्तोत्रादिगुणविधानार्थं नामयुक्तं क्रियामात्रं श्रूयत इति विध्यवगतिसमाप्त्यसम्भवात्तत्रानुवादः । अतो यजुर्वेदे नासौ क्रियत इति ज्योतिष्टोमस्योपांशुस्वरत्वमिति सिद्धांतितम् । यद्यपीदमधिकरणं वेदद्वयोक्तकर्मविधायकविषयमित्युक्तं तथापि न्यायसाम्याद्भिन्नशाखास्थयोरित्युक्तम् ।

वार्तिकमतेनाह ॥ द्रव्यदेवतेति ॥ भाष्यमतेनाह ॥ इतिकर्तव्यतेति ॥ इति कर्तव्यताविधायकस्य स्वोद्देश्यशेषिस्वरूपकर्मविधायकवाक्योपजीवित्वात्प्राप्तस्यैवोद्देश्यत्वान्न कर्माशेऽपूर्वता । अङ्गांशे ह्यतथाभूतत्वादपूर्वतेत्यर्थः । कर्मविधिलिङ्गसाम्ये तु कर्मेति कर्तव्यतांशयोरुभयोरप्यपूर्वतामेव मतभेदेनाह ॥ यदीति ॥ तत्र मीमांसकमते अपूर्वतापि व्यवस्थितेत्यन्वयः । अध्येतव्यत्वनियमवदध्येतव्यत्वनियमाभावादिति व्यतिरेकदृष्टान्तः ॥ सत्रिभिरिति ॥ ''सः सर्वांगोपेतयागस्त्रिभिर्वेदैर्विधीयत'' इत्यापस्तंबसूत्रादित्यर्थः । अनुपदेशेनेति वचनादिति च कर्मानवगतौ हेतुद्वयम् । साचाध्ययननियमे हेतुः । सर्वाध्वर्यवादीत्यध्ययननियमाभावे हेतुः ॥ तृतीय इति ॥ तृतीयाध्याये तृतीयपादीयाद्याधिकरणे ''स्वाध्यायस्य तथात्वेनही'' त्यादिगुणसूत्रे वक्ष्यमाणत्वादित्यर्थः । सर्वशाखाध्ययनशक्तान्प्रत्यनया वा तया वेत्यव्यवस्थितविकल्पेन विधायकमित्यर्थः । तत्र दृष्टांतद्वयं मीमांसकेति । यथा विधिलिङ्गसाम्यवति वेदद्वयस्थवाक्यद्वये यथावा समानशाखास्थेषु ''एकहायन्या क्रीणाति वाससा क्रीणाति हिरण्येने''त्यादिषु सर्वत्र गुणश्रवणादुत्पत्तिशिष्टप्राबल्येनानूद्य विधानायोगात्सर्वेषामुत्पादकत्वावश्यंभावादव्यवस्थया विधायकत्वमित्यर्थः । उक्तं च द्वादशे ''क्रयणेषु तु विकल्प'' इति चतुर्थपादे तृतीये पूर्वपक्षसूत्रे । एतच्चाग्रे स्पष्टयिष्यामः ॥ अशक्तानिति ॥ सर्वशाखाध्ययनाशक्तानित्यर्थः ॥ अत एवेति ॥ स्वबोधनीयपुरुषगताज्ञानविरोधिनेत्युक्तत्वादेवेत्यर्थः । स्मृतीनां तादृशवेदग्राह्यार्थत्वेप्यपूर्वतेत्यन्वयः । कुत इत्यतो वेदस्य स्मृत्यनुपजीवित्वेपि स्मृतिबोधनीयास्मदादिगताज्ञानविरोधित्वाभावादिति भावेनाह ॥ वेद इति ॥ अस्पष्टं विक्षिप्य चोक्तस्येति हेतुगर्भं विशेषणद्वयम् । यथास्मृतिभिर्ग्राह्यत्वं तथा वेदेन ग्राह्यत्वाभावादित्यर्थः । उक्तं चाद्येऽध्याये धर्मस्य शब्दमूलत्वादिति स्मृत्यधिकरणे स्मृतिप्रामाण्यमेवमेवेति भावः । सव्यं हि पूर्वं मनुष्या आंजते तस्मादपि वध्यं प्रपन्नं न प्रतिप्रयच्छंतीत्यादौ परप्रकरणगतवाक्यशेषस्थसिद्धवन्नि-

(प्रकाशिका)

र्देशान्यथानुपपत्तिकल्प्यविधिमूलत्वद्योतनार्थमस्पष्टमित्युक्तम् ॥ सप्रयोजनेति ॥ अस्मदादि-बोधोपयोगित्वादिति भावः ॥

विद्वदिति ॥ फलवाक्यापेक्षितसमुदायद्वयार्पकत्वेन विद्वद्वाक्यस्य यथा सप्रयोजनत्वं तथेत्यर्थः ॥ अनुवाद्यपरतेति ॥ फलवत्त्वस्य तात्पर्यलिङ्गत्वादनुवादे तात्पर्यं न हीयत इत्यर्थः । यदप्युक्तं प्रत्यक्षेण च गृहीतार्थायाः श्रुतेरतात्पर्यप्रसङ्गादिति तत्राह ॥ एवमिति ॥ प्रत्यक्षस्य घटादौ सत्त्वबोधकत्वेपि स्वर्गनरकाद्यतीन्द्रियेषु सत्त्वाविषयकतया तदंशे स्वबोधनीयपुरुषगताज्ञानविरोधित्वाभावात् घटाद्यैन्द्रियकांशे सत्त्वग्रहणेपि वादिविप्रतिपत्त्याऽप्रामाण्यशङ्काकलंकितत्वेनानिश्चायकतया स्वबोधनीयपुंगतसंशयविपर्ययाविरोधितया कृत्स्नसत्त्वनिश्चायकवाक्यानुवादकतानापादकत्वात्तस्या अपूर्वतेत्यर्थः । विस्तृतमेतदन्यत्र मिथ्यात्वहेतूनामागमबाधोक्तिप्रसस्तावे । अधिकारिविशेषं प्रत्याह ॥ तदभावेपि वेति ॥ तत्रापूर्वतायास्तात्पर्यलिङ्गत्वाभावेपि फलवत्त्वं तल्लिङ्गं सेत्स्यतीति भावः । टीकायां ''प्रमाणांतरासिद्धताऽपूर्वते''त्येवोक्त्या कथमेतल्लभ्यत इत्यत आह ॥ तदेतदिति ॥ अन्यत्र प्रमाणलक्षणटीकायामित्यर्थः ॥ अत्रापीति ॥ प्रमाणांतरासिद्धतेत्यत्र स्वबोधनीयेत्यादि-विशेषणं प्रमाणांतरेत्यस्य बोध्यमित्यर्थः ।

पाण्डुरङ्गि — यच्चोक्तं मानांतराग्राह्यार्थत्वरूपाऽपूर्वतापि न तात्पर्यधीहेतुः । श्रुतिमूलस्मृत्या सर्वज्ञत्वादिसाधकसर्वकर्तृत्वाद्यनुमानेन जगत्सत्यत्वजीवेश्वरभेदादिग्राहक-प्रत्यक्षेण च गृहीतार्थायाः श्रुतेरतात्पर्यप्रसङ्गादिति । तत्परिहर्तुमपूर्वताया लक्षणं तावदाह ॥ अपूर्वतात्विति ॥ अत्र च स्वशब्दद्वयं समभिव्याहृतपरम् । तदनुसारेण मानांतरेत्यस्यार्थ ऊह्यः । स्वेन बोधनीयो यः पुरुषः तद्गतं यदज्ञानादि आदिशब्देन भ्रमसंशयपरिग्रहः । तद्विरोधिना स्वं नोपजीवतीति स्वानुपजीवि एवंभूतं यन्मानांतरं तेन ग्राह्योर्थो यस्य तस्य भावस्तत्वमित्यर्थः । स्वानुपजीविनेत्यस्य कृत्यमाह ॥ वेदार्थस्येति ॥ स्वबोधनीयपुरुषगता-ज्ञानादिविरोधिनेत्यस्य कृत्यमाह ॥ वेदार्थस्येति ॥ ननु स्वबोधनीयेति विशेषणं व्यर्थम् । अज्ञानादिविरोधिना स्वानुपजीविना मानांतरेणाग्राह्यार्थत्वमित्येतावतैव पूर्णत्वात् । न चेश्वरप्रत्यक्षस्याप्यज्ञानादिविरोधित्वेन वेदानुपजीविमानांतरत्वेन च तेन ग्राह्यार्थत्वस्यैव वेदे विद्यमानत्वेनापूर्वत्वाभावापत्त्या तदर्थं स्वबोधनीयेति विशेषणं सार्थकमेवेति वाच्यम् । ईश्वरप्रत्यक्षस्याज्ञानविरोधित्वस्यैवासम्भवात् । तथाहि । ईश्वरप्रत्यक्षं किं स्वाज्ञानविरोधि वा

स्यादन्यदीयाज्ञानविरोधिवा स्यात् । नाद्यः ईश्वरस्याज्ञानाभावेन तद्विरोधित्वासम्भवात् । नांत्यः । तथा सति विरोधिभूतेश्वरज्ञानस्य सर्वदा सत्त्वेन तद्विरोध्यज्ञानमस्मदादीनां कदापि न स्यात् । तस्मात्कथमज्ञानविरोधित्वमिति चेदुच्यते । ईश्वरज्ञानस्य स्वाज्ञान-विरोधित्वस्यैवांगीकारात् ।

न च स्वस्याज्ञानस्यैवाभावात्कथं विरोधित्वमिति वाच्यम् । अज्ञानस्याभावेन ज्ञानस्य तन्निवर्तकत्वासम्भवेप्यज्ञानेन सहानवस्थानविरोधस्य विद्यमानत्वेन दोषाभावात् नचैवं दत्तेपि स्वबोधनीयपदे पूर्वोक्तदोषस्तदवस्थः । स्वशब्देन वेदाः तद्बोधनीयाः पुरुषा अस्मदादयः तदज्ञानविरोधीश्वरप्रत्यक्षं अस्मदज्ञानस्यास्मन्मात्रनिष्ठत्वेनेश्वरज्ञानस्य तत्राभावेन सहान-वस्थानलक्षणविरोधसद्भावात् । स्वं वेदवाक्यं तदनुपजीविमानांतरमीश्वरप्रत्यक्षं तद्ग्राह्यार्थ-त्वस्यैव वेदविद्यमानत्वादिति वाच्यम् । एकत्र प्राप्तियोग्ययोरेव सहानवस्थानलक्षणविरोधः । अन्यथा मेरुमन्दरयोरपि सहानवस्थानलक्षणविरोधः स्यात् । न चेश्वरप्रत्यक्षास्मदज्ञान-योरेकत्र प्राप्तियोग्यतास्ति । येन सहानवस्थानलक्षणो विरोधः स्यात् । तथा चेश्वरप्रत्यक्षस्यास्मदज्ञानविरोधित्वाभावान्न पूर्वदोष इति ॥ अन्येषां विशेषणानां कृत्यमाकर एवोक्तम् । ननु प्रमाणांतरागृहीतार्थत्वमात्रोक्तावप्यबाधादग्राह्यार्थत्वं न वाच्यमित्यत आह ॥ प्रत्यक्षग्राह्येर्थ इति ॥ नन्वेवं सर्वेषामनुवादकत्वेन संप्रतिपन्नस्य ''अग्निर्हिमस्य भेषज''मिति वाक्यस्याप्यपूर्वविधित्वापत्तिः । तद्वाक्यस्यानुपजीविप्रत्यक्षगृहीतार्थग्राहित्वादित्यत आह प्रत्यक्षग्राह्येर्थ इति । तथाच विवक्षितलक्षणाभावान्नातिप्रसङ्ग इति भावः । ननु प्रत्यक्षग्राह्येर्थे प्राक् प्रवृत्तस्य शब्दस्य तदगृहीतार्थस्य तत्रार्थेऽपूर्वत्वमेवास्तु । किं तद्व्यवच्छेदायाग्राह्यार्थ-त्वविवक्षयेत्यतो मानांतरागृहीतार्थत्वविवक्षणे नियमविध्यसम्भवरूपं परिसङ्ख्याविध्य-सम्भवरूपं च बाधकं मनसि निधायाह ॥ अत एवेति ॥ अथवा तत्रैवोपष्टम्भकमाह ॥ अत एवेति ॥ मानांतराग्राह्यार्थत्वस्यावश्यं विवक्षणीयत्वादेवेत्यर्थः । तदगृहीतार्थत्वविवक्षायां तु व्रीहीनवहंतीत्यादेरप्युक्तविधापूर्वतावत्त्वेनापूर्वविधित्वं स्यादिति भावः । मानांतराग्राह्यार्थत्व-विवक्षायां विपक्षबाधकप्रदर्शनमुखेनोपष्टम्भकान्तरं चाह ॥ अत एवेति ॥ मानान्तरा-ग्राह्यार्थत्वस्य विवक्षितत्वादेवेत्यर्थः । स्वानुपजीविना ''इमामगृभ्णन् रशनामृतस्ये''त्ये-तद्वाक्यानुपजीविनेत्यर्थः । लिङ्गेन गृहीतार्थत्वाभावमुपपादयितुं मन्थरगामिनेति हेतुगर्भं विशेषणम् ॥ स्वरूपसिध्द्यादाविति ॥ सामर्थ्यस्य शक्तिरूपतया स्वरूपसिद्धौ स्वार्थसिद्धौ वेत्यर्थः । एवमुक्तविधापूर्वताया अभावेप्यपूर्वविधित्वासम्भवात्कचित्परिसंख्याविधित्वं

मीमांसकैरङ्गीकृतमिति सदृष्टांतमुपपादितम् । इदानीमुक्तविधापूर्वतायाः अभावेपि विधिमात्रत्वाभावे दृष्टांतमाह ॥ य एवं विद्वानित्यादि ॥

यद्वा ननु प्रत्यक्षग्राह्येर्थे प्राक् प्रवृत्तस्य शब्दस्य तत्रार्थेऽपूर्वत्वपरिहारायापि नाग्राह्यार्थत्वं विवक्षणीयम् । अग्रहीष्यमाणार्थत्वविवक्षयापि तत्सम्भवात् । अत एव व्रीहीनवहंतीत्यादेर्मानांतरागृहीतार्थत्वेपि ग्रहीष्यमाणार्थत्वाभावेनापूर्वविधिसम्भवान्नियमपरिसंख्याविधित्वाङ्गीकारः । तथा चाग्राह्यत्वविवक्षानुपपन्नेत्यत आह ॥ य एवं विद्वानित्याद्यनुवादस्येति ॥ तथाच मानांतराग्रहीष्यमाणार्थत्वविवक्षायामपि य एवं विद्वानित्याद्यनुवादस्य पुरोवादपूर्वकत्वेन तादृशमानांतरगृहीतार्थत्वेपि ग्रहीष्यमाणार्थत्वाभावेनोक्तलक्षणस्य तत्रापि सत्त्वाद्य एवं विद्वानित्याद्यनुवादस्याप्यपूर्वत्वं स्यात् तत्परिहारार्थमग्राह्यत्वस्यावश्यं विवक्षणीयत्वात् । तत्र चाग्रहीष्यमाणार्थत्वेप्यग्राह्यार्थत्वाभावान्नापूर्वत्वप्रसङ्ग इति भावः ।

नन्वेवं ''दध्नाजुहोती''त्यस्यापूर्वविधित्वं न स्यात् । ''दध्नाजुहोती''त्येतद्वाक्यबोधनीयपुरुषगताज्ञानविरोधिना एतद्वाक्यानुपजीविना ''अग्निहोत्रं जुहोती''त्येतद्वाक्येन ग्राह्यो यो होमरूपोऽर्थस्तद्ग्राहकत्वस्यैव विद्यमानत्वादित्यतः होमांशे मानांतरग्राह्यार्थत्वस्य विद्यमानत्वेपि तत्रापूर्वत्वस्यैवाभावात् दध्याद्यंशे चापूर्वविधित्वसत्त्वेपि तत्र मानांतरेण ''अग्निहोत्रं जुहोती''त्यादिना दध्यादेरविधानेन तदग्राह्यार्थत्वमस्त्येव । तथाच यदंशेऽपूर्वता न तदंशे मानांतरग्राह्यार्थता । यदंशे मानांतरग्राह्यार्थता न तत्रापूर्वतेत्यभिप्रायेणाह ॥ दध्नाजुहोतीत्यादि ॥ अथवा अंशविवक्षाया आवश्यकत्वे नियामकमाह ॥ दध्नेति ॥ ननु तथापीदं लक्षणमयुक्तम् । तथासति देवतासहितकर्मविधायकब्राह्मणस्यापूर्वत्वं न स्यात् । स्वं ब्राह्मणवाक्यं तद्बोधनीयाः पुरुषा अस्मदादयः तद्गतं यदज्ञानादि तद्विरोधि स्वं ब्राह्मणं तदनुपजीविना शाखांतरस्थेन मन्त्रेण ग्राह्यो यो देवतादिरूपोऽर्थः तद्ग्राह्यार्थकत्वस्यैव विद्यमानत्वादित्यत आह ॥ एवमिति ॥ उपजीव्यत्वादिति ॥ अत्र देवताश्रयकर्मसमर्पकत्वादुपजीव्यत्वं बोध्यम् । तथाच ब्राह्मणवाक्यस्य शाखान्तरस्थमन्त्रग्राह्यदेवताद्यर्थग्राहकत्वेपि तस्य मन्त्रस्य ब्राह्मणवाक्यमुपजीव्य प्रवृत्तत्वेन स्वानुपजीवित्वाभावादपूर्वता सम्भवत्येवेत्यर्थः ॥ मन्त्रस्येति ॥ ब्राह्मणवाक्यस्य देवताद्यर्थप्रकाशकमन्त्राश्रयकर्मसमर्पकत्वेन मन्त्रं प्रत्युपजीवित्ववन्मंत्रस्य ब्राह्मणवाक्यं प्रत्युपजीवित्वाभावेन मन्त्रानुपजीविब्राह्मणवाक्यग्राह्यदेवताद्यर्थकत्वस्यैव विद्यमानत्वेन तदंशे नापूर्वत्वमिति भावः । तर्ह्येतच्छाखास्थः

शाखान्तरस्थोवा मन्त्रः किमविधायक एवेत्यभिप्रायेण पृच्छति ॥ किंत्विति ॥ उत्तरमाह ॥ ब्राह्मणाप्राप्तेति ॥ देवतागुणादौ देवतानिष्ठश्रैष्ठ्यादिगुणादौ । मन्त्रानुपजीविब्राह्मण-वाक्यागृह्यगुणादावपूर्वतेत्यर्थः ।

नन्वेककर्मविधायकभिन्नभिन्नशाखास्थवाक्ययोः कथमपूर्वता । तयोःपरस्परगृहीतार्थ-ग्राहकत्वस्यैव विद्यमानत्वेन मानान्तरागृह्यार्थत्वाभावादित्यतः किं यत्रैकस्मिन्वाक्ये साङ्गकर्माभिधानमितरत्र तदभावस्तत्रेदमापादनमुत यत्र वाक्यद्वयेपि साम्यमेव तत्रवेति विकल्प्याद्य आह ॥ भिन्नेति ॥ तथाच यस्मिन्वाक्ये द्रव्यदेवताख्ययागरूपं वा इतिकर्त-व्यताभूयस्त्वं वाऽस्ति तदेव वाक्यं विधायकम् । तस्य च कर्मांशे स्वोपजीविमानां-तरग्राह्यार्थत्वेपि स्वानुपजीविमानांतरग्राह्यार्थत्वाभावादपूर्वता सम्भवति । यत्र तु देवताद्रव्याख्ययागरूपादिकं नास्ति तस्य चानुपजीविद्रव्यदेवताख्ययागरूपवाक्यगृहीतार्थ-कत्वात्कर्मांशे नापूर्वतेत्यर्थः ॥ इति कर्तव्यतांश इति ॥ तत्र च स्वानुपजीविमानांतरा-ग्राह्यार्थत्वाभावादिति भावः । ननु यत्र शाखाद्वयस्थे वाक्यद्वयेपि द्रव्यदेवतायागरूपं वा इतिकर्तव्यताभूयस्त्वं वा सममेव तत्र वाक्यद्वयस्यापूर्वत्वं न स्यात् । वाक्यद्वयस्यापि परस्परमुपजीव्योपजीवकभावाभावेन स्वानुपजीविमानान्तरग्राह्यार्थस्यैव विद्यमानत्वादिति द्वितीयं दूषयति ॥ यदीति ॥ तत्र मीमांसकमते तत्तच्छाखाध्यायिनं प्रति तत्तद्वाक्यस्य व्यवस्थया बोधकत्वादपूर्वतापि व्यवस्थितैवेत्यन्वयः । ननु वेदत्रयाध्ययनवत्सर्वशाखा-ध्ययनमपि नियमेन कर्तव्यम् । अन्यथैकस्यां शाखायां सर्वकर्मानुपदेशेन साङ्गकर्मनिर्वाहा-भावात्तदनुष्ठानं न स्यादित्यत आह ॥ एकस्मिन्निति ॥ नियमेन वेदत्रयाध्ययने हेतुः कर्मानवगतेरिति । तत्र हेतुद्वयं यजुरादिरूपे वेद इत्यादि । शाखाध्ययननियमाभावे हेतुस्तैत्तिरीयादीति । ननु वेदत्रयाध्ययनस्यावश्यकत्ववच्छाखात्रयाध्ययनस्यावश्यकत्वात्कथं तच्छाखाध्यायित्वेनापूर्वतेति चेन्न । वेदत्रयाध्ययनाभावे साङ्गकर्मण एवासम्भवेन वेदत्रयाध्य-यनस्यावश्यकत्वाच्छाखात्रयाध्ययनाभावेपि साङ्गकर्मणः कर्तुं शक्यत्वात्तत्तच्छाखाध्यायित्वे-नापूर्वतोपपत्तेः । न च वेदत्रयाध्ययनाभावे साङ्गकर्मासम्भववच्छाखात्रयाध्ययनाभावे साङ्गकर्मासम्भवेन शाखान्तरस्याप्यध्येतव्यत्वमावश्यकमिति वाच्यम् । एकैकस्मिन्वेद आध्वर्यवादिसर्वकर्मानुपदेशेन वेदत्रयाध्ययनाभावे साङ्गकर्मानुष्ठानासम्भवेपि एकैकस्यां शाखायां सर्वकर्मोपदेशेन शाखात्रयाध्ययनाभावे कर्मानुष्ठानासम्भवाभावान्न कश्चिद्दोषः ।

(पाण्डुरङ्गि)

ननूक्तरीत्या मीमांसकमते शाखान्तरस्याध्येतव्यत्वनियमाभावेन तन्मतेऽपूर्वताया व्यवस्थितत्वसम्भवेपि भवन्मते कथम् । ''सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषा''दिति सर्वशाखाधिकरणे सर्वशाखाध्ययनस्य विवक्षितत्वेनानेकशाखाध्ययनापत्त्या तत्तच्छाखाध्यायित्वाभावेन तेन रूपेणापूर्वताया असम्भवादित्यत आह ॥ अस्मन्मत इति ॥ शक्तान्प्रत्यव्यवस्थितविकल्पेन विधायकत्वमित्यन्वयः । किंचिद्विधायकं किंचिदविधायकमित्यव्यवस्थितविकल्पेन विधायकत्वमित्यर्थः । नन्वव्यवस्थितविकल्पेन विधायकत्वं कुत्राप्यनुपलब्धं प्रकृत एव कथमङ्गीकार्यमित्यतः तत्र मीमांसकसम्प्रतिपन्नं दृष्टान्तमाह ॥ मीमांसकमते वेदद्वयस्थवाक्यद्वयवदिति ॥ किं बहुना एकस्यामपि शाखायामव्यवस्थितविकल्पेन विधायकत्वं यदा तदा शाखाभेदे तद्भविष्यतीति किं वक्तव्यमित्यभिप्रायेण तत्रापि सम्प्रतिपन्नं दृष्टान्तमाह ॥ क्रयवाक्यवदिति ॥ नन्वेवं स्मृतीनां जगत्सत्यत्वेश्वरसार्वज्ञादावपूर्वत्वं न स्यात् । तासां स्वानुपजीविवेदरूपप्रमाणांतरग्राह्यजगत्सत्यत्वादिरूपार्थग्राहकत्वादित्यतः नात्र स्वानुपजीविमानान्तराग्राह्यार्थत्वमात्रमपूर्वत्वं किं तु स्वबोधनीयपुरुषगताज्ञानादिविरोधित्वविशिष्टम् । वेदस्य च स्मृतिबोधनीयपुरुषगताज्ञानविरोधित्वाभावान्न दोष इति भावेनाह ॥ अत एवेति ॥ अपूर्वतालक्षणे स्वबोधनीयपुरुषगताज्ञानविरोधित्वरूपविशेषणप्रक्षेपादेवेत्यर्थः । अथवा शक्ताशक्तपुरुषभेदेनापूर्वताया व्यवस्थितत्वादित्यर्थः । तथाच यथा शाखाद्वयस्थवाक्यद्वये पुरुषभेदेनापूर्वताव्यवस्थिता तथा स्मृतीनामपि वेदार्थग्रहणशक्तान् प्रत्यपूर्वताऽभावेपि तदग्रहणशक्तानस्मदादीन् प्रत्यपूर्वताव्यवस्थितैवेति भावः । तर्कस्याप्रयोजकत्वमाह ॥ अपूर्वत्वाभावेपीति ॥ नन्वेवं ''विश्वं सत्य''मित्यादिवाक्यानां जगत्सत्यत्वादौ न तात्पर्यम् । तज्ज्ञापकापूर्वताया अभावात् । तथाहि । स्वं विश्वं सत्यमित्यादिवाक्यं तद्बोधनीया अस्मदादयः पुरुषाः तद्गताज्ञानविरोधि स्वं विश्वं सत्यमित्यादिवाक्यं तदनुपजीविमानांतरं जगत्सत्यत्वग्राहिप्रत्यक्षं तद्ग्राह्यजगत्सत्यत्वग्राहकत्वस्यैव सत्त्वेन तदग्राह्यार्थत्वाभावादित्यतो बाह्यप्रत्यक्षस्य दोषशङ्काकलंकितत्वेन जगत्सत्यत्वाग्राहकत्वेन तदग्राह्यार्थत्वस्य विद्यमानत्वेनापूर्वत्वसम्भवात्सत्यत्वादौ तात्पर्यं सम्भवतीत्याह ॥ एवमिति ॥ ननु मास्तु बाह्यप्रत्यक्षस्य दोषशङ्काकलंकितस्य जगत्सत्यत्वग्राहकत्वम् । साक्षिणस्तु जगत्सत्यत्वग्राहकता सम्भवत्येव। तस्य निर्दोषतानियमात् एवं च साक्षिप्रत्यक्षग्राह्यसत्यत्वादिग्राहकत्वेन ''विश्वं सत्य''मित्यादि वाक्यानामपूर्वता न सम्भवत्येवेति चेन्न । सर्वस्यापि ज्ञाततयैव साक्षिवेद्यत्वेन साक्षात्साक्षिग्राह्यसुखादिमात्रस्य श्रुत्याऽग्रहणादिति ज्ञेयम् । यद्वैतदस्वरसादाह ॥ तदभावेपि

वेति ॥ अन्यत्रेति ॥ प्रमाणलक्षणादावित्यर्थः । ननु तर्ह्यत्र ''मानांतराप्राप्तिरपूर्वते''त्युक्तत्वादेतट्टीकाविरोध इत्यत आह ॥ अत्रापीति ॥

तात्पर्यचन्द्रिका

स्तुतौ निंदायामेककर्तृकोपाख्यानरूपपरकृतौ बहुकृतोपाख्यानरूपपुराकल्पे चार्थवादशब्दोऽक्षादिशब्दवन्नानार्थः । मन्त्रशब्दवदभियुक्तप्रयोगरूपैकोपाधिको वा विधिशेषत्वरूपैकोपाधिको वेति द्रष्टव्यम् ।

प्रकाशिका — फलस्वरूपस्य ''फलवत्त्वं फल''मिति टीकायां व्यक्तत्वात्तदनुक्त्वा ''स्तुतिर्निंदापरकृतिः पुराकल्पोऽर्थवाद'' इति टीकां व्याचष्टे ॥ स्तुताविति ॥ ''जनको ह वैदेह आसांचक्रे'' इत्यादिपरकृतिः । ''त्रयो होद्गीथे कुशला बभूवु''रित्यादिपुराकल्पः । एकधर्मोपाधिकत्वसम्भवे नानाशक्तिकल्पनमन्याय्यमित्यत उक्तं मन्त्रशब्दवदिति । यद्यपि द्वितीयस्याद्यपादे ''तच्चोदकेषु मन्त्राख्ये''त्यष्टमेधिकरणे अनुष्ठानोपयोग्यर्थस्मारकत्वं मन्त्रलक्षणमुक्तं तथापि तद्भाष्यवार्तिकयोस्तस्याभियुक्तप्रसिद्ध्युपलक्षणत्वमुपपादितमित्येवमुक्तम् । अत एव शास्त्रदीपिकायां ''यत्राभियुक्तानां मन्त्रप्रसिद्धिः स मन्त्र'' इत्युक्तमिति भावः । तथाच यत्राभियुक्तानामर्थवादप्रसिद्धिः सोऽर्थवाद इत्युक्तं भवति । अभियुक्तप्रदर्शितोपाधिस्वीकारसम्भवे स्वमनीषितोपाध्यंतरान्वेषणमयुक्तमित्यत आह ॥ विधीति ॥ उक्तं ह्यापस्तंबसूत्रे ''विधिशेषोऽर्थवादो निंदा प्रशंसा परकृतिः पुराकल्पश्चे''ति । ''युक्तिरुपपत्ति''रिति टीका''उपपत्तिर्व्याप्यम् । निर्दोषत्वेन विशेषणाच्चासिद्धावति व्याप्ति'' रित्यादिना तर्कताण्डवे व्याख्यातप्रायेति नेह सा विवृता । ''प्रकरणादिरुपक्रमस्तदंत उपसंहारः'' इति न्यायकल्पलतिकायां टीकाकारैरुक्ततयेह टीकायामनुक्तत्वाद्वक्तव्यविशेषाभावाच्च तयोः स्वरूपमिह नोक्तमिति बोध्यम् ।

पाण्डुरङ्गि — ननु स्तुत्यादीनामनेकेषां कथमर्थवादशब्दवाच्यत्वम् । चतुर्ष्वनुगमकोपाधेरभावादित्यत आह ॥ स्तुतावित्यादि ॥ इदं चाङ्गीकृत्योक्तम् । वस्तुतस्त्वनुगमकप्रमाणमस्तीत्याह ॥ मन्त्रशब्दवदिति ॥ यद्वा ''स्तुतिर्निंदा परकृतिः पुराकल्पादिरूपोर्थवाद'' इति टीकायां स्तुत्यादिसमुदायस्यार्थवादत्वं प्रतीयते तच्चानुपपन्नं तथात्वे यत्रैकैकं तत्रार्थवादत्वाभावापातादित्यतः प्रत्येकमेवैषामर्थवादत्वमित्याह ॥ स्तुतावित्यादि ॥

(पाण्डुरङ्गि)

प्रवृत्तिनिमित्तैक्याभावादिति भावः । अत्र टीकायामादिशब्देन द्विकर्तृकोपाख्यानरूपपुराकल्पविशेषस्य परामर्शः । पुराकल्पशब्देन सामान्यपरेणापि बहुकर्तृकोपाख्यानरूपपुराकल्पविशेष एव विवक्षितः । उभयोश्चानेककर्तृकोपाख्यानत्वरूपेणैवानुगम इति विवक्षितत्वान्नादिपदवैयर्थ्यम् । वस्तुतस्त्वेककर्तृकोपाख्यानबहुकर्तृकोपाख्यानाभ्यां कर्तृनिर्देशपूर्वकोपाख्यानरूपार्थवादस्य लाभेपि कर्तृनिर्देशरहितोपाख्यानरूपार्थवादविशेषलाभायादिशब्द इति द्रष्टव्यम् । सम्भवत्येकार्थत्वेऽनेकार्थत्वमन्याय्यमित्यरुचिं मनसि निधायाह ॥ मन्त्रशब्दवदिति ॥ तथाच यत्राभियुक्तैरर्थवादशब्दः प्रयुज्यते स सर्वोप्यर्थवादशब्दार्थः । एवं चाभियुक्तप्रयोगरूपोपाधिपुरस्कारेण चतुर्ष्वप्यर्थवादशब्दप्रयोग इति ध्येयम् । न चार्थवादशब्दप्रयोगे सत्यभियुक्तप्रयोगविषयत्वमभियुक्तप्रयोगविषयत्वे सत्यर्थवादशब्दप्रयोग इतीतरेतराश्रयत्वमिति वाच्यम् । पूर्वपूर्वाभियुक्तप्रयोगविषयत्वेनोत्तरोत्तरप्रयोगोपपत्तेरिति भावः ।

तात्पर्यचन्द्रिका

तत्र चैकप्रकरणे प्रथमेनार्थे धीस्थे चरमस्य तद्विषयस्य प्रथमस्वारस्यविरोधिनोप्यवैयर्थ्याय प्रथमव्याख्यानरूपतायाः लोके गामानय बलीवर्दमानयेत्यादौ वेदे च वासः परिधत्ते यत्क्षौममित्यादौ दर्शनात् निश्चितप्रामाण्यव्याख्यानानुसारेण च व्याख्येयस्य ''अशनापिपासे हवा उग्रं वचः'' इत्यादिब्राह्मणानुसारेण ''उग्रं वचोपावधी''मित्यादिमन्त्रस्येव ''सदिति प्राणस्तीत्यन्नं यमित्यसावादित्य'' इत्याद्यनुसारेण च सत्यमित्यादेरिव च नेयत्वात् तथा पूर्वाबाध उत्तरस्यानुत्थानाच्चोपक्रमादुपसंहारस्य प्राबल्यं यथा ''प्रथमेऽश्रवणादिति चेन्न ता एव ह्युपपत्ते''रित्यत्र ''श्रद्धां जुह्वती''त्युपक्रमात् ''इतितु पञ्चम्यामाहुतावापः'' इत्युपसंहारस्य । तत्र ह्यप्शब्दानुसारेण श्रद्धाशब्दस्य लक्षणा वक्ष्यते । न चैवं वेदोपक्रमाधिकरणविरोधः । न हि तत्र ''उच्चैर्ऋचा क्रियत'' इत्युपसंहारस्थऋगादिशब्द ''स्त्रयो वेदा'' इत्युपक्रमस्थवेदशब्दमात्राद्भेदे लाक्षणिकः । किंतु ''अग्नेर्ऋग्वेदो वायोर्यजुर्वेद आदित्यात्सामवेद'' इति वेदशब्दाभ्यासात् । नाप्यश्वप्रतिग्रहेष्टिनयविरोधः । तन्त्रसारे -

''मैत्रायणीयशाखायां दात्रुपक्रमतोप्यृते ।
कर्माङ्गत्ववशादेव दातुरिष्टिः प्रतीयते '' ॥

इत्युपक्रमं विनैव दातुरिष्टिरित्युक्तत्वात् । शास्त्रदीपिकायामपि ''सालिङ्गादार्त्विजे स्या''दिति सूत्रानुसाराद्भाष्यकारान्तरैः ''तत्राप्युपसंहारानुरोधात्प्रतिग्रहे दातुरेवेष्टि-रित्युक्त''मित्युक्तत्वात् । याज्ञिकैरपि तथैव स्वीकृतत्वात् । प्राभाकरैरपि ''पौण्डरीके श्रूयत इति कृत्वा चिन्तेयम् । अन्यथा दातुरिष्टिरिति सिद्धांतासिद्धे''रिति वदद्भिर्वस्तुतः प्रतिग्रहीतुरिष्टिरिति स्वीकृतत्वाच्च । तदुक्तं न्यायविवरणे ''उपक्रम-प्रामाण्यार्थमेवोपसंहारानुसारित्वमङ्गीकर्तव्यम् । व्याख्यानस्य पश्चात्तनत्वनियमा''-दिति । विस्तृतं चैतदन्यत्र ।

प्रकाशिका — एवमुपक्रमादीनां स्वरूपोक्तिपरटीकां व्याख्यायेदानीं तेषां बलाब-लोक्तिपरटीकां व्याचिख्यासुः ''उपसंहारस्य व्याख्यानरूपत्वेन तद्विरोध्युपक्रमाप्रामाण्या-पत्तेस्तस्य ततोपि प्राबल्य''मिति टीकां व्याचष्टे ॥ तत्र चेति ॥ प्रकरणभेदे विरोधायो-गादेकेत्युक्तम् । प्रथमेन उपक्रमेण । चरमस्य उपसंहारस्य । तद्विषयस्य उपक्रांतार्थविषयस्य । प्रथमव्याख्यानरूपताया दर्शनादित्यनेन व्याख्यानरूपत्वं हेतुरुक्तो भवति । आत्यंतिका-विरोधेऽप्रामाण्यप्रसङ्गात्प्रथमस्वारस्यविरोधिन इत्युक्तम् । आपातप्रतीतार्थविरोधिन इत्यर्थः ॥ लोक इति ॥ प्रथमप्रयुक्तगोशब्दस्य चरमानुरोधेन तद्विशेषबलीवर्दार्थत्वनिश्चयादित्यर्थः ॥ वेदेचेति ॥ आद्ये ''सन्दिग्धेषु वाक्यशेषा''दिति चतुर्थपादीयोपांत्याधिकरणे ''अक्ताः शर्करा उपदधाति तेजो वैघृत''मित्युदाहृत्य किं घृततैलादिना येन केनचिदंजनं किं वा घृतेनैवेति विशये अप्राप्तविषयत्वादुपक्रमस्थत्वात्प्राधान्याच्च विधेर्बलीयस्त्वान्न लक्षणयाऽक्त-शब्दस्य घृतपरत्वं युक्तम् । अर्थवादस्य तूपसर्जनत्वादुपसंहारस्थत्वात् प्राप्तविषयत्वाच्च दुर्बलत्वेन लक्षणासहिष्णुत्वाद्धृतशब्द एवांजनसाधनद्रव्यमात्रपर इति येन केनचिदंजनमिति प्राप्ते विधिबोधितस्य सामान्यस्य सर्वविशेषेषु कात्स्न्र्येनोपस्थानात् विरोधाभावात्सामान्यस्य व्यवहारायोगेन विशेषोपादानावश्यंभावात् यस्मिन्कस्मिंश्चिद्विशेषे उपादातव्ये सन्निहितत्यागे हेत्वभावाद्धृतेनैवांजनमिति सिद्धांतितम् । अत्रत्येन न्यायेन चरमश्रुतस्य क्षौमशब्दस्य प्रथमश्रुतवासःशब्दस्वारस्यविरोधिनोप्यवैयर्थ्याय व्याख्यानरूपताया दर्शनादित्यर्थः । आदिपदेनाक्ताः शर्करा इति वाक्यं गृह्यते । मृत्तिकासहिताः क्षुद्रपाषाणाः शर्कराः स्थापयतीत्यर्थः । ततश्च किमित्यत आह ॥ व्याख्यानेति ॥ तर्हि शैवादिव्याख्यानांतरेण वेदो नेतव्यः स्यादित्यत उक्तं निश्चितेति ॥ ''याते अग्नेऽयाशया तनूर्वर्षिष्ठा गह्वरेष्ठोग्रं

(प्रकाशिका)

वचोपावर्धीं त्वेषं वचो अपावर्धीं स्वाहेत्युपसन्मंत्रेण व्याख्येयमुग्रं वचस्त्वेषं वच'' इत्येतदुभयं ''अशनायापिपासे हवा उग्रं वच एनश्च वैरहत्यं च त्वेषं वच'' इति निश्चितप्रामाण्य-व्याख्यानरूपब्राह्मणानुरोधेनाशनायापिपासादिपरत्वेन यथा नीयते तथैतरेये ''तत्सत्य''-मित्युक्तस्य सत्यशब्दस्य सदित्यादिव्याख्यानानुरोधेन वायुब्रह्मसूर्यरूपदेवतात्रयपरत्वं नीयते तथा प्रकृतेपीत्यर्थः । यद्यपि ''स एष भगवान्विष्णुः सत्यमित्यभिधीयते'' इति सत्यशब्दो विष्ण्वर्थको व्याख्यातस्तद्भाष्ये । तथापि ''देवतात्रयमन्यच्च पृथक् सत्यमितीर्यते'' इत्यर्थांतरस्याप्युक्तत्वादेवमुक्तमिति बोध्यम् । आदिपदेन ''तदेतन्मूर्तं यदन्यद्वायोश्चान्त-रिक्षाच्चे''ति ''अथामूर्तं वायुश्चांतरिक्षं चे''त्यादिकाण्वश्रुत्यादिस्थं गृह्यते । किं च पूर्वस्मिन्विरोधिनि जाग्रति तदबाधित्वोत्तरस्योत्थानायोगात्तद्बाधेनैवोत्थानमित्यपच्छेद-नयोक्तन्यायेन प्राबल्यमकामेनाप्येष्टव्यमित्याह ॥ तथेति ॥ तत्रोदाहरणमाह ॥ यथेति ॥ उपसंहारस्येति ॥ प्राबल्यमित्यनुषङ्गः ।

तृतीये आद्यपादे ''प्रथमेऽश्रवणादिति पञ्चमेधिकरणे ''तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वती''त्युपक्रम्य ''इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ती''ति वाजसनेयेऽष्टमे श्रुते वाक्ये ''श्रद्धां जुह्वती''त्युत्क्रांतस्य श्रद्धयेष्टवतः श्रद्धासहितस्यैव व्याख्ये प्रथमाग्नौ होमश्रवणाद्भूतानां न सहगमनमिति प्राप्ते उपसंहारेऽबुपलक्षितो जीवः पुरुषशब्दवाच्यो भवतीत्यपां जीवेन सह गतिश्रवणात्तदनुरोधेनोपक्रमस्थश्रद्धाशब्दस्याजहल्लक्षया श्रद्धयाद्भिश्च युक्तो जीवोर्थ इत्यवश्यं वाच्यत्वाद्भूतानां सहगतिरस्तीति सिद्धांतितम् । तदेतदाह ॥ तत्र हीति ॥ नन्वेवं सत्युपक्रमप्राबल्यसाधकप्रागुदाहृताधिकरणविरोध इत्याशङ्क्याह ॥ न चैवमिति ॥ उपसंहारप्राबल्य इत्यर्थः । उक्तमधिकरणं प्राक् ॥ अभ्यासादिति ॥ अत एव सूत्रे ''वेदोवा प्रायदर्शना''दिति प्रायपदप्रयोग इति भावः । ,तेन शाबरभाष्यादिरूपं जैमिनिसूत्रव्याख्यानं व्यासमतविरुद्धत्वादपव्याख्यानमित्युक्तं भवति ॥ नापीति ॥ तृतीयस्य चतुर्थपादे ''अचोदितं च कर्मभेदा''दित्येकादशेधिकरणे ''प्रजापतिर्वरुणाये''ति वाक्यमुदाहृत्य वेदोपक्रमाधिकरण इव पूर्वोत्तरपक्षावुक्त्वा उपक्रमानुरोधेन दातुरिष्टिरिति व्यवस्थापितत्वादिति भावः । तन्त्रसारे मीमांसकग्रन्थे । दातुरिष्टिरिति स्वीकारो नोपक्रमप्राबल्यात् । किन्तु ''दोषात्त्विष्टिर्लौकिकेस्याच्छास्त्राद्धि वैदिकेन दोषःस्या''दिति पूर्वाधिकरणे इयमिष्टिर्वैदिककर्माङ्गं न स्वतन्त्रेति व्यवस्थापनादङ्गप्रधानयोरेककर्तृत्वनियमेन कर्तुर्दातुरेवेयमिष्टिरिति सिध्यतीति वैदिककर्माङ्गत्ववशादेवेत्युक्तत्वान्न विरोध इत्यर्थः ।

तैत्तिरीयशाखायामुपक्रमस्य सत्त्वात्कथमेतदित्यत उक्तं मैत्रायणीयेति । तत्र दात्रुपक्रमं विनैवास्य पाठात् । अन्यथा तत्र दातुरिति न सिद्ध्येदित्यर्थः। अङ्गत्ववशादित्युपलक्षणम्। यदि दातुरिष्टिस्तदाऽश्वदानयुक्तपौण्डरीकयागानुप्रवेशात्फलांतरं न कल्प्यम् । प्रतिग्रहीतुश्चेत्तस्य फलांतरं कल्प्यमिति गौरवाच्चेत्यपि ध्येयम् ॥ शास्त्रेति ॥ उक्तत्वान्न विरोध इत्यन्वयः । अयमर्थः । तत्र यथाभाष्यमेतदधिकरणमुपन्यस्योपक्रमाधिकरणेन गतार्थत्वमाशङ्क्य ऋगादिशब्दा वेदेपि बहुलं दृष्टप्रयोगाः गृह्णातिस्तु दातृव्यापारे न क्वचिद्दृष्टप्रयोगः तेनासौ नोपक्रमानुसारेण दातृव्यापारपरत्वेन व्याख्यातुं शक्य इति विशेषाशङ्कानिरासार्थत्वेनागतार्थत्वमुपपाद्य वस्तुगतिमभिप्रेत्येदमुक्तम् । नात्राधिकरणस्यावकाशः । अथापि भाष्यकारान्तरैः ''सा लिङ्गादार्त्विजे स्या''दिति गुणसूत्रे सा इष्टिः लिङ्गात् उपसंहारप्राबल्यरूपात् आर्त्विजे ऋग्व्यापाररूपे प्रतिग्रहनिमित्ते स्यादित्यर्थस्वारस्यमनुरुध्य प्रतिग्रहीतुरिष्टिराश्रिता । तदसहिष्णुर्भाष्यकारः प्रौढिवादेन तेनैव सूत्रेण दातुरिष्टिरिति वक्तुमधिकरणान्तरं चकार । ''अचोदितं चेति सा लिङ्गादिति च सूत्रद्वयं दोषात्त्विष्टिरिति पूर्वाधिकरण एव योज्यमित्युक्त्वा''दिति ॥ याज्ञिकैरिति ॥ आद्ये तृतीयपादे ''प्रयोगशास्त्रमिति चे''दिति कल्पसूत्राधिकरणोक्तरीत्या प्रबलन्यायविरोधे याज्ञिकाभ्युपगमस्यानादरणीयत्वेपि अत्र तादृशविरोधाभावान्न तदनादरो युक्त इति भावः ॥ प्राभाकरैरिति ॥ पौण्डरीको नामैकादशरात्रो अहीनविशेषः । तत्र ''अयुतं दक्षिणा अश्वसहस्रमेकादश''मित्यश्वदानं विहितम् । न तत्प्रकरणे इयमिष्टिराम्नाता । तैत्तिरीयाणां काम्येष्टिकाण्डे तदाम्नानात् । अतो दातुरिति सिद्धांतसिद्ध्यर्थं पौण्डरीके श्रूयत इति कृत्वा चिंतयेदमधिकरणं प्रवर्तितम् । वस्तुतस्तु प्रतिग्रहीतुरेवेति स्वीकृतत्वान्न विरोध इत्यर्थः ॥ तदुक्तमिति ॥ ''प्रथमेऽश्रवणा''दित्यत्रेत्यर्थः । अन्यत्र तर्कताण्डवे द्वितीयपरिच्छेदे अत्राधुनिकोक्तोपक्रमपराक्रमखण्डनं तु गुरुपादोक्तोपसंहारविजयादनुसन्धेयम् ।

पाण्डुरङ्गि — ननु यत्रोपक्रमोपसंहारयोः परस्परविरोधस्तत्रोभयोरप्यप्रामाण्यात्कथं तत्र तात्पर्यनिर्णयः । नच तत्रोपसंहारेण तात्पर्यनिर्णय इति वाच्यम् । उपक्रमस्यानुपसंजातविरोधित्वेनोपसंहारापेक्षया प्रबलत्वात् । न च तर्ह्यस्तु तेनैव निर्णय इति वाच्यम् । अपच्छेदादावुपसंहारबलीयस्त्वस्याप्याश्रयणात् । तथाच कथं तयोर्निर्णायकत्वमत आह ॥ तत्रचेति ॥ तत्रोपक्रमादुपसंहारस्य प्राबल्यमित्यन्वयः । तत्र उपक्रमोपसंहारयोरित्यर्थः । प्राबल्ये हेतुरुपसंहारस्योपक्रमव्याख्यानरूपत्वम् ॥ प्रथमेनेति ॥ उपक्रमेणेत्यर्थः । ननु

(पाण्डुरङ्गि)

भिन्नविषयत्वात्कथं तस्य व्याख्यानरूपत्वमित्यत उक्तम् ॥ तद्विषयस्येति ॥ उपक्रम-विषयकस्येत्यर्थः । ननु नोपसंहारस्योपक्रमव्याख्यानरूपत्वम् । उपक्रमस्वारस्य-विरोधित्वादित्यत उक्तम् ॥ प्रथमस्वारस्यविरोधिनोपीति ॥ तथाच वैयर्थ्यपरिहारान्यथानुप-पत्त्या व्याख्यानरूपत्वमाश्रयणीयमिति भावः । ननूपसंहारस्य व्याख्यानरूपत्वं क्व दृष्टमित्यतो लोके वेदेच दृष्टमित्याह ॥ लोक इत्यादिना ॥ बलीवर्दमानयेत्युपसंहारेण गामानयेत्युपक्रमस्थगोशब्दस्य बलीवर्दपरत्वं यत्क्षौममित्युपसंहारेण वासः परिधत्त इत्युपक्रमस्थवासःशब्दस्य क्षौमपरत्वं दृष्टमित्यर्थः । अस्तूपसंहारपरस्योपक्रमव्याख्यानरूपत्वं ततः किमित्यत आह ॥ व्याख्यानेति ॥ व्याख्यानानुसारेण व्याख्येयस्य नेयत्वादिति भावः । ननु तर्हि पाशुपतादिरूपव्याख्यानानुसारेण वेदस्यापि नेयत्वं स्यादत उक्तम् । निश्चितेति ॥ तस्य चाप्रामाण्यान्न तदनुसारेण वेदो नेय इति भावः । व्याख्यानानुसारित्वं व्याख्येयस्य क्व दृष्टमित्यत आह ॥ अशनेति ॥ किं च पूर्वस्मिन्विरोधिनि जाग्रति विरोधिन उत्तरस्य समुत्थानं प्राबल्यं विना नसिध्यति । तथाच विरोधिन्युपक्रमे धीस्थ उत्थित उपसंहार उपक्रमं बाधते । अन्यथोत्थानमेव न स्यादित्याह ॥ तथापूर्वबाध इति ॥ स्वमतेनोदाहरणमाह ॥ यथेति ॥

नन्वत्रोपसंहारानुसारेणोपक्रमबाधश्चेद्वेदोपक्रमाधिकरणविरोधः । तत्रोपक्रमानुसारेणोप-संहारस्य व्याख्यातत्वादित्याशङ्क्य निषेधति ॥ न चैवमिति ॥ नोपक्रमानुसारेणोप-संहारस्थऋक्पदस्य वेदपरत्वं किंतु वेदशब्दाभ्यासादित्याह ॥ नहीति ॥ उपसंहारापेक्षया वेदशब्दाभ्यासस्य प्राबल्यादिति भावः । ननु तथाप्यश्वप्रतिग्रहेष्टिनयविरोधः । तत्रोपक्रमानु-सारेण प्रतिगृह्णीयादित्यस्य ग्राहयेदिति व्याख्यातत्वादित्याशङ्क्य निषेधति ॥ नापीति ॥ तन्त्रसारे उपक्रमं विनैव दातुरिष्टिरित्युक्तत्वादित्यन्वयः । कुत इत्यत उक्तं मैत्रायणीय-शाखायामित्यादि ॥ तथाच नोपक्रमानुसारेणोपसंहारव्याख्यानं तत्रेति भावः । अन्यत्रा-प्युक्तमस्तीत्याह ॥ शास्त्रेति ॥ शास्त्रदीपिकायामित्युक्तत्वादित्यन्वयः । किमुक्तमित्यतः सा लिङ्गेत्यादि ॥ नन्वनुष्ठानविरोध इत्यत आह ॥ याज्ञिकैरपीति ॥ ननु तथापि प्राभाकरैरन्यथोक्तत्वात्तद्विरोध इत्यत आह ॥ प्राभाकरैरपीति ॥ ननूपक्रमापेक्षयोपसंहार-स्याचार्यैरनुक्तं प्राबल्यं कुत उपपाद्यत इत्यत आह ॥ तदुक्तमिति ॥ नन्वेवं यदि वेदोपक्रमाधिकरणेऽभ्यासादेव ऋगादिपदानां वेदपरत्वनिश्चयस्तर्हि ''विशये प्रायदर्शना''-दिति जैमिनिसूत्रविरोध इत्यत आह ॥ विस्तृतं चैतदन्यत्रेति ॥ एवं च ''विशये

प्रायदर्शनात् प्राये वचनाच्चे''त्यादाविवात्रापि सूत्रस्थप्रायशब्दस्य बाहुल्यमर्थोस्तु न तु वेदप्राये वेदोपक्रम इति शाबरभाष्योक्तरीत्या क्लिष्टकल्पनया प्राथम्यं प्रायशब्दार्थः'' इत्यादिरूपेणोपसंहारविजये विस्तृतमित्यर्थः ।

तात्पर्यचन्द्रिका

एवमुपसंहारादिरूपसकृदुक्तितोऽसकृदुक्तिरूपाभ्यासस्य प्राबल्यम् । बहुबाधस्यान्याय्यत्वात् । यथाऽऽनन्दमयाधिकरणे ''तस्यैष एव शारीर आत्मा यः पूर्वस्ये''ति जीवप्रापकोपसंहाराद् ब्रह्मशब्दाभ्यासस्य । संमतं चैतन्मीमांसकानामपि भूयसामनुग्रहायाल्पबाधं वदताम् ।

प्रकाशिका — एवमुपक्रमादुपसंहारस्य प्राबल्योक्तिपरटीकां व्याख्याय ताभ्यामभ्यासस्य प्राबल्योक्तिपरां ''एकत्रोक्तादपि बहुलोक्तेः प्राबल्या''दित्यादिटीकां विवृणोति ॥ एवमिति ॥ आदिपदेनोपक्रमः । एकप्रकारेत्यस्येहानुपयोगादनुक्तिः ॥ यथेति ॥ ''आनन्दमयोभ्यासा''दित्यत्र तैत्तिरीये ''अन्योंतर आत्माऽऽनन्दमय'' इति श्रुतानन्दमयादिः किं जीवादिरुत ब्रह्मेति संशये आनन्दमयादिर्जीवादिरेव । विकारार्थकमयट्श्रवणात् । तस्य च विकाराभिमानिजीवादावेव सम्भवात् । न च सविकार इव प्राचुर्येपि दृष्ट इति वाच्यम् । तथापीह ''तस्यैष एव शरीर आत्मे''ति शरीरशरीरिभावरूपजीवप्रापकलिङ्गोपेतोपसंहारेण विकारार्थतायाः एव न्याय्यत्वादिति प्राप्ते ब्रह्मशब्दाभ्यासाद्विष्णुरिति सिद्धांतितत्वादिति भावः । एतेन मयट एव जीवप्रापकत्वात्तस्य च ब्रह्मशब्दाभ्यासात्प्राचुर्यार्थत्वम् । न तूपसंहारबाधस्तत्रेति निरस्तम् । सुधायां मयटः सावकाशत्वमाशङ्क्य शरीरित्वकथनोपसंहारेणोज्जीवनात् । एवं गायत्रीनये गायत्रीवेत्युपक्रमात् ''यद्वैतद् ब्रह्मैतामेव ब्रह्मोपनिषद''मिति ब्रह्मशब्दाभ्यासस्य प्राबल्यं बोध्यम् । तदुक्तं ''बहुल्यात् श्रुतिलिङ्गयो''रित्यनुव्याख्याने ॥ संमतमिति ॥ एवं च नास्माभिरत्रात्यंतं यतितव्यमिति भावः । अश्वप्रतिग्रहेष्टिनये प्रतिग्रहीतुरिष्टिपक्षे वरुणायेति चतुर्थ्याः पञ्चम्यर्थत्वात् । अनयदिति नयतेः प्रतिग्रहार्थत्वात् । स्वां देवतामित्यत्र प्राधान्यनिर्दिष्टवरुणपरामर्शित्वेन देवतापदस्याविवक्षितार्थत्वाद् बहुबाधःस्यात् दातुरिष्टिपक्षे तु प्रतिगृह्णातिमात्रस्य दानार्थत्वादल्पबाध इति वा पञ्चदशरात्रे सत्रे प्रथमेऽहन्यग्निष्टुन्नामके नामातिदेशेनैकाहाग्निष्टुद्धर्मभूता सुब्रह्मण्याग्नेयी प्राप्ता तस्या अल्पविषयायाश्चतुर्दशाहस्सु चोदकेन प्राप्ताया ऐंद्या

(प्रकाशिका)

बहुविषययाबाध इति द्वादशे द्वितीयपादे ''विप्रतिषिद्धधर्माणां समवाये भूयसां स्यात्स्व-धर्मत्व''मित्यत्रोक्तदिशावा भूयोनुग्रहायाल्पबाधं वदतामित्यर्थः ।

पाण्डुरङ्गि — एवमुपसंहारस्योपक्रमापेक्षया प्राबल्यमुपपाद्योपसंहारापेक्षयाऽभ्यासस्य प्राबल्यमुपपादयति ॥ एवमुपसंहारेति ॥ तत्र हेतुमाह ॥ बहुबाधस्येति ॥ स्वमतेनोदाहरणं दर्शयति ॥ यथेति ॥ सकृदुक्त्यपेक्षयाऽसकृदुक्तेः प्राबल्यं मीमांसकानामपि संमतमित्याह ॥ संमतमिति ॥

तात्पर्यचन्द्रिका

एवमसकृदावृत्तस्याप्येकस्य पदस्य वाक्यस्य वा सम्भवदनेकार्थस्य स्वारसिक-प्राप्तार्थत्यागेनावैयर्थ्यायाप्राप्तार्थपरताया आवश्यकत्वादभ्यासादप्यपूर्वतायाः प्राबल्यम् । यथा ''इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्ति''रित्यत्र ''जीवाद्भवंति भूतानि जीवे तिष्ठंत्यचंचलाः । जीवे तु लयमृच्छन्ती''ति जीवशब्दाभ्यासाद् ब्रह्मपरत्वेऽपूर्वतायाः । तत्र हि प्रत्यक्षानुगृहीतश्रुत्या पूर्वपक्षः । उक्तं चैतरेयभाष्ये ''तदस्य प्रथमं जन्म तदस्य द्वितीयं जन्म तदस्य तृतीयं जन्मे''ति जीवे प्रसिद्ध-जन्मशब्दाभ्यासेऽप्यपूर्वतया ब्रह्मप्रादुर्भावविषयत्वम् । संमतं चैतन्मीमांसकानामपि ''दध्ना जुहोति पयसा जुहोति ऋजुमाधारयति संततमाधारयती''त्यादौ जुहोत्यादे-रावृत्तावप्यप्राप्तदध्यादावेव तात्पर्यं तथा प्राप्तार्थार्थवादानामप्राप्तार्थविध्यनुसरणं च वदताम् ।

प्रकाशिका — ''एकत्र बहुवारोक्तादपि मुख्यस्य प्राबल्या''दित्यादिटीकां विवृण्वा-नोऽभ्यासादप्यपूर्वतायाः प्राबल्यं हेतूदाहरणोक्त्या व्यनक्ति ॥ एवमसकृदिति ॥ प्राप्तार्थत्यागे हेतुः सम्भवदनेकार्थस्येति । कुतस्तत्त्यागेनापूर्वार्थकल्पनमित्यत आह ॥ अवैयर्थ्यायेति ॥ अन्यथाऽर्थान्तरे संभवति प्राप्तार्थबोधने वैयर्थ्यमिति भावः । न च तात्पर्यद्योतकत्वाद-वैयर्थ्यम् । तस्यागतिकगतित्वात् । अत एव सम्भवदनेकार्थस्येत्युक्तम् । यत्र तु सर्वथाऽर्थान्तरं न सम्भवति तत्र तात्पर्यलिङ्गत्वम् । यथानन्दमयप्रकरणे ब्रह्मशब्दाभ्यासस्येति भावः । अपूर्वतायाः प्राबल्यमित्यनुकर्षः । जीवपक्षे प्राप्तार्थकत्वं व्यनक्ति ॥ तत्र हीति ॥ यद्यपि युक्तिपादे इतरेत्यत्र जीवः स्वतन्त्रकर्ताऽथ नेति संशये जीवाद्भवन्तीति श्रुत्या घटादौ

कर्तृत्वानुभवेन च संवादिन्या जीवः कर्ता चेतनत्वात्सिद्धांत्यभ्युपेतेश्वरवदिति युक्त्या जीवः कर्ता ईश्वरस्त्वयोग्यश्चेत्कदाचिदपि प्रत्यक्षो न स्यात् । योग्यश्चेत्सदा सर्वत्र सत्त्वेन सदा प्रत्यक्षः स्यादित्यप्रामाणिक इति तस्य तन्निष्ठमहदादिकर्तृत्वस्य च कल्पने गौरवान्न स कर्तेति प्राप्ते जीवे कर्तृत्वमात्रस्येष्टत्वात्स्वतन्त्रकर्तृत्वे हिताकरणादेरयोगान्न जीवः स्वतः कर्ता ईश्वरस्तु पिशाचादिवदाविर्भावतिरोभावशक्त्योक्तदोषास्पृष्ट इति प्रागुक्तश्रुतिसमन्वयेन कर्तैव । जीवस्य स्वतः कर्तृत्वानुभवो भ्रमः । श्रुतिस्त्वीश्वरपरा । युक्तिरप्रयोजिकेति सिद्धान्तयिष्यमाणत्वात्तदुभयसंवादियुक्त्यैव तत्र पूर्वपक्षो न श्रुत्या । अन्यथा श्रुतिविरोधनिरासपादे निवेशापत्तेः । अत एव तत्र सूत्रे ''व्यपदेशा''दिति ''उपसंहारदर्शना''दिति श्रुतिप्रत्यक्षयोः ''अश्मादिवच्चे''ति चशब्देन युक्तेश्च प्रापकत्वेनोक्तिः । तथापि युक्तिमात्रस्य वराकतया तत्प्राबल्याय तयोर्मूलत्वस्यावश्यकत्वेन तत्प्राधान्यादेवमुक्तिरित्यदोषः । अत एव तत्र टीकायामेवमेव पूर्वपक्षः प्रदर्शित इति भावः ॥ ब्रह्मप्रादुर्भावविषयत्वमिति ॥ जन्मशब्दस्येति शेषः । द्वितीयप्रघट्टके ''पुरुषे हवा अयमादितो गर्भो भवती''ति पञ्चमेध्यायेऽन्नेन सह पितृदेहं प्रविष्टस्य रेतोद्वारा मातृदेहप्राप्तिः प्रथमं जन्म भूमौ जनिर्द्वितीयं जन्म पितुः प्रेतस्य देहान्तरप्राप्तिस्तृतीयं जन्मेत्युक्त्या प्रसिद्धजीवस्यैव पुरुषस्त्रीद्वाराजन्मप्रतीतावपि ''अयं नारायणोदेवः पुरुषे प्रथमं विशे''दित्युपक्रम्य ''स्त्रियां सिंचति तस्यैव स्थानांतरगतेः प्रभोः । प्रथमं जन्मविष्णोस्त''दिति ''पृथिव्यां जन्मपुत्रस्य द्वितीयं विष्णुजन्मही''ति ''पितुरन्यत्र जननं तृतीयं जन्म तद्धरेः । अन्तर्यामितयैव हि सर्वजीवेषु संस्थितं'' इति च जीवस्थविष्णुप्रादुर्भावपरतया भाष्ये व्याख्यातम् । तत्त्वभ्यासादप्यपूर्वतायाः प्राबल्यमित्यभिप्रेत्येत्यर्थः । उक्तं च तत्वप्रदीपे । ''अभ्यासोपूर्वताबलेन नीयते । ज्ञानादिफलवत्त्वात्तस्याः । यथा तदस्य प्रथमं जन्म तदस्य द्वितीयं जन्म तदस्य तृतीयं जन्मेत्यभ्यासो जीवगः प्रतीतोऽतर्यामिविषयो भवती''ति ॥ संमतं चेति ॥ प्रागुक्ताधाराग्निहोत्राधिकरणे जुहोत्याघारयतीति पदयोरभ्यासे सत्यपि तदनादरेणाप्राप्ते दध्यादिरूपे आर्जवसांतत्यादिरूपे च गुणे तात्पर्यं वदन्ति । तथा प्रागुक्तार्थवादनये प्राप्तार्थानां वायुक्षेपिष्टादिवाक्यानामप्राप्तार्थविध्यनुसरणं वदन्तीति तेषां संमतमित्यर्थः ।

पाण्डुरङ्गि — अभ्यासापेक्षयाऽपूर्वतायाः प्राबल्यं समर्थयते ॥ एवमसकृदावृत्तस्यापीति ॥ प्राप्तार्थत्यागे हेतुः सम्भवदनेकार्थस्येति ॥ एकार्थत्वे तु तदर्थत्यागे निरर्थकत्वं स्यादिति भावः । अपूर्वताया आवश्यकत्वे हेतुरवैयर्थ्यायेति ॥ अनेकार्थस्य वाक्यस्य प्राप्तार्थग्रहणे

(पाण्डुरङ्गि)

वैयर्थ्यं स्यात्तत्परिहारार्थमप्राप्तार्थत्वमित्यर्थः । जीवाद्भवन्तीति श्रुतेर्जीवपरत्वे प्राप्तार्थत्वमुपपादयति ॥ तत्र हीति ॥ मीमांसकानामपि संमतं चैतदित्याह ॥ संमतमिति ॥

तात्पर्यचन्द्रिका

एवं फलार्थत्वात्सर्वस्य लोकेप्यप्राप्तेपि निष्फले तात्पर्यादर्शनात् प्राप्तेपि सफले तात्पर्यदर्शनाच्चापूर्वताऽतोपि फलस्य प्राबल्यम् । यथा ''असम्भवस्तु सतोनुपपत्ते''रित्यत्र ''असद्वा इदमग्र आसीत् ततो वै सदजायते'' यस्मात्सतो ब्रह्मणोऽसतः सकाशादुत्पत्तिरूपदोषप्रतिपादकादपूर्वतायुक्ताद्वाक्यात् ''सदेव सोम्येदमग्र आसी''दिति ब्रह्मणोऽनुत्पत्तिप्रतिपादकस्य सफलस्य वाक्यस्य । उक्तं ह्यनुव्याख्याने ''प्रीत्या मोक्षफलत्वाच्च तात्पर्यं नैव दूषण'' इति । उक्तं च विष्णुतत्वनिर्णये ''घातयंति हि राजानो राजाऽहमिति वदन्तम् । ददति च सर्वमभिप्रेतं गुणोत्कर्षं वदत''इत्यादिनाऽपूर्वतायुक्तादप्यभेद वाक्यात्सफलभेदवाक्यस्य प्राबल्यम् । संमतं चैतन्मीमांसकानामपि अङ्गप्रधानवाक्ययोरपूर्वतायां सत्यामपि निष्फलस्य सफलाङ्गत्वं तथा निष्फलांगवाक्ये फलवत्प्रधानवाक्यानुसरणम् । तथा ''सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसकामः'' इत्यादेरिव ''अग्निहोत्रं जुहुयात्स्वर्गकाम'' इत्यस्यैवोत्पत्त्यादिपरत्वसम्भवे ''अग्निहोत्रं जुहोती''त्यस्य कर्मान्तरविधिपरत्वेऽपूर्वतायां सम्भवंत्यामपि फलाभावप्रसङ्गेनाधिकारवाक्यबोधितफलयुक्तकर्मोत्पत्तिमात्रपरत्वं च वदताम् ।

प्रकाशिका — ''फलस्योद्देश्यत्वादुपक्रमादिभ्यः प्राबल्य''मिति टीकां विवृण्वानोऽपूर्वतातः फलस्य प्राबल्यं हेतूदाहरणोक्त्या व्यनक्ति ॥ एवमिति ॥ सर्वस्य वेदादावुच्यमानस्य सर्वस्येत्यर्थः ॥ लोक इति ॥ काकस्याष्टौ दन्ता इत्यादाविवेत्यर्थः ॥ प्राप्तेपीति ॥ प्रेमास्पदपुत्रोदन्तादाविवेत्यर्थः । फलस्य फलवत्त्वरूपफलस्य ॥ यथेति ॥ द्वितीयस्य तृतीये पादे ''असम्भवस्त्वि''ति सूत्रे सदेवेत्यादि श्रुतिः किं ब्रह्मणो जगत्कारणत्वे मानं नवेति संशये ''असद्वा'' इत्यादितदुत्पत्तिश्रुतिविरोधादमानम् । न हि जन्मादिदोषवतोऽस्मदादेरिव जगत्कारणत्वं बोधितुमलमियं श्रुतिरिति प्राप्ते स्वतन्त्रस्य जन्मायोगादसतः कारणत्वादृष्टेश्च ''एतेन सर्वे व्याख्याता'' इत्यत्रोक्तन्यायेनासच्छब्दस्य ब्रह्मपरतया ''सद्वाव प्राण'' इति

श्रुत्या सच्छब्दस्य च वायुपरतया वायोरेवेश्वरादुत्पत्तिपरा ''असद्वा'' इति श्रुतिरिति तदविरोधात्सदेवेत्यादिश्रुतिर्ब्रह्मकारणत्वे मानमिति सिद्धान्तयिष्यते । तत्र ''असद्वा'' इति श्रुतेरर्थान्तरकल्पनेऽपूर्वताया अपि फलस्य प्राबल्यमेव निमित्तमित्यर्थः ।

॥ अनुत्पत्तीति ॥ इदमग्रे अस्य प्रपञ्चस्याग्रे प्रलये सन्नामकं ब्रह्मासीदित्युक्त्या तस्यानादित्वप्रतीतेरिति भावः ॥ वाक्यस्येति ॥ प्राबल्यमित्यनुषङ्गः । सफलस्येत्युक्त्या ब्रह्मणो गुणोक्तिपरस्य फलवत्त्वं दोषोक्तिपरस्य तद्राहित्यं चोक्तम् । तद्वयं संवादोक्त्या व्यनक्ति ॥ उक्तं हीति ॥ जन्माधिकरण इत्यर्थः । ''तेषां दुःखप्रहाणाय श्रुतिरेषा प्रवर्तते । यस्य प्रसादात्परमार्तिरूपादस्मात्संसारान्मुच्यते'' इति श्रुत्या ब्रह्मप्रीत्युत्पादनद्वारा मोक्षसाधकत्वाद्भेदस्य ब्रह्मदूषणे तात्पर्यं नैवास्ति । तथात्वे जीवानां ब्रह्मणि दोषज्ञानापातेन तेषु ब्रह्मणोऽप्रीतिरेव स्यात् । लोके तथादर्शनात् । तथाच जीवान्प्रति मोक्षफलकत्वं वेदस्य न स्यात् । किंतु ''सर्वेषामपि वाक्यानां महातात्पर्यमत्र ही''त्युत्तरार्धोक्तदिशा गुणोत्कर्ष एव तात्पर्यम् । तज्ज्ञानस्य ब्रह्मप्रीतिद्वारा मोक्षरूपफलवत्त्वादिति तद्वयं तत्रोक्तमित्यर्थः । एतत्स्पष्टमन्यत्रोक्तमित्याह ॥ उक्तं चेति ॥ प्राबल्यमित्यन्वयः । न तात्पर्यगत्यैतल्लब्धमिति चार्थः । पाटलीपुत्राद्यधिपतयो भद्रसेनादयो राजानः पाटलीपुत्रस्याधिपतिरिदानीमहमेवेति वदन्तमतदर्हं घातयंतो दृश्यन्ते । तेन तेषां तत्राप्रीतिरनुमीयत इति मानांतराप्राप्ता-भेदवाक्यस्याफलत्वं विपरीतफलत्वं चोक्तम् । ददतिच राजान इति गुणोत्कर्षवाक्यस्य फलवत्त्वमुक्तम् । शेषविवक्षया वदत इति षष्ठी । वदतः प्रतीति द्वितीया वा । यद्यपि तत्र पूर्वं भेदाभेदवाक्यजातयोरभेदवाक्यानामपूर्वत्वेन प्राबल्ये शङ्कते अपूर्वेपि प्रमाणाविरुद्ध एवार्थे तात्पर्यं न तु प्रमाणविरुद्धेऽभेदे इत्युक्त्वा ''अतः सर्वप्रमाणविरुद्धत्वान्नाभेदे तात्पर्यं वाक्यस्ये''त्युपसंहृत्य तर्हि सर्ववाक्यानामेकस्य विषयस्याभावादेकवाक्यता न स्यादित्या-शङ्क्य ''विष्णोः सर्वोत्तमत्व एव महातात्पर्यं सर्वागमाना''मिति प्रतिज्ञाय तत्रेतिहा-सश्रुतिपुराणवाक्यान्युदाहृत्य युक्तं च विष्णोस्सर्वोत्कर्षे महातात्पर्यं सर्वागमाना''मित्यादि-नोक्तार्थस्य विष्णुप्रीतिद्वारा मोक्षहेतूत्कर्षज्ञानजनकत्वात्तत्र तात्पर्यमिति युक्तिसिद्धत्वोप-पादनार्थोऽयं ग्रन्थः प्रवर्तत इति भाति । टीकायां तत्र तथैवोक्तेः । न तु सफलत्वाद्भेद-वाक्यानामभेदवाक्यात्प्राबल्यं व्युत्पादयितुम् । तथाप्युक्तयुक्त्योक्तार्थे तात्पर्यं साधयितुं भेदाभेदोक्त्योः फलवत्त्वाफलवत्त्वोक्त्यैतदभिप्रेतमिति ज्ञायत इत्येवमुक्तमिति बोध्यम् । तत्वप्रदीपेतु ''अफलादपूर्वात्सुपूर्वेपि फलवति तात्पर्यं स्यात् किमुतापूर्वे । यथा-

(प्रकाशिका)

स्नेहपूर्वेण मनसा यन्नः स्मरसि केशव ।
अपत्यमिव कूर्माणां तेन जीवामहे वयम् ॥

इत्यादा''वित्युक्तम् ॥ संमतमिति ॥ तृतीयस्य तृतीये पादे ''असंयुक्तं प्रकरणादिति कर्तव्यतार्थत्वा''दिति चतुर्थाधिकरणे समिदादिप्रयाजवाक्यदर्शपूर्णमासवाक्ययोरपूर्वतायां सत्यामपि निष्फलस्य समिदादेः फलवद्दर्शपूर्णमासाङ्गत्वं समिद्वाक्यस्य वाक्यैकवाक्यतया प्रधानवाक्यानुसरणं च वदतामित्यर्थः ॥ सौर्यं चरुमिति ॥ अयमर्थः । विधिस्तावदुत्पत्ति-विनियोगाधिकारप्रयोगभेदाच्चतुर्विधः । अप्राप्तप्रापक उत्पत्तिविधिः । उत्पन्नस्य फलसाधनत्वं फलवदुपकारकत्वं वा बोधयन्विनियोगविधिः । फलसाधने कर्मणि पुंसः स्वामित्वबोधकोधि-कारविधिः । अनुष्ठापकः प्रयोगविधिरिति । तत्र ''एकं द्वयं त्रयं चैव क्वचिच्चापि चतुष्टय''-मित्युक्तरीत्या क्वचित्किंचिदुपेयते । ''सौर्यं चरु''मित्यादौ चतुष्टयम् । ''ज्योतिष्टोमेन स्वर्गकामो यजेते''त्यत्र त्रितयम् । उत्पत्तेः ''सोमेन यजेते''त्यनेनैव सिद्धेः । ''समिधो यजती''त्यादौ द्वयम् । प्रयोगाधिकारयोः प्रधानवाक्यसिद्धत्वात् । ''अग्निहोत्रं जुहोती''त्य-त्रोत्पत्तिमात्रपरत्वम् । अन्येषां ''अग्निहोत्रं जुहुयात्स्वर्गकाम'' इति वाक्यसिद्धत्वात् । एवं च प्रकृते सौर्यवाक्यस्येवाग्निहोत्रं जुहुयात्स्वर्गकाम इत्यस्यैवोत्पत्त्यादिचतुष्टयपरत्वसम्भवे सति तस्य त्रितयपरत्वमुपेत्याग्निहोत्रं जुहोतीति कामपदरहितस्य वाक्यस्य कामपदोपेतवाक्या-पेक्षितोत्पत्तिमात्रपरत्वं तत्प्रख्याधिकरणे आधाराधिकरणादौ च तत्र तत्र वदतामिति ।

पाण्डुरङ्गि — अपूर्वतापेक्षया फलस्य प्राबल्यमुपपादयति ॥ एवमिति ॥ अपूर्वतापेक्षया फलस्य प्राबल्यमाचार्यानुक्तं कुतः समर्थ्यत इत्यत आह ॥ उक्तं हीति ॥ एतत्परेषामपि संमतमित्याह ॥ संमतमिति ॥ निष्फलस्य प्रयाजादेः । सफलांगत्वं सफलदर्शपूर्णमासाङ्गत्वम् ॥ प्रधानवाक्यानुसरणमिति ॥ प्रधानवाक्यान्वितस्वार्थप्रतिपाद-कत्वमित्यर्थः । पूर्वमर्थयोरङ्गांगिभाव उक्तः इदानीं वाक्ययोरिति भेदः ॥ उत्पत्त्यादिपरत्व मिति ॥ आदिपदेनाधिकारनियोगफलानां ग्रहणम् ॥ अधिकारवाक्येति ॥ अधिकारवाक्येनाग्निहोत्रं जुहुयादित्यनेन बाधितं यत्फलं तेन युक्तं यत्कर्म तदुत्पत्तिमात्रपरत्वमित्यर्थः ।

तात्पर्यचन्द्रिका

एवं फलमात्रात्करणाकरणयोरिष्टानिष्टकथनादिरूपार्थवादस्य प्राबल्यम् । यथा ''उत्क्रमिष्यत एवं भावादित्यौडुलोमि''रित्यत्र काम्यकर्मसु श्रुतात्पश्चादिफलात् ''कर्मणा ज्ञानमातनोति ज्ञानेनामृतीभवति अथामृतानि कर्माणि प्लवाह्येते अदृढाद्यज्ञरूपाः'' इत्याद्यर्थवादस्य । न हि कर्मणां प्लवा इत्यादिना निन्दित-काम्यरूपेण कर्तव्यता । किन्तु ''कर्मण्येवाधिकारस्ते मा फलेषु कदाचने''-त्याद्यनुसारेण ''सर्वापेक्षाच यज्ञादिश्रुते''रिति वक्ष्यमाणन्यायेन ''कर्मणा ज्ञान''-मित्यादिना स्तुतज्ञानसाधनरूपेणैव । संमतं चैतन्मीमांसकानामपि निवीतवाक्य-स्यानुष्ठानसौकर्यवत्त्वेन सप्रयोजनत्वेपि ''देवलक्ष्यमेव तत्कुरुत'' इति सार्थवादकोपवीतवाक्यानुसारं वदताम् ।

प्रकाशिका — ''करणाकरणयोरिष्टानिष्टकथनादिरूपे''त्यादिटीकां विवृण्वानो हेतूदाहरणोक्त्या फलादर्थवादस्य प्राबल्यं व्यनक्ति ॥ एवं फलेति ॥ आदिपदेन पूर्वैरिद-मनुष्ठितमित्याचारकथनं गृह्यते ॥ इत्यत्रेति ॥ पश्चादिफलादित्याद्यर्थवादस्य प्राबल्य-मित्यन्वयः । आद्ये चतुर्थपादे ''समाकर्षा''दितिनये पूर्वमुक्तन्यायैः सर्वशब्दानां ब्रह्मणि ''कल्पनोपदेशा''दित्युक्तदिशाऽन्यत्र च मुख्यत्वे सिद्धे तत्किमुभयत्र तुल्यमुतान्यत्र हीनमिति विशये अन्यत्र हीनत्वे मुख्यत्वायोगेन प्रसिद्धयभावापातात्तुल्यमिति प्राप्ते रूढियोगयोर्गौणलक्षणयोस्तारतम्यमिव मुख्यवृत्तावपि तत्सम्भवेन साक्षाद्भगवदेकवाचि-नामन्यत्र समाकृष्य व्यवहाराय संकेतितत्वेन हीनत्वात् प्रसिद्धेश्चाज्ञानमूलत्वात् न तुल्यं मुख्यत्वमिति सिद्धांतितम् । तत्रान्यत्र कर्मदेवतादौ समाकृष्य व्यवहारो व्यर्थः । तज्ज्ञानस्य मुमुक्षोरनुपयोगादिति शङ्कायां ''उत्क्रमिष्यत'' इति गुणसूत्रेणोत्क्रमिष्यतो मुमुक्षोरेवं ज्ञानहेतुतया कर्मणोऽवश्यंभावादित्यंतःकरणशुद्धिद्वारा कर्मादेरपि ज्ञानहेतुत्वात्तत्र समाकृष्य व्यवहारो युक्त इत्युक्तम् । तत्तु पशुस्वर्गादिफलवत्त्वेन कर्मणां श्रवणेपि ''कर्मणा ज्ञानमातनोती''त्यादिस्तुतिनिन्दारूपार्थवादपर्यालोचनया मुक्तिहेतुज्ञानार्थत्वावगमात्फला-दप्यर्थवादस्य प्राबल्यमभिप्रेत्येत्यर्थः ॥ कर्मणेति ॥ ज्ञानद्वारा मुक्तिहेतुत्वे इदं वाक्यम् ।

अथेति ॥ ज्ञानद्वारा अमृतफलकत्वादित्यर्थः । इयं च तृतीये ''भाक्तं वाऽनात्मवित्त्वा''दित्यत्र भाष्योदाहृतश्रुतिः ॥ प्लवा इति ॥ आथर्वणे ''तान्याचरथ नियतं

(प्रकाशिका)

सत्यकामा'' इति पूर्ववाक्ये सत्यनामकब्रह्मज्ञानकामाः कर्माण्याचरथेत्युक्त्वा अन्यथाचरणे निन्दोच्यते प्लवा ह्येत इति । एते ब्रह्मप्रीत्यनुद्देशेनान्योद्देशेनानुष्ठिताः यज्ञाः अदृढप्लवा इति। ''सोऽकामयत भूयसा यज्ञेन भूयो यजेयेति यज्ञेन यज्ञमयजन्ते''त्यादि-परकृतिपुराकल्परूपोप्युदाहार्यः । भूयो विष्णुं नाकं मोक्षं यज्ञं विष्णुमित्यर्थः । अर्थवादेन फलबाधप्रकारं व्यनक्ति ॥ न हीति ॥ इत्यादिगीतानुसारेणेत्यर्थः ॥ सर्वापेक्षेति ॥ तृतीयस्य चतुर्थेपादे ''स्तुतयेऽनुमतिर्वे''ति चतुर्थेधिकरणे ज्ञानिनः सदसत्प्रवृत्तौ विशेषोस्ति न वेति संशये ''स ब्राह्मणः केन स्याद्येन स्यात्तेनेदृश एव स्या''दिति श्रुत्या ज्ञानिनः सदसत्प्रवृत्तावविशेषोक्तेर्न विशेष इति प्राप्ते ज्ञानिनोपीतरवद्विशेषोस्त्येव । श्रुतिस्तु ज्ञानिनः स्तुत्यर्थेति सिद्धान्तितम् । तत्रास्तु ज्ञानिनः सत्प्रवृत्याविशेषो मोक्षाख्य एव न तु तत्राधिक्यमित्याशङ्कायां सर्वधर्मापेक्षाज्ञानोत्पत्तावेव । ''तमेतं विविदिषंति यज्ञेन दानेने''त्यादिश्रुतेः । निष्पन्नेच ज्ञाने ज्ञानिकृतं कर्म ज्ञानजन्यमोक्षस्वरूप एव न पर्यवस्यतीति ''सर्वापेक्षे''ति गुणसूत्रेण कर्मणां च ज्ञानहेतुत्वोक्त्या तन्न्यायेन ज्ञानसाधन-रूपेणैव कर्तव्यतेत्यर्थः । पश्चादिफलश्रुतिस्तु रोचनार्थतया नेयेति भावः । तत्वप्रदीपे तु अर्थवादवत्यश्रुतफले श्रुतफलादपि तात्पर्यं स्यात् । यथा ''श्रयंतेस्मिञ्छ्रियो य एवमेत-च्छिरसः शिरस्त्वं वेदे''त्यादौ श्रुतफलादपि शिरस्त्ववेदनादश्रुतफले प्राणसंवादाद्यर्थ-वादवति प्राणोत्कर्षवेदने तात्पर्यमवसीयत इति ॥ संमतं चेति ॥ तृतीयस्य चतुर्थे पादे ''विधिर्वा स्यादपूर्वत्वा''दिति तृतीयेधिकरणे ''निवीतं मनुष्याणां प्राचीनावीतं पितॄणामुपवीतं देवानामुपव्ययते देवलक्ष्यमेव तत्कुरुत'' इति दर्शपूर्णमासप्रकरणे श्रुतं वाक्यमुदाहृत्योपव्ययत इति किं विधिरुतानुवाद इति संशये ''नित्योदकी नित्ययज्ञोप-वीती''ति स्मृतिप्राप्तत्वादनुवाद इति प्राप्ते स्मृतितः पुरुषार्थतया प्राप्तावपि क्रत्वर्थत्वेना-प्राप्तत्वात्तादर्थ्येनायं विधिरिति सिद्धांतितम् । तत्र यद्यपि ''अजिनं वासोवा दक्षिणत उपवीय दक्षिणं बाहुमुद्धरतेऽवधत्ते सव्यमिति यज्ञोपवीत''मित्युक्तलक्षणयज्ञोप-वीतानुष्ठानादपि हारवदुरोलम्बनरूपनिवीतानुष्ठाने सौकर्यलाभान्नित्यप्रयोजनत्वेन निवीत-वाक्यं विधिः उपवीतवाक्यं तत्रार्थवाद इति वक्तुं युक्तम् । तथापि उपवीतवाक्यस्यार्थवादत्वे तत्र देवलक्ष्यमेव तत्कुरुते इत्यर्थवादानन्वयापत्या तदन्वयाय तत्रैव विधिमाश्रित्य निवीतवाक्यस्यैव तदर्थवादत्वं वदन्तीति तेषां फलादप्यर्थवादस्य प्राबल्यं संमतमित्यर्थः ।

पाण्डुरङ्गि — फलापेक्षयार्थवादस्य प्राबल्यमाह ॥ एवमिति ॥ करणाकरणयोरिति हेतुगर्भविशेषणम् । अत्रोदाहरणमाह ॥ यथेति ॥ कर्मणां ज्ञानफलत्वप्रतिपादकार्थवादवाक्येन पश्वादिफलप्रतिपादकवाक्यस्याबाधकात्कथं सार्थवादवाक्यस्य ततः प्राबल्यमित्यत आह ॥ न हीति ॥ कर्तव्यता प्रेक्षावत्कर्तव्यता । तर्हि किमकर्तव्यत्वमेव कर्मणामिति शङ्कते ॥ किंत्विति ॥ उत्तरमाह ॥ ज्ञानसाधनरूपेणेति ॥ कर्तव्यतेति पूर्वेणान्वयः । नन्वेवं स्वर्गकामो यजेतेति फलकामनाविशिष्टकर्मण एव विधिविहितत्वात्तद्विरोधः स्यादित्यत उक्तं कर्मण्येवाधिकार इत्यादि ॥ तथाच न फलकामनाविशिष्टकर्मणि विधिः । किंतु कर्ममात्रविधिरिति ज्ञानसाधनत्वेन कर्तव्यतासिद्धिरिति भावः । एतदपि मीमांसकसंमतमित्याह ॥ संमतं चैतदिति ॥ अर्थवादस्य फलमात्रात्प्राबल्यमित्यर्थः ।

तात्पर्यचन्द्रिका

एवं सार्थवादस्याप्यनुपपन्नेर्थे तात्पर्यादर्शनादुपपन्ने च तद्दर्शनादुपपत्तेः सर्वमूलत्वादर्थवादादपि प्राबल्यम् । यथा ''पृथगुपदेशा''दित्यत्र सार्थवादाभेदश्रुतितो ''भिन्नोऽचिंत्यः परमो जीवसंघात्पूर्णः परो जीवसंघोह्यपूर्णः'' इति सोपपत्तिकभेदश्रुतेः । अत एव तत्र भाष्यं ''सोपपत्तिककौशिकश्रुते''रिति । उक्तं चानुव्याख्याने ''युक्तोऽयुक्तश्च यत्रार्थ आगमस्य प्रतीयते । स्यात्तत्र युक्त एवार्थ'' इति । संमतं चैतन्मीमांसकानामपि ''नह्यशङ्कनीयमर्थं विधिरपि विदधाती''ति वदताम् ।

प्रकाशिका — ''उपपत्तेः सर्वमूलत्वेन सर्वतः प्राबल्य''मिति टीकां विवृण्वानोऽर्थवादादुपपत्तेः प्राबल्यं हेतूदाहरणोक्त्योपपादयति ॥ एवमिति ॥ अदर्शनादिति ॥ तत्त्वमसीत्यादेरद्वैतादौ । दर्शनात् द्वैतवाक्यानां द्वैतादौ । यद्वा लोके तथा दर्शनादित्यर्थः । एतेनोपपत्तेः सर्वमूलत्वादिति टीकांशोनूद्यसार्थवादस्येत्यादिनोपपादितो भवति ॥ यथेति ॥ द्वितीयस्य तृतीयपादे ''पृथ''गिति चतुर्दशाधिकरणे जीवः परमात्मनो भिद्यते न वेति सन्देहे ''येनाश्रुतं श्रुतं भवती''त्याद्यर्थवादादिषड्विधतात्पर्यलिङ्गोपेतात्तत्त्वमसीत्याद्यभेदवाक्यान्न भिद्यत इति प्राप्ते पूर्णत्वादिविरुद्धधर्मवत्त्वरूपयुक्त्युपेतभेदश्रुतेर्भिद्यत एव ऐक्यश्रुतिस्तु परमात्मगुणसदृशज्ञानानन्दादिगुणरूपत्वात्सिंहश्चैत्र इतिवद्गौण्या वृत्त्योपपद्यत इति सिद्धांतितत्वादिति भावः ॥ भेदश्रुतेरिति ॥ प्राबल्यमित्यन्वयः । अत एव

(प्रकाशिका)

उपपत्तियुक्तायाः प्राबल्यादेवेत्यर्थः । ननु ''तर्काप्रतिष्ठाना''दित्यादिनोपपत्तेर्दूषितत्वेन कथं तस्याः प्राबल्योक्तिरित्यतः स्वतन्त्राया दुर्बलत्वेपि श्रुतिसहकारिण्यास्तु प्राबल्यमेवेति भावेनाह ॥ उक्तं चेति ॥ न केवलं तात्पर्यगत्या लभ्यत इत्यर्थः । युक्तिपादे नविलक्षणत्वादित्यधिकरणे युक्तेः श्रुतिसाहाय्येन प्राबल्यमुक्तमित्यर्थः । यथेक्षतेरिति नये ''यतोवाचो निवर्तंत'' इति श्रुतितः ''सर्वे वेदा'' इत्यादिश्रुतिसहायेक्षणीयत्वयुक्तेः प्राबल्यम् । तत्वप्रदीपे त्वर्थवादोप्युपपत्तिबलेन नीयते । यथा प्राणगः प्रतीतः सर्वोत्तमत्वार्थवादस्तदसम्भाव्यधर्मैरन्तर्यामिविषयो भवति । यथाचेन्द्राग्न्यादिगः प्रतीतः सर्वोत्तमत्वार्थवादस्तस्मिन्नेव प्रकरणेऽन्यत्र वा तेषां हीनत्ववचनाद्युपपत्त्या विष्णुपरोऽवसीयत इति ॥ संमतमिति ॥ प्रागुक्ते ''अर्थाद्वा कल्पनैकदेशत्वा''दिति स्रुवाधिकरणे ''स्रुवेणावद्यती''त्यत्र विधेरपि सामर्थ्यरूपोपपत्त्यनुवर्तनं वदतां तेन न्यायेनार्थवादानां तदनुवर्तनं संमतमित्यर्थः ।

पाण्डुरङ्गि — अर्थवादादप्युपपत्तेः प्राबल्यमाह ॥ एवमिति ॥ तत्र हेतुरुपपत्तेः सर्वमूलत्वादिति ॥ तत्रोदाहरणमाह ॥ यथा पृथगिति ॥ संमतं चैतदिति ॥ अर्थवादापेक्षयोपपत्तेः प्राबल्यमित्यर्थः ॥ विधिरपीति ॥ किमुतैकवाक्यतापन्नस्तदुपजीव्यर्थवादोनुपपन्नार्थं न तात्पर्येण गोचरयतीत्यर्थः ।

तात्पर्यचन्द्रिका

न च तात्पर्यनिर्णयाय श्रुत्युक्ताया अनुक्ताया वोपपत्तेरपेक्षायामनपेक्षत्वरूपप्रामाण्यहानिः । किंतु निर्णीते तस्मिन्नर्थनिर्णयाय तदपेक्षायाम् । अन्यथा तात्पर्यनिश्चयाय विचारमपेक्षमाणो वेदोऽप्रमाणं स्यात् । हेतुवन्निगदाधिकरणे ''तेन ह्यन्नं क्रियत'' इत्यत्राप्रामाण्यापत्त्या हेतुत्वत्यागो न तावद्भाट्टरीत्या । नापि प्राभाकरे विवरणरीत्या । तन्मते तेन ह्यन्नं क्रियत इत्यादेः प्रामाण्यमुपेत्य हेतुपरत्वमित्येव पूर्वपक्षकरणात् सिद्धांते च दर्वीपिठरादिनाऽऽनुमानिकेन प्रत्यक्षस्य शूर्पस्य विकल्पादिप्रसङ्गाच्छूर्पस्य होमसाधनतायामन्नकरणत्वस्य हेतुत्वत्यागो न त्वप्रामाण्यापत्तिभयात् । नापि निबन्धनरीत्या ''न ह्यत्रानूयाजा इज्यंत'' इत्यादौ यत्र यत्रानुयाजाभावस्तत्र तत्राष्टगृहीताभाव इति व्याप्तेः सत्त्वेनानुयाजाभावस्याष्ट-

गृहीताभावे हेतुत्वेनान्वयोपगमात् । रक्तपटन्यायेन च स्तुताविव हेतावप्याकांक्षोत्थापनात् । हेतुत्वोपपादकव्याप्त्यादेश्चालौकिकसुखरूपस्वर्गोपपादकदेहादेरिव शब्देनैवाक्षेपान्मानांतरानपेक्षत्वोपपत्तेस्तद्रीतेरेवायुक्तत्वात् । एतेनार्थवादाधिकरणे निबन्धने विवरणे च ''वायुर्वै क्षेपिष्ठे''त्याद्यर्थवादानां हेतुत्वेनान्वया-दप्रामाण्ये प्राप्ते सिद्धांते प्रामाण्याय हेतुत्वत्यागोक्तेस्तद्विरोध इति निरस्तम् । तात्पर्यनिर्णयाय हेत्वपेक्षायामप्रामाण्यानापत्तेः । अर्थनिर्णायतदपेक्षायास्त्वन्मतेऽप्यभावात् ।

प्रकाशिका — यदत्रोक्तमुपपत्तिसापेक्षत्वेऽनपेक्षत्वरूपप्रामाण्यहानिरिति तदुद्धरति ॥ न चेति ॥ तस्मिन् तात्पर्ये ॥ अर्थनिर्णायेति ॥ वेदार्थस्य च शास्त्रैकयोनित्वेन तत्र प्रमाणांतरापेक्षा नास्तीति भावः । पूर्ववाद्युक्तदृष्टांतं निराह ॥ हेतुवदिति ॥ अधिकरणं प्रागुक्तम् ॥ तन्मत इति ॥ भट्टमते विवरणकारमते चेत्यर्थः । यथाचैतत्तथोक्तं प्राक् । विकल्पादीति बाधसमुच्चयौ वाऽऽदिपदार्थः ॥ नापीति ॥ हेतुत्वेनान्वयत्यागः किं कुत्रापि तथान्वयस्यानङ्गीकाराद्वा वेदोक्ते हेत्वाकाङ्क्षाविरहाद्वा हेतुत्वोपपादकव्याप्त्यादिबोधकमानांतरापेक्षतयावा । आद्येऽसिद्धो हेतुरित्याह ॥ नहीति ॥ ''चतुर्जुह्वां गृह्णाति । प्रयाजेभ्यस्तत् । अष्टावुपभृति । प्रयाजानूयाजेभ्यस्तत् । चतुर्ध्रुवायाम् । सर्वस्मैवा एतद्यज्ञाय गृह्यते । यद्ध्रुवायामाज्य''मित्यत्र श्रुतं ''न ह्यत्रानूयाजा इज्यंत'' इति । अत्र हिशब्दस्य हेत्वर्थत्वमङ्गीकृत्यानुयाजाभावस्याष्टगृहीताभावे हेतुत्वान्वयोपगमादित्यर्थः । द्वितीय आह ॥ रक्तपटेति ॥ स्वारसिकाकाङ्क्षाभावेपि पटो भवति रक्त इत्यादौ क्रियान्वयेन निराकाङ्क्षस्य पटपदस्य रक्तपदेनान्वयाय कीदृशः स इत्याकाङ्क्षोत्थापनवदिष्टसाधनताबोधनेन निराकाङ्क्षस्य विधेरर्थवादान्वयाय तदर्पितस्तुतावाकाङ्क्षोत्थापनस्योक्तत्वेनात्रापि तथा सम्भवादित्यर्थः । तृतीयेप्यसिद्धो हेतुरित्याह ॥ हेतुत्वेति ॥ यथा ह्यलौकिकसुखरूपस्वर्गसाधनतया यागे ''यजेत स्वर्गकाम'' इत्यादिना बोधितेप्यलौकिकतया सुखस्यैतच्छरीरावच्छेदेनाजननाद्देहांतरे मानाभावादयुक्तमित्याशङ्क्यायमेवशब्दो देहांतराक्षेपक इत्युक्तं तथाऽत्रापि हेतुपरशब्देन व्याप्त्याद्याक्षेपादित्यर्थः । तदीयाधिकरणांतरविरोधं च निरस्यति ॥ एतेनेति ॥ हेतुत्वेन यतो वायुः क्षिप्रगामिनी देवता क्षिप्रफलदात्री अतो वायव्यश्वेतालम्भः कार्य इत्यादिरूपहेत्वर्थकत्वेन । एतेनेत्युक्तं व्यनक्ति ॥ तात्पर्येति ॥

पाण्डुरङ्गि — उपपत्त्यपेक्षायामनपेक्षत्वलक्षणप्रामाण्यहानिरिति पूर्वपक्ष्युक्तं परिहरति ॥ न चेति ॥ तथाच पूर्वमीमांसा व्यर्थैव स्यादिति भावः । निर्णीते तात्पर्येऽर्थनिर्णयाय तदपेक्षा नास्तीति भावः । ननु तर्हि तात्पर्यनिर्णयार्थमुपपत्त्यपेक्षायां हेतुवन्निगदाधिकरणविरोधः । तत्र हेतुसापेक्षत्वेनाप्रामाण्ये प्राप्तेऽप्रामाण्यापत्तिभयेन हेतुसापेक्षत्वं परित्यज्य प्रामाण्येन सिद्धांतकरणादित्यत आह ॥ हेतुवदिति ॥ अप्रामाण्यापत्त्या हेतुत्वत्यागः किं भट्टमतरीत्या प्राभाकररीत्या वा । तत्रापि विवरणरीत्या वा निबन्धनरीत्या वा । नाद्य इत्याह ॥ नतावदिति ॥ द्वितीय आद्यं दूषयति ॥ नापीति ॥ तन्मत इति ॥ भट्टमते प्राभाकरे विवरणमत इत्यर्थः ॥ सिद्धांतेचेति ॥ तत्र हेतुत्वत्यागो हि शूर्पेण होमः कर्तव्यः अन्नकरणत्वादित्युक्ते अन्नकरणत्वहेतुनैव दर्वीपिठरादेरपि होमसाधनत्वप्राप्तावेकदैव तैर्होमकरणासम्भवेन विकल्पः स्यात् । स चाष्टदोषदुष्ट इति हेतोरेव । नत्वप्रामाण्यप्राप्तिभयादित्यर्थः । द्वितीये द्वितीयं दूषयति ॥ नापि निबन्धनरीत्येति ॥ तद्रीतेरेवायुक्तत्वादिति सम्बन्धः । तत्र हेतुर्मानांतरेति ॥ श्रुत्यतिरिक्तमानांतरानपेक्षत्वोपपत्तेः । अप्रामाण्याभावादिति शेषः । किमत्र हेतुत्वत्यागो हेतुत्वेनान्वयस्य क्वचिदप्यनाश्रितत्वादुत हेतावाकांक्षाभावाद्यद्वा हेतुत्वोपपादकव्याप्त्यादिग्राहकमानांतराभावात् । नाद्य इत्याह ॥ नहीति ॥ अत्र हि ''चतुर्जुह्वां गृह्णाति । प्रयाजेभ्यस्तत् । अष्टावुपभृति । प्रयाजानूयाजेभ्यस्तत् । चतुर्ध्रुवायाम् । सर्वस्मैवा एतद्यज्ञायगृह्यते । यदध्रुवायामाज्य''मिति । तत्र श्रूयते। ''नह्यत्रानूयाजाइज्यंत'' इति । अत्र हिशब्देनानुयाजाभावस्याष्टगृहीताभावे हेतुत्वमुच्यते । यत्र यत्रानुयाजाभावस्तत्र तत्राष्टगृहीताभाव इति व्याप्तेर्विद्यमानत्वेन हेतुत्वेनान्वयस्यात्रैवाश्रितत्वादित्यर्थः । द्वितीयं प्रत्याह ॥ रक्तपटेति ॥ तथाच हेतावुत्थिताकाङ्क्षाया अभावेपि रक्तपटदर्शनेन पटो भवतीत्युक्ते कीदृशो भवतीत्युत्थापिताकाङ्क्षवत् अर्थवादस्तुतावाकाङ्क्षोत्थापनवदुत्थापिताकाङ्क्षासम्भवादित्यर्थः । तृतीयं प्रत्याह ॥ हेतुत्वेति ॥ अत्र हेतुत्वमुक्तं तच्च व्याप्त्यादिकं विना नसम्भवतीति व्याप्तेरप्यनेनैवाक्षेप इत्यर्थः । अत्र दृष्टांतोऽलौकिकेति ॥ यथा शब्देन यागसाध्यालौकिकसुखरूपस्वर्गे बोधिते शरीराभावात्सुखभोगः कथमित्याशङ्कायां शरीरस्यापि शब्देनाक्षेपस्तथेत्यर्थः । तथाचाप्रामाण्यभिया हेतुत्वत्यागाभावान्न हेतुवन्निगदाधिकरणविरोध इति भावः ॥ एतेनेति ॥ निबन्धनरीतेरयुक्तत्वकथनेनेत्यर्थः । तात्पर्यनिर्णयाय तदपेक्षायां वाऽप्रामाण्यमर्थनिश्चयाय तदपेक्षायां वा । नाद्य इत्याह ॥ तात्पर्येति ॥ अन्यथा विचारसापेक्षवेदस्याप्रामाण्यापातादिति भावः । नद्वितीय इत्याह ॥ अर्थनिर्णयेति ॥

तात्पर्यचन्द्रिका

तस्मादुपक्रमादौ परबलीयस्त्वं श्रुत्यादौ तु पूर्वबलीयस्त्वम् । तदुक्तमनुव्याख्याने-

''उपक्रमादिलिङ्गानां बलीयो ह्युत्तरोत्तरम् ।
श्रुत्यादौ पूर्वपूर्वं च ब्रह्मतर्कविनिर्णयात् ॥''

इति । यत्रैकस्यार्थस्योपक्रममात्रमुपसंहारमात्रं वा तत्र तन्मात्रादुपक्रांतादिमात्रेऽर्थे तात्पर्यम् । यत्र तूभयं तत्र तदविरोधलक्षणैकरूप्यादुभयानुगुणे तात्पर्यम् । अत एव प्रमाणलक्षणे भगवत्पादैः ''उपक्रमोपसंहारतदैकरूप्याभ्यासापूर्वताफलार्थवादाश्चे''ति तदैकरूप्यं पृथगुक्तम् । अत्र तूपक्रमोपसंहाराविति यत्र प्रत्येकविवक्षया विशकलितौ द्वाविव समुदायविवक्षया तदैकरूप्यमपि विवक्षितम् । अत्र टीकायां तदैकरूप्यस्य पृथगनुक्तिस्त्वन्यत्रोक्तत्वात् । यद्वाऽत्रोपक्रमादेर्बलाबलयोर्निरूप्यमाणत्वात् यत्रैकैकं तत्र सन्निपातस्यैवाभावात् यत्र चैकस्मिन्वाक्य एकस्मिन्नर्थ उभयसन्निपातस्तत्र विरोधस्यैवाभावात् । यत्र च विरुद्धार्थवाक्ययोरेकत्रोपक्रमो वाक्यांतरे चोपसंहारस्तत्र बलाबलयोरभावात् । यत्र चैकस्मिन्महावाक्ये भिन्नयोरर्थयोरुभयसन्निपातस्तत्रोपसंहारानुसारेणैकरूप्यात्तात्पर्यनिश्चयेनोपसंहारप्राबल्योक्तावर्थात्तदैकरूप्यस्याप्युक्तत्वादत्र पृथगनुक्तिः । प्रमाणलक्षणे तूपक्रममात्रादिकमपि क्वचिदुपक्रांतादौ तात्पर्यनिर्णायकमिति निदर्शयितुं पृथगुक्तिः । उपसंहारमात्रयुक्तस्य चोभयैकरूप्यवद्वाक्यानुरोधेनास्वारस्यादुपसंहारादैकरूप्यस्य बलवत्त्वम् । यद्वोपक्रमस्वारस्यादुपसंहारस्वारस्यस्य बलीयस्त्ववदुपसंहारमात्रस्वारस्यादुभयस्वारस्यस्य बलीयस्त्वम् । एतच्चोपक्रमादिकं स्वार्थे शब्दात्मकमपि इदमेतत्परमबाधे सत्येतदुपक्रमत्वादित्यादिरूपेण महावाक्यतात्पर्ये लिङ्गं च । उपपत्तिस्तु स्वार्थेपि लिङ्गरूपा । तात्पर्येपि । अयं तात्पर्यविषयः उपपन्नत्वादिति ॥ लिङ्गरूपेति पृथगुक्ता ।

प्रकाशिका — एवमुपक्रमादीनां परबलीयस्त्वोक्तिपरटीकां व्याख्याय ''अत्रश्रुत्यादिषट्कं च ग्राह्य''मिति टीकायांश्रुत्यादेरपि तार्त्यलिंगतयाऽत्र ग्राह्यत्वेनोक्तत्वात्तत्राप्येवमेव बलीयस्त्वमिति भ्रमं वारयन्नुपसंहरति ॥ तस्मादिति ॥ श्रुत्यादौ त्विति ॥ एतच्च शब्दादेव

(प्रकाशिका)

प्रमित'' इत्यत्रोपपादयिष्यत इति भावः ॥ तदुक्तमिति ॥ तृतीयस्य चतुर्थपादे । ब्रह्मतर्के तथा निर्णयादित्यर्थः । ऐकरूप्यमप्यत्र ग्राह्यमिति भावेन तस्य लिङ्गत्वमुपपादयति ॥ यत्रेति ॥ भाष्योक्तप्रमाणेपि तदभिप्रेतमित्याह ॥ अत्रत्विति ॥ ''उपक्रमोपसंहारावभ्यासोऽपूर्वतांफलम् । अर्थवादोपपत्तीच लिङ्गं तात्पर्यनिर्णय'' इति भाष्योक्तवाक्य इत्यर्थः । टीकायामनुक्तेर्गतिमाह ॥ टीकायामिति ॥ अन्यत्र न्यायकल्पलतायामित्यर्थः ॥ यद्वेति ॥ बलाबलयोः प्राबल्यदौर्बल्ययोः । निरूप्यमाणत्वात्सम्भावितपक्षचतुष्टयमध्ये पक्षत्रये बलाबलोक्त्यप्रसक्तेः ''यत्र चैकस्मिन्महावाक्य'' इत्युक्तपक्ष एव तत्प्रसक्तेस्तत्रोपसंहारानुरोधेनोपक्रमस्य नयने ऐकरूप्यस्याप्युक्तत्वात्पृथगनुक्तिरित्यर्थः । अत्र भाष्यादावित्यर्थः । अन्यत्रोक्तेर्गतिमाह ॥ प्रमाणेति ॥ ऐकरूप्यस्य तात्पर्यलिङ्गत्वमुक्त्वोपसंहाराद्बलीयस्त्वं हेतूक्त्याह ॥ उपसंहारेति ॥ बह्वनुग्रहन्यायमाश्रित्याह ॥ यद्वेति ॥ तद्यथा ''ज्योतिर्दर्शना''दित्यत्र ''अयं पुरुषः स्वयं ज्योति''रित्युपसंहारस्थस्वयंशब्दानुसारात् ''आत्मैवास्य ज्योति''रिति प्रक्रमस्थात्मशब्दस्य जीवस्वरूपार्थत्वप्राप्तावपि ''विष्णुरेव ज्योति''रित्यादिश्रुत्या विष्ण्वेकनिष्ठज्योतिश्शब्दस्य ''हृद्यंतर्ज्योति''रित्यात्मप्रश्नोत्तरोपक्रमे ''सुप्त'' इति ''अत्रायं पुरुषः स्वयं ज्योति''रित्युपसंहारे च श्रुतत्वेन तयोरैकरूप्यात्तद्वाक्यं विष्णुपरमिति निर्णेष्यते । यथा वा प्रागुक्तदिशा जीवोपसंहारोपेतानंदमयादिप्रकरणजातस्य ब्रह्मप्रश्नोत्तरोपक्रमेण ''अस्माल्लोकात् प्रेत्य आनन्दमयमात्मानमुपसंक्रम्ये''त्यादि मुक्तगम्यत्वोपसंहारेणावगतोभयैकरूप्येण निर्णीतब्रह्मतात्पर्यकाद्भृगुवल्लीवाक्याद् ब्रह्मपरत्वमित्याद्यूहनीयम्। ननूपक्रमादीनां शब्दरूपतया कथं लिङ्गत्वम् । तथात्वे चोपपत्तेः पृथगुक्तिर्न स्यादित्यतः ''एतत्सर्वं वाक्यतात्पर्यार्थनिर्णये लिङ्गं भवती''ति टीकां विवृण्वानो न्यायकल्पलतोक्तं लिङ्गत्वप्रकारमाह ॥ एतच्चेति ॥ स्वार्थे अवान्तरवाक्यार्थरूपे । उपसंहारादिविरुद्धोपक्रमार्थे ''ह्रयाम्यग्नि''मित्यादावुपक्रमस्य व्यभिचारवारणायाबाधे सतीति। ''उपक्रमादीनामुपपत्तित्वेपि ब्राह्मणपरिव्राजकन्यायेन पृथगुक्ति''रिति टीकां विवृण्वान उपक्रमादिभ्य उपपत्तेर्विशेषमाह ॥ उपपत्तिस्त्विति ॥ स्वार्थे स्वव्यापकीभूतेर्थे । तथाचोपक्रमादेरेकत्रोपपत्तिरूपत्वात्तत उपपत्तेर्भेदेनोक्तिरित्यर्थः ।

पाण्डुरङ्गि — प्राबल्योपपादनमुपसंहरति ॥ तस्मादिति ॥ नन्वैकरूप्यं किमवश्यवक्तव्यं वाऽवश्यावक्तव्यं वा । आद्ये तेनापि तात्पर्यनिश्चयात्तदपि वक्तव्यं स्यात् । अंत्ये प्रमाणलक्षणादावप्यैकरूप्योक्तिरयुक्तेत्यत आह ॥ यत्रेति ॥ ऐकरूप्यशब्दार्थकथनम् ।

तदविरोधलक्षणेति ॥ उपक्रमोपसंहारयोरविरोधेनैकार्थप्रतिपादकत्वलक्षणैकरूप्यादित्यर्थः ॥ अत एवेति ॥ यत ऐक्यरूपस्य तात्पर्यनिर्णायकत्वं तत एवेत्यर्थः । ननु तर्ह्यत्र भाष्य ऐकरूप्यस्याविवक्षितत्वान्न्यूनतेत्यत आह ॥ अत्रत्विति ॥ तथापि टीकायां पृथगनुक्तत्वान्न्यूनता तदवस्थेत्यत आह ॥ अत्रेति ॥ अन्यत्रेति ॥ प्रमाणलक्षण इत्यर्थः । नन्वन्यत्रोक्तत्वेप्यत्र तात्पर्यनिर्णायकत्वेनोपक्रमादिवचनावसर ऐकरूप्यमप्यवश्यं वक्तव्यमेव । तस्मादत्रानुक्त्या तदावश्यकमेव नेति प्रतीयते । तथाच प्रमाणलक्षणादौ तदुक्तिरयुक्तेत्यस्वरसादाह ॥ यद्वेति ॥ नन्वैकरूप्यस्यान्यत्रोक्तत्वेनान्यत्रानुक्तिश्चेदुपक्रमादीनामप्यन्यत्रोक्तत्वेन सर्वेषामपि तेषामनुक्तिर्वा तेष्वन्यतमानुक्तिर्वा स्यात् । किं च प्रकरणस्य शास्त्रैकदेशत्वेनैकदेशानुक्तावप्यस्य शास्त्रत्वेनैकदेशानुक्तिरयुक्तेत्यतो वाह ॥ यद्वेति ॥ यद्वा नन्वावश्यकत्वे तदैकरूप्यमत्रापि वक्तव्यं अन्यथा अन्यत्रापि न वक्तव्यम् । किं चात्रैव मीमांसायां तदङ्गभूतलिङ्गानां सूत्रे भाष्ये चोक्तत्वाट्टीकायामप्यवश्यं वक्तव्यम् । अन्यत्र त्वंतर्भावमात्रस्यैव कथनान्नावश्यकमित्यत आह ॥ यद्वेति ॥ तात्पर्यज्ञापकलिङ्गमात्रनिरूपणावसरे ह्यैकरूप्यं निरूपणीयम् । नह्यत्र तात्पर्यनिर्णायकं लिङ्गमात्रं निरूप्यते । किन्तु तेषां बलाबलम् । अत ऐकरूप्यं नोक्तमित्याह ॥ उपक्रमादेरिति ॥

नन्वैकरूप्यस्यापि बलवत्त्वात्तदपि पृथग्वक्तव्यमिति चेदत्र प्रष्टव्यम् । किमैकरूप्यस्य कुत्र निवेश इति । किं यत्र वाक्य उपक्रमादिकमेकैकं तत्र निवेश उत यत्रैकस्मिन्नर्थ उभयसन्निपातस्तत्र यद्वा विरुद्धार्थकवाक्यद्वय एकत्रोपक्रमोन्यत्रोपसंहारस्तत्र अथवैकस्मिन्महावाक्य एकत्र वाक्य उपक्रमोन्यत्रोपसंहारस्तत्र । नाद्य इत्याह ॥ यत्रैकैकमिति ॥ तथाच सन्निपाताभावे कयोरैक्यं स्यादिति भावः । न द्वितीय इत्याह ॥ यत्र चेति ॥ तथाच सति विरोध ऐकरूप्येणाविरोधेन तात्पर्यं निर्णेयं स एव नेति न तत्र तत्समावेश इति भावः । न तृतीय इत्याह ॥ यत्र च विरुद्धार्थेति ॥ तत्रेति ॥ तथाच न तत्रापि समावेशः बलाबलनिरूपणस्य प्रकृतत्वादिति भावः । चतुर्थं प्रत्याह ॥ यत्र चैकस्मिन्निति ॥ तथाचोपसंहारप्राबल्यानुसारेणोपक्रमे नीत ऐकरूप्यमप्युक्तमेवेति न तत्पृथग्वक्तव्यमिति भावः । न चैवमुपक्रमोपसंहारोक्तावर्थादैकरूप्योक्तिवदैकरूप्योक्तावुपक्रमोपसंहारयोरप्युक्तिसम्भवात्तदेव वक्तव्यं नोपक्रमोपसंहाराविति वाच्यम् । तथात्वे ह्युपक्रमोपसंहारयोः प्रत्येकं तात्पर्यलिङ्गत्वं न ज्ञायेत । किंत्वैकरूप्यमेवेति स्यात् । उपक्रमोपसंहाराविति स्मृत्यननुसारित्वं च स्यादिति भावः । नन्वथादैकरूप्यलाभे प्रमाणलक्षण ऐकरूप्यस्य कथं

(पाण्डुरङ्गि)

पृथगुक्तिरित्यत उपक्रमवत्तस्यापि तात्पर्यनिश्चायकत्वादित्याह ॥ प्रमाणलक्षणेत्विति ॥ ननूपसंहारस्य प्राबल्य उक्तेऽर्थैकरूप्योक्तिश्चेदुपसंहारापेक्षयैकरूप्यस्य प्राबल्यं न स्यादित्यत आह ॥ उपसंहारमात्रयुक्तस्येति ॥ ननूपसंहारापेक्षयैकरूप्यस्य प्राबल्ये हेतुर्नोक्तः । तत्कथं प्राबल्यसिद्धिरित्यत आह ॥ यद्वेति ॥ भूमाधिकरणे प्राणशब्दस्योपक्रमगतस्य द्वितीययोजनायां मुख्यप्राणपरत्वस्याप्यपरित्यागात्तदनुरोधेन वाऽऽह ॥ यद्वेति ॥ ननूपक्रमोपसंहारतदैकरूप्यानां पृथग्गणने उपसंहाराभ्यासैकरूप्यस्य अभ्यासापूर्वैकरूप्यस्य च पृथग्गणनं कार्यम् । अविशेषादिति चेन्न । उपक्रमोपसंहारयोरर्थतोप्यैकरूप्यवदन्यैकरूप्ये तात्पर्यत ऐकरूप्ये सत्यप्यर्थतोप्यैकरूप्यस्याभावेनान्यस्यागणनात् । यद्वोपक्रमोपसंहारयोरैकरूप्याभाव एकस्मिन्नपि वाक्ये विच्छेदाभावान्न तत्पृथग्गण्यते । अभ्यासस्यासकृदुक्तत्वस्य शब्दधर्मत्वादपूर्वताफलार्थवादोपपत्तीनामर्थधर्मत्वाच्छब्दैकरूप्यसम्भवाद्यधिकरणयोरैकरूप्यासम्भवान्न तत्पृथगुक्तम् । ''उपक्रमादीनामुपपत्तित्वेपि ब्राह्मणपरिव्राजकन्यायेन पृथगुक्ति''रिति टीकायामुक्तम् । तत्र दृष्टांतदार्ष्टान्तिकयोर्वैषम्यम् । तत्र ब्राह्मणापेक्षया परिव्राजके विशेषद्योतनादिरूपप्रयोजनसद्भावेन पृथगुक्तिसम्भवेपि प्रकृत उपक्रमादीनामुपपत्त्यपेक्षया विशेषाभावादित्यतो वैषम्यं परिहर्तुमुपक्रमादीनामुपपत्त्यपेक्षया विशेषमाह ॥ एतच्चेति ॥ इति पृथगुक्तेति ॥ उपपत्तिशब्देनोपक्रमादिकमगृहीत्वैवोपक्रमादिशब्देनोपक्रमादिकं उपपत्तिशब्देनोपपत्तिर्गृहीता । न तूपपत्तिशब्देन सर्वमित्युपपत्तिः पृथगुक्तेति भावः ।

तात्पर्यचन्द्रिका

तत्र विरोधे दुर्बलं बाध्यम् । उपक्रमादिद्वयस्य समस्य विरोधे सावकाशं बाध्यम्। उपजीवकत्वादिना स्वभावदुर्बलेनापि निरवकाशेनोपजीव्यत्वादिना स्वभावप्रबलस्यापि सावकाशस्य बाधः । एवमेकेन निरवकाशेन सावकाशानेकबाधः। सावकाशत्वं च न लक्षणादिनाऽर्थान्तरपरता कल्पनार्हत्वम् । येनोपक्रमादेर्दुर्बलस्यापि प्रमाणत्वेन सावकाशत्वनियमात्तदेव बाध्यत्वे तंत्रं न तु स्वभावदुर्बलत्वं नामास्तीति स्यात् । किं तु स्वत एवार्थान्तरवाचित्वम् । यथा चैवंविधसावकाशत्वशून्यस्यापि स्वभावदुर्बलस्य स्वभावबलवद्विरोधेऽर्थान्तरकल्पना एवं स्वभावप्रबलस्य निरवकाशत्वनियमाभावोप्यूह्यः । इयं च बाधव्यवस्था न

केवलमुपक्रमादौ । किंतु श्रुतिलिङ्गादौ च द्रष्टव्या । श्रुत्यादिकमपि श्रुत्याद्यविरुद्धे लिङ्गादौ प्रामाण्यादिह ग्राह्यमिति । (श्रुत्यादिक्रमेपि श्रुत्याद्यविरुद्धे लिङ्गादौ प्रामाण्यादि ग्राह्यमिति ।)

प्रकाशिका — एवमुपक्रमादीनां परबलीयस्त्वोपपादनस्योपयोगोक्त्यर्थं ''विरोधे तु दुर्बले''त्यादि टीका प्रवृत्ता । तां विवृणोति ॥ तत्रेति ॥ एतच्च प्रागुदाहरणेन दर्शितमिति भावः । ''साम्ये निरवकाशेने''त्यादि टीकां व्याचष्टे ॥ उपक्रमादीति ॥ उपक्रमोपसंहारादिषु मध्ये द्वयस्य यथाकथंचित्समतया प्रतीतस्य परस्परं विरोधे निरवकाशेन सावकाशं बाध्यमित्यर्थः । यथाऽत्ताधिकरणे ''अदितेरदितित्व''मित्युपसंहारादिति-प्रतीतावपि ''नैवेह किंचने''ति निरवकाशोपक्रमेण चरमस्यापि सावकाशस्य बाधेन विष्णुपरत्वम् । यथा वा द्युभ्वादिनये ''प्रकरणा''दिति गुणसूत्रे चरमस्यापि ''जुष्टं यदा पश्यत्यन्यमीश''मिति सावकाशस्येशशब्दस्य ''द्वे विद्ये वेदितव्ये'' इति निरवकाशात्परविद्या विषयवस्तूपक्रमाद्बाधेन प्रकरणस्य विष्णुपरत्वमित्याद्यूह्यम् । तथांतराधिकरणे ''सोहमस्मि स एवाहमस्मी''त्यभ्यासादग्निपरत्वप्रतीतावपि ''कं ब्रह्मे''ति निरवकाशोपक्रमेण विष्णुपरत्वं ''सुखविशिष्टे''ति गुणसूत्रेणोच्यते । तथा ''श्रुतोपनिष''दिति गुणसूत्रे ''अस्मद्विद्या आत्मविद्ये''ति विद्याशब्दाभ्यासेनाग्निपरत्वप्रतीतावपि ''स एनान्ब्रह्मगमयती''त्युपसंहारेण निरवकाशेन विष्णुपरत्वमित्यादि बोध्यम् । यद्वोपक्रमादीनां श्रुत्यादिभिस्सह यथायोगं समतया प्रतीतस्य द्वयस्य विरोधे सावकाशं बाध्यमिति । यथा भूमनये ''प्राणो वा आशाया भूया''नित्युपक्रमेण सह ''विष्णुर्वै देवेभ्यो भूयांस्तस्माद्भूयान्नामे''ति साभ्यासत्वेन समतया प्रतीतायाः समाख्यायाः निरवकाशत्वेन सावकाशप्राणोपक्रमस्य बाधः। यथा वाऽनुकृतिनये ''न तत्र सूर्यो भाती''त्यादेः सूर्याद्यप्रकाश्यत्वबोधकोपसंहारस्य तत्त्वेन प्रबलस्य ''कथं नु तद्विजानीया''मिति पूर्ववाक्यस्थतच्छब्दस्य ''परमं सुख''मिति प्रकृतज्ञानिसुखपरामर्शिनः श्रुतित्वेन प्रबलस्य साम्येप्युपसंहारेण निरवकाशेन तदिति सर्वनामश्रुतेः स्वारस्यभङ्ग उक्तः । उक्तं च ''बलवानुपसंहारस्तद्वश्या तदिति श्रुतिः। कथं पश्येत्तद्विरुद्धपूर्ववाक्यावबोधित''मित्याद्यूह्यम् । केचित्तूपक्रमादीत्यस्य यत्र वाक्ये उपक्रमद्वयस्योपसंहारादिद्वयस्य वा समस्य विरोधे सावकाशं बाध्यमित्यर्थः । यथा ''प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मे''ति प्राणब्रह्मणोरुपक्रमेपि श्रुतिलिङ्गादिना निरवकाशब्रह्मोपक्रमेण प्राणस्य न प्रकरणप्रतिपाद्यत्वमित्यादि ध्येयमित्याहुः । ''स्वभावदुर्बलेने''त्यादिटीकां

(प्रकाशिका)

व्याचष्टे ॥ उपजीवकत्वादिनेति ॥ यथांतरधिकरणादौ स्वभावप्रबलाया इन्द्रादिश्रुतेर्लिङ्ग-तया स्वभावदुर्बलेनापि समुद्रांतस्थत्वलिङ्गेन निरवकाशेन बाध इति भावः । ''एवमेकेने'' त्यादिटीकां व्याचष्टे ॥ एवमिति ॥ यथा ''शब्दादेव प्रमित'' इत्यत्र वायुप्रापकाणां प्राणव्यवस्थापकत्वमध्यमत्वसर्वदेवोपास्यत्वलिङ्गानां सावकाशानामेकेन निरवकाशेन वामन-शब्देन बाधः यथा वा ''कंपना''दित्यत्र कंपकत्वेनैकेन लिङ्गेनानेकवज्रश्रुत्युद्यतत्वलिङ्ग-योर्बाध इति भावः । ''ननु सावकाशत्वे''त्यादिटीकां व्याचष्टे ॥ सावकाशत्वं चेति ॥ सावकाशत्वनियमात् अर्थान्तरपरता कल्पननियमादित्यर्थः । ''स्वभावप्रबलेन दुर्बलस्य बाधनेऽर्थान्तरकल्पन''मिति टीकावाक्यं विवृण्वंस्तदुपलक्षणमिति भावेनाह ॥ यथाचेति ॥ एवंविधेति ॥ स्वत एवार्थान्तरवाचित्वरूपेत्यर्थः । भेदग्राहिणा स्वभावप्रबलेन साक्षिणा विरोधे ''अहं ब्रह्मास्मी''त्यादेरुपजीवकत्वेन दुर्बलस्यांतर्यामिपरत्वकल्पनमुदाहरणमिति भावः ॥ एवमिति ॥ आकाशाधिकरणे स्वभावप्रबलाकाशश्रुतेर्निरवकाशबलवल्लिङ्गविरोधे-नार्थान्तरकल्पनादिति भावः । ''अत्र श्रुत्यादिषट्कं च ग्राह्य''मिति टीकार्थमाह ॥ इयं चेति ॥ एतदपि ''शब्दादेवे''त्यत्रोपपादयिष्यत इति भावः ।

पाण्डुरङ्गि — ननूपक्रमादिप्राबल्यव्युत्पादनमयुक्तम् । दुर्बलस्यापि प्रमाणत्वेन प्रबल-विरोधे तात्पर्यनिर्णयासम्भवेनानिर्णयतादवस्थ्यादित्यत आह ॥ तत्रेति ॥ बाध्यत्वं नामार्थान्तरपरत्वमेव । न तु सर्वथा बाधः । तथाच प्रबलविरोधेन दुर्बलस्य नेयत्वान्नानिर्णय इति भावः । ननु यत्र समयोरुपक्रमयोरुपसंहारयोर्वा विरोधस्तत्र कथं निर्णय इत्यत आह ॥ उपक्रमादिद्वयस्येति ॥ ननु सावकाशनिरवकाशभावेनैव रूपेण वैषम्यापत्त्या साम्यमेवानुपपन्नं तत्कथं ''साम्ये निरवकाशेन सावकाशं बाध्यत'' इति टीकायामुक्तमित्यतो वाह ॥ उपक्रमादिद्वयस्येति ॥ तथाचोपक्रमद्वयस्याप्युपक्रमत्वेन रूपेणोपसंहारद्वयस्योपसंहारत्वेन रूपेण साम्येपि सावकाशनिरवकाशरूपेण बाध्यबाधकभाव उपपन्न इति भावः । ''स्वभावदुर्बलेने''त्यादिटीकानुपपन्ना । स्वभावदुर्बलस्य निरवकाशत्वायोगात् । निरव-काशत्वे स्वभावदुर्बलत्वायोगात् । एवं स्वभावप्रबलस्य सावकाशत्वमनुपपन्नम् । सावकाशत्वे वा स्वभावप्रबलत्वमनुपपन्नमित्यतो व्याख्याति ॥ उपजीवकत्वादिनेति ॥ तथाच निरवकाशस्याप्युपजीवकत्वेन रूपेण स्वभावदौर्बल्यं सावकाशस्याप्युपजीव्यत्वेन रूपेण स्वभावप्राबल्यमुपपद्यत इत्यर्थः । ''एवमेकेनानेकेषां बाध''इति टीका । तत्रैकेन सावकाशे-नानेकेषां निरवकाशानां बाध इति भाति । तच्चायुक्तम् । सावकाशस्य

(पाण्डुरङ्गि)

निरवकाशबाधकत्वासम्भवात् । अतो व्याचष्टे ॥ एवमिति ॥ ननु सावकाशत्वस्य स्वभावदुर्बलत्वस्य चैकत्वात्सावकाशत्वमेव बाध्यत्वे तन्त्रमस्तु । निरवकाशविरोधेन लक्षणयार्थांतरपरत्वस्यैव सावकाशशब्दार्थत्वात् । तथाच नातिरिक्तस्वभावदुर्बलत्वमपीत्यत आह ॥ सावकाशत्वं चेति ॥ तस्य प्रबलविरोधत्वे सति लक्षणया अर्थान्तरपरता कल्पनारूपत्वेन लक्षणादिना विनैव क्लृप्तार्थान्तरपरत्वरूपसावकाशत्वापेक्षया भिन्नत्वेन स्वभावदुर्बलत्वं पृथग्वक्तव्यमिति तदुभयं बाध्यत्वे तन्त्रमिति भावः । अस्तु स्वभावदुर्बलस्य सावकाशाद्भेदः । तथापि यत्स्वभावप्रबलं तन्निरवकाशमेवेति नियमान्निरवकाशेन स्वभाव-दुर्बलेनापि स्वभावप्रबलस्य सावकाशस्य बाधकथनमयुक्तमित्यत आह ॥ यथाचेति ॥ तथाच स्वत एवार्थान्तरवाचित्वरूपस्य सावकाशत्वस्य स्वभावप्रबलेपि सत्त्ववत्स्वभावदुर्बलेपि स्वार्थत्यागे प्रकारांतरेणाघटमानत्वरूपनिरवकाशत्वसत्त्वेन तेन प्रबलस्यापि बाधोपपत्तेर्न टीकोक्तिरयुक्तेति भावः ।

उक्तन्यायमन्यत्रातिदिशति ॥ इयं चेति ॥ कथमर्थलिङ्गानां तात्पर्यलिङ्गेषु ग्रहणमित्यतो वाह ॥ इयं चेति ॥ तथाच अत्र उक्तव्यवस्थायां इति टीकास्थात्रेतिशब्दो व्याख्यात इति ज्ञेयम् । श्रुत्यादिषट्कं चात्र ग्राह्यमिति टीकायां तद्ग्रहणे प्रयोजनानुक्तेस्तद्ग्रहणं व्यर्थमित्यतो वाह ॥ इयं चेति ॥ श्रुत्यादिकमपि ग्राह्यमिति प्रथममन्वयः । तत्र हेतुमाह ॥ श्रुत्याद्यविरुद्ध इति ॥ क्रमेपीति पाठः साधुः । एवं चोपपत्तेः सर्वमूलत्ववत् श्रुत्यादावपि श्रुतेर्लिङ्गमूल-त्वमुक्तमिति ज्ञेयम् । अत्र टीकायां ''अन्यथा वाक्याप्रामाण्यापत्ते''रिति वाक्यस्य स्वभावदुर्बलप्रबलयोः सावकाशत्वनिरवकाशत्वनियमाङ्गीकारेणोभयोरपि निरवकाशत्वां-गीकारे सावकाशत्वाङ्गीकारे वा परस्य सत्प्रतिपक्षत्वेन वाक्यतात्पर्यनिर्णयानुपपत्त्योभयोरपि बाधेन वाक्यतात्पर्यासिद्ध्या वाक्यार्थद्वैरूप्यापत्त्या वैरूप्यापत्त्या वा वाक्याप्रामाण्या-पत्तेरित्यर्थः । ननु स्वभावदुर्बलेन स्वभावप्रबलस्य न बाधः । न चात एवोपजीवकत्वादिना स्वभावदुर्बलेनापि निरवकाशेनोपजीव्यत्वादिना स्वभावप्रबलस्य सावकाशस्य बाध इत्युक्तमिति वाच्यम् । निरवकाशत्वाङ्गीकारे तस्य स्वभावदुर्बलत्वासम्भवात् । निरवका-शत्वस्य स्वभावप्राबल्यरूपत्वात् । ''तयोः स्वभावो बलवानुपजीव्यादिकश्च स'' इत्यादौ मूलग्रन्थे ''आदिशब्देन निरवकाशत्वं ग्राह्य''मिति टीकायां चोपजीव्यत्व-वन्निरवकाशत्वस्यापि स्वभावत्वोक्तेः । अन्यथा तद्विरोध इति चेत् अत्राहुः । न निरवकाशत्वस्य स्वभावप्रबलत्वसिद्धिः । बहुत्वप्रयुक्तप्राबल्यस्य यावता प्राबल्येन बाधः

(पाण्डुरङ्गि)

तस्य सर्वस्यापि स्वभावप्राबल्यरूपत्वविवक्षयोपजीव्यत्वप्रयुक्तप्राबल्यस्येव निरवकाशत्व-प्रयुक्तप्राबल्यस्यापि तद्बाधकत्वात्स्वभावप्रबलत्वोक्तिर्युज्यते । न च बहुत्वप्राबल्यपरिपन्थित्वेनोपजीव्यत्वादेरेकीकृत्योक्तिर्व्यर्थेति वाच्यम् । द्विविधं बलवत्त्वं चेत्युक्तद्वैविध्योपपादनार्थं तथा विवक्षायाः आवश्यकत्वात् । अन्यथा त्रैविध्यापातेन द्वैविध्यकथनमनुपपन्नं स्यात् । तथाचोदाहृतवाक्यादेरन्यथासिद्धत्वात्स्वभावदुर्बलस्यापि निरवकाशत्वोक्तेर्न विरोध इति ।

तात्पर्यचन्द्रिका

सूत्राक्षरार्थस्तु । तत्तु ब्रह्मैव शास्त्रयोनिसावकाशत्वनिरवकाशत्वादिना विचारित-स्वरूपसम्यक्त्वयुक्तादन्वीयतेऽनेनेत्यन्वयशब्दवाच्यादुपपत्त्यादेर्लिङ्गादिति । सुधायां तु न केवलमुपपत्त्यादिकं समन्वयशब्दार्थः । किंतु तद्धेतुकशास्त्रजन्यप्रमागोचर-त्वरूपशास्त्रयोनित्वे हेतुभूतः सर्वशास्त्रस्य सम्यग्वचनवृत्त्या तत्परत्वरूप-सम्बन्धोपीत्युक्तम् ।

प्रकाशिका — ''सूत्रं योजयती''त्यादिटीकार्थं निष्कृष्याह ॥ सूत्राक्षरार्थस्त्विति ॥ ब्रह्मैवेति ॥ तुरेवार्थः । पूर्वसूत्राच्छास्त्रयोनि- पदमनुवर्तत इति भावः । शास्त्रतात्पर्यविषय इत्यर्थः । उत्तराधिकरणसङ्गत्यर्थमर्थान्तरमप्यत्रानुसन्धेयमिति भावेनाह ॥ सुधायां त्विति ॥ सर्वेति ॥ अनेन संशब्दस्य कात्स्न्यर्चमुख्यत्वोभयार्थस्यावृत्तिस्तस्य शास्त्रपदेनान्वयपदेन चान्वय इति सूचितम् । यत्त्वत्र एवं शोधितोपक्रमादिना वेदस्य विष्णौ तात्पर्यमिव शैवाद्यागमेन वा तदुपदर्शितोपक्रमादिना वा शिवादावपि तात्पर्यमस्तु । त्वन्मते श्रुतेरनेकार्थसहिष्णुत्वादित्यादि कस्यचिद्दुर्भाषणं तत्तु विष्णूत्कर्ष एव महातात्पर्यमित्येवंरूपानेकश्रुतिस्मृतियुक्तिविरुद्धत्वादेकवाक्यताभङ्गप्रसङ्गाच्चापेशलम् । विस्तरस्तु गुरुपादकृतकण्ठकोद्धारे बोध्यम् ।

पाण्डुरङ्गि — ननु ''तत्तु समन्वया''दित्यत्र तच्छब्दस्य पक्षपरामर्शकत्वे साध्याभावात्साध्यपरामर्शे च पक्षाभावादनन्वयः । समन्वयशब्दस्य तत्परत्वरूपसम्बन्धार्थत्वात् ब्रह्म शास्त्रतात्पर्यविषयः तात्पर्यरूपसम्बन्धादिति साध्याविशेषः स्यादित्यतः सूत्राक्षरार्थमाह ॥ सूत्राक्षरार्थस्त्विति ॥ तथाच तच्छब्दो व्यवहितजन्मादिसूत्रोक्तलक्षणलक्षितब्रह्मस्वरूप-पक्षपरामर्शकोऽव्यवहितशास्त्रयोनिसूत्रोक्तशास्त्रयोनित्वरूपसाध्यपरामर्शकश्चेत्युभयलाभसं-

भवान्नानन्वयः । तुशब्द एवार्थः पक्षेणान्वेति । समन्वयशब्दस्तूपपत्त्यादिरूपतात्पर्यलिङ्गपर इति साध्याविशिष्टं च नेति भावः । ननु तर्हि सुधायां तत्परत्वरूपसम्बन्धस्य हेतूकरणात्तत्र साध्यावैशिष्ट्यं स्यादित्यत आह ॥ सुधायां त्विति ॥ तथाच हेतुसाध्ययोर्भेदान्न तत्रापि साध्याविशेष इति भावः ।

तात्पर्यचन्द्रिका

अत्र परैर्वेदान्ता ब्रह्मणि न प्रमाणं सिद्धवस्तुबोधने प्रवृत्त्याद्यभावेन फलाभावात्सापेक्षत्वप्रसङ्गाच्चेति प्राप्ते ''द्विविधं हीप्सितम् । किंचिदप्राप्तम् । यथा ग्रामादि । किंचिच्च प्राप्तमपि विभ्रमवशादप्राप्तमित्यवगतम् । यथा कण्ठमण्यादिकम् । एवं जिहासितं द्विविधम् । किंचिदहीनं जिहासति । यथा वलयितचरणं फणिनम् । किंचिच्च हीनमेव । यथा चरणाभरणनूपुरे आरोपितं फणिनम् । तत्र ब्रह्मात्मैक्य-ज्ञानात्प्राप्तब्रह्मप्राप्तिः कल्पितत्वेन नित्यहीनसंसारहानिश्च सम्भवतीति फलवत्त्वम् । सिद्धस्यापि ब्रह्मणो मानान्तरागोचरत्वान्न सापेक्षत्वं चे''ति सिद्धांतयित्वा ''समन्वयश्च लक्षणयाऽखण्डार्थपरत्वम् । ततश्च तद्ब्रह्म शास्त्रप्रतिपाद्यं समन्वयादिति सूत्रार्थ'' इत्युक्तम् । तत्र पूर्वपक्षो निर्दलः । निष्प्रयोजनत्वशङ्कायास्त्वन्मते आद्यसूत्र एव जिज्ञासाशब्देन परिहृतत्वात् । लौकिकार्थपरवाक्येपि सापेक्षत्वदर्शनेन पौरुषेयत्वस्यैव सापेक्षत्वप्रयोजकत्वाच्च ।

प्रकाशिका — शुद्धबुद्धोदासीनस्वभावतयोपेक्षणीयं ब्रह्मभूतमभिदधतां वेदान्तानामपुरुषार्थोपदेशिनामप्रयोजनत्वापत्तेरित्यादिभामत्युक्तमनुवदति ॥ सिद्धेति ॥ सापेक्षत्वेति ॥ सिद्धार्थत्वे च प्रत्यक्षादिभिः समानविषयतया लौकिकवाक्यवत्तदर्थानुवादकत्वेन प्रत्यक्षादि-सापेक्षत्वेनाप्रामाण्यप्रसङ्गादित्यर्थः । प्राप्तब्रह्मैक्यप्राप्तिः कल्पितानर्थहानिश्च सिद्धब्रह्मबोधने फलमिति तयोः फलत्वं लोकरीत्या भामत्युक्तमक्षरशोऽनुवदति ॥ द्विविधमिति ॥ अहीनं अत्यक्तं विद्यमानमिति यावत् । जिहासति त्यक्तुमिच्छति ॥ वलयितेति ॥ वलयितो वेष्टितश्चरणो येनासौ वलयितचरणः । ''वेष्टितं स्याद्वलयित''मित्यमरः । हीनं त्यक्तं आरोपितमिति यावत् । यत्तु सापेक्षत्वप्रसङ्गादिति तन्नेत्याह ॥ सिद्धस्येति ॥ परिनिष्ठितस्येत्यर्थः । परैः सिद्धांतयित्वा इत्युक्तमित्यन्वयः । पूर्वपक्षो द्विविधः ।

(प्रकाशिका)

फलाभावादप्रामाण्यमित्येकः । सापेक्षतापत्त्याऽप्रामाण्यमित्यपरः । अत्राद्यं निराह ॥ निष्प्रयोजनत्वेति ॥ जिज्ञासाशब्दस्य मुख्यवृत्त्या ज्ञानेच्छापरत्वमुपेत्य ''ज्ञातुमिच्छा हि सन्दिग्धे विषये निर्णयाय भवती''ति विषयप्रयोजनसूचनस्याभ्युपगमादिति भावः । द्वितीयं निराह ॥ लौकिकेति ॥ सङ्केतग्रहणादिसापेक्षत्वेन सिद्धार्थकवत्तस्याप्यप्रामाण्यं स्यादित्यर्थः । पौरुषेयस्य वक्तृज्ञानपूर्वकत्वेन तत्सापेक्षत्वात्पौरुषेयत्वमेव प्रयोजकम् । न तु सिद्धार्थपरत्वम् । व्यभिचारात् । वेदे च तन्नास्ति । अत एव भामत्यां ''किं पुंवाक्यानां सापेक्षता किं भूतार्थत्वेनाहोस्वित्पौरुषेयत्वेने''त्यादिनाऽऽद्यं दूषयित्वा द्वितीय एव स्थापित इति भावः ।

पाण्डुरङ्गि — परोक्ताधिकरणरचनायाः स्वोक्ताधिकरणरचनया साम्यप्रतीतिनिरासार्थं तामनूद्य दूषयति ॥ अत्र परैरिति ॥ सापेक्षत्वप्रसङ्गाच्चेति ॥ प्रमाणान्तरजन्यज्ञप्तिविषयत्वं तादृशार्थबोधने प्रमाणांतरापेक्षायां सापेक्षत्वमिति भावः । न प्रवृत्तिनिवृत्त्योः फलत्वं किंत्वनिष्टनिवृत्तीष्टप्राप्त्योरेव फलत्वं तयोश्च प्रकृते सद्भावान्न फलाभाव इति भावेनेष्टानिष्ट-योर्विभागमाह ॥ द्विविधं हीत्यादिना ॥ अहीनं विद्यमानम् ॥ सिद्धस्यापीति ॥ तथाच न प्रमाणान्तरजन्यज्ञप्तिविषयत्वं सिद्धत्वं किन्तु स्वत एव निष्पन्नत्वमिति भावः । अस्त्वेवमधिकरणरचना तथापि सूत्रार्थः कथमित्यत आह ॥ समन्वयश्चेति ॥ समन्वयादिति ॥ लक्षणयाऽखण्डार्थत्वपरवेदतात्पर्यविषयत्वादित्यर्थः ॥ आद्यसूत्र एवेति ॥ ''निश्चिते जिज्ञासायोगात्संदिग्धत्वेन ब्रह्मैव विषयो ज्ञानमेवेच्छाविषयत्वेन प्रयोजनमिति जिज्ञासापदेनैव विषयप्रयोजनमिति जिज्ञासापदेनैव विषयप्रयोजने सूचिते'' इति भामत्यां ''अथशब्दे-नाधिकारी जिज्ञासापदेनेच्छा विषयत्वेन ब्रह्मज्ञानं प्रयोजनमर्थादधिकारिविशेषणं मोक्षो ब्रह्मज्ञानफलं विषयश्च सूचित'' इत्यादि विवरणे तथोक्तत्वादित्यर्थः । किं च प्रमाणांतर-सिद्धत्वेपि न सापेक्षत्वम् । पौरुषेयत्वस्यैव प्रयोजकत्वादित्याह ॥ लौकिकेति ॥ सिद्धार्थबोधकत्वे सापेक्षत्वापादनमयुक्तम् । स्वाभावव्याप्याभावप्रतियोगिन एव स्वप्रयोजक-त्वस्य धूमप्रयोजके वन्ह्यादौ दृष्टत्वात् । प्रयोजकाभावेन प्रयोज्याभावस्यापादनीयत्वात् । प्रकृते च तदभावात् । व्याप्येनैव व्यापकस्यापादनीयत्वात् प्रकृते च सिद्धबोधकत्वे निरपेक्षत्वे बाधकाभावोनाप्रयोजकतया व्याप्तेरेवाभावात् सामग्र्याः कार्यप्रयोजकत्वात् सामग्र्या-कार्यापादनवत्प्रयोजकेन प्रयोज्यस्यापादनीयत्वे परिशेषाद्वाच्ये लौकिककार्यपरवाक्येऽसत्यपि सिद्धबोधकत्वे सापेक्षत्वदर्शनेन तदप्रयोजकत्वान्न प्रयोजकेन प्रयोज्यस्यापादनमपि युक्तमिति

भावः । ननु वेदस्य सिद्धार्थबोधकत्वे मानांतरावगतार्थवाक्यरचनाया एवापत्त्याऽपौरुषेयत्वाभावस्यैवापाद्यमानत्वात्कथं पूर्वपक्षस्य निर्दलत्वमिति चेन्न । सिद्धार्थबोधकत्वाभावेपि लौकिककार्यपरवाक्ये पौरुषेयत्वस्य दर्शनेन सिद्धार्थबोधकत्वेऽस्यापि पौरुषेयत्वापादनासम्भवाद्विपक्षे बाधकशून्यत्वेनाप्रयोजकतया धूमेन वह्नेरिव सिद्धार्थबोधकत्वेन पौरुषेयत्वापादनस्यायुक्तत्वादिति भावः ।

तात्पर्यचन्द्रिका

सिद्धांतोप्ययुक्तः । तथाहि । स्वप्रभत्वादसंदिग्धेऽवाच्यत्वात् श्रुत्यगोचरे । निर्विशेषेच चिन्मात्रे कथं श्रुतिसमन्वयः । एवं सन्दिग्धस्यैव विषयत्वात् सामान्यज्ञानविशेषाज्ञाननिबन्धनस्य च सन्देहस्य निर्विशेषेऽसम्भवात् पूर्वपक्षसिद्धांतयोश्च सन्देहकोट्यन्यतरकोट्यवलंबित्वात् फलस्य चैककोटिनिर्णयाधीनत्वात् निर्विशेषात्मनि विषयसंशयपूर्वपक्षसिद्धांतप्रयोजनाख्यपञ्चकरूपाधिकरणासम्भवो द्रष्टव्यः । अपिच ।

आद्यसूत्रेऽहमर्थे हि प्रसिद्धिः प्रतिपादिता ।
जिज्ञासार्थं द्वितीये हि जगज्जन्मादिहेतुता ॥ १ ॥
अविद्यमानाऽहमर्थे लक्षणत्वेन कीर्तिता ।
ईश्वरस्य तृतीये तु निर्विशेषप्रमाणता ॥ २ ॥
शास्त्रस्योक्ता चतुर्थे च तस्मिन्नेव समन्वयः ।
प्रतिज्ञातोंतरित्यादौ सविशेषं तु कथ्यते ॥ ३ ॥
ब्रह्मेति मायिनां पक्षस्तत्र किं केन सङ्गतम् ।
तत्वविद्वेषमात्रेण श्रुतिसूत्रे कदर्थिते ॥ ४ ॥

प्रकाशिका — ''निर्विशेषे स्वयं भाते सर्वधर्मोज्झितस्यास्ये''त्याद्यनुव्याख्यानं हृदि कृत्वाह ॥ स्वप्रभत्वादिति ॥ स्वप्रकाशत्वादित्यर्थः । ननु अवाच्यस्यापि लक्षणया श्रुतिगोचरता स्यादिति चेन्न । सर्वथा वाच्यत्वहीनस्य लक्ष्यत्वमपि नेत्युत्तराधिकरणे वक्ष्यमाणत्वादिति भावः । चिन्मात्रस्य स्वप्रभत्वेपि धर्मान्तरेण सन्देहः स्यादित्यत आह ॥ निर्विशेष इति ॥ श्रुतिसमन्वयरूपफलायोगमुक्त्वा तत्फलकमीमांसारम्भोप्ययुक्त इत्याह ॥

(प्रकाशिका)

एवमिति ॥ चिन्मात्रे समन्वयइत्यस्यैतत्सूत्रार्थत्वे पूर्वोत्तरासङ्गतिश्च स्यादिति भावेनाह ॥ अपि चेति ॥ परभाष्ये हि ''किं तद्ब्रह्म प्रसिद्धमप्रसिद्धं वे''त्यादिना शङ्कित्वा ''सर्वोह्यात्मास्तित्वं प्रत्येति । न नाहमस्मीति । यदि हि नात्मास्तित्वप्रसिद्धिः स्यात्सर्वोहि लोकोनाहमस्मीति प्रतीया''दित्यादिना जिज्ञासोपयुक्ततयाऽहमर्थे प्रसिद्धिः प्रतिपादितेत्यर्थः । द्वितीये च जन्मादिसूत्रे ''अस्य जगतो जन्मस्थितिभङ्गं यतःसर्वज्ञात्सर्वशक्तेः कारणाद्भवति तद् ब्रह्मे''ति परभाष्योक्तेरीश्वरस्य विशिष्टस्य जन्मादिहेतुत्वमहमर्थेऽविद्यमानं लक्षणत्वेनोक्तमित्यर्थः ॥ तस्मिन्नेवेति ॥ निर्विशेष एवेत्यर्थः । अन्तरित्यादौ ''अंतस्तद्धर्मे''त्यादावित्यर्थः । कदर्थिते कुत्सितार्थतया कृते । ''कोः कत्तत्पुरुषेची''ति कदादेशः ।

पाण्डुरङ्गि — ननु निष्फलत्वेन पूर्वपक्षिते फलवत्त्वं सिद्धांतितम् । तथा च फलवत्त्वमेवादौ दूषणीयम् । सूत्रार्थदूषणमादावयुक्तमित्यतः परोक्तसिद्धांतस्य सूत्रानारूढत्वमयुक्तत्वं च वक्तुं सूत्रार्थं दूषयति ॥ तथाहीति ॥ एवं हि परोक्तमनुमानं ब्रह्म शास्त्रप्रतिपाद्यं समन्वयादिति । अत्र लक्षणया वेदतात्पर्यविषयत्वादिति हेत्वर्थोभिप्रेतः । स चायुक्तः । अपूर्वार्थे वेदतात्पर्यं वक्तव्यम् । ब्रह्मणः स्वप्रकाशत्वेनासंदिग्धत्वान्न तत्र वेदतात्पर्यं युक्तमित्याह ॥ स्वप्रभत्वादिति ॥ ननु स्वप्रकाशत्वेन स्वरूपतः सिद्धत्वेपि विशेषतः सन्दिग्धत्वाद्युक्तं तत्र शास्त्रतात्पर्यमित्यत उक्तम् ॥ निर्विशेष इति ॥ तथाच विशेषाभावाद्विशेषतः सन्दिग्धत्वं न युक्तमिति भावः । ननु तर्हि मास्तु शक्त्या वेदतात्पर्यविषयत्वं लक्षणया तु भविष्यतीत्यत आह ॥ अवाच्यत्वादिति ॥ तथाचोत्तराधिकरणे वाच्यत्वलक्ष्यत्वयोः प्रयोज्यप्रयोजकभावस्य वक्ष्यमाणत्वाद्वाच्यत्वाभावे लक्ष्यत्वस्यैवाभावेन लक्षणयापि वेदतात्पर्यविषयत्वासम्भवेन हेत्वसिद्धिस्तदवस्थेति भावः । किंच त्वया निर्विशेषत्वाङ्गीकारेणाधिकरणारम्भप्रयोजकविषयादिपञ्चकासम्भवेनाधिकरणारम्भो न युक्त इति भावेनाह ॥ एवमिति ॥ नन्वत्र वेदान्तानामेव विषयत्वात् प्रामाण्याप्रामाण्ये एव कोटी। एवं चान्यतरकोट्यवलंबिपूर्वपक्षसिद्धांतयोः सम्भवेनान्यतरकोटिनिर्णयाधीनफलस्यापि सम्भवेनाधिकरणारम्भप्रयोजकपञ्चकसम्भवेनाधिकरणारम्भसम्भवात्कथमेतदिति चेन्न । वेदान्तानामेव विषयत्वे सिद्धांते ब्रह्मणः शास्त्रविषयत्वसमर्थनमसङ्गतं स्यात् । तथाच ब्रह्मैव विषयः शास्त्रप्रतिपाद्यत्वतदप्रतिपाद्यत्वे एव कोटी । एवं च सन्देहान्यतरकोट्यवलंबिपूर्वपक्षसिद्धांतौ शास्त्रप्रतिपाद्यत्वनिर्णयाधीनं फलं वक्तव्यम् । निर्विशेषत्वाङ्गीकारात्किमपीदं

न सम्भवतीत्यधिकरणानारम्भसम्भवस्तदवस्थ एवेति भावः । न केवलमधिकरणानारम्भोपि तु पूर्वोत्तरासङ्गतं चैतदित्याह ॥ अपि चेति ॥ तथाच यत्रैव सामान्यप्रतिपत्तिः विशेषाप्रतिपत्तिस्तस्यैव लक्षणं वक्तव्यम् । तत्रैव च प्रमाणं वक्तव्यम् । समन्वयश्च प्रतिज्ञातव्यः । उपपादनं च तत्रैव कर्तव्यम् । न चैवं प्रतिपादनं क्रियत इत्यसङ्गतिरिति भावः ।

तात्पर्यचन्द्रिका

किंच कण्ठमण्युपदेशस्य प्राप्तमणिप्राप्तिर्न फलम् । किंतु प्राप्तिज्ञानजन्यसुखस्य । वस्तुतः प्रागप्राप्तस्य प्राप्तिः मण्यप्राप्तिभ्रमादिजन्यस्य दुःखस्य वस्तुतः प्रागनिवृत्तस्य निवृत्तिर्वा फलम् । एवं चरणाभरणमिदं न सर्प इत्युपदेशस्यापि न नित्यनिवृत्तसर्पनिवृत्तिः फलम् । किं त्वाभरणत्वज्ञानजन्यसुखस्य वस्तुतः प्रागप्राप्तस्य प्राप्तिः सर्पभ्रमजन्यदुःखस्य वस्तुतः प्रागनिवृत्तस्य निवृत्तिर्वा । न ह्युपदेशेन मणिः प्राप्तः सर्पो निवृत्त इत्यनुभवः । किंतु प्राप्तिर्जाता भ्रमो निवृत्त इति। न च प्रकृते प्राप्तस्वरूपसुखादन्यत्प्राप्यं सुखं नित्यनिवृत्ताविद्याभ्रमदुःखादेरन्यन्निवर्त्यं वास्ति । येन सप्रयोजनता स्यात् । किं च पूर्ववादिना फलाभावादिना तात्पर्य आक्षिप्ते सिद्धांतसूत्रे फलादिकं तात्पर्यं चानुपपाद्य प्रामाण्ये तात्पर्यं हेतूकर्तुमयुक्तम् । लक्षणाया अमुख्यत्वेन सौत्रसंशब्दार्थत्वायोगश्च । तदुक्तमनुव्याख्याने

''कथं च लक्षणावादी ब्रूयाद् ब्रह्मसमन्वयम् ।
योसौ शब्दस्य मुख्यार्थस्तत्रैव स्यात्समन्वय'' इति ।

प्रकाशिका — यदपि प्राप्तप्राप्तिः कण्ठमण्यादिवत्फलमिति तदपि विषममित्याह ॥ किंचेति ॥ तदुपपादयति ॥ न हीत्यादिना ॥ अस्तु तर्हि प्रकृतेप्येवमित्यत आह ॥ न चेति ॥ सप्रयोजनता ब्रह्मात्मैक्यबोधकवेदान्तानामिति शेषः । सूत्रार्थमपि दूषयति ॥ किं चेति ॥ तदुक्तमिति ॥ लाक्षणिकत्वे संशब्दार्थयुक्तान्वयायोग इत्येतदीक्षत्यधिकरणानुव्याख्यान उक्तमित्यर्थः । अत एव तत्र निराकृतत्वादिह टीकादौ न तन्निरासे पराक्रान्तम् । शिष्यहिताय तदस्माभिरत्रैव प्रपञ्चितमिति भावः ।

पाण्डुरङ्गि — कण्ठमणिदृष्टान्तेन प्राप्तप्राप्तिः नित्यहीनसंसार- निवृत्तिश्च फलमित्युक्तम् । तदूषयति ॥ किंचेति ॥ ननु मणिप्राप्तिः सर्पनिवृत्तिरेव फलं किं न स्यादित्यत आह ॥ न हीति ॥ ननु दृष्टान्त इव प्रकृतेपि सुखप्राप्त्यादिकं फलं किं न स्यादित्यत आह ॥ न चेति ॥ किंच फलाभाव आक्षिप्ते सिद्धांतसूत्रे फलादिकमेवोप-पादनीयम् । न च तदुपपाद्यते । अतोऽधिकरणमेतदयुक्तमित्याह ॥ किंचेति ॥ लक्षणाया इति ॥ वचनवृत्तिविषयस्यैव मुख्यत्वादिति भावः ॥ अस्येति ॥ समन्वयाधिकरणस्येत्यर्थः ।

तात्पर्यचन्द्रिका

केचित्तु फलाभावापातात्सिद्धपरत्वं नेति प्राप्ते पुत्रस्ते जात इत्यादौ सिद्धपरत्वेपि फलदर्शनान्न दोष इति सिद्धांतयित्वा ''समन्वयश्च पुरुषार्थस्य ब्रह्मणोभिधेयत्वेन सम्बन्धः । तथाच तच्छास्त्रयोनित्वं समन्वया''दिति सूत्रार्थ इत्याहुः । तन्न । फलसद्भावेन सिद्धपरसर्ववाक्यविचारोपपादकस्यास्य सिद्धे व्युत्पत्तिप्रतिपादनेन तदुपपादकाद्यसूत्रानंतर्यस्यैव युक्तत्वात् । त्वन्मते हि जन्मादिशास्त्रयोनिसूत्रे कारणवाक्यस्यैव विचारोपपादके । किं च समन्वयाध्याये या तात्पर्यलिङ्गैर्ब्रह्म-परतोपपादयिष्यते सैवेह सूत्रे समन्वयशब्देन निर्देष्टव्या । यद्यपीह सूत्रे मन्मते शास्त्रयोनीत्यनुषंजनीयम् । त्वन्मते तु न । तथापि मन्मते तच्छब्देन प्रकृतब्रह्म-परामर्शात्तस्यानंदमयादिष्वनुषक्तस्याऽऽध्यायसमाप्तिविधेयसमर्पकतयाऽन्वयः । त्वन्मते तु शास्त्रयोनित्वपरामर्शादुत्तरसूत्रेषु ब्रह्मशब्दोध्याहार्यः स्यात् । यच्चोक्तं चतुस्सूत्र्याः शास्त्रारम्भसाधकत्वादुपोद्घातत्वं यथोक्तं ''व्युत्पत्त्यभावः प्रतिपत्तिदौस्थ्यमन्येन सिद्धत्वमथाफलत्वम् । एतानि वै सूत्रचतुष्टयेनानारम्भमूलानि निराचकारे''ति । तदपि न । जन्मादिसूत्रे लक्षणोक्त्या शास्त्रयोनिसूत्रादौ च प्रमाणाद्युक्त्या ब्रह्मणो विचार्यमाणत्वेनोपोद्घातत्वायोगात् । टीकाक्षरार्थस्तु । मुख्यस्येति । अप्राप्तस्येत्यर्थः । भगवद्वाक्ये इत्यहमित्यत्रत्यस्येति शब्दस्य हृदयमित्यनेनान्वय इत्याह । इत्यभिप्रायमिति ॥ छ ॥ समन्वयाधिकरणं सम्पूर्णम् ॥

प्रकाशिका — रामानुजमतं निराह ॥ केचित्त्विति ॥ फलदर्शनादिति ॥ पुत्रजन्मश्रवणजनितसुखस्य फलत्वादिति भावः ॥ शास्त्रयोनित्वमिति ॥ आद्यसूत्रात् षष्ठचंतं

ब्रह्मपदमनुवर्त्ययोज्यमिति भावः । एवं तर्ह्यस्याधिकरणद्वयव्यवधानं न स्यादित्याह ॥ तन्नेति ॥ तदुपपादकेति ॥ सर्ववाक्यविचारोपपादकेति हेतुगर्भं विशेषणम् । त्वन्मत इति ॥ एतच्च पूर्वाधिकरणद्वये स्पष्टम् । सूत्रार्थमपि निराचिकीर्षुः समन्वयशब्दार्थं दूषयति ॥ किंचेति ॥ सैवेति ॥ अत्र हेतुत्वेनोक्तस्यैव समन्वयाध्याय उपपादयिष्यमाणत्वादिति भावः । तच्छब्दस्य शास्त्रयोनित्वपरत्वमयुक्तमित्याह ॥ यद्यपीति ॥ विधेयेति ॥ आनन्दमयस्तद् ब्रह्म अंतस्तदित्यादिरूपेणेत्यर्थः ॥ अध्याहार्य इति ॥ तथाचानेकाध्याहारदोषःस्यादित्यर्थः । उपलक्षणमेतत् । समासनिर्दिष्टब्रह्मपदानुषङ्गश्चेति ध्येयम् । चतुस्सूत्र्या इति ''द्विगो''रिति ङीप् । आद्येधिकरणे सिद्धेर्थे व्युत्पत्त्यभावात् वेदान्तानां सिद्धे ब्रह्मणि न प्रामाण्यमिति न तद्विचारारम्भ इत्युक्तम् । द्वितीये जन्मादिकं विशेषणतया ब्रह्मप्रत्याययत्युतोपलक्षणतया । नोभयथापि । अतस्तत्प्रतिपत्तेर्दुस्थतया न कारणवाक्यविचारारम्भ इति । तृतीये जगत्कारणत्वस्याऽऽनुमानिकतया वेदान्तानां तदनुवादित्वेन न विचारारम्भ इति । अत्र तु सिद्धब्रह्मबोधकानां वेदान्तानामफलत्वान्न विचारारम्भ इत्युक्तमित्यर्थः । एतानि चोद्यानि । सूत्रकार इति शेषः ॥ ब्रह्मण इति ॥ स्वरूपसाधनफलजिज्ञासाया ब्रह्मविचारत्वात्साधन-फलविचाराध्यायद्वय इव स्वरूपविचारस्य लक्षणप्रमाणाभ्यां विनाऽयोगात्तद्विचारेण ब्रह्मणो विचार्यमाणत्वादित्यर्थः ॥ यदत्र कश्चिदुपक्रमादिना शिव एव वेदान्ततात्पर्यावधारणमत्र प्रतिज्ञायत इत्याह तत्तु पूर्वाधिकरणोदाहृतवचनैः प्रत्यधिकरणं भाष्योक्तश्रुत्यादिभिः विष्णुपरोपक्रमादितात्पर्यलिङ्गैः विष्णावेव तात्पर्यावधारणोपपादनेन ''मां विधत्तेऽभिधत्ते मा''मित्यादिस्मृत्या च विरुद्धत्वादपेशलं बोध्यम् । एकत्र बहुवारोक्तादपि मुख्यस्य प्राबल्यादित्यत्र मुख्यपदार्थमाह ॥ मुख्यस्येतीति ॥ ''एवंभूताया अस्याः श्रुतेरित्यभिप्रायमहमेव वेदे''त्यत्र व्यवहितान्वयप्रदर्शनेनाभिप्राय इति हृदयशब्दार्थ इति सूचयन्नाह ॥ भगवद्वाक्य इति ॥ अनेनाहंशब्दार्थो भगवानित्युक्तं भवति ॥ छ ॥ समन्वयाधिकरणं सम्पूर्णम् ॥ ४ ॥

पाण्डुरङ्गि — तदुपपादकेति ॥ सिद्धपरसर्ववाक्यविचारोपपादकेत्यर्थः । ननु जन्मादिशास्त्रयोनित्वसूत्रयोरपि वाक्यविचारोपपादकत्वान्मध्येऽनयोर्निवेश इत्यत आह ॥ त्वन्मत इति ॥ तथाचास्य सर्ववाक्यविचारोपपादकत्वादाद्यानन्तर्यं स्यादेवेति भावः । नन्वस्य सर्ववाक्यविचारात्मकत्वात्तयोश्च कतिपयवाक्यविचारोपपादकत्वात्सूचीकटाहन्या-येनास्य त्रितयानंतर्यमित्यत आह ॥ किंचेति ॥ अन्यथाध्यायशेषेण प्रपञ्चप्रपञ्चकभावो न

(पाण्डुरङ्गि)

स्यादिति भावः । सौत्रतच्छब्दस्य पक्षमात्रपरामर्शकत्वमित्यभिप्रेत्याह ॥ यद्यपीति ॥ परोक्तं च तुस्सूत्र्या उपोद्घातत्वं दूषयितुमनुवदति ॥ यच्चोक्तमिति ॥ व्युत्पत्त्यभाव इति ॥ कार्य एव शब्दानां व्युत्पत्तेः सिद्धे ब्रह्मणि व्युत्पत्त्यसम्भवं प्रथमेन न ब्रह्मलक्षयितुं शक्यत इति लक्षणाभावेन ब्रह्मप्रतिपत्त्यभावं द्वितीयेन अनुमानेन सिद्धत्वं तृतीयेन फलाभावं शास्त्रानारम्भणीयत्वप्रतिपादकं चतुर्थेन सूत्रेण निराचकारेत्यर्थः ॥ छ ॥ इति समन्वयाधिकरणं सम्पूर्णम् ॥ ४ ॥ छ ॥

ईक्षत्यधिकरणम्

ॐ ईक्षतेर्नाशब्दं ॐ । आद्यसूत्रे ब्रह्मशब्देन जीवादिव्यावर्तकगुणपूर्तिलक्षणत्वेन सूचयित्वा द्वितीये तस्य गुणपूर्तिवाचितासिद्धये जीवपरतानिरासाय कारणतां जिज्ञास्यब्रह्मलक्षणत्वेनोक्त्वा तृतीये पूर्तिकारणतयोरतिव्याप्तिपरिहाराय तत्र शास्त्रं प्रमाणीकृत्य चतुर्थे तयोर्विष्णवेकनिष्ठत्वाय शास्त्रस्यान्यपरतां निषिध्य सर्वशास्त्रस्थ-सर्वशब्दप्रवृत्तिनिमित्तसर्वगुणपूर्तिसिद्धये वचनवृत्त्या सर्वशास्त्रतात्पर्यविषयतायां चोक्तायां संशब्दार्थस्य वाच्यत्वस्य कात्स्न्यर्चस्य चेहाक्षिप्य समाधानादनन्तरसङ्गतिः । सङ्गत्यादिटीकापि समन्वयसूत्रसङ्गत्यादिपरत्वेन योज्या । अत एव गतिसामान्यादित्यस्य संशब्दार्थसमर्थनरूपतयैक्यादेतदधिकरणांतर्भावः । अन्यथा गतिसूत्रस्य ''अनन्ता वै वेदा'' इति श्रुतेर्वेदानामनन्तत्वेन शाखांतरेऽन्यथात्वे शङ्किते ''सर्वे वेदा युक्तय'' इति श्रुत्या प्रसिद्धशाखादृष्टांतेनान्यत्रापि तदनुमानात् शाखांतरस्यापि प्रमाणत्वाच्च नैतच्छाखाविरोध इत्येवंपरत्वात् सूत्रांतराणां तु वाच्यत्वसाधकत्वादधिकरणभेदः स्यात् । युक्ता च शाखांतरे सत्त्वादिगुणयुक्तेष्यात्मशब्दो मुख्यतयोच्यताम् । तज्ज्ञानान्मोक्षादिश्चोच्यताम् । अतश्च नात्मशब्दादिना निर्गुणस्येक्षणमिति शङ्कानिरासकस्य गतिसामान्यस्य ब्रह्मकारणतादिरूपेर्थान्तरेपि श्रुतीनां नान्योन्यं विरोध इति सूचकत्वेपि समन्वयहेतुवाच्यत्वसाधकेक्षत्यधिकरणान्तर्गतिः । अत एव भाष्यकृता गतिसूत्रं ''न च कासुचिच्छाखास्वन्यथोच्यत'' इति सामान्यपरतयैव व्याख्यातम् । सूत्रकृता च वाच्यत्वसाधकात् ''श्रुतत्वाच्चे''त्यस्मात्प्रागेव तन्निवेशितम् ।

प्रकाशिका — ॐ ईक्षतेर्नाशब्दं ॐ ॥ पूर्वाधिकरणे हि परमतेऽधिकरणानामसाङ्गत्यमुक्तम् । नैवं सिद्धान्ते । सर्वेषां बद्धक्रमत्वादिति भावेन तेषां सङ्गतिं स्मारयन्नेवास्यानन्तरसङ्गतिमाह ॥ आद्यसूत्र इति ॥ यद्वा नन्वेतदधिकरणं व्यर्थं वाच्यत्वसमर्थनस्यानुपयोगात् समन्वयस्य लक्षणयाप्युपपत्तेरित्यतः

''जन्माद्यस्येतिसूत्रेण गुणसर्वस्वसिद्धये ।
ब्रह्मणो लक्षणं प्रोक्तं शास्त्रमूलं यतस्ततः ।
अन्वयः सर्वशब्दानां गुणसर्वस्ववेदक''

इत्यानन्दमयनयानुव्याख्यां हृदि कृत्वा सङ्गतिमाह ॥ आद्येति ॥ क्त्वाप्रत्ययांतानामुक्तायामित्यनेनान्वयः । वचनवृत्त्या सर्वशास्त्रेति संशब्दस्य सुधारीत्यानुवादः । एतेन ''वचनवृत्त्या सकलशास्त्रप्रतिपाद्यं ब्रह्मेत्युक्तम् । तदाक्षिप्य समाधातुमिदमधिकरण'' मिति सुधा विवृता । पूर्वेणास्याक्षेपिकीसङ्गतिरित्युक्तं भवति । अर्थद्वयसमर्थनार्थत्वे कथमधिकरणैक्यमित्यत आह ॥ अत एवेति ॥ द्वयोः संशब्दार्थत्वादेवेत्यर्थः । उक्तं च सुधायां ''आक्षेपद्वयसमाधानस्य पूर्वसूत्रस्थसंशब्दार्थसमर्थनमेकमेव प्रयोजनमिति ॥ अन्यथेति ॥ अधिकरणभेदः स्यादित्यन्वयः । सुधायामिह नये गति- सूत्रव्यावर्त्यचोद्यमात्रस्यैवोत्त्या तत्परिहारानुक्तेस्तदनुवादपूर्वं तत्परिहारं विशदयन् सूत्राणामर्थभेदं व्यनक्ति ॥ गतिसूत्रस्येति ॥ एवंपरत्वादित्यन्वयः । उपक्रमादिभिरेव वेदार्थोनिर्णेय इत्युक्तत्वादधीतवेदेषु तैस्तन्निर्णयसम्भवेपि तेषामानंत्येन सर्वाध्ययनायोगेनान्यत्र शिवादिकमपि कारणत्वेन प्रतिपाद्यतामिति वा वक्ष्यमाणदिशा वाऽन्यथात्वे शङ्कित इत्यर्थः । टीकायां गतिसामान्यात्सर्वे वेदा इति श्रुतौ समान्यकथनादित्यर्थ उक्तः । सुधायां तु

''अन्योप्यल्पमतिः शाखाचतुष्पंच गतं वसु ।
जानन्ननुमितत्वेन ब्रूयात्तस्य प्रसादत'' इति

तार्तीयानुव्याख्यानानुरोधेन गतिसामान्यानुमानादित्यर्थ उक्तः ।

तत्र टीकार्थमाह ॥ सर्वे वेदा इति ॥ सुधोक्तमाह ॥ प्रसिद्धेति ॥ सूत्रकृन्निर्णीतप्रसिद्धशाखेत्यर्थः । शाखात्वेन हेतुना विप्रतिपन्नशाखांतरस्यापि विष्णुकारणत्वादिपरतानुमानादित्यर्थः । यद्वानुमानस्य दार्ढ्याय ''इति श्रुत्ये''त्युक्तम् । तथाच सुधोक्तार्थ-

(प्रकाशिका)

स्यैवायमनुवाद इति बोध्यम् । विप्रतिपन्नशाखांतरस्याप्रामाण्येनाप्युपपत्त्याऽप्रयोजकं शाखात्वमित्यत आह ॥ शाखांतरस्येति ॥ नैतदिति ॥ विप्रतिपन्नशाखाविरोधः प्रसिद्धशाखानामित्यर्थः । न केवलं संशब्दार्थस्यैकत्वाद्गतिसूत्रस्यात्रांतर्गतिः किं तु सत्वादिगुणहीनस्यैवेक्षणीयत्वेन वाच्यत्वमित्यर्थसाधकानामात्मशब्दतज्ज्ञानिमोक्षोपदेशहेयत्वावचनानामन्यथासिद्धिशङ्कानिरासार्थत्वादपीत्याह ॥ युक्ता चेति ॥ यद्वा नन्वेवं श्रुतीनां विरोधनिरासपरत्वे द्वितीये निवेशः स्यादित्यत आह ॥ युक्ता चेति ॥ इति शङ्कानिरासकस्येति ॥ तथाच वाच्यत्वसमर्थनस्यैव मुख्यफलत्वादन्यस्यानुषङ्गिकत्वाद्गौणश्चेदित्यादेर्वाच्यत्वहेत्वीक्षणीयत्वसाधकत्वेनात्रांतर्गतिरिव गतिसूत्रस्याप्यात्मशब्दादिहेतुसाधकत्वेन परंपरया वाच्यत्वसाधकत्वादत्रांतर्गतिर्युक्तेत्यर्थः । टीकादौ त्वानुषङ्गिकार्थस्य व्यवधानेन दुर्गमत्वात्तन्मात्रार्थस्यैव व्यक्तीकरणं न तु वाच्यत्वसमर्थनपरत्वरूपार्थस्येति भावः ॥ अत एवेति ॥ प्रधानानुषङ्गिकयोर्द्वयोरप्यर्थयोरनुमतत्वादेवेत्यर्थः । अत एव तत्वप्रदीपे ''न च सगुणं निर्गुणं च द्विविधं ब्रह्म वेदेषु प्रतिपाद्यत इत्याह न च कासुचिदिती''ति । वाच्यत्वसाधनपरतयैव भाष्यं व्याख्यातमिति भावः । भाष्यस्यापि तथा व्याख्याने किं बीजमित्यत आह ॥ सूत्रेति ॥ ''गतिसामान्यादिति सूत्रं न ब्रह्मणो वाच्यत्वसमर्थनार्थ''मिति सुधावाक्यं त्वितरसूत्रवत्तन्मात्रसमर्थनार्थत्वनिषेधपरमिति भावः ।

पाण्डुरङ्गि — ॐ ईक्षतेर्नाशब्दं ॐ ॥ संशब्दार्थस्य वाच्यत्वस्य कात्स्न्यर्स्य चेहाक्षिप्य समाधानादित्येतावतैव सामंजस्ये आदित आरभ्य सूत्रचतुष्टयार्थकथनमनर्थकमित्यतः संशब्दार्थकथनार्थत्वेन वाच्यत्वस्य कात्स्न्यर्स्य वर्णनमयुक्तम् । प्रकृतानुपयुक्तत्वात् । न च कथं प्रकृतानुपयुक्तमिति वाच्यम् । आदिसूत्रे ब्रह्मजिज्ञासाकर्तव्येत्युक्ते किं लक्षणकं ब्रह्मेत्याकाङ्क्षायां द्वितीयसूत्रेण जन्मादिकारणत्वं लक्षणमुक्तम् । तृतीये प्रमाणाकाङ्क्षायां कारणत्व एव शास्त्रं प्रमाणीकृतम् । चतुर्थे समन्वयः प्रतिज्ञातः । तथाच यथाकथंचित्प्रमाणवाक्यानां ब्रह्मपरत्वसिद्धिमात्रेण कारणत्वरूपलक्षणस्यातिव्याप्त्यभावेन वाच्यत्वकात्स्न्यर्योः कथनस्य व्यर्थत्वात् । न चानंतगुणपूर्णत्वोपपादनार्थं वाच्यत्वस्य कात्स्न्यर्स्य च संशब्दार्थत्वेन वर्णनमिति वाच्यम् । तस्यादिसूत्रे मुखतोनुक्तत्वेन तदुपपादनस्यायुक्तत्वादित्याशङ्कानिरासायातिविस्मरणशीलानां मन्दानां सूत्रचतुष्टयप्रमेयस्य बुद्ध्यारोहार्थं च पूर्वोक्तसूत्रचतुष्टयार्थानुवादपूर्वकं सङ्गतिमाह ॥ आद्यसूत्र इत्यादिना ॥ तथाच पूर्तेर्मुखतोनुक्तत्वेपि ब्रह्मशब्देन सूचितत्वात्तदुपपादनार्थं वाच्यत्वकात्स्न्यर्योः

संशब्दार्थत्वोपपादनाय पूर्वाधिकरणसङ्गत्युक्तिरिति भावः । नन्वनंतगुणपूर्णत्वस्य लक्षणत्वे द्वितीयसूत्रे जन्मादिकारणत्वरूपलक्षणकथनमनर्थकं स्यादित्यत आह ॥ द्वितीय इति ॥ तस्य ब्रह्मशब्दस्य । सिद्धेः प्रयोजनमाह ॥ जीवेति ॥ तथाच ब्रह्मशब्दार्थ-भूतगुणपूर्णत्वोपपादनार्थत्वान्न तत्कथनमनर्थकमिति भावः । तर्हि तृतीयसूत्र उभयत्रापि शास्त्रं प्रमाणीकर्तव्यं कारणत्वमात्र एव तस्य प्रमाणीकरणमयुक्तमित्यत आह ॥ तृतीय इति ॥ एवं च गुणपूर्तावपि शास्त्रस्य प्रमाणीकृतत्वान्न दोषः ॥ तयोरिति ॥ जगत्कारणत्वा-नंतगुणपूर्णत्वयोरित्यर्थः । विष्णवेकनिष्ठत्वं नाम विष्णिवतरानिष्ठत्वे सति विष्णुनिष्ठत्वम् । तत्र विष्णिवतरानिष्ठत्वसिद्ध्यर्थमाह ॥ शास्त्रस्येति ॥ विष्णुनिष्ठत्वसिद्ध्यर्थमाह ॥ सर्वशास्त्रस्थेत्यादि ॥ लक्षणया शास्त्रतात्पर्यविषयत्वे कथं गुणपूर्णत्वसिद्धिरित्यत उक्तं वचनवृत्त्येति ॥ वचनवृत्तिश्च महायोगविद्भद्रूढिरूपा विवक्षिता । न रूढिमात्रम् । एवं च गुणपूर्णत्वसिद्धिरिति भावः । चशब्दस्तु निषिध्येत्यनेन समुच्चयार्थः । ननु समन्वयसूत्राक्षेपेण सङ्गतिकथनमयुक्तम् । टीकायामधिकरणत्रयेण सङ्गतिकथनात् । समन्वयसूत्रेण गतिसूत्रस्य टीकायां सङ्गतेरनुक्तत्वाच्चेत्यत आह ॥ सङ्गत्यादीति ॥ आदिपदेन शास्त्रयोनित्वं विषय इति विषयसंशयटीकापि ग्राह्या । एवं च सङ्गतिटीका समन्वयसूत्रसङ्गतिपरत्वेन योज्या । संशयटीका समन्वयसूत्रार्थविषयकसंशयपरत्वेन योज्येत्यर्थः । तच्चाधुनैवोपपादितम् । न च तर्ह्यधिकरणत्रयार्थानुवादोऽयुक्त इति वाच्यम् । पूर्वाधिकरणोक्तार्थेन सङ्गतिकथनार्थं तथोक्तत्वादिति भावः । यद्वा ननु समन्वयसूत्रस्थसंशब्दार्थभूतवाच्यत्वस्य कात्स्न्यर्स्य चात्र समर्थनादवांतरसङ्गतिरित्ययुक्तम् । टीकायामत्र ''जगज्जन्मादिकारणत्वेन ब्रह्मैव शास्त्रस्य मुख्यार्थ इत्यभिहितम् । उपक्रमादिना निर्णीतस्य मुख्यार्थत्वात् । तच्च वाच्यत्व एव सम्भवती''त्यादिना वाच्यत्वमात्रसाधकत्वाभिधानादित्यत आह ॥ सङ्गत्यादिटीकापीति ॥ तथाच टीकायां वाच्यत्वोक्तिरुपलक्षणम् । कात्स्न्यर्मपि तत्र ग्राह्यमिति भावः ।

टीकायामुपक्रमादीत्यादिपदे श्रुत्यादिकं च ग्राह्यम् । विषं भुङ्क्ष्वेत्यादेरुपक्रमादि-निर्णीतस्यापि मुख्यवृत्त्यविषयत्वात् । गङ्गायां घोष इत्यादौ श्रुत्यादिप्रतीतस्यापि तात्पर्या-गोचरत्वात् । विशिष्टसंशब्दार्थभूतमुख्यत्वस्योपक्रमादिश्रुत्यादिसाध्यत्वादिति बोध्यम् । वस्तुतस्तु मुख्यवृत्त्या शास्त्रयोनित्वं विषय इति टीकायां शास्त्रयोन्यधिकरणसङ्गतत्वेन प्रतीयते । न तु कण्ठतः समन्वयसङ्गतत्वेन । अतः सङ्गत्यादिटीकापि समन्वयसूत्र सङ्गत्यादिपरत्वेन योज्येत्युक्तम् । नन्वीक्षतिगतिसूत्रयोरेकाधिकरणत्वमयुक्तम् । वाच्यत्व-

(पाण्डुरङ्गि)

सर्वशास्त्रप्रतिपाद्यत्वरूपभिन्नप्रमेयप्रतिपादकत्वात् । प्रमेयभेदे चाधिकरणभेदस्यावश्यकत्वा-दित्यत आह ॥ अत एवेति ॥ अत्र संशब्दार्थभूतवाच्यत्वकात्स्न्र्चयोः समर्थनादेवेत्यर्थः । अत एवेत्यस्य विवरणं संशब्दार्थेति । तथाच भिन्नप्रमेयप्रतिपादकत्वेपि संशब्दार्थ-समर्थनरूपोपाध्यैक्यादेकत्वमिति भावः ॥ अन्यथेति ॥ संशब्दार्थसमर्थनरूपत्वे सत्यप्यैक्या-नङ्गीकार इत्यर्थः । ननु प्रसिद्धशाखाविरोधेन शाखांतरस्याप्रामाण्यमेव किं न स्यादित्यत आह ॥ शाखान्तरस्यापीति ॥ नन्वीक्षतिगतिसूत्रयोर्वाच्यत्वसर्वशास्त्रप्रतिपाद्यत्वरूप-भिन्नार्थप्रतिपादकत्वेपि संशब्दार्थतसमर्थनरूपोपाध्यैक्यमात्रेणैकाधिकरणत्वे समन्वय-रूपैकार्थप्रतिपादकत्वेनाद्याध्यायस्थानां सर्वेषामधिकरणानामैक्यं स्यात् । न च वाच्यत्व-साधकहेतूपयुक्तप्रमेयप्रतिपादकत्वेनैकाधिकरणत्वमिति वाच्यम् । तस्य ब्रह्मकारणवाक्यानां परस्परविरोधप्रतिपादकत्वेन तदुपयोगिप्रमेयप्रतिपादकत्वाभावात् । किं चास्तु निवेशः । तथाप्यादावन्ते वा निवेशेन चरितार्थत्वान्मध्ये निवेशे बीजाभाव इत्यत आह ॥ युक्ता चेति ॥ गतिसामान्यसूत्रस्येक्षत्यधिकरणान्तर्गतिर्युक्तेत्यन्वयः । तथाचास्यां शाखायामात्मशब्दस्य निर्गुणपरत्वमस्तु । तज्ज्ञानान्मोक्षोप्यस्तु । एवं च नात्मशब्देन निर्गुणस्येक्षणमिति शङ्कानिरासकत्वेन वाच्यत्वहेतूपयोगिप्रमेयप्रतिपादकत्वेनैकाधिकरणत्वस्य मध्ये निवेशस्य च युक्तत्वमिति भावः ।

ननु तथापि गतिसामान्यादिति सूत्रस्यैतदधिकरणान्तर्भावो न युज्यते । एकार्थ-प्रतिपादकत्वाभावात् । न च संशब्दार्थकथनत्वेनास्यैतदधिकरणान्तर्भावः सम्भवतीति वाच्यम्। संशब्दस्यैकार्थत्वाभावेन क्वचिद्वाच्यत्वस्य क्वचिच्चकात्स्न्र्चस्य प्रतिपादनेनैकार्थ प्रतिपादकत्वाभावात् । यथाकथं चिदेकार्थत्वे च सर्वेषामधिकरणानामैक्यं स्यात् । सर्वत्र यथाकथंचिदेकार्थत्वस्य सम्भवादित्यस्वरसादाह ॥ युक्ताचेति ॥ ननु तथाप्येकशक्य-तावच्छेदका भावेन संशब्दस्य सादिशब्दवन्नानार्थत्वात्परस्परा संसृष्टयोर्वाच्यत्व कात्स्न्र्चयोः प्रतिपादनेऽर्थैकत्व निबन्धनैक वाक्यत्वाभावात्कथमेकाधिकरणत्वम् । समन्वय सूत्रस्थसं-शब्दाक्षेपसमाधानेनोभयोरपि समन्वय सूत्रेणैव सङ्गतिलाभादेकाधिकरणाक्षेप समाधान मात्रेणैकाधिकरणत्वे अन्तस्थाकाशाद्यधिकरणानामप्येकानंद मयाक्षेपसमाधानेनैकाधिकरण्य प्रसङ्गादित्यतो वाह ॥ युक्ताचेति ॥ वाच्यत्वसाधकहेतूपपादकत्वेनैकाधिकरणत्वेभाष्यविरोध इत्यत आह ॥ अत एवेति ॥ समन्वय हेतुवाच्यत्वसाधके क्षणीयत्वोपपादकात्म शब्दाद्युपपादकत्वादेवेत्यर्थः ॥ सामान्यपरतयैवेति ॥ सर्वशाखास्वात्मशब्दस्य निर्गुणत्वादि-प्रतिपादकत्वपरतया कारणत्वादिप्रतिपादकत्वश्रुतीनामविरोधपरतया चेत्यर्थः ।

तात्पर्यचन्द्रिका

अत्र ब्रह्मणि समन्वयो न युक्तो युक्तो वेति चिन्ता । तदर्थं शुद्धं ब्रह्मावाच्यं वाच्यं वेति । तदर्थमवाच्यत्वश्रुतिर्वाच्यत्वाभावाभिप्रायोताप्रसिद्धत्वाभावाभिप्रायेति । तदर्थं वाच्यत्वाभावाभिप्रायत्वे बाधकं नास्त्युतास्तीति । तदर्थं शुद्धं ब्रह्मानीक्षणीयमुतेक्षणीयमिति । तदर्थं ''तमेवैकं जानथ आत्मानं आत्मन्येवात्मानं पश्ये''दित्यादावीक्षणीयत्वेन श्रुतआत्मा सगुणो निर्गुणो वेति । तदर्थमात्मशब्दः किं गौणात्मनि मुख्यः किं वा निर्गुण एवेति । तदर्थं ''यस्यानुवित्त'' इत्यादि श्रुत्युक्तमात्मनिष्ठस्य मोक्षोपदेशादिकं गौणात्मनि युक्तमुत नेति । यदि मोक्षोपदेशादिकं गौणात्मनि युक्तं तदाऽऽत्मशब्दस्य गौणात्मनि मुख्यत्वे बाधकाभावात् ''तमेवैक''मित्यादावीक्षणीयत्वेनोक्तो गौण एवेत्यवाच्यत्व बाधकमीक्षणीयत्वं न निर्गुणस्येति न तस्य वाच्यत्वसिद्धिरिति पूर्वपक्षे फलम् । यदि तु न युक्तं तदाऽऽत्मशब्दस्य गौणात्मनि मुख्यत्वे बाधकसद्भावा ''त्तमेवैक''मित्यादावुक्तमवाच्यत्वबाधकमीक्षणीयत्वं निर्गुणस्यैवेति तस्य वाच्यत्वसिद्धिरिति सिद्धान्ते फलम् ॥

प्रकाशिका — ''तन्मुख्यतः शास्त्रयोनित्वं विषय'' इत्यादि विषयसंशयटीकां व्याचष्टे ॥ अत्रेति ॥ समन्वय इति ॥ वचनवृत्त्या शास्त्रतात्पर्यवत्त्वरूप इत्यर्थः । आद्यसूत्रस्थप्रतिज्ञांशसूचितचिन्ता आह ॥ न युक्त इत्यादिना ॥ शुद्धमिति ॥ सत्त्वादिगुणहीनमित्यर्थः ॥ श्रुतिरिति ॥ ''यतो वाचो निवर्तन्त'' इत्यादिरूपेत्यर्थः ॥ अप्रसिद्धत्वेति ॥ ''अप्रसिद्धेरवाच्यन्त''दित्याद्यनुसारात् । तथाच सावकाशेति भावः । हेत्वंशसूचितचिन्ते आह ॥ तदर्थं वाच्यत्वेति ॥ गौणश्चेदिति सूत्रसूचितचिन्तामाह ॥ तदर्थं तमेवेति ॥ अत्र विवृतिस्तस्य सर्वतो विलक्षणत्वप्रदर्शनार्थेति तत्वप्रदीपोक्तिः ।

''विवृतावपि सर्गः स्यात्संहितायां च यत्र हि । समानोत्तमहीनत्वमुच्यते वस्तुनोंजसे''त्यैतरेय भाष्योक्तेः ॥

सगुण इति ॥ सत्वादिगुणबद्धो जीव इत्यर्थः । यद्वा सुधातत्वप्रदीपयोरुक्तदिशा मायाशबलो वा । तन्निष्ठस्येत्यादिसूत्रसूचिते आह ॥ तदर्थमात्मेति ॥ गौणात्मनि जीवे मायाशबले वा ॥ यस्येति ॥ ''यस्यानुवित्तः प्रतिबुद्ध आत्मे''त्यत्र यस्य येन पुंसा

(प्रकाशिका)

प्रतिबुद्धः सर्वज्ञो भगवान् अनुवित्तो ज्ञातः तस्य लोकः स उ लोक एवेति विष्णुलोक एवोपासकस्येत्युच्यत इति भावः । तदर्थं शाखान्तरमन्यपरमुत तदपि ब्रह्मपरमित्यादि-चिन्तापि गतिसूत्रसूचितात्र प्रदर्शनीया । अत एव सुधायामपर आहेत्यादिना गतिसूत्र-व्यावर्त्यपूर्वपक्षोपि दर्शितः । तथापि गतिसूत्रपूर्वोत्तरपक्षयोः प्राक्तनग्रन्थे सङ्ग्रहेण स्पष्टमुक्त-त्वाद्वाच्यत्वोपयुक्तैव चिन्ता प्रदर्शितेति । फलफलिभावस्यास्फुटत्वात्स्वप्रतिज्ञानुरोधेन तमाह ॥ यदीति ॥ न युक्तमिति ॥ मोक्षोपदेशादिकं गौणात्मनीत्यनुषङ्गः । गुणबद्धात्म-ज्ञानाद्गुणनिवृत्तिरूपमोक्षायोगादिति भावः ।

पाण्डुरङ्गि — सङ्गत्यनुसारेण चिन्तामाह ॥ अत्रेति ॥ न च समन्वयो न युक्त इत्यादौ निषेधकोटेरादित्वेन सगुणो निर्गुणो वेत्यत्र विधिकोटेरादित्वेन कथनमिति वैषम्यं किं निबन्धनम् । निषेधकोटेर्विधिकोटिज्ञानाधीनत्वेन विधिकोटेरेव प्रथमं वक्तव्यत्वेन प्रथमतो निषेधकोटिकथनायोगाच्चेति वाच्यम् । कोटेः प्रथमं वक्तव्यत्वे पूर्वपक्षकोटित्वस्यैव तन्त्रत्वेन निषेधकोटिविधिकोटित्वस्यातन्त्रत्वात् । तथाच निषेधकोटिर्विधिकोटिर्वा पूर्वपक्षकोटिश्चेत्सा आदित्वेन वक्तव्येति वैषम्यमिति भावः ॥ समन्वय इति ॥ मुख्यतो वचनवृत्त्या सर्वशास्त्रस्य तत्परत्वमित्यर्थः । अवाच्यत्वासिद्धिपरिहाराय यतो वाच इत्यादि श्रुत्युदाहरणम् ।

तात्पर्यचन्द्रिका

पूर्वपक्षस्तु ॥ न ब्रह्मणि समन्वयो युक्तः । ''यतो वाचो निवर्तन्त'' इत्यादिश्रुतिभिस्तस्यावाच्यत्वात् । ननु ''पुरिशयं पुरुषमीक्षत'' इति ब्रह्मण ईक्षणीयत्वं श्रुतम् । तच्च न शब्देतरेण । ब्रह्मण औपनिषदत्वात् । शब्देनेक्षणं च वाच्यत्वं विना नयुक्तमिति चेन्न । तत्रेक्षणीयत्वेनोक्तोहि सगुण आत्मा । स च वाच्य एव । यश्चावाच्यः शुद्धो न तस्येक्षणीयत्वम् । ''यत्तदद्रेश्य''मित्यादि-श्रुतिभिस्तस्यादृश्यत्वात् । अस्तु वा शुद्धस्येक्षणीयत्वम् । तथापि न वाच्यत्वसिद्धिः । लक्षणया शब्दबोध्यत्वात् । नन्ववाच्यत्वे लक्षणापि न स्यात् । सर्वशब्दावाच्यस्य लक्षणायोगात् । तथाहि । किमस्य शब्दस्य लक्ष्यमिति प्रश्नेऽवाच्ये लक्षकं पदान्तरमेव प्रयोक्तव्यम् । तत्रापि किमस्य लक्ष्यमिति प्रश्नापर्यवसानाद-नवस्थेति चेन्न । वाचकपदप्रयोगेपि किमस्य वाच्यमिति प्रश्नापर्यवसानेनानव-स्थापातादिति ॥

प्रकाशिका — न ब्रह्मण इत्यादिटीकां व्याचष्टे ॥ न ब्रह्मणीति ॥ ननु श्रुतीनामीक्षणीयत्वरूपबाधकवशादप्रसिद्धत्वाभिप्रायेण सङ्कोचस्स्यादिति भावेनेक्षणीयत्वस्या-वाच्यत्वे बाधकत्वं व्यक्तीकुर्वन् शङ्कते ॥ नन्विति ॥ औपनिषदत्वात् उपनिषदेकगम्यत्वात् । शास्त्रयोनिनयोक्तन्यायेनेति भावः । शुद्धं वाच्यमीक्षणीयत्वाद्धर्मादिवदित्युक्तं भवति । गौणश्चेदिति सूत्रस्थशङ्कांशसूचितं परिहारमाह ॥ नेति ॥ आत्मशब्दादिश्च जीव एव मुख्यः। अद्यापि स भगवति मुख्य इत्यनुक्तेरिति भावः । ''औपनिषदत्वं तु लक्षणयापि सम्भवन्न वाच्यतामपेक्षत'' इति सुधोक्तं ''अवचनेनैव प्रोवाचे''ति भाष्योक्तश्रुत्याऽऽपातप्राप्तं परिहारान्तरमाह ॥ अस्तु वेति ॥ तथाच वाच्यत्व ईक्षणीयत्वमप्रयोजकमिति भावः । ''सर्वशब्दावाच्यस्य लक्षणाऽयुक्ते''रिति सिद्धान्तभाष्योक्तं बाधकमाशङ्क्य प्रतिबन्द्योत्तरमाह ॥ नन्विति ॥ टीकोक्तं लक्षणाऽयोगप्रकारमाह ॥ तथाहीति ॥ तथाच ''यश्चोभयोः समोदोष'' इति न्यायेन नाहं पर्यनुयोज्यः । तथाच प्रतिकूलतर्कहतिरिति भावः ।

पाण्डुरङ्गि — अवाच्यत्वरूपहेत्वसिद्धिमाशङ्कते ॥ नन्विति ॥ न च तर्हि श्रुतेः का गतिरिति वाच्यम् । तस्यार्थान्तरपरत्वोपपत्तेरिति भावः । ननु सर्वथा ब्रह्मणोऽदृश्यत्वे तद्विषयकज्ञानाभावान्मोक्षो न स्यात् । न च गौणात्मज्ञानादेव मोक्ष इति वाच्यम् । तस्यातत्वेन तद्विषयकज्ञानस्यातत्वज्ञानत्वेन मोक्षसाधनत्वाभावात् । सर्वथाप्यदृश्यत्वे यत्तदित्यादिनिर्देशयोगाच्चेत्यरुचेराह ॥ अस्तु वेति ॥ ननु सर्वथाऽवाच्यत्वमभिप्रेतमुत केनचिच्छब्देन । द्वितीयेनावाच्यत्वोपपत्तिः । आद्यमुत्थापयति ॥ नन्विति ॥ ननु लक्षणायां वाच्यत्वं कथमुपयोगीत्यत आह ॥ तथाहीति ॥ अनवस्थाभियालक्षणापरित्यागेन वाच्यत्वाङ्गीकरणमयुक्तम् । अनवस्थादोषस्य वाच्यत्वेपि तुल्यत्वादित्याशयेन समाधत्ते ॥ वाचकपदप्रयोगेपीति ॥ उपलक्षणमेतत् । किमत्र लक्ष्यमिति प्रश्नस्यासार्वत्रिकत्वेन प्रश्नाकरणे पदान्तरप्रयोगस्यानवश्यकत्वाच्चेत्यपि द्रष्टव्यम् ।

तात्पर्यचन्द्रिका

सिद्धान्तस्तु ॥ न तावच्छुद्धस्यात्मनो ज्ञेयत्वमेव नेति युक्तम् । सूत्र-आत्मशब्दतन्निष्ठमोक्षोपदेशादिभिर्ज्ञेयस्य शुद्धत्वोपपादनात् । त्वयापि शुद्धात्मज्ञानेनैव मोक्ष इति स्वीकृतत्वाच्च । नापि तस्य ज्ञेयत्वेपि लक्षणयैव तदिति युक्तम् । वाच्यसम्बद्धतया ज्ञातस्यैव लक्ष्यत्वात् औपनिषदस्य चा-शब्देनाज्ञानात्

(तात्पर्यचन्द्रिका)

स्वप्रकाशतया नित्यसिद्धौ च शास्त्रवैयर्थ्यात् अवाच्ये च शब्दस्य लक्षकस्यैव वक्तव्यत्वात्तत्रापि वाच्यसम्बन्धितया ज्ञानस्यापेक्षितत्वात्तदर्थं लक्षकान्तरप्रयोगेऽनवस्थानात् । टीकायामपीयमेवानवस्था विवक्षिता । न च वाचकशब्दस्यापि गृहीतसम्बन्धस्यैव बोधकत्वात् सम्बन्धज्ञानस्य च सम्बन्धिज्ञानाधीनत्वात् सम्बन्धिनश्च ब्रह्मण औपनिषदत्वाच्छब्दान्तरेणैव तद्बोध इत्यनवस्था स्यादिति शङ्क्यम् । यौगिकानां पदानां वाक्यतुल्यतया सङ्गतिग्रहणानपेक्षत्वात् । यथोक्तं ''श्रोत्रियंश्छन्दोधीते । वाक्यार्थे पदप्रयोग'' इति । न च शुद्धात्मनो वृत्तिव्याप्यत्वमेव नत्वीक्षणकर्मत्वमिति वाच्यम् । वृत्तिव्याप्यत्वेनैव वाच्यत्वसिद्धेः । किं चानिर्गुणावाच्यादिपदानां सगुणं न वाच्यमिति शुद्धस्यैव तद्वाच्यत्वसिद्धिः । विस्तृतं चैतदन्यत्र ।

प्रकाशिका — ईक्षणीयत्वस्य वाच्यत्वसाधकस्यावाच्यत्वे बाधकस्य सत्त्वादवाच्यत्वश्रुतेरप्रसिद्ध्यभिप्रायकत्वेन सङ्कोच इति सिद्धान्तयिष्यन् तस्य व्यधिकरणासिद्धिं परिहरन्पक्षनिष्ठतामाह ॥ सिद्धान्तस्त्वित्यादिना ॥ ज्ञेयत्वमिति ॥ एतेन सौत्रेक्षणं नापरोक्षपरमित्युक्तं भवति । सूत्रे ''गौणश्चेन्नात्मशब्दात्'' इत्यादिगुणसूत्रेषु । ''तमेवैकं जानथ आत्मानमन्यावाचो विमुञ्चथ । अमृतस्यैष सेतु''रित्येकत्रैव श्रूयमाणैरात्मशब्दतन्निष्ठमोक्षोपदेशहेयत्वावचनैरिति वा भाष्योक्तदिशा ''आत्मन्येवात्मानं पश्ये''दित्यत्रात्मशब्दः ''यस्यानुवित्त'' इत्यत्र तन्निष्ठमोक्षोपदेशः ''तमेवैक''मित्यत्र हेयत्वावचनमित्येवमात्मशब्दादिभिरिति वार्थः । अत्र यद्यप्यात्मशब्द एवेक्षणीयस्य शुद्धत्वसाधकः । मोक्षोपदेशादित्वात्मशब्दस्य गौणात्मपरत्वेनान्यथासिद्धिशङ्कानिरासार्थम् । टीकायां तथैवोक्तेर्वक्ष्यमाणत्वाच्चात्रापि । तथापि तत्वप्रदीपदिशा साक्षादपि मोक्षोपदेशादेरात्मशब्दवत्तत्र हेतुत्वं योजयितुं शक्यमिति वर्णकान्तरमभिप्रेत्य वा परम्परयापि तद्धेतुत्वमस्तीति वैवमुक्तम् । आत्मशब्दे विवादेपि मोक्षोपदेशस्य शुद्धत्वे हेतुत्वमविप्रतिपन्नमित्याह ॥ त्वयेति ॥ अवाच्यत्वं ब्रुवतेत्यर्थः । हेतोरसिद्धिं निरस्य यत्प्रागस्तुवेत्यादिनाऽप्रयोजकत्वमाशङ्कितं तदनूद्य विपक्षेऽनवस्थारूपतर्कपराहत्या हेतूच्छित्तिरेव बाधिकेति नाप्रयोजकत्वमिति भावेन ''किं तदित्यनवस्थितिः'' इत्यनुव्याख्यानसुधोक्तानवस्थाप्रकारमुपपादयति ॥ नापीति ॥ वाच्येति ॥ ''मुख्यार्थबाधे तद्योगे रूढितोथप्रयोजनात् । लक्षणे''ति काव्यप्रका-

शिकाद्युक्तेरिति भावः । ततःकिमिति चेत्तथा ज्ञानं किं मानान्तरेणोत स्वप्रकाशतयाऽथ लक्षकशब्दान्तरेण वेति विकल्प्याद्यं निराह ॥ औपनिषदस्य चेति ॥ द्वितीयं निराह ॥ स्वेति ॥ तृतीयेऽनवस्थामाह ॥ अवाच्ये चेति ॥ ''अवाच्यस्य लक्षणायां किं लक्ष्यमिति प्रश्नापर्यवसाना''दित्यादिटीकायामनवस्थाया अस्फुटत्वादाह ॥ टीकायामपीति ॥

''वाच्यत्वेपि सम्बन्धग्रहणाय पूर्वसिद्धेरपेक्षितत्वेनानवस्थितिरिति चेन्न । अभिमान्य-धिकरणे वक्तव्यत्वा''दिति सुधां विवृण्वानः प्रागुक्तप्रतिबन्दी निरसितुमनवस्थां व्यञ्जयन्ननुवदति ॥ न चेति ॥ ''शास्त्रोक्तवस्तुनश्चैव व्युत्पत्तिः शास्त्रलिङ्गत'' इत्यभिमा-निनयानुव्याख्यानसुधोक्तमाह ॥ यौगिकानामिति ॥ तत्र यथाहि छन्दोधीत इत्यनयोः पदयोर्गृहीतशक्तिकयोरर्थे संसृष्टरूपवाक्यार्थमर्यादयोपस्थिते श्रोत्रियपदं निपात्यत इति पञ्चमे द्वितीयपादे ''श्रोत्रियंश्छन्दोधीत'' इति सूत्रेण पाणिनिराह ॥ तथा ब्रह्मादिपदस्यापि यौगिकत्वेन क्लृप्तावयवशक्त्याऽपूर्वार्थबोधसम्भवेनान्यानपेक्षणादित्यर्थः । ''अधीत'' इत्यन्त सूत्रं ''वाक्यार्थ'' इत्यादिवृत्तिवाक्यम् । नन्वीक्षणविषयत्वेपि शुद्धस्य न तत्कर्मकारकत्वम् सर्वकारकशक्तिविधुरत्वात्तस्य । कर्मत्वं च वाच्यत्वव्याप्तमित्याशङ्क्याह ॥ नचेति । एवमियता ग्रन्थेन सूत्रे कण्ठोक्तामीक्षणीयत्वयुक्तिं विपक्षेऽनवस्थारूपबाधकतर्कोक्त्या तस्या प्रतिबन्दीरूपतर्काप्रतिहत्युक्त्या चाप्रयोजकत्वनिरासेनासिद्धिनिरासेन च समर्थ इदानीमवाच्यपदपर्यायसौत्राशब्दपदसूचितां ''पदं च निर्गुण इति कथं गौ वदिष्यती''त्यनुव्याख्यानोक्तां युक्तिमाह ॥ किञ्चेति ॥ न वाच्यमिति ॥ व्याहतेरिति भाव तथाचावाच्यादिपदानां वाच्यान्तराभावाच्छुद्धमेव वाच्यं स्यात् । सर्वथा वाच्यहीनस्य लक्षणया शुद्धबोधकत्वायोगात् । अन्यथा घटादिशब्दोपि स्वार्थलक्षकः स्यादिति भावः ननु निर्गुणादिशब्दानां गुणाभावादिविशिष्टं वाच्यम् । तच्च न शुद्धं ब्रह्म । तत गुणाभावाद्युपलक्षितत्वादिति चेत्तर्हि गुणाभावोपलक्षितशब्दवाच्यत्वमनिवार्यमिति भावेनाह विस्तृतमिति ॥ न्यायामृतेऽवाच्यत्वभङ्ग इत्यर्थः ।

पाण्डुरङ्गि — अत्र किं शुद्धस्यात्मनो ज्ञेयत्वमेव नेति पूर्वपक्षिणोऽभिप्रायो लक्षण ज्ञेयत्वमिति वा । आद्यं दूषयति ॥ न तावदिति ॥ सूत्रे ज्ञेयस्य शुद्धत्वोपपादनादित्यन्वय कैर्हेतुभिरित्यत उक्तमात्मशब्देति । किं च शुद्धस्य ज्ञेयत्वाभावे विशिष्टस्य तद्वक्तव्यं त मिथ्यात्वेन तज्ज्ञानस्य मोक्षहेतुत्वासम्भवेन शुद्धस्यैव ज्ञेयत्वं वक्तव्यमित्याह ॥ त्वयापीति

(पाण्डुरङ्गि)

द्वितीयं दूषयति ॥ नापीति ॥ वाच्यत्वाभावे लक्षणैव न स्यादिति भावः । ननु लक्ष्यत्वे वाच्यत्वं कथमुपयोगीत्यत आह ॥ वाच्यसम्बन्धितयेति ॥ लक्ष्यत्वे वाच्यसम्बन्धितया ज्ञानस्य तन्त्रत्वेन ब्रह्मणो लक्ष्यत्वाङ्गीकारे वाच्यसम्बन्धितया तज्ज्ञानं वक्तव्यम् । तद्धि शब्देतरेण वा शब्देन वा । नाद्य इत्याह ॥ औपनिषदस्य चेति ॥ ननु मास्तु शब्देतरेण शब्देन वा तस्य सिद्धिः । न च तर्ह्यसिद्धिरेव तस्य स्यादिति वाच्यम् । स्वप्रकाशत्वेन नित्यसिद्धत्वादित्यत आह ॥ स्वप्रकाशतयेति ॥

नन्वस्तु तर्हि शब्देन तज्ज्ञानमिति चेच्छब्देन तज्ज्ञानं हि वचनवृत्त्या भवेत् लक्षणया वा । आद्ये मदिष्टसिद्धिः । द्वितीयं प्रत्याह ॥ अवाच्ये चेति ॥ अस्त्ववाच्ये लक्षकशब्दप्रयोगः । ततः किमित्यत आह ॥ तत्रापीति ॥ लक्षकशब्दप्रयोगेपीत्यर्थः । नन्वेवं पूर्वमनुपस्थितस्य लक्षणया बोधासम्भवेन लक्षणया ब्रह्मोपस्थितिं वदता तत्कारणीभूतार्थप्रतीतेरावश्यकत्वेन तस्याश्च शब्देनैव वक्तव्यतया तेनापि शक्त्याऽसम्भवेन लक्षणयैव तत्प्रतीतेर्वक्तव्यतया तस्या अपि पूर्वमुपस्थित्यभावेऽसम्भवेनानवस्था स्यादिति प्रतीतिमूलकानवस्थाया उक्तौ टीकायां प्रश्नमूलकानवस्थाया उक्तत्वात्तद्विरोध इत्यत आह ॥ टीकायामपीति ॥ इयमेवेति ॥ प्रतीतिमूलैवेत्यर्थः । अन्यथा प्रश्नस्यासङ्गतत्वं स्यादिति भावः । ननु लक्ष्यत्वाङ्गीकार इव वाच्यत्वाङ्गीकारेप्यनवस्थादोषस्य तुल्यत्वान्न तदङ्गीकरणं युक्तमित्याशङ्कते ॥ न चेति ॥ स्वरूपेण ज्ञातमात्रशब्दादर्थबोधभावेनान्वयव्यतिरेकाभ्यां गृहीतसङ्गतिकस्यैवार्थबोधकत्वादिति भावः । अस्तु गृहीतसङ्गतिकस्यैव बोधकत्वं ततः किमित्यत आह ॥ सम्बन्धज्ञानस्य चेति ॥ अस्तु तर्हि शब्देतरेण सम्बन्धिज्ञानमित्यत आह ॥ सम्बन्धिनश्चेति ॥ यौगिकानामिति ॥ प्रकृतिप्रत्यययोरन्यत्र सङ्गतेर्गृहीतत्वेन चित्रगुशब्दादिवत्संसर्गविशेषविशिष्टरूपेणैव ब्रह्मविष्णुनारायणादिशब्दैरपूर्वार्थप्रतीति सम्भवादिति भावः । न च परेणापि ब्रह्मप्रतीतेः संसर्गमर्यादयाङ्गीकारेणानवस्थापरिहर्तुं शक्या । ब्रह्मणोखण्डत्वहानिभयेन संसर्गसृष्टान्यतरत्वानभ्युपगमादिति । नन्वेवमनवस्थापरिहारे औपनिषदेक्षणीयत्वान्यथानुपपत्त्या ब्रह्मणो वाच्यत्वसिद्धिर्न स्यात् । वाक्यस्य शक्त्यभावेपि वाक्यार्थबोधकत्ववद्यौगिकपदानामप्यर्थबोधकत्वोपपत्त्येक्षणीयत्वस्यार्थापत्तित्वासम्भवात् । अन्यथा योगिरोगिणोरपि पीनत्वेन रात्रिभोजनकल्पनापत्तेरिति चेन्न । पदानां सर्वथानन्विते केवले स्वार्थे शक्तौ शतमप्यंधानां न पश्यतीति न्यायेन संसर्गस्य पदसहस्रेणाप्यबोधापत्तेः संसर्गजिज्ञापयिषया वाक्यप्रयोगायोगेन प्रयोज्यप्रयोजकयोर्मौनमौढ्यापत्त्याऽन्विते स्वार्थे

(पाण्डुरङ्गि)

शक्तेरावश्यकत्वात् । तत्रापि विशेषतोन्यान्विते शक्तौ पदान्तरवैयर्थ्यापत्त्या सामान्यतो योग्येतरान्वितस्वार्थ एव शक्तेः सिद्धत्वात् वाक्यतुल्ये यौगिकादिशब्देपि पदस्थानीय-प्रकृतिप्रत्ययाद्यवयवशक्तिग्रहणसमयात्प्रागेवोपनिषद्वेद्यस्यापि ब्रह्मणो वाक्यतावच्छेदकावच्छिन्नतयान्यतो ज्ञानाभावात्सम्बन्धिज्ञानविशेषापेक्षसमुदायशक्तिज्ञानासम्भवेपि सामान्यलक्षण-प्रत्यासत्त्या वा सादृश्येन वाऽवयवार्थप्रतीत्यैव तदवच्छेदकसंसर्गरूपतया प्रतीतत्वात् प्रकृतिप्रत्ययसमभिव्याहारवशेन विशेषत एकैकावयवाप्रतीतस्यापि तत्प्रतीतिसम्भवेपि तस्या एव प्रतीतेर्विशेषज्ञाने सापेक्षसमुदायशक्तिग्रहणनिरपेक्षायाः सामान्यतोप्यवयवार्थसंसर्गरूपे ब्रह्मणि सिद्धेरविघातात् । रूढिसिद्धेस्तु श्रुत्यादिमानान्तरेणापि सम्भवात् । लाक्षणिकपदस्य तु यौगिकस्यापि शक्यसम्बन्धितया लक्ष्यतावच्छेदकत्वेन च लक्ष्योपस्थितिं विना लक्षणया तदुपस्थापकत्वस्य क्वाप्यदर्शनान्नपरमतेऽनवस्थापरिहारो-पायः । वाक्यार्थे पदप्रयोगः क्व दृष्ट इत्यत आह ॥ यथोक्तमिति ॥ छन्दोधीते इति वाक्यार्थे श्रोत्रियन्निति पदप्रयोग इत्यर्थः । ननु न ब्रह्मणो वाच्यत्वम् । ईक्षणकर्मत्वरूपेक्षणीयत्वानङ्गीकारात् । वृत्तिव्याप्यत्वस्यै-वाङ्गीकारादित्याशङ्क्य निषेधति ॥ न चेति ॥ वृत्तिव्याप्यत्वं हि वृत्तिविषयत्वम् । तत्रौपनिषदत्वाच्छब्देतरजन्यवृत्तिविषयत्वासम्भवेन शब्दजन्यवृत्तिविषयत्वमेव वक्तव्यम् । तद्धि न लक्षणया । अनवस्थानात् । किं तु वचनवृत्त्यैव । एवं च वाच्यत्वसिद्धिरप्रत्यूहेत्याह ॥ वृत्तिव्याप्यत्वेनैवेति ॥ ननु निर्गुणादिशब्दानां गुणाभावादिविशिष्टं वाच्यम् । तच्च न ब्रह्म । तस्य विशेषाभावाद्युपलक्षितत्वादित्यत आह ॥ विस्तृतं चैतदिति ॥ ''एवं तर्हि विशेषाभावोपलक्षितशब्दवाच्यत्वमनिवार्य''मित्यादिना न्यायामृतेऽवाच्यत्वभङ्गे विस्तृतमित्यर्थः ।

तात्पर्यचन्द्रिका

अवाच्यत्वाज्ञेयत्वादिश्रुतिस्त्वप्रसिद्धत्वाभिप्रायेति भाष्य एवोक्तम् । अन्यथा ''अशब्द''मित्यादिश्रुतावशब्दमित्यादिशब्दवाच्यतापि निषिध्यते चेद्गङ्गाशब्दावाच्यस्य गङ्गात्वाभाववदशब्दशब्दावाच्यस्याशब्दत्वाभावः स्यात् । न निषिध्यते चेदशब्द-मित्यादिशब्दवाच्यत्वं स्यात् । तस्मात् ''न चैतद्विद्मो वयं ब्राह्मणा'' इत्यादाविवेहाप्यज्ञानादिवचनं दुर्ज्ञानत्वाद्यभिप्रायम् । तदुक्तमनुव्याख्याने -

(तात्पर्यचन्द्रिका)

''अद्भुतत्वादवाच्यं तदतर्क्याज्ञेयमेव च ।
अनन्तगुणपूर्णत्वादित्यूदे पैङ्गिनां श्रुति''रिति ।

यद्यपि वाच्यत्वे ''सर्वे वेदा यत्पदमामनन्ति अथ कस्मादुच्यते ब्रह्मेति तत्सत्यमित्याचक्षते यमिन्द्रमाहुर्वरुणं यमाहुः इत्याचक्षत एतमेव सन्तं तस्मादुच्यते परं ब्रह्मे''त्यादिका श्रुतिः ''वचसां वाच्यमुत्तमम् । परमात्मेति चाप्युक्तो देहेस्मिन्पुरुषःपरः'' इत्यादिका स्मृतिश्चास्ति । तथाप्यवाच्यत्वेपि श्रुतेः सत्त्वाद्वाच्यत्वश्रुतिर्विशिष्टविषया न तु शुद्धविषयेति शङ्कोदयाच्च । न श्रुत्यादिमात्रेण वाच्यत्वनिश्चय इति सूत्रे प्रसिद्धश्रुत्यनुग्राहकन्याय एवोक्तः ।

प्रकाशिका — एवं स्वाभिमतं वाच्यत्वं समर्थ्य पराभिमतं प्रमाणं सावकाशमित्याह ॥ अवाच्यत्वेति ॥ यतो वाच इत्यादिश्रुतिरित्यर्थः । एतेनेक्षणीयत्वेन वाच्यत्वसाधनं श्रुतिबाधितमिति निरस्तम् । श्रुतेः साकल्येनागोचरत्वरूपाप्रसिद्धत्वाभिप्रायकत्वस्य ''अप्रसिद्धेरवाच्यं तदित्यादिस्मृत्यैवोक्तत्वादिति भावः । कुत एवं श्रुतेः सङ्कोच इति चेन्न । निरवकाशेक्षणीयत्वयुक्तेः स्मृत्यैव तथा व्याख्यानाच्चेति ब्रूमः । ''यत इत्यादिकैर्वदन् । अवाच्यत्वं कथं ब्रूयान्मूकोहमिति- वत्सुधी''रित्यनुव्याख्याने न सौत्राशब्दपदेन च सूचितं व्याघातरूपं बाधकमप्याह ॥ अन्यथेति ॥ वाच्यत्वसामान्यनिषेध इत्यर्थः । ''अशब्दमस्पर्शमरूपमव्यय''मित्यादिश्रुतावशब्दमित्यादिशब्दवाच्यतापि निषिध्यते न वेति विकल्प्याद्य आह ॥ अशब्दमिति ॥ अंत्य आह ॥ नेति ॥ ननु श्रुतेर्युक्तिबाधमात्रेण कथं सङ्कोच इत्यतः सावकाशत्वाद्बाधो युक्त इति भावेन दृटान्तोक्त्योपपादयन्नुपसंहरति ॥ तस्मादिति ॥ न चैतदिति ॥ अर्थवादाधिकरणे ''शास्त्रदृष्टविरोधा''दिति पूर्वपक्षगुणसूत्रे दृष्टविरोधस्योदाहरणं ''न चैतद्विद्मो ब्राह्मणाः स्मो वयमब्राह्मणा'' इति । तत्र न चैतद्विद्म इति ब्राह्मण्यस्याज्ञानं ब्राह्मणा वाऽब्राह्मणावेति सन्देहः अब्राह्मणा एवेति विपर्ययश्च प्रतीयते । तत्र यथा ब्राह्मण्याज्ञानादेः ''स्त्र्यपराधात्कर्तुश्च पुत्रदर्शन''मिति सिद्धान्तगुणसूत्रेण दुर्ज्ञानत्वाभिप्राय उच्यते । तथेहाप्राप्य मनसा सह वाचो निवर्तन्त इत्यादिश्रुतेर्दुर्ज्ञानत्वदुर्वचत्वाद्यभिप्रायत्वमित्यर्थः । ननु तत्र स्त्रीणां प्रायोपराधदर्शनात् ''ब्राह्मण्यां ब्राह्मणाज्जात'' इत्यादि स्मृतेर्ब्राह्मणपितृसम्बन्धस्य दुर्ज्ञानत्वेन ब्राह्मण्यस्य दुर्ज्ञानत्वेपीह कुतो दुर्ज्ञानत्वमित्यतः संवादव्याजेन हेतुमाह ॥ तदुक्तमिति ॥ अद्भुतत्वात्

आश्चर्यतमत्वादित्यर्थः । कथमाश्चर्यतमत्वम् । अनन्तगुणपूर्णत्वात् । ऊदे स्पष्टमुवाचेत्यर्थः । ''भासनोपसम्भाषाज्ञानयत्नविमत्युपमन्त्रणेषु वद'' इत्यात्मनेपदम् । इतःपरं सूत्रक्रमस्त्वित्यन्तमुत्तरोग्रन्थस्सूत्राक्षराणां स्वारस्योक्तिपरः । तत्राद्ये ''ईक्षतेर्नाशब्द''मितीक्षणीयत्वयुक्त्या वाच्यत्वं प्रसाध्य यत इत्यादिश्रुतेरप्रसिद्धत्वाभिप्रायत्वमुक्तम् । तत्र ''सर्वे वेदा''इति न्यायविवरणटीकायां ''ननूपपत्तिः कथं श्रुतिबाधनायाल''मित्याशङ्कच ''यद्यपि केवलानुमानं न श्रुतितो बलवत् तथापि श्रुतिसहितस्य केवलश्रुतितो बलवत्त्वाद्युक्तं तेन श्रुतिबाधन''मित्युक्तम् । अत्रापि टीकायामेवमेवाशङ्कच ''श्रुतिस्मृतीचाहे''त्युक्तम् । तथासति सूत्रे शब्दान्नाशब्दमित्युक्तिः स्यान्न त्वीक्षणोक्तिर्युक्तेत्याशङ्कच समाधत्ते ॥ यद्यपीति ॥ आमनन्तीति काठकश्रुतिः । मुख्यत्वमाडोर्थ इति भावः । आचक्षत इति ब्रह्मवल्लीस्थवाक्येप्येवं ध्येयम् । आहुरिति तैत्तिरीयश्रुतौ व्यक्तवागर्थकब्रूञ्धातोर्लटि ''ब्रुवः पञ्चानामादित आहो ब्रुव'' इत्याहादेशविधानेन वचनवृत्त्या वदन्तीत्येवार्थ इति भावः । इत्याचक्षत इत्यैतरेये यच्छतं वर्षाण्यभ्यार्चत्तस्माच्छतर्चिन इत्याचक्षत एतमेव सन्तं प्रवृत्तिनिमित्तवत्तया सन्तमित्यर्थः ॥ वचसामिति ॥

''कार्याणां कारणं पूर्वं वचसां वाच्यमुत्तमम् ।
योगानां परमां सिद्धिं परमन्ते पदं विदुः॥

इति चतुर्थपादीयानुव्याख्यानोक्ता । ''परमात्मेति चाप्युक्त'' इति गीता ॥ न्याय एवेति ॥ तथाच न्यायानुगृहीतया प्रबलया वाच्यत्वश्रुत्याऽवाच्यत्वश्रुतेर्बाध इति भावः । तथाचेक्षतेरित्यस्येक्षतिरूपन्यायानुगृहीतया श्रुत्या वाच्यत्वस्योक्तत्वादित्युक्तं भवति ।

पाण्डुरङ्गि — तर्ह्यवाच्यत्वादिश्रुतेः का गतिरित्यत आह ॥ अवाच्यत्वेति ॥ नन्वशब्दमित्यादिश्रुत्या सर्वशब्दावाच्यत्वस्य स्वरसतः प्रतीतेस्तत्त्यागेनाप्रसिद्धत्वाभिप्रायवर्णनमयुक्तमित्यत आह ॥ अन्यथेति ॥ अवाच्यत्वश्रुतेरप्रसिद्धत्वाभिप्रायत्वानङ्गीकार इत्यर्थः । अत्र सकलशब्दान्तर्गताशब्दशब्दवाच्यत्वं निषिध्यते न वा । आद्य आह ॥ अशब्दमित्यादीति ॥ द्वितीय आह ॥ न निषिध्यते चेदिति ॥ एवं चाशब्दशब्दवाच्यत्वनिषेधानिषेधाभ्यां वाच्यत्वमेवापद्यत इति व्याघात इति भावः । ननु श्रुत्यादिना पूर्वपक्षिते श्रुतिस्मृतिभिरेव सूत्रे वाच्यत्वसाधनमुचितं न न्यायमात्रेण । नच वाच्यत्वे श्रुत्यादिकमेव नास्तीति वाच्यम् । तथात्वे ह्यवाच्यत्वसाधकश्रुत्यपेक्षया न्यायमात्रस्यातिदुर्बलत्वेन तेन

(पाण्डुरङ्गि)

सिद्धान्तायोगादित्याशङ्क्य निराकरोति ॥ यद्यपीत्यादिना ॥ आमनन्तीत्यत्राऽऽ वाच्यत्व-सिद्धिरिति भावः ॥ तथापीति ॥ तथाच वाच्यत्वसाधकश्रुतेर्न्यायानुगृहीतत्वेन प्रबलत्वात्त-द्विरोधेनावाच्यत्वश्रुतेरर्थान्तरपरत्ववर्णनमेव युक्तमिति भावः । अत्र न्यायोपोद्बलितश्रुतेरेव वाच्यत्वसाधकत्वमित्यभिप्रायेण सूत्रे न्यायकथनम् । न तु न्यायमात्रस्य साधकत्व-मित्यभिप्राय इति द्रष्टव्यम् ।

तात्पर्यचन्द्रिका

अत एव वाच्यत्वस्य श्रुतत्वादित्यर्थस्येक्षतिसूत्र एव विवक्षितत्वात् ''श्रुत-त्वाच्चे''ति सूत्रं तत्परतया भाष्ये न व्याख्यातम् । न च ''तस्मादुच्यते परं ब्रह्मे''त्यादिश्रुतिर्लक्षणया ब्रह्ममात्रपरेति न तया वाच्यत्वसिद्धिरिति शङ्क्यम् । अन्योन्याश्रयात् । ''यतो वाच'' इत्यादेरपि लक्षणया स्वरूपमात्रपरत्वेन तयाप्य-वाच्यत्वासिद्ध्यापत्तेश्च । तस्मादनुभवादिविरुद्धं सर्वशब्दावाच्यत्वम् । तदुक्तं न्याय-विवरणे ''सर्वे वेदा यत्पदमामनन्तीत्यादिश्रुतिसहितानुभवस्य बलवत्त्वा''दिति ।

प्रकाशिका — वाच्यत्वश्रुतीनामन्यथासिद्धिमाशङ्क्य निराह ॥ न चेति ॥ अन्योन्येति ॥ अवाच्यत्वसिद्धौ लक्षणया वाच्यत्वश्रुतेश्चिन्मात्रपरत्वसिद्धिः तत्सिद्धौ चावाच्यत्वे बाधकाभावादवाच्यत्वसिद्धिरित्यन्योन्याश्रयादित्यर्थः ॥ अनुभवादीति ॥ ब्रह्मविषयेक्षणश्रुतिस्मृतिविरुद्धमित्यर्थः । आदिपदात्प्रागुक्तश्रुतयः ॥ अनुभवस्येति ॥ ब्रह्मविषयेक्षणस्येत्यर्थः । एतेन न्यायविवरणोक्तयुक्तिः सूत्रारूढेत्युक्तं भवति ।

पाण्डुरङ्गि — अत्र भाष्यकारीयं ज्ञापकमाह ॥ अत एवेति ॥ न्यायोपोद्ब-लितश्रुतेर्वाच्यत्वसाधकत्वादेवेत्यर्थः । ननु वाच्यत्वसाधकश्रुतेरेवाभावात्कथं वाच्यत्वसिद्धिः । न च ''तस्मादुच्यत'' इति श्रुतिरेव तत्र मानमिति वाच्यम् । तस्याः लक्षणया ब्रह्मस्वरूप-मात्रपरत्वेन तदसाधकत्वादित्याशङ्क्य निराकरोति ॥ न चेति ॥ अन्योन्याश्रयादिति ॥ तस्मादुच्यते परं ब्रह्मेत्यादिश्रुतेर्लक्षणया स्वरूपमात्रपरत्वे सिद्धे तया श्रुत्या वाच्यत्वा-भावासिद्धिः वाच्यत्वाभावे सिद्धेच लक्षणया स्वरूपमात्रपरत्वसिद्धिरित्यन्योन्याश्रयादित्यर्थः। किं च यतो वाच इत्यादिकं किं विशिष्टार्थकं किं वाऽखण्डार्थकम् । नाद्यः । सर्वेषां वेदान्तानामखण्डार्थत्वाभावापातात् । न द्वितीयः । स्वरूपमात्रपरत्वेनाविरोधित्वादित्याह ॥

यतोवाच इति ॥ ननु यतो वाच इत्यादिश्रुत्यन्तरेण वाच्यत्वसिद्धेः पश्चाल्लक्षणया ब्रह्मपरत्वं तस्या उच्यत इति नान्योन्याश्रय इत्यतो वाह ॥ यतोवाच इत्यादेरिति ॥ अनुभवादि-विरुद्धमिति ॥ अनुभवशब्देन महतां प्रत्यक्षमादिशब्देन श्रुत्यादिकं ग्राह्यम् । वचसां वाच्यमुत्तममिति तद्वचनादेवेति भावः । अनुमितिर्वाऽत्रानुभवशब्देन ग्राह्येति द्रष्टव्यम् । किंच तत्पक्षे गौण इति पुँल्लिङ्गं किं पूर्वसूत्रानुसारेणोत विषयवाक्यानुसारेण । तर्हि भवन्मतेप्यस्मिन्सूत्रे पुँल्लिङ्गानुपपत्तिः ।

तात्पर्यचन्द्रिका

अत्राद्यसूत्रेऽनुषक्तेन तदित्यनेन सामानाधिकरण्यायाशब्दमिति नपुंसकत्वेपि द्वितीयसूत्रे ''आत्मन्येवात्मानं पश्ये''दित्यादावात्मा न गौण आत्मशब्दादित्यात्म-शब्दसामानाधिकरण्याय गौणश्चेदिति पुँल्लिङ्गनिर्देशः । प्रत्युत परस्यैव ''ईक्षतेरिति न धातुनिर्देशः । किन्तु तदर्थस्य । तेन यः सर्वज्ञ इत्याद्युदाहर्तव्य''मिति वदतो गौणश्चेदिति पुँल्लिङ्गं क्लिष्टम् । ईक्षणस्य पुँल्लिङ्गानिर्देशात् । ''स ईक्षांचक्रे'' इति परोदाहृते स्त्रीलिङ्गनिर्देशाच्च ।

प्रकाशिका — ''गौणश्चेन्नात्मशब्दा''दिति द्वितीये ''अशब्द''मित्याद्यनुरोधाद्गौणं चेदिति स्यादित्यत आह ॥ अत्राद्येति ॥ अनुषक्तेन पूर्वस्मादनुवृत्तेन ॥ सामानाधि-करण्यायेति ॥ उपलक्षणमेतत् । ''अशब्दमस्पर्श''मिति श्रुत्यनुसरणाय चेत्यपि ग्राह्यम् ॥ न धात्विति ॥ येन स गौण इति सामानाधिकरण्यं स्यादिति भावः ॥ क्लिष्टमिति ॥ चेतनत्वसाधकमीक्षणं गौणमिति वक्तव्ये ईक्षणवाचकः ''तदैक्षत यःसर्वज्ञ'' इत्यादिशब्दो गौण इत्यर्थोक्तेः क्लिष्टत्वादित्यर्थः। ननु श्रुत्यनुसारात्पुँल्लिङ्गनिर्देश इत्यत आह ॥ स इति ॥

पाण्डुरङ्गि — पूर्वसूत्रे चाशब्दमिति नपुंसकलिङ्गानुपपत्तिरित्याशङ्कां परिहरन्नेव परपक्षे तदनुपपत्तिं दर्शयति ॥ अत्रेति ॥ तथा चास्मन्मते पूर्वसूत्रानुसारेण नपुंसकलिङ्गम् । आत्मन्येवेत्यादिविषयवाक्यानुसारेण गौण इति पुँल्लिङ्गोपपत्तिरिति भावः ॥ परस्यैवेति ॥ ''ईक्षतेरिति'' च धात्वर्थनिर्देशोऽभिप्रेतो यजतेरितिवन्न धातुनिर्देशः । तेन यः सर्वज्ञ इत्यादीन्युदाहर्तव्यानी''ति सङ्करभाष्यम् । साङ्करभाष्यव्याख्यानं लिख्यते । ''इकृशित-पौधातुनिर्देश'' इति स्मरणादीक्षतेरिति शितपा धातुस्वरूपकथनान्न तस्य चेतनोपादानत्व-

(पाण्डुरङ्ग)

साधनतेत्याशङ्क्याह ईक्षतेरितीति । विषयिणा विषयस्य लक्षणादित्यर्थः । प्रसिद्धा चेयं लक्षणेत्याह यजतेरिति । सप्तमे स्थितं इतिकर्तव्यतावाचिविधेर्यजतेः पूर्ववत्त्वमिति कर्तव्यतायाः सौर्यादिष्वविधानादनितिकर्तव्यताकत्वे प्राप्ते प्रत्युच्यते । यथा लोके शाकादिषु सिद्धेषु वदत्योदनं पचेति तथेह सिद्धवत्कृत्य सामान्येनेतिकर्तव्यताकरणं विहितम् । तस्याश्च विकृतिष्वविधेः सौर्यादीनां विकृतियागानां दर्शादिप्रकृतिविहितपूर्वेतिकर्तव्यताकत्वमिति । तत्र यथा यजतेरिति योगो गृहीतस्तथेहापीक्षतेरितीक्षणमित्यर्थः । ईक्षतेरिति धात्वर्थपरत्वे वाक्यान्तराण्यपि प्रधानपक्षप्रतिपक्षेपाय सूत्रितानि भवन्तीत्याह तेनेती''त्यादि ॥ तथाच परभाष्ये तद्व्याख्यातृभिश्चोक्तत्वान्नानुक्तोपालम्भ इति भावः । अनेनैवाभिप्रायेण टीकाकारैरीक्षतेरिति धातुनिर्देश इत्युक्तम् ॥ स ईक्षांचक्र इति परोदाहृत इति ॥ यद्यप्यत्र स ईक्षां चक्र इत्येतद्वाक्यवत् सदेव सोम्येदमग्र आसीदित्युपक्रम्य तदैक्षत बहुस्यां प्रजायेयेति तत्तेजोऽसृजतेति तथा आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किञ्चन मिषत् स ऐक्षतेत्येतदपि वाक्यत्रयं परैरुदाहृतमिति स ईक्षां चक्र इत्यस्यैवोदाहरणमयुक्तम् । तथापि तद्वाक्यद्वये ऐक्षतेति ईक्षणकर्तृत्वप्रतिपादनेनेक्षणस्य पुँल्लिङ्गेन वा स्त्रीलिङ्गेन वाऽप्रकृतत्वात्तद्वाक्यद्वयमनुदाहृत्य स ईक्षामित्येतदेव परोदाहृतत्वेनोक्तमिति ज्ञेयम् ।

तात्पर्यचन्द्रिका

यद्यप्यत्र ''स एतस्मा''दिति यत्र वाक्य ईक्षतिस्तत्रात्मशब्दो नास्ति । एवमात्मन्येवात्मानं पश्येदित्यत्रात्मशब्दस्य सद्भावेपि तन्निष्ठस्य मोक्षोपदेशादिकं नास्ति । ततश्च ''गौणश्चेन्नात्मशब्दा''दित्यादि व्यधिकरणमिव भाति । तथापीक्षतेरित्यनेन शब्दमात्रस्यासाधकतया ज्ञानकर्मत्वस्यैव विवक्षणीयत्वात् । तस्य च ''स एतस्मा''दिति वाक्य इवात्मन्येवेत्यादिवाक्येष्वपि सत्त्वेन तेषामपि भाष्यकृतेक्षतिसूत्र उदाहृतत्वात् । तेषां च वाक्यानामेकार्थत्वादात्मशब्दादिमत एकस्य वाक्यस्य निर्गुणपरत्वेऽन्यस्यापि तत्परताया अपरिहार्यत्वादेकस्य निर्गुणपरत्वमात्रेण तस्य वाच्यत्वसिद्धेश्च न वैयधिकरण्यम् । यद्यपि ''तमेवैकं जानथे''ति वाक्ये ईक्षणीयत्वात्मशब्दतन्निष्ठमोक्षोपदेशहेयत्वावचनानि सन्तीति तदेव वाक्यमाद्यसूत्र चतुष्टय उदाहर्तुं शक्यम् । स्वाप्ययश्रुतत्वयोस्तु तन्निष्ठमोक्षोपदेशहेयत्वावचनयोरिवात्मशब्दस्य गौणात्मपरत्वनिरासकत्वाभावात् स्वातन्त्र्येणैव च निर्गुणस्य वाच्यत्वे

(तात्पर्यचन्द्रिका)

हेतुत्वात्तमेवैकमिति वाक्ये तयोरभावेपि न दोषः । तथापि सौत्र- आत्मशब्दः ''स एतस्मा''दित्यादिवाक्यस्थपुरुषादिशब्दानां परात्परत्वादिलिङ्गानां चोपलक्षकः । तथा ईक्षणीयत्वं बहुश्रुतिसिद्धत्वान्नापलापार्हम् । तथा स एतस्मादिति वाक्ये सूत्रोपात्तेक्षतिधात्वनुगतिरप्यस्तीत्यादिदर्शयितुं भाष्ये स एतस्मादित्यादिवाक्यान्यप्युदाहृतानि ।

प्रकाशिका — भाष्ये सूत्राणां विषयतया भिन्नं भिन्नं वाक्यमुदाहृतम् । तत्र दोषमाशङ्कते ॥ यद्यपीति ॥ ''स एतस्माज्जीवघनात्परात्परं पुरिशयं पुरुषमीक्षत'' इत्याद्यसूत्र विषयवाक्य आत्मशब्दो नास्तीत्यर्थः ॥ एवमिति ॥ द्वितीयसूत्र विषय इत्यर्थः । यत्र मोक्षोपदेशो ''यस्यानुवित्त'' इत्यादौ न तत्र हेयत्वावचनमित्यादिरादिपदार्थः ॥ व्यधिकरणमिति ॥ पुरुषमीक्षत इतीक्षणीयत्वेनोक्तः पुरुषो गौण इति चेन्न । आत्मानं पश्येदित्यात्मशब्दादिति । स चात्मशब्दो गौणे किं न स्यादिति चेन्न । यस्यानुवित्त इत्यादावात्मनिष्ठस्य मोक्षोपदेशात् तमेवैकमित्यादौ हेयत्वावचनाच्चेति । तथाच स्पष्टं वैयधिकरण्यमित्यर्थः । ईक्षणीयत्वबोधकवाक्यानां सर्वेषामप्याद्यसूत्र उदाहरणत्वान्न वैयधिकरण्यमिति भावेन समाधत्ते ॥ तथापीति ॥ ननु कथं पश्येदित्यादिवाक्यानामाद्य एवोदाहरणत्वम् । तत्र विशिष्येक्षतेरेवोपादानेन पुरुषमीक्षत इत्यस्यैवोपादानादित्यत आह ॥ शब्दमात्रस्येति ॥ अर्थविवक्षाहीनस्येक्षतिशब्दस्येत्यर्थः ॥ ज्ञानकर्मत्वस्यैवेति ॥ सुधायां ''ईक्षतेरिति धातुनिर्देशः । न चाविवक्षितार्थं शब्दमात्रं ब्रह्मणो वाच्यत्वे हेतुर्भवितुमर्हतीति तदर्थोनेनोपलक्ष्यते । न च ब्रह्मासम्बन्धीक्षणमप्यत्र हेतुर्भवति । अतिप्रसङ्गात् । सम्बन्धश्च न कर्तृत्वादिरूपः । श्रुत्यननुगमात् । विपक्षे बाधकाभावप्रसङ्गाच्च । अत ईक्षणं ब्रह्मकर्मकमेव हेतुत्वेन वाच्यम् । न चैतदपि युक्तम् । व्यधिकरणत्वप्रसङ्गात् । तस्मादीक्षणकर्मत्वमेव हेतुतया विवक्षित''मित्युक्तेरिति भावः । तस्य ईक्षतिकर्मत्वस्येत्यर्थः ।

नन्वेकस्यात्मशब्दादिना सत्त्वादिगुणहीनब्रह्मपरत्वे आत्मादिपदहीनस्यापि कुतस्तत्त्वमित्यत उक्तमेकार्थत्वादिति । नन्वेवं सर्ववाक्यसाधारण्येन सर्वत्रोक्तेक्षतिकर्मणो गौणात्मत्वनिरासाय साधारणहेतुरेवोपन्यसितव्यो न तु क्वाचित्कात्मशब्दमोक्षोपदेशादिरित्यत आह ॥ एकस्येति ॥ नन्वीक्षणात्मशब्दाद्युपेतमेकमेव वाक्यं सर्वत्र कुतो नोदाहृतम् । एवं सति न वैयधिकरण्यगन्धोपीत्याशङ्क्यानेकगुणलाभान्नानावाक्योक्तिरित्याह ॥ यद्यपीति ॥ ननु गतिसूत्रस्य भिन्नार्थत्वेन तदर्थस्याभावेनादोषेपि स्वाप्ययश्रुतत्वसूत्रोक्तयोर्हेत्वोरनिर्देशान्न

(प्रकाशिका)

सर्वसूत्रेष्वेकमुदाहरणं लभ्यते । तत्र ''पूर्णमदः पूर्णमिदम् । एको देव'' इति वाक्ययोरेवोक्तेः कथमेवमाशङ्क्येत्यत आह ॥ स्वाप्ययेति ॥ न दोष इति ॥ वैयधिकरण्यदोषो नेत्यर्थः ॥ सौत्रेति ॥ ''गौणश्चेन्नात्मशब्दा''दित्यत्रात्मशब्दः ''आत्मानं पश्ये''दित्यत्रत्यात्मशब्दमात्रपरो न । किन्तु ''परात्परं पुरिशयं पुरुषमीक्षते यस्यानुवित्तः प्रतिबुद्ध आत्मे''त्यादिवाक्यस्थश्रुतिलिङ्गपरोपीत्यर्थः । अत एव सुधायां ''आत्मब्रह्मादयः शब्दः साक्षात्पूर्णाभिधायिनः'' इत्यनुव्याख्यानानुरोधेन ''आत्मशब्दादित्युपलक्षणम् । ईक्षणीये वस्तुन्यात्मब्रह्मपुरुषादिशब्दश्रवणात् । तेषां च पूर्णाभिधायित्वेन निर्गुणज्ञापकत्वात्'' इत्यनेकवाक्यसाधारण्येन व्याख्यातमिति भावः । यद्यप्यत्र लिङ्गोपलक्षणोक्तिर्नास्ति तथापि ''परात्परमित्यादिवाक्येषु निर्गुणज्ञापकोक्त्या हेतुसिद्धिः समर्थिते''त्युत्तरत्र सुधायामनुवादात्परात्परत्वादिलिङ्गानामित्युक्तम् । अन्यथा पुरुषमीक्षत इत्येवानूद्येतेति भावः ॥ तथेति ॥ एतच्चानेकवाक्योक्तावेव सिद्धमिति भावः ॥ तथेति ॥ तमेवेति वाक्यस्यैवोक्तौ न सूत्रानुगुण्यमित्यर्थः ।

पाण्डुरङ्गि — नन्वीक्षतिसूत्रे हरेर्वाच्यत्वसाधनायेक्षणीयत्वं हेतुत्वेनोक्तम् । तदसिद्धमित्याशङ्कायां भाष्यकृता स एतस्मादितीक्षणीयत्वप्रतिपादकं वाक्यमुदाहृतम् । तत्रेक्षणीयो गौणः किं न स्यादित्याशङ्कायां तन्निरासार्थमात्मशब्दो हेतूकृतः । स न युक्तः। ईक्षणप्रतिपादकवाक्य आत्मशब्दाभावात् । एवमात्मशब्दो गौणपरः किं न स्यादित्याशङ्कानिरासार्थं तन्निष्ठस्य मोक्षोपदेशादिकं हेतूकृतम् । तदप्ययुक्तम् । आत्मशब्दयुक्तवाक्ये तन्निष्ठस्य मोक्षोपदेशादेरभावात् । तथाच वैयधिकरण्यम् । किञ्च ''इकृश्तिपौ धातुनिर्देश'' एव श्तिपोविधानादीक्षतिशब्दस्यैव वाच्यत्वसाधकत्वात्तद्रहितवाक्येन कथं वाच्यत्वसाधनमित्याशङ्क्य निराकरोति ॥ यद्यपीत्यादिना ॥ अस्त्वीक्षतेरित्यत्र ज्ञानकर्मत्वविवक्षणम् । तथापि वैयधिकरण्यं कथं परिहृतमित्यत आह ॥ तस्येति ॥ ननु तर्ह्यात्मशब्दयुक्तवाक्योदाहरणमेव कर्तव्यम् । तत्र ज्ञानकर्मत्वरूपेक्षणीयत्वस्यात्मशब्दस्य च सत्त्वात् । एवं चात्मशब्दरहितवाक्योदाहरणमयुक्तमित्यत आह ॥ तेषाञ्चेति ॥ एकार्थत्वाद्वाक्योदाहरणं युक्तमिति भावः ॥ ननु सूत्र चतुष्टयोक्तहेतूनां तमेवैकं जानथेति वाक्ये सत्त्वात्तदेवोदाहर्तव्यं नान्यवाक्यानीत्याशङ्क्य निराकरोति ॥ यद्यपीति ॥ ननु सूत्रचतुष्टयोक्तहेतूनां तमेवैकमित्यत्र श्रवणेपि ''स्वाप्ययात् श्रुतत्वाच्चे''ति सूत्रद्वयोक्तस्वाप्ययश्रुतत्वयोरश्रवणेन न्यूनत्वरूपदोषसाम्यान्न तदुदाहृतमित्यत आह ॥ स्वाप्ययेति ॥

अन्यवाक्योदाहरणप्रयोजनमाह ॥ सौत्रात्मशब्द इत्यादिना ॥ आत्मशब्दस्येव पुरुषादिशब्दानां लिङ्गानां च निर्गुणपरत्वादिति भावः ।

तात्पर्यचन्द्रिका

न च परेषामिवास्माकमिदमधिकरणं वाक्यविशेषसमन्वयार्थम् । किन्तु वाच्यत्वसाधनार्थम् । न चैकप्रकरणस्थैरेव वाच्यत्वं साध्यमित्यत्र नियामकमस्ति । परैरपि प्रकृत्यधिकरणे नानाप्रकरणस्थैः प्रतिज्ञादृष्टान्तानुपरोधसाक्षादुभयाम्नानात्मकृत्यादिभिरुपादानत्वसाधनात् । इहापि परोदाहृते सदेवेत्यादिवाक्य ईक्षतिधात्वात्मशब्दतन्निष्ठमोक्षोपदेशहेयत्वावचनस्वाप्ययानां भावेपि गतिसामान्यश्रुतत्वयोरभावाच्च । यः सर्वज्ञ इत्यादौ परोदाहृते स्वाप्ययादेरप्यभावाच्च । यद्यपि तन्निष्ठस्येत्यादिसूत्र द्वयमपि गौणश्चेदितिवदीक्षणीयस्य सगुणात्मत्वं नेत्यत्रापि हेतुः सम्भवति । तथाप्यात्मशब्दो गौणात्मपरोस्त्विति शङ्कानिरासकस्यान्यस्याभावात्तन्निष्ठस्येत्यत्र चशब्दाभावाच्चात्मशब्दस्यान्यपरत्वशङ्कानिरासकतयापि भाष्यटीकयोर्व्याख्यातम् ।

प्रकाशिका — ननु परमते ''सदेव सोम्ये''त्येकमेव वाक्यं सर्वसौत्रहेतुयुक्तं विषय इति स्वारस्यमित्यत आह ॥ न चेति ॥ परैरिति ॥ ''प्रकृतिश्च प्रतिज्ञे''त्यधिकरणे निमित्तकारणस्य ब्रह्मण उपादानत्वमप्युच्यत इत्युपेत्य तत्साधनायाद्यसूत्रे ''येनाश्रुतं श्रुतं भवती''त्येकविज्ञानेन सर्वविज्ञानप्रतिज्ञायाः ''यथा सोम्यैकेन मृत्पिण्डेने''त्यादिदृष्टान्तस्य चानुरोधादित्युदाहृतत्वात् । साक्षादित्यत्र ''सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्त आकाशं प्रत्यस्तं यन्ती''ति जगदुत्पत्तिलययोः श्रुतत्वादिति आत्मकृतेरित्यत्र ''तदात्मानमेव स्वयमकुरुते''त्यात्मन एव सृष्टौ कर्मत्वकर्तृत्वोक्तेरिति परिणामादित्यत्र ''सच्चत्यच्चाभव''दिति परिणामोक्तेरिति योनिश्च हीत्यत्र ''यद्भूतयोनि''मिति चोदाहृतत्वादिति भावः ॥ ईक्षतिधात्वित्यादि ॥ एतच्चान्यपक्षविवरणे स्पष्टयिष्यते ॥ यःसर्वज्ञ इति ॥ ईक्षणरूपहेतुनिर्वाहायोदाहृत इत्यर्थः । ''तन्निष्ठस्य मोक्षोपदेशात् हेयत्वावचनाच्चे''ति सूत्रद्वयं तत्वप्रदीपे ''तस्मिन्नीक्षणीयत्वेनोक्त- आत्मनिनिष्ठस्य मोक्षोपदेशाच्च स निर्गुण'' इत्याद्युक्त्या तथा ''अहेयत्ववचनाच्च नायं गौण'' इत्याद्युक्त्या

(प्रकाशिका)

तथा ''नन्वीक्षणीयत्वेन वाच्यत्वं मायाशबलस्य ब्रह्मणो न शुद्धस्येत्याशङ्कापरिहारत्वेन तावद्गौणश्चेदिति तन्निष्ठस्येति च सूत्रद्वयं विवृणोती''त्यादिसंन्यायरत्नावल्युक्त्याच ईक्षणीयस्य सगुणात्मत्वनिरासपरतया व्याख्यातं भाति । टीकायां त्वात्मशब्दादि-त्युक्तहेतुसाधनपरतया । तत्र टीकायामेवं योजने बीजमाह ॥ यद्यपीति ॥ निरासकतयापीति ॥ यद्यपि भाष्यटीकयोः प्रागुक्तार्थान्तरपरत्वेन व्याख्यानं न प्रतीयते तथापि सामान्यतः प्रवृत्तस्य भाष्यस्य प्रागुक्तार्थपरत्वेनापि तत्वप्रदीपदिशा योजयितुं शक्यत्वात् टीकायां तस्याप्यभिप्रेतत्वादिति भावेनान्यपरत्वशङ्कानिरासकतयापीत्यपिपदम् ।

पाण्डुरङ्गि — ननु तथाप्यस्मिन्नधिकरणे परैरेकप्रकरणस्थहेतुभिः प्रमेयसाध-नाद्भवद्भिर्भिन्नप्रकरणस्थवाक्यैर्वाच्यत्वसाधनं नोचितमित्यत आह ॥ इहापीति ॥ किंच विषयवाक्यत्वेनोदाहृते वाक्यान्तरे सौत्रस्वाप्ययादिहेत्वनुगमो नास्तीत्याह ॥ यः सर्वज्ञ इत्यादाविति ॥ ननु ''तन्निष्ठस्य मोक्षोपदेशात् हेयत्वावचनाच्चे''ति सूत्रद्वयोक्तहेतुद्वय-स्यात्मशब्दस्य गौणपरत्वनिरासकत्ववत् ईक्षणीयत्वस्य सगुणात्मत्वनिनरासापरत्वस्यापि सम्भवेन भाष्यटीकयोरात्मशब्दस्यैव गौणात्मनिरासपरत्वेन व्याख्यानमयुक्तमित्याशङ्क्य निराकरोति ॥ यद्यपीति ॥ तर्हि तत्परत्वेन कुतो न व्याख्यायत इत्यत आह ॥ आत्मशब्द इति ॥

तात्पर्यचन्द्रिका

सूत्रक्रमस्तु । आद्यसूत्रे साक्षाद्वाच्यत्वहेतोरीक्षणीयत्वस्योक्तिः । द्वितीये तस्य व्यधिकरणासिद्ध्युद्धारः । तृतीयचतुर्थयोस्तु तदुद्धारकस्यान्यथासिद्धि शङ्कानिरासः । तत्रापि सगुणात्मनिष्ठस्यापि परंपरया मोक्षो युक्त इति शङ्काया अपि तमेवैकमिति सावधारणाहेयत्ववचनं न स्यादिति वदता हेयत्वेत्यनेन निरासादभावरूपत्वाच्च हेयत्वावचनस्य तन्निष्ठेत्येतदानन्तर्यम् । स्वाप्ययस्य तु ''श्रुत्युक्तत्वाच्च निर्गुणो वाच्य इति बहिरेवोक्ते कुतोयं निर्गुण इति शङ्कापरिहारात्मकत्वात्तत्र च शब्दाभाव'' इति टीकोक्तरीत्या वाच्यत्वे परंपरया हेतुत्वात् तथा ''आत्मानं विलाप-यती''त्यात्मनो नाशित्वेन हेयत्ववचनात्तदवचनमसिद्धमिति शङ्काया अपि नात्र नाश उच्यते किंत्वेकीभाव इति वदता स्वाप्ययादित्यनेन निरासात्पश्चमता । तत्र च

(तात्पर्यचन्द्रिका)

शब्दाभावे टीकायामेव हेतुरुक्तः । षष्ठेतु गौणात्मन्यपि स्वाप्ययादिः शाखान्तर उच्यतामिति शङ्कानिरासः । श्रुतत्वाच्चेत्यत्र तु गतिसामान्यस्य श्रुतत्वादित्यस्यापि विवक्षितत्वात्तस्यांत्यतेति ॥

प्रकाशिका — द्वितीय इति ॥ गौणश्चेदिति सूत्रे हेतूक्त्यनन्तरमाभासोद्धारस्यावसरादिति भावः । ईक्षणीयत्वस्य सगुणनिष्ठतया विप्रतिपन्नो शुद्धे याऽसिद्धिस्तदुद्धार इत्यर्थः । ''निर्गुणज्ञापकोक्त्या हेतुसिद्धिः समर्थिते''ति सुधोक्तेरिति भावः ॥ तृतीयेति ॥ ''तन्निष्ठस्य मोक्षोपदेशात् हेयत्वावचनाच्चे''त्यनयोरित्यर्थः । तदुद्धारकस्य असिद्ध्युद्धारकस्यात्मशब्दादेः ॥ अन्यथेति ॥ सगुण एव मुख्यत्वशङ्कानिरास इत्यर्थः । ''ज्ञापकस्यान्यथासिद्धिरुत्तरसूत्रे परिहियत'' इत्यादिसुधोक्तेः । टीकायां तथावतारितत्वाच्चेति भावः । तत्रापि द्वयोर्मध्येपि । परम्परया निर्गुणज्ञानद्वारा ॥ शङ्काया अपीति ॥ न केवलं टीकाद्युक्तरीत्याऽऽत्मशब्दादेरन्यथासिद्धिशङ्कायाः अपि तु तन्निष्ठमोक्षोपदेशस्यान्यथासिद्धिशङ्काया अपीत्यपेरर्थः । एवमपि योजयितुं शक्यत्वादिति भावः । टीकोक्तमुपलक्षणमिति हृदयम् । टीकायामेतच्छङ्कानुक्तिस्तु चशब्दस्वारस्यानुरोधेन । अन्यथा मुक्तोपसृप्यव्यपदेशादित्यादाविव चशब्दो न स्यादिति ध्येयम् । अहेयत्वेति हेयत्वावचनादिति नञ्व्यत्यासेनार्थोक्तिः । टीकोक्तार्थेपि क्रमो युक्त इति भावेनाह ॥ अभावेति ॥ स्वाप्ययादित्यस्य हेयत्वेति सूत्रानन्तर्ये टीकोक्तरीत्यैकं हेतुं वदन् तन्निष्ठसूत्रटीकया तुल्यन्यायतया सूचितं स्वयं वर्णकान्तरमप्यभिप्रेत्य हेत्वंतरं चाह ॥ स्वाप्ययस्य त्विति ॥ श्रुतीति ॥ ''पूर्णमदः पूर्णमिद''मित्यादिश्रुत्युक्तत्वाच्चेत्यर्थः । तत्र स्वाप्ययसूत्रे ॥ आत्मानमिति ॥ ''स आत्मन आत्मानमुद्धृत्यात्मन्येव विलापयती''त्यादिश्रुताविवत्यर्थः ॥ इतिशङ्काया अपीति ॥ न केवलं टीकारीत्या गौणात्मपरत्वशङ्काया इत्यपेरर्थः । तत्र सूत्रे । अर्थद्वयेपीति वार्थः । शङ्कापरिहारात्मकत्वादित्युक्तहेतोर्वर्णकद्वयेपि तुल्यत्वादिति भावः ॥ षष्ठ इति ॥ गतिसूत्रे वर्णकान्तरमभिप्रेत्यैवमुक्तम् ॥ श्रुतत्वादिति ॥ ''सर्वे वेदा युक्तय'' इत्यादौ श्रुतत्वादिति वर्णकान्तरमभिप्रेत्यैतत् । न केवलं टीकोक्तरीत्या वाच्यत्वहेतुत्वस्येत्यपेरर्थः । टीकादावेवमेवानुक्तिस्तु चशब्दस्वारस्यानुरोधेनेति ज्ञेयम् । सूत्राणामर्थस्तु टीकादौ स्पष्ट इति भावः । यदत्र कश्चिदाह ॥ इयता सूत्रसन्दर्भेणात्र नये ब्रह्मणो वाच्यत्वोक्तिस्त्वन्मते न युक्ता । त्वया हि ''तथान्यत्प्रतिषेधा''दित्यत्र ''तदेव ब्रह्म त्वं

(प्रकाशिका)

विद्धी''त्यादिश्रुत्योपासनाकालेषूपासकचित्ते प्रतीतप्रतिबिम्बविशेषस्यैवोपासनालम्बनत्वेनोक्त्या बिम्बभूतब्रह्मण उपास्यत्वनिषेधात् अन्यथा मानसावलोकनरूपध्यानविषयत्वेऽव्यक्तत्वासिद्धेः । तथाचानुपास्यब्रह्मण उपासनाविधिषूपास्यसमर्पकैः पदैरवाच्यत्वतयावश्यं वाच्यत्वात् तथा सृष्ट्यादिसर्ववेदगतपदैर्ब्रह्मगुणवर्णनस्योपासनार्थत्वं ''आध्यानायप्रयोजनाभावा''दित्यत्र त्वयैवोक्तमिति सर्ववेदगतानन्तपदैरुपासनाकालेषूपासकानां चित्ते प्रतीतप्रतिबिम्बविशेषस्यैव वाच्यत्वेन बिम्बभूतस्य परब्रह्मणः प्रतिबिम्बवाचिपदैर्लक्षणया प्रतिपादनमित्यवश्यं वाच्यत्वात्कथं तस्य सर्वशब्दवाच्यत्वमित्यादि तत्तुच्छम् । उपासनाकालेषूपासकचित्ते प्रतीतप्रतिबिम्बरूपाद्बिम्बभूतं ब्रह्मान्यदित्यङ्गीकारेपि सर्वाण्यपि श्रुतिवाक्यान्युपासनापेक्षितब्रह्मगुणसमर्पकाणीति चाङ्गीकारेपि ब्रह्मणः सर्वशब्दवाच्यतानपायात् । वासनामयरूपस्य मनसावलोकनं ध्यानमिति चित्ते प्रतीतप्रतिबिम्बरूपस्य वासनामयत्वोपगमात् । संस्कारापरनामकवासनायाश्च पूर्वानुभवजन्यत्वात् । औपनिषदस्य मानान्तरागोचरस्य वस्तुनोनुभवस्य वेदादिशास्त्रेणैवोत्पाद्यत्वात् । उपासनाकालप्रतीतप्रतिबिम्बजनकवासनाहेत्वनुभवोत्पादनायाखिलवेदवाक्यैर्ब्रह्मगुणवर्णनात् । तद्वर्णनस्य वचनवृत्तिं विनायोगात् । सर्वस्योपासनार्थत्वादित्यस्याप्यखिलवेदविषयश्रवणमननजनितानुभवोत्पन्नसंस्कारद्वारोपासनार्थत्वादित्यभिप्रायात् । एवमेव सर्वैरपि वाच्यत्वाच्च । बिम्बभूतस्य वस्तुनः साक्षादुपास्यत्वाभावेपि ज्ञानार्थत्वेनापि वाच्यत्वावश्यंभावाच्च । उपासनावज्ज्ञानस्याप्यावश्यकत्वात् । ''गुणास्सर्वेपि वेत्तव्या ध्यातव्याश्चैव सर्वश''इत्यादेः । प्रतिबिम्बे सन्निहितमिति ज्ञानस्योपासनाकालेप्यावश्यकत्वाच्च । ''ब्रह्मैव प्रतिबिम्बे यदतस्तेषां फलप्रद''मित्यादेः । उपासनाविधिवाक्यानामप्युपास्यार्पकवाक्यार्थानुभवजनितवासनामयरूपावलोकनाख्यध्यानं कार्यमित्यर्थस्य सर्वैरपि वाच्यत्वेन तत्रापि ब्रह्मणो नावाच्यत्वशङ्केति न किंचिदनुपपन्नमिति तत्त्वविद्वेषकलुषितमनीषया भाषितमिति नैतदादरणीयम् । विस्तुरस्तु कण्टकोद्धारे ।

पाण्डुरङ्गि — नन्वीक्षतेरित्यादिसूत्राणामुक्तक्रमे नियामकाभावादन्यथापि क्रमः सम्भाव्यत इत्यत आह ॥ सूत्रक्रमस्त्विति ॥ द्वितीयसूत्रादौ परंपरया वाच्यत्वसाधकहेतोरप्युक्तत्वा-त्तद्व्यावृत्त्यर्थं साक्षादिति ॥ व्यधिकरणासिद्धीति ॥ वाच्यत्वं परब्रह्मणि तत्साधकमीक्षणीयत्वं सगुण इति व्यधिकरणासिद्धिरित्यर्थः ॥ अन्यथासिद्धीति ॥ आत्मशब्दस्य विष्णुपरत्वमिव गौणपरत्वमप्यस्त्विति याऽन्यथासिद्धिशङ्का तन्निरास इत्यर्थः।

ननु तथापि तन्निष्ठमोक्षोपदेशहेयत्वावचनयोरुभयोरप्यात्मशब्दस्यान्यथासिद्धिशङ्कानिरास-कत्वसाम्यात्तन्निष्ठेत्येतदानन्तर्यं हेयत्वावचनस्यायुक्तमित्यत आह ॥ तत्रापीति ॥ सूत्रद्वयेपीत्यर्थः । न केवलं हेयत्वावचनस्यात्मशब्दस्य प्राप्तान्यथासिद्धिनिरासकत्वं अपितुतन्निष्ठस्यमोक्षोपदेशस्याप्यन्यथासिद्धिशङ्कानिरासकत्वात्तदानन्तर्यमिति भावेनोक्तं इति शङ्काया अपीति ॥ ननु हेयत्वेत्यनेन तन्निष्ठमोक्षोपदेशस्य कथमन्यथासिद्धिः परिहृतेत्यत उक्तं तमेवैकमितीति ॥ ननु स्वाप्ययादिति सूत्रस्यवाच्यत्वसाधकत्वाद्वितीयत्वं स्यान्नतुपंच-मत्वमित्यत आह ॥ स्वाप्ययस्यत्विति ॥ तथापि पञ्चमत्वं कथं तृतीयत्वं किं न स्यादित्यत आह ॥ तथेति ॥ तर्हि वाच्यत्वसाधकहेतुपरत्वाच्च शब्दस्तत्र स्यादित्यत आह ॥ तत्रेति ॥ ''श्रुत्युक्तत्वान्निर्गुणो वाच्य इत्युक्ते कुतोयं निर्णय इत्याशङ्कापरिहारात्मकत्वा'' दिति टीकायामेव हेतुरुक्त इत्यर्थः । ननु गतिसूत्रस्य स्वाप्ययादित्येतदानन्तर्यमयुक्तम् । तस्य शाखान्तरेऽन्यस्यापि जगत्कर्तृत्वमुच्यत इत्याशङ्कानिरासकत्वेन स्वाप्ययादित्युक्त प्रमेयोपयो-गिप्रतिपादकत्वाभावादित्यत आह ॥ ॥ षष्ठेत्विति ॥ ननु श्रुतत्वादित्यस्य गतिसूत्रानन्तर्यमयुक्तम् । तस्यसाक्षाद्वाच्यत्वसाधकहेतुपरत्वेन द्वितीयत्वस्यैव न्याय्यत्वादित्यत आह ॥ श्रुतत्वाच्चेत्यत्रत्विति ॥

तात्पर्यचन्द्रिका

अन्ये तु ''सदेव सोम्येदमग्र आसी''दित्यादिकारणवाक्यं साङ्ख्यादिस्मृतिसिद्धा-चेतनकारणानुवादीति प्राप्ते ईक्षणेन चेतनकारणताप्रापकमिति सिद्धान्त इत्याहुः ।

प्रकाशिका — अन्ये त्विति ॥ ''सदेव सोम्येदमग्र आसीदेक- मेवाद्वितीयं तदैक्षत बहुस्यां प्रजायेय तत्तेजोसृजते''ति तथा''यःसर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः । तस्मादे-तद्ब्रह्म नामरूपमन्नं च जायत'' इति छान्दोग्यार्थर्वणयोः श्रुतं यदीक्षितृसर्वज्ञं जगदुपादानं तच्चेतनमचेतनं वेति संशये तत्र यत्साङ्ख्या मन्यन्ते जगत्कारणस्य चेतनत्वेऽपरिणामिनस्तस्य सर्वज्ञानक्रियाकर्तृत्वलक्षणसर्वज्ञत्वसर्वशक्तित्वयोरसम्भवात् प्रधानस्य चाचेतनतया तयोस्स-म्भवादचेतनमेव जगत्कारणमिति तदेव च ''सदेव सोम्ये''त्यादिवाक्यान्यनुवदन्तीति प्राप्ते ''तदैक्षते''ति चेतनधर्मस्येक्षणस्य जगत्कारणे श्रवणान्नेदमचेतनम् । न चैतदीक्षणं ''तत्तेज ऐक्षते''त्यचेतनेक्षणप्रायपाठाद्गौणम् । ''अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवा-णी''ति सच्छब्दिते जगत्कारणआत्मशब्दश्रवणेनेक्षणस्य मुख्यत्वात् । न च ''ममात्मा

(प्रकाशिका)

भद्रसेन'' इति वदात्मीये प्रधानेऽयमात्मशब्दो गौण इति गौणमीक्षणमिति वाच्यम्। ''तत्त्वमसि श्वेतकेतो'' इति मोचयितव्यचेतनस्य प्रकृतसन्नामनिष्ठस्य श्वेतकेतोः ''तस्य तावदेवचिरं यावन्नविमोक्ष्येऽथसम्पत्स्यत'' इति मोक्षोपदेशात् । मुमुक्षुं चेतनं प्रति तत्त्वमसीत्यचेतनात्मतोक्तौ शास्त्रस्याप्रामाण्यापत्त्याऽऽत्मशब्दस्य मुख्यत्वात् । न चारुन्धतीप्रदर्शनाय स्थूलतारकाप्रदर्शनवत्सूक्ष्मब्रह्मावगत्यर्थमात्मशब्देन तत्सन्निहितस्याचेतनस्य सच्छब्दितस्य जगत्कारणस्य प्रधानस्योक्तेरमुख्यआत्मशब्द इति वाच्यम् । तथात्वे स्थूलतारकायां नेयमरुन्धतीतिवन्नायमात्मेति हेयत्ववचनप्रसङ्गात् । अत्र च तदभावात् न च ''यत्रैतत्पुरुषः स्वपितिनाम स्वमपीतो भवती''ति श्रुतौ लयाधारत्वोक्त्या प्रधानमेवात्र सच्छब्दितमिति वाच्यम् । जीवस्याचेतने तत्स्वरूपापत्तिरूपलयायोगेन स्वस्मिन्ब्रह्मचेतन एव सर्वजीवानामुक्तरूपलयस्य वाच्यतया चेतनस्यैव कारणत्वेन विवक्षितत्वात् । सर्ववेदान्तेषु चेतनकारणत्वावगतेः समानत्वात् । ''सकारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिप'' इत्यादिषु चेतनकारणत्वस्य श्रवणाच्च । न चेक्षणरूपस्येक्षितृत्वमसम्भवीति शङ्क्यम् । केवलस्याग्नेरदग्धृत्वेप्ययःपिण्डसमारूढस्य दग्धृत्ववदविद्योपहितस्य तत्सम्भवात् । अतश्चेतनमेव जगत्कारणमिति सिद्धान्तसूत्रार्थ इत्याहुरित्यर्थः ।

पाण्डुरङ्गि — अचेतनकारणत्वस्यासिद्धत्वात्कथं सदेव सोम्येत्यस्यानुवादकत्वमित्यत आह ।। साङ्ख्यस्मृतिसिद्धेति ।

तात्पर्यचन्द्रिका

तत्र किं विशिष्टस्य परिणामित्वमेतद्वाक्यबोध्यमिति सिद्धांत्यते किं वा कर्तृत्वं बोध्यमिति । यद्वा शुद्धस्य भ्रमाधिष्ठानत्वं बोध्यमिति । नाद्यद्वितीयौ । विशिष्टे सदेवेत्यादिवाक्योक्तसत्त्वाद्ययोगात् । पूर्वसूत्रेऽखण्डे समन्वयस्यैव प्रतिज्ञातत्वेनात्राखण्डस्यैव वक्तव्यत्वाच्च । द्वितीये वैयधिकरण्यं च । न हि प्रधानं परिणामीति प्राप्ते ब्रह्म कर्तीति सिद्धान्तो युक्तः । अत एव न तृतीयः । प्रधानं परिणामीति प्राप्ते ब्रह्माधिष्ठानमित्यस्य व्यधिकरणत्वात् । कथंचिदवैयधिकरण्येपि ''तदैक्षत सेयं देवतैक्षत नामरूपे व्याकरो''दित्यादिकमयुक्तं स्यात् । तस्य लक्षणया चिन्मात्रपरत्वे च सर्वमपि लक्षणया प्रधानपरं स्यात् । सूत्र ईक्षतेरित्यादि हेतूक्तिश्च न स्यात् । न

च तात्पर्याविषयेणेक्षणेन प्रधाननिरासः । अपि चात्र सदेवेत्यादिवाक्यसमन्वयोक्तिश्चेदानंदमयोभ्यासादित्यादिवत्सदीक्षतेरिति सूत्रं स्यात् । प्रधानस्य शाब्दत्वनिरासमात्रं चेदिदमधिकरणं तन्निरासके चतुर्थपादे स्यात् ।

प्रकाशिका — तत्र सूत्रार्थमग्रे निरसिष्यन् सिद्धान्तप्रमेयं निराचिकीर्षुर्विकल्पयति ॥ तत्रेति ॥ बहुस्यामिति । ऐक्षतेतिच श्रवणात्पक्षद्वयम् । बहुस्यामिति श्रुतमुपादानत्वं न परिणामित्वम् । अविकारित्वात् । किंत्वारोपाधिष्ठानत्वमेव वाच्यमिति भावेनाह ॥ शुद्धस्येति ॥ सत्त्वादीति ॥ आदिपदेनाद्वितीयत्वादेर्ग्रहः । विशिष्टस्य मिथ्यात्वादिति भावः। नन्वत्र सत्त्वं न पारमार्थिकमिति चेन्न । लयकालीनत्वात्तदाव्यावहारिकस्य सर्वस्य विलयात् अद्वितीयत्वादेरयोगाच्च । दोषान्तरमाह ॥ पूर्वसूत्र इति ॥ अत्र सदेवेति वाक्ये । एतदधिकरणे च । अन्यथा प्रतिज्ञाव्याकोप इत्यर्थः । कर्तृत्वपक्षे दोषान्तरं चाह ॥ द्वितीय इति ॥ तद्व्यनक्ति ॥ नहीति ॥ पूर्वपक्ष्युक्तस्यानिरासादिति भावः । अतः शब्दार्थमेवाह ॥ प्रधानमिति ॥ ब्रह्मपरिणामीत्यस्यैव वाच्यत्वादिति भावः । ननु प्रधानं कारणतयैतद्वाक्यबोध्यमिति प्राप्ते ब्रह्मैवात्रेक्षणश्रवणादिति सिद्धांत्यते । अतो न दोष इत्यत आह ॥ कथंचिदिति ॥ अयुक्तमिति ॥ शुद्धस्येक्षणरूपतयैक्षतेत्युक्तेक्षितृत्वं नामादिव्याकर्तृत्वं चायुक्तमित्यर्थः । ननु इयं श्रुतिर्नेक्षितृत्वपरा । येनायुक्तता । किन्तु लक्षणया चिन्मात्रपरेत्याशङ्क्य तर्हि पूर्वपक्षभङ्ग इत्याह ॥ तस्येति ॥ सूत्रार्थानपि निराचिकीर्षुराह ॥ अपिचेति ॥ तत्राद्यसूत्रं स्वपक्षसाधकं परपक्षनिरासकं वेति विकल्प्य क्रमेण निराह ॥ अत्रेति ॥ सदिति ॥ सच्छब्दस्यैव समन्वयादिति भावः ॥ प्रधानस्येति ॥ ''प्रधानं न जगत्कारणं अशब्दं हि तत् तदेव कुतः ईक्षते''रित्युक्तेरिति भावः ॥ तन्निरासक इति ॥

पाण्डुरङ्गि — सत्त्वाद्ययोगादिति ॥ आदिपदेन एकमेवाद्वितीयमित्यादिवाक्योक्ताद्वितीयत्वादिपरामर्शः । ननु विशिष्टे वस्तुतः सत्त्वाद्यभावेपि कल्पितं तदस्तीति वाक्यस्य तत्परत्वं स्यादित्यत आह ॥ पूर्वसूत्रेति ॥ तथाच क्रमासङ्गतिरिति भावः ॥ वैयधिकरण्यं चेति ॥ परिणामित्वेन कारणत्वं प्रधानस्येति प्राप्ते परिणामित्वेन कारणत्वं विशिष्टस्येति प्रथमपक्षे वैयधिकरण्यासम्भवेपि द्वितीये कर्तृत्वं ब्रह्मण इति सिद्धान्तकरणे वैयधिकरण्यं स्यादित्यर्थः । ननु शुद्धस्य भ्रमाधिष्ठानत्वेप्यविद्यावशेन तस्यैव परिणामाङ्गीकारेण मायासम्बन्धेन कर्तृत्वसार्वज्ञाङ्गीकारेण परिणामित्वेन कारणत्वस्य कर्तृत्वेन भ्रमाधिष्ठानत्वस्य

(पाण्डुरङ्ग)

च शुद्ध एव सत्त्वान्न वैयधिकरण्यमित्यत आह ॥ कथंचिदिति ॥ यद्वा ननु कारणवाक्ये परिणामित्वेन प्रधानं प्रतिपाद्यमिति प्राप्ते भ्रमाधिष्ठानत्वेन ब्रह्मैव तत्प्रतिपाद्यमिति सिद्धान्तः क्रियते । तत्कथं वैयधिकरण्यमित्यत आह ॥ कथंचिदिति ॥ प्रकारभेदान्न सामानाधिकरण्यमिति कथंचिच्छब्दः । अविद्यासम्बन्धे शुद्धत्वहानेः पुनर्वैयधिकरण्यं तदवस्थमिति वा कथंचिच्छब्दः । नन्वीक्षणस्य विशिष्टनिष्ठत्वात् शुद्धस्य तदधिष्ठानत्वेन लक्षणयेक्षणादिव्यपदेश इत्यत आह ॥ तस्येति ॥ सूत्र इति ॥ ईक्षणस्य शुद्धेऽभावादिति भावः । ननु प्रधाननिरासार्थं हेतूक्तिरित्यत आह ॥ न चेति ॥ ननु न हेतूक्तिवैयर्थ्यम् । समन्वयार्थत्वात्प्रधानस्य शाब्दत्वनिरासार्थत्वाच्च । ईक्षणेऽवान्तरतात्पर्यसत्त्वेन तन्निरासोपपत्तेः । न च तात्पर्यविषयत्वे सत्यत्वं स्यादिति वाच्यम् । महातात्पर्यविषयस्यैव सत्यत्वाङ्गीकारादित्यत आह ॥ अपि चेति ॥

तात्पर्यचन्द्रिका

किञ्चास्मन्मते आनन्दमयस्तत् ब्रह्मैवेत्यादिरूपेण विधेयार्पणायानुषंजनीयस्य तत्पदस्येह तदशब्दं न ईक्षतेरित्युद्देश्यसमर्पकतयान्वयो हेतुसाध्ययोः सामानाधिकरण्यं च । तव तु अशब्दं प्रधानं कारणं न नारणस्येक्षितृत्वादिति वदतो हेतुविभक्त्यभावेन साध्यत्वयोग्यश्रुताशब्दत्वरूपसाध्यत्यागेन साध्यकल्पनार्थमध्याहृतस्य कारणपदस्य विभक्तिपरिणामेनाऽऽवृत्तिर्वैयधिकरण्यं च । कारणमशब्दं प्रधानं नेति कारणस्योद्देश्यत्वे च ''अशब्दं हि त''दिति हेतूकृतस्याशब्दत्वस्य कारणेऽसिद्धिः । किञ्चाशब्दत्वमवाच्यत्वं वा शब्दवृत्तिमात्राविषयत्वं वा वेदासिद्धत्वं वा कारणत्वेन वेदासिद्धत्वं वा । चतुष्टयमपि ब्रह्मण एव । त्वन्मते शास्त्रप्रतिपाद्यस्य शुद्धस्यावाच्यत्वात् अवाच्ये च वृत्त्यन्तरायोगात् । न तु प्रधानस्य । साङ्ख्यमते तस्य वाच्यत्वात् । कारणत्वेनैवाजामित्यादिश्रुतिसिद्धत्वाच्च । त्वयापि त्रिगुणस्योपादानतया ''मायां तु प्रकृति''मित्यादिश्रुतिसिद्धत्वाङ्गीकाराच्च । त्रिगुणस्य पारमार्थिकत्वादावेव हि तव विवादः । ननु ''आनुमानिकमप्येकेषा''मित्यत्रानुमानिकशब्देन साङ्ख्यानुमानकल्पितं यत्त्वया विवक्ष्यते तदेव मयाऽत्राशब्दशब्देन लक्ष्यत इति चेन्न । साङ्ख्योत्प्रेक्षितानुमानगम्यत्वस्य प्रधानं सदेवेत्यादिवाक्यार्थो नेत्यत्राहेतुत्वात् । अन्यथा तार्किकोत्प्रेक्षितानुमानगम्यत्वादीश्वरस्यापि सदेवेत्यादिवाक्यार्थत्वं न

स्यात्। त्वया चाशब्दं हि तदिति तस्य तत्र हेतुत्वोक्तेः । किं च त्वयात्रोक्ताशब्दत्वसिध्यर्थं चतुर्थपादेऽव्यक्ताजादिशब्दानां सूक्ष्मशरीरादिपरतामुक्त्वा प्रधानपरतां निषेधता तस्य सर्वथा वेदासिद्धत्वमेवाशब्दत्वं वाच्यम्। तच्चाशक्यमित्युक्तम्। एतेन स्वप्रधानतया वेदाप्रतिपाद्यत्वमशब्दत्वमिति निरस्तम्। तदेतदभिप्रेत्योक्तं भाष्ये ''न चाशब्दत्वमितरसिद्ध''मिति । अनुव्याख्याने च ''न ह्यशब्दत्वं प्रधानेङ्गीकरोत्यसा''विति ।

प्रकाशिका — पररीत्या सूत्राक्षरार्थासामञ्जस्यं स्वमते स्वारस्यपूर्वमाह ॥ किं चेति ॥ तदित्यस्यार्थो ब्रह्मेति । तोरर्थएवेति । अशब्दमवाच्यं नेत्यर्थः ॥ हेतुविभक्तीति ॥ प्रधानं कुतो न कारणमित्याशङ्क्याशब्दं हि तदित्यशब्दमित्यस्य हेतुत्वेन त्वयोक्तत्वात्तत्र च तृतीयापञ्चम्यादिलक्षणहेतुविभक्त्यभावेन साध्यत्वयोग्यमित्यर्थः ॥ असिद्धिरिति ॥ शास्त्रयोनित्वात्तस्येति भावः । प्रधानोद्देश्यत्वपक्षेप्यसिद्धिरित्याह ॥ किञ्चेति ॥ चतुष्टयमपि ब्रह्मण एवेत्युक्तं व्यनक्ति ॥ त्वन्मत इति ॥ वृत्त्यन्तरेति ॥ प्रागुक्तानवस्थापत्तेरिति भावः । तत एव वेदासिद्धत्वं कारणत्वेन वेदासिद्धत्वं च बोध्यम् । वृत्तिमात्राविषये वेदसिद्धत्वाभावात् ॥ वाच्यत्वादिति ॥ प्रधानादिशब्दैः । तत एव वृत्त्यन्तरविषयत्वादिकमपीति भावः । एतेन ''अशब्दत्वंनाम शब्दागोचरत्वं वा शब्दावाच्यत्वं वाऽवैदिकत्वं वा कारणतयाऽवैदिकत्वं वे''त्यादिसुधाविवृता । ननु ''अजामेकां लोहितशुक्लकृष्णां बह्वीं प्रजां जनयन्तीं सरूपा''मित्यादावजादिशब्दाः सूक्ष्मशरीरपरा इत्यत आह ॥ त्वयापीति ॥ तथाच स्वमतेनायं हेतुरित्यपि प्रत्युक्तमिति भावः । ननु अशब्दमिति शब्दान्यानुमानकल्पितत्वं हेतुतया विवक्ष्यते । यथा त्वन्मत आनुमानिकमित्यनेनेत्याशङ्कामनूद्य निराह ॥ नन्विति ॥ सदेवेति ॥ प्रधानं कारणं नेत्यस्य सदेवेत्यादिकारणवाक्यप्रतिपाद्यं नेत्यर्थस्याभिमतत्वादिति भावः ॥ त्वया चेति ॥ मन्मते आनुमानिकशब्देन तस्याहेतुत्वोक्तेर्न दोष इति भावः । अशब्दमित्यस्य सांख्यानुमानकल्पितत्वविवक्षामुपेत्य दोष उक्तः सा विवक्षैवायुक्तेत्याह ॥ किंचेति ॥ प्रधानस्येति शेषः ॥ इत्युक्तमिति॥ ''त्वयापि त्रिगुणस्ये''त्यादिनेति भावः । एतेन अशक्यमित्युक्तत्वेनेत्यर्थः ॥ इतरेति ॥ सांख्यस्य मायिनश्चेत्यर्थः । असौ साङ्ख्यो मायीच ।

पाण्डुरङ्गि — ननु प्रधानशब्दत्वनिरसनमुखेन समन्वयस्यापि प्रतिपादनान्ना-सङ्गतिरित्यत आह ॥ किञ्चेति ॥ परमते श्रुतस्य साध्यत्वयोग्यस्याशब्दमित्यस्य साध्यत्वप-रित्यागः अश्रुतस्य कारणमित्यस्य साध्यस्य कल्पना तस्यैव चावृत्तिः आवृत्तस्य कारणमिति प्रथमान्तस्येक्षतेरित्यनेन हेतुवचनेनान्वयानुपपत्त्या षष्ठ्यन्तत्वेन विभक्तिवि-परिणामः कारणत्वाभावरूपसाध्यं प्रधाननिष्ठं ईक्षतेरिति हेतुश्च कारणनिष्ठ इति वैयधिकरण्यं चेत्यनेकानि दूषणानि । ननु भवन्मतेप्यश्रुतकल्पना । अशब्दं नेत्यत्रोद्देश्य-समर्पकपदस्याश्रुतस्य कल्पनीयत्वादित्यत उक्तमानन्दमयस्तद्ब्रह्मेत्यादि । तथाचानन्दमयसूत्रे श्रुतस्य तदित्यस्यात्रोद्देश्यसमर्पकतयान्वयान्नाश्रुतकल्पनेति भावः । नन्वानन्दमयसूत्रे तदित्यस्याश्रवणादुभयत्रापि तत्कल्पने कल्पनागौरवमित्यत उक्तं विधेयार्पणायेति । अयं भावः । तत्तु समन्वयादित्यत्र तदिति पदं श्रूयते । तस्यैवानंदमयस्तद्ब्रह्मेति विधेयसमर्पक-तयानुक्तस्यात्र पुनरुद्देश्यसमर्पकतयानुषङ्ग इति नाश्रुतकल्पनेति । ननु कारणस्योद्देश्य-त्वान्नावृत्तिर्वैयधिकरण्यं चेति चेन्न । तथात्वेऽशब्दमित्यस्य वैयर्थ्यं स्यात् । ननु तस्य हेतूकृतत्वान्न वैयर्थ्यमित्यत आह ॥ कारणमिति ॥ ननु नाशब्दत्वस्य प्रधानेऽसिद्धिः । मया ब्रह्मण एव सर्ववेदप्रतिपाद्यत्वाङ्गीकारेण प्रधानस्य कुत्राप्यप्रतिपाद्यत्वादित्यत आह ॥ किञ्चेति ॥ ननु शुद्धस्य लक्षणया शब्दप्रवृत्तिविषयत्वादिकं भविष्यतीत्यत आह ॥ अवाच्य इति ॥ नन्वस्तु ब्रह्मणो वाच्यत्वम् । प्रधानेऽवाच्यत्वसत्त्वादशब्दत्वं सिद्धमेवेत्यत आह ॥ नत्विति ॥ ननु तथापि कारणत्वेन वेदासिद्धत्वान्नाशब्दत्वासिद्धिरित्यत आह ॥ कारणत्वेनेति ॥ ननु त्रिगुणात्मकप्रधानस्यांगीकारे साङ्ख्येन विवादो न स्यादित्यत आह ॥ त्रिगुणस्येति ॥ नन्विति ॥ तथाच नासिद्धिरिति भावः ॥ सांख्येति ॥ अप्रयोजकत्वादिति भावः । ननु तार्किकोत्प्रेक्षितानुमानगम्यत्वेपि सदेवेत्यादिवाक्यार्थत्वाभावः कुत इत्यत आह ॥ त्वया चेति ॥ तस्य वाद्युत्प्रेक्षितानुमानगम्यत्वस्य ॥ तच्चाशक्यमित्युक्तमिति ॥ त्वयापि त्रिगुणस्योपादानताया मायां तु प्रकृतिमित्यादिश्रुतिसिद्धत्वाङ्गीकारेण सर्वथा शब्दावाच्यत्वं वक्तुमशक्यमित्यर्थः ॥ एतेनेति ॥ अव्यक्तादिशब्दानां सूक्ष्मशरीरादिपरत्वमुक्त्वा प्रधानपरत्वं निषेधता सर्वथा वेदप्रतिपाद्यत्वस्यैव वक्तव्यत्वोपपादनेनेत्यर्थः । अथवा मायां तु प्रकृतिमित्यादौ स्वप्रधानतया प्रतिपाद्यत्वोपपादनेनेत्यर्थः । स्वोक्तमशब्दत्वस्यासिद्धत्वं भाष्यानुव्याख्यानाभ्यां संवादयति ॥ तदेतदित्यादिना ॥ ''तदैक्षतेतीक्षणश्रवणादशब्दं हि त''दिति टीकाया अयमर्थः । प्रधानं कारणत्वेन कारणवाक्यप्रतिपाद्यं न भवति ।

कारणवाक्ये प्रधानबोधकशब्दाभावात् । न च सदेवेत्यादिवाक्येषु सच्छब्दस्यैव प्रधानबोधकत्वात्कथं तत्प्रतिपादकशब्दाभाव इति शङ्क्यम् । तत्र सच्छब्दोक्तस्यैवोत्तरत्र तदैक्षतेतीक्षणकर्तृत्वोक्त्या सच्छब्दस्य प्रधानपरत्वे तस्याचेतनत्वेनेक्षणकर्तृत्वासम्भवेन तच्छब्दस्य प्रधानपरत्वासम्भवादिति । टीकायामश्रौतत्वमिति ॥ कारणवाक्ये तत्प्रतिपादकशब्दाभाव इत्यर्थः ॥ तेनेति ॥ साङ्ख्येन सदादिशब्दानामेव प्रधानपरत्वाभ्युपगमात् कारणवाक्ये प्रधानपरशब्दाभावः साङ्ख्यमतेऽसिद्धः । न चोक्तदोषः । सत्त्वात्संजायते ज्ञानमित्युक्तेः तस्येक्षणोपादानत्वेनेक्षणकर्तृत्वोपचारोपपत्तेरिति भावः ॥ स्वन्यायेनेति ॥ मायिन्यायेनेत्यर्थः ॥ श्रुतत्वादिति ॥ अजामेकामित्यादिकारणवाक्येष्वजादिशब्दानां प्रधानपरत्वेन स्वन्यायेनापि कारणवाक्येषु प्रधानपरत्वाभावो नेत्यभिप्रायः ।

तात्पर्यचन्द्रिका

किंचात्मन ईक्षारूपस्य न स्वरूपेणेक्षितृत्वम् । अव्यक्तादिजडविशिष्टस्य तत्सम्भवेऽव्यक्तस्याप्यात्मा विवेकेनात्मविशिष्टस्य तत्स्यात् । तन्निष्ठस्येत्याद्युत्तरसूत्रविरोधश्च । आत्मशब्दादित्यत्राप्यात्मशब्दवाच्यत्वं हेतुश्चेदसिद्धिः । तल्लक्ष्यत्वतत्प्रतिपाद्यत्वमात्रे तु प्रधानस्यापि । किंच किमात्मशब्दस्य चेतनार्थत्वादचेतने प्रधाने तदनुपपत्तिर्विवक्षिता किं वा तस्य स्वरूपार्थत्वादनेन जीवेनात्मनेति चेतनतया प्रसिद्धजीवस्वरूपताया अचेतनेऽनुपपत्तिः । नाद्यः । चेतनत्वस्य ज्ञातृत्वरूपत्वे ब्रह्मण्यपि शुद्धे तदभावात् । विशिष्टे चेत्प्रधानेप्युक्तरीत्या तत्सम्भवात् । ज्ञानत्वरूपत्वे तु तदर्थस्यात्मशब्दस्येक्षितृत्वं गौणमित्यत्रैव हेतुत्वेन गौणत्वाभावे हेतुत्वायोगात् । नांत्यः । सार्वज्ञासार्वज्ञादिविरुद्धांशत्यागेन चिद्रूपेण जीवब्रह्मैक्यवज्जडत्वादिविरुद्धांशत्यागेन सद्रूपेण प्रधानैक्यस्यापि सम्भवात् । तन्निष्ठस्येति सूत्रेपि तच्छब्दार्थः शुद्ध आत्मा विशिष्टो वा । नाद्यः । तस्याद्यसूत्रोक्तेक्षितृत्वायोगात् । नांत्यः । विशिष्टनिष्ठस्य साक्षान्मोक्षानन्वयात् । परंपरया तदन्वयस्तु प्रधाननिष्ठस्यापि । एवं सूत्रान्तरेपि सुधोक्तरीत्या दूषणं द्रष्टव्यम् ।

प्रकाशिका — एवमाद्यसूत्रेऽशब्दमिति भागस्याभिमतार्थं निरस्येदानीमीक्षतेरिति भागस्य तं निराह ॥ किञ्चेति ॥ अविवेकेन भेदाग्रहेण । तथाच न तेन प्रधाननिरास-

(प्रकाशिका)

सिद्धिरिति भावः ॥ तन्निष्ठस्येति ॥ त्वन्मते ''तत्त्वमसि श्वेतकेतो'' इति शुद्धनिष्ठस्यैव ''तस्य तावदेव चिर''मिति मोक्षोपदेशादित्यर्थोक्तेरिति भावः । एतेन ''ईक्षितृत्वं चेक्षणगुणयोगित्वम् । तद्ब्रह्मण्यपि गौणमेवे''ति सुधा विवृता । एवमाद्यसूत्रार्थं निरस्य यदुक्तं द्वितीये ''ईक्षणस्यागौणत्वआत्मशब्दा''दिति तत्र सुधोक्तमुपलक्षणं मत्वा तद्विकल्प्य निराह ॥ आत्मेति ॥ असिद्धिरिति ॥ ''सदेव सोम्ये''त्यादिकारणवाक्यार्थत्वेन त्वदभिमते शुद्धेऽवाच्यआत्मपदवाच्यत्वानङ्गीकारादित्यर्थः । प्रतिपाद्यत्वमात्रं वाच्यत्वलक्ष्यत्वसाधारणम् । तथाच गौणे क्षणवत्यपि सत्त्वादप्रयोजक इति भावः । आद्येपि चेतनत्वं ज्ञातृत्वं वा ज्ञानत्वं वेति विकल्प्य क्रमेण निराह ॥ चेतनत्वस्येति ॥ उक्तरीत्या आत्माविवेकेनेत्युक्तरीत्येत्यर्थः । तदर्थस्य ज्ञानत्वरूपचेतनार्थकस्य ॥ प्रधानैक्यस्येति ॥ तथाच न तत्प्रधानव्यावर्तकमिति भावः । उपलक्षणमेतत् । गौणश्चेति पुल्लिङ्गानुपपत्तिः प्रागुक्ता ध्येया । तृतीयसूत्रार्थमपि निराह ॥ तन्निष्ठस्येति ॥ प्रधाननिष्ठस्येति ॥ आत्मानात्मविवेकार्थमनात्मज्ञानस्याप्यावश्यकत्वादिति भावः ॥ एवमिति ॥ सूत्राणामर्थः प्रागस्माभिरुक्तः। दूषणं तु तन्निष्ठस्येत्यत्रात्मशब्दस्य गौणत्वे शङ्किते तदुत्तरसूत्रे बाधकाभाव एव वाच्यो न तु हेयत्वावचनोक्तिः सङ्गता । न हि साङ्ख्येनाद्वैतज्ञानार्थं प्रधानोपदेशः शङ्कितः । येन सा सङ्गता स्यात् । हेयत्वावचनमन्नमयादिष्विवाब्रह्मत्वेप्युपपन्नं च । अन्नमयादिषु पूर्वपूर्वस्याब्रह्मत्व उत्तरोत्तरब्रह्मत्वोक्तिर्ज्ञापिकेति चेदत्राप्यब्रह्मत्वे बहुस्यामिति परिणामोक्तिर्ज्ञापिकेति सुवचम् । पञ्चमेपि स्वाप्ययो नाम जीवस्य सुप्त्यादावैक्यं वा परिष्वङ्गमात्रं वा । नाद्यः । ब्रह्मपक्षेप्यभावात् । द्वितीयं तु प्रधानेपि सम्भवति । षष्ठेपि ब्रह्मकारणताविषयं गतिसामान्यं सांख्यस्यासिद्धमेव । ईक्षणादिना तज्ज्ञापने प्रथमसूत्रेण गतार्थता । श्रुतत्वादित्येतदपि परस्यासिद्धमेव । पूर्ववदीक्षणादिना तज्ज्ञापने तु पूर्ववत्प्रधानसूत्रेण गतार्थता गतिसूत्रेण पुनरुक्तिश्चेति ।

पाण्डुरङ्गि — ननु मास्त्वशब्दत्वेन प्रधानस्य सदेवेत्यादि- वाक्यार्थत्वाभावः ईक्षितृत्वेन तदभावः स्यादित्याशङ्क्य यथा प्रधानस्येक्षितृत्वासम्भवात्सदेवेति वाक्यार्थत्वाभावः तथा ब्रह्मणोपि ईक्षितृत्वासम्भवान्न सदेवेति वाक्यार्थत्वं तस्येत्याशयेनेक्षितृत्वं पृच्छति ॥ किंचेति ॥ स्वरूपेणेक्षितृत्वं वाऽन्योपाधिकं वा । नाद्य इत्याह ॥ आत्मन इति ॥ ईक्षारूपस्येति हेतुगर्भं विशेषणम् । तथाच ब्रह्म नेक्षणकर्तृ ईक्षारूपत्वात् यो यद्रूपः स न तत्कर्ता यथा गमनं गमनरूपं न स्वकर्त्रितीक्षितृत्वाभावात्तस्यापि सदेवेत्यादिवाक्यार्थत्वं न

स्यादित्यर्थः । न द्वितीय इत्याह ॥ अव्यक्तादीति ॥ नन्वव्यक्तस्यात्मविशिष्टत्वं नात्मासम्भिन्नत्वं प्रधानस्य जडत्वेनात्मासम्भिन्नत्वाभावादित्यत उक्तमात्माविवेकेनेति । तथाच प्रधानस्य सदेवेत्यादिवाक्यार्थत्वं स्यादिति भावः । नन्वीक्षितृत्वेन प्रधानस्य सदेवेत्यादिवाक्यार्थत्वाभावासम्भवेपि देवतात्वनामरूपादिव्याकरणलिङ्गेन प्रधानस्य सदेवेत्यादिवाक्यार्थत्वाभावः अव्यक्तविशिष्टस्य सदेवेत्यादिवाक्यप्रतिपाद्यत्वं च स्यादित्यत आह ॥ तन्निष्ठस्येत्यादीति ॥ विशिष्टज्ञानेन मोक्षासम्भवादिति भावः । ननु मास्त्वीक्षितृत्वादिना प्रधाननिराकरणम् । आत्मशब्दादिना तु सेत्स्यतीत्यत आह ॥ आत्मशब्दादिति ॥ न च विशिष्टस्यात्मशब्दवाच्यत्वमस्त्विति वाच्यम् । तथात्वे तन्निष्ठसूत्रविरोधस्योक्तत्वात् । तथाच शुद्धस्य वाच्यत्वाभावादसिद्धिरेवेति भावः । नन्वात्मशब्दवाच्यत्वादिकं नात्मशब्दार्थः । एवं च प्रधानआत्मत्वाभावेन तदर्थकात्मशब्दाभावान्नातिप्रसङ्ग इत्यरुचेराह ॥ किंचेति ॥ नद्वितीय इत्याह ॥ विशिष्ट इति ॥ उक्तरीत्येति ॥ अव्यक्तादिजडविशिष्टस्यात्मनो ज्ञातृत्ववदव्यक्तस्यापि स्वरूपेण ज्ञातृत्वाभावेप्यात्माविवेकेनात्मविशिष्टस्य ज्ञातृत्वसम्भवादित्युक्तरीत्येर्थः । द्वितीयं प्रत्याह ॥ ज्ञानत्वरूपत्व इति ॥ हेतुत्वायोगादिति ॥ नित्यत्वसाधककृतकत्ववद्गौणत्वाभावसाधनार्थं प्रयुक्तस्यात्मशब्दस्येक्षितृत्वं गौणमित्यत्रैव हेतुत्वेन विरुद्धत्वापातादिति भावः । यदि चेतनत्वेन प्रसिद्धजीवस्वरूपताप्रधानेन सम्भवति तस्याचेतनत्वादिति तर्हि सर्वज्ञत्वेन प्रसिद्धब्रह्मस्वरूपेण सह जीवस्याप्यैक्यं न स्यात् । तस्याज्ञत्वेन प्रसिद्धत्वात् । तथाच जीवप्रधानयोरैक्यसम्भवादात्मशब्देन तन्निराकरणमयुक्तमित्याह ॥ सार्वज्ञासार्वज्ञादीति ॥ न च विरुद्धधर्माणां स्वाभाविकत्वान्न निवृत्तिरिति वाच्यम् । तथात्वे सार्वज्ञादेरपि स्वाभाविकत्वेन निवृत्तिर्न स्यादिति भावः । ननु विशिष्टस्य परंपरयाऽविशिष्ट- द्वारा मोक्षान्वयोस्त्येवेत्यत आह ॥ परम्परयेति ॥ तथापि हेयत्ववचनेन प्रधाननिराकरणं स्यादेवेत्यत आह ॥ एवमिति ॥

तात्पर्यचन्द्रिका

एतेन इदमधिकरणं प्रधानादेर्जडस्य हेतुत्वनिरासकमिति केषांचित्पक्षोप्यपास्तः । समन्वयासङ्गत्यादेः । किञ्च न तावत्प्रधानस्य कारणत्वमुपादानत्वं वा निरसितुमिदमधिकरणम् । तयोस्त्वन्मतेपि प्रधाने सत्त्वात् । उक्तं हि ''तदधीनत्वा''दिति सूत्रे

(तात्पर्यचन्द्रिका)

त्वयैव ''न वयमव्यक्तं तत्परिणामविशेषांश्च स्वरूपेण नाभ्युपगच्छामः । अपि तु परमपुरुषशरीरतया तदात्मकत्वविरहेणे''ति । यथा च प्रधानं केवलमकारणं तथा ब्रह्मापि । विशिष्टस्यैव कारणत्वात् । नापि प्रधानस्य वाक्यान्तरात्कारणत्वेपि ''सदेव सोम्येद''मित्यादिसद्विद्याया ब्रह्मकारणत्वपरत्वमिति वक्तुमिदम् । ''यदि सद्विद्या ब्रह्मपरा तदा तदैकार्थ्यात्सर्वाणि कारणवाक्यानि ब्रह्मपराणी''ति त्वयैवोक्तत्वात् । अन्यथेक्षत्यधिकरणं कारणस्याचित्त्वनिरासकमिति त्वदभिप्रेतस्यासिद्धेः । न च सर्वेषां कारणवाक्यानां ब्रह्मपरत्वेपि प्रधानकारणताया मानांतरात्सिद्धिः । कारणस्य शास्त्रयोनित्वात् । नापि प्रधानस्येश्वरनियम्यत्वादिरूपतच्छरीरत्वनिरूपणार्थमिदम् । अत्र तदप्रतीतेः । अन्तर्याम्यधिकरणे तदधीनत्वादित्यादावन्यत्रैव तन्निरूपणाच्च । नापि प्रधानस्य कर्तृत्वं वा कर्तृत्वे सत्युपादानत्वं वा निरसितुमिदम् । तयोः प्रधाने सांख्येनाप्यनङ्गीकारात् । प्रकृत्यधिकरणेन पुनरुक्तेश्च । किञ्च त्वत्पक्षे शास्त्रयोनिसूत्रे वेदान्तानामनुमानप्राप्तकारणानुवादित्वेनाविचार्यत्वमिति पूर्वपक्षवदिहापि साङ्ख्यस्मृतिप्राप्तानुवादित्वेनाविचार्यत्वमिति पूर्वपक्षसम्भवादिदमधिकरणं चतुस्सूत्रीवच्छास्त्रारम्भसमर्थनार्थं सत्समन्वयसूत्रात्पूर्वं स्यात् ।

प्रकाशिका — ॥ एतेनेति ॥ सदेवेत्यादिवाक्यबोध्यं प्रधानमुत ब्रह्मेति संशये ''येनाश्रुतं श्रुतं भवती''ति ''यथा सोम्यैकेन मृत्पिण्डेने''त्याद्यनुमानाकारवाक्यप्रतिपाद्यस्यानुमानिकत्वावगमात्प्रधानमेव । न चेक्षणायोगः । तेजःप्रभृतिगतगौणे क्षणसाहचर्येण गौणत्वादिति प्राप्ते ईक्षणान्वयात् ब्रह्मैव । न चानुमानिकत्वावगमविरोधः । येनाश्रुतमित्यादौ हेत्वनुपादानेनानुमानाकारत्वाभावात् । न च यथा सोम्यैकेनेत्यादिदृष्टान्तेनैवास्यानुमानाकारत्वसिद्धिः । तस्यान्यज्ञानेनान्यज्ञानासम्भवशङ्कासमाधानार्थतयान्यथासिद्धत्वात् । न चेक्षणं गौणमिति वाच्यम् । तदैक्षतेतीक्षितरि''ऐतदात्म्यमिदं सर्व''मिति चेतनवाच्यात्मशब्दात् ''तत्वमसी''ति सदात्मतया प्रत्यगात्मानुसन्धाननिष्ठस्य ''तस्य तावदेवचिर''मिति मोक्षोपदेशाच्च । हेयत्वावचनाच्च सद्ब्रह्मैव । प्रधानस्य मोक्षविरोधित्वेन हेयत्ववचनप्रसङ्गात् । ''सता सोम्ये''ति जीवस्य स्वकारणे सत्यप्यस्य श्रवणात् प्रधानस्य जीवकारणत्वाभावात् अन्योपनिषत्सु ''तस्मादेतद्ब्रह्मनामरूपमन्नं च जायत'' इति ''तस्माद्वा एतस्मादात्मन आकाशः सम्भूत'' इति च पुरुषोत्तमस्यैव हेतुत्वोक्त्या तद्गतिसामान्यादत्राप्यात्मन एवेदं

सर्वमिति ब्रह्मकारणत्वस्य श्रुतत्वाच्चेति सिद्धान्त इत्याहुरित्यर्थः । एतेनेत्युक्तं व्यनक्ति ॥ समन्वयेति ॥ सूत्राक्षरार्थासामञ्जस्यादिरादिपदार्थः । अधिकरणप्रमेयं निराह ॥ किंचेति ॥ प्रधानस्य कारणत्वं वोपादानत्वं वा वाक्यान्तरसिद्धकारणत्वेप्येतद्वाक्यबोध्यत्वं वा भगवदशरीरत्वं वा कर्तृत्वं वा । कर्तृत्वे सत्युपादानत्वं वा निरस्यत इति विकल्प्याद्यद्वितीयौ निराह ॥ न तावदिति ॥ विशिष्टस्येति ॥ प्रधानादिना । तृतीयं निरस्यति ॥ नापीति ॥ सर्वाणीति ॥ तथाच न क्वापि प्रधानस्य कारणत्वसिद्धिरिति भावः ॥ अचित्त्वेति ॥ एतच्च कारणवाक्येषु सर्वत्र जडं नोच्यत इत्यर्थसमर्थनपरत्व एवास्याधिकरणस्य सम्भवतीति भावः। ननु कारणवाक्यमात्राबोध्यस्याप्यनुमानादिना कारणत्वसिद्धिरित्याशङ्क्य समाधिमाह ॥ न चेति ॥ चतुर्थं प्रत्याह ॥ नापीति ॥ पञ्चमषष्ठौ प्रत्याचष्टे ॥ नापि प्रधानस्येति ॥ पुनरुक्तेश्चेति ॥ ''प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधा''दित्यत्र कर्तृत्वे सत्युपादानत्वस्य ब्रह्मण एवोक्तत्वादिति भावः । अधिकरणक्रमं निराह ॥ किञ्चेति ॥ चतुरधिकरण्याः ''व्युत्पत्त्यभावः प्रतिपत्तिदौस्थ्य''मित्यादिनाऽरम्भार्थत्वोक्तेरस्यापि तदन्तर्भावः । तत्रापि शास्त्रयोनिसूत्रेणैकार्थ्यात्तदानन्तर्यमेव स्यात् । तथाच पञ्चानामपि तदारम्भोपयुक्तत्वमेवोपपन्नमिति भावः ।

पाण्डुरङ्गि — अतिदेशेन रामानुजमतं दूषयति ॥ एतेनेति ॥ अतिदेशार्थमाह ॥ समन्वयासङ्गत्यादेरिति ॥ समन्वयाध्याये समन्वयसूत्रोक्तलक्षणासम्भवनिरासके प्रथमपादे चातिव्याप्तिनिरासकस्यासङ्गतेः । समन्वयप्रतिपादने तु स ईक्षतेरिति निर्देशापत्तेरित्यर्थः । प्रधानस्य कारणत्वमात्रनिरासकेक्षितृत्वाद्ययोगो वाऽऽदिशब्दार्थः । ननु न समन्वयासङ्गतिः । प्रधानकारणत्वनिरासद्वारेण ब्रह्मकारणत्वप्रतिपादनेन कारणवाक्यसमन्वयप्रतिपादकत्वात् । नापीक्षितृत्वाद्यनुपपत्तिः । सदेवेत्यादिवाक्यं न प्रधानकारणत्वपरम् । ईक्षणप्रतिपादकत्वात् । तथाच नासङ्गत्यादिकमित्यत आह ॥ किञ्चेति ॥ किमत्र प्रधानस्य कारणत्वमेव निरस्यते किं वा सद्विद्यायां ब्रह्मकारणत्वं प्रतिपाद्यते उत प्रधानस्येश्वरशरीरत्वं यद्वा प्रधानस्य कर्तृत्वे सत्युपादानत्वाभावः । तत्र नाद्य इत्याह ॥ न तावदिति ॥ ननु प्रधानस्वरूपमेव नाङ्गीक्रियते । तथाच कारणत्वोपादानत्वयोः कथं प्रधाने सत्त्वादित्युच्यत इत्यत आह ॥ उक्तं हीति ॥ तदात्मकत्वेति ॥ तदात्मकत्वविरहेण नाभ्युपगच्छामः । किन्तु तदात्मकत्वेन। तदात्मकत्वमपि कीदृशमित्यत उक्तं परमपुरुषशरीरतयेति । तथाच तदात्मकत्वं तत्स्वामिकत्वं तन्नियम्यत्वं तद्विरहेण स्वातन्त्र्येण सांख्यवन्नाभ्युपगच्छाम इत्यर्थः । ननु

(पाण्डुरङ्गि)

प्रधानस्य परमपुरुषशरीरतया कारणत्वेपि केवलस्य तन्निषिध्यत इत्यत आह ॥ यथाचेति ॥ कुतो नेत्यत आह ॥ विशिष्टस्यैवेति ॥ शुद्धस्य निर्धर्मकत्वेन कारणत्वाद्यभावादिति भावः । द्वितीयं प्रत्याह ॥ नापीति ॥ यदीति ॥ तथाच वाक्यान्तरे प्रधानस्य कारणत्वेन प्रतिपादितत्वाङ्गीकारे व्याहतिरिति भावः ॥ अन्यथेति ॥ कारणवाक्यमात्रस्य ब्रह्मपरत्वानङ्गीकार इत्यर्थः ॥ न चेति ॥ तथाच मानान्तरेण प्रधानकारणतायाः सिद्धत्वान्न व्याहतिरिति भावः । तृतीयं दूषयति ॥ नापीति ॥ अत्र तदप्रतीतेरिति ॥ अस्मिन्नधिकरणे प्रधानस्येश्वरशरीरत्वप्रतिपादकत्वाद्यप्रतीतेरित्यर्थः । ननु प्रधानस्येश्वरशरीरत्वनिरूपणाभावे तदभावापातेन शरीरत्वप्रतिपादकश्रुत्यादिविरोध इत्यत आह ॥ अन्तर्यामीति ॥ चतुर्थं प्रत्याह ॥ नापीति ॥ तयोरिति ॥ यद्यपि साङ्ख्येन प्रधाने कर्तृत्वादिकमङ्गीकृतं तथाप्युपादानगोचरापरोक्षज्ञप्तिचिकीर्षाकृतिमत्त्वरूपं तन्नाङ्गीकृतमित्याशयः । यद्वैतदस्वरसादाह ॥ प्रकृतीति ॥ ननु न पौनरुक्त्यं वेदान्ता न विचार्याः सांख्यस्मृतिप्राप्तकारणानुवादित्वादित्यविचार्यत्वेन पूर्वपक्षिते विचार्यत्वप्रतिपादनार्थमेतदधिकरणमित्यरुचेराह ॥ किञ्चेति ॥

तात्पर्यचन्द्रिका

यादवप्रकाशीये तु ''स्वाप्यया''दित्यस्य ''सता सोम्य तदा सम्पन्नो भवती''ति वाक्यं विषयः । ''गतिसामान्या''दित्यस्य तु ''सति सम्पद्य न विदुः सति सम्पत्स्यामह'' इति वाक्यं विषय इत्युक्तम् । तन्न । वाक्यभेदेन सूत्रभेदेऽतिप्रसङ्गात् ॥ टीकाक्षरार्थस्तु ॥ न तच्छब्दगोचरमिति युक्तमिति ॥ उपलक्षणं चैतत् । शब्दानां गवां ज्ञानानां च चरश्चरणं वृत्तिर्यस्मिन् तच्छब्दगोचरमिति व्यधिकरणबहुव्रीहिं वा चरश्चरणमस्यास्तीति मत्वर्थीयाच्प्रत्ययान्तत्वं वाश्रित्य शब्दगोचरमित्यस्य साधुत्वं द्रष्टव्यम् । ततश्च ''यतो वाच'' इत्यादिश्रुतौ मनसा सहेत्यदृश्यत्वस्याप्युक्तत्वादीक्षणीयत्वमसिद्धमिति पूर्वपक्ष्यभिप्रायः ।

पूर्वमर्थापत्तिपरतया व्याख्यातम् । इदानीं परिशेषपरतया व्याचष्टे ॥ परिशेषप्रमाणेन वेति ॥ यद्यपि स्वमतेऽर्थापत्तिपरिशेषयोरनुमानता । तथापि तयोर्भेदमुपेत्य वानुमानत्वावांतरभेदमाश्रित्य वा पक्षान्तरोक्तिः ॥ श्रुतिस्मृती चाहेति ॥ श्रुतावा-

मनंतीति साक्षाद्वाच्यत्वोक्तेः । स्मृतौ चाहमेवेत्यवधारणोपपत्तये मुख्यतया वेद्यत्वस्य विवक्षणीयत्वात् । तस्यच वाच्यत्वं विनाऽयोगात् । सर्ववेदलक्षणाया अयोगाच्च वाच्यत्वसिद्धिरिति भावः । ननु न विशिष्टमीक्षितृ येन जिज्ञास्यत्वायोगः किन्तु शुद्धमेव मायासम्बन्धादीक्षित्रिति पूर्वत्रारुच्या दोषान्तरमाह ॥ किंच माययेक्षणमिति ॥ गौणग्रहणे बाधकस्येत्यादौ गौणशब्देन मुख्यासम्भवे गौणाश्रयणादित्यत्रेवामुख्यार्थो न विवक्षितः । किन्तु सत्त्वादिगुणयुक्तजीवरूपमुख्यार्थ इति द्रष्टव्यम् । स्वरूपप्रतिमारूपाभिप्राय इति ॥ आत्मनि स्वरूपाभिप्रायोऽनात्मनि प्रतिमारूपाभिप्राय इत्यर्थः ॥ श्रुतेरार्जवसम्भवादिति ॥ आत्मानात्मशब्दयोश्चेतनाचेतनविषयतया प्रसिद्धेः रूपशब्देऽनेकार्थत्वस्याकल्प्यत्वाच्च तद्विषयत्वे श्रुतेरार्जवं भवतीत्यर्थः ॥ स्वभावविषयत्वोपपत्तेरिति ॥ जीवात्मन्यपि हि दुःखादिदोष औपाधिक एवेति भावः । ''यस्ये''ति श्रुतौ विश्वशब्दो ''विश्वो हिरण्यगर्भोग्निरित्यादा''विव वाव्यर्थः । तेन सर्वस्य कर्तेत्यनेन न पुनरुक्तिरित्याह ॥ वायुकर्तेति ॥ प्रतिबुद्धशब्दार्थमाह ॥ सर्वज्ञ इति ॥ अनुवित्तशब्दार्थमाह ॥ ज्ञात इति ॥ ततश्च तयोर्न पौनरुक्त्यमिति भावः ॥

न सपक्षसत्त्वमिति ॥ ततश्च नासाधारणानैकान्तिकतेति शेषः । केवलान्वयिनीति । केवलान्वयी दृष्टान्ततयोक्तः । ब्रह्मवाच्यं लक्ष्यत्वादित्यभिप्रेतकेवलान्वय्युपयोगितया वा ॥ तदविना भाव्यभावत्वाभावादिति ॥ साध्याभावाविनाभूताभावप्रतियोगिन एवोपाधित्वादिति भावः ॥ व्याप्त्यनिश्चयादिति ॥ साध्यव्यापकत्वानिश्चयादित्यर्थः । कार्यकारणभावादेरेव व्याप्तिनिबन्धनत्वे तदभावाद्द्रव्यत्वसंयोगित्वयोरपि सा न स्यादित्याह ॥ द्रव्यत्वसंयोगित्वयोरिति ॥ ननु संयोगिताया द्रव्यत्वाद्यवच्छेद्यत्वहानिरेव विपक्षे बाधिका तयोर्व्याप्तिनिबन्धनमित्याशङ्क्य तर्हीहाप्यनवस्था विपक्षे बाधिकेत्यभिप्रेत्याह ॥ अवाच्यस्य लक्षणायामित्यादिना ॥ ननु सत्यज्ञानादिवाक्ये लक्ष्यार्पकं ब्रह्मपदं वाचकमेव । सत्यादीनि लक्षणपदानि तु न वाचकानीति शङ्कते ॥ लक्ष्यपरपदस्येति ॥ छ ॥ ईक्षत्यधिकरणं सम्पूर्णम् ॥ ५ ॥

प्रकाशिका — उक्तमतद्वयदूषणेनैव यादवप्रकाशाधिकरणप्रमेयमपि निरस्तप्रायं मन्वानोऽधिकं वक्तुमाह ॥ यादवेति ॥ एकार्थकवाक्यभेदमात्रेण सूत्रभेदे जिज्ञासादिसूत्रभेदः स्यात् । जिज्ञासावाक्यानां कारणादिवाक्यानां च नानात्वादित्यर्थः । एतेन ''सदेवे''त्यादौ ''बहुस्या''मिति परिणामश्रवणात्सांख्योक्तं प्रधानमिति प्राप्ते ईक्षणात्मशब्दादेः शिव एव सत्पदवाच्यं कारणमिति सिद्धान्त इति केनचिदुक्तं निरस्तम् । समन्वयासङ्गतेः । सदीक्षतेरिति विन्यासापत्तेश्च । शिवकारणत्वस्योक्तवक्ष्यमाणानेकमानैः पत्युरधिकरणेन च विरोधाच्च । ईक्षतिकर्मेत्यत्रास्य वाक्यस्य विष्णुपरताया वक्ष्यमाणत्वाच्च । ''सर्वोत्तमत्वात्सन्नामा हरिर्नारायणः प्रभु''रित्यादिना छांदोग्यभाष्ये षष्ठे प्रमाणेनैवास्य वाक्यस्य विष्णुपरतया व्याख्यातत्वाच्च ।

''तेजोभिमानवान् ब्रह्मा वायुश्चाबभिमानवान् ।
रुद्रः क्षित्यभिमानी चाप्येतन्मयमिदं जगत् ॥

इत्यादिना ''इत्यादिब्रह्माण्ड'' इत्यन्तेन बृहदारण्यकभाष्ये प्रथमेऽध्यायेऽस्य प्रकरणस्य विष्णुपरतया स्पष्टमुक्तत्वाच्च । ''साधुत्वात्सन् हरिः स्मृत'' इत्याद्यनेकमानोदाहरणेनास्य प्रकरणस्य विष्णुपरतायास्तत्वनिर्णयेप्युक्तत्वाच्च । कारणत्वोपादानत्वयोः प्रधाने सत्त्वेन तन्निरासायोगाच्च । कर्तृत्वस्य सांख्येनानङ्गीकाराच्च । केवलप्रधाने तयोरभावे केवले शिवे तदभावस्य सुवचत्वाच्च । अशब्दमानुमानिकं न प्रधानं जगत्कारणमित्यध्याहाराद्यापाताच्च । गौण इति पुँल्लिङ्गायोगाच्च । प्रागुक्तवचनैर्भाष्योक्तदिशा चात्मशब्दस्य विष्णावेव मुख्यतया शिवपरत्वायोगाच्च । यदपि मास्त्वचेतनं सत्पदवाच्यम् । जीवस्तु स्यात् । ईक्षणात्मशब्दादेस्तत्र सम्भवादित्यतस्तन्निष्ठस्येति सूत्रमिति ॥ तदपि न । बहुस्यामिति प्रथमश्रुतबहुभवनविरोधेन जीवशङ्कानुदयात् । सांख्येन जीवकारणत्वानङ्गीकाराच्च । शिवस्यापि प्रागुक्तदिशा जन्मादिमत्तया जीवत्वेन ''परोहि पुरुषो विष्णुस्तस्मान्मोक्ष'' इति भाष्योक्तस्मृतिविरोधेन तन्निष्ठस्य मोक्षायोगाच्च । सूत्रान्तराण्यप्युक्तदिशा दूषितप्रायाणीति यत्किंचिदेतत् ॥

न केवलं टीकोक्तदिशा प्रयोगवशादेव साधुत्वं किन्तु ''यदि तत्स्यादगोचर'' मित्यनुव्याख्यानसुधोक्तदिशाऽवयववृत्त्या विशेष्यनिघ्नतयापीति भावेनाह ॥ उपलक्षणमिति ॥ गवामित्यस्यार्थो ज्ञानानामिति ॥ चरश्चरणमिति ॥ चरतेस्तृतीये ''ग्रहवृदृनिश्चिगमश्चे''ति

सूत्रे ''घञर्थेकविधान''मिति वार्तिकोक्त्या कप्रत्यये रूपम् । ''गोचरसंचरवहव्रजव्यजापणनिगमाश्चे''ति सूत्रे मञ्जर्यां ''रूढशब्दोयं विषयपर्यायः । तस्य यथाकथंचिन्निर्वचन''मित्युक्तेरिति भावः ॥ व्यधिकरणेति ॥ ''सप्तमीविशेषणे बहुव्रीहा''वित्यत्र द्वितीये ज्ञापितत्वादिति भावः ॥ अच्प्रत्ययेति ॥ ''अर्शआदिभ्योच्'' इति सूत्रादिति भावः । तेन ''गवां ज्ञानानां चरो वृत्तिरस्मिन्निति गोचर''मिति सुधावाक्यं द्वेधा योज्यमित्युक्तं भवति । एवमाश्रयणस्य फलान्तरमप्याह ॥ ततश्चेति ॥ अत एव सिद्धान्तेऽज्ञेयत्वस्य गत्युक्तिर्भाष्य इति भावः । एतेन कस्यचिदसाधुत्वकल्पनं प्रत्युक्तं बोध्यम् । अकुशलताच भाष्यकृतो निरस्ता । एतत्प्रयोजनाशयेन तदुक्तेरिति । ''परिशेषे''त्यादेरुद्ग्रन्थत्वभ्रमं निराह ॥ पूर्वमिति ॥ ''औपनिषदत्वा''दिति भाष्यमिति शेषः ॥ भेदमिति ॥ पररीत्येति भावः । नन्ववाच्यत्वनिरासाय ''श्रुतिस्मृतीचाहे''ति टीका न युक्ता । श्रुत्यादौ वाच्यत्वस्यावाच्यत्वनिरासस्य वाऽप्रतीतेरित्यत आह ॥ श्रुतीति ॥ आङो मुख्यार्थत्वादिति भावः ॥ अवधारणेति ॥ स्वस्यामुख्यत्वे मुख्यान्तरेवासति तदयोगादित्यर्थः । ननु सर्वैर्वेदैरहमेव लक्षणया वेद्य इत्यर्थः स्यादित्यत आह ॥ सर्वेति ॥ अनवस्थापातादिति भावः । ननु ''किंच मायये''ति टीका न युक्ता । प्राग्विशिष्टस्येक्षितृत्वोक्त्या मायया शुद्धस्येक्षणमित्यस्यानुक्त्या विकल्पानवकाशात् । विशिष्टस्यैवेत्थं विकल्पे ''आद्ये दृश्यत्वाद्यपि किं न स्या''दिति ग्रन्थायोगादित्यत आह ॥ नन्विति ॥ एतेनेक्षणमित्यस्येक्षित्रित्यर्थ उक्तो भवति। ''गौणग्रहण'' इत्यत्र गौणपदस्यामुख्यार्थत्वे पूर्वोत्तरासङ्गतेराह ॥ गौणेति ॥ स्वरूपेति कस्य स्वरूपत्वादीत्यत आह ॥ स्वरूपेति ॥ अस्फुटत्वादार्जवं व्यनक्ति ॥ आत्मेति ॥ तद्विषयत्वे चेतनाचेतनविषयत्वे । स्वभावस्य सदोषत्वानुभवात्कथं निर्दोषत्वमित्यत आह ॥ स्वभावेति ॥

वायुकर्तेत्यादीनां व्याख्येयादृष्टेराह ॥ यस्येति ॥ विश्व इति ॥ ''रूपोपन्यासा''दित्यत्र भाष्योक्तश्रुतौ यथा तथेत्यर्थः । ''सर्वपदार्थानां लक्षणायोग्यत्वान्न सपक्षसत्त्व''मित्यस्योपयोगादृष्टेराह ॥ ततश्चेति ॥ केवलव्यतिरेकिण एव प्रस्तुतत्वात् ''केवलान्वयिनि केवलव्यतिरेकिणि चोपाधिशङ्कानुदया''दिति कथमित्यत आह ॥ केवलान्वयिनीति ॥ ब्रह्मेति ॥ टीकायां केवलव्यतिरेकिप्रदर्शनमुपलक्षणमिति भावः । कथमनेन हेतुना केवलान्वयिन्युपाधिशङ्कानुदय इत्यत आह ॥ तदिति ॥ व्याप्त्यनिश्चयादिति ॥ हेतुसाध्ययोरिति भ्रमं निराह ॥ साध्येति ॥ किंनिबन्धनेति सामान्यशब्दस्याभिप्रायमाह ॥ कार्येति ॥

(प्रकाशिका)

अवाच्यस्येति ग्रन्थस्यानन्वयमाशङ्क्याह ॥ नन्विति ॥ लक्ष्यपरपदस्येति शङ्काभिप्रायं दुर्गमत्वादाह ॥ नन्विति ॥ शिष्टं स्पष्टमिति भावः । सूत्रार्थस्तु तद्ब्रह्माशब्दमवाच्यं न । ईक्षणीयत्वात् । किन्तु वाच्यमेवेति । ननु लाघवादीक्षतेर्वाच्यमित्येव कुतो नोक्तमिति चेत् ''अशब्दमस्पर्श''मिति श्रुत्यनुगमायेत्यवैहि । परपक्षनिरासस्वपक्षस्थापनयोर्द्वयोरपि लाभाय चेति ॥ छ ॥ ईक्षत्यधिकरणं सम्पूर्णम् ॥ ५ ॥

पाण्डुरङ्गि — ननु गोचरशब्दस्य नित्यपुँल्लिङ्गत्वेन न शब्दगोचर इति भाष्ये वक्तव्यम्। शब्दगोचरमिति कथमुक्तमित्यतः तत्समाधानार्थं टीकायां ''त्रयी न श्रुतिगोचरेति गोचरशब्दस्य विशेष्यलिङ्गतया प्रयोगान्न तच्छब्दगोचरमिति युक्त''मित्युक्तम् । तथाच सिद्धांत्यभिप्रेतवाच्यत्वसाधकेक्षणीयत्वस्यासिद्धिः । कथं शब्देनेक्षणासम्भवेपि मनसेक्षणीयत्वसम्भवादित्यत ईक्षणीयत्वासिद्धिकथनपरतया तद्व्याचष्टे ॥ उपलक्षणं चैतदिति ॥ वृत्तिरिति ॥ शब्दपरत्वे वृत्तिर्वाच्यवाचकभावसम्बन्धः ज्ञानपक्षे विषयविषयिभाव इति भावः । नन्वत्र शब्दवाच्यत्वमात्रस्यैव वक्तव्यत्वेन शब्दगोचरं नेत्यनेन ज्ञानाविषयत्वोपपादनमसङ्गतं पूर्वपक्ष्यनभिप्रेतत्वादित्यत आह ॥ ततश्चेति ॥ ननु ''परिशेषप्रमाणेन वाच्यत्वं साध्यत'' इति टीकायां वाच्यत्वसाधनार्थं स्वयमेव प्रमाणांतरमुच्यत इति प्रतीयते । तदयुक्तम् । भाष्यानारूढस्य स्वेन वक्तुमनुचितत्वादित्यतो भाष्यारूढमेवैतदित्याह ॥ पूर्वमिति ॥ श्रुतिस्मृती चाहेति टीकायां भाष्यकारेण वाच्यत्वसमर्थनार्थं श्रुतिस्मृती उदाहृते इत्युक्तम् । तत्र श्रुतौ वाच्यत्वप्रत्यायकपक्षाभावात् स्मृतावप्युक्तस्य वेद्यत्वस्य लक्षणयापि सम्भवात्कथं तयोरुदाहरणमित्यत आह ॥ श्रुताविति ॥ आङ्पूर्वकम्माधात्वर्थस्य सम्यगभ्यसनस्य वाच्यत्वं विनाऽसम्भवादिति भावः । तथाच स्मृतावपि लक्ष्यत्वेऽन्यस्य वाच्यत्वं वक्तव्यं तथाचावधारणानुपपत्तिरिति भावः ।

ननु लक्ष्यत्वेपि वेदतात्पर्यविषयत्वान्मुख्यवेद्यत्वं भविष्यतीत्यत आह ॥ सर्वेति ॥ ननु ''गौणग्रहणे बाधकस्ये''ति टीकायां गौणीवृत्तिविषय इति प्रतीयते । तथात्वे ''इतरज्ञापकस्याभावा''दित्ययुक्तम् । गौणस्यामुख्यत्वेनेतरस्य मुख्यत्वेन मुख्यार्थरूपसाधकसद्भावादित्यत आह ॥ गौणग्रहण इति ॥ आत्मशब्दो गौणार्थपरो न किंतु मुख्यार्थपर एवेत्यत्र द्वेवावेति श्रुत्युदाहरणं भाष्ये कृतं तत्र रूपशब्दस्यात्मनात्मनोः साधारण्यप्रतीतिं वारयितुं

''रूपशब्दःस्वरूपप्रतिमारूपाभिप्राय'' इत्युक्तं टीकायाम् । तत्र रूपशब्द आत्मनि प्रतिमाभिप्रायोऽनात्मनि स्वरूपाभिप्राय इति प्रतीयते । अतो व्याचष्टे ॥ आत्मनीति ॥ आत्मानात्मशब्दयोश्चेतनाचेतनविषयत्वमेव वक्तव्यम् । तथात्वे श्रुतेरार्जवं सम्भवतीत्युक्तम् । तदार्जवं कथमित्यत आह ॥ आत्मानात्मशब्दयोरिति ॥ ननु आत्मशब्दस्य जीवे मुख्यत्वे तत्र निर्दोषत्वादिकं कथमित्यतः ''स्वभावविषयत्वोपपत्ते''रित्युक्तम् । तदयुक्तम् । दोषित्वादेः स्वभावेन निर्दोषत्वासम्भवादित्यत आह ॥ जीवेति ॥ विष्णोर्मोक्षसाधनज्ञानविषयत्वप्रतिपादनायोदाहृतायां यस्येति श्रुतौ विश्वकृत्सर्वस्य कर्तेति पदयोः पौनरुक्त्यनिरासार्थं विश्वकृदित्येतद्वायुकर्तेति व्याख्यातम् । तत्र विश्वशब्दस्य वायावप्रसिद्धेः कथमित्यत आह ॥ यस्येति श्रुताविति ॥ प्रतिबुद्धानुवित्तशब्दयोः पौनरुक्त्यनिरासार्थं सर्वज्ञो ज्ञात इति पदद्वयं व्याख्यातम् । तत्र कस्य किं व्याख्यानमिति न प्रतीयते अत आह ॥ प्रतिबुद्धेत्यादिना ॥ बुधेः कर्तरि क्तप्रत्ययप्रयोगान्निष्पन्नस्य प्रतिबुद्धशब्दस्य सर्वज्ञ इति व्याख्यानमिति भावः । ननु लक्ष्यत्वाभावसाधकेऽनुनानेऽसाधारण्ये प्राप्ते तत्परिहारार्थं न सपक्षसत्त्वमित्युक्तम् । तत्र किमनेन कृतमिति न प्रतीयते । अत आह ॥ ततश्चेति ॥ ननु केवलान्वयिनीत्यादिटीकायां केवलान्वयिकेवलव्यतिरेकिणोरुपाधिशङ्का नोदेतीत्युक्तम् । तदयुक्तम् । वाच्यत्वसाधकत्वेन केवलान्वयिनोऽनुपन्यस्तत्वादित्यत आह ॥ केवलान्वयिनीति ॥ केवलान्वयिन्युपाधिशङ्कानुदयोपपादनार्थं ''तदविनाभाव्यभावत्वाभावा''दित्युक्तम् । तदयुक्तम् । तत्र साध्याभावाविनाभाव्यभावत्वाभावेपि साध्यव्यापकत्वेनोपाधिशङ्का स्यादेवेत्यत आह ॥ साध्याभावेति ॥ साध्याभावाविनाभूताभावप्रतियोगित्वाभावे साध्यव्यापकत्वमेव दुर्निर्णेयमिति भावः । व्यतिरेकिणि तदुपपादनार्थं सपक्षाभावेन व्याप्त्यनिश्चयादित्युक्तं तदयुक्तं तत्र सपक्षाभावेन सपक्षे व्याप्तिग्रहस्याप्यभावादित्यत आह ॥ साध्यव्यापकत्वेति ॥ ननु कार्यकारणभावादेर्व्याप्तिनिबन्धनत्वात्प्रकृते च तदभावान्न वाच्यत्वाभावेनालक्ष्यत्वसाधनमित्याशङ्क्य परिहरतीत्याह ॥ कार्येति ॥ ननु तत्र विपक्षे बाधकसत्वान्न व्याप्तिभङ्गः प्रकृते तदभावात्कथमेतदित्याशङ्क्य परिहरतीत्याह ॥ नन्विति ॥ छ ॥ इतीक्षत्यधिकरणम् ॥ ५ ॥

आनन्दमयाधिकरणम्

॥ ॐ आनन्दमयोभ्यासात् ॐ ॥ वैदिकाः शब्दास्तावच्चतुर्विधाः । अन्यत्रैव प्रसिद्धा उभयत्रप्रसिद्धा अन्यत्रप्रसिद्धास्तत्रप्रसिद्धा इति ॥ नन्वन्यत्रैव प्रसिद्धवत्तत्रैव प्रसिद्धा अपि पृथग्वाच्याः । न च तत्रेत्यनेन तत्रैवेति विवक्षितम् । अन्यथा तत्रापीति विवक्षापत्त्योभयत्र प्रसिद्धेष्वन्तर्भावः स्यात् । अत एव तत्रप्रसिद्धाः सुधायां ब्रह्मण्येव प्रसिद्धा इति निर्दिष्टा इति वाच्यम् । तथात्वेऽन्यत्रैव प्रसिद्धानां पार्थक्यायोगात् । ननु लोकतोऽन्यत्रैव प्रसिद्धा अन्यत्रप्रसिद्धाः श्रुत्यादिभिरन्यत्रैव प्रसिद्धास्त्वन्यत्रैव प्रसिद्धा इति भेदः । अत एव ''श्रुतिलिङ्गादिभिरन्यत्रैव प्रसिद्धाना''मिति चतुर्थपादे भाष्यम् ।

अत्र च प्रत्यधिकरणं लोकतोऽन्यत्रप्रसिद्धानामिति टीका च । तत्रप्रसिद्धानां तत्रैव प्रसिद्धानां चाव्युत्पाद्यसमन्वयत्वेनाभेदविवक्षेति चेन्न । अन्यत्रप्रसिद्धत्वेनाभिमतस्यानन्दमयादिनाम्नोऽन्यस्मिन्नर्थविशेषे सर्वगतत्वान्तर्यामित्वादिलिङ्गात्मकशब्दजातस्याप्यन्यत्रादित्यादौ । इन्द्राकाशादिशब्दानामिन्द्रादाविव लोकतो प्रसिध्याऽन्यत्रप्रसिद्धत्वाभावापातात् । प्रत्युतादित्यश्रुत्यादिना सर्वगतत्वादेरन्यत्रप्रसिद्धेर्वक्ष्यमाणत्वेनावरत्वादिलिङ्गेनान्यत्रैव प्रसिद्धाव्यक्तादिशब्दानामिवान्यत्रैव प्रसिद्धता स्यात् । यथा च सर्वगतत्वादेरन्यत्रप्रसिद्धिसाधकादित्यादिश्रुतिः अन्तर्यामित्वादेरन्यत्र प्रसिद्धिसाधकशरीरित्वादिलिङ्गं च लोकतोऽन्यत्रप्रसिद्धं तथाऽव्यक्तादिशब्दस्यान्यत्रप्रसिद्धिसाधकमवरत्वादिलिङ्गमपि लोकतोऽन्यत्रप्रसिद्धमेव ।

प्रकाशिका — ॥ अथ आनन्दमयाधिकरणम् ॥ ॐ आनन्दमयोभ्यासात् ॐ ॥ एतदध्यायसाफल्योक्तिपरां ''अथब्रह्मस्वरूपनिरूपण'' इत्यादिटीकां ''समन्वयसूत्रप्रतिज्ञातसमन्वयहेता''वित्यादिनाऽग्रे विवरिष्यंस्तर्ह्यध्यायस्य समन्वयरूपैकार्थत्वात्पादभेदः किं निबन्धन इत्यतः समन्वयेप्यवान्तरभेदेनेति भावेन पादोपाधीन्वक्तुं प्रवृत्तां ''शब्दास्तावच्चतुर्विधा'' इत्यादिटीकां प्रतीतानुपपत्तिनिरासेन समर्थयिष्यमाणोऽनुवदति । वैदिका इति ॥ वेदगता इत्यर्थः । ''वैदिकाः शब्दा'' इति सुधोक्त्या टीकास्थशब्दपदस्य वैदिकशब्दपरत्वमुक्तं भवति । लोकवेदाधिकरणन्यायेन वैदिकानामेव लौकिकत्वान्न ततो

भेदः । भाषाशब्दा एवात्र व्यावर्त्यंत इति भावः । समन्वयस्तु त्रिविधानामेवेति तावच्छब्दः । टीकारीत्या व्युत्क्रमेण निर्देशः । ''नन्विन्द्रादिशब्दानामन्यत्रैव प्रसिद्धानां विष्णौ समन्वयस्य प्रथमपाद एव सिद्धत्वाद्यर्थ इवायं पादः प्रतिभाति । न च तेषामन्यत्रैव प्रसिद्धत्वाभावः । तथासति तृतीयवैयर्थ्यात् । अन्यत्रैवान्यत्रापीत्यतः प्रकारान्तराभावा'' दिति चतुर्थपादीयशङ्काटीकां विवरितुं चातुर्विध्यमाक्षिपति ॥ नन्विति ॥ ''ब्रह्मण्येवे''ति सुधानुरोधाट्टीकास्थतत्रेत्यस्य तत्रैवेतिशङ्काव्याजेनोपपत्तिं वदन्नाह ॥ न च तत्रेति ॥ तथात्व इति ॥ तत्र तत्रैवेत्यनयोरभेदेऽन्यत्रप्रसिद्धानामन्यत्रैव प्रसिद्धानां च भेदो न स्यात् । अन्यथाऽन्यत्रापीति विवक्षापत्त्योभयत्र प्रसिद्धेष्वन्तर्भावः स्यादित्यर्थः । चतुर्थपादीयपरिहारटीकोक्तसमाधिविशेषविवक्षया समर्थयिष्यमाणो यथाश्रुतमाशङ्क्य निषेधति ॥ नन्विति ॥ इन्द्राकाशादिशब्दानामिन्द्रादिष्वेव लोकतोऽवगतेः अव्यक्तादिशब्दानामवरत्वादिलिङ्गादिनाऽन्यगतत्वस्यैव प्रतीतेश्चेति भावः ॥ सर्वगतत्वेति ॥ द्वितीयपादीयस्येत्यर्थः ॥ इन्द्रेति ॥ अन्तराद्यधिकरणोदाहरणानामित्यर्थः ॥ अन्यत्र प्रसिद्धत्वाभावेति ॥ तथाचान्यत्रप्रसिद्धलक्षणं तत्राव्याप्तमिति भावः । अन्यत्रैव प्रसिद्धानां लक्षणमतिव्याप्तमित्याह ॥ प्रत्युतेति ॥ आदिपदेनादितिश्रुत्यादिनाऽत्तृत्वादेरिति गृह्यते । ननु लिङ्गपादेऽन्यत्रैव प्रसिद्धिसम्पादकश्रुत्यादेर्लोकतोऽन्यत्र प्रसिद्धत्वं विवक्षितम् । अत एव टीकायां ''लोकतोन्यत्र प्रसिद्धादित्यादिश्रुतिसहपठितसर्वगतत्वलिङ्गे''त्याद्युक्तमित्यत आह ॥ यथाचेति ॥

पाण्डुरङ्गि — ॐ आनन्दमयोभ्यासात् ॐ ॥ नन्वस्मिन्नध्याये समन्वयरूपस्यैकस्यैवार्थस्य प्रतिपादनान्न पादभेदः सम्भवतीत्याशङ्कानिरासार्थं टीकोक्तमवान्तरार्थमाक्षिप्य समाधातुमवान्तरार्थभेदमादावाह ॥ वैदिका इति । तत्तुसमन्वयादित्यत्र संशब्दद्योत्यसकलशब्दसमन्वयो वैदिकानामेव शब्दानां नान्येषामिति वैदिका इत्युक्तम् । न केवलं शब्दानां चातुर्विध्यमेव कथ्यते किन्तु तत्समर्थनमपीति दर्शयितुं तावदित्युक्तम् ॥ नन्विति ॥ तथाच पञ्चविधा इति वक्तव्यम् । चातुर्विध्योक्तिरनुपपन्नेति भावः । चातुर्विध्योपपत्तिमाशङ्क्य परिहरति ॥ न चेति ॥ अन्यथेति ॥ तत्रेत्यनेन तत्रैवेत्यविवक्षायाम् । तत्रेत्यस्य तत्रैव तत्रापीति प्रकारद्वयातिरिक्तप्रकाराभावादिति भावः । तत्रेत्यनेन तत्रैवेति विवक्षायां ज्ञापकमाह ॥ अत एवेति ॥ तत्र प्रसिद्धा इत्यनेन तत्रैव प्रसिद्धानां विवक्षितत्वादेवेत्यर्थः । एकं सन्धित्सतोऽपरं प्रच्यवत इत्याह ॥ तथात्व इति ।

(पाण्डुरङ्गि)

अन्यत्रप्रसिद्धा इत्यनेनान्यत्रैव प्रसिद्धा इति विवक्षितम् । अन्यथाऽन्यत्रापीति पक्षापत्त्यो-भयत्रप्रसिद्धेष्वन्तर्भावः स्यादित्यन्यत्रैव प्रसिद्धानां ग्रहणे पौनरुक्त्यापत्त्या तत्परित्यागे त्रैविध्यमेव स्यादिति भावः । नन्वन्यत्रान्यत्रैवप्रसिद्धौ शब्दौ न यौगिकौ । किन्तु पारिभाषिकौ । अतो न साङ्कर्यमित्याशयेन शङ्कते ॥ नन्विति । लोकतः लोक-प्रसिद्धरूढ्याऽन्यत्रप्रसिद्धा इत्यर्थः । श्रुत्यादिभिः श्रुत्यादिप्रसिद्धरूढ्या इत्यर्थः । अस्मिन्नर्थे ज्ञापकमाह ॥ अत एवेति ॥ यद्यप्यत्र कस्मिन्नर्थे न भाष्यटीकयोः संमतित्वं तथाप्युक्तार्थे संमतित्वान्न समुच्चयार्थकशब्दानुपपत्तिः । नन्वेवं शब्दानां चातुर्विध्यं न स्यात् । अन्यत्रप्रसिद्धान्यत्रैवप्रसिद्धवत् लोकतस्तत्र प्राप्तास्तत्रप्रसिद्धाः श्रुतिलिङ्गादिभिस्तत्र प्राप्तास्तत्रैव प्रसिद्धा इति तत्रैव प्रसिद्धानां तत्र प्रसिद्धेभ्योऽन्यत्वेन तत्र प्रसिद्धेभ्योन्येषां तत्रैव प्रसिद्धानामपि पृथक् सत्वादित्यत आह ॥ तत्र प्रसिद्धानामिति ॥

अभेदविवक्षायां निमित्तमाह ॥ अव्युत्पाद्येति ॥ न व्युत्पाद्योऽव्युत्पाद्यः समन्वयो येषामिति बहुव्रीहिस्तेषां भावस्तत्वमिति । एवं तर्हि लोकप्रसिद्धरूढ्याऽन्यत्र प्रसिद्धत्वं श्रुत्यादिप्रसिद्धरूढ्याऽन्यत्रैव प्रसिद्धत्वमित्यन्यत्रान्यत्रैव प्रसिद्धशब्दलक्षणार्थः पर्यवसन्नः । स न युक्तः । अव्याप्त्यतिव्याप्तिग्रस्तत्वादित्याशयेन प्रथममव्याप्त्या दूषयति ॥ अन्यत्रेति ॥ अन्यत्र प्रसिद्धत्वेनाभिमतानन्दमयनाम्नोऽन्यस्मिन्नर्थविशेषे लोकतोऽप्रसिद्धत्वेत्यन्वयः । सर्वगतत्वादिलिङ्गजातस्यान्यत्रादित्यादौ लोकतोऽप्रसिद्धत्वेत्यन्वयः । इन्द्राकाशादीनामिवेति व्यतिरेकदृष्टान्तः । इन्द्राकाशादिशब्दानामिन्द्रे लोकतः प्रसिद्धत्ववदानन्दमयादिशब्दानां लोकतोऽन्यत्रप्रसिद्धत्वाभावादिति भावः । अन्यत्रैवप्रसिद्धलक्षणस्यान्यत्र प्रसिद्धेष्वति-व्याप्तिश्चेत्याह ॥ प्रत्युतेति ॥ तथाचान्यत्रैव प्रसिद्धलक्षणस्यातिव्याप्तिरिति भावः । ननु सर्वगतत्वादिलिङ्गानां स्वत एवान्यत्र प्रसिद्धेर्वक्ष्यमाणत्वेन कथमत्रादित्यादिश्रुति-साहित्येनान्यत्रप्रसिद्धत्वमुक्तमिति चेन्न । तत्रोक्तप्रथमद्वितीयपक्षानुसारेणास्योक्तत्वादिति भावः । ननु सर्वगतत्वादेरन्यत्रप्रसिद्धत्वं सम्भवत्येव । न च लोकतोन्यत्राप्रसिद्धत्वा-त्कथमन्यत्र प्रसिद्धतेति वाच्यम् । सर्वगतत्वादेरन्यत्र प्रसिद्धिसाधकादित्यादिश्रुतेरन्यत्र लोकप्रसिद्धत्वेन तस्याप्यन्यत्र प्रसिद्धतोपपत्तेः । तथाच नाव्याप्तिरित्यत आह ॥ यथाचेत्यादि ॥ तथाच लोकतोन्यत्र प्रसिद्धश्रुत्याद्यनुसारेणान्यत्रप्रसिद्धत्वरूपान्यत्र-प्रसिद्धलक्षणस्यान्यत्रैव प्रसिद्धेष्वतिव्याप्तिः स्यादिति भावः । तथाचाव्यक्तादिशब्दानामपि लोकतोऽन्यत्र प्रसिद्धत्वेनान्यत्र प्रसिद्धत्वापत्त्याऽन्यत्रैव प्रसिद्धत्वं न स्यादिति भावः ।

तात्पर्यचन्द्रिका

किञ्च अन्यत्रैव प्रसिद्धाव्यक्तप्रकृत्यादिशब्देष्वपि लोकतोऽप्यन्यत्र प्रसिद्धेस्सत्त्वात् अन्यत्रप्रसिद्धेंद्राकाशादिशब्देषु च श्रुत्यादिनाप्यन्यत्र प्रसिद्धेः सत्त्वात्साङ्कर्यं स्यात् । न च प्रबलश्रुतिलिङ्गादिभिरन्यत्रप्रसिद्धा अन्यत्रैव प्रसिद्धाः श्रुत्यादिमात्रेणान्यत्र प्रसिद्धास्त्वन्यत्रप्रसिद्धा इति भेदः । अव्यक्तादिशब्दानामन्यत्र प्रसिद्धिसाधकाव-रत्वादीनामिव गुहाप्रविष्टत्वादरेन्यत्र प्रसिद्धिसाधकद्वित्वादीनामप्येकस्मिन्ब्रह्मण्य सम्भवेन बलवत्त्वात् । तस्मान्नान्यत्र प्रसिद्धानामन्यत्रैव प्रसिद्धेभ्यो भेदः । किञ्चोभयत्र प्रसिद्धे द्युभ्वाद्यायतनत्वादिलिङ्गे ज्योतिरादिनाम्निच न तावल्लोकत उभयत्रप्रसिद्धिः । प्रकृत्यादौ तस्य लोकतोऽप्राप्तेः । नापि श्रुत्यादितः । तत्रैव टीकादौ वक्ष्यमाणत्वादिति युक्तम् । आनन्दमयेंद्राव्यक्तादिशब्देष्वपि पूर्वोत्तरपक्षश्रुत्यादि-नोभयत्र प्रसिद्धेर्वक्तुं शक्यत्वात् । तस्मादुभयत्र प्रसिद्धानामपि नान्यत्रप्रसिद्धादिभ्यो भेदः । किञ्चाकाशादिशब्दानां ''आकाशस्तल्लिङ्गा''दिति प्रथमे ''आकाशोर्थान्त-रत्वादिव्यपदेशा''दिति तृतीये ''कारणत्वेन चाकाशादि''ष्विति चतुर्थे च पादे समन्वयोक्तेरन्यत्रोभयत्रान्यत्रैवच प्रसिद्धता स्यात् ।

प्रकाशिका — प्रकारान्तरेणोभयलक्षणस्याप्यतिव्याप्तिमाह ॥ किञ्चेति ॥ यद्वा पूर्वमन्यत्रैव प्रसिद्धानां लक्षणं लिङ्गपादीयशब्देष्वतिव्याप्तमित्युक्तम् । इदानीमाद्यपादीयशब्दैः साङ्कर्यमाह ॥ किञ्चेति ॥ श्रुत्यादिनेति ॥ ''ब्रह्मेन्द्रमग्नि''मित्यग्निश्रुत्येन्द्रशब्दस्याग्नौ ''सर्वाणि हवा इमानि भूतानी''त्युक्तभूतोपादानत्वलिङ्गेनाकाशशब्दस्याकाशे प्रसिद्धेः सम्भवादिति भावः । ''पूर्वं क्वचित् श्रुत्यादिनैवान्यत्र प्रसिद्धसमन्वयोक्तावप्ये-तत्पादीयश्रुत्यादीनां प्राबल्या''दिति चतुर्थपादीयटीकोक्तमाशङ्क्य निरस्यति ॥ न चेति ॥ अव्यक्तेति ॥ चतुर्थपादीयानामित्यर्थः । अव्यक्तादिति पञ्चम्युक्तोत्कर्षावधित्वाक्षिप्तावर-त्वस्योत्तमे विष्णावयोगादिति भावः ॥ गुहेति ॥ ''गुहां प्रविष्टौ परमे परार्धे'' इत्यादिवाक्योक्तस्य द्वितीयपादीयस्येत्यर्थः । सूत्रोपात्तलिङ्गाभिप्रायेणेयमुक्तिः । ऋतपातृत्वस्यैव तत्र समन्वयात् । तृतीयपादोपाधिमपि निरसितुमाह ॥ किञ्चेति ॥ लोकतस्तथात्वं वा श्रुत्यादिभिर्वेति विकल्प्य क्रमेण प्रत्याह ॥ न तावदित्यादिना ॥ न हि द्युभ्वाद्यायतनपदेन प्रकृतरुद्रादिर्विष्णुर्वा ''ज्योतिर्दर्शना''दित्यादौ वक्ष्यमाणज्योतिश्शब्देन

(प्रकाशिका)

च जीवो विष्णुर्वा लोकतः प्रतीयत इति भावः ॥ पूर्वेति ॥ पूर्वपक्षप्रापकश्रुतिलिङ्गादिनाऽन्यत्रप्रसिद्धिः सिद्धान्तप्रापकश्रुत्यादिनाच भगवतीति सर्वेप्युभयत्रप्रसिद्धाः स्युरित्यर्थः । आनन्दमयेन्द्रादयः आदिपदोक्तसर्वगतत्वादिलिङ्गवाचिनश्चाद्यद्वितीयपादीयाश्चाव्यक्तज्योतिर्जीवपञ्चजनादयश्चतुर्थपादीया इति ध्येयम् । सामान्यतः पादोपाधीन्निरस्य विशिष्य निराह ॥ किञ्चेति ॥ आदिपदेन ''ज्योतिश्चरणाभिधाना''दिति प्रथमे ''ज्योतिर्दर्शना''दिति तृतीये ''ज्योतिरुपक्रमा''दिति चतुर्थे ज्योतिश्शब्दस्य समन्वयोक्तेः तथा ''अदृश्यत्वादिगुणक'' इति द्वितीये ''अक्षरमम्बरान्तधृते''रिति तृतीयेऽक्षरपदस्य समन्वयोक्तेरिति ग्राह्यम् ।

पाण्डुरङ्गि — ननु लोकतोन्यत्रप्रसिद्धा श्रुत्यादिनाऽन्यत्रप्रसिद्धा अन्यत्रैव प्रसिद्धा इत्येव लक्षणम् । न चाद्यस्यानन्दमयादिनाप्ति सर्वगतत्वादिलिङ्गेषु चाव्याप्तिः । अव्यक्तादिशब्देषु चातिव्याप्तिः । द्वितीयस्यापि सर्वगतत्वादिष्वतिव्याप्तिरिति वाच्यम् । ''विकारशब्दा''दिति न्यायेनानन्दमयनाम्नः ''अर्भकौकस्त्वा''दित्यादिवक्ष्यमाणन्यायेन सर्वगतत्वादिलिङ्गानामपि स्वत एवान्यत्र प्रसिद्धेर्वक्ष्यमाणत्वात् । अव्यक्तादिशब्दानां च न स्वतोऽन्यत्र प्रसिद्धिरिति नाव्याप्त्यतिव्याप्ती इत्यरुचेराह ॥ किञ्चेति ॥ तथाचाव्याप्त्यतिव्याप्ती अपरिहार्ये इति भावः । रीत्यन्तरेणासाङ्कर्यमाशङ्क्य परिहरति ॥ न चेति ॥ अन्यत्र प्रसिद्धिसाधकश्रुत्यादीनां प्राबल्यं हि विष्णावसम्भाव्यमानत्वं वाऽन्यद्वा । नांत्योऽनिर्वचनात् । नाद्यः । प्रकृतेपि साम्यादित्याह ॥ अव्यक्तादीति ॥ तथाच न तन्निबन्धनः पादभेदो युक्त इति भावः । एवमन्यत्रान्यत्रैवप्रसिद्धानां साङ्कर्यमुपपाद्योभयत्रप्रसिद्धानामपि तैः साङ्कर्यमुपपादयितुमाह ॥ किञ्चेति ॥ प्रकृत्यादाविति ॥ न हि लोकाः प्रकृत्यादिद्युभ्वायतनमिति व्यवहरन्तीति भावः ।

तात्पर्यचन्द्रिका

किञ्च रूढत्वयौगिकत्वाभ्यां हि नामलिङ्गभेदः । सुधायां तथैवोक्तेः । ''धर्मविशिष्टधर्मिवाचिना''मिति द्वितीयपादीयटीकायामपि यौगिकत्वं लिङ्गत्वमित्यभिप्रेतत्वाच्च । अत्रापि टीकायां धर्मधर्मिवाचिपदाभ्यां ते एव विवक्षिते । अन्यथा धर्मिवाचिनामन्तर्याम्यादिशब्दानां नामता धर्मवाचिनामानन्दादिशब्दानां लिङ्गताच स्यात् । स च भेदोऽयुक्तः । सर्वेषामपि ब्रह्मणि महायोगाङ्गीकारात् । न चापातप्रतीत्या रूढता । अन्नमयादिषु तदसम्भवात् । न च योगरूढियुक्तानि

नामानि केवलयौगिकानि लिङ्गानीति भेदः । सर्वेषां ब्रह्मणि विद्वद्ढूढेः । किञ्चान्यत्र प्रसिद्धानां नाम्नां लिङ्गानां चान्यत्रप्रसिद्धत्वाविशेषात्पादभेदो न स्यात् । अन्यथा तृतीय उभयत्रप्रसिद्धानां चतुर्थे चान्यत्रैव प्रसिद्धानां नाम्नां लिङ्गानां च समन्वयोक्तिर्न स्यात् । तस्मान्न पादभेदो युक्तः । नापि तत्क्रमः । महामल्लभङ्ग-न्यायेनातिप्रयत्नसाध्यस्य प्राथम्ये ह्यन्यत्रैव प्रसिद्धानां प्राथम्यं स्यात् । सोपाना-रोहणन्यायेनानतिप्रयत्नसाध्यस्य प्राथम्ये तूभयत्रप्रसिद्धानां प्राथम्यं स्यादित्यन्यत्र-प्रसिद्धानां पूर्वं समन्वयः । तत्रापि नाम्नां पूर्वमनन्तरं लिङ्गानां तदनन्तर-मुभयत्रप्रसिद्धानां अन्तेऽन्यत्रैव प्रसिद्धानामिति क्रमस्य सर्वथाप्ययोगादिति ॥

प्रकाशिका — आद्यद्वितीयपादोपाधिविभागं च निराह ॥ किञ्चेति ॥ सुधायामिति ॥ ''साक्षाद्धर्मिवाचिनो नामात्मकाः । धर्मद्वारा धर्मिणि वर्तमाना लिङ्गात्मका'' इत्येतदधि-करणे तथा लिङ्गपादस्यादौ ''नन्वतीतपादे समन्विता अपि लिङ्गात्मका एव यौगिकत्वादिति च स्पष्टमुक्तेरित्यर्थः ॥ अत्रापीति ॥ ''लिङ्गात्मकानां धर्मवा-चित्वान्नामात्मकेभ्यो धर्मिवाचिभ्य'' इत्येतदधिकरणटीकायामपीत्यर्थः ॥ ते इति ॥ यौगिकत्वरूढत्वे इत्यर्थः ॥ अन्तर्यामीति ॥ द्वितीयपादस्थानामन्तर्याम्यत्तृगुहाप्रविष्टादि-शब्दानां लिङ्गतयाऽभिमतत्वादिति भावः ॥ आनन्देति ॥ अत्र नये समन्वीयमाना-नामानन्दविज्ञानादिशब्दानां नामत्वादिति भावः । एतेन टीकावाक्ययोर्विरोधोपि निरस्तो बोध्यः । एतेन ''लिङ्गात्मकाश्च धर्मवचनाः व्यवधानेनान्यबुद्धिं जनयन्ति नामात्मकास्तु सत्ववचनाः साक्षादेवे''त्युपासनापादीयसुधावाक्यमपि व्याख्यातं बोध्यम् । ततः किमित्यत आह ॥ स चेति ॥ अत एव सुधायां लिङ्गपादे ''नन्वतीतपादे समन्विता अपि लिङ्गात्मका एव । यौगिकत्वात् । अन्यथा गुणपूर्त्यलाभेन समन्वयसमर्थनवैयर्थ्या'' दित्यादिना तथैवोक्तिः ''यच्छब्दा योगवृत्तय'' इत्यणुभाष्योक्तिश्चेति भावः । ''तथाप्यन्यत्र प्रसिद्धत्वादिवदापातप्रतीत्यनुरोधेनेयमुक्तिरित्यदोष'' इति सुधोक्तं परिहारं परिष्कर्तुकामो यथाश्रुतमनूद्य प्रत्याह ॥ न चेति ॥ तदिति ॥ योगार्थस्यैव तत्र प्रतीतेरिति भावः ॥ सर्वेषामिति ॥ ''सा योगादेव लभ्यत'' इत्युक्तेः । तथाच केवलयौगिकान्य-सम्भावितानीति भावः । अभ्युपेत्यापि नामलिङ्गभेदं पादभेदं निराह ॥ किञ्चेति ॥ ननु समन्वयेप्यवान्तरभेदेन पादभेद इति टीकोक्तदिशा भेदः स्यादित्यत आह ॥ अन्यथेति ॥ एतेन टीकोक्तमप्याक्षिप्तं बोध्यम् । ननु

(प्रकाशिका)

''तत्र प्रथमतोन्यत्र प्रसिद्धानां समन्वयः ।
शब्दानां वाच्य एवात्र महामल्लेशभङ्गवत् ॥''

इत्युपासनापादीयानुव्याख्यानोक्तेः कथं क्रमाक्षेप इत्यतस्तदनूद्य प्रत्याह ॥ महामल्लेति ॥ ''दुर्गमत्वाच्च नैवात्र प्राथम्ये चोदितेंजसे''त्यनुव्याख्यानानुरोधेनाह ॥ सोपानेति ॥ उभयत्रेति ॥ तेषामन्यत्रप्रसिद्धिनिरासमात्रस्यान्यत्रप्रसिद्धानां तत्प्रसिद्धिनिरासपूर्वकं भगवत्परत्वप्रतिपादनाल्लघुत्वादिति भावः । आद्य इतिशब्दो हेतौ । अंत्यः शङ्कासमाप्तौ ।

पाण्डुरङ्गि — एवं चतुर्विधशब्दानामपि साङ्कर्यमुपपाद्य नामात्मकत्वलिङ्गात्मकत्वाभ्यामपि तेषां भेदकथनमयुक्तमिति वक्तुमाह ॥ किञ्चेति ॥ टीकायां धर्मिवाचित्वं नामत्वमित्यभिप्रेतत्वादित्यतष्टीकावाक्यद्वयमन्यथा योजयति । धर्मं विशिष्टेत्यादि ॥ ननु तथाप्येतत्पादीयटीकायां रूढत्वयौगिकत्वरूपनामत्वलिङ्गत्वयोः कथमभिसंहितत्वमित्यत आह ॥ अत्रापीति ॥ एतत्पादीयटीकायामित्यर्थः । ते एव रूढत्वयौगिकत्वे एव । टीकाया यथास्थितार्थपरत्वे बाधकाभावादन्यत्र तात्पर्यकल्पनमनुचितमित्यत आह ॥ अन्यथेति ॥ न च धर्मविशिष्टेत्यनेन यौगिकत्वरूपलिङ्गत्वलाभः कथम् । घटशब्दस्य घटत्वविशिष्टघटवाचकत्वे यौगिकत्वाभावादिति वाच्यम् । अत्रहि धर्मशब्देनावयवव्युत्पत्तिलभ्यो गुणो विवक्षितः । गुणविशिष्टगुणिवाचकत्वं च न यौगिकत्वं विना लभ्यमिति यौगिकत्वरूपलिङ्गत्वमभिप्रेतमिति भावः । अस्त्वेवं सुधादिग्रन्थपर्यालोचनया नामलिङ्गभेदः ततः किमित्यत आह ॥ सचेति ॥ रूढत्वयौगिकत्वाभ्यां भेद इत्यर्थः ॥ सर्वेषामपीति ॥ अन्यथा गुणपूर्णत्वसिद्धिर्न स्यादिति भावः । ननु योगराहित्ये सति रूढत्वं नामत्वमिति न विवक्षितम् । किंत्वापातप्रतीत्या रूढत्वमित्याशङ्कच निषेधति ॥ न चेति ॥ तदसम्भवादिति ॥ अवयवार्थाप्रतीतिपूर्वकान्यार्थप्रतीत्यसम्भवादित्यर्थः ॥ न चेति ॥ न चान्नमयादिशब्देष्वतिव्याप्तिः । तेषां यौगिकत्वेन रूढ्यभावादिति वाच्यम् । तेषामपि कोशेषु रूढेः सत्वादिति भावः ॥ केवलेति ॥ रूढिरहितेत्यर्थः ॥ सर्वेषामिति ॥ तथाच द्वितीयमसम्भवीति भावः । ननु केवलशब्देन रूढिमात्रराहित्यं न विविक्षितम् । किन्तु लौकिकरूढिराहित्यम् । तथाच सर्वेषां शब्दानां ब्रह्मणि विद्वद्रूढौ विद्यमानायामपि लौकिकरूढिराहित्यस्य सत्त्वान्नासम्भवो लक्षणस्येति चेन्न । तथाप्यन्नमयादिशब्देष्वतिव्याप्त्यवारणात् । तेषां कोशेषु रूढेर्लोकसिद्धत्वाभावादिति भावः । अस्तु वा नामलिङ्गभेदः तथापि पादभेदो

न युक्त इत्याह ॥ किञ्चेति ॥ अन्यथेति ॥ नामलिङ्गत्वरूपविरुद्धधर्मवत्त्वेन पादभेदाङ्गीकार इत्यर्थः ॥ नापि तत्क्रम इति ॥ अन्यत्र प्रसिद्धनामात्मकानां प्रथमपादे लिङ्गात्मकानां तेषामेव द्वितीये तृतीये नामलिङ्गात्मकानामुभयत्र प्रसिद्धानां चतुर्थ उभयात्मकानामन्यत्रैव प्रसिद्धानामिति पादक्रमो नेत्यर्थः । महामल्लभङ्गेन वा स्यात्सोपानारोहणक्रमेण वा स्यात् । नाद्य इत्याह ॥ महामल्लेति ॥ न द्वितीय इत्याह ॥ सोपानेति ॥ फलितमाह ॥ अन्यत्रेति ॥ सर्वथेति ॥ उक्तन्याययोरन्यतरन्यायाश्रयणेनापीत्यर्थः ।

तात्पर्यचन्द्रिका

उच्यते ॥

श्रुत्यन्तरादिभिस्तुल्या ह्युभयस्मिन्प्रसिद्धता ।
श्रुत्यादितो लोकतो वापीतरेषु प्रसिद्धता ॥ १ ॥

बलवत् श्रुतिलिङ्गाद्यैरन्येष्वेव प्रसिद्धता ।
उभयत्र प्रसिद्धादेः क्रमाल्लक्षणमुच्यते ॥ २ ॥

यद्वा -

येषां प्रसिद्धिरन्यत्र केवलैव विरोधिनी ।
समन्वयस्योभयत्र प्रसिद्धास्तेहि कीर्तिताः ॥ १ ॥

येषां ब्रह्मण्यप्रसिद्धिः प्रसिद्धिश्चान्यवस्तुषु ।
विरोधिन्यौ हि तेऽन्यत्र प्रसिद्धाः कथिता इह ॥ २ ॥

येषामुक्तद्वयं ब्रह्मपरत्वस्यात्यशक्यता ।
इति तिस्रो विरोधिन्यस्तेऽन्यत्रैव प्रसिद्धकाः ॥ ३ ॥

येषां शब्दानां लोके ब्रह्मणीवान्यत्राप्यप्रयोगाद्व्यक्तिविशेषनिर्णयाय श्रुत्यंतरान्वेषणे श्रुत्यन्तरेऽन्यत्रेव ब्रह्मण्यपि प्रयोगात् श्रुत्यन्तरसाधारण्यं प्रवृत्तिनिमित्तादिसाधारण्यं वा पूर्वपक्षिणोपि संमतम् । अत एव येषां विषयवाक्य आपाततोन्योपस्थापनसमये तत्तुल्यतया च ब्रह्मोपस्थापकत्वं अत एव च येषां

(तात्पर्यचन्द्रिका)

ब्रह्मणिसमन्वयस्यान्योपस्थितिमात्रेण प्रतिबन्धः त उभयत्र प्रसिद्धाः । येषां तु वस्त्वंतरे लोकप्रसिध्यादेः सत्त्वात्तद्विरोधेन क्वापि ब्रह्मणि वृत्त्यादिकं पूर्वपक्षिणो न संमतं अत एव येषां विषयवाक्य आपाततोऽन्यमात्रोपस्थापकत्वं अत एव च येषां समन्वयस्यान्योपस्थितिब्रह्मानुपस्थितिभ्यामेव प्रतिबन्धः तेऽन्यत्र प्रसिद्धाः ।

येषां पुनर्वस्त्वंतरे लोकप्रसिद्धिस्तत्परत्वे प्रबलश्रुत्यादिकमप्यस्ति । अत एव येषां विषयवाक्य आपाततोत्यन्तमन्यमात्रोपस्थापकत्वम् अत एव च येषां समन्वयस्यान्योपस्थितिब्रह्मानुपस्थितिभ्यां ब्रह्मपरत्वस्यात्यशक्यकल्पनत्वशङ्कया चातितरां प्रतिबन्धस्तेन्यत्रैव प्रसिद्धाः । अत्र च सर्वत्र प्रत्येकं हेतुस्वरूपफलमुखेन लक्षणत्रयं विवक्षितम् । तत्र चाद्येन येषामित्यादिनाऽत एवेत्यतः पूर्वेण हेतुमुखं लक्षणमुक्तम् । द्वितीयेन येषामित्यादिनाऽत एवेत्यतः पूर्वेण स्वरूपमुखं अवशिष्टेन फलमुखम् । तत्र स्वरूपमुखानि द्वितीयानि लक्षणान्युभयत्रान्यत्रान्यत्रैवप्रसिद्धेति शब्दावयवार्थरूपाणि भाष्ये इहापि सङ्ग्रहश्लोके तत्तच्छब्दप्रयोगादेव सूचितानि । प्रथमानि तु टीकायामाद्यादिपादेषु लोकतोऽन्यत्र प्रसिद्धेत्यादिना त्रिविधप्रसिद्धिकारणकीर्तनात्सूचितानि । तृयीयान्यपि टीकाकृतोभयत्रप्रसिद्धेषु साधारण्यस्य सन्देहबीजतां तथान्यत्रप्रसिद्धेष्वन्यकोटेरन्यत्रप्रसिद्धितः प्राप्तिं तथान्यत्रैवप्रसिद्धेष्वन्यकोटेरन्यत्रैवप्रसिद्धितः प्राप्तिं च वदता समन्वयप्रतिबन्धतारतम्यसूचनात्सूचितानि । उक्तं हि ''यस्तानि प्रविभक्तानि हेतुरूपफलैः पृथ''गिति ।

प्रकाशिका — असङ्कीर्णलक्षणैरेव पादोपाधयोऽसङ्कीर्णा इति भावेन लक्षणानि सङ्गृह्णाति ॥ श्रुत्यन्तरेति ॥ सोपानारोहणन्यायेनायं निर्देशः । एकैकार्धेनैकैकस्य लक्षणमिति ध्येयम् । हेतुमुखलक्षणान्यभिधाय स्वरूपमुखानि फलमुखानि च तान्याह ॥ यद्वेति ॥ एकैकेन श्लोकेनैकैकस्य लक्षणमुच्यत इति विवेकः । विरोधिन्यौ समन्वयस्येत्यनुषङ्गः । एवमग्रेपि ॥ इहेति ॥ समन्वीयमानशब्देषु ॥ उक्तद्वयमिति ॥ ब्रह्मण्यप्रसिद्धिरन्यत्रप्रसिद्धिश्चेत्युक्तद्वयमत्यशक्यता चेत्यर्थः । कः स्वार्थे । श्रुत्यन्तरेति श्लोकोक्तलक्षणानां हेतुमुखत्वं विशदयन्नुत्तरश्लोकोक्तलक्षणानां स्वरूपमुखत्वं फलमुखत्वं च व्यञ्जयन् श्लोकान्व्याचष्टे ॥ येषां शब्दानामिति ॥ श्रुत्यन्तरेति द्युभ्वाद्यायतनत्वाद्यभिप्रायेण

प्रवृत्तीत्यक्षरादिशब्दाकूतेन । आदिपदादाकाशादिशब्दप्रयोगादिसाधारण्यं चेति ग्राह्यम् । एतेन श्रुत्यन्तरेत्यर्धं विवृतम् । हेतुमुखलक्षणमुक्त्वा स्वरूपमुखलक्षणमाह ॥ अत एवेति ॥ साधारण्यादेवेत्यर्थः । यद्यपीदं न श्लोके कण्ठत उक्तं तथाप्युभयत्रप्रसिद्धा इति शब्दप्रयोगात्सूचितमित्यग्रे व्यक्तम् । कण्ठोक्तमेव फलमुखलक्षणं विवृणोति ॥ अतएवेति ॥ उभयोपस्थापकत्वादेवेत्यर्थः । यद्वा साधारण्यादेवेत्येवार्थः । यद्वक्ष्यति ''इतरयोर्हेतु-मूलत्वा''दिति । समन्वयस्य ब्रह्मैव शक्तितात्पर्यविषय इत्येवंरूपस्य । एतेन येषां प्रसिद्धिरिति श्लोको विवृतः । अन्यत्र प्रसिद्धानां त्रिविधान्यपि लक्षणानि व्यनक्ति ॥ येषां त्विति ॥ लोकेति इन्द्राकाशादिशब्दाशयेन । आदिपदस्य सर्वगतत्वादेः श्रुत्यादिसाहचर्येण वस्त्वंतरे प्रसिद्धेः सत्त्वादित्यर्थः ॥ वृत्त्यादिकमिति ॥ वृत्तितात्पर्ये इत्यर्थः । एतेन श्रुत्यादितो लोकतो वेत्यर्धं विवृतम् । अन्यत्र प्रसिद्धपदप्रयोगसूचितं स्वरूपमुखलक्षणं विवृणोति ॥ अत एवेति ॥ ब्रह्मणि वृत्त्यभावादेवेत्यर्थः । फलमुखं तदाह ॥ अत एव चेति ॥ अन्यमात्रोपस्थापकत्वादेवेत्यर्थः न तु ब्रह्मपरत्वस्यात्यशक्यत्वेनापीत्येवकारार्थः । एतेन येषां ब्रह्मणीति श्लोको व्याख्यातः । अन्यत्रैव प्रसिद्धानां त्रिविधान्यपि लक्षणानि स्पष्टयति ॥ येषां पुनरिति ॥ तत्परत्वे वस्त्वंतरपरत्वे । एतच्चाव्यक्तादिशब्दाभिप्रायेण । एतेन बलवदित्यर्धं विवृतम् । स्वरूपमुखं तदाह ॥ अत एवेति ॥ अन्यपरत्वे प्रबलश्रुत्याद्युपेतत्वादित्यर्थः ॥ आपातत इति ॥ विमर्शे सति विष्णुमात्रोपस्थापकत्वादिति सर्वत्र बोध्यम् । फलमुखं तदाह ॥ अत एवेति ॥ अत्यन्तमन्यमात्रोपस्थापकत्वादेवेत्यर्थः । पूर्ववद्वार्थः । एतेन येषामुक्तं द्वयमिति श्लोको व्याख्यातः । नन्वत्र व्याख्याने साधारण्ये सत्यन्योपस्थापकत्वे सति ब्रह्मसमन्वयप्रतिबन्धवत्त्वादिरूपं विशिष्टमेकैकस्योपाधेर्लक्षणं भाति। तदयुक्तम् । व्यावर्त्याभावादित्यत आह ॥ अत्रचेति ॥ सर्वत्रेति ॥ त्रिविधोपाधिलक्षणजात इत्यर्थः । मुखशब्दः प्रत्येकमन्वेति । तद्विविच्याह ॥ तत्रचेति ॥ आद्येन त्रयेणेत्यर्थः ॥ अत एवेत्यत इति ॥ आद्येभ्योऽत एवेत्येतेभ्य इत्यर्थः ॥ हेतुमुखमिति ॥ उभयप्रसिद्ध्यादौ ये हेतवः श्रुत्यन्तरादिसाधारण्यं लौकिकप्रयोगादिबलवत् श्रुत्यादिकं च ते एव मुखमुपजीव्यमेषां तानि हेतुमुखानि त्रिविधोपाधिलक्षणानीत्यर्थः । एवमग्रेपि । एकवचनं समुदायाभिप्रायम् ॥ अवशिष्टेनेति ॥ द्वितीयात एव चेत्येतैरित्यर्थः । त्रिविधलक्षणत्रये ज्ञापकं वदन् श्लोके स्वरूपसुखस्यानुक्तिशङ्कां च प्रत्याह ॥ तत्रेति ॥ प्रथमानि त्विति ॥ हेतुमुखानीत्यर्थः ॥ आद्यादीति ॥ आद्यद्वये तृतीयचतुर्थपादयोश्चेत्यर्थः ।

(प्रकाशिका)

आद्ये ''लोकतोन्यत्रप्रसिद्धाकाशनाम्न'' इत्यादिना द्वितीये ''लोकतोन्यत्र प्रसिद्धादित्य-श्रुतिसहपठितसर्वगतत्वलिङ्गात्मकशब्दस्ये''त्यादिना तृतीये रुद्रो वाव लोकाधारः लोकाश्च लोकिनश्चालोकाश्चालोकिनश्च विष्णावेवोताश्चेत्यादिनोभयत्र प्रसिद्धद्युभ्वाद्यायतनत्वलिङ्गस्ये-त्यादिना चतुर्थे ''अवरत्वादिलिङ्गैर्भगवति विरुद्धतयाऽन्यत्रैव प्रसिद्धाव्यक्तादि-शब्दाना''मित्यादिना त्रिविधप्रसिद्धिषु कारणभूतलोकप्रसिद्धयादीनां कीर्तनादित्यर्थः ॥ साधारण्यस्येति ॥ तृतीये पाद इति भावः ॥ अन्यत्रेति ॥ आद्यद्वितीयपादयोः ॥ अन्यत्रैवेति ॥ चतुर्थपादे ।

पाण्डुरङ्गि — लक्षणासम्भवमुक्तं परिहरति ॥ उच्यत इत्यादिना ॥ नन्वन्यत्र प्रसिद्धानां समन्वयस्य प्रथमपाद उक्तत्वात्तत्क्रमेणैव लक्षणानि वक्तव्यानि । एवं चादावुभयत्र प्रसिद्धानामन्यत्रान्यत्रैव प्रसिद्धानामिति क्रमोल्लङ्घने को हेतुरिति चेन्न । उभयत्र प्रसिद्धानामन्यत्रप्रसिद्धिसाङ्कर्यस्य पश्चादुक्तत्वेन बुद्धिस्थत्वात्तल्लक्षणस्य प्रथमत उक्तिः । यद्वा उभयत्र प्रसिद्धानामन्यत्र प्रसिद्धत्वस्य सत्त्वात्तेषां साङ्कर्यं दुष्परिहरमिति प्रथमं शिष्यजिज्ञा-साविषयत्वात् प्रथमतस्तदुक्तिरिति । हेतुमुखानि लक्षणान्युक्त्वा फलमुखान्याह ॥ यद्वेति ॥ ननु नोभयत्रप्रसिद्धानामन्यत्रप्रसिद्धैः साङ्कर्यपरिहारः । अन्यत्रप्रसिद्धानामपि पूर्वोत्तरपक्ष-श्रुत्यादिनोभयत्रप्रसिद्धत्वात् । किं चाव्यक्तादिशब्दानामप्यन्यत्र प्रसिद्धिसाधकश्रुत्यादेरुक्तस्य विष्णावसम्भाव्यमानत्वरूपबलवत्त्वस्यान्यत्र प्रसिद्धेष्वपि पूर्वपक्ष्युक्तरीत्या सत्त्वेन न तेषामप्यन्योन्यमसाङ्कर्यम् । श्रुत्यन्तरादिभिरित्यत्रादिपदश्च व्यर्थ इत्यतः कारिकां व्याचष्टे ॥ येषामिति ॥ व्यक्तिविशेषनिर्णायेति ॥ अस्य शब्दस्य वाच्यो व्यक्तिविशेषोयमिति निर्णायेत्यर्थः । आदिपदेन प्रयोगकारणत्वादिपरिग्रहः ॥ अत एवेति ॥ उभयत्र प्रयोगादेवेत्यर्थः ॥ अत एवेति ॥ अन्यमात्रोपस्थितेर्विरोधित्वादेवेत्यर्थः । तथा चोभयत्र-प्रसिद्धेषु श्रुत्या तौल्यस्योभयसिद्धत्वात्तेषु संमत्यभावान्न साङ्कर्यमिति भावः ॥ अत एवेति ॥ ब्रह्मणि वृत्तेरसंमतत्वादेवेत्यर्थः ॥ अत एव चेति ॥ अन्यमात्रोपस्थापकत्वादेवेत्यर्थः ॥ अत एवेति ॥ अन्यत्र प्रबलश्रुतेः सत्त्वादेवेत्यर्थः ॥ अत एवेति ॥ अत्यन्तमन्यमात्रोप-स्थापकत्वादेवेत्यर्थः । नन्वेतेषामेकैकमेव लक्षणीयमिति प्रतीयते । तथैवेति चेन्न । व्यर्थविशेषणत्वापत्तेरित्यत आह ॥ अत्र चेति ॥ सङ्ग्रहव्याख्यान इत्यर्थः । प्रवृत्ति-निमित्तादिसाधारण्यमित्यनेन सङ्ग्रहश्लोकस्थश्रुत्यन्तरादिभिस्तुल्येत्यादिशब्दस्यार्थ उक्तो भवति । हेतुरूपफलमुखानि कियता ग्रन्थेनोक्तानीत्यत आह ॥ तत्र चेति ॥ ननु

भाष्यटीकासङ्गहेष्वनुक्तानि कथमेतान्युच्यन्त इत्यत आह ॥ तत्रेति ॥ अत्राभियुक्तसंमतिमाह ॥ उक्तं हीति ॥ य इति ॥ हेतुस्वरूपफलप्रविभक्तानि तानि लक्षणानि यो वेदेति पूर्वेण वाक्यशेषगतेन वेदेत्यनेनान्वयः ।

तात्पर्यचन्द्रिका

अत्र चेतरयोर्हेतुमूलत्वाद्धेतुः प्रदर्श्यते । उभयत्र प्रसिद्धानां हि द्युभ्वाद्यायतनत्वादीनां ''रुद्रो वाव लोकाधारः विष्णावेवोताश्च प्रोताश्चे''त्यादि श्रुत्यन्तरसाधारण्येन अक्षरादिशब्दानां प्रवृत्तिनिमित्तसाधारण्येन सदादिशब्दानां विषयवाक्यस्थकारणत्वादिधर्मसाधारण्येन ''आकाशोर्थान्तरत्वादि व्यपदेशा''दिति सूत्रविषये ''आकाशोवै नाम नामरूपयोर्निर्वहिते''ति वाक्यस्थाकाशशब्दे आकाशस्तल्लिङ्गादित्यत्र ब्रह्मण्यपि प्रयोगस्योक्तत्वात् प्रयोगसाधारण्येनोभयत्र प्रसिद्धिः । न तु पूर्वपक्षसिद्धान्तन्यायाभ्याम् । येन साङ्कर्यं स्यात् । तदुक्तेस्तु प्रागाकाशस्तल्लिङ्गादिति सूत्रविषयवाक्ये ''अस्य लोकस्य का गतिरित्याकाश इति होवाचे''त्यत्रान्यत्र प्रसिद्धिः । ''कारणत्वेन चाकाशादिष्वि''ति सूत्रविषयवाक्ये ''आत्मन आकाशस्सम्भूत'' इत्यत्र तु ब्रह्मलिङ्गाभावेन लोकतोन्यत्र प्रसिद्धेरबाधात्सम्भूतत्वादिविपरीतलिङ्गाच्चान्यत्रैव प्रसिद्धिरित्येकस्यैव प्रयोगभेदेन दशाभेदात्त्रितयं युक्तम् । यद्वा कारणत्वेनेत्यत्रावान्तरकारणत्वस्यैव समन्वय इति वक्ष्यते । एवं ज्योतिश्शब्दस्यापि ''ज्योतिश्चरणे''त्यत्रान्यत्र प्रसिद्धता ''ज्योतिर्दर्शना''दित्यत्रोभयत्र प्रसिद्धता ''ज्योतिरुपक्रमा''दित्यत्रान्यत्रैव प्रसिद्धतोह्या ।

प्रकाशिका — ॥ अत्र चेति ॥ त्रिविधोपाधीनां प्रत्येकं त्रिविधलक्षणत्रिकमध्य उत्तरद्विकत्रयस्याद्यत्रिकमूलकत्वस्यात एवेत्यादिना प्राग्विवृतत्वादाद्यत्रिकं तत्तत्पादीयोदाहरणनिष्ठतया प्रदर्श्य इत्यर्थः । तत्प्रदर्शने च पश्चात्तनद्विकत्रयस्यापि तज्ज्ञानं सुशकमिति भावः ॥ विष्णाविति ॥ ''लोकाश्च लोकिनश्चालोकाश्चालोकिनश्चे''ति पूर्वशेषः । साधारण्येनेत्यस्य सर्वस्योभयत्र प्रसिद्धिरिति वक्ष्यमाणेनान्वयः ॥ प्रवृत्तीति ॥ अविनाशित्वरूपप्रवृत्तीत्यर्थः । अक्षरनये तथोक्तेरिति भावः ॥ सदिति ॥ ''ईक्षतिकर्मव्यपदेशात्स'' इत्यत्र ''तत्तेजोसृजते''त्यादिकारणत्वसाधारण्येनेत्युक्तेरित्यर्थः । आदि

(प्रकाशिका)

पदादबाधितत्वाख्यसत्त्वरूपधर्मग्रहः । ब्रह्मप्रधानयोस्साधारण्येनेत्यर्थः । आकाशनये आकाशब्रह्मणोः प्रयोगसाधारण्येनेत्यर्थः । पूर्वोक्तं निराह ॥ नत्विति ॥ कम्पनादित्यत्र टीकायामेवमुक्तिं तु विवरिष्याम इति भावः । एतेनेत्युक्तरीत्या तथा सर्वत्रोभयप्रसिद्धेर्वक्तुं शक्यत्वादिति भावः । आकाशशब्दस्यान्यत्र प्रसिद्धत्वमप्युपपादयति ॥ उक्तेरिति ॥ आकाशनयसिद्धान्तन्यायेन ब्रह्मण्याकाशपदप्रयोगोक्तेः पूर्वमन्यत्र प्रसिद्धेरेव सत्त्वादिति भावः । अन्यत्रैव प्रसिद्धत्वं चाह ॥ कारणत्वेनेति ॥ सम्भूतत्वेति ॥ उत्पत्तिमत्त्वस्व-जन्यत्वादिरूपेत्यर्थः । एतेन यदि प्रयोगसाधारण्येनोभयत्र प्रसिद्धिस्तर्हि पूर्वमाकाशशब्दस्य ब्रह्मण्यपि प्रयोगस्योक्तत्वाच्चतुर्थपादीयस्य तथात्वं स्यादिति निरस्तम् । अन्यत्र प्रसिद्धेरबाधाद्विपरीतलिङ्गाच्चेत्युक्तेः । एतेन ''उत्पत्तिमत्त्वलिङ्गेनान्यत्रैव प्रसिद्धानामा-काशादिशब्दाना''मिति तत्रत्यं टीकावाक्यं समर्थितं ध्येयम् । ''अवान्तरं कारणं चे''त्यणुभाष्यानुरोधेन पक्षान्तरमाह ॥ यद्वेति ॥ तथा चाकाशपदस्य ब्रह्मणि प्रयोगसाधनात्पूर्वमन्यत्र प्रसिद्धता । तदनन्तरमुभयत्र प्रसिद्धतेति द्वैविध्यमेवेति भावः । ज्योतिश्शब्देपि त्रैविध्यं प्रयोगभेदेन दशाभेदाद्युक्तमित्याह ॥ एवमिति ॥ उक्तेः प्रागित्याद्युक्तरीतिरेवंशब्देन परामृश्यते । ननु ''ज्योतिश्चरणे''त्यतः पूर्वं ज्योतिश्शब्दस्य विष्णौ प्रयोगासिद्धेः ''ज्योतिर्हृदय आहितं य''दित्यग्निसूत्रस्थज्योतिश्शब्दस्यान्यत्र प्रसिद्ध-त्वेपि ''ज्योतिर्दर्शना''दित्यत्र ''प्राणेषु हृद्यन्तर्ज्योति''रिति काण्वश्रुतिस्थज्योतिश्शब्दस्य नोभयत्र प्रसिद्धता । तत्पूर्वपक्षे ज्योतिश्चरणेत्यत्रोक्तज्योतिषो विष्णुत्वाक्षेपेण विष्णौ प्रयोगस्य पूर्वपक्षिणोऽसंमतेः । ''आकाशोर्थान्तरत्वा''दित्यत्र तु पूर्वपक्षे तल्लिङ्गादित्य-त्रोक्तस्य आकाशशब्दस्य विष्णुत्वानाक्षेपेण तत्राकाशशब्दस्योभयत्र प्रसिद्धत्वोपपत्तेरिति चेन्न। प्रयोगसाधारण्येनोभयत्र प्रसिद्धत्वाभावेपि तत्साधारण्येनेव प्रवृत्तिनिमित्तसाधारण्ये-नाप्युभयत्र प्रसिद्ध्युपगमात् । जीवेशयोर्ज्ञानत्वरूपप्रवृत्तिहेतुसाधारण्येन तथात्वस्य च तत्र वक्ष्यमाणत्वात् ।

नन्वथापि ''ज्योतिरुपक्रमादित्यत्र पूर्वं विष्णौ प्रयोगस्योक्तत्वात्तस्य च तत्पूर्व-पक्षेऽनाक्षेपात्तत्रत्यज्योतिश्शब्दस्य पूर्वं विष्णौ प्रयोगस्य पूर्वपक्षिणोपि संमतेरुभयत्र प्रसिद्धता स्यादिति चेन्न । ''वसन्ते वसन्ते ज्योतिषे''त्यत्र ब्रह्मलिङ्गाभावेन लोकतोन्यत्र प्रसिद्धेरबाधात्कर्मक्रमादिलोपप्रसङ्गरूपप्रबलबाधकाच्चान्यत्रैव प्रसिद्धिरित्युक्तप्रायत्वात् । ज्योतिष्टोमवसन्तादिशब्दानामपि तत्र समन्वयेन ज्योतिश्शब्दमात्रसमन्वयानुक्तेरिति भावः ।

वक्ष्यते चैतत्पादान्त्यप्राणनये । एवमक्षरशब्दस्याक्षरनय एव समन्वयः । अदृश्यत्वनये तु तत्साहित्येनान्यत्र प्रसिद्धलिङ्गानामेव समन्वय इति बोध्यम् । अदृश्यत्वादिगुणकमक्षरमिति चन्द्रिकायां धर्मित्वेनाकरोपादानं तु विशेष्यप्रदर्शनार्थम् । तात्पर्यं तु गुणजात एव । अक्षर-नये तस्य विष्णौ समन्वयेपीह ''अक्षरात्सम्भवती''त्युक्तविश्वोपादानत्वरूपबाधकेन प्रकृतौ ''कूटस्थोक्षर उच्यत'' इत्यादिस्मृतिसिद्धप्रसिद्धिबाधोन युक्त इत्यादि युक्तिं वक्तुं वेति ।

पाण्डुरङ्गि — हेतुमूलमेव लक्षणं प्रदर्श्यते । तत्र किं निमित्तमित्यत आह ॥ अत्र चेति ॥ इतरयोः स्वरूपफलमुखलक्षणयोरित्यर्थः । नन्वेवमेकस्यैवाकाशशब्दस्यान्यत्रोभय-त्रान्यत्रैव प्रसिद्धता स्यादित्युक्तबाधकं परिहरन्नेवोभयत्र प्रसिद्धानामन्यत्र प्रसिद्धेभ्यो भेदमुपपादयितुं श्रुत्यन्तरसाधारण्यादेरुभयत्र प्रसिद्धिसाधकत्वं तावद्दर्शयति ॥ उभयत्र प्रसिद्धानां हीत्यादि ॥ अत्र लक्षणकथनक्रमेणोपपादनान्न विरोधः । यद्वा नन्वेवमुभयत्र प्रसिद्धानां लक्षणानि । तथाप्युभयत्र प्रसिद्धानां नान्यत्र प्रसिद्धेभ्यो भेदः । पूर्वपक्षसिद्धान्तोक्तरीत्योभयत्र प्रसिद्धेस्तुल्यत्वादित्यत उभयवादिसंमतश्रुत्यन्तरसाधारण्यादि-नैवोभयत्र प्रसिद्धिरित्याह ॥ उभयत्र प्रसिद्धानां हीत्यादि ॥ श्रुत्यन्तरसाधारण्येनोभयत्र प्रसिद्धिरित्यन्वयः । एवमुत्तरत्रापि । न चाकाशशब्दस्य कथमुभयत्र प्रसिद्धिरिति वाच्यम् । लोकतोन्यत्र प्रसिद्धेस्तल्लिङ्गादिति न्यायेन ब्रह्मण्यपि प्रयोगादित्याह ॥ आकाश इति ॥ एवमाकाशशब्दस्योभयत्र प्रसिद्धिमुपपाद्य कथं तर्हि तस्यान्यत्र प्रसिद्धत्वं तल्लिङ्गादिति न्यायेन ब्रह्मण्यपि प्रसिद्धत्वेनोभयत्र प्रसिद्धत्वादित्यत आह ॥ तदुक्तेरिति ॥ तथाचैतदधि-करणप्रवृत्त्यनन्तरं ब्रह्मण्यप्याकाशशब्दस्य प्रसिद्धत्वेप्याकाशस्तल्लिङ्गादिति न्यायप्रवृत्तेः पूर्वं तत्सूत्रपूर्वपक्षदशायामन्यत्र प्रसिद्धत्वेन ब्रह्मण्यप्रसिद्धत्वेनान्यत्र प्रसिद्धत्वोपपत्तेरिति भावः । कथं तर्ह्यन्यत्रैव प्रसिद्धत्वं पूर्वोक्तन्यायेन ब्रह्मण्यपि प्रसिद्धत्वेन येषामुक्तद्वयमित्यादि-नोक्तस्यान्यत्र प्रसिद्धलक्षणानाक्रान्तत्वात्तस्यान्यत्र प्रसिद्धत्वेपि ब्रह्मण्यप्रसिद्धत्वाभावादि-त्यत आह ॥ कारणत्वेनेत्यादि ॥

अयं भावः । आकाशशब्दोप्यन्यत्रैव प्रसिद्धः । न च ब्रह्मण्यप्रसिद्धिर्नास्तीति वाच्यम् । तस्यापि ब्रह्मण्यप्रसिद्धत्वात् । न च तल्लिङ्गादिति न्यायेन ब्रह्मणि प्रसिद्धिरुक्तेति वाच्यम् । सति हि ब्रह्मलिङ्गे ब्रह्मपरत्वमिति हि तन्न्यायः । अत एवाकाशो वै नामरूपेत्यादौ नामरूपनिर्वाहकत्वरूपब्रह्मलिङ्गसद्भावेनाकाशशब्दस्य ब्रह्मपरत्वमाश्रितम् । न चात्र

(पाण्डुरङ्गि)

ब्रह्मलिङ्गमस्ति । किन्तु तल्लिङ्गादिति न्यायात्प्रागिवात्राप्यबाधितान्यत्र प्रसिद्धेः सम्भूतत्वादिलिङ्गसाहित्येन बलवत्त्वादन्यत्रैव प्रसिद्धत्वमिति । एवमन्यत्रैव प्रसिद्धिसम्पादिके तत्राप्रसिद्धचन्यत्रप्रसिद्धी उपपाद्य ब्रह्मपरत्वेऽन्यशक्यत्वमप्याह ॥ सम्भूतत्वादीति ॥ प्रयोगभेदेनेति ॥ विषयवाक्यभेदेनेत्यर्थः । ननूभयत्र प्रसिद्धिप्रयोजकीभूतप्रयोगसाधारण्यस्योक्तन्यायेनात्रापि सत्त्वादुभयत्र प्रसिद्धत्वं स्यादेव । अन्यथा विषयवाक्यगताकाशशब्दस्य ब्रह्मणि प्रयोगाभावस्य च सिद्धान्ते क्वाप्यसम्भवात्, ब्रह्मलिङ्गाभावस्य च सिद्धान्ते क्वाप्यभावात् पूर्वपक्षे तु सर्वत्र सत्वात्पूर्वपक्षसिद्धान्तानुदयात् । अत एव विपरीतलिङ्गानां पूर्वपक्षे सर्वसाधारण्यात्सिद्धान्ते तदभावस्यापि साधारण्यात्पूर्वत्राप्युत्तरत्र प्रसिद्ध्योपपत्तेरिति चेन्न । श्रुत्यादेः प्राबल्यं हीत्यादिवक्ष्यमाणन्यायेन तृतीयपादे भूताकाशप्रापकवैनामेति निपातद्योतितलोकप्रसिद्ध्यापन्नाकाशश्रुतेः सिद्धान्तेऽमुख्ययापि वृत्त्याऽन्यपरत्वाभावेऽनुपपत्त्यभावेन दुर्बलत्वात् । चतुर्थे तु तस्याप्राबल्यादुभयत्र प्रयोगाविशेषेऽतिव्याप्त्यभावात् । एतदेवाभिप्रेत्य विपरीतलिङ्गाच्चेति प्रोक्तमिति ज्ञातव्यम् । नन्वेवमन्यत्रैव प्रसिद्धलक्षणाक्रान्तत्वेनान्यत्रैव प्रसिद्धत्वेपि ब्रह्मण्यपि प्रसिद्धत्वादुभयत्र प्रसिद्धता स्यादेवेत्यत आह ॥ यद्वेति ॥ यद्वा एवं पूर्वोत्तरपक्षयोः श्रुत्यादीनां प्राबल्यतदभावविवक्षया परस्परमतिव्याप्तिपरिहारेपि पक्षान्तरमाह ॥ यद्वेति ॥ भूतपराकाशशब्दस्येव ज्ञानवाचकज्योतिश्शब्दस्य प्राक् समन्वयाप्रतिपादनात्कथं तस्य तृतीय उभयत्र प्रसिद्धत्वं कथं च विरुद्धमन्यत्रान्यत्रैव प्रसिद्धत्वं चेत्यभ्यधिकाशङ्कायामुक्तमेवातिदिशति ॥ एवमिति ॥ ज्योतिश्शब्दस्य पूर्वं समन्वयापादितप्रयोगाभावे ज्ञानरूपप्रवृत्तिनिमित्तसाधारण्येनोभयत्र प्रसिद्धेर्वक्ष्यमाणत्वात्साधारण्यमात्रांशेऽतिदेशः । एवं कर्मवाचकस्य पूर्वमसमन्वितस्यैव ज्योतिश्शब्दस्यावान्तरकारणस्येव प्रतिपादनात्सिद्धान्तेप्यन्यपरत्वाद्वाऽतिदेशः ।

तात्पर्यचन्द्रिका

अन्यत्रप्रसिद्धानां त्विंद्रादिशब्दानां लोकतः सर्वगतत्वादिलिङ्गानां च लोकतोन्यत्र प्रसिद्धादित्यादिश्रुत्यादिसाहचर्येणान्यत्र प्रसिद्धिः । न तूभयत्र प्रसिद्धानामिव ब्रह्मसाधारणश्रुत्यन्तरादिनाऽन्यत्र प्रसिद्धिः । तच्च श्रुत्यादिकं चतुर्थपादीयश्रुत्यादिवन्न प्रबलम् । श्रुत्यादेः प्राबल्यं हि प्रवृत्तिनिमित्तस्य तदधीनत्वादिना ब्रह्मणि शब्दस्य

परममुख्यत्वेपि तस्य शब्दस्य तद्युक्तवाक्यस्य वाऽपरममुख्यवृत्त्याऽन्यपरत्वं विनाऽनुपपद्यमानत्वम् । नत्वापाततो ब्रह्मण्यसम्भवमात्रम् । येन द्वित्वादिकमपि बलवत्स्यात् । नापि सर्वथाऽसम्भवः । येन सिद्धान्तानुदयः स्यात् । न हि ''गुहां प्रविष्टा''वित्यादिषु द्विवचनं तद्युक्तवाक्यं वाऽपरममुख्यवृत्त्याप्यन्यपरम् । अन्यत्रैव प्रसिद्धेषु च ''अव्यक्तात्पुरुषः परः, वसन्ते वसन्ते ज्योतिषा यजेते''त्यादिष्वव्यक्तादिशब्दस्तद्युक्तं वाक्यं वाऽपरममुख्यवृत्त्याऽन्यपरमेव । अन्यथा देवतातारतम्यकर्मादि न सिद्धचेत् । वाक्यान्तरस्याप्येतत्तुल्यत्वात् । अत एव ''कामादितरत्र तत्र चायतनादिभ्य'' इत्यधिकरणेऽपरममुख्यवृत्त्याश्रितत्वपरत्वेन भाष्योदाहृतं ''सैषा प्रकृतिरविकृति''रिति वाक्यमेव प्रकृत्यधिकरणे टीकायामुदाहृतम् । एवं च ''एतेन सर्वे व्याख्याता'' इत्यत्राप्यपरममुख्यवृत्त्याऽन्यपरवाक्यस्था एवासदादिशब्दा उदाहार्याः । प्रकरणात् । भाष्ये वाक्यविशेषानुपादानाच्च ।

प्रकाशिका — एवमुभयत्र प्रसिद्धानां श्रुत्यन्तरादिसाधारण्यरूपहेतुमुपलक्षणं लक्ष्यनिष्ठतया प्रदर्श्यान्यत्र प्रसिद्धानामपि तद्दर्शयति ॥ अन्यत्रेति ॥ लोकत इति ॥ अन्यत्र प्रसिद्धिरित्यन्वयः । श्रुत्यादिसाहचर्येणान्यत्र प्रसिद्धत्वे उभयत्र प्रसिद्धसाङ्कर्यं स्यादित्यतो विशेषणव्यावर्त्यमाह ॥ नत्विति ॥ अन्यत्रैव प्रसिद्धसाङ्कर्यमपि नेत्याह ॥ तच्चेति ॥ ननु प्राबल्यसाङ्कर्यमपि प्रागुक्तमित्यत आह ॥ प्राबल्यं हीति ॥ द्वित्वादिकमपीति ॥ तथाच ''ऋतं पिबन्ता''वित्यादीनामन्यत्र प्रसिद्धत्वसिद्धिरिति भावः ॥ नापीति ॥ ब्रह्मणीत्यनुषङ्गः । विवक्षितं प्राबल्यं द्वित्वादियुक्तवाक्ये नास्ति वसन्तादिवाक्येष्वस्तीत्युपपादयति ॥ नहीति ॥ अन्यत्रैवेति च ॥ एतेनान्यत्रैव प्रसिद्धानां बलवत् श्रुतीत्यादिनोक्तं हेतुमुखलक्षणं लक्ष्यनिष्ठत्वेनोपदर्शितं भवति ॥ अन्यथेति ॥ अव्यक्तनयोदाहरणे ''इन्द्रियेभ्यः परा ह्यर्था'' इत्यादिश्रुताविन्द्रियादिपदानां केवलब्रह्मपरत्वे इन्द्रियार्थादिदेवतातारतम्यं न सिध्येत् । एवं वसन्तादिवाक्येपि कर्मक्रमादिसिद्धिर्न स्यात् । देवतातारतम्यकर्मादिबोधकवाक्यान्तरस्यापि ब्रह्मपरत्वावश्यंभावादित्यर्थः ॥ अत एवेति ॥ मुख्यामुख्यवृत्त्याऽर्थद्वयस्यावश्यकत्वादेवेत्यर्थः । उपासनापादे कामादिचतुर्विंशतितमेधिकरणे श्रीरुपासनायामधिकारिणी न वेति सन्देहे सीतारुक्मिण्यादिरूपेण श्रियोपि जन्ममरणादिदृष्ट्या संसारित्वेन साधुत्वे सति संसारित्वादधिकारिणीति प्राप्ते

(प्रकाशिका)

''सर्वायतना सर्वकाला सर्वस्थानबद्धा बन्धिका सैषे''ति श्रुतौ सर्वगतत्वनित्यत्वाद्यभिधानेन जननादेरवतारादित्वेन संसारित्वाभावान्न श्रीरधिकारिणीति तत्परतयोदाहृतं वाक्यं प्रकृत्यधिकरण उदाहृत्य विष्णुपरत्वं समर्थितमित्यर्थः । नन्वेवं चतुर्थपादान्त्याधिकरणे कथं चिदप्यन्यपरत्वशून्यवाक्यस्य टीकायामुदाहृतेः कथमेवमित्यत आह ॥ एवं चेति ॥ प्रकरणादिति ॥ पूर्वाधिकरणेषु तादृशानामेवोदाहरणादिति भावः ॥ अन्यपरत्वरहितस्येति ॥ तथा च पूर्वपक्षिणं प्रति युक्तिसूचनार्थं तदित्युक्तं भवति ।

पाण्डुरङ्गि — नन्वेवमप्युभयत्र प्रसिद्धवत्साधारणश्रुत्यादिना प्रसिद्धेरन्यत्र प्रसिद्धेष्वपि सत्त्वेन साङ्कर्यं स्यादेवेत्यत आह ॥ अन्यत्र प्रसिद्धानां त्विति ॥ ननु तथाप्यन्यत्र प्रसिद्धानां नान्यत्रैव प्रसिद्धेभ्यो भेदः । तेषामन्यत्र प्रसिद्धिसाधकश्रुत्यादेरुभयत्र तुल्यत्वादित्यतोऽन्यत्रैव प्रसिद्धिसम्पादकश्रुत्यादिप्राबल्यवन्नान्यत्र प्रसिद्धिसम्पादकश्रुत्यादेः प्राबल्यमित्याह ॥ तच्चेति ॥ अन्यत्र प्रसिद्धिसम्पादकश्रुत्यादिकमित्यर्थः । ननु श्रुत्यादेः प्रबलत्वं किमापाततो ब्रह्मण्यसम्भवमात्रं सर्वथाऽसम्भवो वा । नाद्यः । द्वित्वादीनां प्रबलत्वापातात् । नांत्यः । सिद्धान्तानुदयापातादित्यत आह ॥ श्रुत्यादेः प्राबल्यं हीति ॥ तथाच यथाकथंचिदन्यपरत्वं विनाऽनुपपद्यमानत्वमेव श्रुत्यादेः प्राबल्यं विवक्षितम् । न तूभयविधमिति नातिप्रसङ्ग इति भावः । ननु विवक्षितं प्राबल्यं द्वित्वादावप्यस्त्येवेत्यत आह ॥ नहीति ॥ ननु यथाकथं-चिदन्यपरत्वं विनानुपपद्यमानत्वमन्यत्र प्रसिद्धेषु नास्तीत्यसम्भव इत्यत आह ॥ अन्यत्रैव प्रसिद्धेष्विति ॥ अन्यथेति ॥ अव्यक्तात् पुरुषः परः वसन्ते वसन्ते ज्योतिषा यजेतेत्यादेर-मुख्यवृत्त्याऽन्यपरत्वानङ्गीकार इत्यर्थः । तत्राव्यक्तात्पुरुषः पर इत्यस्य वाक्यस्याऽमुख्य-वृत्त्याऽन्यपरत्वाभावे तारतम्यं न सिध्येत् । वसन्त इत्यादेरमुख्यवृत्त्याऽन्यपरत्वाभावे कर्मादिर्न सिध्येदिति सम्बन्धो बोद्धव्यः ।

नन्वव्यक्तात्पुरुषः परः वसन्ते वसन्ते ज्योतिषा यजेतेत्यादेरमुख्यवृत्त्याऽन्यपरत्वाभावेपि न देवतातारतम्याद्यसिद्धिः । वाक्यान्तरेण तत्सिद्ध्युपपत्तेरित्यत आह ॥ वाक्यान्तरस्येति ॥ तथाचाव्यक्तात्पुरुषः पर इत्यादिवद्वाक्यान्तरस्यापि ब्रह्मपरत्वेनाऽव्यक्तादिवाक्या-नामन्यपरत्वाभावे वाक्यान्तरस्याप्यन्यपरत्वाभावापातेन तेनापि सिद्धेरसम्भवात्तस्याप्य-मुख्यवृत्त्याऽन्यपरत्वमाश्रीयते चेदव्यक्तादेरपि तदस्तु लाघवादिति भावः ॥ अत एवेति ॥ परमुख्यया वृत्त्या ब्रह्मपरत्वेप्यमुख्यया वृत्त्याऽन्यपरत्वस्य विद्यमानत्वादेवेत्यर्थः । ननु

तस्यान्यपरत्वाभावादेव तदुदाहरणमित्यत आह ॥ कामादितरत्रेति ॥ नन्वेवमन्यत्रैव प्रसिद्धनामलिङ्गात्मकशब्दानां समन्वयप्रतिपादके चतुर्थपादे एतेन सर्वे व्याख्याता इत्यधिकरणप्रवेशो न स्यात् । तद्विषयवाक्यस्थासदादिशब्दानां परममुख्यया वृत्त्या ब्रह्मपरत्वे सत्यन्यपरत्वरूपबलवत्त्वाभावेन बलवत् श्रुतिलिङ्गादिभिरन्यत्रप्रसिद्धत्वरूपान्यत्रैव प्रसिद्धत्वाभावादित्यत आह ॥ एवं चेति ॥ ननु तर्ह्यसद्वा इत्यादिवाक्योदाहरणं न स्यादित्यतः किं भाष्ये न स्याट्टीकायां वा । नाद्य इत्याह ॥ भाष्य इति ॥

तात्पर्यचन्द्रिका

टीकायां ''असद्वा इदमग्र आसी''दित्यस्यापरममुख्यवृत्त्याप्यन्यपरत्वरहितस्योदाहरणं तु क्वचित् श्रुतावसच्छब्दस्य शून्ये मुख्यत्वे ब्रह्मणि चामुख्यत्वे ''असद्वा इदमग्र'' इत्यत्रापि मुख्यार्थत्वाय शून्यमेव गृह्येतेति दर्शयितुम् । अथ वा ब्रह्मपरत्वे बहुविप्लवापत्तिरूपतर्कानुगृहीतत्वं बलवत्त्वम् । बहुविप्लवापत्तिश्चतुर्थपादीयाधिकरणेषु तत्र तत्रैव टीकायां वक्ष्यते । श्रुत्यादिभिरन्यत्रैव प्रसिद्धानामिति चतुर्थपादीयभाष्ये तु ब्रह्मणि वृत्तेरत्यन्तासम्भावितत्वरूपस्योक्तद्विविधबलवत्त्वकार्यस्यावधारणेन विवक्षिततयाऽतिव्याप्तेरभावेन तत्परिहारार्थं बलवत्पदं न प्रयुक्तम् । चतुर्थपादीयटीकायां तु भाष्योक्तावधारणनिर्वाहकेन बलवत्त्वेनैवातिव्याप्तिः परिहृतेति दिक् ॥

प्रकाशिका — ननु युक्तिपादे ''असदिति चेन्न प्रतिषेधमात्रत्वा''दित्यत्र ''असद्वा'' इत्यस्यान्यपरत्वमुपेत्य पूर्वपक्षकरणात्कथमन्यपरत्वरहितस्येत्युक्तिः । वक्ष्यते च तत्र श्रुत्युपसर्जनप्रागभावकर्तृकत्वसाधकेत्यादि । न चान्यपरत्वं नाम न यत्किंचिदर्थान्तरपरत्वम् । किन्तु पूर्वपक्ष्यभिमतार्थान्तरपरत्वम् । तथैव प्रक्रमात् । तथाच ''असद्वा'' इत्यादिवाक्यस्य प्रागभावपरत्वमुपेत्यैव तत्र पूर्वपक्षो न त्वेतेनेत्यत्र पूर्वपक्ष्यभिमततुच्छपरत्वमुपेत्य अतो न दोष इति वाच्यम् । एतेनेत्यत्राप्यसच्छब्दस्याभावार्थत्वेनापि पूर्वपक्षसम्भवात् । अत एव टीकायां ''तेषां निषेधमुखवेद्यवस्तुवाचित्वा''दिति साधारणो हेतुरुक्तः । ''स्वरूपशून्यस्ये''त्यग्रिमटीकावाक्यं तु तुच्छे विशेषयुक्त्युक्तिपरत्वेनोपपद्यते । अभावो निर्धर्म इति पक्षे धर्मशून्यस्येत्यर्थपरत्वेनाप्युपपद्यते । अन्यथा तत्र भाष्ये ''नैष भावयितुं योग्य''

(प्रकाशिका)

इत्यादिनाऽभावशब्दनिर्वचनेन तत्र पूर्वपक्षेऽभावशब्दस्य प्रसिद्धाभावार्थत्वमुपेत्य तादृशाभाव-पदोपेतश्रुतेरुदाहर्तव्यत्वेन तत्साधारण्यं न स्यात् । न चायमस्ति नियमो यत्पूर्वपक्ष्यभि-प्रेतार्थान्तरपरत्वमेवेति । नियामकाभावात् । किंच ''असम्भवस्तु सतोनुपपत्ते''रित्यत्रासद्वा इत्यादेरसत्परत्वमुपेत्यैव पूर्वपक्षो भाष्यादौ स्पष्टः । तथाचासद्वा इत्यादेरपरममुख्यवृत्त्याप्य-न्यपरत्वाभावे तत्रोभयत्र पूर्वपक्षोदयो न स्यात् । वक्ष्यते चैतद्भाष्यकृतैव ''सर्वशब्दानां ब्रह्मणि समन्वयेपि तदधीनत्वादर्थवदित्यादिनाऽमुख्यत्वेनान्यस्यापि वाच्यत्वेनाङ्गी-कारादसतः प्राप्तिरिती''ति । एवं च ''सैषा प्रकृति''रित्यादेरिवास्यापि वाक्यस्यान्यत्र पूर्वपक्षेऽन्यप्रापकत्वेनोदाहरणादन्यपरत्वमभ्युपेयमिति चेन्मैवम् । ''सैषा प्रकृति''रित्यस्ये-वासद्वा इत्यादेर्वाक्यस्य सिद्धान्तेऽन्यपरत्वेनकाप्यनुदाहरणात् । आनुमानिकपादे सुधायां ''तथाप्येतद्विरोधे तु तद्वाचित्वमपोद्यत'' इत्यनुव्याख्यानव्याख्यावसरे ''यदि सर्वशब्दा-नामुभयार्थत्वं तर्हि ''विश्वस्मादिन्द्र उत्तरः असदेवेदमग्र आसी''दित्यादौ कथम् । उभयोः सर्वोत्तमत्वादेर्विरुद्धत्वा''दित्यादिना भगवन्मात्रपरत्वस्य स्पष्टमभिधानाच्च । न च तत्रासदेवेति सावधारणस्य तथात्वमुक्तं न त्वसद्वा इत्यस्येति वाच्यम् । अस्यापि तत्तुल्यार्थत्वात् । असदेवेत्यस्यैवासदिति चेदित्यत्र भाष्याद्युदाहृतत्वेन ''एतेने''त्यत्र तस्याप्युदाहरणत्वेनोपलभ्यत्वात् ।

कथं तर्हि पूर्वपक्षे वाऽन्यपरत्वेनोदाहरणं भाष्ये चान्यवाचित्वोक्तिरिति चेदुच्यते । सर्वशब्दानां चतुर्थपादोक्तन्यायैरुभयार्थत्वमित्येतदुत्सर्गतः । बाधके सति क्वचिद्भगवन्मात्र-परत्वमुपेयते बादरायणीयैरित्येतदजानानोसद्वा इत्यादावन्यार्थत्वं मन्वानः पूर्वपक्षं करोतीत्येतावता नान्यपरत्वसिद्धिः । भाष्यं चैतदभिप्रायम् । न चैवं पूर्वपक्षो भ्रान्तिमूलः स्यादिति चेत्सर्वत्र तस्य तथात्वेनेष्टत्वात् । यथा ''तद्धैक आहुरसदेवेदमग्र आसी''दिति श्रुतिः ''असद्वा'' इत्यादिश्रुतितात्पर्यापरिज्ञानप्राप्तमनूद्य निषेधति तथा सूत्रकारोपि स्वोक्तापरिज्ञानप्राप्तं निषेधतीत्युपपत्तेः । न चैवमपि ''असदिति चे''दित्यत्रान्यपरत्वे निरस्ते पुनस्तद्भ्रान्त्या''असम्भवस्त्व''त्यत्र पूर्वपक्षो न युक्त इति वाच्यम् । अभावपक्ष एव बाधकोक्त्याऽभावपरत्वस्य निरासेपि तदन्यपरत्वभ्रान्तेरनिरासात् । न चासद्वा इत्यादेरनुव्या-ख्यानाद्युक्तदिशाऽन्यपरत्वं नेत्युक्त्यैव भ्रान्तिनिरासादधिकरणानारम्भः स्यादिति वाच्यम् । अन्यपरत्वनिरासकाधिकरणारम्भादेवास्यार्थस्य निरासादिति टीकास्वारस्यमनुरुध्याह ॥ अथवेति ॥ वक्ष्यत इति ॥ तारतम्यकर्मक्रमाद्याकाशाद्युत्पत्तिपरिलोपाद्यापत्तिर्वक्ष्यत इत्यर्थः।

तथाच ब्रह्मणो निषेधमुखवेद्यासत्पदवाच्यत्वे भावत्वभङ्ग इत्यादितर्कानुगृहीतत्वाद्युक्तं टीकोक्तमुदाहरणमंत्याधिकरण इति भावः ॥ श्रुत्यादिभिरिति ॥ श्रुतिलिङ्गादिभिरिति भाष्यस्यार्थतोऽनुवादः ॥ उक्तेति ॥ अपरममुख्यवृत्त्यान्यपरत्वं विनाऽनुपपद्यमानत्वं बहुविप्लवापत्तिरूपतर्कानुगृहीतत्वं चेत्युक्तद्विविधेत्यर्थः । अवधारणेन अन्यत्रैवेत्येवकारेण ॥ अतिव्याप्तेरिति ॥ उभयत्र प्रसिद्ध्यादाविति भावः ॥ चतुर्थेति ॥ तथाच टीकोक्तं बलवत्त्वं भाष्यमूलकमेवेति भावः । ननु यद्यन्यत्र प्रसिद्धश्रुतिलिङ्गादिसाहचर्येणान्यत्र प्रसिद्धता तर्हि द्युभ्वाद्यायतनत्वमप्यत्र प्रसिद्धजायमानत्वसाहचर्यादन्यत्र प्रसिद्धं स्यात् । न च लिङ्गपादन्यायेन जायमानत्वं विष्णौ प्रसिद्धं नान्यत्रेति वाच्यम् । तथात्व आदित्यश्रुतेर्नामपादन्यायैर्विष्णौ प्रसिद्धत्वेनान्यत्र प्रसिद्ध्यभावात्तत्साहचर्येण सर्वगतत्वस्यान्यत्र प्रसिद्ध्युक्तिर्न स्यात् । किञ्चैवमादित्यश्रुतेर्लोकतोन्यत्र पूर्वन्यायेन विष्णौ च प्रसिद्ध्या तार्तीयाकाशशब्दस्येवोभयत्र प्रसिद्ध्यापत्त्या तत्साहचर्येण सर्वगतत्वमुभयत्र प्रसिद्धं स्यात् । अपि च वज्रशब्दस्य लोकतोऽन्यत्र प्रसिद्धत्वेनेन्द्रादिनाम्न इवान्यत्र प्रसिद्धत्वापत्त्योभयत्र प्रसिद्धशब्दसमन्वयपर''कम्पना''दित्यधिकरणोदाहरणे वज्रशब्देऽन्यत्रप्रसिद्धलक्षणस्यातिव्याप्तिश्चेत्यादि हृदि निधायाह ॥ दिगिति ॥ अयं भावः । समाख्याश्रुत्यादितौल्याभावोप्यन्यत्र प्रसिद्धलक्षणे विशेषणम् । अतो द्युभ्वाद्यायतनत्वे तत्तौल्योपेते नातिव्याप्तिः । उभयत्र प्रसिद्धसाहचर्यस्योभयत्र प्रसिद्धलक्षणान्तर्भावेण सर्वगतत्वस्योभयत्र प्रसिद्धत्वप्रसक्त्यभावात् । संवत्सरसारत्वादिलिङ्गेनादित्यश्रुतेरन्यत्र प्रसिद्धेर्वक्ष्यमाणत्वाच्च । वज्रशब्दस्य प्राणशब्दसाहित्येनोभयत्र प्रसिद्धिरित्यादिपरिहारस्य वक्ष्यमाणत्वाच्चेति ।

पाण्डुरङ्गि — द्वितीये त्वन्यथासिद्धमित्याह ॥ टीकायामिति ॥ नन्वेतेन सर्व इत्यत्रापरमुख्यवृत्त्यान्यपरासदादिशब्दयुक्तवाक्यमेवोदाहार्यमित्युक्तम् । तदयुक्तम् । तादृशवाक्यस्यानुपलभ्यमानत्वात् । तथा चैतादृशबलवत्त्वमित्ययुक्तमित्यस्वरसादाह ॥ अथवेति ॥ नन्वन्यत्रैव प्रसिद्धानां ब्रह्मपरत्वे कथं बहुविप्लवापत्तिरित्यत आह ॥ बहुविप्लवापत्तिरिति ॥ ननु बलवत् श्रुतिलिङ्गादिभिरन्यत्र प्रसिद्धा अन्यत्रैव प्रसिद्धाश्चेत् श्रुतिलिङ्गादिभिरिति भाष्येपि तर्हि बलवत्पदं प्रयोक्तव्यम् । अवधारणेन लब्धत्वात्तत्रानुक्तिश्चेत्तर्हि टीकायामपि पृथक् न वाच्यमित्यत आह ॥ श्रुत्यादिभिरिति ॥ तथा चातिव्याप्तिपरिहारार्थं वक्तव्यस्य तस्यावधारणेनैव कृतकार्यत्वान्न प्रयोग इति भावः । ननु तर्हि टीकायामवधारणपदाप्रयोगादतिव्याप्तिपरिहारो न स्यादित्यत आह ॥ चतुर्थपादीयेति ॥

तात्पर्यचन्द्रिका

नामलिङ्गभेदस्तु यान्यापाततो रूढान्येव तानि नामानि । तद्विपरीतानि तु लिङ्गानि । अथवा यान्यापाततो रूढानि तानि नामानि । यान्यापाततो यौगिकानि तानि लिङ्गानि । अत्राद्यपक्षे योगरूढानि लिङ्गानि । द्वितीये तु नामलिङ्गोभयात्मकानि । वस्तुतस्तु यान्यापाततो रूढिरहितान्यन्तर्यामीत्यादीन्येकप्रातिपदिकमात्ररूपाणि वा ''सर्वेषु भूतेष्वेतं यस्मिन्द्यौ''रित्याद्यनेकपदसमभिव्याहाररूपाणि वा सर्वेषु यस्मिन्निति सप्तमीविभक्तिसहितप्रातिपदिकरूपाणि वा धर्मद्वारा धर्म्युपस्थापकानि तानि लिङ्गानि । यानि तु तद्विपरीतान्यापाततो रूढानि योगरूढियुक्तानि वा तानि नामानि । अत एव पूर्वपक्षदशायामपि देवतासु योगरूढियुक्तानामिन्द्रादिशब्दानां नामता । अत एव च रूढानां नामत्वे यौगिकानां च लिङ्गत्वे योगरूढानां तृतीयप्रकारतापत्तिरिति शङ्कानवकाशः । नाम्नां लिङ्गानां चान्यत्र प्रसिद्धत्वाविशेषेप्यवांतरभेदात्पादभेदः । अध्याये पादचतुष्टयादिनियमादवान्तरभेदविवक्षया तृतीयादौ न पादभेद आश्रितः । यद्वा नाम्नां प्राधान्याल्लिङ्गानां च द्वितीये समन्वयोक्त्या बुद्धिस्थत्वादुभयानुसरणाय न तत्र भेद आश्रितः । अथवाऽऽपातसिद्धं नामलिङ्गयोर्भेदमाश्रित्याद्यद्वितीयपादयोर्भेदः कृतः । इदानीमापातप्रसिद्धितिरस्कारेण तत्रोक्तमहायोगविद्धदूढिभ्यामेकीकृतत्वान्न भिन्नपादनिवेशार्हतेति दर्शयितुं न तत्र भेद आश्रितः । तस्माद्यथाग्रन्थं पादभेदो युक्तः ।

प्रकाशिका — ''तथाप्यन्यत्र प्रसिद्धत्वादिवदापातप्रतीत्यनुरोधेनेयमुक्तिरित्यदोष'' इति नामलिङ्गभेदोक्तिपरलिङ्गपादीयसुधावाक्यं विवृण्वानः प्रागाक्षिप्तनामलिङ्गभेदं साधयति ॥ नामलिङ्गेति ॥ यानि पदानीति शेषः ॥ आपातत इति ॥ अन्यथाऽसम्भवः स्यात् । सर्वशब्दानां ब्रह्मणि ''यच्छब्दा योगवृत्तय'' इत्युक्त्या यौगिकत्वादिति भावः । रूढान्येव न तु यौगिकानि योगरूढानि वेत्यर्थः । तद्विपरीतानि यौगिकानि योगरूढानि वेत्यर्थः । नन्वेवं तर्ह्यक्षरशब्दस्यानन्दमयादेश्चाक्षरादिनये टीकोक्तं नामत्वं न स्यादित्यत आह ॥ अथवेति ॥ सर्वशब्दानां ब्रह्मणि योगरूढिभ्यां प्रवृत्तेः साङ्कर्यवारणायापातत इत्युक्तम् ॥ अत्राद्येति ॥ तथाचानन्दमयपदस्य तत्वप्रदीपे वैश्वानरपदस्य च ''विश्वजीवान्तरत्वाद्यैर्लिङ्गै'' रित्यणुभाष्ये लिङ्गत्वोक्तिर्युक्तेति भावः ॥ द्वितीय इति ॥ तथाच वैश्वानरपदस्य टीकोक्तं

नामत्वमणुभाष्योक्तं लिङ्गत्वं च न विरुद्धम् । आनन्दमयस्य लिङ्गत्वं टीकोक्तं नामत्वं च युक्तमिति भावः । ननु यथा रूढानां नामता यौगिकानां लिङ्गता तथा योगरूढानां तृतीयप्रकारता स्यात् । किं चेन्द्रादिशब्दानां योगरूढानामक्षरादिशब्दस्य च केवलनामता न स्यात् । अपि च तद्विपरीतानीत्यत्रापाततो यौगिकानि योगरूढानि वा यानि पदानि तानि लिङ्गानीति विवक्ष्यते न वा । नेति पक्षे वाक्यप्रकरणादेरपि लिङ्गतापत्तिः । आद्ये तल्लिङ्गादित्युक्तानन्तोद्गीथादिपदानां लिङ्गत्वेपि ''अत एव प्राण'' इत्यादावुक्तस्य ''श्रीश्च ते लक्ष्मीश्च पत्न्या''वित्यादेर्वाक्योपात्तस्य लिङ्गतानापत्तिः । अत एवाथवेत्युक्तपक्षोपि न साधीयानित्यत आह ॥ वस्तुतस्त्विति ॥ वाक्यप्रकरणादावतिव्याप्तिवारणाय धर्मद्वारेति । व्याप्यरूपसखण्डधर्मद्वारेत्यर्थः । तेन पद्मत्वादिजातिनिमित्तके रूढे नातिव्याप्तिः । एतेन ''आपातप्रतीत्यनुरोधेने''ति सुधा त्रेधा योज्येत्युक्तं भवति । एतेन ''सर्वेपि नामलिङ्गात्मतया प्रत्येकं द्विविधा'' इति टीका विवृता । प्रागाक्षिप्तं पादभेदं च साधयति ॥ नाम्नामिति ॥ एवं तर्हि तृतीयादिपादभेदोऽपि स्यादित्याक्षेपं समाधत्ते ॥ अध्याय इति ॥ समन्वीयमानानां त्रित्वनियम आदिपदार्थः । अविवक्षा चेदादावेवास्त्वित्यत आह ॥ यद्वेति ॥ प्राधान्यबुद्धिस्थत्वोभयेत्यर्थः । निमित्तांतरमाह ॥ अथवेति ॥ यथाग्रन्थमिति ॥ सूत्रकृदादिभिर्यथा पादभेदः कृतस्तथैव युक्त इत्यर्थः । एतेन ''अवान्तरभेदेन पादभेद'' इति टीका विवृता ।

पाण्डुरङ्गि — नन्वस्त्वेवं शब्दानामसाङ्कर्यं तथापि नामलिङ्गभेदो न युक्त इत्यत आह ॥ नामलिङ्गभेदस्त्विति ॥ एवकारेणापाततो यौगिकत्वव्यावृत्तिः । तथाचापाततो यौगिकत्वरहितत्वे सत्यापाततो रूढत्वं नामत्वमित्यर्थः । एवं च पङ्कजादीनां लिङ्गत्वमेवेति भावः ॥ तद्विपरीतानीति ॥ आपाततो रूढानि न भवन्ति यानि तानीत्यर्थः । ननु तर्हि योगरूढानामिन्द्रादिशब्दानां नामत्वं न स्यात् । यौगिकत्वराहित्याभावात् । अन्यथाऽभियुक्तानां पूर्वपक्षिणश्च योगरूढियुक्तानामपि नामत्वस्वीकारो न स्यादित्यरुचेराह ॥ अथवेति ॥ प्रथमद्वितीयलक्षणयोर्विरोधं परिहरति ॥ अत्रेति ॥ नन्वेवं योगरूढानामापाततो रूढत्वस्य विद्यमानत्वेनाऽपाततो यौगिकत्वस्यापि विद्यमानत्वेन नामलिङ्गात्मकत्वेन नामात्मकत्वं न स्यात् । तथाचेन्द्रादिनाम्न इति विशेषतो नामत्वोक्तिरयुक्तेत्यपरितोषादाह ॥ वस्तुतस्त्विति ॥ आनन्दमयेन्द्रादिशब्दानां नामत्वस्यैव सिध्यर्थं चाह ॥ वस्तुत इति ॥ अत एवेति ॥ आपाततो रूढानां योगरूढियुक्तानां च नामत्वादेवेत्यर्थः । एवं

(पाण्डुरङ्गि)

नामलिङ्गभेदमुपपाद्य तर्ह्यन्यत्र प्रसिद्धानां लिङ्गानां नाम्नां चान्यत्र प्रसिद्धत्वाविशेषात्पादभेदो न स्यादित्याशङ्कां परिहरति ॥ नाम्नामिति ॥ नन्वेवं तृतीय उभयत्रप्रसिद्धानां चतुर्थे चान्यत्रैव प्रसिद्धानां नाम्नां लिङ्गानां च समन्वयोक्तिर्न स्यात् । तत्रापि पादभेद एव स्यादित्यत आह ॥ अध्याय इति ॥ आदिपदेन पादाष्टत्वसङ्ग्रहः । अध्याये पादचतुष्टय-नियमेप्यन्यत्र प्रसिद्धनामलिङ्गात्मकेष्वेव भेदः किमर्थं कल्पनीयः । उभयत्र प्रसिद्धेष्वन्यत्रैव प्रसिद्धेषु नामलिङ्गात्मकेषु शब्देषु द्वैविध्यकल्पनेऽप्यध्यायपादचतुष्टयादिनियमसम्भवादि-त्यस्वरसादाह ॥ यद्वेति ॥ नन्वध्यायपादनियम एवाक्षिप्यत इत्यतो वाह ॥ यद्वेति ॥ नन्वस्तु प्राधान्यं नाम्नां लिङ्गानां च द्वितीये समन्वयोक्त्या बुद्धिस्थत्वम् । तथापि तृतीय उभयत्र प्रसिद्धनामलिङ्गात्मकशब्दसमन्वयोपपादनं कुतः । तृतीय उभयत्र प्रसिद्धनामात्मक-शब्दसमन्वयस्य चतुर्थे चोभयत्र प्रसिद्धलिङ्गात्मकशब्दसमन्वयस्य चोपपादनेप्युभयानुसरण-सम्भवादित्यत आह ॥ अथवेति ॥ यद्वा लिङ्गात्मकानामन्यत्र प्रसिद्धेरन्यत्र प्रसिद्धनाम-साहित्येनोक्तत्वान्नाम्नामपि बुद्धिस्थत्वात् वैश्वानराधिकरणे चानेकलिङ्गसमन्वयार्थमेकना-मसमन्वयस्योक्तत्वेन बुद्धिस्थत्वप्राधान्ययोर्द्वयोरपि सत्त्वेन नामान्वय एव वक्तव्य इत्यरुचेराह ॥ अथवेति ॥ तथाच सर्वेषामपि नामलिङ्गात्मकत्वान्न पादभेदाश्रयणमिति भावः ।

तात्पर्यचन्द्रिका

पादक्रमस्तु । चतुर्थपादीयसमन्वयस्यासर्वाधिकारिकत्वात् । तथा पादत्रयेण श्रुतिलिङ्गादिभिर्ब्रह्मणि समन्वय उक्ते तर्हि तैरेव श्रुतिलिङ्गादिभिरन्यपरताऽस्त्विति शङ्कायास्त्रितयानन्तरमेवोदयात् तत्तच्छब्दप्रवृत्तिनिमित्तगुणमात्रसिद्धफलकत्वेन कारण-त्वादिसिद्धिफलकत्वाभावाच्चांत्यता । इतरयोरपि महामल्लभङ्गन्यायेनान्यत्र प्रसिद्ध-समन्वयस्य प्राथम्यम् । तदुक्तमनुव्याख्याने-

तत्र प्रथमतोन्यत्र प्रसिद्धानां समन्वयः ।
शब्दानां वाच्य एवात्र महामल्लेशभङ्गवत् ॥

इत्यादि । यद्वा अन्यत्र प्रसिद्धेष्वन्यपरत्वस्य प्रसिद्धिमात्रमूलत्वेन स्थूलत्वात् उभयत्र प्रसिद्धेषु ''रुद्रो वाव लोकाधार'' इत्यादिश्रुत्यादिमूलत्वेन सूक्ष्मत्वात् अन्यत्रैव प्रसिद्धेषु पुनः प्रसिद्धिः श्रुतिलिङ्गादिकं चेत्युभयमूलत्वात्तन्निरासकपादक्रमः।

अयं च पक्षो भाष्येऽन्यत्रप्रसिद्धादिशब्दप्रयोगादेव सूचितः । केचित्तु उभयत्र प्रसिद्धेरन्यत्रप्रसिद्धनिरूप्यत्वादन्यत्रैवप्रसिद्धेश्चैवकारव्यावर्त्यतया तदुभयनिरूप्यत्वात्पादक्रम इत्याहुः । तन्न । उभयत्र प्रसिध्यादेरुक्तरीत्याऽन्यत्र प्रसिद्धिनिरूप्यत्वाद्यभावात् । अन्यत्रप्रसिद्धेष्वपि नाम्नां प्रधानभूतधर्मिणि साक्षाद्धीजनकत्वात् यौगिकस्यावयवार्थे रूढ्यपेक्षावद्रूढस्य योगापेक्षाया अभावाच्च प्राथम्यम् । यद्वा लिङ्गैर्नामसमन्वय उक्ते सन्दिग्धब्रह्मपरत्वेषु हेतूकृतलिङ्गेष्वेव वा तज्जातीयत्वेन बुद्धिस्थेषु लिङ्गान्तरेषु वा कथं ब्रह्मपरत्वमिति शङ्कायां तन्निरासालिङ्गानामानन्तर्यम्। लिङ्गसमन्वयस्तु प्रायेण निर्णीतलिङ्गान्तराधीनो न तु नामाधीन इति वैषम्यम् । तस्माद्युक्तः पादक्रमः ।

प्रकाशिका — प्रागाक्षिप्तं पादक्रमं च साधयति ॥ पादक्रमस्त्विति ॥ असर्वेति ॥ ''महासमन्वये तस्मिन्नाधिकारोऽखिलस्य ही''त्युक्तेरिति भावः । हेत्वन्तरमाह ॥ तथेति ॥ निमित्तान्तरं चाह ॥ तत्तदिति ॥ एतच्च निमित्तद्वयं ''इन्द्रादिशब्दानां श्रुतिलिङ्गादिबलाद्विष्णौ समन्वयः प्राक् प्रतिपादितः । इदानीं श्रुतिलिङ्गादिभिरेवान्यत्र प्रसिद्धाना''मित्यादिकया ''पूर्वं स्रष्टृत्वादिगुणाभिधायकानामित्यादिकया च चतुर्थपादीयटीकया लब्धमिति बोध्यम् ॥ इतरयोरिति ॥ अन्यत्रोभयत्र प्रसिद्धशब्दसमन्वययोरित्यर्थः । तदुक्तं उपासनापाद इत्यर्थः । तत्र प्रथमेऽध्याये । प्रथमतः उभयत्र प्रसिद्धशब्दसमन्वयात्पूर्वम् । शब्दानां नामलिङ्गात्मकानाम् । अत्र विष्णौ ॥ महामल्लेति ॥ यथाऽनेकेषु मल्लेषु प्रत्यर्थितयाऽवस्थितेष्वपि कृष्णेन प्रधानत्वाच्चाणूरादिमल्लानामेवादौ भङ्गो विहितस्तथेत्यर्थः । उभयत्र प्रसिद्धानां हि समन्वयेऽन्यत्रप्रसिद्धिनिरासमात्रे यत्नः अन्यत्र प्रसिद्धानां तु विष्णौ प्रसिद्धिरप्युपपादनीयेति तत एषां प्राथम्यमित्यर्थः । आदिपदेन

इतोप्यभ्यधिकत्वेन तुर्यपादोदितस्य तु ।
महासमन्वये तस्मिन्नाधिकारोखिलस्य हि ।

इति गृह्यते । एतेन ''तेष्वन्यत्रैव प्रसिद्धसमन्वये''त्यादि टीकाऽनुव्याख्यानमूलेति व्याख्याता । एवमनुव्याख्यानोक्तं क्रममुक्त्वाऽधुनैकरूप्याय समन्वयत्रयस्यापि सोपानारोहणन्यायेन भाष्यसूचितं क्रममाह ॥ यद्वेति ॥ स्थूलत्वादिति ॥ प्रसिद्धेर्भ्रमत्वेप्युपपत्त्या

(प्रकाशिका)

दुर्बलत्वादिति भावः ॥ सूक्ष्मत्वादिति ॥ श्रुतेः प्राबल्येन तन्निरासस्य क्लेशसाध्यत्वेनोभयत्र प्रसिद्धेः प्राबल्यादित्यर्थः ॥ उभयेति ॥ प्रसिद्धिमूलत्वात् श्रुतिलिङ्गादिमूलत्वाच्चेत्यर्थः । ऋजूनां मतमनूद्य निराह ॥ केचित्त्विति ॥ उक्तरीत्येति ॥ श्रुत्यन्तरादिभिरित्यादिनेति भावः । पूर्वं ''तत्रे''त्यनुव्याख्यानं ''ग्रन्थोऽयमपि बह्वर्थ'' इत्युक्त्या स्वयमर्थान्तर-मभिप्रेत्यान्यत्रोभयत्रप्रसिद्धसमन्वययोः क्रमे संमतित्वेनोदाहृतम् । इदानीं तस्यैव ''तत्र प्रथमेऽध्याये प्रथमतः प्रथमे पादे शब्दानां नामात्मकाना''मिति सुधोक्तमेवार्थमभिप्रेत्य ''अन्यपराणां मध्ये लिङ्गात्मकाना''मित्यादिटीकां विवृण्वान आद्यद्वयस्यापि महामल्ल-भङ्गन्यायेन क्रममाह ॥ अन्यत्र प्रसिद्धेष्वपीति ॥ यौगिकस्य लिङ्गस्य । तथाच सुधोक्तदिशा नाम्नामन्यबुद्धिजनकत्वं साक्षादेव । लिङ्गानां तु व्यवधानेनेति नामसमन्वये यत्नगौरवमिति महामल्लभङ्गन्यायेन नाम्नां प्राथम्यमित्यर्थः ।

तेषामन्यगतत्वे तु न स्यात्सम्यक् समन्वयः ।
इत्येवाशेषलिङ्गानां ब्रह्मण्येव समन्वयम् ॥

आहे''त्यनुव्याख्यानं हृदि कृत्वा सङ्गत्यन्तरमाह ॥ यद्वेति ॥ सन्दिग्धेति ॥ बहुव्रीहिः। ज्योतिश्चरणेत्यादौ हेतूकृतानामदृश्यत्वादीनां च द्वितीये समन्वयोक्तेरिति भावः । ननु प्राग्घेतूकृतलिङ्गानामेव लिङ्गपादे समन्वयानुक्तेः कथमेवमित्यत आह ॥ तज्जातीयत्वेनेति ॥ तल्लिङ्गोपेतवाक्यगततयैकवाक्यस्थत्वादिना तज्जातीयत्वं ध्येयम् । नामपादेहि सर्वश्रुतिगतान्यन्यत्र प्रसिद्धनामानि सर्वाण्यपि तत्र तत्र स्थितैः सर्वैर्लिङ्गैर्ब्रह्मनिष्ठानीति प्राक् साधिते सति तत्रासन्दिग्धलिङ्गग्रहणेनेतरेषां लोकतोन्यत्र प्रसिद्धश्रुत्यादिसाहित्येन सन्दिग्धब्रह्मपरत्वेष्वब्रह्मपरत्वशङ्कानिरासादानन्तर्यमित्यर्थः । ननु लिङ्गसमन्वयस्य नामाधीनत्वे लिङ्गानामेव प्राथम्यं स्यादित्यत आह ॥ लिङ्गसमन्वयस्त्विति ॥ क्वचिद्ब्रह्मादि-नामाधीनोप्यस्तीति प्रायेणेत्युक्तम् । एतेनानवस्थाच प्रत्युक्ता ।

पाण्डुरङ्गि — ननु तथाप्यादावन्यत्र प्रसिद्धनामात्मकानां तदनन्तरमन्यत्र प्रसिद्धलिङ्गात्मकशब्दानां तत उभयत्र प्रसिद्धनामलिङ्गात्मकानां ततोन्यत्रैव प्रसिद्धानामिति क्रमः कुत इत्यतः ''तत्र प्रथमतोन्यत्रे''त्याद्यनुव्याख्यानानुसारेण पादक्रममाह ॥ पादक्रम-स्त्विति ॥ ननु चतुर्थपादीयसमन्वयस्य कारणत्वादिसिद्धिफलकत्वाभाव आनर्थक्यं स्यादित्यत उक्तं तत्तच्छब्देति ॥ ब्रह्मशब्दोक्तगुणपूर्तिसम्भावककारणत्वाप्रतिपादनेऽ-

सम्भावनाग्रस्तत्वात्स्वरवर्णपदात्मकाशेषशब्दसमन्वयेन गुणपूर्णत्वरूपफलासिद्धेः कारणत्वोक्त्या कतिपयगुणसिद्धावपेक्षितगुणपूर्त्यसिद्धेरित्यर्थः । तर्ह्यन्यत्रोभयत्र प्रसिद्धयोरुभयत्र प्रसिद्धानामेव सोपानारोहणन्यायेन प्राथम्यमस्त्वित्यत आह ॥ इतरयोरपीति ॥ ननु ''कारणत्वेन चाकाशादिष्वि''त्यादेः कारणत्वादिसिद्धिफलकत्वेन तत्र प्रवृत्तिनिमित्तगुणमात्रसिद्धिफलकत्वाभावात्कथं चतुर्थपादीसमन्वयः स्यादित्यस्वरसादाह ॥ यद्वेति ॥ यद्वा पूर्वमनुव्याख्यानानुसारेण पादक्रममुपपाद्य भाष्यानुसारेण पादक्रममाह ॥ यद्वेति ॥ तथाच स्थूलत्वसूक्ष्मत्वातिसूक्ष्मत्वैः पादक्रम इति भावः ॥

केचित्त्विति ॥ स्वयूथ्या इत्यर्थः । विशिष्टप्रतीतौ विशेषणज्ञानस्य कारणत्वादित्यर्थः । तदुभयनिरूप्यत्वात् अन्यत्रोभयत्र प्रसिद्धिनिरूप्यत्वादित्यर्थः । किमुभयत्र प्रसिद्ध्यादेरन्यत्रप्रसिद्ध्यादिनिरूप्यत्वं नियतमनियतं वा । नाद्यः । अन्यत्र प्रसिद्धत्वे सति तत्रप्रसिद्धत्वमुभयत्रप्रसिद्धत्वमित्येवंरूपेण तन्निरूप्यत्वेपि विष्णुतदितरयोः प्रसिद्धत्वमुभयत्र प्रसिद्धत्वमित्यादिरूपेण तन्निरूप्यत्वाभावादित्याह ॥ तन्नेति ॥ उक्तरीत्येति ॥ उभयोपस्थापकत्वमुभयत्र प्रसिद्धत्वमित्याद्युक्तरीत्येत्यर्थः । नेतरः । अनियतनिमित्तेन नियतपादभेदे विनिगमकाभावेन वैपरीत्यस्यापि सुवचत्वादिति भावः । नन्वन्यत्रप्रसिद्धानामुभयात्मकानामविशेषान्नामात्मकानां प्राथम्यं किं निमित्तमित्यत आह ॥ अन्यत्रप्रसिद्धेष्विति ॥ ननु नाम्नां धर्मिणि साक्षाद्धीजनकत्ववल्लिङ्गानामपि धर्मे साक्षाद्धीजनकत्वात्कथं तेषां विशेष इत्यत उक्तं प्रधानेति ॥ प्रायेण धर्मिद्वारेणैव धर्मस्य क्रियान्वयित्वेन साक्षाद्धर्मिण एव तदन्वयित्वेन तस्यैव प्राधान्यं लिङ्गस्य तु तदभावेनाप्राधान्यमिति भावः । निरपेक्षत्वमुपपादयति ॥ यौगिकस्येति ॥ नन्वेवं धर्मिवाचकानामन्तर्याम्यादिशब्दानां नामता स्यात् । धर्मिवाचिनां चानन्दमयादिशब्दानां लिङ्गता च स्यादित्यस्वरसादाह ॥ यद्वेति ॥ स्वरूपप्राधान्यादि कथं पादक्रमे निमित्तमित्यतो वाह ॥ यद्वेति ॥ सन्दिग्धं ब्रह्मपरत्वं येषामिति बहुव्रीहिः । ननु नामसमन्वयस्य लिङ्गाधीनत्वाल्लिङ्गसमन्वयस्यापि नामसमन्वयाधीनत्वान्नामसमन्वयसिद्धौ लिङ्गसमन्वयसिद्धिस्तत्सिद्धौ तत्सिद्धिरित्यन्योन्याश्रयः स्यादित्यत आह ॥ लिङ्गसमन्वयस्त्विति ॥ सर्वगतत्वाधिकरणे ब्रह्मश्रुत्या सर्वगतत्वलिङ्गसमन्वयस्य प्रतिपादितत्वात्कथं लिङ्गसमन्वयो लिङ्गेनैवेत्युच्यत इत्यत उक्तं प्रायेणेति ॥ न चैवं तदंश एव पौनरुक्त्यं स्यादित्याशङ्क्यम् । येनैव लिङ्गेन यस्य नाम्नः समन्वयो न तेनैवाम्नातस्यैव लिङ्गस्य समन्वयः । किन्तु लिङ्गान्तरेण नामान्तरेणेति न दोष इति भावः ।

तात्पर्यचन्द्रिका

न चैवमन्यत्रैव प्रसिद्धादीनां समन्वयेनैव कैमुत्यन्यायेनान्यत्र प्रसिद्धादि-समन्वयसिद्धेस्तदुक्तिवैयर्थ्यम् । ''आत्मन आकाशस्सम्भूत'' इत्यादौ भूताकाशस्य सम्भूतत्ववदस्य लोकस्येत्यादावाकाशस्य लोकगतित्वादिप्रसङ्गात् पादत्रयसिद्धान्त-मुपेत्य चतुर्थपादे विशेषहेतुभिः पूर्वपक्षोदयेन पादत्रयपूर्वपक्षदशायां चतुर्थपादीय-सिद्धान्तानुन्मेषाच्च । अन्यथा स्वर्गकामाधिकरणसिद्धफलान्वयमुपेत्य किं भावार्थस्य फलकरणता किं वा नामार्थस्येति विचारात्मकभावार्थाधिकरणसिद्धान्तेन फलाभाव-शङ्कारूपस्वर्गकामाधिकरणपूर्वपक्षानुदयः स्यात् । ननु यथान्यत्रैव प्रसिद्धानां ब्रह्मपरता तथा तत्रैव प्रसिद्धानामपि ''जनितोत विष्णो''रित्यादाविवान्य-परत्वाशङ्कायां समन्वयो व्युत्पाद्य एवेति चेन्न । तत्रप्रसिद्धा इत्यनेनान्यपरत्व-शङ्काराहित्यस्य विवक्षितत्वात् । अन्यत्तु स्वस्वस्थाने वक्ष्यते ॥

प्रकाशिका — नचैवमिति ॥ उभयत्रान्यत्रान्यत्रैव प्रसिद्धानामुत्तरोत्तरप्राबल्ये सतीत्यर्थः । अन्यत्रैव प्रसिद्धानां तत्रोक्तप्रबलहेतुभिः समन्वये ततोपि दुर्बलानामन्यत्र प्रसिद्धानांच ब्रह्मणि समन्वयसिद्धेराद्यपादद्वये तेषां तदुक्तिवैयर्थ्यम् । तथान्यत्र प्रसिद्धानां पादद्वयोक्तहेतुभिर्ब्रह्मणि समन्वये सति तैरेव ततोपि दुर्बलोभयत्रप्रसिद्धानां समन्वय-सिद्धेस्तृतीये तेषां तदुक्तिवैयर्थ्यमित्यर्थः ॥ आत्मन इति ॥ चतुर्थपादीयन्यायानुसरणेहि ''कल्पनोपदेशा''दिति सूत्रोक्तन्यायेनान्यपरत्वमुपेत्य तदधीनत्वादिन्यायैः शब्दानां तत्र ब्रह्मपरत्वोक्तेराद्यादिपादोदाहरणेष्वपि तथात्वापत्त्या भूताकाशेन्द्रादेरपि तत्तद्वाक्यबोध्यत्वं स्यात् । तच्चानिष्टम् । ब्रह्मलक्षणस्यातिव्याप्त्यापत्तेः । अतस्तन्निरासेन ब्रह्मैकपरत्वं व्युत्पादयितुं त्रिपादी सार्थिकेति भावः । तर्ह्याद्यपादद्वयेनैव सिद्धत्वात्तृतीयवैयर्थ्यमिति चेन्न । पादद्वयापादितोभयत्र प्रसिद्धानां शब्दानामन्यनिष्ठत्वनिरासेन तस्य सार्थक्यात् । उक्तं च - ''आहोभयगतत्वं च स्यादतो लिङ्गशब्दयोः । इति संशयनुत्त्यर्थमुभयत्र प्रतीतितः । शब्दानां वर्तमानानां सलिङ्गानां विशेषतः ।

समन्वयो हरावेवे''त्याचार्यैः ॥ पादत्रयेति ॥ त्रिपाद्यां जन्मादिसूत्रे कण्ठोक्तकारणत्व-तत्सङ्गतानन्दमयत्वादिगुणान्तरप्रतिपादकवाक्यस्थशब्दानां श्रुतिलिङ्गादिभिरुक्तं ब्रह्मपरत्वं

स्वीकृत्य तर्हि तैरेव तारतम्यकर्मक्रमादिपरिलोपापत्तिरूपबलवत्तर्कानुगृहीतैर्बलवद्भिरन्यपरत्वं स्यात् । एवं च समन्वयसूत्रोक्तसर्वशब्दसमन्वयो न युक्त इति शङ्कायां कृतायां ततोपि प्रबलहेतुभिस्तन्निरासाय चतुर्थपादप्रवृत्तेः ततः पूर्वं तत्सिद्धान्तन्यायानुपस्थितेर्न तेन वैयर्थ्यमित्यर्थः ॥

अन्यथेति ॥ स्वर्गकामाधिकरणमुक्तमाद्यसूत्रे । भावार्थस्य धात्वर्थस्य । नामार्थस्य उपपाद्यार्थस्य । द्रव्यादेरित्यर्थः । द्वितीयाध्यायाद्यपादे भावार्थाः कर्मशब्दास्तेभ्यः क्रिया प्रतीयेतैष ह्यर्थो विधीयत'' इति द्वितीयेऽधिकरणे ''उद्भिदा यजेत सोमेन यजेते''त्यादौ किं सोमादिरूपद्रव्यादेः फलसाधनत्वं यजिरूपधात्वर्थस्य वेति संशये साध्यमानस्य फलस्य सिद्धरूपसाधनापेक्षत्वाद्द्रव्यादेश्च तादृशत्वेनापेक्षापूरणशक्तत्वाद्धात्वर्थस्य तु स्वयं साध्यत्वे-नातादृशत्वाद्द्रव्यादिरेव फलसाधनमिति प्राप्ते द्रव्यादेः फलहेतुत्वे तत्रैकमपूर्वं कल्प्यम् । धात्वर्थस्य द्रव्यादिशेषत्वावश्यम्भावात्तत्र दृष्टासम्भवेनापूर्वान्तरं कल्प्यमिति गौरवात् । फलसाधनस्य भावनाकरणत्वात्तस्यां च प्रत्ययोपात्तायां पदान्तरोपात्तद्रव्यापेक्षया प्रकृत्युक्त-धात्वर्थस्य सन्निहितत्वेन करणत्वात्साध्यमानस्यापि स्वसाधनसाधितस्य करणत्वोपपत्तेस्स एव फलसाधनमिति सिद्धान्तितत्वादिति भावः । ''तेषु न तत्र प्रसिद्धानां समन्वयो वाच्य'' इति टीकामाक्षिप्य समाधत्ते ॥ नन्विति ॥ तत्रैवेति ॥ तत्र प्रसिद्धानामित्यस्य तत्रैवेति विवक्षायाः प्रागेवोक्तेरेवमनुवादः । अत एवाग्रे तत्रप्रसिद्धा इत्येवाह ॥ अन्यपरत्वेति ॥ ''जनितोत विष्णो''रित्यत्र तु विष्णुशब्दस्यान्यपरत्वादिति भावः । उक्तं च सुधायां ''अदोषवचनाच्चैव नियमेन हरेः श्रुता''विति जन्माधिकरणस्थानुव्याख्यानव्याख्यावसरे ''विष्णुरिति यजमानस्य यज्ञस्य वा नाम । तौ सोमाद्भवत इति सोमो जनितोत विष्णोरित्युच्यत इत्यादिव्याख्येय''मिति । नन्वेवमप्याद्यपादेऽन्तस्थत्वलिङ्गस्य द्वितीये वैश्वानरनाम्नस्तृतीये वज्रशब्दस्य स्वप्नद्रष्टृत्वलिङ्गस्य चान्यत्र प्रसिद्धस्य समन्वये साङ्कर्यम् । किं चान्तरधिकरणोक्तन्यायस्यैवाकाशादिनयेषूक्तेर्गतार्थता । तथा ''गुहां प्रविष्टा''वित्यादेः ''न संख्योपसङ्ग्रहा''दिति नयेन गतार्थत्वम् । तथा पूर्वोत्तरप्रस्थानयोस्तत्र तत्र विरोधश्चोपलभ्यते । अधिकरणानां सङ्गतिश्च नान्योन्यमुपलभ्यत इत्यादिचोद्यानि हृदि कृत्वाह ॥ अन्यत्त्विति ॥

पाण्डुरङ्गि — ननु तत्र प्रसिद्धानामिवान्यत्र प्रसिद्धानां समन्वयो न वक्तव्यः । न च तर्हि कथं तत्सिद्धिरिति वाच्यम् । अन्यत्रैव प्रसिद्धसमन्वयेनैव कैमुत्यन्यायेनान्यत्र प्रसिद्धसमन्वयसिद्धौ पुनस्तत्समन्वयकथने वैयर्थ्यापत्तेरित्याशङ्क्य निषेधति ॥ न चैवमिति ॥ किं तन्न्यायविषयविषयत्वेन त्रिपाद्या वैयर्थ्यं कैमुत्यमात्रेण वा । नाद्य इत्याह ॥ आत्मन इति ॥ तत्करणानन्तरमन्यत्रैव प्रसिद्धशब्दसमन्वयन्यायेनान्यत्र प्रसिद्धशब्दसमन्वयश्चेदिति शेषः । तथाचान्यत्र प्रसिद्धानां पृथगवचने बाधकसद्भावात्तत्समन्वयप्रतिपादनमिति भावः । नेतरः । यो दुष्करमेकं करोति सोन्यत्सुकरमपीति व्याप्तेरभावात् । अथ तदविशिष्टमिति विशेषणमुपादीयते तत्राह ॥ आत्मन इति ॥ ननु नवियदश्रुतेरित्यत्र सूत्रकृतैवाकाशस्योत्पत्तेः समर्थितत्वात्सम्भूतत्वस्य तत्र सम्भवात् प्रकृतेतु लोकगतित्वादेराकाशादेराकाशे प्रमाणबाधितत्वेनासम्भवात् तथाच बाधकसद्भावात्तन्न्यायेन समन्वयकथनमयुक्तमित्याह ॥ पादत्रयेति ॥ यद्वा अङ्गीकृत्य चतुर्थीयसमन्वयस्य प्राचीनत्वमेतदुक्तमित्याशयेनाह ॥ पादेति ॥ एवं च चतुर्थपादसमन्वेतव्यस्य शब्दप्रवृत्त्यर्थमुपोद्घातत्वेन पादत्रयमावश्यकमेव । अन्यथा चतुर्थपादीयसिद्धान्तारम्भ एव न स्यात् । तथाच यत्सिद्धान्तमुपजीव्ययस्य प्रवृत्तिस्तत्सिद्धान्तेन तस्य नान्यथासिद्धिरिति भावः ॥ अन्यथेति ॥ यदधिकरणसिद्धान्तसिद्धार्थमभ्युपगम्य प्रवृत्तं यदधिकरणं तदधिकरणसिद्धान्तस्य तदधिकरणपूर्वपक्षविरोधित्वे । न च दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यम् । चतुर्थपादीयसिद्धान्ते पादत्रयसिद्धान्तस्योपजीव्यत्ववद्दृष्टान्ते भावार्थाधिकरणसिद्धान्तस्य स्वर्गकामाधिकरणसिद्धान्त उपजीव्यभावादिति वाच्यम् । उक्तसामान्यन्यायस्य तत्रापि सत्त्वेन वैषम्याभावात् । तथाहि । सफलत्वरूपस्वर्गकामाधिकरणसिद्धान्तमुपजीव्य भावार्थाधिकरणसिद्धान्तप्रवृत्तिरिति न तेन तस्यान्यथासिद्धिरिति । तथाच स्वर्गकामाधिकरणपूर्वपक्षे भावार्थाधिकरणसिद्धान्तस्यानुन्मेषवत्प्रकृतेपि पादत्रयपूर्वपक्षदशायां चतुर्थपादीयसिद्धान्तस्याप्रवृत्तेर्न तेन तस्यान्यथासिद्धिरिति भावः ॥ नन्विति ॥ अन्यत्रैव प्रसिद्धानामित्यनन्तरं अन्यपरत्वशङ्कायामिति शेषः । ब्रह्मपरतेत्यनन्तरं व्युत्पाद्यत इति शेषः । ननु तत्रैव प्रसिद्धानामन्यपरत्वशङ्काया एवाभावान्न तत्समन्वयो व्युत्पाद्य इत्यत उक्तम् ॥ जनितोतेत्यादि ॥ तत्रेति ॥ जनितोतेत्यत्र तु बाधकेनान्यपरत्वमिति भावः । नन्वत्रैतदध्यायगताधिकरणानां सङ्गत्यादिकं कुतो न कथ्यत इत्यत आह ॥ अन्यत्त्विति ॥ ननु तत्रैव प्रसिद्धानां कथमन्यपरत्वशङ्काराहित्यमित्यतो वाह ॥ अन्यत्त्विति ॥

तात्पर्यचन्द्रिका

अन्येतु प्रथमे स्पष्टब्रह्मलिङ्गान्युदाहरणानि । द्वितीयतृतीययोस्त्वस्पष्टब्रह्मलिङ्गानि । तयोस्तु सविशेषनिर्विशेषविषयतया भेदः । चतुर्थे प्रधानस्याशब्दत्वोक्तिरिति पादार्थानाहुः । तन्न । यथा प्रथमे ''अन्तस्तद्धर्मोपदेशा''दित्यादौ ''सैवक्स्सोम तदुक्थं तद्यजु''रिति सर्वात्मकत्वस्य ''सर्वेभ्यः पाप्मभ्य उदित'' इति सर्वपापराहित्यस्य च ब्रह्मलिङ्गस्य स्पष्टता तथा द्वितीये ''सर्वत्र प्रसिद्धो-पदेशा''-दित्यत्र ''सर्वं खल्विदं ब्रह्मे''ति जीवेष्वयुक्तस्य सार्वात्म्यादेः ''अत्ताचराचरे''त्यत्र ''अन्यत्र धर्मादन्यत्राधर्मा''दिति पुण्यपापराहित्यादेः ''अन्तर''इत्यत्र ''एतदमृतमभयमेतद्ब्रह्मे''त्यमृतत्वादेः ''अन्तर्यामी''त्यत्र एष त आत्मान्तर्याम्यमृत'' इत्यमृतत्वादेः ''अदृश्यत्वादिगुणक'' इत्यादौ ''यः सर्वज्ञ'' इति सार्वज्ञादेर्ब्रह्मलिङ्गस्य स्पष्टत्वात् । एवं तृतीये ''द्युभ्वादी''त्यत्र ''अमृतस्यैष सेतुः यः सर्वज्ञ'' इत्यमृतसेतुत्वसार्वज्ञादेः ''भूमे''त्यत्र ''यत्र नान्यत्पश्यति'' इत्यद्वितीयत्वादेः ''अक्षरमम्बरे''त्यत्र ''अदृष्टं द्रष्ट्र श्रुतं श्रोत्रमस्थूलमनण्वि''त्यदृश्यत्वास्थूलत्वानणुत्वादेः ''ईक्षतिकर्मे''त्यादौ ''परात्पर''मिति परात्परत्वादेर्ब्रह्मलिङ्गस्य स्पष्टत्वाच्च । वाक्यान्तरे ब्रह्मधर्मतया निर्णीतत्वं वा जीवादौ स्वारस्येनानुपपद्यमानत्वं वा स्पष्टत्वम् । न च स्वारस्येनापि जीवादावनुपपद्यमानत्वं विषयवाक्ये ब्रह्मधर्मतया निर्णीतत्वं वा जीवादिप्रापकलिङ्गराहित्यं वा । पूर्वपक्षानुदयापातात् । तच्च सर्वं खल्विदमित्यादावस्ति । न च ''सर्वत्रप्रसिद्धे''त्यादेः ''मनोमयःप्राणशरीरो भारूप'' इत्यादिकमुदाहरणम् । तत्र च न ब्रह्मलिङ्गं स्पष्टम् । किन्तु ''सर्वं खल्विद''मित्युपक्रम इति वाच्यम् । प्रथमेप्यन्तरित्यस्योदाहरणे ''य एषोंत''रित्यत्र सार्वात्म्यस्य ''ज्योतिश्चरणे''त्यस्योदाहरणे ''यदतः परो दिवो ज्योति''रित्यत्रामृतत्वादेः ''प्राणस्तथेत्यस्योदाहरणे ''प्राणोस्मि प्रज्ञात्मे''त्यत्र हि ततमत्वादेर्ब्रह्मलिङ्गस्याभावात् । द्वितीयादावपि ''य एषोंतरक्षिणि पुरुषो दृश्यते एतदमृतमभयमेतद्ब्रह्म एष त आत्मान्तर्याम्यमृत'' इत्याद्युदाहरणवाक्य एवामृतत्वादेः स्पष्टत्वाच्च । यथाच द्वितीये तृतीये च समन्वेतव्यं मनोमयत्वादिकं न ब्रह्मणि स्पष्टं तथा प्रथमे समन्वेतव्यमादित्यस्थत्वाकाशप्राणशब्दादिकं न ब्रह्मणि स्पष्टम् ।

(तात्पर्यचन्द्रिका)

यच्च द्वितीये सविशेषं तृतीये निर्विशेषमित्युक्तं तदपि न । द्वितीयेपि ''सर्वत्रे''-त्यत्र ''सर्वं खल्विदं ब्रह्मे''त्यविद्यादिसर्वभ्रमाधिष्ठानत्वरूपसार्वात्म्यादेः ''अत्ते''-त्यत्र ''अन्यत्र भूताच्च भव्याच्च महतो महीया''निति कालत्रयातीतत्वादेः ''अन्तर'' इत्यत्र ''कं ब्रह्म खं ब्रह्मे''ति पूर्णसुखत्वादेः ''अन्तर्यामी''त्यत्र ''एष त आत्मे''ति जीवतादात्म्यादेः ''अदृश्यत्वादी''त्यादौ च ''यत्तदद्रेश्य''-मित्यदृश्यत्वादेस्सविशेषेऽनुपपत्तेः । तृतीयेपि ''द्युभ्वादी''त्यत्र ''तमेवैकं जानथ यदा पश्यः पश्यते रुक्मवर्ण''मिति दृश्यत्वरूपित्वादेः ''भूमे''त्यत्र ''एवं पश्य''न्निति सप्रकारकज्ञानविषयत्वादेः ''अक्षर''मित्यत्र ''अदृष्टं द्रष्टृश्रुतं श्रो''-त्रिति द्रष्टृत्वादेः ''ईक्षतिकर्मे''त्यत्र ''पुरुषमीक्षत'' इति दृश्यत्वादेः ''दहर'' इत्यादौ ''सत्यकामः सत्यसङ्कल्प'' इति कामादेर्निर्विशेषेऽनुपपत्तेश्च । यदि च चिन्मात्रस्यैव निर्विशेषत्वेन भ्रमाधिष्ठानत्वादिविशिष्टस्य सविशेषत्वं तर्हि द्युभ्वाद्या-यतनत्वविशिष्टमपि सविशेषमेव स्यात् । यस्मिन्द्यौरित्यादेश्च लक्षणया चिन्मात्रपरत्वे सर्वं खल्विदमित्यादेरपि प्रामाण्याय तन्मात्रपरत्वं स्यात् । सविशेषे वस्तुतो निर्विशेषत्वस्य निर्विशेषे चारोपितविशेषस्याविरोधेप्युभयत्राप्युभयोक्तौ वाक्यव्य-वस्थायोगेन तन्निबन्धनपादव्यवस्था न युक्ता । एतेन प्रायिकत्वात्पादव्यवस्थेति निरस्तम् । सर्वसाङ्कर्यस्योक्तत्वात् ।

प्रकाशिका — ''नान्यथा तदृष्टे''रिति भाष्यं विवरितुं परोक्तं निराह ॥ अन्येत्विति ॥ स्पष्टत्वं चाग्रे स्वयमेव निर्वक्ष्यति । एकोपाध्याक्रान्तत्वे कथं भेद इत्यत उक्तं तयोस्त्विति ॥ सैवक्सामेत्यादिपररीत्यैव सर्वं ध्येयम् । अधिकरणशरीराणि विषयवाक्यानि चाग्रे स्पष्टानि । अनेकाधिकरणविषयवाक्यान्युदाहरता ''एतदमृतमभयमेतद्ब्रह्मेत्युत्तराधि-करणोदाहृतवाक्येष्वपी''ति टीकास्थं बहुवचनं विवृतं ध्येयम् । टीकायामाद्यातिक्रमेणै-तदमृतमित्यस्योपादानं तु तस्य स्वपरसंमतत्वात् । उदाहरणवाक्य एव स्पष्टलिङ्गसत्वाद्वा । नत्वनेकत्र नियमभङ्गो नेति । अत एव सुधायां ''द्वितीयतृतीयपादोदाहरणवाक्यानामपि बहुलं स्पष्टब्रह्मलिङ्गत्वा''दित्येवोक्तमिति भावः । नत्विति ॥ येनोक्तानामतथाविधत्वेन स्पष्टत्वं न स्यादिति भावः ॥ तच्चेति ॥ वाक्यान्तरेत्यादिनोक्तमित्यर्थः । ननूपक्रमे स्पष्टलिङ्गश्रवणेपि नोदाहरणवाक्ये । अतो नदोष इत्याशङ्क्य तर्हि प्रथमेपि स्पष्टलिङ्ग-

समन्वयो न स्यादित्याह ॥ न चेति ॥ विषयवाक्येन श्रूयत इत्यपि नेत्याह ॥ द्वितीयादाविति ॥ ननूदाहरणवाक्येषु स्पष्टलिङ्गान्तरसत्त्वेपि न समन्वेतव्यलिङ्गं स्पष्टमित्यत आह ॥ यथाचेति ॥ न ब्रह्मणि स्पष्टमिति ॥ अकरणस्य ब्रह्मणो मनोरूपकरण-सम्बन्धायोगादिति भावः । आदिपदेनात्तृत्वद्युभ्वाद्यायतनत्वादिकं समन्वेतव्यं गृह्यते ॥ आदित्यस्थत्वेति ॥ एतेषां ब्रह्मलिङ्गतया वाक्यान्तरे निर्णीतत्वे समन्वयो न वाच्यः स्यादिति भावः । यदपि तयोस्त्वित्यादिनोक्तं तदपि नेत्याह ॥ यच्चेति ॥ एतेन भाष्यस्थान्यथाशब्दस्य न केवलं टीकारीत्या स्पष्टलिङ्गादिसमन्वयार्थत्वं सविशेषनिर्विशेष-परत्वमप्यर्थ इत्युक्तं भवति । ''सगुणनिर्गुणप्राचुर्येण तद्भेद इति कश्चिदि''त्यादिना सुधायां तयोरपि भेदनिरासात् । भ्रमाधिष्ठानत्वेति ॥ मुख्यसर्वाभेदाभावादेवमुक्तम् ॥ कालत्रयेति ॥ सविशेषस्य कालयोगित्वादित्यादि ध्येयम् । ननु भवन्मते यथा अन्तराद्यधिकरणे क्वचिल्लिङ्गादिसमन्वयेपि बाहुल्येन पादव्यवस्था तथा किं न स्यादित्यत आह ॥ एतेनेति ॥

पाण्डुरङ्गि — नन्विदमपूर्वपादार्थकथनमयुक्तम् । परोक्तपादार्थस्यैव सम्यक्त्वादित्यतः पगोक्तं दूषयितुमनुवदति ॥ अन्ये त्विति ॥ अत्र वाक्यानीति शेषः । स्पष्टानि ब्रह्मलिङ्गानि येषु तानीत्यर्थः । एवमुत्तरत्रापि । नन्वेवं द्वितीयतृतीययोर्भेदो न स्यात् । उभयोरप्यस्पष्ट-ब्रह्मलिङ्गप्रतिपादकत्वादित्यत आह ॥ तयोस्त्विति ॥ अशब्दत्वोक्तिरितीति ॥ शब्दोस्यास्तीति शब्दम् । न शब्दमशब्दम् । तस्य भावस्तत्त्वमिति विग्रहः । शब्दप्रति-पाद्यत्वाभावोक्तिरिति यावत् । स्पष्टास्पष्टलिङ्गशब्दाभ्यां किं साधकलिङ्गान्युच्यन्ते समन्वे-तव्यानि वा । आद्येपि तेषां स्पष्टत्वं पूर्वोत्तरवाक्यप्रतीयमानत्वं वाऽस्वारस्येनापि जीवादावनुपपद्यमानत्वं वा विषयवाक्ये ब्रह्मधर्मतया निर्णीतत्वं वा वाक्यान्तरे ब्रह्मधर्मतया निर्णीतत्वं वा जीवादौ स्वारस्येनानुपपद्यमानत्वं वा साक्षाद्विप्रतिपन्नार्थनिष्ठतया श्रुतत्वं वा तद्विपरीतं चास्पष्टत्वमिति विकल्पान्हृदि कृत्वाऽऽह ॥ तत्रेत्यादि ॥ अन्तरित्यत्र य एषोन्तरादित्ये हिरण्मयः पुरुषो दृश्यत इत्युदाहरणमिति भावः । सर्वत्रेत्यत्र तु मनोमयःप्राणशरीरो भारूप इत्येतत् अत्तेत्यत्र तु यस्य च ब्रह्मच क्षत्रं चोभे भवत ओदन इत्युदाहरणम् । ईक्षतिकर्मेत्यत्र च यः पुनरेतं त्रिमात्रेणोमित्यनेनाक्षरेण परमं पुरुषमभिध्या-यीतेत्युदाहरणम् । तथाच साङ्कर्यान्नैवं पादभेदो युक्त इति भावः ।

॥ तच्चेति ॥ वाक्यान्तरे ब्रह्मपरतया निर्णीतत्वादिकमित्यर्थः । एवं प्रथमपादस्य द्वितीयतृतीयपादाभ्यां साङ्कर्यमुपपाद्याधुना द्वितीयतृतीययोरपि तदुपपादयितुमाह ॥ यच्चेति ॥

(पाण्डुरङ्गि)

अत्रापि सविशेषत्वनिर्विशेषत्वे परस्परविरुद्धे उताविरुद्धे इति विकल्पेन दूषयति ॥ द्वितीयेपीति ॥ तथाच निर्विशेषप्रतिपादकेन तृतीयेनास्य साङ्कर्यमिति भावः ॥ तृतीयेपीति ॥ तथाच सविशेषप्रतिपादकेन द्वितीयेनास्य साङ्कर्यमिति भावः । ननु द्वितीयपादे भ्रमाधिष्ठानत्वादिविशिष्टप्रतिपादनेन सविशेषपरत्वमेवेत्यत आह ॥ यदिचेति ॥ ननु तृतीयस्य न सविशेषविषयत्वम् । तत्रोदाहृतस्य यस्मिन्द्यौरित्यादेर्लक्षणया निर्विशेष-परत्वादित्यत आह ॥ यस्मिन्निति ॥ ननु द्वितीये सविशेषमेव प्रतिपाद्यम् । न चैवमविद्यादिसर्वभ्रमाधिष्ठानत्वरूपसार्वात्म्यायोगः । वास्तवरूपाभिप्रायेण तदुपपत्तेः । एवं तृतीयेपि निर्विशेषमेव प्रतिपाद्यम् । न चैवं तमेवैकं जानथेत्यादिवाक्योक्तदृश्यत्वाद्यनुपपत्तिः । विशिष्टाभिप्रायेण तदुपपत्तेरित्यत आह ॥ सविशेष इत्यादि ॥ एतेनेति ॥

तात्पर्यचन्द्रिका

अस्माकं नामपादे ''अंतस्तद्धर्मे''त्यत्र लिङ्गसमन्वय इन्द्राद्यनेकनाम-समन्वयार्थः तथा लिङ्गपादे वैश्वानरनामसमन्वयः पाचकत्वाद्यनेकलिङ्गसमन्वयार्थ इति टीकायामेव वक्ष्यते । यत्तु यौगिकरूढविषयतया द्वितीयतृतीययोर्भेद इति परमतं तन्न । तृतीयेऽपि द्युभ्वाद्यायतनत्वस्य ''ईक्षतिकर्मे''त्यत्राभिध्यातव्यत्वस्य ''शब्दादेव प्रमित'' इत्यादौ चाङ्गुष्ठमात्रत्वादेश्च यौगिकत्वात् । एवं चतुर्थेऽपि पादे त्वया ''आनुमानिक''मिति ''ज्योति''रिति ''न संख्ये''त्यधिकरणत्रय एव प्रधानस्य शाब्दताया निरस्तत्वादन्यत्र ''कारणत्वेन चाकाशादि''ष्वित्यत्र सृष्टि-वाक्यविगानस्य ''जगद्वाचित्वा''दित्यत्र ''यस्य चैतत्कर्म स वेदितव्य'' इत्यादिवाक्यानां जीवादिपरत्वस्य ''वाक्यान्वया''दित्यत्र ''आत्मा वा अरे द्रष्टव्य'' इत्यादिवाक्यानां जीवपरत्वस्य च ''प्रकृतिश्चे''त्यत्र निमित्तोपादानभेदस्य च निरस्तत्वात्प्रधानाशब्दता न चतुर्थपादव्यापिनी । यच्चोक्तं परैः प्रधानाद्येव कारणतया सर्ववेदान्तार्थ इति लक्षणासम्भवाशङ्कायाख्रिपाद्यां निरासः । चतुर्थपादे तु प्रधानमपि कारणतया वेदान्तैकदेशार्थ इत्यतिव्याप्तिशङ्कायाः । अत एवा''नुमानिक-मप्येकेषा''मिति सूत्रेऽपिशब्द एकशब्दश्चेति ॥ तन्न । आनुमानिकमित्यादौ पूर्वपक्षिणा यस्य ''महतः परमव्यक्तं अजामेका''मित्यादेः प्रधानपरत्वं शङ्कितं

तस्यैकदेशस्य सिद्धान्तेपि ब्रह्मपरत्वाभावात् अविद्यादिपरत्वे च ब्रह्मलक्षणस्य प्रधानेऽनतिव्याप्तावप्यविद्यायामतिव्याप्त्यपरिहारात् । तस्मान्न परमते पादभेदो युक्तः। नापि तत्क्रमः । सुबोधस्य प्राथम्य आनन्दमयादौ निर्विशेषविचारायोगात् । दुर्बोधस्य प्राथम्ये तु स्पष्टब्रह्मलिङ्गानां प्राथम्यायोगात् । निर्विशेषस्य तृतीये निरूपणायोगाच्च । ईक्षत्यधिकरणोक्ताशब्दत्वस्य विक्षिप्य चतुर्थपादे व्युत्पादने हेत्वभावात् । चतुर्थस्य तु समन्वयासङ्गतिः परैरेवाङ्गीकृतेति ।

प्रकाशिका — यत्त्विति ॥ एतेनान्यथाशब्दस्यैवं रूपार्थान्तरत्वमुक्तं ध्येयम् ॥ अभिध्यातव्यत्वस्येति ॥ ''यः पुरे तं त्रिमात्रेणोमित्यनेनैवाक्षरेण परं पुरुषमभिध्यायीते''ति वाक्योक्तस्येत्यर्थः । इत्यादौ चेत्यादिपदेन ''सुषुप्त्युत्क्रांत्यो''रित्यत्र समन्वीयमानं काण्वश्रुतिस्थं ''योऽयं विज्ञानमय'' इत्यादि ग्राह्यम् । प्रागनूदितचतुर्थपादोपाधिं निराह ॥ चतुर्थेऽपीति ॥ ज्योतिरिति ॥ यद्यपि परमते ''चमसव''दित्यारभ्यैवाधिकरणं तथापि तथानुवादार्हतयाऽपि नेति वा प्रधानप्रापकस्य ''अजामेका''मिति मन्त्रस्य ज्योतिः सूत्र एव तेजोबन्नरूपार्थकत्ववर्णनाद्वा ज्योतिरित्यनुवादः । अन्यत्रेति ॥ एतत्सर्वं तत्रैव स्पष्टीभविष्यति । अन्यथाशब्दस्यापरमप्यर्थमभिप्रेत्य परोक्तमन्यदपि निराह ॥ यच्चेति ॥ शङ्काया इति ॥ निरास इत्यनुषङ्गः ॥ अपिशब्द इति ॥ न केवलं ब्रह्म किं त्वानुमानिकपदोक्तं प्रधानमपि कारणमित्यर्थप्रतीतेरेकशब्देनैकेषां कठानां शाखायामित्यर्थ-प्रतीत्यादेरेकदेशार्थत्वावगमादिति भावः ॥ अविद्यायामिति ॥ ननु तत्र वाक्ये परशब्दस्यो-त्कर्षार्थत्वादिह कारणत्वधीरेव नेति सिद्धान्त्यते । अतोऽविद्यादिपरत्वेपि न दोष इति चेत्तर्हि प्रधानपरत्वेपि न दोष इति तत्परत्वनिरासस्तत्र व्यर्थ इति भावः ॥ निर्विशेषेति ॥ तस्य सूक्ष्मत्वेन प्रथमं दुर्गमत्वादिति भावः ॥ चतुर्थस्य त्विति ॥ पादस्येत्यर्थः ।

पाण्डुरङ्गि — ननु सविशेषनिर्विशेषतया द्वितीयतृतीययोर्भेदासम्भवेपि योगरूढि-विषयत्वाभ्यां भेदः स्यादेव । तथाच कथं तयोः साङ्कर्योपपादनम् । न च तथापि कथं प्रथमपादस्य द्वितीयतृतीयाभ्यां भेद इति वाच्यम् । द्वितीयस्य केवलयौगिकत्वविषयत्वेन तृतीयस्य केवलरूढिविषयत्वेन प्रथमस्य योगरूढिविषयत्वेन ताभ्यां तस्य साङ्कर्याभावादि-त्येतत्परोक्तं दूषयितुमनुवदति ॥ यत्त्विति ॥ किमत्र तृतीये समन्वेतव्यसर्वशब्दानां रूढत्वं कतिपयानां वा । नाद्य इत्याह ॥ तृतीयेपीति ॥ न द्वितीयः । द्वितीयेपि कतिपयानां

(पाण्डुरङ्गि)

वैश्वानरादिशब्दानां रूढत्वस्य सत्त्वेन साङ्कर्यापरिहारात् । यच्च प्रथमस्यासाङ्कर्यकथनं तदप्ययुक्तम् । सर्वेषामपि समन्वेतव्यशब्दानां योगरूढत्वस्य श्रुत्युक्तत्वात् । ननु तृतीये समन्वेतव्यशब्देषु रूढानां बाहुल्याद्यौगिकानां चाल्पत्वात्प्रायिकत्वेन पादभेदः स्यादिति चेन्न। तृतीये समन्वेतव्यानां हि रूढत्वं नाम विद्वद्रूढत्वं वाऽज्ञरूढत्वं वा । नाद्यः । तादृशरूढिमत्त्वस्य सर्वेष्वपि सत्वात् । न द्वितीयः । तस्य भूमाक्षरादिशब्देष्वप्यभावादिति भावः । चतुर्थपादार्थं दूषयति ॥ चतुर्थेपीति ॥ अत्र ह्यशब्दत्वोक्तेः पादार्थत्वं क्वचिदशब्दत्वोक्तिमात्रेण वा सर्वत्राशब्दत्वोक्त्या वा । नाद्यः । ईक्षत्यधिकरणेपि प्रधानाशब्दत्वस्योक्तत्वेन तत्राप्यस्य पादार्थत्वापत्तेः । न द्वितीयः । प्रकृतेपि तदभावादित्याह ॥ त्वयेति ॥ प्रकारान्तरेण पादार्थं दूषयितुमनुवदति ॥ यच्चोक्तमिति ॥ प्रधानस्य वेदान्तैकदेशार्थत्वे ज्ञापकमाह ॥ अत एवेति ॥ प्रधानस्यापि वेदान्तैकदेशार्थत्वं यतोऽत एवेत्यर्थः । किमत्र कारणत्वस्यातिव्याप्तिमात्रं परिह्रियते प्रधानातिव्याप्तिर्वा । नाद्य इत्याह ॥ आनुमानिकमिति ॥ ब्रह्मपरत्वाभावेनान्यपरत्वस्यापि स्वीकृतत्वेनातिव्याप्तिः स्यादेवेति भावः । न द्वितीयो निष्फलत्वादित्याह ॥ अविद्यापरत्वे चेति ॥ अविद्यायामिति ॥ नन्वविद्यायाः कारणत्वेपि नातिव्याप्तिः । तत्सम्बन्धेन ब्रह्मण्येव तदापत्तेरिति चेन्न । सांख्येनापि केवलप्रकृतेः केवलब्रह्मणो वा कारणत्वानङ्गीकारात् । अन्योन्यसचिवकारणत्वस्य तूभाभ्यामङ्गीकारात् । ब्रह्माविद्यापुरुषप्रकृतिनाममात्रभेदे विवादापर्यवसानप्रसङ्गेन पक्षपातबीजाभावादिति भावः ॥ नापि तत्क्रम इति ॥ नन्वेतदस्माकं दूषणं स्यात् । सुबोधस्य प्राथम्ये तृतीयस्य दुर्बोधस्य तत्वे च चतुर्थस्य प्रथमत्वापात इति चेन्न । निरस्य क्रमादेर्नियामकस्योक्तत्वात् । परस्य च नियामकान्तराभावादिति भावः । ननु चतुर्थेऽशब्दत्वप्रतिपादनमसङ्गतम् । न चेक्षतिसूत्रोक्ताशब्दत्वप्रतिपादकत्वान्नासङ्गतिरिति वाच्यम् । तथा विशेषे कारणाभावादयुक्तमेतदित्याह ॥ ईक्षत्यधिकरणोक्तेति ॥

तात्पर्यचन्द्रिका

॥ केचित्तु जन्मादिसूत्रे ब्रह्मकारणमेव ब्रह्मैव कारणमित्यवधारणद्वयं विवक्षितम्। तत्र लक्षणेऽसम्भवरूपायोगव्यवच्छेदः प्रथमपादे अतिव्याप्तिरूपान्ययोगव्यवच्छेदस्त्रिपाद्यां तत्राप्यस्पष्टजीवादिलिङ्गकानि वाक्यानि द्वितीये स्पष्टजीवादिलिङ्गकानि तृतीये तत्तत्प्रतिपादनच्छायानुसारीणि चतुर्थे विचार्यंत इत्याहुः । तन्न ।

आद्यपादेपि त्वन्मते ''ईक्षतेर्नाशब्द''मित्यत्र प्रधानकारणतायाः ''कामाच्च नानुमानापेक्षे''त्यादौ जीवादिकारणतायाश्च निषिद्धत्वेनातिव्याप्तिपरिहारस्य तत्रापि सत्त्वात् । नन्वीक्षत्यधिकरणादौ ''सदेवे''त्यादि वाक्यानां प्रधानपरत्वे तदैकार्थ्यात्सर्वाणि कारणवाक्यानि तथा । एवं च न ब्रह्मकारणमित्यादिः पूर्वः पक्षः । स चासम्भवपर्यन्त इति चेत् सदेवेत्यादिवाक्यानां ब्रह्मपरत्वे तदैकार्थ्यात्सर्वाणि वाक्यानि तथा । एवं च न प्रधानादिकारणमिति सिद्धान्तः । स चातिव्याप्तिपरिहारपर्यन्त इत्यपि सम्भवात् । द्वितीयतृतीययोरपि पादयोः पूर्वपक्ष एवमसम्भवपर्यन्तताया वक्तुं शक्यत्वाच्च । यच्चोक्तं चिदचिद्विलक्षणं मूलकारणभूतं वस्तु प्रथमे प्रतिपाद्यते । अथ तस्य गुणविशेषास्त्रिपाद्यामिति । तत्र चिदचिद्विलक्षणत्वं यदि कारणत्वेनैव तदान्तर्ज्योतिरित्यादौ कारणत्वादन्यस्यादित्यां तस्थत्वज्योतिष्त्वादेरुक्तेरन्तरित्यादेरप्याद्यपादान्तर्गतिर्न स्यात् । यदि तु गुणान्तरेणापि तदा त्रिपाद्या अप्याद्यपादान्तर्गतिः स्यात् ।

प्रकाशिका — एवं भाष्यस्थान्यथाशब्दस्य चतुर्थार्थमुपेत्याद्वैतिमतं निरस्य ''भाष्यं चात्यर्थविस्तर''मित्युक्तेरर्थान्तरपरत्वमप्युपेत्य रामानुजमतनिरासपरत्वेनापि व्याख्यातुमाह ॥ केचित्त्विति ॥ एकार्थत्वे पादभेदः कुत इत्यत आह ॥ तत्रापीति ॥ त्रिपाद्यामपीत्यर्थः ॥ जीवादीति ॥ जीवप्राणबुद्धिलिङ्गकानीत्यर्थः । अस्पष्टत्वं च जीवादौ स्वारस्येनानुपपद्यमानत्वं वाक्यान्तरे ब्रह्मलिङ्गतया निर्णीतत्वं वा । तद्विपरीतं स्पष्टत्वम् ॥ तत्तदिति ॥ जीवप्राणादिलिङ्गप्रतिपादनेत्यर्थः ॥ ईक्षतेरिति ॥ अधिकरणशरीरं तु प्रागुक्तम् ॥ कामाच्चेति ॥ ''सोकामयते''त्यारभ्य ''इदं सर्वमसृजते''ति कामादेव सर्गश्रवणादस्यानन्दमयस्य सृष्टौ जीववन्नानुमानगम्यप्रकृत्यपेक्षास्तीति प्रकृतिनिरपेक्षजगत्स्रष्टाऽऽनन्दमयः परमात्मा न जीव इत्युक्तेरिति भावः ॥ तथेति ॥ प्रधानपराणीत्यर्थः । अन्यथाशब्दस्यार्थान्तरमुपेत्य तदुक्तं प्रमेयान्तरमपि निराह ॥ यच्चेति ॥ चेतनाचेतनविलक्षणमित्यर्थः । कारणत्वेनैवोभयविलक्षणं वस्तूच्यते धर्मान्तरेण वा । आद्य आह ॥ तत्रेति ॥ अन्तरिति ॥ ''अन्तस्तद्धर्मे''ति सूत्रे ''ज्योतिश्चरणे''त्यादावित्यर्थः । द्वितीय आह ॥ यदि त्विति ॥ त्रिपाद्यामप्युभयविधधर्माणामेवोक्तेरिति भावः ।

पाण्डुरङ्गि — जन्मादिसूत्र इति ॥ सर्वं वाक्यं सावधारणमिति न्यायेनैतत्सूत्रस्य सावधारणत्वम् । एवं चैकस्यावधारणस्योभयत्रान्वय इति भावेनावधारणद्वयमित्युक्तम् । न त्ववधारणद्वयं कल्प्यमिति भावः । अस्त्वेवं ततः किमित्यत आह ॥ तत्रेति ॥ ननु तर्हि त्रिपाद्या भेदो न स्यादित्यत आह ॥ तत्रापीति ॥ तत्तत्प्रतिपादनच्छायानुसारीणीति ॥ स्पष्टतरपूर्वपक्षहेतुकानीत्यर्थः । एवं ह्यसम्भवपरिहारः प्रथमपादे अतिव्याप्तिपरिहारस्त्रिपाद्यामित्युक्तं स्यात् । तच्चायुक्तम् । अतिव्याप्तिपरिहारस्य प्रथमपादेपि सत्त्वादित्याह ॥ तत्रेत्यादिना ॥ अतिव्याप्तिपरिहारस्याप्यसम्भव एव पर्यवसानमित्याशङ्कते ॥ नन्विति ॥ तदैकार्थ्यादिति ॥ सदैवेत्यादेः प्रधानवाक्यत्वादिति भावः ॥ तथेति ॥ प्रधानकारणत्वप्रतिपादकानीत्यर्थः । अतिव्याप्तिपर्यन्तत्वासम्भवे ह्यसम्भवपर्यन्तत्वं वक्तव्यम् । न चैवम् । उक्तरीत्या तत्सम्भवस्य समर्थितत्वादित्याह ॥ सदेवेत्यादीति ॥ तथेति ॥ सर्वाणि कारणवाक्यानि ब्रह्मणः कारणतापराणीत्यर्थः । ननु प्रथमपादेऽतिव्याप्तिपरिहारस्याल्पत्वात् प्रायेणासम्भवपरिहारस्य कृतत्वेन प्रायिकत्वात्पादव्यवस्था स्यादेवेत्यत आह ॥ द्वितीयतृतीययोरिति ॥ तथाच तयोरतिव्याप्तिपरिहारकत्वं न स्यात् । वैपरीत्यमेव स्यादिति भावः ॥ एवमसम्भवपर्यन्ताया इति ॥ अस्पष्टजीवादिवाक्यानां प्रधानपरत्वे सर्वेषामपि वाक्यानां प्रधानपरत्वमेव स्यान्न ब्रह्मपरत्वमित्यसम्भवपर्यन्ताया इत्यर्थः । नन्वसम्भवपरिहारः प्रथमेऽतिव्याप्तिपरिहारस्त्रिपाद्यामित्यस्यायमर्थः । असम्भवे परिहृते हि मूलकारणं सिध्यतीति तदेव प्रथमप्रतिपाद्यम् । अतिव्याप्तिपरिहारे सति गुणविशेषे सति सिद्धिर्भवतीति गुणविशेषप्रतिपादनं त्रिपाद्यामिति नसाङ्कर्यमित्येतत्पराभिप्रेतं दूषयितुमनुवदति ॥ यच्चोक्तमिति ॥ चिदचिद्विलक्षणमिति ॥ जडजीवविलक्षणमित्यर्थः । अत्र चिदचिद्विलक्षणत्वं कारणत्वेनैव वा गुणान्तरेण वा । नाद्य इत्याह ॥ तदेति ॥ द्वितीयं दूषयति ॥ यदि त्विति ॥ त्रिपाद्या अपीति ॥ त्रिपाद्यामवान्तरपादभेदवदाद्यपादस्यापि भेदो भविष्यतीति चेन्न । अनुपदमेव दूष्यत्वादिति भावः ।

तात्पर्यचन्द्रिका

यच्चोक्तमस्पष्टजीवादिलिङ्गकानि वाक्यानि द्वितीय इत्यादि तच्चायुक्तम् । द्वितीयेपि मनोमयत्वप्राणशरीरत्वादेरत्तृत्वस्य च मनः प्राणादियुक्ते भोक्तरि जीवे तथा कर्मफलभेक्तृत्वस्य भोक्तृजीवसाहित्येन ब्रह्मणीव बुद्धौ प्राणे वा । तथा "यस्य

पृथिवीशरीर''मिति शरीरित्वसाहित्येन श्रुतान्तर्यामित्वादेश्च जीवे स्पष्टत्वात् । ननु मनोमयत्वादिकं शुद्धेन मनसा ग्राह्यत्वादिकम् । अत्तृत्वं च संहर्तृत्वम् । तच्च जीवेनुपपन्नत्वादस्पष्टमिति चेन्न । मनोमयत्वादेरेवंरूपत्वस्य पूर्वपक्षिणानङ्गीकृतत्वेनापाततो जीवादिष्वेव स्पष्टत्वात् । सिद्धान्तदशायां च जीवेनुपपत्तेः सर्वसाधारण्यात् । ननु मनोमयत्वं न मनःसम्बन्धमात्रम् । तस्य जीवत्वासाधकत्वात् । किन्तु मनःकरणकत्वम् । तच्च तस्मिन्वाक्ये न स्पष्टमिति चेन्न । मनस्सम्बन्धमात्रोक्तावपि तस्य करणत्वप्रसिध्या तथैव सम्बन्धसिद्धेः । न हि चक्षुष्मच्छब्देन तत्संयुक्तस्याकाशादेः प्रतीतिः । ननु ''मनोमयः प्राणशरीरनेते''त्यादौ वाक्यान्तरे मनोमयत्वादिकं ब्रह्मणि प्रसिद्धमिति जीवादावस्पष्टमिति चेन्न । तृतीयेपि द्युभ्वाद्यायतनत्वस्यापि ''एको दाधार भुवनानि विश्वे''त्यादौ वाक्यान्तरे ब्रह्मणि प्रसिद्धेः । तत्र जायमानत्वादिलिङ्गं जीवे प्रसिद्धं चेदत्रापि ''एष म आत्मान्तर्हृदय'' इत्यर्भकौकस्त्वमपि जीवे प्रसिद्धम् । प्रत्युत तृतीये द्युभ्वाद्यायतनत्वं स्वरूपेण ''अमृतस्यैष सेतु''रित्यादिब्रह्मलिङ्गसन्निधानेन च तथा पूर्णत्वरूपं भूमत्वमपि स्वरूपेण ''यत्र नान्यत्पश्यती''त्यादिब्रह्मलिङ्गसन्निधानेन च तथाऽक्षरत्वमपि ''अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठत'' इत्यादिब्रह्मलिङ्गसन्निधानान्न जीवादौ स्पष्टम् । तत्तत्प्रतिपादनच्छायानुसारिणोपि न परस्परविरुद्धस्पष्टास्पष्टजीवादिलिङ्गकवाक्यबहिर्भावः ।

प्रकाशिका — त्रिपाद्यामप्यवान्तरपादोपाधिं प्रागुक्तं निराह ॥ यच्चेति ॥ ''सर्वत्र प्रसिद्धे''ति नये ''मनोमयः प्राणशरीरो भारूप'' इति वाक्ये अत्तेति नये ''यस्य ब्रह्म च क्षत्र''मिति वाक्य इति भावः ॥ प्राणे वेति ॥ स्पष्टत्वादित्यन्वयः । अत्र दृष्टान्तोक्तिस्तु साहित्येन स्पष्टत्वं नाभिप्रेतमिति शङ्काव्युदासाय ब्रह्मणि स्पष्टत्वस्य तथैव भावितत्वादिति वक्तुम् ॥ यस्येति ॥ अन्तर्यामिनयवाक्य इत्यर्थः । उक्तदोषमध्ये क्वचिदुद्धारमाशङ्कते ॥ नन्विति ॥ मनोमयत्वादेरेवमर्थोक्त्या जीवेऽस्पष्टत्वोक्तिः । किं पूर्वपक्षरीत्याऽथा पातदृष्टचैतत्सिद्धान्तदिशेति विकल्प्याद्यस्यायोगेन द्वितीये वाच्ये तत्र स्पष्टत्वमेवेत्याह ॥ मनोमयत्वादेरिति ॥ अनङ्गीकृतत्वेनेति ॥ अन्यथा पूर्वपक्षानुदयादित्यर्थः । तृतीयं निराह ॥ सिद्धान्तेति ॥ सर्वलिङ्गसाधारण्यादस्पष्टान्येव सर्वाणि स्युरित्यर्थः ॥ जीवत्वेति ॥

(प्रकाशिका)

गगनादावपि भावादिति भावः । ननु द्युभ्वाद्यायतनत्वस्य स्वरूपेण जीवेऽस्पष्टत्वेपि जीवे प्रसिद्धलिङ्गसाहित्यात्तत्र स्पष्टमेवेत्याशङ्क्याह ॥ तत्रेति ॥ ''स एषोन्तश्चरते बहुधा जायमान'' इत्युक्तमित्यर्थः ॥ अर्भकौकस्त्वमिति ॥ तथा च तत्साहित्यान्मनोमयत्वमपि जीवे स्पष्टं स्यादिति भावः । तृतीयपादोपाधिमपि निराह ॥ प्रत्युतेति ॥ जीवलिङ्गसाहित्येन जीवे स्पष्टत्वोक्तौ द्वितीयपादसाङ्कर्यमात्रमित्येवं नेत्यर्थः । चतुर्थपादोपाधिमप्यपाकरोति ॥ तत्तत्प्रतिपादनेति ॥ च्छायानुसारिणोपि वाक्यस्येति शेषः ॥ परस्परेति ॥ स्पष्टलिङ्गप्रतिपादकत्वं वाऽस्पष्टलिङ्गप्रतिपादकत्वं वा भवेत् । विरोधेन तृतीयप्रकाराभावात् । तथाच तदुभयविधवाक्यविचारः प्रागेव कृत इति भावः ।

पाण्डुरङ्गि — प्रथमस्य द्वितीयतृतीयपादाभ्यां साङ्कर्यमुक्त्वा द्वितीयतृतीययोरपीदानीमन्योन्यसाङ्कर्यमाह ॥ यच्चोक्तमिति ॥ बुद्धौ प्राणे वेति ॥ भोक्तृप्राणसाहित्येन बुद्धौ भोक्तृत्वस्य सम्भवादिति भावः । नन्वत्र मनोमयत्वं न मनोविकारत्वम् । येन स्पष्टत्वं स्यात् । किन्तु शुद्धेन मनसा ग्राह्यत्वम् । तथा अत्तृत्वमपि न क्षुन्निवारकभक्षयितृत्वम् । किन्तु संहर्तृत्वम् । तथा कर्मफलभोक्तृत्वमपि न कर्मफलभोगमात्रम् । किन्तु तन्नियामकत्वम् । एवं शरीरित्वमपि न शरीराधिष्ठातृत्वम् । किन्तु नियामकत्वम् । तथाच निरुक्तानां जीवेऽस्पष्टत्वान्न तृतीयेन साङ्कर्यमस्येत्याशयेन शङ्कते ॥ नन्विति ॥ मनोमयत्वादेरिति ॥ तथाचैतादृशनिर्वचने पूर्वपक्षानुत्पादनमेव स्यादिति भावः । सिद्धान्तरीतिमनुसृत्यैवमस्पष्टत्वमुक्तमिति न पूर्वपक्षानुदय इत्यत आह ॥ सिद्धान्तदशायामिति ॥ मनस्सम्बन्धमात्रोक्तावपीति ॥ सागान्यतः सम्बन्धमात्र उक्तेपि सम्बन्धान्तरस्यासम्भवात्करणत्वपर्यवसानमिति भावः । ननु सामान्यतो मनःसम्बन्धवानित्युक्ते करणत्व एव पर्यवसानं क दृष्टमित्यत आह ॥ न हीति ॥ किन्तु चक्षूरूपकरणत्वमेव प्रतीयत इति भावः। ननु विषयवाक्ये स्पष्टत्वास्पष्टत्वे न विवक्षिते । किन्तु वाक्यान्तरे ब्रह्मपरतयाऽनिर्णीतत्वमेवास्पष्टत्वं विवक्षितम् । मनोमयत्वादिकं च तादृशमित्याशयेन शङ्कते ॥ नन्विति ॥ तृतीयेपीति ॥ तथाच तत्र समन्वेतव्यद्युभ्वाद्यायतनत्वस्यास्पष्टत्वेन द्वितीये समन्वेतव्यत्वापत्तेरिति भावः । ननु तृतीये समन्वेतव्यं द्युभ्वाद्यायतनत्वं नास्पष्टम् । जायमानत्वादिलिङ्गसाहित्येन स्पष्टत्वादित्यत आह ॥ तत्रेति ॥ अत्रापीति ॥ अर्भकौकस्त्वादिलिङ्गसाहित्येन सर्वगतत्वस्यापि जीवादौ स्पष्टत्वं स्यादिति भावः । किञ्च द्युभ्वाद्यायतनत्वापेक्षया मनोमयत्वादेरस्पष्टत्वाभावेन तस्य तृतीय एव समन्वेतव्यत्वम् । न तु

द्वितीये । न च तस्य कथं स्पष्टत्वमिति वाच्यम् । स्वरूपेण ब्रह्मलिङ्गसाहित्येन वान्यत्रास्पष्टत्वादित्याह ॥ प्रत्युतेति ॥ चतुर्थपादार्थमपि दूषयति ॥ तत्तदिति ॥ तत्प्रतिपादनच्छायानुसारिणा न स्पष्टत्वलिङ्गत्वम् । येन स्पष्टलिङ्गसमन्वयप्रतिपादकद्वितीयेंतर्भावः । नाप्यस्पष्टलिङ्गानि । येन तृतीयेंतर्भावः । किन्तूभयविलक्षणानि । तथाच न कोपि दोष इत्यत उक्तं परस्परेति ॥ परस्परविरुद्धयोरन्यतरनिषेधस्यान्यतरविधिनांतरीयकत्वेनोभयवैलक्षण्यस्य व्याहतत्वादिति भावः ।

तात्पर्यचन्द्रिका

ननु तत्तत्प्रतिपादनच्छायानुसारित्वं नाम स्पष्टतरपूर्वपक्षहेतुकत्वमिति चेन्न । चतुर्थपादे ''आनुमानिक''मित्यस्य विषये ''महतः परमव्यक्तमव्यक्तात्पुरुषःपर'' इति वाक्ये ''ज्योतिरुपक्रमा''दित्यस्य विषये ''अजा''मित्यादिवाक्ये ''न संख्योपसङ्ग्रहा''दित्यादेर्विषये

यस्मिन्पञ्च पञ्चजना आकाशश्च प्रतिष्ठितः ।
तमेवमन्य आत्मानं विद्वान्ब्रह्मामृतोमृतम्

इत्यादिवाक्ये च पूर्वपक्षहेतोरस्पष्टत्वात् । तथाहि । न तावत्तत्र प्रधानमस्तीत्येव पूर्वपक्षः । तस्य सिद्धान्तेपि सत्त्वात् । किं त्वीश्वरानधीनं तदस्तीति । न चोक्तविषयवाक्य ईश्वरानधीनं प्रधानादिकमस्तीत्यत्र स्पष्टो हेतुरस्ति । यच्चोक्तं द्वितीये सर्वशरीरत्वं तृतीये सर्वात्मकत्वं चतुर्थे त्वतत्कार्यातच्छरीरवत्त्वाभावः प्रतिपाद्यत इति । तन्न । द्वितीये ''अन्तर्यामी''त्यत्रैव ''यस्य पृथिवीशरीरं यस्यापःशरीर''मित्यादिना सर्ववस्तूनां प्रत्येकं विशिष्य नियम्यत्वरूपशरीरत्वोक्तेः । तृतीये ''द्युभ्वाद्यायतन''मित्यत्रैव ''यस्मिन्द्यौ''रित्यादिनासर्वप्रकारित्वरूपसर्वात्मकत्वोक्तेर्द्वितीयतृतीयस्थाधिकरणान्तरवैयर्थ्यापातात् । द्वितीये ''अदृश्यत्वादिगुणक'' इत्यादौ सर्वशरीरत्वस्य तृतीयेपि ''भूमे''त्यादौ सर्वात्मत्वस्याप्रतीतेश्च । श्रुतिसूत्रानुसारेण सर्वगतत्वात्तृत्वद्युभ्वाद्यायतनत्वपूर्णत्वाद्यनेकगुणपरत्वसम्भवे एकैकस्य पादस्यैकैकगुणमात्रपरत्वायोगाच्च । अतत्कार्यवस्तुनो ''न विय''दित्यत्र

(तात्पर्यचन्द्रिका)

निरसिष्यमाणत्वादतच्छरीरत्वस्य च ''अन्तर्यामी''त्यत्र निरस्तत्वेन चतुर्थवैयर्थ्यात्। चतुर्थस्य समन्वयाध्यायासङ्गतेश्च। तस्मान्नान्योक्तं पादभेदादिकं युक्तम्। तदेतदभिप्रेत्योक्तं भाष्ये ''नान्यथा तदृष्टे''रिति।

प्रकाशिका — प्रकारान्तरमाशङ्कते ॥ नन्विति ॥ अधिकरणान्युत्तरत्र स्पष्टानि। अस्पष्टत्वं व्यनक्ति ॥ तथाहीति ॥ अन्यथा पदस्यार्थान्तरमुपेत्य परोक्तत्रिपाद्यामवान्तरपादोपाध्यंतरमप्यनूद्य निराह ॥ यच्चेति ॥ ब्रह्मण इति शेषः ॥ अतत्कार्येति ॥ ब्रह्माकार्यं ब्रह्माशरीरं वस्तु नेत्युच्यत इत्यर्थः। यद्येकैकगुणबोधकत्वं पादार्थस्तर्हेकैकाधिकरणेनैव तत्सिद्धेरधिकरणान्तरवैयर्थ्यमित्याह ॥ अन्तर्यामीति ॥ व्याप्तौ पादोपाधी इत्याह ॥ अदृश्यत्वादीति ॥ विषयवाक्यभूतश्रुतिसूत्रयोरननुगुणश्चायं पादोपाधिरित्याह ॥ श्रुतीति ॥ चतुर्थपादार्थं निराह ॥ अतत्कार्येति ॥ वियत्पाद इत्यर्थः। अतत्कार्यातच्छरीरवस्त्वभावपरत्वे दोषान्तराह ॥ चतुर्थस्येति ॥ मतद्वयदूषणमुपसंहरति ॥ तस्मादिति ॥ तदेतदिति ॥ मतद्वयदूषणमित्यर्थः। टीकोपलक्षणमिति भावः। एतेनाद्वैतमतानुरोधेन पादोपाधीन्वर्णयन्कश्चिदपि प्रत्यूढो बोध्यः।

पाण्डुरङ्गि — नन्वव्यक्तात्पुरुषः पर इति वाक्येऽवरत्वस्याजामेकामित्यत्र शुक्लकृष्णात्मकत्वस्य यस्मिन्पञ्चेत्यत्र बहुरूपत्वस्य चास्पष्टत्वाभाव इत्याशङ्क्याह ॥ तथाहीति ॥ अवरत्वादिकं च प्रधानादिकमीश्वराधीनमित्यत्रैव हेतुः। न त्वनधीनत्व इति भावः। प्रकारान्तरेण त्रिपाद्या असाङ्कर्यं दूषयितुमनुवदति ॥ यच्चोक्तमिति ॥ अतत्कार्येति ॥ अतत्कार्यं ब्रह्माकार्यम्। अतच्छरीरं ब्रह्माशरीरं यद्वस्तु तदभाव इत्यर्थः। सर्वशरीरत्वं नाम सुखदुःखावच्छेदकत्वरूपं नियम्यत्वरूपत्वं वा। नाद्यः। ब्रह्मणो दुःखरहितत्वेनैतादृशशरीरत्वानङ्गीकारात्। नांत्यः। तस्यान्तर्यामीत्यत्रैवोक्तत्वेन पादार्थत्वायोगात्। तथा सर्वात्मकत्वं नाम सर्वरूपत्वं वा सर्वप्रकारित्वं वा। नाद्यः। तस्यानङ्गीकारात्। नांत्यः। तस्य द्युभ्वादीत्यत्रैवोक्तत्वेन पादार्थत्वासम्भवादित्याह ॥ द्वितीय इत्यादिना ॥ सर्वप्रकारित्वं सर्वविशेषणत्वम्। तद्विवरणरूपत्वादवैयर्थ्यमित्यत आह ॥ द्वितीय इति ॥ तथाचाप्रतीयमानत्वान्न पादार्थत्वमिति भावः। किं चास्मदुक्तरीत्याऽनेकगुणपरत्वसम्भव एकगुणपरत्वं न युक्तमित्याह ॥ श्रुतिसूत्रेति ॥ तुरीयपादार्थं दूषयति ॥ अतत्कार्येति ॥ परोक्तपादभेददूषणमुपसंहरति ॥ तस्मादिति ॥

तात्पर्यचन्द्रिका

अत्र च ''सर्वे वेदा यत्पदमामनन्ती''त्यादिश्रुत्युक्तस्यापि समन्वयस्य बाधकोद्धारादिना स्थापनार्थमयमध्यायः सफलः । यथा ''स एष यज्ञः पञ्चविधोग्निहोत्रं दर्शपौर्णमासौ चातुर्मास्यानि पशुः सोम'' इत्यादि श्रुतिसिद्धाग्निहोत्रादिपदनामधेयत्वस्थापनार्थं नामधेयपादः ॥

प्रकाशिका — एवं पादोपाधीन्स्वाभिमतान्समर्थ्य पराभिमतांश्च निरस्येदानीं श्रुतावेवोक्तस्य समन्वयस्य व्युत्पादनं व्यर्थमित्यतोध्यायस्य फलमाह ॥ अत्र चेति ॥ अस्मिन् शास्त्र इत्यर्थः । विशिष्य न्यायैः प्रपञ्चनमादिपदार्थः । अत एव सुधायां श्रुतस्य प्रयोजनस्य न्यायेनोपपादनार्थमाद्यं सूत्रमित्युक्तत्वेनैतच्छङ्कासमाधिरप्युक्तप्राय इति ''सर्वे वेदा आमनंति यत्पदं त्विति हि श्रुति''रित्येतद्व्याख्यावसरे पृथगेतच्छङ्कासमाधी द्वावपि नोक्ताविति भावः ॥ यथेति ॥ तत्तत्कर्मवाक्योपात्तानामग्निहोत्रादिशब्दानां धर्मे प्रामाण्यादिप्रकारापेक्षायामैतरेयादौ स एष इत्यादियज्ञविभाजकवाक्येषु नामधेयत्वेन निर्देशे सत्यपि तन्निर्वाहाय बाधकोद्धारादिना व्यवस्थापनार्थमाद्याध्यायचतुर्थपादारम्भो यथा पूर्वतन्त्रे तथात्रापीत्यर्थः । सोमशब्दो यद्यपि द्रव्यवचनः तथापि ''अव्यक्तासुतसोमस्ये''त्यादाविव लक्षणया कर्मविषयत्वेन निर्देश इति ध्येयम् ।

पाण्डुरङ्गि — नन्वध्यायोयमनारम्भणीयः । प्रयोजनाभावात् । न च समन्वयसिद्धिरेव प्रयोजनमिति वाच्यम् । तस्य सर्वे वेदा इत्यादिश्रुत्यैव प्रमितत्वात् । न हि श्रौतेऽर्थे कश्चिदपि प्रतिपद्यत इत्यत आह ॥ अत्र चेति ॥ तथाचाध्यायस्य साक्षात्समन्वयप्रतिपादकत्वेपि श्रुत्युक्तसमन्वये बाधकोद्धारेण तत्स्थापकत्वान्न वैयर्थ्यमिति भावः । यद्वा एवं परोदीरितपादार्थं तत्क्रमं चानूद्य दूषयित्वा स्वमतेन पदार्थमुक्त्वा तत्क्रमश्च व्युत्पादितः । इदानीमध्यायस्य साफल्यं दृष्टान्तपूर्वकमुपपादयति ॥ अत्र चेति ॥ आदिपदेन साधकान्तरोक्तिग्रहणम् ।

तात्पर्यचन्द्रिका

शास्त्रेऽध्याये तथा पादे श्रुत्याऽधिकरणेन च ।
सङ्गतिः पञ्चधा प्रोक्ता सर्वाधिकरणेष्वपि ॥ १ ॥

(तात्पर्यचन्द्रिका)

तत्र चाद्यत्रिकं प्रायेणान्तर्भावात्मकं मतम् ।
उत्तरं तु द्वयं प्रोक्तमानन्तर्यात्मकं सदा ॥ २ ॥
अध्याययोः पादयोरप्यानन्तर्यात्मिकैव हि ।
तत्राद्यत्रितयं स्पष्टमस्पष्टं तु परं द्वयम् ॥ ३ ॥
द्व्यध्याय्यां च त्रिपाद्यां च द्विपाद्यां चापि सङ्गतिः ।
ऊहनीया यथा योगमिति सङ्गतिसङ्ग्रहः ॥ ४ ॥

पेटिकासङ्गतिस्तु न सार्वत्रिकी । तत्तदधिकरणसङ्गतेस्तत्तदधिकरणविषयवाक्यभूतश्रुतिसङ्गत्याऽविनाभाव एव नत्वभेद इति सा पृथक् । ईक्षत्यधिकरणादेः समन्वयाध्यायादिना सङ्गतेरानन्तर्यरूपत्वेनान्तर्भावरूपत्वाभावात्तस्याः प्रायिकता । अधिकरणस्याधिकरणान्तरे पादस्य पादान्तरेऽध्यायस्य वाध्यायान्तरेऽन्तर्भावाभावादानन्तर्यमेव नियतम् । तत्र शास्त्राध्यायपादसङ्गतीनां सर्वत्र स्पष्टत्वाद्भाष्येऽपि तदनुक्तिः । श्रुत्यधिकरणसङ्गती त्वस्पष्टे इति ते सर्वत्र भाष्ये वक्ष्येते । एवं पूर्वतन्त्र उपदेशातिदेशविषयत्वेन पूर्वोत्तरषट्कद्वयवदिहाप्यनुव्याख्याने ''समन्वयाविरोधाभ्यांसंजातेवस्तुनिर्णये'' इत्युक्तत्वात्सिद्धरूपविषयसाध्यरूपसाधनफलप्रतिपादकत्वेन पूर्वोत्तरद्विकभेदसम्भवात्तत्स्थाधिकरणानां यथायोगं द्विकसङ्गतिरूह्या । एवं पूर्वतन्त्रेऽविनियोगसमुत्थाप्रामाण्यनिरासकत्वेन द्वितीयादिपादत्रयस्यैकार्थत्वेन त्रिपादीत्ववदिहाप्यनुव्याख्याने ''महासमन्वये तस्मिन्नाधिकारोखिलस्य ही''त्युक्तत्वेन चतुर्थपादस्यासर्वाधिकारिकतयाऽऽद्यादिपादत्रयस्य सर्वाधिकारिकत्वेन त्रिपादीत्वसम्भवात्तत्स्थाधिकरणानां तत्सङ्गतिः । तथाऽऽद्यादिपादद्वयस्यान्यत्र प्रसिद्धविषयत्वेन द्विपादीत्वसम्भवात्तत्रत्याधिकरणानां तत्सङ्गतिरप्यूह्या ।

आक्षेपिक्यातिदेशिक्यावुपोद्घातापवादते ।
प्रसङ्गश्चेत्यादिरूपा सा चानन्तर्यलक्षणा ॥ १ ॥

आनन्तर्यलक्षणापि सङ्गतिराक्षेपिकी अतिदेशिकी औपोद्घातकी आपवादिकी प्रासङ्गिकी इत्यादिरूपेण बहुविधा । आसां स्वरूपमुत्तराधिकरणेषु व्यक्तं भविष्यति ।

प्रकाशिका — ''नन्वत्रान्यत्रप्रसिद्धेत्यादिसङ्गतिटीकां विवृण्वानो भाष्यटीकाभ्यां मिलित्वोक्तं सङ्गतिपञ्चकं सङ्गृह्णाति ॥ शास्त्र इति ॥ अन्तर्भावानंतर्यरूपवैलक्षण्यसूचनाय भिन्नविभक्त्या निर्देशः । प्रायेणेत्यस्य कृत्यं वक्ष्यति । यतिभङ्गस्य काव्य एव दोषत्वं न शास्त्र इत्युक्तं प्रमेयदीपिकायाम् । उत्तरं तु श्रुत्येत्यादिनोक्तम् । अधिकरणेष्वित्युक्त्याऽध्यायानां पादानां च सङ्गत्यन्तरं न भ्रमितव्यमित्याह ॥ अध्याययोरिति ॥ तर्हि भाष्ये सङ्गतिपञ्चकं कुतो नोक्तमित्यत आह ॥ तत्राद्येति ॥ द्व्यध्याय्यामिति ॥ अध्यायद्वयस्यावान्तरार्थविवक्षयैकार्थत्वेनैक्यं विवक्षित्वा तत्रत्याधिकरणानां तदन्तर्भावो बोध्य इत्यर्थः । एवं त्रिपाद्यां द्विपाद्यामित्यपि बोध्यम् । ''तद्धितार्थोत्तरपदसमाहारेचे''ति समासे ''संख्यापूर्वो दिगु''रिति द्विगुसंज्ञायां ''द्विगो''रिति ङीष्प्रत्यये रूपमिति ध्येयम् ॥ पेटिकेति ॥ केषाञ्चिदधिकरणानामवान्तरविवक्षयैकार्थत्वेनैक्यं विवक्षित्वा तत्समुदाये तत्रत्यस्यैकैकस्य तत्र सङ्गतिरित्यर्थः ॥ न सार्वत्रिकीति ॥ यत्रास्ति तत्र वक्ष्याम इति भावः । ननु श्रुत्यधिकरणेन चेत्ययुक्तम् । तयोः परस्परपरिहारेणानुपलम्भेनैकत्वादित्यत आह ॥ तत्तदिति ॥ एतेन ''श्रुत्यधिकरणसङ्गती दर्शयती''ति टीकास्थं द्विवचनं समर्थितं बोध्यम् । प्रायेणेत्यस्य व्यावर्त्यमाह ॥ ईक्षतीति ॥ पञ्चाधिकरण्या इत्यर्थः । आदिपदेनाद्यपादेनेति ग्राह्यम् । उत्तरं त्विति श्लोकं व्याख्याति ॥ अधिकरणस्येति ॥ श्रुतेः श्रुत्यन्तर इत्यपि ग्राह्यम् । नियतमिति सदापदार्थः । तत्राद्यत्रितयमित्युक्तेरुपयोगमाह ॥ तत्रेति ॥ एतेन ''अस्तु शास्त्राध्यायपादसङ्गति''रिति टीका उत्तरत्र प्रतिनयं तत्त्रितयसङ्गत्युक्तिपरटीकाच न भाष्यविरुद्धा । सङ्गतिपदं चान्तर्भावसङ्गत्यर्थकम् । ''श्रुत्यधिकरणसङ्गती'' इत्यत्रस्थसङ्गतिपदं चानन्तर्यसङ्गत्यर्थकमिति व्याख्यातं भवति ॥

द्व्याध्याय्यामित्येतद्विवृणोति ॥ एवमिति ॥ इदमित्थं कर्तव्यमित्युक्तिरुपदेशः । तद्वदिदं कर्तव्यमित्यतिदेशः । तदुभयप्रमाणकत्वाद्धर्मस्य द्वैराश्येन यथाषट्कद्वयव्यवस्था तथेत्यर्थः ॥ इत्युक्तत्वादिति ॥ संजाते वस्तुनिर्णये । किं मया कार्यमित्येव स्याद्बुद्धिरधिकारिणां'' इत्युपासनापाद उक्तत्वादित्यर्थः ॥ तत्स्थेति ॥ सिद्धरूपविषयभूतब्रह्मप्रतिपादकत्वेनैकीभूतपूर्वाध्यायस्थानां यथायोगं साक्षात्परंपरया वा तादृशवस्तुप्रतिपादनेन तत्रान्तर्भावो ध्येयः। तथा साधनफललक्षणसाध्यरूपैकार्थत्वेनेकीभूतोत्तराध्यायद्वयस्थानां यथायोगं तादृशवस्तुबोधनेन तत्र सङ्गतिर्ध्येयेत्यर्थः । त्रिपाद्यामित्येतत्सदृष्टान्तं विवृणोति ॥ एवमिति ॥ तत्सङ्गतिरप्यूह्येत्यन्वयः । यथांऽत्याध्याये कृत्स्नवेदस्याद्यपादेन प्रामाण्ये सिद्धेप्यर्थवाद-

(प्रकाशिका)

मन्त्रनामधेयात्मकभागस्य साक्षाद्धर्मबोधकत्वायोगेन धर्मबोधे विनियोगाभावादप्रामाण्यमाशङ्क्य अर्थवादस्य स्तावकत्वेन मन्त्राणां स्मारकत्वेन नामधेयस्य धात्वर्थावच्छेदकतया धर्मबोधे विनियोगात्प्रामाण्यमित्यर्थवादस्मृतिनामधेयरूपपादत्रयस्यैकार्थत्वेन त्रिपादीत्वं तथात्रापीत्यर्थः । यद्यपि स्मृतिपादे न वेदभागप्रामाण्योक्तिः तथापि तत्प्रामाण्यार्थमेव स्मृतिप्रामाण्यनिरूपणाद्वा धर्मप्रमाणचिन्ताधिकारात्स्मृत्यादीनामपि धर्मे प्रामाण्यमुच्यत इति वा त्रिपाद्यंतर्भावोक्तेरिति भावः ॥ तत्स्थेति ॥ त्रिपादीस्थेत्यर्थः । द्विपाद्यामित्येतद्विवृणोति ॥ तथेति ॥ एवमन्तर्भावसङ्गतिमनेकधा निरूप्यानन्तर्यरूपापि तथेत्याह ॥ आक्षेपिकीति ॥ व्याचष्टे ॥ आनन्तर्येति ॥ आदिपदेन प्रत्युदाहरणबुद्धिस्थानादिरूपा ग्राह्याः । आसां लक्षणसङ्ग्रहस्तु

पूर्वमाक्षिप्यते यत्र तत्र साक्षेपकी मता ।
कृत्वाप्यभ्यधिकाशङ्कां पूर्वमेवातिदिश्यते ।
सङ्गतिः कथिता सद्भिः काचित्तत्रातिदेशिकी ।
चिन्तां प्रकृतसिद्ध्यर्थामुपोद्घातं प्रचक्षते ।
पूर्वसिद्धान्ततो यत्र पूर्वपक्षः प्रवर्तते ।
तत्रापवादकी प्रोक्ता सङ्गतिर्न्यायवेदिभिः ।
प्रसङ्गाच्चिन्त्यते यत्र तत्र प्रासङ्गिकी मता ।
पूर्वन्यायात्ययो यत्र प्रत्युदाहरणा तु सा ।
बुद्धिस्थं चिन्त्यते यत्र बुद्धिस्थानात्मिकातु सा

इत्यादिस्तंत्रचूडामण्युक्तो बोध्यः । ननु सुधायां देवताधिकरणसङ्गत्युक्तिप्रस्तावे ''सङ्गतिस्तावद्विविधा भवति । अन्तर्भावलक्षणानंतर्यलक्षणा चेति । उत्तरापि षोढा भवति। प्रसङ्गोपाद्घातावसरप्राप्तिकारणकार्यैतैककार्यत्वभेदा''दित्येवं षाड्विध्योक्तेः कथमेवमुक्तिरिति चेत् आक्षेपिकादेरेककार्यत्वादिरूपसङ्गतावन्तर्भावेन राशीकरणेन षाड्विध्योपपत्तेरविरोध ऊह्यः ॥ आसामिति ॥ स्वरूपकीर्तनपूर्वकं तत्र तत्रोदाहरणनिष्ठतया सङ्गतेर्वक्ष्यमाणत्वादिति भावः ।

पाण्डुरङ्गि — टीकोक्तसङ्गतिपञ्चकं भाष्योक्त्यनुक्तिघटकोपाध्यवच्छेदेन दर्शयितुमुपलक्षितसङ्गत्यन्तराणि चाह ॥ शास्त्र इत्यादिना ॥ शास्त्र इत्यादिसप्तमी तृतीयार्थे ।

अपिरभिव्याप्तौ । एवं च सर्वाण्यधिकरणान्यभिव्याप्येत्यर्थः । न च सर्वशब्दादेव तल्लाभ इति वाच्यम् । सर्वं घृतं विलीनमित्यादाविव सर्वशब्दसङ्कोचस्यापि सम्भवादिति भावः । ननु पञ्चविधापि सङ्गतिरेकरूपैव किं नेत्याह ॥ तत्र चेति ॥ देवताधिकरणादावध्यायपादसङ्गत्योरभावात्तदभिप्रायेण प्रायेणेत्युक्तम् । नन्वध्यायपादयोरन्तर्भावरूपसङ्गत्यभावात्का सङ्गतिरित्यत आह ॥ अध्याययोरिति ॥ ननु तर्हि टीकादावाद्यं सङ्गतित्रयं किं न प्रदर्श्यत इत्यत आह ॥ तत्राद्येति ॥ ननु पञ्चविधसङ्गतिप्रदर्शनवत्पेटिकासङ्गतिरपि किं न प्रदर्श्यत इत्यत आह ॥ पेटिकेति ॥ तथाचासार्वत्रिकत्वान्न सा प्रदर्श्यत इति भावः । ननु सङ्गतिः पञ्चधेत्ययुक्तम् । श्रुत्यधिकरणसङ्गत्योरैक्यादित्यत आह ॥ तत्तदधिकरणेति ॥ यत्राधिकरणसङ्गतिः तत्र श्रुतिसङ्गतिरित्यविनाभावः । न च श्रुतिसङ्गत्यैवाधिकरणसङ्गतेरपि लाभान्न तस्याःपार्थक्यमिति वाच्यम् । उत्तराधिकरणविषयभूतश्रुतेः पूर्वाधिकरणविषयवाक्येन सङ्गतिः श्रुतिसङ्गतिः पूर्वाधिकरणस्थेन येन केनचित्सूत्रेण सङ्गतिरधिकरणसङ्गतिरिति तयोर्भेद इति भावः । अध्याययोः पादयोरप्यानन्तर्यात्मिकैव सङ्गतिरिति सङ्ग्रह उक्तम् । तत्र किं निमित्तम् । अन्तर्भावात्मिकापि सङ्गतिः किं न स्यादित्यतस्तत्र निमित्तमाह ॥ अधिकरणस्येति ॥ तत्राद्यत्रितयं स्पष्टमित्यादिना त्रितयद्विकयोः स्पष्टत्वास्पष्टत्वे सङ्ग्रह उक्ते । तयोःप्रयोजनमाह ॥ तत्रेति ॥ ननु श्रुत्यधिकरणसङ्गत्योरपि स्पष्टत्वात्ते अपि न वक्तव्ये इत्यत आह ॥ श्रुत्यधिकरणसङ्गती इति ॥ नन्वध्यायद्वयस्य केनचिदर्थविशेषणक्रोडीकरणभावात्कथमध्याय इत्युक्तमित्यत आह ॥ एवं पूर्वतन्त्र इति ॥ त्रिपाद्यामित्युक्तपादत्रयसङ्गतिमुपपादयति ॥ एवमिति ॥ विनियोगो विधिः तत्समुत्थाया ऽप्रामाण्यशङ्का तन्निरासकत्वेनेत्यर्थः ॥ द्वितीयादिपादत्रयस्येति ॥ प्रथमाध्यायस्थद्वितीयादिपादत्रयं तस्येत्यर्थः । द्विपाद्यामित्युक्तं विवृणोति ॥ तथेति ॥ नन्वानन्तर्यलक्षणसङ्गतेः कार्यकारणभावरूपतयाऽध्यायपादाधिकरणानां कार्यकारणभावाभावेनानन्तर्यात्मिकैव सङ्गतिरध्यायपादानामिति कथमुक्तिरित्यत आह ॥ आक्षेपिकीति ॥ आदिपदेन प्रत्युदाहरणबुद्धिस्थावसरहेतुहेतुमद्भावलक्षणसङ्गतिपरिग्रहः । तथाचानन्तर्यलक्षणसङ्गतेरनेकविधत्वेन नोक्तमयुक्तमिति भावः । नन्वासां स्वरूपं कीदृशमित्यत आह ॥ आसामिति ॥ अस्माभिः संक्षेपत एषां लक्षणानि प्रदर्श्यन्ते । यत्र पूर्वार्थं आक्षिप्यते तत्राक्षेपिकीसङ्गतिः । यत्राधिकाशङ्कां कृत्वापूर्वन्यायातिदेशस्तत्रातिदेशिकी सङ्गतिः । प्रकृतसिद्ध्यर्थचिन्तोपोद्घातः । पूर्वसिद्धान्ततो यत्र पूर्वपक्षः प्रवर्तते तत्रापवादिकी । प्रसङ्गाद्यत्र चिंत्यते सा

(पाण्डुरङ्गि)

प्रासङ्गिकी । पूर्वन्यायात्ययो यत्र सा प्रत्युदाहरणसङ्गतिः । यत्र बुद्धिस्थं चिंत्यते सा बुद्धिस्थलक्षणेति ।

तात्पर्यचन्द्रिका

अत्र टीकायां पादसङ्गत्यर्थं ''आनन्दमयनाम्न'' इत्यानन्दमयशब्दस्य नामत्वमुक्तम् । तत्र केचिदुद्भिदग्निहोत्रादिशब्दानामिवानन्दमयादिशब्दानां यौगिकत्वेऽपि पूर्वपक्षेऽपि कोशादिनामत्वम् । सन्ति ह्यन्वर्था अपि संज्ञा इत्याहुः । तन्न । अत्राभिप्रेतस्य रूढत्वरूपनामत्वस्य यौगिकेऽनुपपत्तेः । अन्ये त्वानन्दमयादिशब्दाः कोशेषु रूढाः । ''आनन्दमया मे शुध्यन्ता''मित्यादौ कोशेषु प्रयोगबाहुल्यादित्याहुः। तदपि न । पूर्वपक्षे विकारे सिद्धान्ते च प्राचुर्ये यौगिकत्वेन केवलरूढत्वायोगात् ।

अपरे तु आनन्दमयादिशब्दा योगरूढाः । एवं च यान्यापाततो रूढान्येव तानि नामानीति पक्ष आनन्दमयादेर्नामत्वाभावेपि यान्यापाततो रूढानि तानि नामानि यानि तु यौगिकानि तानि लिङ्गनीति पक्ष आनन्दमयादिशब्दानामुभयात्मकत्वम् । एवं च यथा''स्मृत्यनवकाशदोषप्रसङ्ग'' इत्यत्र स्मृतिविरोधपरिहारस्य चतुर्विधविरोधपरिहारात्मकत्वेनैकैकविरोधपरिहारपरेषु पादेष्वसङ्गतेः पूर्वं पश्चाद्वा कर्तव्यत्वे प्रथमातिक्रमे कारणाभावात्पूर्वं निवेशः तथास्योभयसमन्वयपरत्वेन पादद्वयेऽसङ्गतेः पूर्वं पश्चाद्वा कर्तव्यत्वे पूर्वं निवेश इत्याहुः ।

तन्न । वक्ष्यमाणरीत्या दृष्टान्तस्य दार्ष्टान्तिकस्य च तत्तत्पादसङ्गतिसम्भवे तद्बहिर्भावायोगात् । तस्मादानन्दमयादीनामुक्तरीत्योभयात्मकत्वात् पादद्वयसमन्वयसङ्गतिसम्भवेनेहापि विचारसम्भवात्प्रथमातिक्रमे कारणाभावाच्चाद्यपादे तत्समन्वयः । यथा स्मृतिविरोधपरिहरस्याद्यपादे निवेशः तद्वद्यान्यापाततो रूढिरहितानि तानि लिङ्गानि । यानि तु तद्विपरीतान्यापाततो रूढानि वा तानि नामानीति पक्ष आनन्दमयादिशब्दानां नामतैव ।

प्रकाशिका — एवं द्विविधां सङ्गतिं निरूप्यास्याधिकरणस्य टीकोक्तं पादान्तर्भावमनुपपत्तिनिरासेन साधयितुमाह ॥ अत्राधिकरण इति ॥ तत्र योगरूढत्वेन नामत्वं वक्तुं केवलयौगिकत्वं केवलरूढत्वं वानूद्य निराह ॥ तत्र केचिदिति ॥ अन्ये त्विति च ॥ उद्भिदिति ॥ आद्ये चतुर्थपादे ''अपि वा नामधेयं स्या''दित्याद्यनये ''उद्भिदा यजेत पशुकाम'' इत्युदाहृत्य उद्भिच्छब्दः किं गुणवाच्युत कर्मनामेति संशये व्रीह्यादि-शब्दवत्कचिद्रूढ्यभावेपि खनित्रादावूर्ध्वं भिनत्तीत्यवयवशक्तियोगात्प्रवृत्त्यौपयिकत्वेन साफ-ल्याच्च ज्योतिष्टोमे फलाय खनित्रादिरूपगुणविधिर्गुणविशिष्टकर्मान्तरविधिर्वेति प्राप्ते पदश्रुत्या धात्वर्थविधिसम्भवे वाक्येन गुणविध्ययोगान्मत्वर्थलक्षणाप्रसङ्गेन कर्मान्तरविध्ययोगाच्च फलोद्भेदनसाधनतया कर्मण्यवयवशक्तिसम्भवेन नामत्वमिति सिद्धान्तितम् । तथा तत्रैव तृतीयेऽधिकरणे ''अग्निहोत्रं जुहोति आघारमाघारयती''त्यग्निहोत्रशब्द आघारशब्दश्च किमग्न्याख्यदेवतादिरूपगुणवचनः किं वा कर्मनामेति संशये अग्निशब्दस्य प्रसिद्धतया अग्नये होत्रमस्मिन्निति बहुव्रीहिणा मत्वर्थलाभेन लक्षणानापत्तेस्समासान्तर्वर्तिन्याऽग्नय इति चतुर्थ्याऽग्नेर्देवतात्वप्रतीतेश्च नामत्वे देवताभावेनारूपत्वादुपसर्जनाग्निविशिष्टहोमविधिरिति प्राप्ते श्रुत्या धात्वर्थविधिसम्भवे वाक्यार्थविध्ययोगात् ''अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहे''ति मन्त्रवर्णादग्निप्राप्तेः कर्मनामैवाग्निहोत्रपदमिति सिद्धान्तितम् । एवमाघारशब्देपि ध्येयम् । तत्र यथोद्भिदादिशब्दानां यौगिकत्वेपि कर्मनामत्वं तथेत्यर्थः ।

योगरूढत्वेपि नामत्वमुपेत्य प्रकारान्तरेण सङ्गतिसम्भवं निराह ॥ अपरे त्विति ॥ चतुर्विधेति ॥ पाशुपतादिस्मृतीनां समयरूपत्वेन स्वोक्तार्थे संमतित्वेन श्रुतियुक्तिकथनेन च चतुस्स्वरूपत्वादित्यादिना वक्ष्यमाणदिशेति भावः ॥ अस्येति ॥ अस्याधिकरणस्य नामलिङ्गोभयसमन्वयपरत्वेनेत्यर्थः । वक्ष्यमाणरीत्येत्युक्तम् । तदाह ॥ तस्मादिति ॥ उक्तरीत्या पक्षत्रयसम्भवादित्यर्थः । इहापि नामपादेपि । अत्रैव विचारे हेतुमाह ॥ प्रथमेति ॥ यथेति ॥ तथैव तत्र वक्ष्यमाणत्वादिति भावः । एतेनास्मिन्पक्षे नामत्वस्यापि सत्वाट्टीकायां नामत्वोक्तिस्तत्वप्रदीपे लिङ्गत्वोक्तिश्च युक्ता । टीकोक्तसङ्गतिश्चोक्तरूपेण व्याख्यायेति भावः ॥ नामतैवेति ॥ तथाच टीकायां केवलनामत्वोक्तिर्युक्ता सङ्गतिश्च सुलभेति भावः ।

पाण्डुरङ्गि — नन्वानन्दमयनाम्न इति टीकायामानन्दमयशब्दस्य नामत्वमुक्तम् । तदयुक्तम् । प्रयोजनाभावादित्यत आह ॥ अत्रेति ॥ ननूक्तमप्यानन्दमयशब्दस्य नामत्वमयुक्तम् । यौगिकत्वेन तदसम्भवादर्थविशेषे रूढेरभावाच्चेत्यतः कैश्चिदुक्तं समाधानं दूषयितुमनुवदति ॥ तत्र केचिदिति ॥ ननु यौगिकत्वे नामत्वं क्वाप्यदृष्टमित्यत उक्तं उद्भिदिति ॥ ननु दृष्टमपि यौगिकानां नामत्वं कथं घटत इत्यत आह ॥ सन्ति हीति ॥ अन्वर्था अपि सर्वनामसंज्ञादयो दृष्टा इत्यर्थः । अत्र टीकायां यौगिकमात्रभिन्नत्वरूपमेव नामत्वमभिप्रेतम् । तस्य चानन्दमयेऽसम्भवान्नोभयात्मकत्वं युक्तमित्याह ॥ अत्राभिप्रेतस्येति ॥ न च यानि योगरूढानि तानि नामानीत्युभयात्मकत्वं युक्तमिति वाच्यम् । तथात्वे सर्वेषामपि शब्दानां महायोगविद्रूढिभ्यामुभयात्मकत्वेन नामलिङ्गभेदो न स्यादिति भावः । नन्वानन्दमयादिशब्दाः केवलरूढा एव । एवं च टीकोक्तनामत्वं सङ्गच्छते । न च रूढिज्ञापकाभावात्कथं रूढत्वमिति वाच्यम् । आनन्दमया मे शुध्यन्तामित्यादौ प्रयोगबाहुल्यस्यैव ज्ञापकत्वादिति केचित्समादधुः । तदूषयितुमनुवदति ॥ अन्ये त्विति ॥ केवलरूढत्वस्य पूर्वपक्षिसिद्धान्तिनोरसंमतत्वादयुक्तं तदित्याह ॥ पूर्वपक्ष इति ॥ ननु टीकोक्तं नामत्वं केवलनामत्वमेव न । किन्तु यौगिकत्वे सति नामत्वमेव । न च तर्हि पादासङ्गतत्वात्प्रथमं निवेशो न स्यादिति वाच्यम् । स्मृत्यधिकरणन्यायेन प्रथमं निवेशोपपत्तेरिति केचित्समादधुः । तदूषयितुमनुवदति ॥ अपरे त्विति ॥ किमुभयसमन्वयरूपत्वादस्य पादद्वयेपि सर्वथा सङ्गतिर्नास्तीत्याशयः किंवा एकैकस्मिन्नेव निष्कृष्य सङ्गतिर्नास्तीति । नाद्य इत्याह ॥ वक्ष्यमाणरीत्येति ॥ द्वितीयमभ्युपगमेनोपसंहरति ॥ तस्मादिति ॥ यद्वा नामलिङ्गान्यतरमात्रस्य पादार्थत्वात्पादद्वयासङ्गतिरित्येतन्निराचष्टे ॥ तन्नेति ॥ निरवधारणान्यतरसमन्वयस्य पादार्थत्वादुभयत्र सङ्गतिरित्येतदपि निराचष्टे ॥ तन्नेति ॥ अत्र केषाञ्चित्पक्षे केवलयौगिकत्वमभिप्रेतम् । अन्ये त्विति पक्षे च केवलरूढत्वमभिप्रेतमिति न दूषणासङ्गतिः । अत एव चापरे त्वानन्दमयादिशब्दाः योगरूढा इत्युत्तरग्रन्थः सङ्गच्छत इति ध्येयम् ।अत्र मयट्शब्दरूपावयवरूढ्यनपेक्षायां गुणिसामान्यवाचित्वम् । तदपेक्षायामर्थविशेषरूढत्वमिति न कश्चिद्विरोध इत्याहुः । आनन्दमयादिशब्दानामुभयात्मकत्वमाश्रित्य पादान्तरसङ्गतत्वेप्याद्यपादे निवेशस्समर्थितः ।

तात्पर्यचन्द्रिका

तत्वप्रदीपे तु ''आनन्दमयाधिकरणे लिङ्गविचारा''दित्यानन्दमयादेर्लिङ्गत्वमेवोक्तम् । तदनुसारेण ''आनन्दमयनाम्न'' इति टीकायामानन्दमयनामशब्द आनन्दादिनामपरो वा योज्यः । तथाचानन्दादिनामसमन्वयस्यापीह समर्थनात्फलतः पादसङ्गतिः । तथा पूर्वतन्त्रे पौर्णमास्यधिकरणस्य मुखतो विद्वद्वाक्यमनुवादकमिति व्युत्पादकत्वेपि करणेतिकर्तव्यताभेदस्य फलितत्वेन फलतो भेदलक्षणसङ्गतिः । यथाचात्रैव शास्त्रे ''असदिति चे''दित्यधिकरणस्य मुखतः श्रुत्यविरोधव्युत्पादकत्वेपि फलतो युक्त्यविरोधव्युत्पादकत्वाद्युक्तिपादसङ्गतिः यथा चान्तरधिकरणस्य मुखतो लिङ्गसमन्वयव्युत्पादकत्वेपि फलतो नामसमन्वयव्युत्पादकत्वान्नामपादसङ्गतिः तद्वत् । यद्यप्यानन्दादिनामसमन्वय उक्ते आनन्दमयादिलिङ्गसमन्वयोप्यर्थात्सेत्स्यति । पादसङ्गतिश्च स्वरसा भवति । तथाप्यानन्दमयोदाहरणे विकारशब्दादिपूर्वपक्षबीजस्य तद्योगमित्यादि सिद्धान्तहेतोश्च सत्त्वालिङ्गस्य मुखतः कीर्तनमिति ॥

प्रकाशिका — योज्य इति ॥ ''आनन्दमयनामही''त्यनुव्याख्यानमपि यौगिकनामाभिप्रायं व्याख्येयमिति भावः । ''आनन्दादिगुणवाचिनामानन्दमयादिगुणिवाचिनां शब्दानां समन्वयसिद्ध्यर्थमानन्दमयाधिकरणे लिङ्गविचारा''दिति तत्वप्रदीपोक्तामेव सङ्गतिमाह ॥ तथाचेति ॥ यथेति ॥ उक्तमधिकरणशरीरमाद्यसूत्रे । अस्याधिकरणस्य रूपालाभेन स्वतन्त्रयागविधायकत्वासम्भवादाग्नेयादित्रिकत्रिकानुवादकं विद्वद्वाक्यमिति मुखतो व्युत्पादनार्थत्वेपि षड्यागाः करणं समिदादिस्त्वितिकर्तव्यतेति भेदस्य फलतो लाभाद्यथा कर्मभेदपराध्यायान्तर्भावस्तथाऽत्रापि नामसमन्वयस्य फलतो लाभादत्रान्तर्भाव इत्यर्थः । अत्र कश्चिदभ्यासप्रमाणापन्नभेदापवादकतया मुखत एव सङ्गतिसम्भवात् कथं फलतस्सङ्गत्युक्तिः । सापवादकस्यैव भेदशेषप्रयुक्त्यादेस्तत्तदध्यायार्थत्वात् । अन्यथा तत्र तत्रेष्टचर्थमग्न्याधेयसम्पदकर्माप्रियोजकमित्याद्यधिकरणानां सङ्गत्यापत्तेः । कथं चानेनाधिकरणेन करणेतिकर्तव्यताभेदसिद्ध्युपन्यासः । तस्याग्नेयादिवाक्येषु द्रव्यदेवताद्यनेकगुणरूपगुणप्रमाणाधीनत्वात् । किं त्वाग्नेयादीनां समिदादीनां चाङ्गाङ्गिभावो लभ्यते । न चायमेवाध्यायार्थः । तृतीयाभेदापत्तेरिति । तन्न । फलतो लभ्यायास्साक्षाल्लक्षणप्रतिपाद्यविषयायास्सङ्गतेर-

(प्रकाशिका)

भ्यर्हितायास्सम्भव आपवादिक्यास्तस्या अनादरणीयत्वादित्याशयात् । करणेतिकर्तव्यताभावस्य भेदव्याप्ततया तदभिप्रायेण भेदफलत्वोक्तेश्चेत्याद्यूह्यम् ॥ यथाचेति ॥ युक्तिपादे ''असदिति चेन्न प्रतिषेधमात्रत्वा''दिति नये जगत्कारणत्वं विष्णोर्युक्तमयुक्तं वेति संशये ''यतो वा इमानि भूतानी''त्यादिकारणत्वश्रुतेः कारणं प्रलयेऽसत् वस्तुत्वात् कार्यवदित्यनुमानयुक्तया ''असदेवेदमग्र आसी''दित्यादिश्रुत्याऽसत्कारणत्ववादिवादिन्या विरुद्धत्वादयुक्तमिति प्राप्ते असतो निषेधैकरूपस्य कर्तृत्वोपयोगिज्ञानादेरयोगेनासदेवेति श्रुतेः सदेवेत्याद्यनेकश्रुतिविरोधेन च विष्णुपरत्वादनुमानस्य निर्मूलत्वाद्युक्तं कारणत्वमिति तत्र यथा पूर्वपक्षिणा स्वोक्तानुमानमूलतयोदाहृतश्रुत्यविरोधे मुखतो व्युत्पादिते युक्त्यविरोधः फलिष्यतीति तद्विचारस्य युक्तिविरोधपादेन्तर्भावो न तु श्रुत्यविरोधपादे तथेहापीत्यर्थः । उक्तं च तत्राणुभाष्ये ''अर्थाद्युक्तिविरोधो निराक्रियत'' इति । अन्तरङ्गदृष्टान्तमाह ॥ यथाचान्तरिति ॥ स्पष्टमेतदुत्तरत्र । लिङ्गसमन्वयपक्षमाक्षिप्याह ॥ तद्योगं तेनानन्दमयेन सम्बन्धः । ''एतमानन्दमयमात्मानमुपसङ्क्रामती''त्यादिश्रुतिश्शास्तीत्युक्तानन्दमययोगादिहेतोरित्यर्थः । इत्यादीत्यादिशब्देन हेतुव्यपदेशादि ।

पाण्डुरङ्गि — इदानीं पक्षान्तरमाश्रित्य समन्वयकथनमयुक्तम् । तत्वप्रदीपे आनन्दमयाधिकरणे लिङ्गविचारादित्यानन्दमयत्वस्य लिङ्गत्वेन समन्वयोक्तेरित्यत आह ॥ तत्वप्रदीपे त्विति ॥ न च लिङ्गत्वे सति नामत्वस्य स्वीकृतत्वाल्लिङ्गत्वकथनं न विरुद्धमिति वाच्यम् । उभयात्मकत्वे सत्यसाधारण्येन लिङ्गत्वकथनस्यायुक्तत्वादिति भावः । विरोधपरिहारः कथमित्यत आह ॥ तदनुसारेणेति ॥ लिङ्गसमन्वयपरश्चेत्पादासङ्गतिरित्यत आह ॥ तथाचेति ॥ ननु फलतः पादसङ्गत्युक्तिरयुक्ता । शब्दानां प्रथमे पादे गुणसामान्यवाचिनाम् । गुणवाचिनां च प्रथममित्यनुव्याख्याने गुणवाचकशब्दसमन्वयस्योक्तत्वेन नामसमन्वयस्योक्तत्वादिति चेन्न । तथापि सूत्रकारेण मुखतोनुक्तत्वादित्याशयेन फलत इत्युक्तत्वान्न विरोध इति भावः । ननु तदर्थस्य मुखतोनुक्तत्वेपि फलतस्तदर्थस्योक्तत्वेन सङ्गतिः कुत्राप्यदृष्टेत्यत आह ॥ यथेति ॥ पौर्णमास्यधिकरणस्य य एवं विद्वान्पौर्णमासीं यजत इत्यादिविद्वद्वाक्यं षड्यागानुवादकमित्यर्थव्युत्पादकत्वेन कर्मभेदव्युत्पादकत्वाभावादसङ्गतिरिति प्राप्ते मुखतोनुवादकत्वेपि फलतः करणेतिकर्तव्यताभेदप्रतिपादकत्वाद्वितीयाध्यायसङ्गतिर्यथेत्यर्थः । ननु तर्ह्यानन्दोभ्यासादित्येव सूत्रं कर्तव्यम् । एवं सति सूत्रस्याल्पाक्षरतापि भवति । न चैवं लिङ्गसमन्वयः कथमिति वाच्यम् । तस्यार्थादेव सिद्धेः।

आनन्दनामसमन्वयस्य मुखतो व्युत्पादनेन पादसङ्गतेः स्वरसत्वादित्याशङ्क्य निराकरोति ॥ यद्यपीत्यादिना ॥ तत्तु समन्वयादित्यत्र प्रतिज्ञाते समन्वये बाधके प्राप्ते ईक्षतिसूत्रे बाधकमुद्धृतम् ।

तात्पर्यचन्द्रिका

इह समन्वयसूत्रप्रतिज्ञातसमन्वयहेतौ वाच्यत्वईक्षत्यधिकरणेनोक्तेऽध्यायशेषेण प्रतिज्ञातसमन्वय उपपादनीयः । तत्रान्तराद्यधिकरणानामानन्दमयानन्तर्ये हेतोर्वक्ष्यमाणत्वात्सर्वापेक्षितानन्दप्रदोपासनाविषयपूर्णानन्दत्वरूपमहागुणस्य प्रथमं वक्तव्यत्वाच्चानन्तरसङ्गतिः । यद्वा ईक्षत्यधिकरणोक्त आत्मशब्दाद्गौणत्वनिरासो न युक्तः । अब्रह्मणि गौणात्मन्यानन्दमये ''एतमानन्दमयमात्मान''मिति तच्छ्रवणात् । तथा ब्रह्मनिष्ठस्य मोक्षोपदेशो वा ''पूर्णमेवावशिष्यत''इति पूर्णस्य ब्रह्मणः स्वाप्ययो वा न युक्तः । ब्रह्मण आनन्दमयावयत्वेऽवयविनं विहायावयवनिष्ठाया अवयवपूर्णतायाश्चायोगात् । तथा ब्रह्मणो जिज्ञास्यतायां कारणतायां च यद्गतिसामान्यमुक्तं तदयुक्तम् । ब्रह्मप्रत्यवयविन आनन्दमयस्य ''सोऽकामयत बहुस्या''मित्यादिना कारणत्वावगतेः कारणस्यैव जिज्ञास्यत्वनियमादिति पूर्वोक्ताक्षेपेण पूर्वपक्षप्रवृत्तेराक्षेपिकी सङ्गतिः ।

प्रकाशिका — अस्य नयस्य पूर्वानन्तर्यरूपसङ्गतिं वक्तुमस्याध्यायस्य समन्वयसूत्रेणागतार्थत्वमाह ॥ इहेति ॥ उपपादनीय इति ॥ न हि प्रपञ्चनेनोपपादनं विना समन्वयादिति प्रतिज्ञामात्रेणार्थसिद्धिरिति भावः । तर्हि तदानन्तर्यमेव स्यादित्यत उक्तं समन्वयहेताविति ॥ ''तदभावे कुतोन्वय'' इत्युक्तरीत्या ब्रह्मणि शब्दानां शक्त्यभावे वचनवृत्तेरेवाभावापातेन तत्र समन्वयप्रतिज्ञैवायुक्ता । यस्या उपपादनं स्यात् । सम्भावितः प्रतिज्ञाया अर्थस्साध्येत हेतुनेत्यादेः । तथाचेक्षतिनये वाच्यत्वोक्त्या सम्भावितस्य समन्वयस्योपपादनमनन्तरप्राप्तमित्यर्थः । एतेनाथ ब्रह्मस्वरूपनिरूपण इत्यादिटीका व्याख्याता । अनेन समन्वयसूत्रस्यास्य च प्रपञ्चप्रपञ्चकाभावरूपसङ्गतिरुक्ता भवति । सुधारीत्या शेषपदोक्तिः । एवमध्यायस्यारब्धव्यत्वे सिद्धेऽस्य नयस्येतरस्मात्प्राथम्ये हेतुद्वयमाह ॥ तत्रेति ॥ सर्वापेक्षितेति ॥ अयं च हेतुः ''तत्रानन्दादयो गुणाः । ईशस्यैवेति निर्णीताः श्रुतियुक्तिसमाश्रया''दित्युपासनापादीयानुव्याख्यानव्याख्यावसरे सुधायां ''तत्रानन्दमयाधिकरणस्याद्यत्वे हेतुं सूचयन्नाहे''त्यवतार्य ''सर्वेषु हि श्रुतेषु मूर्धाभिषिक्ता

(प्रकाशिका)

आनन्दविज्ञानादयः । अतो माङ्गलिक आचार्यस्तच्छब्दसमन्वयमादावाहे''त्युक्तत्वाल्लब्धः । तत्रैव सुधायां ''उत्तराधिकरणेष्वप्येवं क्रमनिमित्तादिकं स्वयमूहनीय''मित्युक्तेः पूर्वेणास्य सङ्गत्यन्तरं स्वयमुत्प्रेक्ष्याह ॥ यद्वेति ॥ गौणत्वेति ॥ ईक्षणीयस्येति शेषः ॥ जिज्ञास्यतायामिति ॥ यद्यपि कारणतायामेव सर्वशाखानामैकमत्यरूपं गतिसामान्यमुक्तं टीकायाम् । तथापि तस्य जिज्ञासापर्यन्तत्वाज्जिज्ञास्यतायामित्युक्तम् । एतच्च जिज्ञासासूत्रस्याप्याक्षेपायोक्तम् ॥ ब्रह्म प्रतीति ॥ पुच्छत्वेनोक्तब्रह्मरूपावयवं प्रतीत्यर्थः ॥ पूर्वोक्तेति ॥ गौणसूत्रेण तन्निष्ठसूत्रेण वा स्वाप्ययसूत्रेण वा गतिसूत्रेण वोक्तस्याक्षेपेणेत्यर्थः ।

पाण्डुरङ्गि — इदानीं गुणपूर्णत्वसिद्ध्यर्थं समन्वयो व्युत्पादनीयः । तत्रानन्दमयशब्द एव किमिति प्रदर्श्यते । आकाशादिशब्दानामपि विद्यमानत्वात् । न च सङ्गतिलोभात्तत्समन्वयोक्तिरिति वाच्यम् । सङ्गतेः शब्दान्तरेपि सम्भवेन प्रथमत एव तत्कथने विशेषहेत्वभावादित्यत आह ॥ इहेति ॥ वचनवृत्तिगोचरत्वमात्ररूपवाच्यत्वस्योपक्रमादिप्रमाणकशास्त्रजन्यप्रमागोचरत्वरूपसमन्वयहेतुत्वाद्धेतुहेतुमद्भावलक्षणा सङ्गतिरित्यर्थः । तथाचान्तराद्यधिकरणानामानन्दमयाधिकरणानन्तर्यं हेतुप्रयोज्यमेव । आनन्दमयस्येक्षत्यधिकरणाव्यवहितानन्तर्यमिति भावः । आनन्दादयः प्रधानस्येति सूत्रानुसारितत्रानन्दादयो गुणा इत्याद्यनुव्याख्यानानुसारेण सर्वापेक्षितेति । न केवलमाकाङ्क्षालक्षणसङ्गतिसद्भावादानन्दमयस्य प्राथम्यं किंत्वाक्षेपसङ्गतिसद्भावाच्चेत्याह ॥ यद्वेति ॥

तात्पर्यचन्द्रिका

भाष्ये तु विप्रकीर्णनानाशाखास्थवाक्यविनिर्णायकेष्वन्यथापि क्रमहेतोरुत्प्रेक्षासम्भवेन नियतपूर्वापरीभावहेतुविशेषशून्येषु चाधिकरणेषु वाचः क्रमवृत्तित्वेन क्रमे सिद्धे येन केनचित्पूर्वाधिकरणेनाक्षेपादिरूपासङ्गतिरेवापेक्षिता । तावन्मात्रेण चिन्तायाः साफल्यसिद्धेः । नत्वव्यवहितपूर्वेणेति भावेनानन्तरसङ्गत्यनुक्तिः । अत एवात्र ''जिज्ञासा कर्तव्येत्युक्त''मिति भाष्ये जिज्ञासासूत्रेणैव सङ्गतिर्दर्शिता । उत्तरत्र चाकाशाद्यधिकरणेषु ''को ह्येवान्या''दित्यादिभाष्य आनन्दमयाद्यधिकरणैरेव सङ्गतिर्दर्शयिष्यते । यद्वाऽव्यवहितपूर्वाधिकरणसङ्गतिः स्फुटत्वाच्छिष्यैरेवोह्येति भावेन भाष्ये तदनुक्तिः । तदुक्तं सुधायां ''उत्तराधिकरणेष्वप्येवं क्रमनिमित्तादिकं

स्वयमूहनीय''मिति । ''जिज्ञासाकर्तव्येत्युक्त''मिति भाष्येण तु चिन्ताफलमात्रमुक्तम् । यद्वा उक्तास्सङ्गतयो भाष्य आत्मशब्दादियुक्तमहागुणवाचकानन्दमयशब्दोदाहरणाज्जिज्ञासासूत्राक्षेपेणैव तन्निष्ठसूत्रस्याक्षिप्तत्वाच्च सूचिता इति तदनुक्तिः । इह गुणिसामान्यवाचका आनन्दमयादिशब्दा उदाहरणम् । तेषां समन्वये सिद्धे मनोमयादावुदाहृतश्लोकस्थानां गुणवाचिनां ''आनन्दं ब्रह्मणो विद्वा''नित्यानन्दादिशब्दानामपि समन्वयः सिध्यति । तदुक्तमनुव्याख्याने –

शब्दानां प्रथमे पादे गुणिसामान्यवाचिनाम् ।
गुणवाचिनां च प्रथममाह देवस्समन्वयमिति ॥

प्रकाशिका — भाष्य एवमनुक्तौ व्यवहितेनोक्तौ च बीजमाह ॥ भाष्ये त्विति ॥ हेतुविशेषशून्यत्वे हेतुर्विप्रकीर्णेत्यादिः ॥ पूर्वेति ॥ व्यवहितेनाव्यवहितेन वेत्यर्थः । सङ्गतिरेवेत्येवकारार्थमाह ॥ नत्विति ॥ अत एवेति ॥ निरन्तरसङ्गतिनियमाभावादेवेत्यर्थः ॥ ऊह्येतीति ॥ सा च प्रागूहित्वा प्रदर्शितेति भावः ॥ तदुक्तमिति ॥ उपासनापादे ''विष्णुमेव परं ब्रूयुरेवमन्येऽप्यशेषत'' इत्येतद्व्याख्यावसर इत्यर्थः ॥ चिन्तेति ॥ अत्र क्रियमाणविचारस्य फलमात्रमुक्तम् । न तु सङ्गतिरप्यभिमता । येनाव्यवहितेन सङ्गत्यूहनं विरुध्येत । का पूर्वसङ्गतिरिति टीकास्थसङ्गतिपदं च फलपरमिति भावः ॥ उक्ता इति ॥ आक्षेपबहुत्वाद्बहुवचनम् । आदिपदेन कारणत्वमोक्षोपदेशादेर्ग्रहः ॥ महागुणेति ॥ आनन्दरूपमहागुणेत्यर्थः । एतच्चाद्यसङ्गतिसूचकम् ॥ तन्निष्ठेति ॥ जिज्ञास्यत्वाभावे तज्ज्ञानान्मोक्षस्याप्ययोगादिति भावः । टीकायामानन्दमयो विषय इत्युक्तम् । तदुपलक्षणत्वेन व्याचष्टे ॥ इहेति ॥ शतक्रत्वादिशब्दैरिवानन्दमयविज्ञानमयादिशब्दैर्धर्मिविशेषाप्रतीतेर्गुणसामान्येत्युक्तम् । ''तर्ह्यन्यत्र प्रसिद्धता न स्यादिति चेन्न । मयट्प्रत्ययादिना ब्रह्मणोन्यत्रत्यायन्तीति भवन्त्यन्यत्र प्रसिद्धा'' इति सुधायामेवोक्तेरित्याशयात् । नन्वेवमन्यसाहित्येनान्यत्र प्रसिद्धत्वे द्वितीयपादे निवेशः स्यात् । न च पृथक् पदसाहित्येनैव तत्र तथात्वमिति वाच्यम् । गुहामित्यत्र चन्द्रिकायां पिबन्ताविति प्रत्ययश्रुतिबलादन्यत्र प्रसिद्धेत्युक्तेरिति चेन्न । लोकतोन्यत्र प्रसिद्धत्वमाद्यपादोपाधिरन्यसाहित्येन तथात्वं द्वितीयोपाधिरित्यनुक्तेः । किंतु नामत्वादिकम् । तच्च नामत्वमानन्दमयेप्यस्ति । अत एव गुहामित्यत्र टीकायां लोकतोन्यत्र प्रसिद्धस्येत्युक्तम् । चन्द्रिकायां तु तथैव प्रक्रमात्सति

(प्रकाशिका)

सम्भवे त्यागायोगादुपायस्योपायान्तरादूषकत्वाच्चान्यसाहाय्यमुक्तम् ॥ तेषामिति ॥ एतेन गुणवाचिनामित्यनुव्याख्यानं तत्सुधावाक्यं च फलाभिप्रायं व्याख्येयमित्युक्तं भवति । तेनाभ्यासहेतुव्यपदेशादिहेतूनामानन्दमयादिसामानाधिकरण्येन तदसामानाधिकरण्येपि न दोष इति भावः । उपलक्षणत्वेन टीकाव्याख्याने बीजमाह ॥ तदुक्तमिति ॥

पाण्डुरङ्गि — ननु तर्हि पूर्वाधिकरणाक्षेपेणेह पूर्वपक्षस्य प्रवृत्तत्वादस्याधिकरणस्य पूर्वाधिकरणेन सह यद्याक्षेपिकी सङ्गतिस्तर्हि किमिति भाष्येऽव्यवहितपूर्वाधिकरणेन सङ्गत्यनुक्तिरित्यत आह ॥ भाष्ये त्विति ॥ ननु विप्रकीर्णनानाशाखास्थानां वाक्यानां परस्परसङ्गत्यभावेन तन्निर्णायकानां सूत्राणामपि पूर्वापरीभावहेतुशून्यत्वेन पूर्वाधिकरणेन सङ्गतेरनावश्यकत्वेऽव्यवहितपूर्वाधिकरणेपि सङ्गतिः किमर्थं भाष्ये प्रदर्शिता । सूत्राणां परस्परसङ्गत्यनपेक्षत्वादित्यत आह ॥ यद्वेति ॥ नियतपूर्वापरीभावहेतुविशेषशून्यत्वोक्तिः शुद्धाविरुद्धेत्यतो वाह ॥ यद्वेति ॥ यद्वा ननु विप्रकृष्टनानाशाखास्थानामपि वाक्यानामेकवाक्यतया ब्रह्मपरत्वेन परस्परसङ्गत्यनपेक्षयैकवाक्यताया एवासम्भवेन परस्परसङ्गतेरावश्यकत्वात्कथं सङ्गतिः परस्परनापेक्षितेत्युच्यते । तथाच सङ्गत्यपेक्षायामव्यवहितपूर्वाधिकरणेनैव सङ्गतिर्वक्तव्येत्यस्वरसादाह ॥ यद्वेति ॥ अस्मिन्पक्षे भाष्ये सङ्गत्यनुक्तिः समायातीतीममेवास्वरसं मनसि निधायाह ॥ यद्वेति ॥ यद्वा श्रुत्यधिकरणसङ्गती दर्शयतीतिटीकाविरोधपरिहारायाह ॥ यद्वेति ॥ अधिकरणोपाधिमाह ॥ इहेति ॥ तर्ह्यानन्दमयादिशब्दसमन्वयः कथं सेत्स्यतीत्यत आह ॥ तेषामिति ॥ नन्वनुव्याख्याने गुणिसामान्यवाचिनाम् । गुणवाचिनां च प्रथममाह देवः समन्वयमित्यत्रानन्दमयादिशब्दवदन्नादिशब्दानामप्युदाहरणत्वस्योक्तत्वाद्गुणिसामान्यवाचकानन्दमयादिशब्दा उदाहरणमित्युक्तिरयुक्ता । किं चैवमानन्दमयादीनां ब्रह्मत्वसमर्थनार्थमुदाहृतश्लोकेष्वानन्दादिशब्देष्वेव साक्षाद्ब्रह्मशब्दश्रवणात्तद्वाराऽऽनन्दमयादिशब्देषु ब्रह्मशब्दश्रवणस्यानीयमानत्वेनानन्दादिशब्दानामुदाहरणत्वमुचितम् । अनुव्याख्यानस्थचशब्दस्वारस्यं च । न च सूत्रकृतानन्दमयशब्दस्य कण्ठतो गृहीतत्वादुदाहरणत्वमिति वाच्यम् । तर्हि मनोमयादिशब्दानामुदाहरणत्वं न स्यात्। सूत्रकारेण मुखतोऽनुक्तत्वात् । न चानन्दमयशब्देन तदुपलक्षणादुदाहरणत्वमिति वाच्यम् । आनन्दमयशब्देनानन्दादेरप्युपलक्षणसम्भवात् । न चानन्दमयशब्दस्य गुणिसामान्यवाचकत्वात्तद्रूपगुणयोगेन मनोमयादिशब्दानामेवोपलक्षणमिति न तेषामुदाहरणत्वमिति वाच्यम् । उपलक्षणत्वे लाघवेन सम्बन्धमात्रस्यैव तन्त्रत्वेनास्यातन्त्रत्वात् । तथाचानंदादि-

शब्दानामप्युदाहरणत्वसम्भवेनानन्दमयादिशब्दानामेवोदाहरणं युक्तमिति चेत् इदमत्राकूतम् । विकारशब्दान्नेति चेदित्यादिसूत्रोक्तबाधकतत्समाधानानामानन्दादिशब्देष्वभावादानन्दमयादिशब्देष्वेव भावादित्याशयेनानन्दमयादिशब्दा उदाहरणमित्युक्तमिति न कश्चिद्दोष इति ॥

तात्पर्यचन्द्रिका

अत्रानन्दमयः किं चतुर्मुखादिः किं वा विष्णुरिति चिन्ता । तदर्थं ''असद्ब्रह्मेति वेद चे''दित्यानन्दमये श्रुतो ब्रह्मशब्दः किं जघन्यवृत्तिरुत मुख्यवृत्तिरिति । तदर्थं मयट्प्रत्ययः किं ब्रह्मशब्दस्य मुख्यत्वविरोध्युत नेति । तदर्थं मयट् किं विकारार्थ उत प्राचुर्यार्थ इति । प्राचुर्यार्थत्वेपि प्राचुर्यं किं समानाधिकरणविजातीयाल्पत्वेनैव भवति किं वा व्यधिकरणसजातीयाल्पत्वेनापीति । आद्ये ब्रह्मणि विजातीयस्य दुःखस्याल्पस्याप्यभावादानन्दप्राचुर्यायोगः । द्वितीये तु जीवगतस्य सुखस्याल्पत्वाद्ब्रह्मण्यानन्दप्राचुर्यसम्भवः । अत्र पूर्वोत्तरपक्षयोर्भाष्यादावेव व्यक्तत्वात्सूत्रे परमतस्यैव पूर्वपक्षितत्वेन परमततन्निरासयोरेवेह पूर्वपक्षसिद्धान्तरूपतया पृथक्तयोरभावाच्च न तौ पृथगुच्येते । यद्यपि जिज्ञासासूत्रे तद्विजिज्ञासस्वेति वाक्यस्थब्रह्मशब्दस्य गुणपूर्तौ यौगिकत्वेन जीवाद्भेदकतोक्ता । जन्मादिसूत्रे च तस्मिन्नेव वाक्ये कारणत्वादिना रूढिं बाधित्वा योगः स्थापितः । तथाप्यानन्दमयवाक्ये रूढौ बाधकाभावात्प्रत्युत विकारशब्दादेस्तत्साधकस्यैव च भावात्पूर्वपक्षोदय इति द्रष्टव्यम् । अत्र श्रुतावन्नमयस्यादित्वेपि सूत्र आनन्दमयस्येतरोपलक्षकत्वेनोपादानं युक्तम् । तत्र जिज्ञासासूत्राक्षेपकस्यावयवत्वादिपूर्वपक्षहेतोः सत्त्वात् । यथा चित्राज्याधिकरणे ''आज्यैस्तुवत'' इत्युत्पत्तिवाक्यमुपेक्ष्य वाक्यभेदरूपसिद्धान्तहेतोः सत्वात् ''पञ्चदशान्याज्यानी''ति गुणवाक्योदाहरणं तद्वत् ।

प्रकाशिका — संशयटीकां व्यनक्ति ॥ अत्रेति ॥ सूत्रेऽन्योपलक्षणत्वेनानन्दमयस्यैवोक्तेष्टीकानुरोधेनेतरोपलक्षणत्वेनात्राप्येकस्यैवोक्तिरिति बोध्यम् । आदिपदेन चेतनाचेतनप्रकृत्योर्जीवसमुदायादेश्च ग्रहः ॥ असद्ब्रह्मेतीति ॥ ब्रह्मशब्दः पुच्छ एव श्रुतो न त्वानन्दमय इत्यस्य निरसिष्यमाणत्वात्सिद्धवन्निर्देशः कृतः ॥ मयडिति ॥ यद्यप्यत्र ''अन्योंतर आत्मे''त्यत्रान्यान्तरशब्दः ''तस्यैष एव शारीर आत्मे''ति शरीरशरीरिभाव

(प्रकाशिका)

इत्यादिकमपि विरोधि न वेति शक्यं वक्तुम् । तथापि विकारशब्दादिति सूत्रे तस्य कण्ठत उक्तत्वादितरस्योपलक्षणत्वेनोपादानादेवमुक्तम् । विशेषविवक्षया वा तन्मात्रोक्तिरित्यदोषः ॥ व्यधिकरणेति ॥ भिन्नाधिकरणेत्यर्थः । अस्पष्टभागे फलफलिभावं व्यनक्ति ॥ आद्य इति ॥ तथाच मयटो विकारार्थत्वेन ब्रह्मशब्दस्यामुख्यार्थत्वादानन्दमयो न ब्रह्मेति पूर्वपक्षे फलम् । प्राचुर्यार्थत्वसम्भवे तु बाधकाभावेन ब्रह्मशब्दस्य मुख्यार्थत्वादानन्दमयो ब्रह्मेति सिद्धान्ते फलं स्पष्टमिति भावः ॥ परमतस्येति ॥ यद्यपि परमते पञ्चानां कोशत्वं पूर्वपक्षे तु चतुर्मुखादित्वं तथाप्यब्रह्मत्वसाम्यात्कोशत्वस्याप्यभिमतत्वाद्वैवमुक्तम् । उक्तं च टीकायां ''यस्त्वन्नमयादिपञ्चानामप्यब्रह्मतां ब्रूते स तु सूत्रकारेणैव पूर्वपक्षीकृत इति न तत्पक्षं प्रत्याक्षिपद्भाष्यकार'' इति ॥ पृथगिति ॥ परमतानुवादतन्निरासाभ्यां तूच्येते इत्यर्थः । पूर्वपक्षानुदयमाशङ्कते ॥ यद्यपीति ॥ ''पुनश्च प्रापकाद्धेतोस्तत्राधिकरणान्तर''मित्यनुव्याख्यानोक्तं समाधिमाह ॥ तथापीति ॥ इतःपरमत्रेत्यादिना अन्ये त्वित्यन्तं सूत्राणामक्षरार्थस्वारस्यचिन्ताक्रमचिन्ता च क्रियत इति ध्येयम् । तत्राद्यसूत्रे प्रतिज्ञाभागचिन्ता तावदारभ्यते ॥ अत्रेति ॥ नन्वत्रानन्दमयादिशब्दा उदाहरणमित्युक्तम् । तन्न युक्तम् । सूत्र एकस्यैवोपादानात् । यदि च -

उपलक्षणत्वं शब्दानामानन्दमयपूर्वीणाम् ।
सूत्रस्याल्पाक्षरत्वेन सर्वशाखाविनिर्णय ॥

इत्यनुव्याख्यानानुरोधेनोपलक्षकत्वमुच्यते तदापि प्राथम्यात् अल्पाक्षरत्वाच्चान्नमय इत्येवोच्येतेत्याशङ्क्य -

आनन्दमयरूपे तु ब्रह्मणः पुच्छतोक्तितः ।
समस्ताब्रह्मताप्राप्तेरानन्दमयनाम ही ॥

इत्यनुव्याख्यानोक्तं परिहारमाह ॥ श्रुताविति ॥ तत्रानन्दमय आनन्दमयासाधारणपूर्वपक्षहेतोरधिकस्य सत्त्वादित्यर्थः। आदिपदान्मयडादेः साधारणस्य ग्रहः। उपलक्षणमेतत् । हेतुव्यपदेशरूपसिद्धान्तहेतोश्चाधिकस्य तत्र सत्त्वात्सर्वापेक्षितानन्दप्रदेत्यादिना प्रागुक्तसङ्गतिसूचनार्थत्वाच्चेत्यपि ध्येयम् । अत एव वक्ष्यमाणदृष्टान्तस्यानानुगुण्यशङ्कालेशोपि नेति ॥ एतेन ''अन्नमयादीनामपि तर्हि ब्रह्मतां किं नासूत्रयदिति चेत्सूत्रस्याल्पाक्षरत्वादेव । आदिमत्त्वेप्यन्नमयादीनामानन्दमयस्य सङ्गतत्वेन ग्रहण''मिति टीका व्याख्याता ।

(प्रकाशिका)

॥ यथेति ॥ आद्ये चतुर्थपादे ''यस्मिन्गुणोपदेशः प्रधानतोभिसम्बन्ध'' इति द्वितीयेधिकरणे ''पञ्चदशान्याज्यानी''त्यत्राज्यशब्दः किं घृतरूपगुणवाची किं वा स्तोत्रनामेति संशये रूढत्वेनोद्भिदादियौगिकशब्दवन्नामत्वायोगात्संख्याविशिष्टाज्यविधौ वाक्यभेदाभावादाज्यशब्दोवान्तरप्रकरणेन स्तोत्रे गुणविधिरिति प्राप्ते समासाभावेन संख्याविशिष्टद्रव्याप्रतीतेरुभयविधानावश्यम्भावेन वाक्यभेदापरिहारादाज्यानुवादेन संख्या-मात्रस्य विधेयत्वादाज्यैः स्तुवत इत्युत्पत्तिवाक्ये धात्वर्थसामानाधिकरण्येन निर्देशात् ''यदाजिमीयुस्तदाज्यानामाज्यत्व''मिति वाक्यशेषेऽन्वाख्यानाच्चाज्यशब्दः स्तोत्रनामेति सिद्धान्तितम् । एवं ''चित्रया यजेत पशुकाम'' इत्यत्रापि चित्राशब्दः किं चित्रत्वस्त्रीत्वगुणविधिपरः किं वा कर्मनामेति संशये पूर्ववत्पूर्वोत्तरपक्षौ बोध्यौ । तत्राज्यैः स्तुवत इत्युत्पत्तिवाक्ये गुणविधिपक्षे द्रव्यक्रिययोरुभयोरुपादानेपि कारकविशिष्टक्रिया-विध्युपपत्तेश्चित्रावाक्यसाधारणस्य वाक्यभेदरूपस्य सिद्धान्तहेतोरनवतारात्तद्वाक्यमुपेक्ष्य गुण-वाक्ये समासाभावेन विशिष्टद्रव्यविध्ययोगादुक्तरूपसिद्धान्तहेतुसत्त्वात्तदुपजीवनेनैवोत्पत्ति-वाक्यस्थाज्यशब्दस्य स्तोत्रनामत्वनिर्वाहाद्यथा तदेवोदाहृतं तद्वदत्रापि युक्तमिति पूर्वेणान्वयः। अत्र कश्चिदाह । विषमोयमुपन्यासः । तत्रोत्पत्तिवाक्योदाहरणे सिद्धान्तोन्मेषहेतुरेव नेति गुणवाक्योदाहरणं युक्तम् । इह तु मयडादेर्हेत्वंतरस्यापि भावेन प्रथमातिक्रमेण चरमोदाहरणमयुक्तमिति । तन्न । हेतुसद्भावमात्र एव दृष्टान्तत्वात् । उत्पत्तिवाक्ये नामत्वहेतोरलाक्षणिकत्वस्यान्वाख्यानस्य च सत्त्वाच्च । आनन्दमय इवावयवत्वरूप-प्रबलहेतोरन्नमयादावभावाच्च । नन्वन्नमयेपि ''ओषधीभ्योन्नम् । अन्नात्पुरुषः । स वा एष पुरुषोन्नरसमयः'' इति देहपरामर्शः ''तस्येदमेव शिर'' इति प्रत्यक्षनिर्देशश्चान्नमये पूर्वपक्षहेतुरधिकोस्तीति चेन्न । ''तस्य विकारार्थोपपादकत्वेन तदन्तर्भावा''दिति सुधायामेवमेवोक्तेरिति भावः ।

पाण्डुरङ्गि — समानाधिकरणेति ॥ समानाधिकरणं यद्विजातीयं तदल्पत्वेनेत्यर्थः । एवमुत्तरत्रापि व्यधिकरणं यत्तजातीयं तदल्पत्वेनेति व्याख्येयम् । पूर्वपक्षे च सिद्धान्ते च फलफलिभावमाह ॥ आद्य इति ॥ नन्वधिकरणानामितर इवात्रापि पूर्वपक्षसिद्धान्तौ कुतो नोच्येते इत्यत आह ॥ अत्र चेति ॥ न तौ पृथगुच्येते इति ॥ तथाच पूर्वोत्तरपक्ष-विवेचनादिप्रतिज्ञाविरोधो न शङ्क्य इति भावः । नन्विदमधिकरणमनारम्भणीयम् । एतदधिकरणनिर्णेतव्यविषयवाक्ये ब्रह्मशब्दस्य श्रुतत्वात्तस्य च जिज्ञासासूत्रे योगरूढिभ्यां

(पाण्डुरङ्गि)

ब्रह्मनिष्ठत्वस्य जीवनिष्ठत्वस्य चोपपादितत्वात्तद्युक्तानन्दमयशब्दस्यापि ब्रह्मपरत्वान्न पूर्वपक्षोदय इत्याशङ्क्य निराकरोति ॥ यद्यपीत्यादिना ॥ ननु सूत्रकारेणानन्दमयोभ्यासादित्यानन्दमयस्यैव ब्रह्मत्वमुक्तम् । तथाच भाष्यकारेण तदेवोपपादनीयम् । अन्नमयादौ येन्नं ब्रह्मोपासत इत्याद्यभ्यासवर्णनमयुक्तम् । न च सूत्रकारेणानन्दमयस्योपलक्षणतया गृहीतत्वेनान्नमयादीनां ब्रह्मत्वस्यापि सूत्रकाराभिप्रेतत्वाद्भाष्यकारीय- तद्युत्पादनं सङ्गतमेवेति वाच्यम् । तर्ह्यन्नमयस्यैव प्रथमत्वेन प्रथमातिक्रमे कारणाभावेन अन्नमयोभ्यासादित्यन्नमयस्यैव वक्तव्यत्वापत्त्याऽऽनन्दमयस्य प्रथमग्रहणमनुपपन्नमित्यत आह ॥ अत्रेति ॥ तत्रेति ॥ ननु यदि पूर्वपक्षहेतुभूतस्यावयवत्वस्यानन्दमये विद्यमानत्वेन तस्यैवेतरलक्षकत्वेनोपपादनं तर्ह्यानन्दमय एवान्नमयेपि इदमित्यादिनिर्देशानुपपत्तिरूपस्य पूर्वपक्षहेतोः सत्त्वात्तस्यैवेतरलक्षकत्वेन ग्रहणोपपत्त्या नानन्दमयग्रहणं युक्तमित्यत उक्तं जिज्ञासासूत्राक्षेपकस्येति ॥ तस्य जिज्ञासासूत्राक्षेपकत्वाभावेन सङ्गतिकथनेनैव पूर्वपक्षस्य लाभादानन्दमयस्यैवोपादानं न त्वितरस्येत्यर्थः । नन्वानन्दमये पूर्वपक्षहेतोः सत्त्वेपि तस्यैवोदाहरणं कुत इत्यतः तत्र पूर्वमीमांसायां सम्प्रतिपन्नं दृष्टान्तमाह ॥ यथेति ॥ वाक्यभेदेति ॥ आज्ये मन्त्रसम्बन्धस्य पञ्चदशत्वस्य च विधाने वाक्यभेदापत्तेरिति भावः ।

तात्पर्यचन्द्रिका

अत्र ब्रह्मशब्दाभ्यासो यद्यपि सूत्रोदाहृतमानन्दमयं प्रति श्रुत्योदाहृते श्लोके ''असद्ब्रह्मेति वेद चेत् अस्ति ब्रह्मेति चेद्वेदे''ति तथा विज्ञानमयेपि ''विज्ञानं देवास्सर्वे ब्रह्म ज्येष्ठमुपासते । विज्ञानं ब्रह्म चेद्वेदे''त्यस्ति । न चासदिति श्लोक आनन्दमयपुच्छविषयः । अन्नमयादीन्प्रत्युदाहृतश्लोकानामपि तदीयपुच्छविषयत्वापातात् । अन्नमयप्राणमयमनोमयेषु तु ''येन्नं ब्रह्मोपासते ये प्राणं ब्रह्मोपासते आनन्दं ब्रह्मणो विद्वा''निति ब्रह्मशब्दः सकृदेव श्रुतः । तथापि तन्मात्रेणैव तेषां ब्रह्मता । आनन्दमयविज्ञानमययोस्त्वभ्यासोप्यस्तीति स सूत्रितः । अत एव भाष्ये ''तथापि न त आनन्दमयशब्देनोच्यन्ते । किन्तु विष्णुरेव । ब्रह्मशब्दाभ्यासा''दित्युक्त्वा येन्नं ब्रह्मेत्यादिब्रह्मशब्दादित्येवोक्तम् । टीकायामपि आनन्दमये ब्रह्मशब्दाभ्यासादित्युक्त्वा ''अन्नमयादीन्प्रत्युदाहृतश्लोकेषु तद्विषयत्वेन ब्रह्मशब्दश्रवणा''दित्येवोक्तम् । सुधायां तु''येन्नं ब्रह्मेत्यादिरूपादभ्यासात्तैत्तिरीयक''

इत्यनुव्याख्यानानुसारेण ''एकविषयासकृदुक्तिलक्षणमुख्याभ्यासाभावेप्यसकृदुक्तिमात्रमस्ति । तथाचान्नमयादिविषयत्वेन ब्रह्मशब्दस्य श्रुतत्वाभिप्रायोभ्यासशब्द'' इत्युक्तम् । यद्वा ब्रह्मशब्दवत् ''अन्योन्तर आत्मा एतमन्नमयमात्मानमुपसङ्क्रामति एतमन्नमयमात्मानमुपसङ्क्रम्ये''त्यादौ ब्रह्मशब्दसमानार्थात्म- शब्दसद्भावादभ्यासः ।

प्रकाशिका — यद्येवं प्रतिज्ञाभागस्यान्नमयाद्युपलक्षकत्वं तर्हि प्रकरणद्वये ब्रह्मशब्दाभ्याससत्त्वेपि प्रकरणत्रये तदभावात्सौत्रो हेतुर्भागासिद्ध इति शङ्कते ॥ अत्रेति ॥ श्रुत्या उपनिषदा । अद्वैत्युक्तमाशङ्कते ॥ न चेति ॥ ब्रह्मपुच्छं प्रतिष्ठेति पुच्छत्वेन यद्ब्रह्मोक्तं तत्रैवासद्ब्रह्मेति श्लोक उच्यत इति शङ्कार्थः ॥ आपातादिति ॥ अन्यथा प्रायपाठविरोधः स्यात् । तच्च परैर्नाङ्गीकृतमिति भावः ॥ तन्मात्रेणेति ॥ ब्रह्मशब्दमात्रेणेत्यर्थः । तर्हि ब्रह्मशब्दादित्येव वाच्यमित्यत आह ॥ आनन्देति ॥ अत एवेति ॥ सर्वत्रैकरूप्याभावादेवेत्यर्थः । ते चतुर्मुखादयः । सुधायामैकरूप्यमेवोक्तमित्याह ॥ सुधायां त्विति ॥ अभ्यासशब्दस्य मुख्यार्थमेवोपेत्य सर्वत्रैकरूप्यं समर्थयितुमभ्यासादित्यस्यात्मशब्दाभ्यासादित्यभिप्रेत्य ब्रह्मवल्लच्यां भृगुवल्लच्यां चान्नमयादिसमानाधिकरणानात्मशब्दानाह ॥ यद्वेति ॥ ब्रह्मशब्दवदात्मशब्दसद्भावादित्यन्वयः । यद्यपि ''तस्माद्वा एतस्मादन्नरसमयात् अन्योन्तर आत्मा प्राणमय'' इति ''अन्योन्तर आत्मा मनोमय'' इत्येवं रूपेण प्राणमयादिप्रकरणोपक्रमेषु तथा ''एतं प्राणमयमात्मानमुपसङ्क्रामती''त्यादिरूपेण ब्रह्मवल्लचुपसंहारे तथा ''एतं प्राणमयमात्मानमुपसङ्क्रम्ये''ति भृगुवल्लचुपसंहारे च प्राणमयादिषु त्रिरात्मशब्दश्रवणमस्ति । अन्नमये तूपक्रमे आत्मपदाभावादुपसंहारयोरेव द्विरात्मपदश्रवणमिति द्वैरूप्यम् । तथाप्यसकृदुक्तिरूपाभ्यासस्य सत्त्वादेवमुक्तम् । ब्रह्मशब्दस्येवात्मशब्दस्यापि विष्णुत्वसाधकत्वमस्तीति ज्ञापयितुं ब्रह्मशब्दसमानार्थेत्युक्तम् । तथात्वं च भाष्ये स्पष्टमिति भावः ।

पाण्डुरङ्गि — नन्वानन्दमयादीनां ब्रह्मत्वे ब्रह्मशब्दाभ्यासस्य हेतूकरणमयुक्तम् । आनन्दमयादिशब्दोपेतवाक्ये ब्रह्मशब्दाभ्यासाभावेनासिद्धत्वादित्यत आह ॥ अत्रेति ॥ तदीयपुच्छविषयत्वापातादिति ॥ न चेष्टापत्तिः ॥ तथा सत्यविशेषादन्नमनोमयपुच्छस्यापि ब्रह्मत्वं स्यात् । अथर्वाङ्गिरसः पुच्छं प्रतिष्ठेत्युक्तमनोमयपुच्छस्य ब्रह्मत्वस्य त्वयानङ्गीकारादिति भावः ॥ अन्नमयेति ॥ तथाच ब्रह्मत्वसाधने हेतूकृतस्याभ्यासस्यांशेऽसिद्धिरिति

(पाण्डुरङ्ग)

भावः ॥ स सूत्रित इति ॥ आनन्दमयविज्ञानमयगतब्रह्मशब्दाभ्यासेन ब्रह्मत्वे तात्पर्ये निश्चिते प्रायपाठेनान्नमयादिष्वपि श्रुतब्रह्मशब्दस्य ब्रह्मपरत्वनिश्चये तावन्मात्रेणान्नमयादीनां ब्रह्मसिद्धिरित्याशयः । अनेन सौत्रोऽभ्यास उपलक्षणमित्युक्तं भवति । नन्वानन्दमये ब्रह्मशब्दाभ्यासस्यान्नमयादौ ब्रह्मशब्दश्रवणमात्रस्यैव ब्रह्मत्वसाधकत्वमिति टीका नोपपद्यते । तथा सति सुधाविरोधात् । सुधायामन्नमयादीनां पञ्चानामपि ब्रह्मत्वेऽमुख्याभ्यासस्य साधकत्वेनोक्तत्वात् । तथाच सुधाविरोध इत्यत आह । सुधायां त्विति ॥ तथाच श्रुतोपलक्षितसाधारणामुख्याभ्यासपरत्वान्नासाधारणमुख्याभ्यासस्य क्वाचित्कोक्तिविरोध इति भावः ।

नन्वसकृदुक्तिमात्रमिति कथम् । एकविषयताप्यस्तीत्यन्यत्रोक्तत्वादिति चेत्तस्यायमभिप्रायः । क्वचिदेकविषयताप्यस्तीति नाभ्यासस्य हेतुत्वम् । किन्तु ब्रह्मपदश्रवणमेव । अभ्यासस्तु क्वचित्तिष्ठतीति कृत्वोक्तेः । तथाच टीकासुधयोः फलत एकार्थत्वान्न विरोध इति भावः । अस्मिन्पक्षे सूत्रोक्तस्याभ्यासादिति हेतोः गौणता समायाति । इममेवास्वारस्यं मनसि निधायाह ॥ यद्वा ब्रह्मशब्दवदिति ॥ यद्यपि स वा एष पुरुषोऽन्नरसमय इति परामर्शानुरोधात्तस्माद्वा एतस्मादात्मन इत्यन्नमयघटकात्मशब्दमुपादाय सर्वत्रात्मशब्दाभ्यासो वक्तुं शक्यः । तथाप्यभ्यासे त्रितयोक्तेरसकृदुक्त्यन्तरत्वेनातिशयसूचनार्थमुत्तरानुवाकस्थात्मशब्द उपात्तः । इदं चानुवाकद्वयस्य वक्ष्यमाणरीत्यैकस्थानत्वविवक्षया । अत्र ब्रह्मशब्दसमानार्थेत्युक्त्या ब्रह्मात्मशब्दयोरेकविषया सकृदुक्तिरूपत्वादभ्यासत्वे सुतरामतिशय इति सूचितम् । यद्यपि गुणविशेषवाचिनां सर्वेषामपि शब्दानामपर्यायत्वादपर्यायशब्दानामभ्यासत्वेऽतिप्रसङ्गः । तथापि लोकेऽभिधानसिद्धपर्यायत्वमभ्युपेत्येदमुक्तम् । यद्वा अन्योन्तर आत्मा विज्ञानमयः । एतमानन्दमयमात्मानमित्यात्मशब्दस्य विभक्तिभेदेनार्थविशेषोपस्थापकत्वेपि प्रातिपदिकमात्रविवक्षया यथाभ्यासत्वं तथा यच्चाप्नोति यदादत्ते यच्चात्तीत्याद्यर्थभेदेनापर्यायत्वेपि आत्मब्रह्मादयः शब्दा इत्यादिभाष्योदाहृतस्मृत्यनुसारेण स्वशब्दपर्यायात्मशब्दादिति वक्ष्यमाणन्यायेनावान्तरभेदविवक्षया शब्दान्तरव्यावृत्तानतिभिन्नार्थत्वविवक्षया पर्यायत्वेनाभ्यासोपपत्तेः ।

तात्पर्यचन्द्रिका

भाष्ये तु ब्रह्मशब्दपदेन ब्रह्मवाचकः शब्दो विवक्षितः । अत एव भाष्ये ''परमात्मे''त्यात्मपदोपेतस्मृत्युपादानम् । यद्वा ''अन्नं ब्रह्मेति व्यजाना''दित्युत्तरानुवाकेप्यन्नमयादौ ब्रह्मशब्दसद्भावादभ्यासः ।

प्रकाशिका — भाष्यविरोधं निराह ॥ भाष्ये त्विति ॥ स्मृतीति ॥ ''ब्रह्मेति परमात्मेति भगवानिति शब्द्यते'' इति स्मृत्युपादानमित्यर्थः । नन्वेवं ''येन्नं ब्रह्मोपासत इत्यादिब्रह्मशब्दा''दिति भाष्यमसङ्गतम् । किं त्वन्योन्तर आत्मेत्यादीत्येवोच्येतेति चेन्न । आदिपदेनास्यापि सङ्ग्रहात् । तदर्थापरित्यागेनास्यार्थस्योक्तत्वात् । अत एव ब्रह्मशब्दवदित्युक्तम् । नन्वानन्दमयादेश्चतुर्मुखादिगौणात्मत्वमुपेत्य तत्र श्रुतात्मशब्दोपि तस्यैवेति ''यस्यानुवित्तः प्रतिबुद्ध आत्मे''त्यात्मपदश्रवणादीक्षणीयो न गौण आत्मेति निरासो न युक्त इत्यात्मशब्दस्य पूर्वपक्ष आक्षेपादाक्षिप्तेन कथं सिद्धान्तनिर्णयः । न चाभ्यासेन निर्णयः । गौणात्मन्येवायमात्मशब्द इति वदता तदभ्यासोपि गौणात्मन्येव । न तु परमात्मसाधक इति वक्तुं शक्यत्वात् । अन्यथा ''अदृश्यत्वमुखेनानाक्षेपेऽदृश्यत्वेन विष्णुलिङ्गेन विष्णुरेवान्तस्थ इति शङ्का स्या''दित्यादि तत्र तत्राग्रेतनचन्द्रिकावाक्यविरोधापातात् । तेनाक्षिप्तस्य सिद्धान्तासाधकत्वावगतेः । तस्मादन्यस्मादेव साधकादानन्दमयादेर्ब्रह्मत्वं प्रसाध्य तत्रत्यात्मशब्दस्य परमात्मशब्दत्वं समर्थ्य प्राक्तनाक्षेपोपि समाधेय इति चेन्न । भाष्योक्तब्रह्मशब्दाभ्यासस्यैव साधकत्वमभिप्रेत्यात्मशब्दमुखाक्षेपस्य दर्शितत्वात् । आत्मशब्दस्य साधकत्वे तु तन्निष्ठसूत्रादिकमाक्षेप्यम् ।

यद्वा आत्मशब्दस्य परमात्मनि मुख्यत्वान्मुख्यार्थत्यागेनामुख्यार्थग्रहणे बाधकाभावान्मयट्प्रत्ययादेः प्राचुर्यार्थत्वेन बाधकानां निरसिष्यमाणत्वादित्यात्मशब्दस्य भगवत्साधकत्वस्य प्रसाध्यत्वाभिप्रायेण तस्य साधकत्वोक्तिसम्भवाच्च । अत एव भाष्य आत्मशब्दस्य भगवच्छब्दत्वं तत्र तत्र साध्यते । अत्राप्यग्रे न च ब्रह्मशब्द इत्यादिना तत्साधनम् । अत एव कम्पनादित्यत्र ''य एतद्विदु''रित्याक्षिप्तमपि लिङ्गं तत्र टीकायां ''नन्वेवं सावकाशत्वे श्रुतिलिङ्गयोर्य एतद्विदुरित्युक्तं लिङ्गं विहाय किं लिङ्गान्तरग्रहणेन । मैवम् । तदविहायैव लिङ्गान्तरस्याप्युक्तत्वात् । एतदन्यत्राप्यनुसन्धेय''मिति साधकमुक्तम् । अत एव ''अन्तर उपपत्ते''रित्यादावाक्षिप्तस्यामृतत्वादेः सिद्धान्ते हेतूकरणमित्याद्यूह्यम् । ''न

(प्रकाशिका)

चान्नमयादीनामब्रह्मत्वे किंचिन्मानम् । ''येऽन्नं ब्रह्मोपासते ये प्राणं ब्रह्मोपासते आनन्दं ब्रह्मणो विद्वान् विज्ञानं ब्रह्म चेद्वेद अस्ति ब्रह्मेति चेद्वेद अधीहि भगवो ब्रह्मेति तस्मा एतत्प्रोवाच । अन्नं प्राणं चक्षुः श्रोत्रमित्यादिना ब्रह्मशब्देनोक्तत्वाच्चे''ति तैत्तिरीय-भाष्यपर्यालोचनयाऽनुवाकद्वयाभिप्रायेणान्नमयादिषु ब्रह्मशब्दस्य मुख्य एवाभ्यासो लभ्यत इत्याह ॥ यद्वेति ॥ ननूत्तरानुवाकेऽन्नप्राणादिशब्दा एव श्रुताः नान्नमयादय इति कथमन्नमयादिषु स्थानद्वयेनापि तदभ्यास इति चेन्न । तदुपसंहारे ''अन्नमयमु-पसंक्रम्ये''त्यादौ मयटः श्रवणेन पूर्वत्रान्नादिशब्देपि तस्यावश्यकत्वात् । अन्यथान्न-मयादीन्प्रत्युदाहृतश्लोकेषु मयटोऽभावेनान्यत्वप्रसङ्गात् श्लोकानामुक्तार्थासाङ्गत्यप्रसङ्गात् । भृगुवल्लचा ब्रह्मवल्लचुक्तार्थे समाख्यारूपत्वस्याग्रे साधयिष्यमाणत्वाच्चान्नादेर-न्नमयादेरेकत्वमित्यभिप्रायात् ।

पाण्डुरङ्गि — न चैवं भाष्यटीकयोर्येऽन्नं ब्रह्मोपासते ये प्राणं ब्रह्मोपासते इति वाक्योदाहरणमयुक्तम् । तत्रात्मशब्दाभावादिति वाच्यम् । तद्वाक्यस्य प्रतीकग्रहण-रूपत्वेनोपपत्तेः । अस्मिन्पक्षे ब्रह्मशब्दाभ्यासादिति भाष्यं ब्रह्मवाचकात्मशब्दाभ्यासादिति गौणं व्याख्येयम् । तथा तट्टीका गौणी व्याख्येया । एवं च भाष्यटीकयोर्गौणत्वं भवतीत्यतस्तद्भयात्पक्षान्तरमाह ॥ यद्वेति ॥ अत्राप्यनुवाकद्वयस्थब्रह्मशब्दस्यान्नं ब्रह्मेत्यन्नशब्दोपपदस्योपादानादभ्यासत्वम् । अनेन 'येऽन्नं ब्रह्मेत्यादिरूपादभ्यासात्तैत्तिरीयके' इत्याद्यनुव्याख्यानमपि प्रकारान्तरेण व्याख्यातं भवति । एवमुत्तरानुवाकेष्येकैकत्रानेकशो ब्रह्मशब्दश्रवणादभ्यासत्वं ज्ञेयम् । यद्यपि सर्जकत्वादीनामत्रोत्तरत्र चानेकेषां लिङ्गा-नामभ्यासोस्ति तथापि लिङ्गात् श्रुतेर्बलवत्त्वात् श्रुत्या पूर्वपक्षे तदभ्यास एवोक्तः । यद्वा शब्दमात्रस्यान्यत्रापि सम्भवाशङ्कायां तदभ्यासो हेतुत्वेनोक्तः । लक्षणस्यान्यत्रासम्भावित-त्वात्सन्नप्यभ्यासो न विवक्षितः । अथवा मुख्योत्तयाऽन्यदप्यूह्यमिति लिङ्गाभ्यासो नोक्तः ।

तात्पर्यचन्द्रिका

केचित्तु शाखान्तरेप्यन्नमयादौ ब्रह्मशब्दसद्भावादभ्यासः अत एवानुव्याख्याने ''अन्यासु चैतद्रूपासु शाखास्वपि सहस्रशः'' इत्युक्तमित्याहुः । तन्न । शाखान्तरमादायाभ्यासेऽतिऽप्रसङ्गात् । अनुव्याख्याने ''येऽन्नं ब्रह्मेत्यादिरूपादभ्या-सात्तैत्तिरीयके । अन्यासु चैतद्रूपा''स्विति प्रतिशाखमभ्यासोक्तेश्च । न

चान्नादेरब्रह्मत्वेपि ब्रह्मत्वेनोपासनोपपत्तिरिति शङ्क्यम् । असदुपासनाया निषेत्स्यमानत्वात् । ''विज्ञानं ब्रह्म चेद्वेद अन्नं ब्रह्मेति व्यजाना''दित्यादावुपासनाया अश्रवणाच्च । ''एतमानन्दमयमात्मान''मित्यादावुपासनाया अश्रवणेपि ब्रह्मशब्दसमानार्थात्मशब्दश्रवणाच्च । न च ब्रह्मशब्दोन्यत्र युक्तः ।

प्रवृत्तिहेतुपौष्कल्याद्भाष्यकृद्भिरुदाहृतैः ।
श्रुतिस्मृतिशतैश्चापि ब्रह्मशब्दो हि विष्णुगः ॥ १ ॥

यद्यपि ''तपो ब्रह्मे''त्यसकृच्छ्रवणात्तपस्यपि ब्रह्मशब्दाभ्यासोऽस्ति तथापि पूर्वत्र ''तपसा ब्रह्म विजिज्ञासस्वे''ति उत्तरत्र च ''स तपस्तप्त्वा अन्नं ब्रह्मेति व्यजाना''दिति चाभ्यासात्तपसि ब्रह्मशब्दो न मुख्य इति न तपसो ब्रह्मता ।

प्रकाशिका — अनुव्याख्यानापातप्राप्तिं निराह ॥ केचित्त्विति ॥ एतद्रूपासु तैत्तिरीयशाखायामिव गुणिसामान्यवाचकनामवतीषु । ''आनन्दमय इत्याद्यैः शब्दैर्वाच्यो हरिः स्वय''मित्युत्तरार्धेनान्वयः । शाखान्तरमादाय शाखान्तरस्थब्रह्मशब्दमादाय ॥ प्रतिशाखमिति ॥ यदि तैत्तिरीयस्थब्रह्मशब्दस्य शाखान्तरीयब्रह्मशब्दविवक्षयाऽभ्यासविवक्षा स्यात्तदा प्रतिशाखमभ्यासोक्तिर्न स्यादित्यर्थः । एवं हेतुदोषेषु प्रबलासिद्धिरूपदोषनिरासेऽप्यप्रयोजकत्वेन व्याप्यत्वासिद्धिः स्यादेव । यथा खलु ''नाम ब्रह्मेत्युपासीत योषितमग्निं ध्यायीत'' इत्यादौ नामादौ ब्रह्मादित्वाभावेऽप्युपासनार्थत्वमात्रेण तदुक्तिः तथात्राप्यन्नमयादौ ब्रह्मशब्दार्थस्य विष्णुत्वस्याभावेऽप्यब्रह्मरूपेऽन्नमयादौ ब्रह्मत्वेन ध्यानार्थत्वेनापि तत्र ब्रह्मशब्दोक्तिसम्भवेनान्यथासिद्धेः । अत एव ''येन्नं ब्रह्मोपासते ये प्राणं ब्रह्मोपासते'' इत्युक्तिरित्याशङ्क्य निराह ॥ न चेति ॥ अन्नान्नमयादेरेकत्वादन्नादेरित्युक्तम् । ''न प्रतीकेन हि स'' इति चतुर्थे सूत्रकृतैव निरसिष्यमाणत्वादित्यर्थः।

प्रतीकविषयत्वेन न कार्या विष्णुभावना ।
प्रतीकं नैव विष्णुर्यन्मिथ्योपासा ह्यनर्थदा ॥

इत्याद्यनुव्याख्यानोक्तेः । उक्तं च तैत्तिरीयभाष्ये ''येन्यथा विदुस्तेन्यराजानस्ते क्षय्यलोका भवन्तीति श्रुतेरविद्यमानोपासनाद्दोषावगतेश्चे''त्यादीति भावः । अन्नमयादिसाधारणं पक्षान्तरमाह ॥ एतमिति ॥ एवमप्रयोजकत्वशङ्कारहितमव्याप्यत्वं निरस्येदानीं

(प्रकाशिका)

विपक्षवृत्तित्वं निराह ॥ न चेति ॥ ब्रह्मेतिशब्दो ब्रह्मणः शब्द इति विग्रहेण ब्रह्मात्मशब्दौ ग्राह्यौ । अन्यत्र विष्णुत्वरहिते प्रकृत्यादावित्यर्थः । श्लोकेनान्वयः । उदाहृतैः तत्र तत्रेति भावः । चापिशब्दौ हेतुद्वयसमुच्चयार्थौ । हिर्हेतौ । महायोगविद्भद्रूढिभ्यां विष्णुमात्रनिष्ठो यस्मात्तस्मादन्यत्र न युक्त इत्यर्थः । समर्थितमेतत्प्राक् जन्माधिकरणादावित्यर्थः ।

यदत्र कश्चिदाह ब्रह्मशब्दाद्विरिञ्चापाकरणमयुक्तम् । तस्य विष्णुनिष्ठत्वे मानाभावात् । तदेव ब्रह्मेत्यादेश्च प्रजापतिहिरण्यगर्भादिश्रुत्या विरिञ्चादिपरत्वोपपत्तेरित्यादि । तदनेनैव निरस्तम् । आद्याधिकरणे ''ब्रह्मशब्दश्च विष्णावेवे''त्यादिभाष्ये ''स विष्णुराह हीत्यंते देवशास्त्रस्य तेन ही''त्याद्यनुव्याख्याने च तदेवेत्यादिश्रुतेर्वैष्णवत्वोक्त्या च ब्रह्मशब्दस्य विष्ण्वेकनिष्ठतायाः समर्थनात् । ''एष उ एव ब्रह्म एष उ एवात्मे''ति ''विष्णुरेव ज्योतिर्विष्णुरेव ब्रह्मे''ति ''पुरुषः परमात्माऽजो ब्रह्म नारायणः प्रभु''रिति ''आत्मा ब्रह्म महांस्तारः परमेशः शुचिश्रवाः । विष्णुर्नारायणोऽनन्त'' इत्यादिश्रुतिभिः ''ब्रह्मशब्दः परे विष्णौ नान्यत्रे''ति ''ब्रह्मेति परमात्मे''ति ''वासुदेवात्मकं ब्रह्मे''ति ''अनन्तो भगवान्ब्रह्मे''ति ''परमं यो महद्ब्रह्मे''ति ''वासुदेवात्परः को नु ब्रह्मशब्दोदित'' इति ''एतस्माद्ब्रह्मशब्दोऽयं विष्णोरेवे''ति ''ब्रह्मात्मा विष्णुरेवही''ति ''आत्मब्रह्मादयः शब्दास्तमृते विष्णु''मित्यादिस्मृतिभिस्तत्र तत्रोदाहृताभिरनेकाभिर्ब्रह्मात्मादिशब्दस्य विष्णुनिष्ठतायाः स्पष्टत्वात् ॥ असकृदिति ॥ ''तं होवाच तपसा ब्रह्म विजिज्ञासस्व तपो ब्रह्मेति स तपोतप्यत स तपस्तप्त्वा अन्नं ब्रह्मेति व्यजाना''दिति पञ्चकृत्वोऽब्रह्मण्यपि तपसि ब्रह्मपदस्य भृगुवल्लयां श्रवणादित्यर्थः । तपसेति तृतीयया साधनत्वावगमात् ''आयुर्घृतं द्विर्वचनेची''त्यादिवदभेदोपचार इति भावः । ''तपो ज्ञानस्वरूपत्वा''दिति तेत्तिरीयभाष्योक्तादर्थादर्थान्तरमुपेत्यैवमुक्तिरित्यविरोधः ॥ न मुख्य इतीति ॥ सूत्रे मुख्यस्यैव ब्रह्मशब्दस्य हेतूकरणान्न व्यभिचार इति भावः ।

पाण्डुरङ्गि — नन्वेतस्यां दशायां ब्रह्मशब्दाभ्यासाभावेपि शाखान्तरस्थाभ्यास-मादायाभ्यासशब्दो मुख्य एवेति केचिदाहुः । तद्दूषयितुमनुवदति ॥ केचित्त्विति ॥ अन्नमयादीनां ब्रह्मत्वे शाखान्तरीयाभ्यासो विवक्षित इत्यत्रोपोद्बलकमाह ॥ अत एवेति ॥ शाखान्तरमादायेति ॥ यदि शाखान्तरीयाभ्यासमादायान्नमयादीनां ब्रह्मत्वं तर्हि ब्रह्म भृगुवल्लीस्थब्रह्मशब्दाभ्यासमादायानन्दमया मे शुध्यंतामिति वाक्यस्थान्नमयादीनामपि ब्रह्मत्वं

स्यादित्यर्थः । न च तत्र शुद्धिप्रार्थनलिङ्गान्न तेषां ब्रह्मपरत्वमिति वाच्यम् । अभ्यासस्य श्रुतिरूपत्वेन लिङ्गापेक्षयापि बलवत्त्वादिति भावः ।

ननु तर्ह्यनुव्याख्याने शाखान्तरीयाभ्यासस्य हेतुत्वेन विवक्षितत्वात्तद्विरोध इत्यत आह ॥ अनुव्याख्यान इति ॥ ननु किमित्येवं महायासेनानन्दमयादीनां ब्रह्मत्वं समर्थ्यते । अब्रह्मत्वमेव किं न स्यात् । न चैवं ब्रह्मशब्दादेः का गतिरिति वाच्यम् । ब्रह्मत्वेनोपासनसम्भवात् । एवं च हेतोरन्यथासिद्धिरित्याशङ्क्य परिहरति ॥ न चान्नादेरिति ॥ असदिति ॥ न प्रतीक इति सूत्रे न च रमंत्यहो असदुपासनयाऽत्महन इत्यादौ च निषेत्स्यमानत्वादित्यर्थः ॥ विज्ञानमिति ॥ अत्र च धात्वर्थश्च नोपासनेति भावः । चित्तवृत्तित्वसाम्यादत्राप्युपासना व्याख्यायत इत्यत आह ॥ एतमिति ॥ असिद्धिं परिहरति ॥ न चेति ॥ कुतो नेत्यतो हेतुं कारिकया सङ्गृह्णाति ॥ प्रवृत्तीति ॥ विष्णुगः विष्णावेव मुख्यः । तत्र हेतुद्वयं प्रवृत्तीत्यादिब्रह्मशब्दप्रवृत्तौ हेतुभूतस्य गुणपूर्णत्वस्य विष्णौ पुष्कलत्वादित्यर्थः । अनेन ब्रह्मशब्दस्य योग उक्तः । श्रुतिस्मृतीत्यनेन प्रयोगबाहुल्येन रूढिश्चोक्ता । एवं च ब्रह्मशब्दो महायोगरूढिभ्यां विष्णुपर इति भावः । ननु ब्रह्मशब्दाभ्यासेनानन्दमयादीनां ब्रह्मत्वसाधनमनुपपन्नम् । तस्य तपस्यपि सत्त्वेन व्यभिचारादित्यतो नाभ्यासमात्रं हेतुः । किन्तु मुख्याभ्यास एव । तथाच न व्यभिचार इत्याह ॥ यद्यपीति ॥ तपसेति तृतीयया ब्रह्मज्ञानं प्रति तस्य कारणत्वाभिधानात्तत्वेति क्त्वाप्रत्ययेन तस्य ब्रह्मज्ञानात्पूर्वभावित्वाभिधानाच्चेति भावः । इदं च तपसा ब्रह्म विजिज्ञासस्वेति पूर्ववाक्ये ब्रह्मज्ञानकारणत्वेन प्रकृतं तप एव तपो ब्रह्मेति वाक्ये प्रतिपाद्यत इति पूर्वपक्ष्युक्तमङ्गीकृत्य समाहितम् । तावतापि पूर्वपक्ष्युक्तव्यभिचारपरिहारसम्भवात् न तु वस्तुतः । तपो ब्रह्मेत्यत्र ब्रह्मशब्दस्य मुख्यार्थत्वस्य सिद्धान्तिनोऽभिमतत्वात् । अन्यथा तपो ज्ञानस्वरूपत्वादित्यादितैत्तिरीयभाष्येण तपसा आलोचनेन । तपो ब्रह्म ज्ञानरूपं ब्रह्मेत्यर्थ इति तत्वप्रदीपेन

ज्ञानानुसन्धानरूपतपसा तं जनार्दनम् ।
क्रमाद्भृगुर्व्यजानात्तमन्नादिबहुरूपिणम्

इति तत्रैवोदाहृतयजुःसंहितागतवाक्यविरोधादिति ध्येयम् ।

तात्पर्यचन्द्रिका

यद्यपि ''तादात्म्यार्थे विकारार्थेप्राचुर्यार्थे मयट् त्रिधे''ति वचनात्तादात्म्ये मयट्स्वीकारे प्रतियोगिनो दुःखस्येषदनुवृत्त्यादिशङ्कानवकाशः तथापि ''यतो वाचो निवर्तन्ते को ह्येवान्या''दित्यादिश्रुत्यनुसारेणानन्दादेः पूर्णत्वसिद्ध्यर्थं स्वार्थिकत्वे मयटो वैयर्थ्यपरिहारार्थं च प्राचुर्यार्थतोक्ता ।

प्रकाशिका — एवमाद्यसूत्रं प्रतिज्ञाहेतुसमर्थनेन समर्थ्येदानीमन्नमयादीनां ब्रह्मत्वे यानि बाधकानि विकारप्रत्ययान्यत्वान्तरत्वशरीरत्वादीनि साधारणानि यान्यानन्दमयान्नमययोर्ब्रह्मत्वे विशेषबाधकानि प्रकृतदेहपरामर्शित्वेनेदमिति प्रत्यक्षनिर्देशब्रह्मपुच्छत्वोत्त्यादीन्युपलक्षणत्वेनैतत्सर्वबाधकनिरासार्थं सूत्रं ''विकारशब्दान्नेति चेन्न प्राचुर्या''दिति । ''इदमित्येव निर्देशो वस्त्रप्रावृतवद्विभो''रित्येतद्व्याख्याने सुधायां तथैवोक्तेः । तत्र प्राचुर्यार्थत्वमाक्षिप्य समाधत्ते ॥ यद्यपीति ॥ वचनादिति ॥ गीताभाष्योक्तात् ॥ प्रतियोगिन इति ॥ तादात्म्यस्य प्राचुर्यवदितरानिरूप्यत्वादिति भावः ॥ यतो वाच इति ॥ श्रुतौ हि ब्रह्मानन्दस्यापरिच्छिन्नत्वाभिप्रायेणावाङ्मनसगोचरत्वमुच्यते । तथैव प्राक्समर्थनात् । को ह्येवान्यादित्यत्राकाशनयन्यायेनाकाशपदवाच्यस्य विष्णोरानन्दमयत्वरूपपूर्णानन्दत्वे विश्वचेष्टकत्वरूपहेतुर्व्यपदिश्यते तदुभयानुसारेणेत्यर्थः । स्वार्थिकत्वे तादात्म्यार्थत्वे । यन्मयटो वैयर्थ्यं तत्परिहारार्थमित्यर्थः । उक्ता सूत्रकृतेति शेषः । एतेन तद्व्याख्यानपरभाष्यटीकादिग्रन्थोपि समर्थितो ध्येयः । तेन ''निरवकाशब्रह्मशब्दबलात्सावकाशस्य मयटः प्राचुर्यार्थत्वोपपत्ते''रिति सुधावाक्यमुपपन्नं भवति ।

पाण्डुरङ्गि — ननु तथापि द्वितीयसूत्रे मयटः प्राचुर्यार्थत्वं किमर्थमङ्गीकार्यम् । नच तदनङ्गीकारेऽनानन्दस्यापि प्राप्तिः स्यादिति वाच्यं तादात्म्याङ्गीकारेणाप्यनानन्दप्राप्तेःपरिहर्तुं शक्यत्वादित्यत आह ॥ यद्यपीति ॥

तात्पर्यचन्द्रिका

अन्नमयादिसाधारणहेतोरभ्यासात्पश्चान्मांत्रवर्णिकगानादेस्तु पूर्वमानन्दमयमात्रासाधारणस्य तद्धेतुव्यपेदशस्य निवेशनं तु मांत्रवर्णिकसूत्र आनन्दमयादिस्थब्रह्मशब्दस्यापरब्रह्मपरत्वशङ्काया अपि मन्त्रवर्णस्थपरत्वविशेषणेन निरासात् ''अस्मि-

न्नस्ये''ति सूत्रे च भेदस्य मुक्तावपि सत्त्वेनापारमार्थिकत्वशङ्काया अपि निरासात्तदनन्तरं तद्धेतुव्यपदेशोक्तौ तन्निरासेपि तद्धेतुव्यपदेशो हेतुरिति शङ्का स्यात् सा मा भूदित्येवमर्थम् । नचैवमप्यभ्यासं तद्धेतुव्यपदेशंच साधकमुक्त्वानन्तरं ''विकारशब्दा''दिति बाधकमुद्धर्तव्यमिति शङ्क्यम् । ''को ह्येवान्या''दिति तद्धेतुव्यपदेशस्यानन्दमयस्य विष्णुत्व इव प्राचुर्यं मयडर्थ इत्यत्रापि हेतुत्वात् ''अस्मि''न्निति सूत्रस्य स्वपक्षसाधकत्वेपि ''नेतरः भेदव्यपदेशात्'' इत्याभ्यां सूत्राभ्यां परपक्षे बाधकोक्तौ भेदस्यापारमार्थिकत्वशङ्कानिरासेन परपक्षे बाधकत्व-स्यापि सत्त्वात्तदानन्तर्यम् ।

तथा ''भेदव्यपदेशा''दित्यस्यानन्तरं भेदवदभेदोपि प्रामाणिकः तत्र प्रत्यक्षस्या-सम्भवेपि ''श्रुतेश्च ''तद्गुणसारत्वा''दित्यत्रान्यपरताया वक्ष्यमाणत्वेपि जगत्का-रणस्य शास्त्रयोनित्वेपि तत्सार्वज्ञादौ सर्वकर्तृत्वादेरिव विमता आत्मानः परमात्मनो न भिद्यन्ते आत्मत्वात्परमात्मवदित्याद्यनुमानस्य सम्भवादिति परपक्षे साधकशङ्कायां श्रुत्यादिसाहाय्यरहितं तद्विरुद्धं चानुमानमप्रमाणमतिप्रसङ्गादिति ''कामा''दिति सूत्रेण निरस्तायां अनन्तरं भेदश्रुत्यभेदानुमानयोरपारमार्थिकपारमार्थिकविषय-त्वादविरोध इति या शङ्का तस्या अपि ''अस्मि''न्निति सूत्रेण निरासात्तस्यांत्य-त्वम्। यद्यपि नेतर इत्यत्रानुपपत्तेरित्यनेन हिरण्यगर्भादिजीवानामानन्दमयत्वे तज्ज्ञानान्मोक्षानुपपत्तिरिव हिरण्यगर्भादीनामानन्दमयाद्भेदव्यपदेशानुपपत्तिरपि विव-क्षितुं शक्या तथापि जीव एवानन्दमयो न ब्रह्मेति वदता पूर्वपक्षिणा पूर्वं स्वाङ्गीकृतं जीवब्रह्मभेदं त्यक्त्वा जीवानामानन्दमयत्वेपि जीवचैतन्यस्य ब्रह्मचैतन्याभेदा-ज्जीवत्त्वज्ञानेनापि मोक्षोपपत्तिरिति प्रकारान्तरेण शङ्किते तच्छङ्काया अपि जीवानन्द-मययोरिव जीवब्रह्मणोरपि भेदं कथयता ''भेदव्यपदेशा''दित्यनेन निरासाय भेदव्यपदेशः पृथगुक्तः । अत एव भेदेति सूत्रमत्र टीकायां हिरण्यगर्भादि-जीवानामानन्दमयत्वनिरासकतया व्याख्याय सुधायां जीवब्रह्माभेदनिरासकतया व्याख्यातम् । अत एव च कामादिति सूत्रे जीवब्रह्माभेदानुमाननिरासः । भाष्ये च न च तत्त्वमसीत्यादिना जीवब्रह्माभेदश्रुतिगत्युक्तिः अनुव्याख्यानेच -

(तात्पर्यचन्द्रिका)

न जीवभेदसूत्राणां शङ्क्याऽत्र पुनरुक्तता ।
वाक्यान्तरद्योतकत्वात् पृथगित्यत्र पूर्णता ।

इत्यत्र भेदेत्यस्य सूत्रस्यान्तराधिकरणादिस्थैः ''भेदव्यपदेशाच्चान्य'' इत्यादिभिर्जीवेश्वराभेदनिरासकैः पौनरुक्त्यशङ्कासमाधानं च सङ्गच्छत इति ।

प्रकाशिका — एवं सूत्रद्वयार्थं समर्थ्येदानीं लेशेनेतरसूत्रार्थानुवादपूर्वं सूत्राणां क्रमहेतुचिन्ता प्रस्तूयते । तत्रेयमाशङ्का । ननु पञ्चानां ब्रह्मत्वं साधयितुमभ्यासादिति ''मांत्रवर्णिकमेव च गीयत'' इति ''अस्मिन्नस्य च तद्योगं शास्ती''ति च सूत्राणि प्रवृत्तानि । ''तद्धेतुव्यपदेशा''दिति त्वानन्दमयस्यैव । तथैव टीकादावुक्तेः । तथाच तद्धेतुसूत्रमभ्यासादित्रयानन्तरमेव निवेशनीयम् । न तु मध्ये । हेत्वभावादिति । तत्राह ॥ अन्नमयेत्यादिना ॥ साधारणहेतोरित्यस्य मांत्रवर्णिकगानादेरित्यत्राप्यन्वयः । आदिपदादस्मिन्नस्येति गृह्यते । निवेशनं त्वित्यस्य इत्येतदर्थमित्यन्वयः ॥ मंत्रवर्णस्थेति ॥ ब्रह्मवित्परमिति पूर्ववाक्ये प्रकृतस्य परपदस्य मंत्रवर्णेपि ब्रह्मविशेषणत्वेन विवक्षितत्वादेवमुक्तम् ॥ निरासादिति ॥ मन्त्रवर्णोक्तपरब्रह्मैवान्नमयादिषु गीयत इत्युक्त्या तन्निरासादिति भावः । तदनन्तरं तद्धेतुव्यपदेशोक्ताविवादिकं वक्ष्यमाणमत्रापि योज्यम् । अयमर्थः । अभ्यासानन्तरं तावन्निवेशनीयम् । तस्य साधारणहेतुत्वात् । एवं च त्वया मांत्रवर्णिकगानानन्तरं निवेशनं चोद्यतेऽस्मिन्नस्येत्यस्यानन्तरं वा । नाद्यः । ''अन्नमयादीनां पञ्चानामपि युक्त्यन्तरेण परब्रह्मत्वं प्रतिपादयितुं सूत्रं मान्त्रवर्णिकमित्यादिसुधोक्तदिशा यथा मांत्रवर्णिकं सत्यं ज्ञानमनन्तं ब्रह्मेति मन्त्रवर्णे लक्षणवत्तयोक्तमेव ब्रह्म अन्नमयादिपञ्चप्रकरणेषु प्रतिपाद्यत इति पञ्चापि ब्रह्मेति पञ्चानामब्रह्मत्वशङ्कानिरासोर्थः तथा टीकोक्तदिशाऽभ्यासादित्यत्र हेतुत्वेनोक्तब्रह्मशब्दस्यामुख्यचतुर्मुखाद्यर्थत्वशङ्काया अपि मन्त्रवर्णे ''ब्रह्मविदाप्नोतिपर''मिति पूर्वप्रकृतपरब्रह्मण एव लक्षितत्वात्तस्यैवोत्तरत्रान्नमयादिषु ब्रह्मशब्देन कथनान्नामुख्यार्थ इति शङ्कानिरासोपि मांत्रवर्णिकसूत्रस्यार्थ इति तद्धेतुसूत्रस्यापि ब्रह्मशब्दामुख्यार्थत्वशङ्कानिरासार्थत्वशङ्का स्यात् । सा माभूदित्यर्थं तदनंतरमनिवेशात् ।

न द्वितीयः । ''योगमन्नमयाद्यैर्य''दित्यनुव्याख्यानाद्युक्तदिशाऽस्मिन्नित्यस्य यथा अस्मिन्ननुवाके । अस्य सयएवंविदित्युक्तस्य ब्रह्मविदः । तद्योगं एतमन्नमयमात्मानमुपसंक्रामतीत्यादिना तैरन्नमयादिभिर्योगं तत्प्राप्तिं शास्तीति श्रुतिरतोन्नमयादयः पञ्चापि

ब्रह्मेत्यर्थः । तथा टीकाद्युक्तदिशा भेदव्यपदेशादित्युक्तभेदो मिथ्या किं न स्यादिति शङ्काया अपि अस्मिन्प्रकरणे अस्य जीवस्यानन्दमयादिना सह मुक्तावपि सम्बन्धमेव सोश्नुत इति शास्ति श्रुतिः अतो न भेदो मिथ्येति तन्निरासोप्यर्थ इति तदनन्तरं हेतुव्यपदेशस्य निर्देशेऽस्यापि भेदमिथ्यात्वशङ्कानिरासोर्थ इति शङ्का स्यात् । सा माभूदित्येवमर्थमिति । ननु शङ्कामात्रमकिंचित्करम् । व्याख्यानेन विशेषावगत्युपपत्तेः । यथोक्तं ''व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणं भवती''ति । सत्यम् । अन्तरङ्गज्ञापकाभाव एव व्याख्यानानुसरणमित्याशयात् । नन्वेवमपि साधकोक्त्यनन्तरबाधकोद्धारावसराद्धिकार-सूत्रव्यवधानमयुक्तमिति शङ्कते ॥ न चैवमिति ॥ इत्यत्रापीति ॥ टीकायां स्पष्टमनुक्तावपि ''महानन्दत्वएवास्य हेतुः कोऽन्यादितिऽस्फुट'' मित्यनुव्याख्यासुधायां ''आनन्दमयस्य विष्णुवाचित्वं मयटश्च प्राचुर्यार्थत्वं हेत्वन्तरेणोपपादयत्तद्धेतुव्यपदेशाच्चेति सूत्र''मित्युक्तेरिति भावः । तर्ह्यस्मिन्नित्यस्य स्वपक्षहेतोर्मात्रवर्णिकसूत्रानंतर्यं स्यान्न तु व्यवधानमित्यतस्तत्र हेतुमाह ॥ अस्मिन्निति ॥ सूत्रस्येति ॥ तदानन्तर्यमित्यन्वयः । भेदव्यपदेशादेरानन्त-र्यमित्यर्थः । तर्हि ''कामाच्च नानुमानापेक्षे''त्येतद्व्यवधानं कुत इत्यत आह ॥ तथेति ॥ अनन्तरमित्यस्य इति परपक्षे साधकशङ्कायां कामादिति सूत्रेण निरस्तायामित्यन्वयः । प्रामाणिक इत्यस्य इत्याद्यनुमानसम्भवादित्यन्वयः । ननु कामाच्चेति सूत्रे अभेदे प्रत्यक्षागमावनिरस्यानुमानमात्रनिरासः कुत इत्यत आह ॥ तत्राभेद इति ॥ श्रुतेश्चेति भाष्येऽधिकरणान्तरप्रमेयमेव श्रुत्यविरुद्धत्वं शिष्यहितायोक्तमित्युक्तं भवति । शास्त्रयोनिसूत्र-विरोधमाशङ्क्याह ॥ जगदिति ॥ शास्त्रैकगम्यत्वेपीत्यर्थः । सिद्धान्ते ईशः सर्वज्ञः स्वतन्त्रो वा सर्वकर्तृत्वात्पूर्णशक्तित्वाद्वा व्यतिरेकेण चैत्रवदित्याद्यनुमानस्येवेत्यर्थः । यद्यपि टीकायां ''विमतानि शरीराणी''त्यनुव्याख्यानानुरोधेन विमतानि शरीराणि मद्भोगायतनानि शरीरत्वादित्यनुमानमुक्तं तथापि तेनानुमानेन पर्यवसानगत्या परमात्माभेदः सिद्ध्यति । साक्षात्तु जीवानामेव । आत्मत्वानुमानेन साक्षादेवेतीदमुक्तम् । अत एव ''विमतानि शरीराणि मद्भोगायतनानि य''दित्यनुव्याख्याविवरणे सुधायां शरीरत्वानुमानमाक्षिप्य समाहितम् । आत्मत्वानुमानं च प्रदर्शितम् । टीकायामादिपदं च । अत्राप्यादिपदेन शरीरत्वादेर्ग्रह इति भावः ॥

साधकेति ॥ अभेदानुमानविरोधेन भेदव्यपदेशस्यान्यपरतोपपत्तेरिति भावः ॥ अनंतरमिति ॥ इति शङ्का भवतीति सम्बन्धः ॥ तस्या अपीति ॥ प्रागर्थद्वयस्य

(प्रकाशिका)

विवक्षितत्वेनोक्तत्वादपिशब्दः । भेदव्यपदेशादित्यस्य वैयर्थ्यमाशङ्क्य च समाधत्ते ॥ यद्यपीति ॥ भेदव्यपदेशेति ॥ ''ते ये शतं प्रजापतेरानन्दाः स एको ब्रह्मण आनन्द'' इति चतुर्मुखानन्दस्य परिमितत्वेनानन्दमयशब्दितात् ''यतो वाचो निवर्तंत''इत्यपरिमितानंदत्वेन श्रुताद्भेदव्यपदेशेत्यर्थः ॥ जीवब्रह्मणोरपि भेदमिति ॥ ''स यश्चायं पुरुषे यश्चासावादित्य'' इत्याधाराधेयभावेन ''रसं ह्येवायं लब्ध्वानंदीभवती'' त्यादिलब्धृलब्धव्यत्वादिना च भेदं कथयतेत्यर्थः ॥ अत एवेति ॥ एतेन टीकाद्वयस्य वर्णकान्तरपरतया विरोधोपि परिहृतः । द्वितीयेर्थे सूत्राद्यानुगुण्यमपीत्याह ॥ अत एव च कामादितीति ॥ वाक्यान्तरेति ॥ अत्र शास्त्रे तत्र तत्र प्रकरणस्य ह्यैक्यविवक्षायां चोदितायां तत्तद्गतभेदवाक्यद्योतनेन सूत्रेषु भेदसमर्थनं क्रियते । अतस्तात्पर्यभेदान्न पुनरुक्तता शङ्क्येत्यर्थः । नन्वेवं सत्यभेदः स्वरूपेण क्वापि न निराकृतः स्यादित्यत उक्तं पृथगिति ॥ पूर्णता प्रधानता । भेदसाधनस्य पृथगुपदेशादित्यत्र स्वातन्त्र्येण विचारितत्वादित्यर्थः ॥

पाण्डुरङ्गि — ननु पञ्चानामपि ब्रह्मत्वेऽभ्यासमांत्रवर्णिकगानतद्योगशासनरूप-हेतुत्रयस्य साधारण्यात्साधारणहेतूक्त्यनन्तरं तद्धेतुव्यपदेशरूपो हेतुर्वक्तव्यः । तस्यानन्द-मयस्यैव विष्णुत्वसाधकत्वेन तन्मात्रासाधारणत्वात् । तथाच मांत्रवर्णिकगानादेः पूर्वमभ्यासात्पश्चात्तद्धेतुव्यपदेशरूपहेतूक्तिरयुक्तेत्यत आह ॥ अन्नमयादीति ॥ तन्निरासेपीति ॥ यदि मांत्रवर्णिकमेव च गीयत इति सूत्रानन्तरं तद्धेतुव्यपदेश उच्यते तर्हि तस्यानन्द-मयादिस्थब्रह्मशब्दस्यापरब्रह्मपरत्वशङ्कानिरासकत्वं स्यात् । एवमस्मिन्नस्येति सूत्रानन्तर्ये भेदस्य मुक्तौ सत्त्वेनाऽपारमार्थिकत्वशङ्कानिरासकत्वं स्यादिति भावः । नन्वेवमपि पञ्चानामभ्यासस्य साधारणत्वात्तद्धेतुव्यपदेशस्य चानन्दमयासाधारणत्वात्तदुभयोक्त्यनन्तरं विकारशब्दादिति बाधकमुद्धर्तव्यम् । तथाच साधारणासाधारणहेतुद्वयमध्ये बाधकोद्धरण-मयुक्तमित्याशङ्क्य निषेधति ॥ न चैवमिति ॥

ननु तद्योगशासनरूपहेतोर्मांत्रवर्णिकगानानंतरमेव निवेशो युक्तः । साधारणहेतु-त्वादित्यत आह ॥ अस्मिन्निति ॥ ननु नेतरोनुपपत्तेरित्यनेनैव भेदव्यपदेशस्यापि सिद्धेर्भेद-व्यपदेशस्य वैयर्थ्यमित्यतस्तत्परिहरति ॥ यद्यपीति ॥ नन्विदमयुक्तम् । पूर्वपक्षिणा जीवब्रह्मभेदस्यैवाङ्गीकृतत्वेनाभेदप्राप्तेरेवाभावेन तन्निरासायोगात् । अन्यथा जीव एवानन्द-मयो न ब्रह्मेति पूर्वपक्षो न क्रियेतेत्यत आह ॥ जीव एवेति ॥ जीवब्रह्मभेदं त्यक्त्वेति ॥

भेदेनैवात्र पूर्वपक्षोत्थानान्नात्र पत्यादिशब्देभ्य इत्यादाविव प्रथमत एवाभेदः पूर्वपक्षिणोऽभिप्रेतः । ग्रन्थस्य वादकथात्वात्तत्वनिर्णयाभावे स्वोक्तत्यागमात्रेण न कथावसानमिति भावः । तथाहि । प्रायपाठपरित्यागस्य प्रथमोक्तत्वेपि ब्रह्मशब्दस्य साधकत्वात्तस्यादौ समर्थनमिति ज्ञेयम् । ननु तर्हि टीकायां जीवब्रह्माभेदनिरासकत्वेनाव्याख्यातत्वात्तद्विरोध इत्यत आह ॥ अत एवेति ॥ अन्यथाऽभेदस्याप्राप्तत्वेन तन्निरासो न स्यादित्यर्थः । ननु भाष्यानुव्याख्यानयोस्तदनुक्तेस्तद्विरुद्धमेतदित्यत आह ॥ भाष्ये चेति ॥ तथा चात्र तन्निराकरणाभावे पौनरुक्त्यसमाधानयोरनुपपत्तेरिति भावः ।

तात्पर्यचन्द्रिका

अन्येतु आनन्दमयतदवयवपुच्छयोर्द्वयोर्ब्रह्मत्वायोगादेकस्य ब्रह्मता वाच्या । तत्रानन्दमयस्य ब्रह्मत्वे विकारार्थमयटः प्रायपाठत्यागः प्राचुर्यस्यापि प्रतियोग्यल्पत्वापेक्षत्वाद् ब्रह्मणि च दुःखलेशस्याप्यभावान्मयटः स्वार्थत्यागः पुच्छवाक्यगतब्रह्मशब्दस्य च गौणार्थत्वं सैषानन्दस्य मीमांसेत्यादावभ्यस्यमानानन्दप्रातिपदिकेन मयडर्थो लक्ष्यते इति चत्वारो दोषाः । पुच्छस्य ब्रह्मत्वे त्ववयवप्रायपाठबाधमात्रम् । पुच्छपदमुख्यार्थत्यागस्त्वानन्दमयस्य ब्रह्मत्वपक्षेपि समः । लांगूले मुख्यस्य तस्यानन्दमयावयवेपि गौणत्वात् । तस्मान्मयट्प्रत्ययब्रह्मशब्दानन्दप्रातिपदिकरूपमुख्यत्रितयानुगुण्यात् पुच्छमेव ब्रह्मेति युक्तम् । पुच्छपदं तु प्रतिष्ठापदसन्निधानादाधारलक्षकम् । तदुक्तं भामत्यां -

प्रायपाठपरित्यागो मुख्यत्रितयलङ्घनम् ।
पूर्वस्मिन्नुत्तरे पक्षे प्रायपाठस्य बाधनम् ॥

इति । किञ्च प्रियाद्यवयवयोगेनानन्दमयः सविशेषः । ब्रह्मतु निर्विशेषम् । अपि चानन्दमयः प्रतिशरीरं प्रियादिभेदाद्भिन्नः । ब्रह्म त्वभिन्नम् । तस्मादानन्दमयो न ब्रह्म । किन्तु पञ्चापि कोशाः । न च सर्वांतरत्वादानन्दमयो ब्रह्म । पुच्छवाक्ये ततोप्यंतरस्य प्रतिष्ठापदेनोक्तेः । यातु भार्गवी वारुणी विद्या तस्यां मयटः प्रियशिरस्त्वादेश्चाश्रवणाद्युक्तमानन्दस्य ब्रह्मत्वमिति सिद्धान्तः । सूत्राणि तु "वेदसूत्रविरोधेतु गुणे त्वन्याय्यकल्पने" ति न्यायेनान्यथा व्याख्येयानीत्याहुः ।

प्रकाशिका — अयोगादिति ॥ विरोधादिति भावः । उदाहरिष्यमाणश्लोके प्रायपाठेति पादं व्याचष्टे ॥ तत्रेति ॥ अन्नमयादीनामंतरन्यान्यस्य श्रवणेन तेषामब्रह्मतया कोशत्वेन तत्रान्नादिविकारार्थत्वस्यावश्यकत्वात्तत्प्रायपाठपरित्याग इत्यर्थः । मुख्यत्रितयलङ्घनमित्येतद्विवृणोति ॥ प्राचुर्यस्येति ॥ यथा ब्राह्मणप्रचुरो ग्राम इत्यादौ विजातीयशूद्राल्पत्वं लभ्यते तथात्रापि दुःखाल्पत्वं लभ्यते व्युत्पत्तिबलात् । न च तदस्तीत्यर्थः ॥ ब्रह्मशब्दस्येति ॥ निर्विकारे ब्रह्मणि मुख्यस्याब्रह्मणि पुच्छे गौणार्थत्वमित्यर्थः ॥ लक्ष्यत इति ॥ आनन्दमयो ब्रह्म अभ्यासादित्युक्ते आनन्दमयशब्दस्यैवाभ्यासादिति लभ्यते । श्रुतौ च सैषानन्दस्येत्यादिनाऽऽनन्दस्यैवाभ्यासो नत्वानन्दमयस्येति । तेन मयडर्थो लक्ष्यत इत्यर्थः । उत्तरपक्षे प्रायपाठस्य बाधनमिति सिद्धान्तांशं विवृणोति ॥ पुच्छस्येति ॥ आनन्दमयस्य ब्रह्मत्वे दोषान्तरमाह ॥ किञ्चेति ॥ ''तस्य प्रियमेव शिरः मोदो दक्षिणः पक्ष'' इत्यादिनोच्यमानशिरःप्रभृत्यवयवयोगेनेत्यर्थः ॥ निर्विशेषमिति ॥ अवाङ्मनसगोचरत्वश्रुतेरिति भावः ॥ अभिन्नमिति ॥ अनन्तत्वश्रुतेरिति भावः ॥ सर्वेति ॥ अन्नमयादिचतुष्टयान्तरत्वादित्यर्थः ॥ प्रतिष्ठेति ॥ ब्रह्म पुच्छं प्रतिष्ठेति प्रतिष्ठापदेनानन्दमयाश्रयतयोक्तेरित्यर्थः । नन्वेवं भृगुवल्लीविरोध इत्यत आह ॥ यात्विति ॥ आनन्दस्येति ॥ ''आनन्दो ब्रह्मेति व्यजाना''दित्युक्तस्येत्यर्थः ॥ गुणेत्विति ॥ नवमे ''विप्रतिपत्तौ विकल्पः स्यादसमर्थत्वाद्गुणे त्वन्याय्यकल्पनैकदेशत्वा''दिति जैमिनिसूत्रोक्तन्यायेनेत्यर्थः ॥ अन्यथेति ॥ ब्रह्म पुच्छं प्रतिष्ठेत्यत्र किमानन्दमयावयवत्वेन ब्रह्म विवक्षितमुत स्वप्रधानत्वेनेति संशये पुच्छशब्दादवयवत्वेनेति प्राप्ते उच्यते । आनन्दमयोभ्यासात् । आनन्दमयवाक्यशेषे ब्रह्म पुच्छं प्रतिष्ठेत्यत्र स्वप्रधानमेव ब्रह्मोच्यते । कुतः ''असद्ब्रह्मेति वेद चे''दित्यादौ केवलब्रह्मण एवाभ्यस्यमानत्वात् । विकारशब्दात् पुच्छमित्यवयवशब्दान्न स्वप्रधानमिति चेन्न प्राचुर्यात् । अन्नमयाद्यवयवप्रायवचनात् । ''स इदं सर्वमसृजत । यदिदं किञ्चे''त्यानन्दमयसहितस्य सर्वस्यापि जगतो ब्रह्मण एव हेतुत्वव्यपदेशाच्च । इतराणि तु सूत्राणि पुच्छवाक्यनिर्दिष्टब्रह्मण एवोपपादकानीति तदीयभाष्यानुरोधेनेत्यर्थः ।

पाण्डुरङ्गि — नन्वानन्दमयस्य ब्रह्मत्वप्रतिपादनमयुक्तम् । तथात्वे प्रायपाठत्यागादिरूपदोषप्रसङ्गात् । न च मयटः प्राचुर्यार्थत्वान्न तत्त्याग इति वाच्यम् । पुच्छस्य ब्रह्मत्वे तत्प्राप्तिपरिहारक्लेशयोरभावात् तथाच तस्यैव ब्रह्मत्वमिति परे वर्णयन्ति तदूषयितुमनुवदति ॥ अन्ये त्विति ॥ द्वयोरिति ॥ अन्यथाऽवयवावयविभावो न स्यादिति भावः । नन्वस्तु

द्वयोर्मध्य आनन्दमयस्य ब्रह्मत्वमित्यत आह ॥ तत्रेति ॥ प्राचुर्यार्थत्वान्न प्रायपाठविरोध इत्यत आह ॥ प्राचुर्यस्येति ॥ तथाच प्राचुर्यार्थत्वांगीकारेऽपीषद्दुःखस्याप्यनङ्गीकारान्मयटः स्वार्थत्याग इत्यर्थः । ननु पुच्छस्य ब्रह्मत्वे पुच्छपदमुख्यार्थत्याग इत्यत आह ॥ पुच्छपदेति ॥ नन्वानन्दमयस्याब्रह्मत्वे सोऽकामयतेत्यादावानन्दमयस्य कामयितृत्वस्रष्टृत्वादि श्रुतमिति तस्यामुख्यत्वं को ह्येवान्यादित्यानन्दमयस्य पूर्णानन्दत्वप्रतिपादकत्वेन तस्याप्यमुख्यत्वं एतमानन्दमयमित्यस्याप्यमुख्यत्वमित्यनेकवाक्यानाममुख्यत्वं तुल्यमेवेत्यत आह ॥ किञ्चेति ॥ अन्यथा निष्कलमित्यादिश्रुतिव्याकोपः स्यादिति भावः । नन्वानन्दमयस्य सर्वान्तर्यामित्वश्रवणादन्तर्यामिणश्चान्यस्याभवात्तास्यैव ब्रह्मत्वमित्याशङ्क्य निषेधति ॥ न च सर्वेति ॥ ननु भृगुवल्या ब्रह्मपरत्वेन निर्णीतत्वात्तत्समाख्यानादानन्दमयस्यापि ब्रह्मत्वमित्यत आह या त्विति ॥ ननु तर्हि पुच्छमभ्यासादित्येव- माद्याकाराणि सूत्राणि स्युरित्यत आह ॥ सूत्राणि ॥ त्विति ॥

तात्पर्यचन्द्रिका

तन्न । यतः ।

एकत्रापि न मुख्यार्थलङ्घनं मामके मते ।
सर्वत्रापि च मुख्यार्थलङ्घनं तावके मते ॥ १ ॥

तथाहि । आनन्दमयपुच्छयोर्द्वयोरपि पूर्णत्वेन ब्रह्मशब्दस्तावन्मुख्यः । पूर्णत्वं हि ब्रह्मशब्दस्य मुख्यार्थः । यथा धर्मान्तरेष्वदृष्टमपि जातिसमवायादौ धर्मितोऽधिकदेशत्वं यथावा परिच्छिन्नेनाव्रियमाणसम्बन्धिनाऽऽवृतेष्वन्येष्वदृष्टमपि परिच्छिन्नाज्ञानावृते निरंशे चैतन्येऽपरिच्छिन्नत्वं यथा वाऽऽनन्दांतरेष्वदृष्टमपि ब्रह्मानन्दस्य पूर्णत्वादिकं तथान्यत्रादृष्टमप्यवयवस्य पूर्णत्वं विचित्रशक्तियुक्तब्रह्मावयवेऽस्तु । उक्तं च ''विश्वतश्चक्षुः पूर्णमदः पूर्णमिद''मित्यादिश्रुत्या ''सर्वतः पाणिपादं त''दित्यादिस्मृत्या चावयवस्य पूर्णत्वम् । तथा ''उद्धबर्हात्मनःकेशौ'' इत्यादिस्मृत्या केशस्य कृष्णस्य ''व्याप्तं त्वयैकेन दिशश्च सर्वा'' इति पूर्णतोक्ता । तदुक्तमनुव्याख्याने -

(तात्पर्यचन्द्रिका)

ब्रह्मताऽवयवेपि स्यात्तथाऽवयविनि स्वतः ।
यथैव कृष्णकेशस्य कृष्णस्य ब्रह्मताऽखिला ।
दर्शिता चैव पार्थाय निस्सीमाः शक्तयोऽस्यहि ।

इति । युक्तं चानवस्थापरिहाराय क्वचित्सम्बन्ध्यादेरेव सम्बन्धत्वादिवदस्मिन्नेव प्रकरणे ''आनन्दं ब्रह्मण'' इति श्रुतेरानन्दात्मकस्यैव ब्रह्मण आनन्दित्ववच्च विशेषबलाच्छक्तिव्यक्तिभावात् ''सशिरः सदक्षिणः पक्षः'' इत्यादिश्रुत्याऽवयविन एवावयवत्वम् । तदुक्तं न्यायविवरणे ''न चावयवत्वविरोधः । नेह नानास्ति किञ्चनेत्यादिश्रुतेरवयवाद्यभेदा''दिति ।

प्रकाशिका — यत इत्यस्य श्लोकेनान्वयः । तावक एवेति चोवधारणे । ''तवकममकावेकवचन'' इति निपातनात्तावके मामक इति साधु । त्वदीये मदीय इत्यर्थः । यत्तावदुक्तमानन्दमयस्य ब्रह्मत्वे पुच्छे ब्रह्मशब्दस्य गौणार्थत्वमिति तत्र द्वयोर्ब्रह्मत्वायोगादिति कोर्थः । किमवयविनः पूर्णत्वेऽवयवस्य पूर्णत्वायोग इत्युतावयवावयविनोर्भेदादवयविनः परमात्मत्वेऽवयवस्य तत्त्वायोग इति । आद्यं तावन्नेति भावेन मुख्यार्थत्वं साधयति ॥ आनन्दमयेति ॥ पूर्णत्वं हीति ॥ बृहबृहि वृद्धाविति धातोर्वृद्धिश्च पूर्णेत्याद्यसूत्र एवोक्तमिति भावः । असम्भावितमेतदित्यतः सम्भावनाहेतूननेकदृष्टान्तानाह ॥ यथेति ॥ धर्मान्तरेषु रूपरसादिषु । न्यायमते प्रसिद्धमेतन्निदर्शनम् । अद्वैतमतेन दृष्टान्तद्वयमाह ॥ यथावेति ॥ सम्बन्धिना पटादिनेत्यर्थः । अन्येषु घटादिषु । विचित्रशक्तियुक्तेति हेतुगर्भम् । अस्त्वेवं दृष्टान्तैः सम्भावना मानं तु किमित्यतः श्रुतिस्मृतीराह ॥ उक्तं चेति ॥ ''विश्वतश्चक्षुरुत विश्वतो मुखो विश्वतो बाहुरुत विश्वतस्पात् । पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते । सर्वतः पाणिपादं तत्सर्वतोक्षिशिरोमुख''मित्यादि श्रुतिस्मृतिभिरित्यर्थः । विश्वतः विश्वस्मिन् । सर्वतः सर्वत्रेत्यर्थः । अदः मूलरूपम् । इदमवतारजातम् । एतत् श्रुत्युक्त्याऽवयविनोपि पूर्णत्वमित्यपि ग्राह्यम् । यद्वा । अवतारस्य पूर्णत्वोक्त्या कृष्णाद्यवताररूपकेशाख्यावयवस्य पूर्णत्वप्राप्तेः पूर्णमिति श्रुत्याऽवयवस्य पूर्णत्वमुक्तम् । तत्पूर्णत्वे चावयविनः पूर्णत्वमविगीतमिति तन्नोक्तम् । यद्वा । अवयवावयविनोरभेदस्य वक्ष्यमाणत्वात्तेनैव तस्य पूर्णत्वं सेत्स्यतीति तदनुक्तिः ॥ स्मृत्येति ॥

उद्धबर्हात्मनः केशौ सितकृष्णौ महामुने ।
उवाच च सुरानेतौ मत्केशौ वसुधातले ।
अवतीर्य भुवो भारक्लेशहानिं करिष्यतः ।

इत्यादिविष्णुपुराणपञ्चमांशस्थस्मृत्या केशस्य केशावतारस्य । कृष्णस्य पूर्णता गीतायामुक्तेत्यर्थः ॥ स्वत इति ॥ अनायासेनेत्यर्थः । अखिला निरूपचरिता ॥ निस्सीमा इति ॥ ''सीमसीमे स्त्रियामुभे'' इति सीमन्शब्दपर्यायसीमाशब्दोत्तरपदोऽयं समासः । द्वितीयं प्रत्याह ॥ युक्तं चेति ॥ अवयविन एवावयवत्वमित्यन्वयः । क्वचित् समवायादौ । अन्यथा समवायस्य समवायान्तराङ्गीकारेऽनवस्थानादित्यर्थः ॥ आनन्दात्मकस्येति ॥ एकधैवानुद्रष्टव्यमित्येवकारस्य श्रुतेरिति भावः । ननूभयथाश्रुतेरानन्दादावुभयरूपतोपेयते अत्र तु किं मानमित्यत आह ॥ सशिर इति ॥ ''सशिरः सदक्षिणः पक्षः स उत्तरः स आत्मा सपुच्छ''मित्यादिभाष्योदाहृतश्रुत्येत्यर्थः । नन्ववयवावयविनोरभेदे कथं शिरआदिरवयवोऽयमवयवीत्यादिव्यवहारः । कथं वाऽवयविकार्यमवयवेन न जायत इत्यत आह ॥ शक्तिव्यक्तीति ॥ यदातु शिरःप्रभृतेरवयवत्वं व्यक्त्यात्मनाऽस्ति अवयवित्वं शक्त्यात्मना तदाऽवयवव्यवहारकार्ये न त्ववयविव्यवहारकार्ये भवतः । अत एव केशस्य प्रागवयवत्वं व्यक्त्यात्मना स्थितं कृष्णावतारत्वे तु शक्त्यात्मना । अवयवित्वं तु व्यक्त्यात्मनेत्युक्तौ को दोष इत्यर्थः । नन्वेतदेव कथम् । अभेदे भेदकार्याणामयोगादित्यत उक्तं विशेषेति ॥ यथा सोमाभावेपि सोमकार्यपूर्तीकैः क्रियते तथा भेदभावेपि भेदप्रतिनिधिना विशेषेण स्वरूपसामर्थ्यलक्षणेन भेदकार्यनिर्वाह इत्यर्थः । समर्थितश्च न्यायामृते विशेषपदार्थ इति भावः ॥ तदुक्तमिति ॥ एतेन भाष्यं न्यायविवरणं चैकार्थमेवेति दर्शितम् ॥ नेहनानेति ॥ किञ्चन गुणक्रियावयवादिकम् । नाना भिन्नम् । नास्तीत्यर्थः ।

पाण्डुरङ्गि — नन्वानंदमयस्य ब्रह्मत्वे दोषचतुष्टयस्योक्तत्वात् कथं तन्निराकरणमित्यत आह ॥ तथाहीति ॥ ननु किमानन्दमयस्यापि पूर्णत्वाभ्युपगमे पुनर्ब्रह्मशब्दस्यामुख्यार्थत्वमुतानन्दमयस्यापूर्णत्वे नाद्य इत्याह ॥ आनन्दमयेत्यादि ॥ ननु ब्रह्मत्वं नामाद्वितीयत्वम् । तत्र द्वयोरपि पूर्णत्वे कथं ब्रह्मशब्दस्य तयोर्मुख्यत्वमित्यत आह ॥ पूर्णत्वं हीति ॥ न द्वितीय इत्याह ॥ धर्मान्तरेष्विति ॥ रूपादावित्यर्थः ॥ धर्मितोऽधिकदेशत्वमिति ॥ धर्मितापर्याप्त्यधिकरणाधिकदेशत्वमित्यर्थः । तथा चैकस्मिन्घट-

(पाण्डुरङ्गि)

त्वबुद्धिवद्वित्वादिबुद्ध्यभावान्न तदविशेषः । ननु धर्म्यधिकदेशवृत्तित्वं नाम धर्मिरूपदेशादधिकदेशवृत्तित्वं धर्मिदेशादधिकदेशवृत्तित्वं वा । नाद्यः । यत्र स्वयं वर्तेत तस्यापि स्वधर्मित्वेन ततोधिकदेशत्वाभावात् । न च धर्म्यंतरादधिकदेशत्वम् । अन्योन्याभावस्य व्याप्यवृत्तित्वेन धर्मित्वावच्छिन्नप्रतियोगिताकान्योन्याभावाधिकरणत्वस्य स्वधर्म्यधिकरणत्वाभिमतेऽभावात् । न द्वितीयः । धर्मिण्येव विद्यमानस्य घटत्वादेः धर्मिदेशे कपालादावसत्त्वात् । धर्मिदेशे सत्त्वमविवक्षितत्वादधिकदेशवृत्तित्वमात्रविवक्षायां तद्धर्मिणि सतस्तद्देशे चासतो रूपादेरप्यविशेषेण धर्मान्तरेष्वदृष्टमपीत्युक्त्ययोगात् । तत्कथमेतदिति चेन्न । अन्योन्याभावस्याव्याप्यवृत्तित्वपक्षे घटत्वादेः स्वधर्मितापर्यास्यधिकरणातिरिक्तवृत्तित्वात्तदभिप्रायेणोक्तत्वात् । यद्वा सार्वदेशिकघटादौ विद्यमानस्य घटत्वादेरेकत्वादाकाशवन्मध्यस्थपदार्थेष्वपि वस्तुतः परेण सत्त्वाङ्गीकाराद्धर्मित्वाभिमतघटमात्रादन्यत्रापि सत्त्वं दृष्टमित्यर्थः । ननु जातेर्धर्मधर्मिभावप्रयोजकसम्बन्धेन धर्मित्वाभिमतेष्वेव सत्त्वादन्यत्र स्वरूपेण सत्त्वेपि न धर्मितोऽधिकदेशवृत्तित्वमित्यत उक्तं समवायादाविति ॥ जातिवत्समवायस्य समवायरूपवृत्त्यन्तराभावात्सर्वत्र स्वरूपेणैव सत्त्वमिति भावः । जातिसमवाययोश्च परेणौपाधिकभेदस्याप्यनङ्गीकाराद्घटाकाशादिवदन्यत्र सत्त्वं नास्तीति परिहारार्थमिति ज्ञेयम् । ननु चैतन्नैयायिका वदन्ति नतु वेदान्तिनः तत्कथं दृष्टान्ताभिधानमिति पूर्वत्रारुच्या दृष्टान्तान्तरमाह ॥ यथा वेति ॥ ननु ब्रह्मणः सांशत्वमपि मायावाद्येकदेशिभिरभ्युपगतमेवेत्ययमपि विप्रतिपन्नो दृष्टान्त इत्यत आह ॥ यथा वेति ॥ कृष्णस्यावयवत्वमनङ्गीकुर्वाणं प्रति प्रामाणमुखेन तदाह ॥ उद्बर्हेति ॥ अस्तुतस्यावयवत्वं तस्य पूर्णत्वं कुत इत्यतोऽवयवस्य पूर्णत्वे प्रमाणमाह ॥ व्याप्तमित्यादि ॥ नन्वेतावता पूर्णद्वयमुक्तं भवेत् । तच्चायुक्तम् । तथात्वेऽवयवावयविभावानुपपत्तेरित्यत आह ॥ युक्तं चेत्यादि ॥

तात्पर्यचन्द्रिका

अन्नमयादावपि प्राचुर्यार्थत्वस्य भाष्य एवोक्तत्वान्न प्रायपाठत्यागः । प्राचुर्यस्य प्रतियोग्यल्पत्वापेक्षत्वेऽपि न प्रतियोगिनः सामानाधिकरण्यनियमः । यतः प्राचुर्यस्य -

विजातीयसमानाधिकरणाल्पं यथा तथा ।
सजातीयविभिन्नाधिकरणाल्पं निरूपकम् ॥

दृश्यते हि ब्राह्मणप्रचुरो ग्राम इत्यादौ समानाधिकरणस्य विजातीयशूद्रादेरल्पत्वेनेव प्रचुरप्रकाशः सवितेत्यादौ व्यधिकरणस्य सजातीयस्य नक्षत्रादिप्रकाशस्याल्पत्वेनापि प्राचुर्यं प्रकृते च ''सैषानंदस्ये''त्यादिश्रुत्यैव व्यधिकरणस्य सजातीयस्य जीवानन्दस्याल्पत्वमुक्त्वा ब्रह्मानन्दस्य ''यतो वाच'' इति महत्त्वमुक्तम् । यत्तु प्राचुर्यस्य विशेषणत्वे प्रतियोगिन ईषदनुवृत्तिप्रतीतिनियमाभावेऽपि विशेष्यत्वे तन्नियमः । ब्राह्मणप्रचुरो ग्राम इत्यादौ दर्शनात् । आनन्दमय इत्यत्र च प्राचुर्यं विशेष्यमिति कल्पतरूक्तम् । तन्न । प्रकाशप्रचुरः सवितेत्युक्तेपि तस्मिन्नंधकारलेशाप्रतीतेः । ''अन्तःशरीरे ज्योतिर्मयो हि शुभ्रोऽयं पश्यन्ति यतयः क्षीणदोषाः । य एषोंतर्हृदय आकाशस्तस्मिन्नयं पुरुषो मनोमयः । प्रज्ञानघन एवानन्दमयः'' इत्यादौ त्वन्मतेपि ब्रह्मण्यपि विज्ञानमयादिशब्दप्रयोगाच्च । न चात्रप्राचुर्यार्थत्वसम्भवे वैयर्थ्यापादकं स्वार्थिकत्वं युक्तम् । ब्राह्मणप्रचुर इत्यादावपि प्रचुरशब्दो महत्त्वमात्रमाह । विरोधिप्रतीतिस्तु मानांतरात् । सैषानन्दस्येत्यादावानन्दपदं न प्राचुर्यलक्षकम् । किं त्वानन्दमात्रपरम् । अन्यथा ''ते ये शत''मिति तारतम्योक्त्ययोगात् । ''आनन्दं ब्रह्मण'' इत्यत्र त्वबाङ्गनसगोचरत्वेनानन्दस्य प्राचुर्यसिद्धिः । ''यदेष'' इत्यत्रापि सुखरागस्य दुःखद्वेषस्य दुःखोद्रेकस्य च प्रवृत्तिहेतोर्भगवत्यसम्भवेन सृष्ट्यादिप्रवृत्त्यन्यथानुपपत्त्यानन्दोद्रेके सिद्धे महाप्रवृत्त्या महानन्दोद्रेकसिद्धिः । न त्वानन्दशब्दस्य प्राचुर्यलक्षकत्वेन । न चास्माकं भास्करादीनामिव ''सैषानन्दस्ये''त्यादावानन्दपदाभ्यासो हेतुः । येनानन्दमात्रस्य जीवेऽपि सम्भवात्तदभ्यासस्य ब्रह्मत्वासाधकतया प्राचुर्यलक्षणा स्यात् । किंतु ब्रह्मपदस्य ।

प्रकाशिका — एवं ब्रह्मशब्दस्यानन्दमये पुच्छे च मुख्यत्वं समर्थ्येदानीं प्रायपाठत्यागदोषो नास्तीत्याह ॥ अन्नमयादावपीति ॥ ''अन्नादीनां च प्राचुर्यमेवे''त्यादि भाष्य इत्यर्थः । यदपि मयटःप्राचुर्यार्थत्वेपि प्रतियोगिदुःखलेशाभावात्स्वार्थत्याग इति तदपि नेत्याह ॥ प्राचुर्यस्येति ॥ यतः प्राचुर्यस्येत्यस्य श्लोकेनान्वयः । यथा निरूपकमित्यन्वेति । श्लोकोक्तदृष्टान्तदार्ष्टान्तिकौ विवृणोति ॥ दृश्यते हीति ॥ व्यधिकरणस्य भिन्नाधिकरणस्य ॥ प्रकाशस्याल्पत्वेनापीति ॥ अन्यथांधकारलेशोपि सवितरि स्यादित्यर्थः ॥ अल्पत्वमिति

(प्रकाशिका)

॥ शतगुणितत्वादिना परिमितत्वमुक्त्वेत्यर्थः ॥ यतो वाच इति ॥ ''यतो वाचो निवर्तन्ते अप्राप्य मनसा सह आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चने''त्युक्तावाङ्मनसगोचरत्वस्य प्रागपरिच्छिन्नार्थत्वोक्तेरिति भावः । तथाच जीवगतसुखाल्पत्वापेक्षयाऽऽनन्दप्रचुरं ब्रह्मेति वक्तुं शक्यमिति न मयटो मुख्यार्थत्याग इति भावः । एतेन ''प्राचुर्यार्थाश्च मयट'' इत्यादेर्व्याख्यावसरे ''पदार्थान्तरगताल्पतद्धर्मापेक्षयोपपत्ते'' रिति सुधास्थं वाक्यं विवृतं भवति । उक्तस्यान्यथासिद्धत्वं केनचिदुक्तमनूद्य निराह ॥ यत्त्विति ॥ तन्नेति ॥ ''आनन्दप्रचुर इति यथास्थिताभिधाने ब्राह्मणप्रचुरो ग्राम इतिवदनानन्दस्यापि प्राप्तेः प्रचुरानन्द इति विपरीतसमासः कृतः । प्रचुरानन्द इत्यभिधाने पूर्णानन्द इत्येव प्रतीते''रिति टीकोक्तिं त्वक्षरार्थोक्तिप्रस्तावे विवरिष्याम इति भावः । एतच्च सुधायां विरुद्धार्थ-प्राप्तेरशाब्दत्वात्प्रचुरशब्दो हि तस्य तस्मिन्महत्वमात्रमाह ॥ विरुद्धसद्भावस्तु प्रमाणान्तर-गम्यः । अन्यथा अन्नप्रचुरो मखः प्रकाशप्रचुरः सवितेत्युक्ते मखे सवितरि च दुर्भिक्षान्धकारलेशप्रसङ्गादिति स्पष्टमेव प्रतिपादितमिति भावः । व्यभिचारस्य लोकसिद्धं स्थानमुक्त्वा पराङ्गीकृतस्थानान्तरमाह ॥ अन्तरिति ॥ अन्तःशरीर इत्याथर्वणे य एष इति तैत्तिरीये प्रज्ञानेति माण्डूके च प्रयोगादित्यर्थः । ननु ज्योतिर्मय इत्यादौ मयटस्तादात्म्यार्थ-त्वमुपेयत इत्यत आह ॥ न चेति ॥ सम्भव इति ॥ उक्तदिशा व्यधिकरणप्रतियोग्यत्वापेक्षयेति भावः । कथं तर्हि क्वचिद्विजातीयधीरित्यत आह ॥ ब्राह्मणेति ॥ यदप्युक्तमानन्दप्रातिपदिके मयडर्थो लक्ष्यत इति तत्र सैषानन्दस्येति वाक्यस्थेवाऽऽनन्दपदे आनन्दं ब्रह्मणो विद्वानित्यत्र वा यदेष आकाश आनन्द इत्यत्र वेति विकल्पान् क्रमेण निराह ॥ सैषेत्यादिना ॥ यदेष इति ॥ अयमर्थः । चतुर्विधा हि चेतनप्रवृत्तिः । सुखोद्रेकाद्यथा मत्तस्य नृत्तगानादौ । दुःखोद्रेकाद्यथा रोदनादौ । सुखरागात्तत्प्राप्त्यर्था यथा भोजनादौ । दुःखद्वेषात्तन्निवृत्त्यर्था यथा कण्टकोद्धारादौ प्रवृत्तिः। रागद्वेषदुःखरहिते भगवति सुखरागादेरयोगेन हेत्वन्तरशून्या प्रवृत्तिः सुखोद्रेकलक्षणमेव हेतुं कल्पयति । ततश्च कार्यानुगुणत्वाच्च कारणस्य कृत्स्नजगत्सृष्ट्यादिरूपमहाप्रवृत्त्या महानन्दोद्रेकसिद्धिरिति ॥ तदुक्तमनुव्याख्याने ''प्रवृत्तिश्च नृत्तगानादिका सुखा''दित्यादि । उक्तं च तैत्तिरीयभाष्ये ''अल्पात्सुखादल्पकर्मा पूर्णानन्दाद्धि सर्वकृ''दित्यादि । नन्वेवमभ्यासादित्यस्यानन्दशब्दाभ्यासादित्यर्थोक्तौ जीवे व्यभिचारापत्त्याऽऽनन्दशब्देन मयडर्थं लक्षयित्वाऽऽनन्दमयशब्दाभ्यासादिति वक्तव्यमित्यत आह ॥ नचेति ॥ ब्रह्मपदस्येति ॥ तस्य च व्यभिचारो नेत्युक्तमिति भावः ।

पाण्डुरङ्गि — आनन्दमयस्य ब्रह्मत्वे विकारार्थकमयटः प्रायपाठत्यागःस्यादित्युक्तं परिहरति ॥ अन्नमयादावपीति ॥ प्राचुर्यस्येत्यादि ॥ यस्य प्राचुर्यमुच्यते तत्प्रतियोगिनोल्पत्वमेवापेक्षितमिति भावः । ननु प्राचुर्यस्य विशेषणत्वे प्रतियोगिन ईषदनुवृत्तिप्रतीतिनियमाभावेपि प्राचुर्यस्य विशेष्यत्वे प्रतियोगिन ईषदनुवृत्तिप्रतीतिनियम आवश्यक एव । अन्यथा ब्राह्मणप्रचुरो ग्राम इत्यादौ प्रतियोगिभूतशूद्रादेरीषदनुवृत्तिर्न स्यादित्यत आह ॥ ब्राह्मणप्रचुर इत्यादि ॥ नन्वेवं प्राचुर्यस्य ब्राह्मणप्रचुरो ग्राम इत्यादौ समानाधिकरणस्य विजातीयशूद्रादेरल्पत्वेन प्रचुरप्रकाशः सवितेत्यत्र व्यधिकरणस्य सजातीयनक्षत्रादिप्रकाशस्याल्पत्वेन दृष्टत्वात् प्रकृतेपि सजातीयव्यधिकरणाल्पत्वेनैव प्राचुर्ये नियमाभावाद्विजातीयसमानाधिकरणाल्पत्वेनैतन्निरूपणे प्रतियोगिनोल्पत्वं ब्रह्मणि स्यादत उक्तार्थे नियामकमाह ॥ प्रकृते चेति ॥ अन्यथा प्रकरणबाधादिति भावः । नन्वेवं प्राचुर्यस्य विशेष्यत्वे विजातीयसमानाधिकरणाल्पत्वनियमोऽवश्यं वाच्यम् । अन्यथा ब्राह्मणप्रचुरो ग्राम इत्यत्रापि तन्न स्यादित्यत इष्टापत्त्या समाधत्ते ॥ ब्राह्मणप्रचुर इत्यादाविति ॥

न चैवमानन्दमय इत्यत्रापि महत्त्वमात्रलाभः स्यात्सजातीयस्य जीवानन्दस्याल्पत्वलाभो न स्यादिति वाच्यम् । तत्रापि मानान्तरेणैतल्लाभात् । अत एव ब्राह्मणप्रचुर इत्यत्रापि विरोधिप्रतीतिर्मानान्तरादेवेत्येव विभावयिष्यते विरोधिप्रतीतिस्त्वित्यादिना । अत एव प्रकृते सैषानन्दस्येत्यादिना प्रकरणसहकारेणार्थविशेषलाभः प्रागुक्तः । आनन्दमयस्य ब्रह्मत्वे आनन्दपदं मयडर्थलक्षकमिति वक्तव्यमित्युक्तम् । तत्र किं सैषानन्दस्येत्यस्मिन्वाक्य आनन्दशब्दस्यानन्दमयलक्षकत्वमुच्यते आनन्दं ब्रह्मण इत्यत्र वा यदेष आकाश आनन्दो न स्यादित्यत्र वा । नाद्य इत्याह ॥ सैषेति ॥ न द्वितीय इत्याह ॥ आनन्दं ब्रह्मण इत्यत्रेति ॥ न तृतीय इत्याह ॥ यदिति ॥ सृष्ट्यादिप्रवृत्त्यन्यथानुपपत्त्यानन्दोद्रेकसिद्धेरित्यन्वयः । ननु सृष्ट्यादिप्रवृत्तिः प्रकारान्तरेणापि भविष्यतीति न तदन्यथानुपपत्त्याऽऽनन्दोद्रेकसिद्धिरिति चेत्तत्र वक्तव्यम् । सा किं सुखरागाद्वा दुःखोद्रेकाद्वा दुःखद्वेषाद्वा । पक्षत्रयमप्यनुपपन्नमित्याह ॥ सुखरागस्येति ॥ मास्तु वाऽऽनन्दप्राचुर्यसिद्धिः । न च तथात्वेऽल्पानन्दस्य जीवेपि सत्त्वात्कथं व्यभिचारिणाऽऽनन्दपदाभ्यासेनानन्दमयस्य ब्रह्मत्वसिद्धिरिति वाच्यम् । आनन्दमयस्य ब्रह्मत्वे ब्रह्मपदाभ्यासस्यैव हेतुत्वेनानानन्दपदाभ्यासस्य हेतुत्वादित्याह ॥ न चास्माकमिति ॥ ब्रह्मपदस्येति ॥ अभ्यास एव हेतुरिति शेषः ।

तात्पर्यचन्द्रिका

सविशेषत्वं तु ब्रह्मत्वसाधकम् । न च ''यतो वाचो निवर्तन्त'' इति श्रुतिर्निर्विशेषत्वमाह ॥ किंत्ववाङ्मनसगोचरानन्तविशेषवत्त्वम् । प्रियादिके च यः प्रतिशरीरं भिन्नो नासौ भगवतोवयवः । यश्चावयवो न स भिन्नः । विस्तृतं चैतत्तैत्तिरीयकभाष्ये भगवत्पादैः । किञ्च ''सोकामयते''त्यत्र पुँलिङ्गेन सन्निहितपरामर्शिना तच्छब्देन नपुंसकब्रह्मपुच्छशब्दनिर्दिष्टस्य ''तस्माद्वा एतस्मादात्मन'' इति व्यवहितात्मशब्दनिर्दिष्टस्य च परामर्शायोगेन सन्निहितस्यानन्दमयस्यैव परामर्ष्टव्यत्वात् ''सोकामयते''त्यस्य च कारणवाक्यस्य त्वयापि ब्रह्मपरत्वेनाङ्गीकृतत्वात्कथमानन्दमयस्याब्रह्मता । अपि चानुवाकान्त उदाहृतो ''यतो वाच'' इति श्लोक एव मनोमयेपि श्रुत्योदाहृतः । तस्य च ''आनन्दं ब्रह्मण'' इति ब्रह्मश्रुत्या ''यतो वाचो निवर्तन्ते न बिभेति कुतश्चने''ति लिङ्गाच्च ब्रह्मविषयत्वं त्वयापि स्वीकृतमिति कथं मनोमयस्याब्रह्मता ।

न च यथा परमते ''असन्नेवे''ति श्लोक आनन्दमयपुच्छविषयस्तथाऽयमपि मनोमयपुच्छविषय इति वाच्यम् ॥ ''अथर्वाङ्गीरसः पुच्छं प्रतिष्ठे''त्युक्तमनोमयपुच्छस्य ब्रह्मत्वानङ्गीकारात् । किञ्चान्नमयादीनामब्रह्मत्वे ब्रह्मजिज्ञासोस्तदुपदेशायोगः । द्वारमपि द्वारत्वेनैवोपदेष्टव्यं नत्वात्मतया । लोके हि चन्द्रारुन्धत्यादौ शाखा स्थूलतारादिकं द्वारत्वेनैवोपदिश्यते । न चान्नं ब्रह्मेत्यनुक्त्वानन्दो ब्रह्मेति वक्तुमशक्यम् । येन द्वारत्वं स्यात् । न च ''सत्यं ज्ञान''मिति स्वरूपलक्षणेन ब्रह्मोपदिश्य पुनस्तस्य देहादिरूपताभ्रान्तिमुत्पाद्य पुनरपि पुच्छवाक्येन तदुपदेशोर्थवान् । न च द्वारोपदेशश्चित्तस्य प्रत्यक्प्रावण्यार्थः । कोशानां पराक्त्वात् । परागुपदेशेन च प्रत्यक्प्रावण्येतिप्रसङ्गात् । प्रत्यक्त्वेनारोपस्याप्यानन्दमये उत्तरानुवाकोक्तान्नादौ चाभावात् । तत्रत्यानामन्नादीनामन्नमयादित्वे च तत्रत्यस्त्वया ब्रह्मत्वेन स्वीकृत आनन्दोप्यानन्दमयः स्यात् । स्थानप्रमाणात् ।

प्रकाशिका — एवं प्रायपाठेत्यादिनोक्तं दोषचतुष्टयमुद्धृत्य यदपि किञ्चेत्यादिनोक्तं तदप्ययुक्तमित्याह ॥ सविशेषत्वं त्विति ॥ किंत्ववाङ्मनसेति ॥ तथैवोक्तत्वात्प्रागिति भावः। यदप्यपिचेत्यादिनोक्तं तदपि नेत्याह ॥ प्रियादिके चेति ॥ विस्तृतमिति ॥

शिरःप्रिये स्थितं तस्य परेयं प्रियनामकम् ।
मोदप्रमोदयोर्बाहू मोदनाच्च प्रमोदनात् ।
मोदप्रमोदनामानावानन्दस्त्वाततत्वतः ।
मध्यमानासंस्थं च ब्रह्मसृष्ट्या तुबृंहयत् ।
पुच्छं प्रधानवायौ च ब्रह्माख्ये संस्थितं सदा

इत्यादिना प्रमाणेन विस्तृतमित्यर्थः । एवमानन्दमयस्य ब्रह्मत्वे परोक्तबाधकानि व्युदस्य ब्रह्मत्वे साधकान्यब्रह्मत्वे बाधकानि चाह ॥ किञ्चेत्यादिना ॥ अयमर्थः । आनन्दमयप्रकरणं समाप्य ''अथातोनुप्रश्ना'' इति कृतप्रश्नस्य परिहारं विवक्षुणा ''सोकामयत बहुस्यां प्रजायेये''त्यादिना तच्छब्देन पूर्वसन्निहितानन्दमयं परामृश्य तस्य जगद्धेतुत्वमुच्यते । तस्य च ब्रह्मलक्षणत्वेन जन्माधिकरणेऽभिधानात्त्वया ''तद्धेतुव्यपदेशा''दिति सूत्रे ब्रह्मपरत्वे-नाङ्गीकृतत्वाच्च कथमानन्दमयस्याब्रह्मता । किन्तु ब्रह्मतैव स्यात् । न च ''ब्रह्मपुच्छं प्रतिष्ठेति सन्निहितपुच्छस्य स इति परामर्श इति वाच्यम् । स इत्यस्य पुँल्लिङ्गत्वात् । पुच्छपदनिर्दिष्टस्य नपुंसकनिर्दिष्टत्वात् । न च प्रधानप्रातिपदिकस्वारस्याय गुणभूतलिङ्गबाधेन सन्निहितपुच्छपरत्वम् । आनन्दमयस्यापि सन्निहितत्वेन तत्परामर्शे उभयस्वारस्यात् । न चैवं लिङ्गानुरोधेन ''तस्माद्वा एतस्मादात्मन आकाशः सम्भूत'' इति भूतकारणत्वेन निर्दिष्ट आत्मा परामृश्यतामिति वाच्यम् । तच्छब्दस्य सन्निहितगामित्वेनात्मनश्च व्यवहितत्वेन प्रातिपदिकास्वारस्यस्यान्याय्यत्वादिति । तदुक्तं तैत्तिरीयभाष्ये ''स त्वकामयत् ।

सृष्ट्वा जगदिदं सर्वं नियामकतयास्य तु ।
बहुरूपो भवानीति स्याज्जगच्चेत्यचिंतय''दिति ।

मनोमयस्य ब्रह्मत्वे साधकमाह ॥ अपि चेति ॥ श्लोक एवेति ॥ अनुवाकान्ते ''न बिभेति कुतश्चने''ति मनोमये तु ''न बिभेति कदाचने''त्येतावता नान्यत्वमिति भावः । श्रुत्या उपनिषदा । तस्य चानुवाकान्त उदाहृतस्यावाङ्मनसगोचरत्वाभयहेतुत्वलिङ्गाच्चेत्यर्थः । अयमपि यतो वाच इति श्लोकोपि ॥ अनङ्गीकारादिति ॥ तत्र ब्रह्मपदाश्रवणादिति भावः । इदानीं पञ्चानां ब्रह्मत्वानङ्गीकारे बाधकान्याह ॥ किञ्चेति ॥ ब्रह्मविदाप्नोति परमिति चतुर्मुखेनोक्ते किं ब्रह्मेति ब्रह्मजिज्ञासोर्वरुणस्य प्रश्ने तत्परिहारायोत्तरग्रन्थस्य प्रवृत्तत्वादिति भावः । ननु ब्रह्मपुच्छमित्युक्तब्रह्मज्ञानार्थमब्रह्मणामप्यन्नमयादिकोशानां द्वारत्वेनोपदेशोस्तु ।

(प्रकाशिका)

बहिर्वृत्तिनिवारणद्वारा ब्रह्मज्ञानोपायत्वात् । यथा द्वितीयाचन्द्रप्रश्ने अचन्द्ररूपापि शाखा-चन्द्रज्ञानार्थतया चन्द्रत्वेन यथा वाऽरुन्धतीप्रश्ने तत्समीपवर्तिनी पृथुलतारकारुन्धती-ज्ञानार्थतयाऽरुंधतीत्वेनोच्यते तद्वदिति ॥ दृष्टान्तासंमत्या दूषयति ॥ द्वारमपीति ॥ किञ्च शाखादिकमप्रदर्श्य चन्द्रादिकं न प्रदर्शयितुं शक्यत इति तत्र तस्यास्तु द्वारत्वम् । नैवं प्रकृते शब्दस्थल इत्याह ॥ न चेति ॥ यदपि ब्रह्मज्ञानार्थं द्वारोपदेश इति तदपि नेत्याह ॥ न च सत्यमिति ॥ यद्वा पूर्वपूर्ववर्णानुक्तावन्तिमवर्णोक्तिरिवान्नमयादेरवचने ब्रह्म वक्तुमशक्यमिति तदुपदेश उत प्रयोजनवशात् । आद्य आह ॥ न चान्नमिति ॥ अंत्य आह ॥ न च सत्यमिति ॥ अनुवाकद्वयेऽन्नान्नमयादेरब्रह्मत्वमुपेत्यानन्दपुच्छयोरेव ब्रह्मत्वोररीकारादुभयत्र द्वारताया निरसनीयत्वात् । अन्नमयादीनामिति अन्नं ब्रह्मेति च व्यामिश्रोक्तिः प्रागदृष्ट-चन्द्रादिप्रदर्शनाय शाखादिप्रदर्शनेपि प्रागुपदेशेन ज्ञातब्रह्मज्ञाने द्वारोक्तिर्निष्फला विपरीतफला चेत्युक्तं भवति ।

ननु सत्यं कोशाः परांच इति । तथापि तेषां प्रत्यग्ब्रह्मत्वेन ज्ञातानां ब्रह्मज्ञानद्वारत्वं सेत्स्यति । को दोष इत्यत आह ॥ प्रत्यक्त्वेनेति ॥ आनन्दमयं प्रत्युदाहृतश्लोकस्य त्वया पुच्छपरतयोक्तत्वेन तत्र ब्रह्मत्वाश्रवणात् । तथा ''अन्नं प्राणं चक्षुः श्रोत्रं मनोवाच''मित्यत्र ब्रह्मपदाश्रवणादिति भावः । नन्वन्नमयादौ ब्रह्मत्वस्य श्रवणमेवान्नादौ श्रवणम् । द्वयोरभेदादित्यत आह ॥ तत्रत्यानामुत्तरानुवाकस्थानामिति ॥ स्थानप्रमाणादिति ॥ मीमांसकरीत्यैतत् । तन्मते हि तुल्यप्रदेशत्वं स्थानम् । तद्विविधम् । पाठसादेश्य-मनुष्ठानसादेश्यं चेति ॥ आद्यमपि द्वेधा । यथासंख्याम्नानं सन्निध्याम्नानं चेति । तत्र यथासंख्याम्नानरूपं स्थानं तु तृतीये ''क्रमश्च देशसामान्या''दिति तृतीयपादीयपञ्च-माधिकरणे आग्नेयाग्नीषोमीयानुमन्त्रणमन्त्रयोः ''अग्नेरहं देवयज्ययान्नादो भूयासम् । अग्नीषोमीययोरहं देवयज्यया वृत्रहा भूयास''मित्यनयोर्मध्ये पठितस्य दब्धिरस्य दब्धो भूयासमिति मन्त्रस्याग्नेयाग्नीषोमीययागयोर्मध्येऽनुष्ठेये उपांशुयागे विनियोगे प्रमाणमिति दर्शितम् । तथाच तत्रेवात्राप्यन्नप्राणमनोविज्ञानानन्दानामन्नमयादीनां च पञ्चत्वेन यथासंख्य-मानंदमयस्थान आनन्दस्य पतितत्वेन तयोरैक्यापत्त्याऽऽनन्दमयवदानन्दोप्यब्रह्म स्यादित्यर्थः ।

पाण्डुरङ्गि — ननु तथाप्यानन्दमयस्य ब्रह्मत्वं नोपपद्यते । प्रियाद्यवयवयोगेन तस्य सविशेषत्वेन ब्रह्मणश्च निर्विशेषत्वेन तयोरैक्यायोगादित्यत आह ॥ सविशेषत्वं त्विति ॥

सविशेषत्वं पूर्णत्वरूपब्रह्मत्वानुकूलमेव । न तु प्रतिकूलम् । ब्रह्मत्वप्रतिबन्धकीभूत-निर्विशेषत्वविरहरूपत्वादित्यर्थः । न चैवं यतो वाच इत्यादिश्रुतिविरोध इत्याशङ्क्य निराकरोति ॥ न चेति ॥ यच्चोक्तमानन्दमयः प्रतिशरीरं प्रियादिभेदाद्भिन्नो ब्रह्म त्वभिन्नमिति कथं तयोरैक्यमिति तत्राह ॥ प्रियादिके चेति ॥ विषयोत्थसुखादेः प्रतिशरीरं भेदेपि तस्य ब्रह्मत्वानङ्गीकारात् । तन्नियामकावयवविशेषस्यैव च भगवदवयवत्वेपि तस्यै-कत्वेन प्रतिशरीरं भेदाभावान्नोक्तदोष इत्यर्थः । किं चानन्दमयस्याब्रह्मत्वे आनन्दमय-विषयतयोदाहृते श्लोके सोकामयतेत्येतद्वाक्ये तच्छब्देन कस्य परामर्शः । ब्रह्मपुच्छमिति वाक्योक्तपुच्छस्य वा तस्माद्वा एतस्मादात्मन आकाश इति वाक्योक्तात्मनो वा । नाद्यः । पुँल्लिङ्गेन तच्छब्देन नपुंसकेन प्रकृतस्य ब्रह्मपुच्छस्य परामर्शायोगात् । नांत्यः । तच्छब्दस्य सन्निहितपरामर्शकत्वेन तस्माद्वेति व्यवहितात्मशब्दनिर्दिष्टस्यापि परामर्शा-योगादित्याह ॥ किञ्चेति ॥

नन्वस्त्वानन्दमयस्य ब्रह्मत्वं बाधकाभावात्साधकसद्भावाच्च । न मनोमयस्य तत्साधका-भावादित्यत आह ॥ अपि चेति ॥ ननु मन्मते असन्नेवेति श्लोकस्यानन्दमयपुच्छ-विषयत्ववद्यतो वाच इति श्लोकस्यापि मनोमयपुच्छविषयत्वान्न तेन मनोमयस्य ब्रह्मत्वसमर्थनमित्याशङ्क्य निषेधति ॥ न चेति ॥ ननु मनोमयं प्रत्युदाहृतश्लोके ब्रह्मशब्दस्य वाचं ब्रह्मेत्यादिवदुपचरितार्थत्वाल्लिङ्गस्य यत्किञ्चिद्भयाभावपरत्वान्न ताभ्यां ब्रह्मपरत्व-सिद्धिरित्यरुचेराह ॥ किञ्चेति ॥ नन्वन्नमयादेरब्रह्मत्वेपि ब्रह्मजिज्ञासुं प्रति द्वारतया तदुपदेशो युक्त इत्यत आह ॥ द्वारमपीति ॥ तथाच ब्रह्मत्वेन तदुपदेशोसङ्गत इति भावः । ननु चन्द्रारुंधत्यादिप्रदर्शनार्थं शाखास्थूलतारकादेश्चन्द्रादित्वेनोपदेशवत्प्रकृतेप्यन्नमयादे-रात्मत्वेनोपदेशः सङ्गत इत्यतो दृष्टान्त एवासम्प्रतिपन्न इत्याह ॥ लोके हीति ॥ ननु द्वारस्य द्वारतयैवोपदेष्टव्यत्वेपि प्रकृते आनन्दमयादेरब्रह्मत्वेनोपदेशे आनन्दरूपब्रह्मबोधक-स्यैवासम्भवेन ब्रह्मतयोपदेशः सङ्गत एवेत्यत आह ॥ न चान्नं ब्रह्मेत्यनुक्त्वेति ॥ न च नापीत्यर्थः । एवमुत्तरत्रापि व्याख्येयम् । एवमन्नमयादेर्द्वारत्वमङ्गीकृत्य द्वारमपि द्वारत्वेनै-वोपदेष्टव्यमित्युक्तम् । न तु ब्रह्मत्वेन । वस्तुतस्तु न तस्य द्वारत्वमप्युपपद्यते । तच्च ब्रह्मस्वरूपबोधं प्रति वा सत्यज्ञानत्वादिस्वरूपलक्षणज्ञानं प्रति वा । नाद्यः । सत्यं ज्ञानमिति स्वरूपलक्षणेनैव ब्रह्मज्ञानस्य सिद्धत्वेनान्नमयाद्युपदेशस्य तदर्थत्वानुपपत्तेः । नांत्यः । स्वरूपलक्षणज्ञानोपयोगित्वे तदुक्तेः प्रागेवान्नमयाद्युपदेशापत्त्या स्वरूपलक्षणेन

(पाण्डुरङ्ग)

ब्रह्मोपदेशानंतरं तदुक्तेरसंगतत्वापातात् । अन्यथा प्रकृष्टप्रकाशश्चन्द्र इति स्वरूपलक्षणे चन्द्रमुद्दिश्य पुनस्तस्य स्थूलतारकादिरूपताभ्रान्तिमापाद्य चन्द्रस्वरूपस्य बोधनीयत्वापातादित्याह ॥ न च सत्यं ज्ञानमितीति ॥ न ब्रूमो वयमन्नाद्युपदेशस्य स्वरूपबोधो वा स्वरूपलक्षणबोधो वा प्रयोजनमिति । येनोक्तदोषःस्यात् । किं तु चित्तस्य प्रत्यक्प्रावण्यमेवेत्याशङ्क्य निराकरोति ॥ न चेति ॥ तत्समानदेशस्य वा तत्समानजातीयस्य वा तत्प्रावण्यार्थमुपदेष्टव्यत्वात् प्रत्यगर्थभूतब्रह्मणि प्रावण्यार्थं प्रत्यगर्थस्यैवोपदेष्टव्यत्वेन कोशानां चातथाभूतत्वात्तदुपदेशोसंगत इत्याह ॥ कोशानामिति ॥ अनहंत्वादित्यर्थः। अथवा किंचान्नादेर्द्वारत्वं वदन्प्रष्टव्यः। तदुपदेशःकिमन्नमयाद्यनुक्त्वानंदमयाद्युपदेशस्यैवासम्भवात् किं वा सत्यत्वादिस्वरूपलक्षणज्ञानसाधनत्वात् किं वा चित्तस्य प्रत्यक्प्रावण्यार्थत्वात् । नाद्य इत्याह ॥ न चेति ॥ न द्वितीय इत्याह ॥ न चेति ॥ स्वरूपलक्षणस्य पूर्वमेव ज्ञातत्वान्न तस्य द्वारत्वमिति भावः । न तृतीय इत्याह ॥ न च द्वारेति ॥ कोशानां पराक्त्वे वस्तुगत्या प्रत्यक्त्वाभावेप्यारोपितप्रत्यक्त्वं च सम्भवतीत्यत आह ॥ प्रत्यक्त्वेनेति ॥ अन्नमयप्राणमयमनोमयविज्ञानमयानां देहरूपत्वात्तत्र प्रत्यक्त्वासम्भवेप्यानन्दमयस्यादेहत्वादन्नादेरपि तदभावात्तत्र प्रत्यक्त्वारोप इति भावः । अथवा प्रत्यक्त्वस्याहंरूपत्वेपि तस्य ब्रह्मरूपत्वात्तस्य च वास्तवस्य कोशेष्वभावेप्यारोपितस्य सत्त्वेन तदुपदेशस्य चित्तप्रत्यक्प्रावण्यार्थत्वं युक्तमित्यतोऽन्नमयादि- रूपद्वारस्य ब्रह्मत्वारोपः किं श्रौत उत प्रात्यक्षिक इति विकल्प्याद्यं दूषयति ॥ प्रत्यक्त्वेनारोपस्येति ॥ आनन्दमय इति ॥ अन्नमयादाविवानन्दमय उपासनाया अश्रवणादित्यर्थः । नन्वत्र येन्नं ब्रह्मोपासते ये प्राणं ब्रह्मोपासते विज्ञानं देवाः सर्वे ब्रह्मज्येष्ठमुपासत इति त्रिष्वेवोपासनायाः श्रवणादानन्दमयमात्रग्रहणमसङ्गतमिति चेन्न । मनोमये आनन्दं ब्रह्मणो विद्वानित्यत्र तदश्रवणेपि तन्मध्यपतितस्य विद्वानित्यस्यापि सन्दंशन्यायेनोपांशुयाजवाक्यमध्यपतितविष्णवादिवाक्यस्येवोपासनापरत्वस्य परेण वक्तुं शक्यत्वादानन्दमयमात्रग्रहणस्य सङ्गतत्वात् ॥ उत्तरेति ॥ अन्नं ब्रह्मेति व्यजानात्प्राणो ब्रह्मेति व्यजानान्मनो ब्रह्मेति व्यजानाद्विज्ञानं ब्रह्मेति व्यजानादित्यत्र कुत्राप्युपासनाया अश्रवणेनान्नादीनां ब्रह्मत्वारोपस्य श्रौतत्वानुपपत्तेः । ननूत्तरानुवाकोक्तानामन्नादीनामन्नमयादित्वात्तेषां च देहत्वात्तत्र प्रत्यक्त्वारोपः सम्भवतीत्यत आह ॥ तत्रत्यानामिति ॥ अथवा यथा संख्याम्नानरूपपाठसादेश्यलक्षणस्थानेनोत्तरानुवाकोक्तान्नादीनामन्नमयादित्वात्तेषु च ब्रह्मत्वोपसनाश्रवणात्कथं तदभावाभिधानमित्यत आह

(पाण्डुरङ्गि)

॥ तत्रत्यानामिति ॥ आनन्दमयः स्यादिति ॥ न चेष्टापत्तिरिति वाच्यम् । विकारार्थ-कमयट्श्रवणेन तस्य त्वया ब्रह्मत्वानंगीकारात् ॥ स्थानेति ॥ ब्रह्मवल्लचामानन्दमयो यत्स्थाने कथितोस्ति भृगुवल्लचां तस्मिन्स्थान आनन्दस्य कथितत्वात् । अत्र यथासंख्यान्नानरूपपाठसादेश्यलक्षणमीमांसकाभिमतस्थानमेवाभिप्रेतम् । न त्वस्मदभि-मतमिति ध्येयम् ।

तात्पर्यचन्द्रिका

न चाज्ञातधर्मतत्वं चैत्यवन्दनादिधर्म इति मन्वानं प्रति चैत्यवंदनादिधर्म इत्युपदिश्य ज्योतिष्टोमादिधर्म इत्युपदिश्यते । न च त्वन्मतेऽपरिच्छिन्नस्यात्मनः शरीराद्यन्तरत्वमहंत्वरूपं प्रत्यक्त्वं वास्ति । न च घटाकाशादिज्ञानोपायोपि घटादिर्महाकाशज्ञानोपायः । इह च ''सत्यं ज्ञानमनंत''मिति प्रकृतोऽपरिच्छिन्न एवात्माजिज्ञापयिषित इति तेऽपि मतम् । किञ्च निरवयवे चित्तप्रावण्यार्थं निरवय-वान्तरमेवोपदेष्टव्यम् । न तु ''अयं दक्षिणः पक्ष'' इति सावयवम् । अपि च न तावदन्नादीनामन्नमयादीनां वा प्राणादीन्प्राणमयादीन्वा प्रति द्वारत्वम् । अन्नादिज्ञानं विनापि प्राणादिज्ञानात् । ब्रह्मणि द्वारत्वेऽन्नादिपूर्वकं प्राणाद्युपदेशो न युक्तः । अनेकद्वारवैयर्थ्यं च । न च द्वारविकल्पः । उत्तरानुवाके ''अन्नं ब्रह्मेति व्यजानात् प्राणो ब्रह्मेति व्यजानात् मनो ब्रह्मेति व्यजाना''दित्यादिनाऽन्नप्राणादिद्वार-समुच्चयोक्तेः । अपि च यतो वेत्यादिपूर्ववाक्योक्तकारणत्वस्यापि त्वत्पक्षे ब्रह्मणि द्वारत्वात्कोशानां च कारणत्वे द्वारत्वाभावात्कोशोपदेशवैयर्थ्यम् । किञ्च भृगुर्व-रुणोपदिष्टानां द्वारत्वं न वेत्ति चेद्विरोचनस्येव पुनरुपसत्त्ययोगः । वेत्ति चेन्नान्नं ब्रह्मेति व्यजानात् नान्नाद्ध्येवेत्यादि श्रूयेत । तस्मादन्नमयादयो ब्रह्मैव न कोशाः ।

प्रकाशिका — न युक्तश्च कोशानां ब्रह्मत्वज्ञापनाय तथोपदेश इत्याह ॥ न चाज्ञातेति ॥ अन्यथा कर्मकाण्डेपि तथोपदेशः स्यादिति भावः । एवं प्रत्यक्प्रावण्यार्थं द्वारोपदेश इति निरस्तम् । इदानीं ब्रह्मणः प्रत्यक्त्वमेव नास्ति यत्प्रावण्यार्थं तदुपदेशोर्थवान्स्यादित्याह ॥ न च त्वन्मत इति ॥ अपरिच्छिन्नत्वादंतरत्वरूपं शुद्धत्वादहंत्वरूपं वा प्रत्यक्त्वं नेत्यर्थः । ननु कोशानां परिच्छिन्नाहमर्थजीवरूपप्रत्यग्ज्ञानोपायत्वात्तदभिन्नापरिच्छिन्नब्रह्मज्ञाने द्वारता

(प्रकाशिका)

भविष्यतीत्यत आह ॥ न च घटेति ॥ जिज्ञापयिषितः ज्ञापयितुमिष्ट इत्यर्थः । तथाच ब्रह्मपुच्छमित्युक्तब्रह्मज्ञानाय द्वारता कथं कोशानां स्यादित्यर्थः । अन्नादीनामित्युत्तरानुवाकस्थाभिप्रायेण । प्राणादीनिति यथाक्रममन्वयः ॥ समुच्चयेति ॥ अन्यथान्नप्राणादिष्वन्यतमस्यैव श्रवणप्रसङ्गोन्नं वा ब्रह्मेति व्यजानादिति वा स्यादिति भावः । त्वत्पक्षइति ॥ जन्मादिसूत्रे तथोक्तेरिति भावः ।

अधीहि भगवो ब्रह्मेत्युक्तोऽन्नप्राणपूर्वकम् ।
आह ब्रह्म कथं तन्न द्वारं तदिति वादिनः ।

उपसत्तिं कथं विद्यु''रित्यनुव्याख्यानं हृदि कृत्वा दोषान्तरमाह ॥ किञ्च भृगुरिति ॥ विरोचनस्येवेति ॥ यथा चतुर्मुखेनोपदिष्टस्य पुनरुपसत्तिर्नास्ति तथा न स्यादित्यर्थः । व्यक्तमेतच्छान्दोग्येऽष्टमेध्याये । ननु परोक्तबाधकानां केषांचिन्निरासेप्यन्नमयादेर्ब्रह्मत्वेऽनुपपत्तिरेव । तथाहि । ''ओषधीभ्योन्नं अन्नात्पुरुष'' इत्योषधिकार्यान्नविकारं देहं पुरुषपदेनोक्त्वा ''स वा एष पुरुष'' इति तं परामृश्यान्नरसमय इति प्राकृतान्नमयत्वमुच्यते । तस्येश्वरेनुपपत्तेः । न चानेनात्मन आकाश इत्युक्तात्मन एव परामर्श इति वाच्यम् । तस्य व्यवहितत्वेनास्वारस्यात् । भृगुवल्लयुक्तानामन्नादीनां ब्रह्मत्वे साधकविशेषस्यानुक्तेः । तत्र मयटोश्रवणेनान्नमयादिभ्यस्तेषां भेदप्रतीतेः । तेषां ब्रह्मत्वे तज्ज्ञानानन्तरं ''तद्विज्ञाय पुनरेव वरुणं पितरमुपससारे''ति पुनरुपसत्त्ययोगादित्यादिबाधकापरिहाराच्चेत्यतो ''यदवादि स वा एष इत्यन्यपरामर्शो नान्नात् पुरुष इत्युक्तपरामर्श'' इत्यादिटीकां विवृण्वन्नाह ॥ अत्रावशिष्टमिति ॥ इत्यादिकमुत्तरप्रस्थानादाववगन्तव्यमित्युत्तरेणान्वयः ।

पाण्डुरङ्गि — अस्तु तर्ह्यन्नमयादीनां ब्रह्मत्वारोपः प्रात्यक्षिक इति द्वितीयः पक्षः । निरवद्यत्वादित्यतः तर्हि तस्य स्वत एव सिद्धत्वात्पुनरन्नं ब्रह्मेत्यादिश्रुत्या तदुपदेशोऽनुपपन्नः । अन्यथा चैत्यवंदनादि धर्म इति मन्वानं प्रति चैत्यवन्दनादि धर्म इत्युपदिश्येतेत्यत आह ॥ न चाज्ञातेति ॥ यदुक्तमन्नमयादेर्द्वारत्वं कथमिति तत्र विकल्पितपक्षेषु प्रथममेवाङ्गीकुर्मः । न चान्नं ब्रह्मेत्यनुक्त्वाप्यानन्दो ब्रह्मेति वक्तुं शक्यत्वात्कथं तस्य द्वारत्वमिति वाच्यम् । अन्नादौ ब्रह्मत्वविषयकभ्रमस्य जातत्वेन तदुपदेशाभावेऽन्नादौ ब्रह्मेत्युपदेशस्यैवासम्भवादित्यतो वाह ॥ न चेति ॥ अन्यथा यस्य चैत्यवंदने धर्मत्वभ्रान्तिरुत्पन्नास्ति तं प्रति चैत्यवंदनादिकं धर्म इत्युपदिश्य ज्योतिष्टोमादेर्धर्मत्वोपदेशस्य

कर्तव्यत्वापत्तेः । ननु तथाप्यन्नमयाद्यनुपदेशे आनन्दमयोपदेशो न युज्यते । तस्यान्नमयाद्यपेक्षयांतरत्वात् । तथाच तस्य द्वारत्वं युक्तमित्यत आह ॥ न च त्वन्मत इति ॥ अन्यथाऽपरिच्छिन्नत्वं न स्यादिति भावः । एवं ब्रह्मणः प्रत्यक्त्वमङ्गीकृत्य परागर्थस्य प्रत्यक्प्रावण्यार्थत्वासम्भवान्न परागर्थोपदेशोऽयुक्त इत्युक्तम् । इदानीं तु ब्रह्मणः प्रत्यक्त्वस्यैवासम्भवान्नान्नमयाद्युपदेशस्य प्रत्यक्प्रावण्यार्थत्वमिति वाह ॥ न च त्वन्मत इति ॥

यदुक्तमन्नमयाद्युक्तिश्चित्तस्य प्रत्यक्प्रावण्यार्थं न सम्भवति । कोशादेः पराक्त्वादिति । तदुपपादयति ॥ अहंत्वरूपमिति ॥ प्रत्यक्त्वं ह्यहंत्वम् । न च कोशेष्वहंत्वबुद्धिरस्तीति भावः । ननु ब्रह्मणोऽपरिच्छिन्नत्वादन्नादेः परिच्छिन्नप्रत्यग्ज्ञानसाधनत्वेनैवापरिच्छिन्नब्रह्मज्ञानसाधनत्वोपपत्तेस्तदुपदेशः सार्थक इत्यत आह ॥ न चेति ॥ यद्वा किं च कोशानामपरिच्छिन्नब्रह्मज्ञानोपायत्वं नोपपन्नम् । घटावच्छिन्नाकाशज्ञाने घटादेरिव तत्तत्कोशावच्छिन्नज्ञाने कोशानां हेतुत्वात् । नचावच्छिन्नज्ञानोपायत्वेऽप्यनवच्छिन्नज्ञानोपाय इति नोक्तदोष इति वाच्यम् । तथात्वे घटादेरपि महाकाशज्ञानोपायत्वापत्तेरित्याह ॥ न चेति ॥ ननु मास्तु परिच्छिन्नज्ञानोपायस्यापरिच्छिन्नज्ञानोपायत्वम् । प्रकृते जिज्ञापयिषितं तु परिच्छिन्नमेवेति तत्साधनत्वमन्नादेरुपपद्यत इत्यत आह ॥ इहचेति ॥ ननु निरवयवे चित्तप्रावण्यार्थं निरवयवान्तरमुपदेष्टव्यमित्ययुक्तम् । तस्यातिसूक्ष्मत्वेन प्रथमं बुद्ध्यारोहासम्भवात् । न च सावयवोपदेशेन कथं निरवयवज्ञानमिति वाच्यम् । चन्द्रादिस्वरूपज्ञानार्थं शाखोपदेशस्य दर्शनात् । अन्यथा तत्रापि चन्द्रान्तरमेवोपदेष्टव्यमित्यरुचेराह ॥ अपि चेति ॥ उत्तरानुवाकानुरोधादन्नादीनामित्युक्तम् । किमत्रान्नादीनामन्नमयादीनां च द्वारद्वारिभावेन परंपरया द्वारत्वमुत साक्षादेव ब्रह्मणि द्वारत्वम् । नाद्य इत्याह ॥ अन्नादिज्ञानं विनेति ॥ न द्वितीय इत्याह ॥ ब्रह्मणीति ॥ अन्नं प्राणं चक्षुः श्रोत्रमित्युपदेशो न युक्त इत्यर्थः । ननु यस्य कस्यचित्प्रथमं वक्तव्यत्वादन्नस्य प्राथम्येनोक्तिरित्यत आह ॥ अनेकेति ॥ ननु विकल्पेन विहितत्वान्न वैयर्थ्यमित्यत आह ॥ न चेति ॥ ननु समुच्चयवाचकशब्दाभावान्न समुच्चयो युक्तः । न च विकल्पद्योतकवाशब्दाभावान्न विकल्पोपि युक्त इति वाच्यम् । वैयर्थ्यान्यथानुपपत्त्याऽगत्या विकल्पस्याश्रयणादित्यस्वरसादाह ॥ अपि चेति ॥ यतोवेत्यादीति ॥ अत्र वैशब्दसमानार्थो वाशब्दो विवक्षितः । अर्थानुवादश्चायम् । तेन यतोवेत्यादीत्युपपन्नम् । अन्यथा यतोवा इत्यादीति स्यादिति द्रष्टव्यम् ।

तात्पर्यचन्द्रिका

अत्रावशिष्टं ''आत्मन आकाश'' इत्यादौ ''अन्नात्पुरुष'' इत्यन्ते वाक्ये हरेरप्याकाशादिनियामकरूपप्रादुर्भावलक्षणजनेरुक्तत्वात् ''स वा एष पुरुषोऽन्नरसमय'' इत्यत्र हरेः परामर्शस्वारस्यम् । तथापरेणापि ब्रह्मपरतया स्वीकृतेन ''रसो वैसः रसं ह्येवायं लब्ध्वानंदी भवती''ति रसशब्देन सन्निहितपरामर्शस्यैतच्छब्देनैव सिद्धेर्व्यवहिताकाशादिकारणब्रह्मपरामर्शिना तच्छब्देन च विशेषणात्प्रकृतान्नमयपरत्वाभावः । तथा ''भृगुर्वै वारुणि''रित्युत्तरानुवाक उक्तानामन्नादीनां ब्रह्मत्वं तावदुपेयम् । ''भार्गवी वारुणी विद्या परमे व्योमन् प्रतिष्ठिते''ति श्रुत्या स्वयमेव ब्रह्मपरत्वोक्तेः । ''अधीहि भगवो ब्रह्मे''ति ब्रह्मप्रश्नोत्तरत्वात् । ''स तपस्तप्त्वा अन्नं ब्रह्मेति व्यजाना''दिति श्रवणानन्तरभाविनिदिध्यासनाख्यतपसाऽपरोक्षीकृतत्वलिङ्गात् । ''अन्नं ब्रह्मे''त्यादिब्रह्मशब्दात् ''अन्नाद्धयेव खल्विमानि भूतानि जायन्त'' इत्यादिब्रह्मलक्षणाच्च । तत्समाख्यया चात्राप्यन्नमयादीनां ब्रह्मत्वम् । न च तत्र मयटोऽश्रवणाद्भिन्नविषयत्वम् । तत्रापि ''एतमन्नमयमात्मानमुपसंक्रामती'' त्यादौ ''एतमानन्दमयमात्मानमुपसंक्रामती''त्यन्ते मध्ये तथा ''एतमन्नमयमात्मानमुपसंक्रम्ये''त्यादौ ''एतमानन्दमयमात्मानमुपसङ्क्रम्ये''त्यंत उपसंहारे च तच्छ्रवणात् अत्रापि ''अन्नाद्वै प्रजाः प्रजायन्त'' इत्यादौ तदश्रवणात् । तत्राप्यन्न (उभयत्राप्यन्न)मयादीनामब्रह्मत्वे ''एतमन्नमयमात्मानमुपसङ्क्रामती'' त्यात्मशब्दस्य मुक्तप्राप्यत्वस्य चायोगात् । न चोपसङ्क्रम्येत्यत्रोपशब्दोऽतिक्रमार्थः । अव्ययानामनेकार्थत्वस्यापि प्रयोगानुसारित्वात् । अन्यथांतश्शब्दो बहिरर्थस्स्यात् । ''अस्माल्लोकात्प्रेत्ये''त्यनेनैव शरीराख्यान्नमयत्यागस्योक्तत्वेन ''अन्नमयमात्मानमुपसङ्क्रामती''त्यनेनापि तदुक्तौ पुनरुक्तिश्च स्यात् ।

प्रकाशिका —

ब्रह्मशब्दोदिते तस्मिन्नात्मशब्दं प्रयुज्यच ।
तस्मादाकाशसृष्टिं च प्रोवाचात्र चतुर्विधाम् ॥

इत्यादि ''इति तं रसशब्देन विशिनष्टि शरीरग''मित्यन्तमनुव्याख्याने हृदि कृत्वाऽऽह ॥ आत्मन इति ॥ आकाशः सम्भूत इत्यादेराकाशपदवाच्यं भूताकाशतदभिमानित-देहतत्त्रितयांतर्नियामकरूपचतुष्टयमात्मनः सम्भूतम् । तस्माच्चतुष्टयादाकाशाद्वायुशब्दितं चतुष्टयं सम्भूतमित्येवमर्थः । तत्र सम्भवो नाम हरेः प्रादुर्भावोऽभिमानिनोऽभिमानविशेषो देहस्य भूतस्य च परिणाम इत्येवंरूपेणार्थस्याभिमतत्वात् पुरुषपदेन च देहतदभिमानि-जीवतन्नियामकानां विवक्षितत्वादेव पुरुष इति पुरुषपदमुख्यार्थस्य हरेरेव सन्निहितस्य परामर्शसम्भवादित्यर्थः । वक्ष्यते चैतत् ''कारणत्वेन चाकाशादि''ष्वित्यत्र पुरुषपदेन त्रितयनिर्देशेपि परमात्ममात्रपरामर्शो

बहूनां सह निर्देश एकयाऽभिधयैवतु ।
तयैवाभिधया तेषां परामृश्यैकमुच्यत ॥

इति टीकास्थस्मृत्युक्तदिशा युज्यत इति भावः । परेणापीत्यस्य स्वीकृतेन रसशब्दे-नान्नरसमय इति विशेषणादित्यन्वयः । ''भृगोश्चैतद्वदिष्यती''त्यनुव्याख्यां हृदि कृत्वाऽन्न-मयादेर्ब्रह्मत्वे साधकान्तरमाह ॥ तथेति ॥ तत्समाख्ययात्राप्यन्नमयादीनां ब्रह्मत्वमित्यन्वयः ॥ भार्गवीति ॥ श्रोतृवक्तृतया भृगुवरुणसम्बन्धिनी । व्योमन् । अच्छेद्यत्वादिना व्योमनि भगवति । ''सुपांसुलु''गिति सप्तम्या लुकि ''नङि सम्बुद्ध्यो''रिति नलोपाभावः । ''अधीहि भगवो ब्रह्मेत्युक्तोन्नप्राणपूर्वक''मित्यादि हृदि कृत्वाह ॥ अधीहीति ॥ अध्याप-येत्यर्थः । ''तपसैवापरोक्षित''मित्यनुव्याख्यानोक्तमाह ॥ सतप इति ॥ ''यतो भूतानि जायंत इत्याद्यैर्लक्षणैः स्वयम् । लक्षितं गुरुणे''त्येतद्धृदि कृत्वाह ॥ अन्नाद्धचेवेति ॥ ब्रह्मलक्षणाच्च ब्रह्मत्वमुपेयमिति पूर्वेणान्वयः । समाख्यात्वं साधयति ॥ न चेत्यादिना ॥ तत्र भृगुवल्लच्याम् । ''प्राप्यत्वेन मयट्प्रोक्तेर्न तत्राप्यन्यदुच्यत'' इत्यनुव्याख्यां हृदि कृत्वाह ॥ तत्रापीति ॥ उपसंहारे मयट्श्रवणादित्यन्वयः । तदनुरोधेनान्नप्राणादिष्वपि ग्राह्यत्वादिति भावः । अयमर्थः । अन्नरसमय इत्युपक्रमे मध्ये उपसंहारे च मयडन्तानां श्रवणादन्नादी-नामन्नमयादित्वमुपेयमिति । उपक्रमे तु स्पष्टम् । मध्ये उपसंहारे च दर्शयति ॥ एतमन्नमयमिति ॥ आदावन्त इति बहुव्रीहिः । पञ्चानामपि ग्रहणाय यथा भृगुवल्लच्या-मन्नादेरेव श्रवणं तथा ब्रह्मवल्लच्यामप्यन्नमयादीन् प्रत्युदाहृतश्लोकेष्वन्नादेरेव श्रवणात्तस्याप्य-न्नमयादितोऽन्यत्वप्रसङ्गः । तत्र मयट्परिकल्पनेनानन्यत्वेऽत्रापि सममिति भावेनाह ॥

(प्रकाशिका)

अत्रापि ब्रह्मवल्लक्ष्यामपीति ॥ ननु मध्य उपसंहारे च मयडन्ततया श्रुतानामब्रह्मत्वात्कथं तदनुरोधेनान्नादीनामन्नमयादित्वमुक्त्वा ब्रह्म मुच्यत इत्यतः प्राप्यत्वेनेति वाक्ये तत्रापीत्यस्य प्राप्यस्थानेपीत्यर्थमुपेत्याह ॥ तत्रापीति ॥ मध्य उपसंहारेचेत्यर्थः । आत्मशब्दस्य स्वशब्दादित्यत्र ब्रह्मनिष्ठताया वक्ष्यमाणत्वादिति भावः ।

''योगमन्नमयाद्यैर्यत्फलत्वेनास्य शंसती''त्यनुव्याख्यानोक्तमाह ॥ मुक्तप्राप्यत्वस्येति ॥ ''स य एवं वित् । अस्माल्लोकात्प्रेत्ये''ति पूर्ववाक्ये ज्ञानेन लोकशब्दितदेहादुत्तीर्णेन मुक्तेन ''उपसंक्रामति उपसंक्रम्ये''ति च प्राप्यत्वश्रवणेन तदयोगादित्यर्थः । नन्वव्ययानामनेकार्थत्वादुपसंक्रम्येत्यस्यातिक्रम्येत्यर्थोपपत्त्या तेषां कोशत्वेपि नानुपपत्तिरित्यतः ''अतिक्रमं वदन्तं तमुपशब्दो निवारये''दित्याद्यनुव्याख्याभिमतमाह ॥ नचेति ॥ ''मृतावेव परित्यागः कृतो ह्यन्नमयस्य चे''त्युक्तं दोषान्तरमाह ॥ अस्मादिति ॥ तदुक्तौ देहत्यागोक्तौ ।

पाण्डुरङ्गि — नन्वन्नमयादीनां ब्रह्मत्वे स वा एष इति परामर्शास्वारस्यम् । सन्निहितान्नविकारपुरुषशब्दवाच्यशरीरपरामर्शं विहाय व्यवहितात्मपरामर्शकत्वाङ्गीकारादित्यत आह ॥ अत्रावशिष्टमिति ॥ अत्रावशिष्टमुत्तरप्रस्थानादवगन्तव्यमित्यन्वयः । एतच्च सविस्तरमुक्तमुत्तरप्रस्थान इति टीकां वा व्याचष्टे ॥ अत्रावशिष्टमित्यादिनोत्तरप्रस्थानादवगन्तव्यमित्यन्तेन । अस्तु वात्मनो व्यवहितत्वम् । तथापि तत्परामर्श एव युक्तः तच्छब्दैतच्छब्दबलादित्याह ॥ तथेति ॥ ननु तच्छब्दस्याव्यवहितपरामर्शकत्वमेव किं न स्यादित्यत उक्तम् ॥ सन्निहितपरामर्शस्येति ॥ अन्यथैतच्छब्दो व्यर्थ इति भावः । एवं बाधकाभावात्साधकसद्भावाच्चान्नमयादीनां ब्रह्मत्वमित्युक्तम् । इदानीं न केवलं ब्रह्मशब्दमात्रेण तेषां ब्रह्मत्वमपि तूत्तरानुवाकसमाख्ययापीत्याह ॥ तथेति ॥ ननु सत्यमुत्तरानुवाकोक्तान्नादीनां ब्रह्मत्वे तत्समाख्यानादेषां ब्रह्मत्वं वक्तव्यम् । तदेव नास्ति । तथाच निर्णीतस्थले समानोक्तेरेव समाख्यत्वेन प्रकृते तदभावादित्यत आह । भृगुर्वा इति ॥ नन्वस्त्वन्नमयादीनां ब्रह्मत्वम् । समाख्या तु न युक्ता । तत्रान्नादीनामेव श्रुतत्वेन मयटोऽश्रुतत्वेन समानोक्तेरेवाभावादित्याशङ्क्य निराकरोति ॥ न चेति ॥ समाख्यात्वमाक्षिप्य संमतौ समाख्योक्ता । विमतौ त्वेकमेव स्थानं नार्थभेदकल्पनमर्हति । शन्नोमित्रादिभिर्वाक्यैर्मुक्तगीतावसानकैरिति वचनादित्यभिप्रेत्य मयट्श्रवणाश्रवणयोरप्रयोजकत्वं तावदविशेषोक्त्योपपादयति ॥ तत्रापीत्यादिना ॥ मुक्तप्राप्यत्वोपक्रमोपसंहार-

कप्रमाणप्रस्तुतनिर्णेतव्योत्तरभागत्वात्तत्रेति परामृश्यत इति ज्ञेयम् । तथापि भृगुवल्लचामादौ नान्नमयादीनां श्रवणमित्यत आह ॥ अत्रापीति ॥ आदावश्रवणमुभयत्रापि तुल्यमिति भावः। ननु तर्ह्युभयत्रापि न ब्रह्मपरत्वम् । किन्तु कोशपरत्वमेवेत्यत आह ॥ उभयत्रापीति ॥ अत्रापीति क्वचित्पाठः । अत्रापि ब्रह्मवल्लीभृगुवल्लचोरित्यर्थः ।

तात्पर्यचन्द्रिका

अविरुद्धं चान्नादिशब्दैरन्नमयादिप्रत्यायनं ''ज्योतिषा यजेते''त्यत्र ज्योतिश्शब्देन ज्योतिष्टोमस्येव । अन्नादीनां ब्रह्मत्वेपि ''तद्विज्ञाय पुनरेव वरुणं पितरमुपससार अधीहि भगवो ब्रह्मेती''ति पुनरुपसत्तिस्त्वेकं रूपं निदिध्यासनेन साक्षात्कृत्य रूपान्तरस्य गुणान्तरविशिष्टतया निदिध्यासनार्थमनुज्ञामादातुम् । तत्रानुजानीहीति वक्तव्ये यदधीहीत्याह तद्विनयातिशयादित्यादिकमुत्तरप्रस्थानादवगन्तव्यम् । ''अन्नमयप्राणमयमनोमयविज्ञानमयानन्दमया मे शुध्यन्ता''मिति शुद्धिप्रार्थनवाक्ये तु ब्रह्मशब्दाभावात् तल्लक्षणाभावात् ज्ञानिनस्तत्प्राप्तिकथनाभावात् रसशब्देन विशेषणाभावेन ''अथैष ज्योतिरथैष विश्वज्योतिरथैष सर्वज्योति''रित्यादाविव संज्ञाभेदात् कुण्डपायिनामयने मासमग्निहोत्रं जुहोतीत्यादाविव प्रकरणभेदात् शुद्धिप्रार्थनलिङ्गाच्चान्नमयादयो न ब्रह्म । किंतु कोशाः । अत्र तु कोशान्तर्गतभगवन्मूर्तिविशेषाः । अन्योंतर इत्यन्यत्वान्तरत्वाद्युक्तिस्तु अधिष्ठानभूतकोशानामन्यत्वात् अन्तरत्वात् भगवतो बहुरूपत्वात् । विशेषसद्भावात् ''अनन्योप्यन्यशब्देने''त्यादिभाष्योदाहृतस्मृतिबलाच्च युक्ता । तस्मात् श्रुतिविरोधाभावान्न सूत्राण्यन्यथा नेयानि ।

अनन्तशाखातत्वार्थविदा सूत्रकृतेरितम् ।
कूपमण्डूकवत्स्वल्पवाक्यज्ञोन्यथयेत्कथम् ॥ १ ॥

उक्तं च ब्रह्मसूत्राणां निश्चितत्वं ''ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितै''रित्यादौ । सूत्रास्वारस्यं तु परैरेव स्वीकृतम् । यच्चोक्तं शुद्धब्रह्मपरमेतदिति । तन्न । ''कामा''दित्यादिसूत्रे ''सोऽकामयत भीषास्मा''दित्यादिश्रुतौ च कामादिगुणविशिष्टस्यैवोक्तेः।

किं च निर्विशेषज्ञानस्य सविशेषज्ञानाधीनत्वादादौ निर्विशेषोक्तिरयुक्ता । अत्र च ''भेदव्यपदेशा''दित्यनेनैक्यनिषेधादभेदप्रतिकूलता स्फुटैवेति ।

प्रकाशिका — ननूपसंहारेऽन्नमयादेः श्रवणेपि कथमन्नादिशब्देन तदर्थप्रत्यायनम् । तत्र मयट्प्रत्ययस्याधिकत्वात् । अन्यथा मयटः स्वार्थिकत्वापत्तेरित्यतः सुधोक्तमाह ॥ अविरुद्धमिति ॥ यथा ज्योतिष्टोमप्रकरणे ''वसन्ते वसन्ते ज्योतिषा यजेते''त्यत्र ज्योतिश्शब्देन ज्योतिष्टोमस्यैकदेशोत्कीर्तनेन समग्रशब्दलक्षणया प्रत्यायनं तद्वदन्नादिशब्दैरप्येकदेशोत्कीर्तनेनान्नमयादिशब्दलक्षणया तदर्थप्रत्यायनमविरुद्धमिति भावः । यत्तु पस्पशाह्निककैयटे ''सिद्धे शब्दार्थसम्बन्ध'' इत्येतद्भाष्यव्याख्यावसरे एकदेशोत्कीर्तनेन प्रतीतस्य समग्रशब्दस्य नार्थप्रत्यायकत्वम् । उच्चार्यमाणस्यैवार्थप्रत्यायकत्वात् । किन्तु समग्रशब्दस्य संज्ञात्वेन विनियोगकाले तदवयवा अपि संज्ञात्वेनार्थाद्विनियुज्यन्त इत्येकदेशस्यापि वाचकत्वमेव ''ठाजादावूर्ध्वं द्वितीयादच्च'' इति सूत्रे ''विनापि प्रत्ययं पूर्वोत्तरपदयोर्वा लोपो वक्तव्य'' इति वार्तिके देवदत्तो दत्त इत्यादौ पञ्चमाध्यायलोप- विधानसामर्थ्याद्वर्णानां न वाचकत्वप्रसङ्ग इत्युक्तम् । तन्न । अनुच्चार्यमाणस्यापि मनसानुसंहितस्य शब्दस्यार्थप्रत्यायकत्वानुभवस्य सर्वसिद्धत्वात् । राजपुरुषादिशब्दार्थवाचकत्वस्य राजादिशब्देऽदर्शनाच्च । तदुक्तं सुधायां ''अत एव न प्रत्येकं वाचकत्वम् । किं त्वधिकारबलादेकदेशोत्कीर्तनेन समग्रशब्दलक्षणामङ्गीकृत्य निमित्ताभिधेयैक्यमङ्गीकरणीय''मित्यादि । ननूक्तमन्नादीनां ब्रह्मत्वे तज्ज्ञानिनः पुनरुपसरणायोग इत्यतः ''पश्चात्तपस्यैवापरोक्षतः । दृष्ट्वैकैकं स्वरूपं तु समस्तोक्तानुदर्शनम् । इच्छताऽऽज्ञां गुरोःप्राप्ये''त्यनुव्याख्यां हृदि कृत्वोपसत्तेरन्यथोपपत्तिमाह ॥ अन्नादीनामिति ॥ इत्यादिकमित्यादिपदेन ''तस्येदमेव शिर'' इत्यादिप्रत्यक्षनिर्देशादेः ''इदमित्येव निर्देशो वस्त्रप्रावृतवद्भिभो''रित्याद्यनुव्याख्योक्तं समाधानं ग्राह्यम् । नन्वेवमुत्तरस्यां नारायणोपनिषदि श्रुतानामपि तथात्वं स्यादित्यत आह ॥ अन्नमयेति ॥ रसशब्देनेति ॥ अन्नरसमय इत्युपक्रमात् रसो वै स इत्युपसंहाराच्च रसशब्दविशेषणस्य पञ्चस्वभिप्रेतत्वेनैतेऽन्नरसमयप्राणरसमयादयः । ते तु केवलमन्नमयादय इति संज्ञाभेदादित्यर्थः । एतेन ''ननु अन्नमयप्राणमयमनोमयविज्ञानमयानन्दमया मे शुध्यंता''मित्यादि टीका विवृता ।

दृष्टान्तेनैतदेवोपपादयति ॥ अथैष इति ॥ संज्ञाधिकरणमुक्तमाद्यसूत्रे । तत्र यथा ज्योतिष्टोमशब्दाज्ज्योतिरादिशब्दानां भेदेन कर्मभेदस्तथात्रापीत्यर्थः । अन्नरसमय इत्यत्रेव प्राणमयादावपि प्राणरसमय इत्यादिरूपेण रसशब्देन विशेषणस्यात्र टीकायां व्यक्तत्वात्संज्ञाभेद इति भावः । प्रकरणभेदेन भेदे दृष्टान्तमाह ॥ कुण्डपायिनामिति ॥ कुण्डेन पिबंतीति कुण्डपायिनः । तेषामयनं नाम सत्रविशेषः । मासमित्यत्यन्तसंयोगे द्वितीया । द्वितीयस्य तृतीये पादे ''प्रकरणान्तरे प्रयोजनान्यत्व''मित्येकादशेधिकरणे मासमग्निहोत्रमिति वाक्ये नैयमिकाग्निहोत्रमेव मासे विधीयतेऽथ कर्मान्तरमिति विशये अनुपादेयमासोद्देशेन कर्मोपादानेप्यप्राप्तो मासो विधीयत इति प्राप्ते असन्निहितस्य नैयमिकस्य स्वतो बुद्धिस्थत्वाभावात्तन्नामककर्मान्तरविधिरिति सिद्धान्तितम् । तत्र यथा नित्याग्निहोत्रमासाग्निहोत्रयोः प्रकरणभेदाद्भेदस्तथात्रापि शुद्धिप्रार्थनप्रकरणब्रह्मप्रकरणयोर्भेदाद्भेद इत्यर्थः। यदत्र कश्चिदाह तर्ह्यनुवाकद्वयस्यापि भिन्नप्रकरणत्वात्संज्ञाभेदाच्चार्थभेदः स्यादिति तदूरीकृतं बोध्यम् । ब्रह्मप्रश्नोत्तरत्वादिनाऽस्यापि ब्रह्मप्रकरणत्वात् । अन्ते मयटः श्रवणेनादावपि तस्य ग्राह्यत्वस्य प्रागेवोक्ततया संज्ञाभेदस्याप्यभावात् । एतदर्थमेव भाष्यटीकयोरनुक्तमपि भृगुवल्लचाः समाख्यात्वमनुव्याख्यानोक्तं प्राग्दर्शितम् ॥ मूर्तिविशेषा इति ॥ तैत्तिरीयभाष्योदाहृतप्रमाणानुरोधेनानिरुद्धप्रद्युम्नसंकर्षणवासुदेवनारायणा अन्नमयादिकोशगतास्तत्तच्छब्दवाच्या इत्यर्थः । ननु पञ्चानां ब्रह्मत्वे ''अन्योन्तर आत्मा प्राणमयः अन्योंतर आत्मा मनोमय'' इत्यादिनोक्तमन्यत्वादिकं कथम् । तस्यैकत्वाद्व्याप्तत्वाच्चेत्यत आह ॥ अन्योन्तर इतीति ॥ अधिष्ठानेति ॥ एतच्च समाधानं ''तत्तत्कोशगतं तत्तन्नियामकं ब्रह्मचैतन्यमेवोच्यत'' इति टीकोक्त्या लभ्यत इति भावः । तथाच स्थानगतं स्थानिन्युपचर्यत इत्युक्तं भवति । वक्ष्यते चैतत्सूत्रकृता हृद्यपेक्षया तु मनुष्याधिकारत्वा''दित्यत्र । न स्थानतोपीत्यस्य भाष्येपि ''अभेदेपि भेदव्यपदेशेन भेदादैश्वर्ययोगाच्च युज्यत'' इत्यादि । ''बहुरूपत्वाच्चाविरोध'' इति भाष्यदिशा मुख्यमेवार्थमाह ॥ भगवतो बहुरूपत्वादिति ॥ बहुत्वादन्यान्यत्वमणुरूपतयान्तरत्वं च मुख्यमेवेति भावः ।

यद्वा बहुरूपत्वादन्तरत्वं पञ्चत्वसंख्याच मुख्येति ध्येयम् । अन्यत्वं मुख्यमिति तु ''अभिन्नोपि विशेषेणैवान्य इत्युदितो हरि''रित्यनुव्याख्यानोक्तमाह ॥ विशेषेति ॥ स्वरूपसामर्थ्यलक्षणविशेषसद्भावादित्यर्थः । अन्याय्यं चान्यथानयनमित्याह ॥ अनन्तेति ॥ तदुक्तं सुधायां ''अनेकशाखाविदामेवात्र सम्यगधिकार इति ज्ञापनाय वाधूलशाखे-

त्याद्युक्त''मिति ॥ उक्तं चेति ॥ गीतायाम् । निश्चितत्वमबाधितार्थनिश्चयजनकत्वम् । तदुक्तमैतरेयभाष्ये ''न च सूत्रेषु निश्चितार्थस्यौपचारिकत्वं वक्तुं युज्यते । निर्णयात्मकत्वात्तेषा''मित्यादि ॥ कामादिति ॥ ''इदं प्रकरणं प्रधानपरं किं न स्यादित्याशङ्कानिरासाय कामादिति सूत्रम् । तस्यार्थः । सोऽकामयतेति श्रुत्या योभिहितः कामस्तस्माच्चेतनपरं नानुमानिकप्रधानपर''मिति त्वयोक्तेरिति भावः ॥ किञ्चेति ॥

निर्विशेषं परं ब्रह्म साक्षात्कर्तुमनीश्वराः ।
ये मंदास्तेनुकंप्यन्ते सविशेषनिरूपणैः ॥

इति त्वदुक्तेरिति भावः । यद्भास्करप्रभृतिभिरद्वैत्येकदेशिभिर्वर्णितमन्नमयादयश्चत्वारः कोशा आनन्दमयस्तु ब्रह्मेति तत्पञ्चानां कोशत्वादिना परेणैव पूर्वपक्षयित्वा दूषितमिति नेह दूषितम् । यद्वा पञ्चानां ब्रह्मत्वसाधकयुक्तिकलापस्योक्त्यैव तदपि निरस्तमिति । यद्वा ''नच पृथक्कल्पनायुक्ते''ति भाष्यटीकयोः

एतेन मयटश्चैव द्वैविध्येनार्थकल्पनात् ।
तदन्येषां मतमपि सत्संसत्सु न भासते ॥

इत्यनुव्याख्यानादौ स्पष्टं निरासात्केषांचिन्मतस्याग्रे निरस्यत्वात्तन्निरासेनैव निरस्तत्वान्न पृथङ्निरस्तम् ।

पाण्डुरङ्गि — नन्वन्नादिशब्दानामन्नमयादिषु रूढेरभावान्न तैस्तत्साधनमित्यत आह ॥ अन्नादीनामिति ॥ ननु यद्यनुज्ञामादातुमुपसत्तिस्तर्ह्यनुजानीहीति वक्तव्यम् । अधीहीत्युक्तिस्तु न युज्यत इत्यत आह ॥ तत्रेति ॥ अवशिष्टं तु सुधातोऽवगन्तव्यमिति भावः । ननु यद्येवमन्नमयादीनां ब्रह्मत्वं तर्हि नारायणोपनिषदि शुद्धिप्रार्थनवाक्ये श्रुतानामप्यन्नमयादीनां ब्रह्मत्वं स्यात् । अविशेषात् । अन्यथैषामपि न स्यादित्यत आह ॥ अन्नमयेति ॥ संज्ञाभेदात् । अन्नादीनामन्नमयादीनां चेति शेषः । अथैष इत्येतत्तु प्रथमाधिकरण एव विवृतम् । तथाच साधकाभावाद्बाधकसद्भावाच्च न तेषां ब्रह्मत्वम् । स्थानद्वयोक्तानां तूभयसद्भावाद्ब्रह्मत्वमिति भावः । भगवन्मूर्तिविशेषा इत्येव वक्तव्ये यत्कोशान्तर्गता इत्याह तद्वक्ष्यमाणानुपपत्तिशङ्कानिराससूचनार्थमिति ज्ञातव्यम् ।

नन्वेवमन्नमयादीनां ब्रह्मत्वे अन्योंतर आत्मेत्ययुक्तम् । ब्रह्मणश्चाभिन्नत्वेन व्याप्तत्वेन चान्यत्वांतरत्वयोरभावादित्यत आह ॥ अन्यइति ॥ यद्वा ननु नान्नमयादीनां ब्रह्मत्वं सम्भवति । तेषामन्योन्तर आत्मेत्यन्यत्वान्तरत्वयोरुक्तत्वात् । ब्रह्मणश्च निर्भेदत्वस्य न स्थानतोपीत्यधिकरणे प्रतिपादितत्वेनान्यत्वादेरसम्भवादित्यत आह ॥ अन्यइति ॥ तथाचकोशगतान्यत्वान्तरत्वे तदन्तर्गते ब्रह्मण्युपचर्येते इति भावः । तर्ह्युपचार एव न मुख्यावृत्तिरित्यत आह ॥ भगवत इति ॥ एवं च यत्परेणोक्तं श्रुतिसूत्राण्यन्यथा योज्यानीति तन्न । उक्तरीत्या श्रुत्यादिविरोधाभावादित्याह ॥ भगवत इति ॥ तस्मादिति ॥ ननु मया युक्तयैव व्याख्यायन्त इत्यत आह ॥ अनन्ततेति ॥ ननु सूत्राण्यनिर्णीतत्वादेव व्याख्यायन्त इत्यत आह ॥ उक्तं चेति ॥ नन्वस्याधिकरणस्यैतदुपनिषदुक्तशुद्धब्रह्मपरत्वात्सूत्रास्वारस्यमङ्गीकर्तव्यमित्यत आह ॥ यच्चोक्तमिति ॥ ननु श्रुतेरनुवादपरत्वात्सूत्रस्यान्यथा योजनीयत्वान्न शुद्धपरत्वहानिरित्यत आह ॥ किञ्चेति ॥

तात्पर्यचन्द्रिका

केचित्तु "तस्यैष एव शारीर आत्मे"ति शारीरत्वेन जीव एवानन्दमय इति प्राप्ते "सैषानन्दस्ये"त्यारभ्य निरतिशयदशाशिरस्कस्यानं- दस्याभ्यासात्तस्य चानन्तदुःखमिश्रपरिमितसुखलवभागिनि जीवेऽनुपपत्तेस्तदाश्रय आनन्दमयः परमात्मा । विज्ञानमयस्तु जीवः । अन्नमयादयस्तु त्रयः कोशा इति सिद्धान्त इत्याहुः । तन्न । पूर्वपक्षिणापि जीवतयाऽनङ्गीकृतप्राणमयादिसाधारणेन शारीरत्वेन जीवत्वशङ्कानुदयात् । श्रूयते हि प्राणमयादावपि "तस्यैष एवे"ति शारीरत्वम् । सिद्धान्तोप्ययुक्तः । आनन्दमयस्य ब्रह्मत्वे ब्रह्मणः पुच्छत्वाद्यनुपपत्तीनामपरिहारात् । ब्रह्मस्वरूपमेव शिरःपक्षपुच्छादिना रूप्यत इति चेत् । रूपणं यद्यध्यासस्तर्हि श्रुतेरप्रामाण्यमतिप्रसङ्गश्च । यदि तु सदृशतयोक्तिस्तदा मुख्यार्थत्यागस्सादृश्याभावश्च । न हि ब्रह्मस्वरूपं शिरआदिसदृशम् ।

किंच विज्ञानमयस्य जीवत्वे "विज्ञानं देवाः सर्वे ब्रह्मज्येष्ठमुपासते विज्ञानं ब्रह्म चेद्वेद तस्माच्चेन्न प्रमाद्यति शरीरे पाप्मनो हित्वा सर्वान्कामान्समश्नुत" इत्यादेरयोगः । "विज्ञानं यज्ञं तनुत" इत्यादिकं तु ब्रह्मणः सर्वकर्तृत्वात् "यज्ञभृद्यज्ञकृद्यज्ञी"त्यादेश्च युक्तम् । अन्नमयादेः कोशत्वं च निरस्तम् ।

(तात्पर्यचन्द्रिका)

नन्वन्नमयाद्युपदेशानन्तरं ''अन्योंतर आत्मे''त्युक्तेरानन्दमयोपदेशानन्तरं तदनुक्तेरानन्दमय एव ब्रह्म न त्वन्नमयादय इति चेत् तर्हि छान्दोग्ये ''यो वै भूमा तत्सुख''मिति भूमोपदेशानन्तरं ''अथात आत्मादेश'' इत्युक्तेस्तदनन्तरं चान्यानुक्तेर्भूमा ब्रह्म न स्यात् । ''यत्र नान्यत्पश्यति'' इत्यादिब्रह्मलिङ्गाद्भूम्नो ब्रह्मत्वे त्वन्नमयादिरपि ब्रह्मशब्दाभ्यासादिना ब्रह्मास्तु । ननूत्तरानुवाकेऽन्नप्राणमनोविज्ञानानन्तरं ''तद्विज्ञाय पुनरेव वरुणं पितरमुपससारे''ति पुनरुपसत्तिवत् ''आनन्दो ब्रह्मेति व्यजाना''दित्यानन्दज्ञानानन्तरं पुनरुपसत्तेरभावेनानन्दस्य ब्रह्मत्वात् अन्नप्राणमनोविज्ञानानन्तरं श्रुतेनानन्देनान्नमयप्राणमयमनोमयविज्ञानमयानंतरं श्रुतस्यानन्दमयस्य स्थानप्रमाणेनाभेदादानन्दमय एव ब्रह्म । अन्नमयादयस्तु तद्द्वारभूता इति चेन्न । अन्नादीनां द्वारत्वेपि पुनरुपसत्त्ययोगस्योक्तत्वात् । किंचैवं छान्दोग्ये'' यथा सोम्य मधुमधुकृतो निस्तिष्ठन्ती''त्यादेरनन्तरं ''भूय एव मा भगवान्विज्ञापयत्वि''ति श्रवणात्तत्रोक्तमब्रह्म ''पुरुषं सोम्योत हस्तगृहीत'' मित्यादेरनन्तरं तदश्रवणात्तत्रोक्तमेव ब्रह्म स्यात् । ''यथा सोम्य मध्वि''त्यादौ ''ऐतदात्म्यमिदं सर्व''मित्यादिब्रह्मलिङ्गादिना तत्रोक्तस्य ब्रह्मत्वे त्वत्रापि ''अन्नं ब्रह्मेति व्यजानात् । अन्नाद्धचेव खल्विमानि भूतानि जायन्त'' इति ब्रह्मश्रुत्यादिनाऽन्नादिकमपि ब्रह्मास्तु ।

प्रकाशिका — रामानुजमतं निराकरोति ॥ केचित्त्विति ॥ साधारणेनेति ॥ तथाच हेतोर्व्यभिचाराच्च पूर्वपक्षोदय इत्यर्थः ॥ अतिप्रसङ्गश्चेति ॥ ब्रह्मलिङ्गानामपि जीवेऽध्यासम्भवेन कुत्रापि सिद्धान्तोन्मेषो न स्यादिति भावः ॥ विज्ञानं देवा इति ॥ इत्यादेरिति ॥ ब्रह्मशब्दस्य ज्येष्टत्वस्य सर्वदेवोपास्यत्वस्य मुक्तिहेतुत्वस्यायोग इत्यर्थः । यज्ञादिकर्मकर्तृत्वरूपजीवलिङ्गस्य गतिमाह ॥ विज्ञानमिति ॥ ''यज्ञभृद्यज्ञकृद्यज्ञी यज्ञभुग्यज्ञसाधनः'' इति भारतोक्तेरित्यर्थः । यदपि त्रयाणां कोशत्वमिति तदपि नेत्याह ॥ अन्नमयादेरिति ॥ ब्रह्म न स्यादिति ॥ तथाच भूमाधिकरणविरोध इति भावः । आनन्दमयमात्रस्य ब्रह्मत्वे साधकान्तरमाशङ्क्य निराह ॥ ननूत्तरेति ॥ स्थानप्रमाणेति ॥ यथा संख्याम्नानरूपेणेत्यर्थः ॥ उक्तत्वादिति भृगर्वरुणोपदिष्टानां द्वारत्वं न वेति चेत्यादिनेति भावः । उपलक्षणमेतत् । अन्यथोपपत्तेरुक्तत्वादिति ध्येयम् । प्रतिबन्धा च पुनरुपसत्तिं समाधत्ते ॥ किंचैवमिति ॥

''मधुमधुकृतो निस्तिष्ठन्ति'' नानात्ययानां वृक्षाणां रसानां समवहारमेकतां गमयन्ति । ते यथा तत्र न विवेकं लभन्त इति दृष्टान्तपूर्वं ''एवमेव खलु सोम्येमाः प्रजाः सति सम्पद्य न विदु''रित्युद्दालकोपदिष्टेपि ब्रह्मणि श्वेतकेतुर्विशेषजिज्ञासया ''भूय एव मा भगवान्विज्ञापय''त्विति बहुकृत्वः पुनःपुनः पृष्टवानिति तत्रोद्दालकेनोक्तमब्रह्म स्यादिति भावः । तदश्रवणात् भूय एवेति पुनः प्रार्थनस्याश्रवणादित्यर्थः ।

पाण्डुरङ्गि — ननु पञ्चानां ब्रह्मत्वमित्ययुक्तम् । आनन्दमयस्यैव ब्रह्मत्वाद्विज्ञानमयस्य जीवत्वादन्नादीनां तु कोशत्वादिति रामानुजीयाः । तन्मतं दूषयितुमनुवदति ॥ केचित्त्विति ॥ सैषानन्दस्येत्यारभ्येति ॥ उपलक्षणं चैतत् । यतो वाचो निवर्तन्त इत्यनेनेत्यपि द्रष्टव्यम् । तदाश्रयः निरतिशयदशाशिरस्कानन्दाश्रय इत्यर्थः । अत्र पूर्वपक्षस्यायुक्तत्वादधिकरणारम्भो न युक्त इत्याह ॥ पूर्वपक्षिणापीति ॥ तथाच शारीरत्वस्यान्नमयेपि विद्यमानत्वाद्व्यभिचारित्वेन न तेन पूर्वपक्षकरणं युक्तमिति भावः । ननु न शारीरत्वं प्राणमयादेरित्यत आह ॥ श्रूयते हीति ॥ ननु न पुच्छत्वाद्यनुपपत्तिः । प्रियादिवाक्यैर्ब्रह्मस्वरूपस्यैव शिरआदिविशिष्टत्वेन निरूपणादिति शङ्कते ॥ ब्रह्मेति ॥ निरूपणमध्यासो वा सादृश्योक्तिर्वा । नाद्य इत्याह ॥ रूपणं हीति ॥ अप्रामाण्यमिति ॥ अध्यस्तार्थप्रतिपादकत्वादिति भावः ॥ अतिप्रसङ्गश्चेति ॥ अन्नमयादेरपि शिरःपक्षपुच्छादिना रूपेणाध्यस्तत्वेन तस्याप्यानन्दमयवद्ब्रह्मत्वापत्त्या कोशत्वोक्तिरयुक्तेत्यतिप्रसङ्गश्चेत्यर्थः । द्वितीयं प्रत्याह ॥ यदि त्विति ॥ सादृश्यमपि नास्तीत्याह ॥ सादृश्येति ॥ नन्वेवं विज्ञानं यज्ञं तनुत इत्यत्र विज्ञानमयस्य कर्मकर्तृत्वं प्रतीयते । तच्च विज्ञानमयस्य ब्रह्मत्वेऽयुक्तम् । तस्य कर्तृत्वाद्यभावादित्यत आह ॥ विज्ञानमिति ॥ अस्तु तर्हि तस्य ब्रह्मत्वमन्नमयादेस्तु कोशत्वमेवेत्यत आह ॥ अन्नमयादेरिति ॥ नन्वन्नमयादयो न ब्रह्म । तदनन्तरं ब्रह्मोद्देशात् । यदनन्तरं यदुपदिश्यते तत्तन्न भवति । यथा शाखोपदेशानंतरं चन्द्रोपदेशान्न चन्द्रः शाखेति । तथाचान्नमयादयो न ब्रह्म । किं त्वानन्दमय एवेत्याशयेन शङ्कते ॥ नन्विति ॥ तर्हीति ॥ तदनन्तरं ब्रह्मोद्देशादिति हेतोर्व्यभिचारित्वान्न तेन ब्रह्मत्वाभावसाधनं युक्तमिति भावः ॥ पुनरुपसत्त्ययोगस्येति ॥ भृगुर्वरुणोपदिष्टानां द्वारत्वं न वेत्ति चेत्तर्हि पुनरुपसत्त्ययोगः । वेत्ति चेन्नानन्दं ब्रह्मेति व्यजानादिति प्रयोगः स्यादित्युक्तत्वादित्यर्थः ।

तात्पर्यचन्द्रिका

किञ्चाद्यसूत्रे यदि भास्करमत इवानन्दमात्राभ्यासो हेतुस्तदा ब्रह्मत्वासिद्धिः । तस्य जीवेपि सम्भवात् । निरतिशयत्वविशिष्टस्य चाभ्यासोऽसिद्धः । शतगुणितोत्तरक्रमेण गुणितत्वं तु नाभ्यासशब्दस्याभिधेयम् । यत्तु ब्रह्मशब्दाभ्यासो हेतुरिति यादवप्रकाशीयं मतं तदप्ययुक्तम् । तन्मते ब्रह्मत्वेनानङ्गीकृतविज्ञानमयादावपि ब्रह्मशब्दाभ्यासस्य सत्त्वात् । द्वितीयसूत्रं चायुक्तम् । प्रायपाठबाधात् । ननु प्राणमय एव विकारार्थत्वं त्यक्तमिति चेत्तर्हि तत्र मयटः स्वार्थिकत्वाद्वैयर्थ्यम् । विज्ञानमयेपि तत्प्रसङ्गश्च । यच्चोक्तं विज्ञानमये मयटः सम्बन्धोर्थः । वैयर्थ्यादप्यमुख्यार्थत्वस्य ज्यायस्त्वादिति । तन्न । अन्नमये विकारार्थः प्राणमयमनोमययोः स्वार्थिको विज्ञानमये सम्बन्धार्थ आनन्दमये प्राचुर्यार्थ इति वैरूप्यप्रसङ्गात् । न च प्राणमयादावपि सम्बन्धार्थता । प्राणादेः प्राणादिसम्बन्धाभावात् । प्राणशब्दस्याप्रसिद्धार्थत्वे तु वरं परमात्मपरत्वम् । एवं सूत्रान्तरेष्वप्यनुपपत्तिरूह्या ।

प्रकाशिका — सूत्रार्थमपि निराचिकीर्षुरभ्यासादिति किमानन्दमात्राभ्यासो हेतुर्निरतिशयत्वविशिष्टो वेति हृदि कृत्वा क्रमेण निराह ॥ किंचेति ॥ असिद्ध इति ॥ यतो वाचो निवर्तन्त इत्यत्र तादृशस्य सकृदेव श्रवणाभ्यासादिति भावः । ''सैषानन्दस्येत्यारभ्योत्तरोत्तराधिक्येनानन्दस्याभ्यासोस्तीत्यत आह ॥ शतेति ॥ प्रायपाठेति ॥ विकारशब्दान्नेति चेदित्यस्य त्वयानन्दमयमात्रविषयत्वेनोक्त्या इतरेषु विकारार्थत्वस्वीकारादिति भावः । ननु सम्बन्धे मयटो नानुशासनमित्यत आह ॥ वैयर्थ्यादिति ॥ ऊह्येति ॥ तथाहि । ''तद्धेतुव्यपदेशाच्चे''त्यस्य ''एषह्येवानन्दयाती''ति जीवानन्दहेतुव्यपदेशादानन्दमयो ब्रह्म । न हि स्वस्यैव स्वानन्दहेतुत्वं युक्तमित्यर्थ उक्तः । स न युक्तः । जीवानन्दहेतुत्वेनानन्दमयस्य जीवभेदसिद्धावपि ब्रह्मत्वासिद्धेः । अब्रह्मणोपि वनितादेर्जीवानन्दहेतुत्वदृष्टेः । आद्यसूत्रानन्तर्यप्रसङ्गाच्च ।

यदपि ''सत्यं ज्ञानमनन्तं ब्रह्मेति मन्त्रवर्णोदितं ब्रह्मैव तस्माद्वा एतस्मादात्मन इत्यारभ्यानन्दमय इति गीयत इति मान्त्रवर्णिकसूत्रार्थ'' इति तदपि न । मान्त्रवर्णिकब्रह्मण आनन्दमय इव भाष्याद्युक्तदिशाऽन्नमयादिष्वपि गीयमानत्वेन तेषामब्रह्मत्वायोगात् । यदपि

''नेतरो जीवो मांत्रवर्णिक इति मन्तव्यम् । ब्रह्मणा विपश्चितेत्युक्तविपश्चित्त्वरूपसार्वज्ञानुपपत्तेरिति पञ्चसूत्रार्थ'' इति । तदपि न । अन्नमयादीनामब्रह्मत्वेप्युक्तविपश्चित्त्वानुपपत्तेस्तुल्यत्वात् । यदपि ''भीषास्माद्वातः पवत इत्यादिना प्रशासितव्यवर्गाद्वायुसूर्यादेरानन्दमयस्य प्रशासितृत्वेन भेदव्यपदेशादानन्दमयो ब्रह्मेति षष्टार्थ इति'' तदपि न । ब्रह्मविदाप्नोतीत्युपक्रान्तब्रह्मविषयस्य भेदव्यपदेशस्यान्नमयादिसाधारणत्वात् । यदपि ''सोकामयतेत्यारभ्य स इदं सर्वमसृजतेति कामादेव सर्गश्रवणादस्यानन्दमयस्य सृष्टौ नानुमानिकप्रधानापेक्षास्तीति सप्तम्यर्थ'' इति । तदपि न । अनुमानपदस्य लक्षणाप्रसङ्गात् । भेदसूत्रानन्तर्यहेत्वभावाच्च । कामादेव सर्गश्रवणादित्याद्यध्याहारप्रसङ्गाच्च । यदपि ''रसो वै सः । रसं ह्येवायं लब्ध्वानन्दी भवतीति शास्त्रं रसशब्दनिर्दिष्टेऽस्मिन्नानन्दमयेऽस्य जीवस्य तल्लाभादानन्दयोगं शास्तीत्यष्टमार्थ'' इति । तदप्यचारु । रसं ह्येवायमिति शास्त्रमप्यन्नरसमय इति रसशब्दनिर्दिष्टेऽन्नमय एव जीवस्यानन्दयोगं शास्तीति तस्यैव ब्रह्मत्वापत्तेरित्यूहनीयेत्यर्थः । एतेन यत्केनचित्प्रलपितं पूर्वाधिकरणे जगत्कारणत्वं प्रधानेनातिव्याप्तिमिति तत्प्रत्युक्तम् । इदानीं जीवेनातिव्याप्तमिति वक्तुमिदमारभ्यते । तथाहि । अयमानंदमयो जीवोथ शिव इति विशये मयटो विकारार्थतयाऽऽनन्दः ब्रह्मेति श्रुत्याऽऽनन्दरूपब्रह्मकार्यतया जीवस्यतद्विकारत्वसम्भवात् ''आनन्दमया मे शुध्यन्ता''मित्युक्तशुद्धिप्रार्थनसम्भवाच्च जीव एवानन्दमयः । अयं चात्मन आकाश इति भूतादिहेतुत्वेनोक्तात्मैव । अन्योंतर आत्मानन्दमय इति श्रवणादस्यैव भूतादिकारणत्वमिति प्राप्ते ''सैषानन्दस्ये''त्यारभ्य मानुषादिप्रजापतिपर्यन्तं तत्तदानन्दस्योपर्युपरि शतगुणत्वमभिधाय ''स एको ब्रह्मण आनन्द'' इति ब्रह्मानन्दस्य निरतिशयत्वेनाभ्यासात् । शुद्धस्यापि शिवस्य घनापगमेन चन्द्रस्य प्रसाद इव मलापनयनेन शुद्धिसम्भवाच्च शिव एवानन्दमयः । विज्ञानमयस्तु जीव एव । ब्रह्मपुच्छं प्रतिष्ठेति च ब्रह्मशब्दस्य प्रणवपरत्वात्तस्य च शिववाचकत्वात् ब्रह्म प्रणवः प्रतिष्ठा शिवस्य वाचकतयाऽऽधार इत्यर्थतयोपपन्नं मयट् प्राचुर्यार्थ इति । यथोक्तं ''आकाशादेः कारणमानन्दमयस्तु जीवः स्यात् । यदयं ब्रह्मविकारो ब्रह्माधारश्च शोध्यश्च । निरतिशयानन्दयुतो ब्रह्मैव प्रचुरता तु मयडर्थः । पुच्छं ब्रह्म प्रणवः शुद्धिश्च विरोध्यपगमो विधुव''दिति । तन्निरस्तम् ।

त्वन्मते पूर्वाधिकरण एव तन्निष्ठसूत्रे जीवेति व्याप्तेर्निरासात् । यथोक्तं तर्हि जीवोस्तु । तन्न । तन्निष्ठस्यामृतोक्तेः । न हि शिवमपहायान्यनिष्ठा विमुक्ता इत्यादिपूर्वपक्षोप्ययुक्तः ।

(प्रकाशिका)

जीवे ब्रह्मविकारत्वस्य दुर्वचत्वात् । विज्ञानं ब्रह्मेति श्रुत्या विज्ञानरूपब्रह्मकार्यतया तद्विकारत्वस्य पूर्वपक्षिणा जीवत्वेनानङ्गीकृते बुद्धित्वेनाङ्गीकृते विज्ञानमये व्यभिचाराच्च । आनन्दमयेन जीवशुद्धिप्रार्थने सति म इत्यस्मच्छब्दायोगाच्च । आनन्दमयकोशस्य शुद्धिप्रार्थनालाभाच्च । आत्मा मे शुध्यन्तामित्यस्य वैयर्थ्याच्च । सिद्धान्तोप्ययुक्तः । निरतिशयानन्दाभ्यासस्योक्तरीत्याऽसिद्धेः । विकारार्थमयट्प्रायपाठविरोधाच्च । ब्रह्मशब्दस्य पूर्णत्वार्थकस्य प्रणवेऽप्रसिद्धेश्च । प्रणवार्थत्वेपि तस्य विष्णुवाचिताया मूलग्रन्थेषु तत्र तत्र समर्थनाच्च । ''ब्रह्मसृष्ट्या तु बृंहयत् । पुच्छं प्रधानवायौ च ब्रह्माख्ये संस्थितं सदे''ति वचनविरोधाच्च । ''पुच्छं संकर्षणः प्रोक्त'' इति भाष्योदाहृतवचनविरोधाच्च । ''तस्मिन्नानन्दरूपोसौ स्थितो नारायणः सदे''ति स्मृतेरानन्दमयस्य विष्णुत्वाच्च । अस्य प्रकरणस्य तैत्तिरीयभाष्यादौ विष्णुपरत्वेन प्रमाणेनैव व्याख्यातत्वाच्च । आत्मब्रह्मादिशब्दानां मुक्तगम्यत्वादिलिङ्गानां च भाष्यादौ तत्र तत्र विष्ण्वेकनिष्ठत्वस्य समर्थनाच्च । शिवपरत्वस्य नेतर इत्यत्र सूत्रकृतैव निरासाच्च । यत्त्वन्नमयादयः पञ्चापि न कोशाः किन्तु ब्रह्मविष्णुरुद्रेश्वरसदाशिवसंज्ञाः पञ्च चेतना इत्यादिजल्पनं तत् प्रमाणशून्यं प्रमाणविरुद्धं च । यदपि नेतर इत्यादिसूत्रचतुष्टयमधिकरणान्तरं कृत्वा ''यतः प्रसूता जगतः प्रसूती''ति वाक्यमुदाहृत्य चतुर्मुखपरत्वं पूर्वपक्षयित्वा शिवपरत्वेन सिद्धान्त इत्युक्तं तदपि न । तथात्वे नेतर इति निषेधरूपेण सूत्रविन्यासायोगेन पूर्वशेषत्वस्यैवौचित्यात् । यतः प्रसूतेत्यादेर्भाष्यादौ विष्णुपरत्वसमर्थनस्य प्रागेवास्माभिः प्रदर्शितत्वात् । एवमन्यत्तदीयदुर्भाषणदूषणमूहनीयम् ।

पाण्डुरङ्गि — ननु द्वारत्वज्ञानेपि विशेषजिज्ञासया पुनरुपसत्तिरित्यत आह ॥ किञ्चेति ॥ तस्येति ॥ आनन्दमात्रस्येत्यर्थः । ननु निरतिशयत्वविशिष्टानन्दाभ्यासो हेतुः । तथाच न व्यभिचार इत्यत आह ॥ निरतिशयत्वेति ॥ ननु शतगुणितत्वविशिष्टत्वमेवाभ्यासशब्दार्थः । तस्य च प्रकृतेपि सत्त्वान्नाभ्यासस्यासिद्धत्वमित्यत आह ॥ शतगुणितेति ॥ ननु नानन्दशब्दाभ्यासो हेतुः । किन्तु ब्रह्मशब्दाभ्यासः । तस्यानन्दमय एव सत्त्वादन्यत्र चासत्त्वादानन्दमयस्यैव ब्रह्मत्वं नान्येषामिति यादवप्रकाशीयं मतमनुवदति ॥ यत्त्विति ॥ विज्ञानमयादौ व्यभिचारान्न तेन ब्रह्मत्वसमर्थनमुचितमित्याह ॥ त्वन्मत इति ॥ प्रायपाठेति ॥ अन्नमयादौ मयटो विकारार्थत्वमानन्दमये च प्राचुर्यार्थत्वमिति प्रायपाठविरोध इत्यर्थः । ननु यद्यन्नमयादिचतुष्टये विकारार्थत्वमानन्दमय एव

प्राचुर्यार्थत्वमित्यङ्गीकारः स्यात्तर्हि प्रायपाठविरोधः स्यात् । न चैवम् । प्राणमये विकारार्थत्वस्य त्यक्तत्वादित्याशङ्कते ॥ नन्विति ॥ एवं हि प्राचुर्यार्थत्वस्यासम्भवाद्विकारार्थत्वस्य स्वयमेव त्यक्तत्वात्स्वार्थिकत्वं वक्तव्यम् । एवं च वैयर्थ्यं स्यादित्याह ॥ तर्हीति ॥ ननु सम्बन्धार्थत्वे लक्षणा स्यादित्यत आह ॥ वैयर्थ्यादिति ॥ ननु प्राणशब्देनान्नस्यैव गृहीतत्वात्तस्य मयटा सम्बन्धबाधान्नानुपपत्तिरित्यत आह ॥ अप्रसिद्धार्थत्वे त्विति ॥ उक्तन्यायमन्यत्राप्यतिदिशति ॥ एवमिति ॥

तात्पर्यचन्द्रिका

तस्मात् —

ब्रह्मशब्दात्समस्तात्तृत्वादिलिङ्गाच्च वाक्यतः ।
पूर्वोत्तरस्मान्मन्त्रस्थब्रह्मप्रकरणादपि ॥ १ ॥
भृगुवल्लीसमाख्यानात् मुक्तगीतावसानकात् ।
स्थानप्रमाणतश्चैव पञ्चानां ब्रह्मता स्थिता ॥ २ ॥

उक्तं हि तैत्तिरीयभाष्ये —

शन्नो मित्रादिभिर्वाक्यैस्तैरेव हरिमस्तुवत् ।
मुक्तगीतावसानैस्तु स्तुतस्तेन जनार्दन
इत्यस्य स्थानस्य ब्रह्मपरत्वम् । तथा

ब्रह्मप्रश्नोत्तराद्ब्रह्मलक्षणाद्ब्रह्मशब्दतः ।

विज्ञातत्वाच्च तपसा मुक्तगम्यत्वतस्तथा ॥ १ ॥
वाधूलीयसमाख्यानादनुव्याख्यानिरूपितात् ।
भृगुवल्लयुदितस्यान्नप्राणादेर्ब्रह्मता स्थिता ॥ २ ॥

उक्ता ह्यनुव्याख्याने समाख्या ''तच्च वाधूलशाखायामष्टरूपमुदाहृत''मिति ।

प्रकाशिका — एवं परमतानि निरस्य स्वाभिमताधिकरणप्रमेयं श्रुत्यादिप्रमाणषट्कपूर्वकं सङ्गृह्याह ॥ तस्मादिति ॥ मतान्तराणामसम्भवादित्यर्थः । सौत्रसाधकस्य

(प्रकाशिका)

श्रौतसाधकान्तरोपलक्षणत्वादनेकसाधकोक्तिः । तदुक्तं ''कम्पना''दित्यत्र टीकायां ''तद-विहायैव लिङ्गान्तरस्याप्युक्तत्वात् । एतदन्यत्राप्यनुसन्धेय''मिति ॥ ब्रह्मशब्दादिति ॥ ''येन्नं ब्रह्मोपासते ये प्राणं ब्रह्मोपासते आनन्दं ब्रह्मणो विद्वान् विज्ञानं ब्रह्म चेद्वेद अस्ति ब्रह्मेति चे''दिति पञ्चस्वपि प्रकरणेषु प्रत्येकं ब्रह्मशब्दश्रवणादित्यर्थः । ब्रह्मणः शब्द इत्यपि विगृह्य आत्मशब्दादित्यपि ध्येयम् । लिङ्गाच्चेत्येकवचनं समुदायाभिप्रायेण । तथाहि । अन्नमये ''अद्यतेत्ति च भूतानी''ति सर्वात्तृत्वरूपसंहर्तृत्वं सर्वाद्यत्वरूपसर्वोपजीव्यत्वं ''अन्नं हि भूतानां ज्येष्ठ''मिति ज्येष्ठत्वं ''सर्वं वै तेन्नमाप्नुवन्ती''त्युपास-कप्राप्यत्वमित्यादीनि लिङ्गानि । तथा प्राणमये ''प्राणं देवा अनुप्राणंती''ति सर्वदेवादिचेष्टकत्वं ''सर्वमेत आयुर्यन्ति ये प्राणं ब्रह्मोपासत'' इति सर्वायूरूपमोक्षहेतु-ज्ञानविषयत्वमित्यादीनि । मनोमये च ''यतो वाचो निवर्तन्त'' इति वाङ्मनसागोचरत्वं ''न बिभेति कुतश्चने''ति भयाभावरूपमुक्तिहेतुवेदनविषयत्वमित्यादीनि । विज्ञानमये च ''विज्ञानं देवास्सर्वे ब्रह्मज्येष्ठमुपासत'' इति सर्वदेवोपास्यत्वं ज्येष्ठत्वं ''तस्माच्चेन्न प्रमाद्यति। शरीरे पाप्मनो हित्वे''त्युक्त- मुक्तिहेतुत्वमित्यादीनि । आनन्दमये च ''सोकामयते''ति सङ्कल्पपूर्वकं सर्वस्रष्टृत्वं सर्वान्तरत्वं ''अस्ति ब्रह्मेति चेद्वेद सन्तमेनं ततो विदु''रित्युक्तमुक्तिहेतुज्ञानविषयत्वं चेत्यादीनि लिङ्गानि सन्ति । अतो लिङ्गात् लिङ्गसमुदायादित्यर्थः । ''स्वादिष्वसर्वनामस्थान'' इति सूत्रेण ''उरः प्रभृतिभ्यःक''बि-त्युक्तकप्प्रत्ययावधिषु स्वादिषु पूर्वस्य पदत्वविधानादिह च त्वप्रत्यये परतः पूर्वस्य पदत्वान्न यतिभङ्गः शङ्कनीयः । उक्तं च सुधायां ''इत्यादिनाध्यायेन वदत्यज'' इत्यत्र ॥ वाक्यत इति ॥ ''को ह्येवान्यात्कः प्राण्याद्यदेष आकाश आनन्दो न स्यात्'' इत्याकाशाख्य-विष्णोरानन्दमयत्वरूपपूर्णानन्दत्वे विश्वचेष्टकत्वहेतुप्रतिपादकवाक्यादिति तृतीयसूत्रार्थः । एतच्चानन्दमयासाधारणम् । यद्वा ''अन्नाद्वै प्रजाः प्रजायन्ते प्राणं देवा अनुप्राणंति यतो वाचो निवर्तन्ते विज्ञानं यज्ञं तनुते असन्नेव स भवति सोकामयत'' इत्यादिरूपात्प्रति-प्रकरणमन्नमयादिमहिमप्रतिपादकवाक्यादित्यर्थः । न ह्यन्नमयादीनामब्रह्मत्वे तन्महि-मोक्तिपरब्रह्मश्रुतिलिङ्गोपेतवाक्यसमभिव्याहारो युज्यत इति भावः । मन्त्रस्थं सत्यं ज्ञानमनन्तमिति मन्त्रवर्णप्रतिपादितमेव ब्रह्म —

ब्रह्मवित्परमाप्नोतीति यत्प्रथमसूचितम् ।
तदेव मन्त्रवर्णेन सत्यं ज्ञानमनन्तवत् ।

लक्षितं तत्र सत्यत्वं सृष्ट्यान्नप्राणयोरपि ।
उक्तं ज्ञानं तु मनसा विज्ञानेनाप्युदीरितम् ।
अनन्तत्वं तथानन्दमय वाचाप्युदाहृतम् ॥

इत्यनुव्याख्यानोक्तदिशा ''तस्माद्वा एतस्मा''दित्यादिना ग्रन्थेन ''गीयत'' इति पूर्वस्मात् ''यतो वाचो निवर्तन्त'' इत्युत्तरस्मान्मन्त्रवर्णस्थब्रह्मणः प्रकरणादिति मान्त्रवर्णिकसूत्रार्थः । यद्वा पूर्वोत्तरस्मादिति वाक्यविशेषणम् । ''तस्माद्वा एतस्मा''दिति पूर्ववाक्यात् ''स य एवं वित् । अस्माल्लोकात्प्रेत्य । एतमन्नमयमात्मानमुपसङ्क्रामती''त्युत्तरवाक्याच्चेत्यर्थः । तस्माद्वा इत्यत्र भूतकारणत्वेनोक्तात्मान एव स वा एष इति परामृश्यान्नमयादित्वोक्तेः । तदुक्तम् ।

परामृशति तस्यैव पञ्चरूपत्ववित्तये ।
त्यक्त्वा भूतादिकं सर्वं स वा एष इति श्रुतिः ।
स इत्यात्मपदोद्दिष्ट एष जीवशरीरगः ॥

इति ''योगमन्नमयाद्यैर्यत्फलत्वेनास्य शंसती''ति च । तथाचान्नमयादेरब्रह्मत्वे ब्रह्मपरपूर्वोत्तरवाक्यसमभिव्याहारो न स्यादित्यर्थः । तेनास्मिन्नस्य चेति सूत्रार्थोपि सङ्गृहीतो भवति । मन्त्रस्थेत्यस्य तु मान्त्रवर्णिकब्रह्मप्रकरणादपीति प्रागुक्त एवार्थः ॥ भृगुवल्लीति ॥ अन्नं ब्रह्मेति व्यजानादित्यादौ श्रुतान्नादेरन्नमयादेश्चैकत्वस्य प्रागेवोक्तत्वादिति भावः ॥ मुक्तगीतेति ॥ ''एतत्सामगायन्नास्ते । हावुहावुहावु'' इत्यादिमुक्तकर्तृकगानान्तात् । अनेकप्रकरणजातं स्थानमिति ''शब्दादेवे''त्यत्र वक्ष्यमाणलक्षणात्स्थानप्रमाणाच्चेत्यर्थः । ब्रह्मतैवेत्यन्वयः । श्रुतिलिङ्गवाक्यप्रकरणानां ब्रह्मनिष्ठता भाष्यादौ स्पष्टा इहापि प्रागुक्तप्राया। स्थानसमाख्ययोस्तु तां क्रमेणाह ॥ उक्तं हीत्यादिना ॥ ब्रह्मपरत्वमित्यन्वयः ॥ अस्तुवदिति ॥

भृगुः पञ्चात्मकं पूर्णमन्नादिमयमच्युतम् ।
मुक्तगीतावसानैस्तु स्तुतस्तेन जनार्दनः ।
सुप्रीतः प्रददौ ज्ञानं स्वात्मभक्तिं च शाश्वतीम् ॥

इति स्मृत्येत्यर्थः ॥ ब्रह्मप्रश्नेति ॥ ''भृगुर्वै वारुणिः । वरुणं पितरमुपससार । अधीहि भगवो ब्रह्मेति । तस्मा एतत्प्रोवाच । अन्नं प्राणं चक्षुः श्रोत्रं मनो वाच''मित्यनेन

(प्रकाशिका)

ब्रह्माध्यापयेति भृगुणा पृष्टेन वरुणेन ब्रह्मप्रश्नस्योत्तरत्वेनोक्तत्वश्रवणादित्यर्थः । अब्रह्मत्वेऽसङ्गतिः स्यात् । न च द्वारत्वेन सङ्गतिः । निरस्तत्वादिति भावः । ''यतो वा इमानि भूतानि जायन्त'' इति साधारण्येन ''अन्नाद्धयेव खल्विमानि भूतानि जायन्ते प्राणाद्धयेवे''त्यादिना विशिष्य चोक्तात्सृष्टिस्थितिसंहारमोक्षहेतुत्वरूपलक्षणसमुदायादित्यर्थः । अन्नं ब्रह्मेति प्राणो ब्रह्मेति मनो ब्रह्मेत्यादिप्रत्येकं ब्रह्मशब्दश्रवणादित्यर्थः । ''स तपो तप्यत । स तपस्तप्त्वा । अन्नं ब्रह्मेति व्यजानात् । स तपस्तप्त्वा । प्राणो ब्रह्मेति व्यजानात् । स तपस्तप्त्वा । मनो ब्रह्मेति व्यजानात्'' इत्यादिनोक्ताच्छ्रवणानन्तरभाविना निदिध्यासनाख्यतपसा व्यजानादित्यपरोक्षीकृतत्वलिङ्गादित्यर्थः । न हि कोशादेः स्वभावसिद्धज्ञानस्य साक्षात्काराय तपोऽपेक्षितमिति भावः ॥ मुक्तेति ॥ स य एवं वित् । अस्माल्लोकात्प्रेत्य । एतमन्नमयमात्मानमुपसंक्रम्येत्यादिनाऽन्नप्राणादिपञ्चकज्ञानिनो लोकादेहात्प्रेत्येति मुक्तत्वमुक्त्वा प्राप्यत्वस्योक्तेरित्यर्थः । न चान्यज्ञानेनान्यप्राप्तिर्युक्तेत्यन्नादेरपि ब्रह्मत्वमिति भावः । अनुव्याख्यानिरूपितात्समाख्यानादित्युक्तम् । तदृर्शयति ॥ उक्तेति ॥ तस्यार्थः । ननु ब्रह्मवल्लचामनुक्तं चक्षुःश्रोत्रं मनो वाचमिति त्रितयमधिकमुपात्तम् । विज्ञानानन्दौ च नोक्तौ । तथाच शब्दभेदात्सङ्ख्याभेदाद्भृगुवल्ली कथं समाख्या स्यादिति शङ्कायां अनुक्तावपि विज्ञानानंदावध्याहार्यौ । तत्रोक्तं चक्षुरादित्रयं ब्रह्मवल्लचामपि ग्राह्यम् । आवापोद्वापाभ्यां ब्रह्मप्रतिपादनस्य शाखानां स्वभावत्वात् । तथाच स्थानद्वयेऽष्टौ रूपाणि सम्पद्यन्ते । अतो न भिन्नार्थत्वमिति । कुत एतदित्यतः समाख्याबलादितिभावेन ''तच्च वाधूलशाखाया''मित्युक्तमिति । वाधूलशाखावाक्यं तु''तस्माद्वा एतस्मादन्नरसमयात् । अन्योंतर आत्मा वाङ्मयः । तस्माद्वा एतस्माद्वाङ्मयात् । अन्योन्तर आत्मा चक्षुर्मयः । तस्माद्वा एतस्माच्चक्षुर्मयात् । अन्योंतर आत्मा श्रोत्रमयः । तस्मात्प्राणमयः । तस्मान्मनोमयः । तस्माद्विज्ञानमयः । तस्मादानन्दमय इति ही''ति तत्वप्रदीपोक्तं बोध्यम् ।

पाण्डुरङ्गि — इदानीमुपसंहारमुखेन कारिकाभ्यामन्नमयादिपञ्चकस्य ब्रह्मत्वसाधकहेतून्सङ्गृह्याह ॥ तस्मादिति ॥ वाक्यतः पूर्वोत्तरस्मादिति ॥ रसो वै सः । रसꣳह्येवायं लब्ध्वानन्दीभवति । यतो वाच इत्याद्युदाहृतवाक्यजातादित्यर्थः । मुक्तगीतावसानकात्स्थानप्रमाणत इति सम्बन्धः । तथाच मुक्तगीतावसानकस्यास्यैकस्थानत्वेन तत्रोक्तान्नमयादीनामपि ब्रह्मत्वमिति भावः । नन्वस्य मुक्तगीतावसानकस्यैकस्थानत्वमेवासिद्धम् । तथात्वेपि वा ब्रह्मपरत्वं कुत इत्यत उभयत्र सङ्गतिमाह ॥ उक्तं हीति ॥ शन्नो

मित्रादिभिर्वाक्यैस्तैरेव हरिमस्तुवदित्यस्य शेषभूतं भृगुः पञ्चात्मकं पूर्णमन्नादिमयमच्युतमिति वाक्यम् । तथा मुक्तगीतावसानैस्तु स्तुतस्तेन जनार्दन इत्यस्य शेषभूतं सुप्रीतः प्रददौ ज्ञानं स्वात्मभक्तिं च शाश्वतीमिति चोत्तरवाक्यं चात्र द्रष्टव्यम् । तेन विवक्षितार्थलाभः । अनुव्याख्यानिरूपितादिति प्रत्येकं सम्बध्यते ।

तात्पर्यचन्द्रिका

एवं च यथा ''दाक्षायणयज्ञेन यजेत साकं प्रस्थायी येन यजेते''त्यादौ दाक्षायणयज्ञसाकं प्रस्थायीयादिशब्दाः प्रकृत एव दर्शपूर्णमासयागआवृत्त्यादिगुणविध्यर्था न तु ततोतिरिक्तकर्मविधिपराः यथा वा भूमाधिकरणे ब्रह्मत्वेन निर्णीतात् ''सत्यं त्वेव जिज्ञासितव्य''मिति छान्दोग्योक्तात्सत्यादुपरिश्रुताः ''विज्ञानं त्वेव विजिज्ञासितव्यं मतिस्त्वेव विजिज्ञासितव्ये''ति विज्ञानमतिश्रद्धानिष्ठाकृत्यादिशब्दाः पूर्वोक्तसत्याख्ये ब्रह्मणि गुणविध्यर्थाः न तु वस्त्वंतरपराः एवमन्नमयादिशब्दा अपि प्रकृते ब्रह्मणि सर्वोपजीव्यत्वादिगुणविशेषविधानार्थाः न तु वस्त्वंतरपरा इति ब्रह्मैव नारायणवासुदेवाद्याख्यानन्दमयादिपञ्चरूपमिति ।

प्रकाशिका — ननु यजति ददाति जुहोतीत्यादाविवान्न- मयप्राणमयादौ शब्दभेदेनार्थभेदस्य न्याय्यत्वादेकस्य ब्रह्मत्वमन्येषामन्यत्वं वाच्यमित्यत आह ॥ एवं चेति ॥ सर्वेषां ब्रह्मत्वसाधके सतीत्यर्थः । गुणविशेषविधानार्था इत्यादिनान्वयः । तत्र पूर्वोत्तरमीमांसासिद्धौ दृष्टान्तावाह ॥ यथेत्यादिना ॥ द्वितीयस्य तृतीयपादे ''अयनेषु चोदनांतरं संज्ञोपबन्धा''दिति चतुर्थाधिकरणे दर्शपूर्णमासप्रकरणे श्रुतं ''दाक्षायणयज्ञेन स्वर्गकामो यजेत साकं प्रस्थायी येन यजेत पशुकाम'' इति वाक्यद्वयमुदाहृत्य किं दाक्षायणादिनामककर्मान्तरविधिरुत दर्शपूर्णमासयोरेव फलार्थं गुणविधिरिति संशये दाक्षायणादिसंज्ञकस्य गुणस्याप्रसिद्धेरुद्भिदादिवद्यजिसामानाधिकरण्येन नामत्वान्नामभेदेन वाऽभ्यासेन वा प्रकृतात्कर्मान्तरविधिरिति प्राप्ते लौकिकप्रसिद्ध्यभावेपि ''द्वे पौर्णमास्यौ द्वे अमावास्ये सह कुम्भीभिरभिक्रामती''त्यादिवाक्यशेषवशाद्दाक्षायणादिशब्दस्यावृत्तिसहप्रस्थानादिगुणपरत्वावसायेन कर्मनामत्वाभावाफलश्रवणेनाविशेषपुनः श्रुत्यभावाच्च फलार्थं गुणविधिरिति सिद्धान्तितम् । अत्र प्रकृतदर्शपूर्णमासापेक्षयातिरिक्तकर्मविधिपरत्वेन प्रतीता अपि दाक्षायणादिशब्दा यथा दक्षस्येमे दाक्षाः प्रयोगास्तेषामयनमिति व्युत्पत्त्या दाक्षायणशब्द आवृत्तिपरः तद्युक्तः प्रकृतो

(प्रकाशिका)

दर्शपूर्णमासात्मको यज्ञो दाक्षायणयज्ञ इति । यथा चामावास्यायागे द्वौ दोहौ सम्पाद्य चतसृणां दधिपयसोः कुम्भीनां सहप्रस्थापनं साकं प्रस्थायः । तद्युक्तो दर्शयागः साकं प्रस्थायीय इति व्युत्पत्तिमाश्रित्य स्वर्गपश्वादिफलाया वृत्तिसाकं प्रस्थायादिरूपगुणविध्यर्थः । तथात्रापि

भोग्यत्वमत्र चाद्यत्वमुपजीव्यतया हरेः ।
महाभोक्ता महाभोग्य इत्यर्थोऽन्नमये भवेत् ।
महाप्राणो महाबोधो महाविज्ञानवानपि ।

इत्याद्यनुव्याख्यानोक्तदिशा सर्वोपजीव्यत्वादिति गुणविशेषविधानार्था इत्यर्थः । प्रकृत एव प्रकरणप्राप्त एवेत्यर्थः ॥ यथा वेति ॥ अत्रैव तृतीयपादे ''भूमा सम्प्रसादा''दित्यत्र छान्दोग्ये नामादिप्राणपर्यन्तमुत्तरोत्तरातिशयितत्वेन तारतम्यमुक्त्वानन्तरं सत्यविज्ञानमति-श्रद्धानिष्ठाकृतिसुखशब्दितानाम्नायोच्यते ''यो वै भूमा तत्सुखम् । नाल्पे सुखमस्ती''ति । तत्र भूमा मुख्यप्राणो विष्णुर्वेति विशये प्राणप्रकरणात्प्राणादन्यस्योत्तमस्य प्रश्नप्रति-वचनाभ्यामनुक्तेश्च भूमा प्राण एवेति प्राप्ते ''यो वै भूमा तत्सुख''मिति निरुपपदसुखशब्देन पूर्णसुखत्वाभिधानात् ''एषतु वा अतिवदति यः सत्येनातिवदती''ति तुशब्देन प्राणादति-शयितत्वस्य सूचितत्वाद्भूमा विष्णुरिति सिद्धान्तयिष्यते । अत्र यद्यपि भूमा विष्णुरित्येवोच्यते न तु सत्यमिति । तथापि सत्यवाक्यस्थतुशब्देन सत्यस्यातिशयितत्वेन विष्णुत्वे सिद्धे तदभेदेन भूम्नोपि विष्णुत्वसिद्धेर्ब्रह्मत्वेन निर्णीतादित्युक्तम् । यद्यपीदं ''व्यतिहारो विशिषंति ही'' त्यत्रोच्यते तथाप्यस्याधिकरणस्य तदुक्ताक्षेपसमाधानार्थ-त्वादेवमुक्तम् । वक्ष्यते चैतत् भूमाधिकरणे ॥ गुणविध्यर्था इति ॥ तृतीयस्य तृतीये पादे ''सैव हि सत्यादय'' इत्यधिकरणे प्राणात्सत्यपदोदितो विष्णुरेवोत्तमः किमन्योप्यस्तीति विशये प्राणादुत्तमत्वेनोक्तात्सत्याद्विष्णोरप्युपरि विज्ञानमतिश्रद्धानिष्ठाकृतिसुखभूमाहं-कारात्मनामुपदिष्टत्वादन्योपीति प्राप्ते सत्यं त्वेव विजिज्ञास इति सत्याख्यविष्णोर्गुण-जिज्ञासायामन्यस्योक्तेरसङ्गत्या विज्ञानादयस्तद्गुणा एवोच्यन्त इति सिद्धान्तयिष्यते तद्वदित्यर्थः ॥ नारायणेति ॥ नारायणवासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धाख्यं पञ्चरूपं ब्रह्मैव क्रमेणानन्दमयविज्ञानमयमनोमयप्राणमयान्नमयशब्दैरुच्यत इत्यर्थः । एतेनैकस्याप्यनेकत्वं रूपविशेषैर्युक्तमित्युक्तं भवति । वक्ष्यते चैतद्गुहां प्रविष्टावित्यत्रेति सर्वमनवद्यम् ।

पाण्डुरङ्गि — अथैष ज्योतिरित्यादौ संज्ञाभेदेन कर्मभेदवदत्राप्यन्नमयादिरूपसंज्ञाभेदात्पञ्चानामपि भेद एवास्तु । तथाच तेषां कथं ब्रह्मत्वमित्यत आह ॥ एवं चेति ॥ न च तर्ह्यथैष ज्योतिरित्यत्रापि कर्मभेदो न स्यादिति वाच्यं यत्र संज्ञाभेदस्य प्रकृतगुणार्थत्वाभावः तत्रैव संज्ञया कर्मभेद इति भावः । प्रयोजनमाह ॥ यथेत्यादि ॥ लिङ्गाच्चेति सूत्रे श्रवणावृत्तेः कर्तव्यत्वे अन्नं प्राणं चक्षुः श्रोत्रं मनो वाचमिति पूर्वोक्तः अन्नं ब्रह्म प्राणो ब्रह्मेत्यादिरूपोऽसकृदुपदेशो लिङ्गम् । मननिदिध्यासनावृत्त्योस्तु कर्तव्यत्वे पुनरुपसत्त्यादिकं लिङ्गमिति द्रष्टव्यम् । तेन भाष्ये त्रितयावृत्तौ लिङ्गानुपदेशाट्टीकायां त्रितयावृत्तेः कर्तव्यत्वे लिङ्गप्रतिपादकत्वोक्तिरनुपपन्नेति निरस्तम् ।

तात्पर्यचन्द्रिका

टीकाक्षरार्थस्तु ॥ श्रुत्यधिकरणसङ्गती दर्शयतीति ॥ येन केनचित् पूर्वाधिकरणेन तद्विषयश्रुत्याच सङ्गतिरेवापेक्षितेत्याद्यसूत्रेण तद्विषयवाक्येन चाक्षेपिकी सङ्गतिरस्तीत्यर्थः । यद्वाऽत्र पूर्वपक्षे आद्यसूत्रतद्विषयवाक्योक्तजिज्ञासाक्षेपात्सिद्धान्ते च तत्समाधानात्तत्सङ्गती स्त इति प्रयोजनवानयं विचार इत्यर्थः । अत एवोत्तरत्र टीकायां ''किमर्थमानन्दमयस्य विष्णुत्वसमर्थन''मिति प्रश्नः ''ब्रह्मजिज्ञासासिद्ध्यर्थ''मिति परिहारश्च । एवमुत्तरत्रापि सङ्गतिटीका द्विधा व्याख्येया ॥ तस्मादुद्भूत इति ॥ शरीरिस्थानीयात्तदान्तरान्नारायणाख्यादानन्दमयाच्छरीरस्थानीयो बाह्यो वासुदेवाख्यो विज्ञानमयः प्रादुर्भूत इत्यर्थः ॥

इन्द्रबृहस्पत्यादीनामपि सूर्याधिष्ठातृत्वादिनेति ॥ तेषां सूर्यादुत्तमतया तन्नियामकत्वेनावस्थानं तदधिष्ठातृत्वम् । आदिशब्देन ''स एक इन्द्रस्यानन्दः स एको बृहस्पतेरानन्दः'' इतीन्द्रश्रुत्यादिकं विवक्षितम् । आनन्दप्रचुर इति यद्युच्यत इति ॥ प्राचुर्यस्य विशेषणतायामनानन्दाप्राप्तेः परैरप्यङ्गीकृतत्वात् ''प्रचुरानन्दत्वा''दिति वदता भाष्यकृता यथा प्रचुरानन्द इत्युक्तावनानन्दाप्राप्तिस्तथा श्रुतिसूत्रानुसारेणानन्दमय इति प्राचुर्यस्य विशेष्यत्वेनोक्तावपि तदप्राप्तिः । प्रकाशप्रचुरो रविरित्युक्तेपि सवितर्यंधकारलेशाप्रतीतेरिति सूचितमित्यर्थः । ननु विस्मृतकण्ठमणिरिति सिद्धान्तग्रन्थे नन्वित्यस्य इत्येवोच्यते नन्वित्यन्वयः । विमतानि शरीराणीति ॥

(तात्पर्यचन्द्रिका)

शरीरत्वहेतोर्जीवानामन्योन्यमभेदसाधकत्वेपि विशिष्टरूपस्याभेदायोगेन शुद्धस्य शुद्धेनाभेदे वक्तव्ये शुद्धस्यैव ब्रह्मत्वाद्ब्रह्माभेदोपि सेत्स्यतीति भावः ॥ आनन्दमयाधिकरणं सम्पूर्णम् ॥ ५ ॥

प्रकाशिका — विप्रकीर्णनानाशाखेति प्रागुक्तमनुरुध्य व्याचष्टे ॥ येनकेनचिदिति ॥ चिन्ताफलमात्रमुक्तमित्युक्तिमनुरुध्याह ॥ यद्वेति ॥ नन्वेवं पूर्वोक्तदिशा गौणश्चेदित्यादि-सूत्रचतुष्टयोक्ताक्षेपसमाधानाभ्यामप्यस्य फलवत्त्वसम्भवेन व्यवहितेन फलवत्त्वोक्तिरर्थवती अनन्तरसङ्गतिश्च स्वरसा भवतीति भाष्ये जिज्ञासाधिकरणेन तदुक्तिर्न स्वरसेति चेन्न । अव्यवहिताक्षेपस्यापि जिज्ञासाक्षेपं विनाऽपर्यवसानेन तदाक्षेपपर्यन्तत्वात्साक्षात्तदाक्षेपसम्भवे गौणसूत्राद्याक्षेपद्वारा तदाक्षेपस्य वक्रत्वादिति भावः । विषयवाक्यार्थोक्त्यवसरे ''तस्य पुरुषविधताम् । अन्वयं पुरुष विध'' इत्यस्यानन्दमयस्य पुरुषाकारतानुसारेणायं विज्ञानमयः पुरुषाकारस्तस्मादुद्भूत इत्यर्थ उक्तः । तत्र कोशात्कोशस्योद्भव इति भ्रान्तिं वारयन्

देहदेहिवदेवासौ पञ्चधाऽवस्थितो हरिः ।
बहिस्थो देहवद्विष्णुरन्तस्स्थो देहिवत्स्मृतः ।
अन्तर्व्याप्तिविशेषेण नत्वशक्तत्वतो बहिः ।
सर्वेपि पुरुषाकार उत्तरात्पूर्वसम्भवः ।

इति तैत्तिरीयभाष्यानुरोधेनार्थमाह ॥ तस्मादुद्भूत इतीति ॥ तदान्तरात् तदन्त-र्विद्यमानात् सूर्याधिष्ठातृत्वस्योपनिषद्यनुक्तत्वाद्दुर्गमं तद्वाक्यं व्याचष्टे ॥ इन्द्रेति ॥ ''आनन्द-प्रचुर इति यद्युच्यते तदा ब्राह्मणप्रचुरो ग्राम इत्यादिवदनानन्दस्यापि प्राप्तेः प्रचुरानन्द इति विपरीतसमासः कृत'' इति टीका न युक्ता । ''यत्तु प्राचुर्यस्य विशेषणत्व'' इत्यादिनाऽस्य दूषितत्वादित्यतस्तां विवृणोति ॥ आनन्दप्रचुर इतीति ॥ शङ्कालिङ्गस्य नन्वित्यस्य परिहारवाक्येऽन्वयं घटयति ॥ ननु विस्मृतेति ॥ ननु शरीरत्वानुमानेन प्रतिशरीरं जीवाभेदस्य सिद्धिर्नतु जीवानां ब्रह्माभेदस्य । अतः प्रागुक्तमात्मत्वानुमानमेव प्रयोज्य-मित्यतः सुधोक्तमेवोत्तरमाह ॥ विमतानीति ॥ शिष्टमुपन्यासमुखेन विवृतमिति भावः ॥ आनन्दमयाधिकरणं सम्पूर्णम् ॥ ६ ॥

पाण्डुरङ्गि — ननु श्रुत्यधिकरणसङ्गती दर्शयतीति टीकायामुक्तम् । तदयुक्तम् । भाष्येऽव्यवहितपूर्वाधिकरणविषयवाक्याभ्यां श्रुत्यधिकरणसङ्गत्योरप्रदर्शनादित्यत आह ॥

येनकेनचिदिति ॥ अव्यवहिताधिकरणसङ्गतिःस्फुटत्वाच्छिष्यैरेवोह्या । जिज्ञासा कर्तव्येति भाष्यं तु चिन्ताफलमात्रप्रदर्शकमिति यत्पूर्वमुक्तं तदनुरोधेन टीकाग्रन्थं योजयति ॥ यद्वेति ॥ प्रयोजनवानेवायं विचार इति ॥ तथाच भाष्यं प्रयोजनमात्रपरं न सङ्गतिपरमिति भावः ॥ एवमुत्तरत्रेति ॥ यत्र व्यवहिताधिकरणेन सङ्गतिरुक्ताऽस्ति तत्रेत्यर्थः । नन्वयं पुरुष इत्येतट्टीकायां तस्मादुद्भूत इति व्याख्यातम् । तदनुपपन्नम् । आनन्दमयविज्ञानमययोर्द्वयोरपि ब्रह्मत्वेनोत्पादकोत्पाद्यभावायोगात् । किं च विज्ञानमयादानन्दमयस्यैवोत्पत्तिः किं न स्यात् । नियामकाभावादित्यत आह ॥ शरीरीति ॥ तथाचोद्भूतशब्दस्य प्रादुर्भावार्थत्वान्नोत्पाद्योत्पादकभावः । तस्मादुद्भूत इत्येतत्तस्य पुरुष विधतामित्यस्य तात्पर्यकथनपरमिति ज्ञातव्यम् । इन्द्रबृहस्पत्यादीति टीकायामिन्द्रादेः सूर्याधिष्ठातृत्वमुक्तम् । तदनुपपन्नं प्रमाणाभावादित्यत आह ॥ तेषामिति ॥ इन्द्रश्रुत्यादिकं विवक्षितमिति ॥ तेये शतमिन्द्रस्यानन्दा इत्यादिशतानन्दसामानाधिकरण्येनेन्द्रादिश्रुतेः श्रवणाच्छतानन्दानन्दमयशब्दयोरेकार्थत्वात्तेषां प्राप्तिरिति ज्ञेयम् । सुधाविरोधपरिहारायोक्तानुपपत्तिपरिहाराय च व्याचष्टे ॥ आनन्दप्रचुर इतीति ॥ आनन्दप्रचुर इत्यत्र परैरङ्गीकृतत्वादिति शेषं प्रचुरानन्द इत्यभिधाने चेत्यत्र इवेति शेषं तथाऽनन्दप्रचुर इति शेषं च प्रपूर्य व्याचष्टे ॥ प्राचुर्यस्येत्यादि ॥ अनेनानन्दप्रचुर इति यथाऽभिधाने ब्राह्मणप्रचुरो ग्राम इत्यादिवदनानन्दस्यापि प्राप्तेः परैः शङ्कितत्वात् तथा प्रचुरानन्द इत्यभिधाने च पूर्णानन्द इत्येव प्रतीतेश्च परैरङ्गीकृतत्वाद्विपरीतसमासः कृतः । कथं प्रचुरानन्द इत्युक्तिवदानन्दप्रचुर इत्युक्तावपि पूर्णानन्द इत्येव प्रतीतेः । अन्यथा प्रकाशप्रचुरो रविरित्यत्राप्यंधकारलेशप्रतीत्यापत्तेः परोक्तं नेत्येवं टीका योजितेति द्रष्टव्यम् । ननु विस्मृतेत्यादेः शङ्काग्रन्थत्वनिरासायाह ॥ नन्वित्यादि ॥ ननु शरीरत्वेनाभेदसाधनमयुक्तम् । तेन जीवानामन्योन्यमभेदसिद्धावपि शुद्धब्रह्मभेदासिद्धेरित्यत आह ॥ शरीरत्वेति ॥ आनन्दमयाधिकरणं सम्पूर्णम् ॥ ६ ॥

अन्तस्थत्वाधिकरणम्

ॐ अन्तस्तद्धर्मोपदेशात् ॐ ॥ अत्रान्तस्स्थत्वलिङ्गसमन्वयस्याधिदैवगतेन्द्रादिनामसमन्वयार्थत्वात्पादसङ्गतिरिति टीकायामेवोक्तम् । अनन्तरसङ्गतिस्तु आनन्दमयधर्मस्यादृश्यत्वस्यांतस्स्थे श्रवणादन्तस्स्थस्य चाविष्णुत्वादानन्दमयोपि न विष्णुरिति पूर्वसिद्धान्ताक्षेपेणेह पूर्वपक्षोत्थानादाक्षेपिकी । इयं च ''अदृश्येनात्म्ये'' इत्यादिभाष्य एवोक्ता । न चैतद्भाष्यं ''ब्रह्मजिज्ञासा कर्तव्येत्युक्त''मित्यानन्द-

(तात्पर्यचन्द्रिका)

मयाधिकरणभाष्यवत्प्रयोजनप्रदर्शनमात्रपरम् । ''अन्तःप्रविष्टं कर्तारं अन्तःप्रविष्टः शास्ता जनाना'मित्यन्तस्स्थे श्रुतस्य कर्तृत्वादेः पूर्वपक्षेऽन्यनिष्ठत्वेन जन्मादि-सूत्राक्षेपस्य ''सर्वे वेदा यत्रैकं भवन्ती''त्यंतस्स्थे श्रुतस्य सर्ववेदप्रतिपाद्यत्वस्या-प्यन्यनिष्ठत्वेन शास्त्रयोनिसमन्वयसूत्राक्षेपस्यापि सम्भवेन प्रयोजनस्यान्यथा-प्युपपत्तेः । यद्वा युक्तमानन्दमयशब्दो विष्णुपर इति । तस्यार्थविशेषे निरूढ-त्वाभावात् । इन्द्रादिशब्दास्त्वर्थविशेषे निरूढा नान्यत्र नेतुं शक्याः । उक्तं हि -

पदमज्ञातसन्दिग्धं प्रसिद्धैरपृथक्श्रुतैः ।
निर्णीयते निरूढं तु न स्वार्थादपनीयते ॥

इति । रूढोऽप्यन्नशब्दोऽद्यतेऽत्तिचेति श्रुत्युक्तस्य योगस्यान्यत्रासम्भवाद्ब्रह्मपरः । इन्द्रादिशब्दानां त्विह श्रुतौ योगो नोक्तः । यौगिकार्थश्चैश्वर्यादिर्देवतासु सम्भवतीति पूर्वाधिकरणवैषम्येण पूर्वपक्षोत्थानात्सङ्गतिः । आकाशाद्यधिकरणेष्वाकाशादिशब्दा-नामन्यत्र रूढ्या पूर्वपक्षेपि तेषामेतदधिकरणानन्तर्ये हेतुर्वक्ष्यते ।

प्रकाशिका — ॐ अन्तस्तद्धर्मोपदेशात् ॐ ॥ नन्वस्याधिकरणस्य ब्रह्मसमन्व-यपरत्वेन शास्त्राध्यायान्तर्भावरूपसङ्गतिसम्भवेपि नात्र पादे निवेशो युज्यते । लिङ्गसमन्व-यपरत्वादित्यत आह ॥ अत्रेति ॥ एतदधिकरणान्त उक्तमित्यर्थः । तथाच तद्व्याख्यानेन स्पष्टीकरिष्याम इति भावः । अनेनाधिदैवगताः सर्वेपि शब्दा उदाहरणमित्युक्तं भवति । इदानीं पूर्वाधिकरणसङ्गतिं भाष्यानुव्याख्यानानुरोधेन चतुर्धाऽऽह ॥ अनन्तरेति ॥ यद्यप्ये-कयैवालं तथापि विषयव्याप्त्यर्थमनेकसङ्गत्युक्तिरिति ध्येयम् । ''यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते अथ सोभयं गतो भवति'' इत्यत्रैतस्मिन्निति प्रकृतानन्दमयपरामर्शेनोक्तस्यानन्दमयधर्मस्यादृश्यत्वस्य ''अन्तश्चन्द्रमसि मनसा चरन्तम् । सहैव सन्तं न विजानन्ति देवा'' इति वाक्ये कैमुत्यन्यायेन देवादिसर्वाज्ञे-यत्वेनांतस्स्थे श्रवणादित्यर्थः ॥ अविष्णुत्वादिति ॥ पूर्वपक्षन्यायेनेति भावः । नन्वन्तस्स्थ-स्याविष्णुत्वे आनन्दमयोऽप्यविष्णुरित्ययुक्तम् । अन्तस्स्थस्याविष्णुत्वेऽन्यत्र प्रसिद्धेन्द्रादि-श्रुतिलिङ्गरूपविशेषहेतुवत्तत्र विशेषहेतोरभावादेवानन्दमयस्य तत्रत्यसिद्धान्तन्यायेन विष्णु-त्वोपपत्तेः । न चादृश्यत्वं विशेषहेतुः । तस्य द्वयोरप्युपपत्त्या तादृशलिङ्गमात्रेण

''ब्रह्मशब्दात्समस्तात्तृत्वादिलिङ्गाच्चे''त्युक्तदिशा श्रुत्यादिप्रमाणषट्कावगतविष्णुत्वाक्षेपायोगात् । प्रत्युतोक्तरीत्या विष्णुलिङ्गतयाऽवगताद्दश्यत्वेनान्तस्स्थस्यैव विष्णुत्वापत्तेश्च । न चान्तस्स्थत्वस्येन्द्रादिनिष्ठत्वेनावगतावन्तस्स्थत्वरूपगुहानिहितत्वस्यानन्दमयनिष्ठतया मान्त्रवर्णिकसूत्रेणोक्तेर्वक्ष्यमाणदिशा सोप्यन्य एवेत्याक्षिप्यत इति वाच्यम् । तस्याप्युक्तदोषग्रस्तत्वादिति चेन्मैवम् । अद्दश्यपदेन निरतिशयवैभवस्य विवक्षिततया तस्य च द्विष्ठत्वायोगेनैकस्यैव वक्तव्यत्वात् । तस्य चान्यत्र निरूढेन्द्रादिश्रुत्यादिबलेनान्यत्वेन निर्णीतांतस्स्थनिष्ठतया तल्लिङ्गत्वावगमेन तद्युक्तानन्दमयोप्यन्य इत्याक्षेपसम्भवात् । ब्रह्मादिशब्दानां कथंचिदिंद्रादावेव नेयत्वात् । तथा चावयवावयव्यभेदादिकं न क्लेशेन नेयम् । न च वैपरीत्यम् । अत्रेन्द्रादिप्रापकश्रुतिलिङ्गानामन्यत्र निरूढत्वेन विष्णौ निरवकाशत्वात् । एकेन लिङ्गमात्रेणानेकनिरवकाशबाधायोगात् । अत एवोक्तं टीकायां ''न चाद्दश्यत्वलिंगेनांतस्स्थो विष्णुः । श्रुत्यादिभ्यो लिङ्गमात्रस्य दुर्बलत्वा''दिति । किञ्चेन्द्रादीनां विष्ण्वभिन्नत्वेन विष्णुप्रापकाणामुपहितेन्द्रादाविवेन्द्रादिप्रापकाणामनुपहिते विष्णावयोगात्काल्पनिकभेदाश्रयणाच्चांतस्स्थस्यान्यत्वेऽत्रोक्तदिशाऽऽनन्दमयोप्यविष्णुरित्याक्षेपसम्भवात्प्रागुक्तभेद व्यपदेशस्याप्याक्षेपाच्च ।

केचित्तु आनन्दमयस्याविष्णुत्वशङ्कामात्रेण विष्णुत्वनिश्चयाक्षेपसम्भवात्तदभिप्रायेणेयमाक्षेपोक्तिः । अत एव टीकायामानन्दमयस्यान्यत्वप्रसङ्गादिति प्रसङ्गशब्द इत्याहुः । तेषां पक्षे स एवानन्दमय इति भाष्यं कथं नेयमिति चिंत्यम् । इयं च नाश्रद्धेयेत्याह ।। इयंचेति ।। ननु यद्यानन्दमयाक्षेपकत्वेनास्य तदानन्तर्यं तर्ह्याकाशाद्यधिकरणानामपि तदानन्तर्यं स्यात् । तेषामपि भाष्ये तदाक्षेपकत्वदर्शनादिति चेन्न । तद्भाष्यस्य फलमात्रपरत्वेन वक्ष्यमाणत्वादेतदानन्तर्यहेतोर्दर्शयिष्यमाणत्वाच्चेति भावः । उक्तसङ्गतिपरत्वं भाष्यस्याक्षिप्य समाधत्ते ।। न चेति ।। ननु ''ब्रह्म जिज्ञास्य''मिति भाष्यावतारिकाटीकागतसङ्गतिपदस्यार्थद्वयं प्राग्व्याख्यातम् । तथाच तद्भाष्यवदेतद्भाष्यं प्रयोजनमात्रपरं नेति कथम् । उच्यते । पूर्वत्र प्रयोजनमात्रपरत्वव्याख्यानमेवाभिप्रेतम् । अत एव तत्रैवोपष्टंभकोक्तिः । व्यवहितसङ्गतिपरत्वव्याख्यानं तु अव्यवहितसङ्गतिनिर्बन्धो नावश्यक इत्यर्थस्यावश्यसूचनीयत्वात्तत्परतयाऽपि योजयितुं शक्यत इति भावेन । सङ्गतिपरत्वेऽव्यवहितसङ्गतिकथनसम्भवे व्यवहितेन तदुक्तिरयुक्तेत्यरुच्यैव यद्वेति पक्षान्तरोक्तिरिति । न चैवमतिदेशायोगः । अरुच्यंशतिरोधानेन तदुपपत्तेः । यद्वा अरुचिग्रस्तस्याप्यस्यार्थस्यात्रोक्तिः किमर्थेत्यतोऽत्रा-

(प्रकाशिका)

नभिप्रेतत्वेऽप्यन्यत्रोपयोगो भविष्यति । यत्र भाष्येऽव्यवहितपूर्वसङ्गतिरुच्यते तत्रेति भावेनातिदेशोपपत्तेः । अत एव पूर्वतन्त्रे कृत्वाचिन्तायाः फलमन्यत्रेति कृत्वाचिन्ताः प्रवर्तत इति । व्याकरणेपि ''नामि'' इत्यादौ सनुट्कामादिग्रहणस्य तत्रानुपयोगेपि ''नोपधाया'' इत्यादावुपयोगः । यद्वाऽव्यवहितसङ्गतिपरत्वं मात्रपदव्यावर्त्यमिति न कश्चिद्दोषः ॥ कर्तृत्वादेरिति ॥ आदिपदेन शास्तृत्वरूपनियामकत्वस्य ग्रहः । नन्वत्र कर्तृत्वमेव श्रुतं न तु सर्वकर्तृत्वम् । तथाच प्रागुक्तसर्वकर्तृत्वाक्षेपो नियामकत्वाक्षेपो वा कथमिति चेदित्थम् । अन्तश्शब्दस्य निरुपपदस्य सर्वान्तःप्रवेशेन सर्वकर्तृत्वलाभाद्वा कर्तृशब्दस्य वा निरुपपदस्य मुख्यकर्तृवाचित्वेन कृत्स्नकर्तुरेव मुख्यकर्तृत्वात्तेन तल्लाभाद्वा अन्यस्य कतिपयकर्तृत्वे भगवतः सर्वकर्तृत्वायोगादिति वा तदाक्षेपसम्भवात् । तथा जनानामिति बहुवचनस्य सङ्कोचकाभावात्कैमुत्यन्यायेन चेतनाचेतनसर्वशास्तृत्वलाभेन तदाक्षेपसम्भवात् । सर्वे वेदा इत्यत्र कैमुत्येन सर्वसदागमवेद्यत्वलाभेन तदाक्षेपसम्भवादिति ॥ अन्यथापीति ॥ अव्यवहिताक्षेपस्यापि व्यवहितजिज्ञासासूत्राक्षेपपर्यन्तत्वेन ततोप्यव्यवहितस्यानन्यद्वारा साक्षादाक्षेपसम्भवादिति भावः ॥ उक्तं हीति ॥ उद्भिन्नयवार्तिके ॥ प्रसिद्धैरिति ॥ निर्ज्ञातसम्बन्धैः । अपृथक् श्रुतैः सहश्रुतैः । निरूढं निश्चितसम्बन्धपदम् । पूर्वोक्तेन विरोधं निरस्यति ॥ निरूढोपीति ॥ ओदनादाविति भावः ॥ अन्यत्रेति ॥ प्रसिद्धान्नेऽसम्भवादित्यर्थः । उक्तद्वयवैषम्यमिन्द्रेति ॥ यौगिकार्थश्चेति ॥ ''तमिदं द्रंसन्तमिन्द्रमित्याचक्षते परोक्षेणे''त्यैतरेये तथा ''तमिन्धं सन्तमिन्द्र इत्याचक्षते परोक्षेणे''ति बृहदारण्यके च योगस्योक्तत्वादिहेत्युक्तं सङ्गतिरिति ॥ प्रत्युदाहरणरूपेत्यर्थः । लक्षणं तूक्तम् । अस्योत्तराधिकरणतुल्यत्वादेतदधिकरणस्यैव पूर्वानन्तर्ये को हेतुरत आह ॥ आकाशादीति ॥

पाण्डुरङ्गि — ॐ अतस्तद्धर्मोपदेशात् ॐ ॥ नन्विदमधिकरणं पादासङ्गतम् । तत्रान्तस्स्थत्वलिङ्गसमन्वयस्य क्रियमाणत्वात् । अस्य च नामपादत्वादित्यत आह ॥ अत्रेति ॥ तथाच फलतः पादसङ्गतिरस्तीति नासङ्गतिरिति भावः ॥ प्रयोजनस्यान्यथाप्युपपत्तेरिति ॥ प्रयोजनमात्रपरं चेदत्र भाष्यं स्यात्तर्हि पूर्वाधिकरण इव सूत्रे कण्ठत उक्तं महाप्रयोजनमेवाक्षिपेत् । प्रथमातिक्रमे कारणाभावात् । पूर्वोल्लङ्घनेन षष्ठाधिकरणेऽर्थादुक्तप्रायमदृश्यत्वमेव नाक्षिपेदित्यर्थः । एवं भाष्योक्तासङ्गतिमुक्त्वाऽनुव्याख्यानोक्तां सङ्गतिमाह ॥ यद्वेति ॥ पदमज्ञातसन्दिग्धमित्यादि ॥ उद्भिदधिकरणवार्तिक इति शेषः । अयमर्थः । पिकादिपदमर्थविशेषवाचित्वेनाज्ञातमसन्दिग्धं च कोकिलः पिको विदेवनोक्ष

इत्यर्थविशेषवाचित्वेन प्रसिद्धैरपृथक् श्रुतिसमानाधिकरणनिर्दिष्टं सदर्थविशेषवाचित्वेन निर्णीयते । यत्त्वर्थविशेषवाचित्वेन निरूढं नियतम् । तत्प्रसिद्धपदसामानाधिकरण्येपि स्वार्थान्नापनीयत इति ॥ ननु रूढत्वादिन्द्रादिशब्दानामन्यपरत्वाभावे अन्नशब्दस्यापि रूढत्वादन्यपरत्वं न स्यादित्यत आह ॥ रूढोपीति ॥ नन्वेवं रूढानामप्यन्नानामद्यतेत्ति चेत्यादिश्रुत्युक्तयोगस्यान्यत्रासम्भवेन ब्रह्मपरत्ववत् इन्द्रादिशब्दानां रूढत्वेपि श्रुत्युक्तयोग-स्यान्यत्रासम्भवेनेन्द्रादिशब्दानामपि ब्रह्मपरत्वं स्यादित्यतः श्रुत्या योगस्यानुक्तत्वा-द्विद्यमानस्याप्यन्यत्र सम्भवान्नेन्द्रादिशब्दानां ब्रह्मपरत्वमित्याह ॥ इन्द्रादिशब्दानां त्विति ॥

तात्पर्यचन्द्रिका

यद्वा यदि ब्रह्मशब्दादानन्दमयो ब्रह्म तर्हीन्द्रादिशब्दादंतस्थ इन्द्रादिः न तु ब्रह्म तच्छब्दाभावादिति पूर्वसिद्धान्तन्यायेन पूर्वपक्षिते पूर्वाधिकरणोक्तं श्रुत्यादि-निर्णयमपोद्य लिङ्गेन निर्णय उच्यत इति सङ्गतिः । इदं च सङ्गतिद्वयं ''आशङ्क्य तत्र रूढिं च तच्छब्दानामपि स्वय''मित्यनुव्याख्याने रूढिपदतच्छब्दपदप्रयोगात्सूचितम् । यद्वा मान्त्रवर्णिकसूत्रे ''यो वेद निहितं गुहायां'' इत्यानन्दमयस्यांतस्स्थत्वमुक्तम् । तदिहाक्षिप्य समाधीयत इति सङ्गतिः । न च गुहानिहितत्वमन्यदंतस्स्थत्वं चान्यदिति वाच्यम् । अन्तस्स्थवाक्यशेषे ''निहितं गुहा''स्विति श्रवणात् । इयं च सङ्गतिरत्रत्येन ''अदृश्येनात्म्ये'' इति भाष्येण ''यो वेद निहितं गुहायामित्युक्त'' मिति ज्योतिरधिकरणभाष्येण च समानन्यायतया सूचिता । यद्यप्यंतस्स्थस्येन्द्रादि-त्वादन्तस्स्थत्वयुक्त आनन्दमयोऽपीन्द्रादिरेवेत्याक्षेप ऋजुः । अन्तस्स्थस्येन्द्रादित्वा-दन्तस्स्थधर्मेणादृश्यत्वेन युक्त आनन्दमयोपीन्द्रादिरेवेत्याक्षेपस्तु वक्रः । यथा चान्त-स्स्थत्वं वाक्यशेषपर्यालोचनया गुहानिहितत्वरूपमिति ज्ञेयमिति विलम्बः । तथा ''सहैव सन्तं न विजानन्ति देवा'' इति देवाज्ञेयत्वात्कैमुत्यन्यायेनादृश्यत्वं ज्ञेयमिति विलम्बः । तथाप्यदृश्यत्वमुखेनानाक्षेपेऽदृश्यत्वेन विष्णुलिङ्गेन विष्णुरेवान्तस्स्थ इति शङ्का स्यात् । सा मा भूत् । अदृश्यत्वस्यापीन्द्रादिधर्मत्वादिति दर्शयितुं वक्राक्षेपमुखा सङ्गतिः कण्ठोक्ता । अन्यातु सूचिता ।

प्रकाशिका — सङ्गतिरिति ॥ अपवादरूपेत्यर्थः । अत्रापि लक्षणमुक्तम् । एतेन सङ्गतिद्वयकथनेन सुधायां पूर्वपक्षप्रापकेन्द्रादिश्रुतिलिङ्गान्युक्त्वाऽनन्तरमुक्ते ''अन्नं ब्रह्मेत्यादिश्रुत्या तद्धेतुव्यपदेशादिति लिङ्गेन चातीताधिकरणे निर्णयः कृतः । नचेन्द्रादिश्रुतिरन्यत्र नेतुं शक्यते । पुरन्दरादिषु रूढत्वाद्यौगिकत्वाच्चे''ति वाक्ये अन्नं ब्रह्मेत्यादि कृत इत्यन्तवाक्यं पूर्वत्रोत्तरत्र च संयोज्य क्रमेणापवादप्रत्युदाहरणसङ्गतिद्वयपरत्वेन व्याख्येयमित्युक्तं भवति । तद्धेतुव्यपदेशादीत्यादिपदेनाद्यतेऽत्ति चेति वाक्यशेषोक्तयोगोपि ग्राह्यः । तच्छब्दानां इन्द्रादिशब्दानाम् । तत्र पुरन्दरादिदेवेषु । रूढिं च न केवलं योगं रूढिमपि । स्वयमपि साक्षादपि । विद्वत्सम्बन्धिनीमप्याशंक्य स्वयं सूत्रकारोऽन्तरिति सूत्रेण न्यवारयदिति वक्ष्यमाणेनान्वयः । आक्षेपिकीसङ्गतिमुक्तामपि प्रकारान्तरेणाह ॥ यद्धेति ॥ उक्तमिति ॥ ''सत्यं ज्ञानमनन्तं ब्रह्म । यो वेद निहितं गुहाया''मिति मन्त्रवर्णोक्तस्यैवान्नमयादिप्रकरणैः प्रपञ्चनादिति भावः ॥ अन्तस्स्थवाक्यशेष इति ॥ ''अन्तः प्रविष्टं कर्तारमेतं देवानां बन्धुं निहितं गुहास्वि''ति वाक्यशेषे श्रवणादित्यर्थः ॥ समानन्यायतयेति ॥ आनन्दमये श्रुतस्यादृश्यत्वस्यान्तस्स्थेऽन्यस्मिन् श्रवणादानन्दमयोपि न विष्णुरितिवदानन्दमये श्रुतान्तस्स्थत्वस्यान्यस्मिन् श्रवणादानन्दमयस्य विष्णुत्वेंऽतस्स्थत्वं न युक्तमित्याक्षेपसम्भवादित्यर्थः । तथा ज्योतिरधिकरणे ''यो वेद निहितं गुहायामित्युक्तम् । तच्चाग्निसूक्तगतस्य ज्योतिर्हृदय आहितं यदिति ज्योतिषश्श्रूयते'' इत्याक्षिप्तत्वात्सूचितमित्यर्थः । अत्र तिस्रः सूचिताः । एकातु भाष्यकारैः कण्ठोक्ता । तत्र भाष्यकारस्यानौचित्यमाशंक्य परिहरति ॥ यद्यपीति ॥ ननु अदृश्यत्वं शीघ्रोपस्थितिकम् । अन्तस्स्थत्वं विलम्बितोपस्थितिकम् । अत एवमाश्रितमित्यत आह ॥ यथाचेति ॥ कैमुत्येति ॥ देवाविज्ञेयत्वमात्रेणादृश्यत्वासिद्धेर्देवा अपि न जानन्ति किमुतेतर इति सर्वाज्ञेयत्वसिद्ध्याऽदृश्यत्वं बोद्धव्यमित्यर्थः ॥ शङ्केति ॥ लिङ्गमात्रेणेन्द्रादिप्रापकश्रुत्यादिबाधायोगेनावधारणायोगाच्छङ्का स्यादित्युक्तम् । ननु यथाऽदृश्यतामुखेनानाक्षेपे प्राग्विष्णुधर्मतया निर्णीतेन तेनांतस्स्थो विष्णुरिति शङ्का स्यात् तथान्तस्स्थत्वमुखेनानाक्षेपे प्राग्विष्णुधर्मतया निश्चितेन तेनायमिन्द्रादिर्विष्णुरेवेति शङ्का स्यादिति चेन्न । वैषम्यात् । अन्तस्स्थत्वं हीह समन्वीयते । तच्चादृश्यत्वादिलिङ्गेन्द्रादिश्रुत्योः प्राबल्याद्यविवेकेन सन्दिह्यत इति न तेन शङ्का स्यात् । प्रबलया पूर्वपक्षयुक्त्या चान्तस्स्थत्वमिन्द्रादेरेवेति शङ्क्यमानत्वाच्चेति । एतेन कर्तृत्वशास्त्रत्वादेरपि पूर्वपक्षे आक्षेप इत्यपि सूचितम् । तेन न कर्तृत्वादिनापि विष्णुत्वशङ्केत्युक्तं भवति ।

पाण्डुरङ्गि — ननु वैषम्येण पूर्वपक्षोत्थानं न सम्भवति । पूर्वाधिकरणे समन्वेतव्यस्यानन्दमयस्यान्यत्र रूढत्वाभाववत् अत्रापि समन्वेतव्यस्यांतस्स्थत्वस्यान्यत्र रूढत्वाभावात्। तत्रेन्द्रादिशब्दानामन्यत्र रूढत्वेपि पूर्वत्रापि ब्रह्मशब्दस्य ब्रह्मणि प्रसिद्धत्वेन साम्यस्यैव सत्त्वादित्यस्वरसादाह ॥ यद्धेति ॥ रूढिपदेति ॥ योगसमुच्चायकचशब्दशिरस्करूढिपदेत्यर्थः । एवं कण्ठतो भाष्योक्तामनुव्याख्योक्तां च सङ्गतिमुक्त्वा एतत्पूर्वाधिकरणीयेन ज्योतिरधिकरणीयेन च समानन्यायतयाऽभिमतां सङ्गतिमाह ॥ यद्धेति ॥ समानन्यायतयेति ॥ अयं भावः । यथान्तस्स्थेऽदृश्यत्वस्य श्रुतत्वादन्तस्स्थस्यान्यत्वे तद्धर्मभूतस्यादृश्यत्वस्याप्यन्यनिष्ठत्वापत्त्याऽदृश्यत्वस्यान्यनिष्ठत्वे अदृश्येनात्म्य इत्युक्तस्याप्यन्यनिष्ठत्वापातेन तद्युक्तस्यानन्दमयस्याप्यब्रह्मत्वं स्यादिति यदाऽभिहितं तदाऽन्तस्स्थस्येन्द्रादित्वादन्तस्स्थत्वयुक्त आनन्दमयोप्यन्य एवेत्यभिहितप्रायम् । समानन्यायत्वादिति । नन्वाक्षेपसङ्गतेर्भाष्ये मुखतः सङ्कीर्तनमन्यासां तु सूचनमित्येतद्वैरूप्यं कुत इत्याशङ्क्य शङ्कान्तरपरिहारार्थं तथाकरणमित्यभिप्रेत्य शङ्कान्तरं दर्शयति ॥ यद्यपीति ॥ अदृश्यत्वस्यापीन्द्रादिधर्मत्वादिति ॥ प्रबलश्रुतिभिर्लिङ्गबाधे प्रामाण्यायेन्द्रादावेव कथंचिन्नेयत्वादित्यर्थः । इदं च लिङ्गमात्रोपलक्षणमिति ज्ञेयम् । अत एव टीकायां पूर्वपक्षेऽदृश्यत्वादिलिङ्गबाधोक्तिः ।

तात्पर्यचन्द्रिका

अत्रान्तस्स्थः किमिन्द्रादिः किं वा विष्णुरिति चिन्ता । तदर्थं किमिन्द्रादिश्रुत्यनुसारेण समुद्रशायित्वादिलिङ्गं नेयमुत विपरीतमिति । तदर्थं किं श्रुतिर्निरवकाशा लिङ्गं तु सावकाशमुत विपरीतमिति । तथालिङ्गस्य निरवकाशत्वेपि किं श्रुतित्वप्रयुक्तप्राबल्यं बलवत्किं वा निरवकाशत्वप्रयुक्तप्राबल्यं बलवदिति ॥

पूर्वपक्षस्तु ॥ अयमन्तस्स्थ इन्द्रादिरेव । इन्द्रादिश्रुतेरिति । नन्विन्द्रादिषु निर्धारित एक एवान्तस्स्थ इतिवा पूर्वपक्षोऽनिर्धारितो यः कश्चिदिति वा सर्वोपीति वा । नाद्यः । अनेकप्रापकसद्भावेन निर्धारणायोगात् । वरुणादिलिङ्गानामिन्द्रादिश्रुतितो दौर्बल्यनिश्चयेऽपीन्द्रबृहस्पत्यादिश्रुतीनां साम्येनैकस्या दौर्बल्यानिश्चयात् । योगेन च बृहस्पत्यादिश्रुतेरिन्द्रे सावकाशत्ववद्बृहस्पत्यादावपीन्द्रश्रुतेः

(तात्पर्यचन्द्रिका)

सावकाशत्वात् । न द्वितीयः । निर्धारणाभावे पूर्वपक्षस्य सन्देहादविशेषापातात् । समुद्रस्थत्वादिविष्णुलिङ्गानामपि सत्त्वेन विष्णोरन्य एवेत्यवधारणस्याप्यनुपपत्तेश्च । तेषां लिङ्गत्वादेव दौर्बल्यनिश्चये च सूर्यवरुणादिलिङ्गानामपि तन्निश्चयः स्यात् ।

न तृतीयः । ''अन्तः प्रविष्टः शास्ता जनानां सर्वात्मे''त्यन्तः प्रविष्टे शास्तृत्वादेः श्रवणेनानेकेश्वरापातादिति चेत् आद्यस्तावदस्तु । इन्द्र एवान्तस्थः । ''इन्द्रो राजा ब्रह्मेन्द्रमग्नि''मित्यादीन्द्रश्रुत्यभ्यासेन ''अपां नेतार''मित्यादिवरुणलिङ्गानां बृहस्पत्यादिश्रुतीनां च बाधादित्येकः पूर्वपक्षः ।

प्रकाशिका — एवं सङ्गतीर्निरूप्य विषयसंशयटीकां व्यनक्ति ॥ अत्रेति ॥ ''अंतःप्रविष्टं कर्तारमेतमंतश्चंद्रमसि मनसा चरन्तम् । सहैव सन्तं न विजानंति देवा'' इत्यादिना तैत्तिरीये श्रुतोंऽतस्स्थो विषय इति ध्येयम् ॥ समुद्रशायित्वादीति ॥ ''समुद्रे अन्तः कवयो विचक्षते । यस्याण्डकोशं शुष्ममाहु''रित्याद्युक्तलिङ्गमित्यर्थः ॥ विपरीतमिति ॥ लिङ्गेन श्रुतिर्नेयेत्यर्थः ॥ उत विपरीतमिति ॥ लिङ्गं निरवकाशं श्रुतिः सावकाशेत्यर्थः ॥ तथेति ॥ इयं चिन्ता पूर्वोक्तचिन्तायां न फलफलिभावापन्ना । किन्तु चिन्तांतरमिति तदर्थमित्यनुक्त्वा तथेत्युक्तम् । एतच्चिन्तोक्तिस्तु यथा तृतीयचिन्ता द्वितीयचिन्तोपयुक्ता तथेयमपि द्वितीयचिन्तोपयुक्तेति तृतीयचिन्तायाः समुच्चयार्थेति ध्येयम् । तथाहि । यदीन्द्रादिश्रुतिर्निरवकाशा समुद्रान्तस्स्थत्वादिलिङ्गं सावकाशं यदि वा लिङ्गस्य निरवकाशत्वेपि श्रुतित्वप्रयुक्तप्राबल्यमेव बलवत् तदा श्रुत्यनुसारेण लिङ्गस्य सावकाशस्य च निरवकाशस्य वा नेयत्वादन्तस्स्थ इन्द्रादिरिति पूर्वपक्षे फलफलिभावः । यदि च लिङ्गं निरवकाशं श्रुतिस्सावकाशा निरवकाशत्वप्रयुक्तमेव प्राबल्यं बलवत् तदा लिङ्गानुरोधेन सावकाशश्रुतेर्नेयत्वादंतस्स्थो विष्णुरिति सिद्धान्ते फलफलिभावश्च स्फुटत्वान्नोक्तः । एतास्तु चिन्ता आद्यसूत्रसूचिताः । द्वितीयसूत्रसूचितास्तु अन्तस्स्थ इन्द्रादिरुत विष्णुरेव । तदर्थं विष्णुलिङ्गमिन्द्रादौ नेतुं शक्यमुत नेति । तदर्थमुभयप्रापकश्रुतिलिङ्गसद्भावेन द्वयोरभेद उत ''इन्द्रस्यात्मे''ति भेदव्यपदेशाद्भेदः । तदर्थमात्मशब्दः स्वरूपपरः किं वा नियामकपरः । स्वरूपार्थत्वे च षष्ठी युज्यते नवेत्याद्या ऊहनीया इति भावः ।

तथाच वक्ष्यत्यभेदपूर्वपक्षम् ॥ अन्तस्थ इन्द्रादिरेवेति ॥ इन्द्राग्निबृहस्पतिसूर्यवरुणादिः ॥ इन्द्रादिश्रुतेरिति ॥ इन्द्रो राजा जगतो य ईशे ब्रह्मेन्द्रमग्निं जगतः प्रतिष्ठां दिव

आत्मानꣳसवितारं बृहस्पतिं त्वष्टारं रूपाणि विकुर्वन्त''मितीन्द्राग्न्यादिश्रुतेरिति । उपलक्षणमेतत् । अपां नेतारमित्यादिवरुणलिङ्गादित्यपि ध्येयम् । तत्र टीकोक्तं पूर्वपक्षं त्रेधा साधयितुं विकल्पेनाक्षिपति ॥ नन्विति ॥ लिङ्गानां दौर्बल्यात् श्रुत्या निर्णयः स्यादित्यत आह ॥ वरुणादीति ॥ योगेनेति ॥ बृहस्पतिश्रुतेर्बृहतां देवानां पतिर्बृहस्पतिरित्यादिरूपेणेन्द्रे कथंचिद्योगवृत्त्याश्रयेणेन्द्रशब्दस्य स्वाधमापेक्षयैश्वर्ययुते बृहस्पतावपि सावकाशत्वसम्भवादित्यर्थः । ननु इन्द्रादिष्वयमेवान्तस्स्थ इति निर्णयाभावेपि विष्णोरन्य एव न तु विष्णुरित्यवधारणं युज्यते । अत एव टीकायामन्तस्स्थोऽन्य एवेत्युक्तमित्यत आह ॥ समुद्रस्थत्वेति ॥ सूर्यवरुणादीति ॥ तथाच पुनस्सन्देह एवापन्न इति भावः । सर्वेपीति पक्षं निरस्यति ॥ न तृतीय इति ॥ शास्तृत्वादेरित्यादिपदेन कर्तृत्वसर्ववेदवेद्यत्वादेर्ग्रहः । इत्यादीत्यादिपदेन इन्द्रं राजानं सवितारमेतं मह्यमिन्द्रो नियच्छतु अर्वाङायातु वसुभी रश्मिरिन्द्रः सविता मे नियच्छतु स न इन्द्रः कामवरं ददातु इन्द्रं निचिक्युः परमे व्योम''त्रित्यादेर्ग्रहः । यथा पूर्वाधिकरणे ब्रह्मशब्दाभ्यासेन शरीरित्वविकारार्थत्वाद्यन्यलिङ्गानामन्यथानयनं तथेत्यर्थः । ननु कथमत्रेन्द्रशब्दाभ्यासान्निर्णयः । ''सवितारं बृहस्पतिं सवितारमेतं सविता मे नियच्छ''त्विति सवितृशब्दाभ्यासस्य सत्त्वात् । तथा अग्निं जगतः प्रतिष्ठां मय्ययमग्निर्दधातु अग्निस्तां अग्रे प्रमुमोक्तु देव'' इत्यग्निशब्दस्य चाभ्यासादिति चेदयमाशयः । सवित्रादिशब्दाभ्यासापेक्षयेन्द्रादिशब्दानां बाहुल्यात् बहुबाधस्यान्याय्यत्वात् पूर्वाधिकरणे इन्द्रबृहस्पत्यादीनां सूर्याधिष्ठातृत्वेन प्राप्तिकथनवदिन्द्रस्य ''जगतो य ईश'' इति वचनेन सवित्राद्युत्तमत्वेन तदधिष्ठातृत्वेन सवित्रादिशब्दवाच्यत्वसम्भवाच्चेन्द्र इत्यवधारणोपपत्तिः । तथाच श्रुतिः ''इन्द्रो वै देवानामोजिष्ठ'' इतीति ॥

पाण्डुरङ्गि — विपरीतमिति ॥ समुद्रशायित्वादिलिङ्गं निरवकाशमिन्द्रादिश्रुतिः सावकाशेति विपरीतमित्यर्थः । वरुणादिप्रापकलिङ्गसद्भावेपि श्रुत्येन्द्र एवेति निर्धारणं भविष्यत्येव । श्रुत्यपेक्षया लिङ्गानां दौर्बल्यस्य निश्चितत्वादित्यत आह ॥ वरुणादीति ॥ तथाच न निश्चय इति भावः । ननु बृहस्पत्यादिश्रुतेरपि योगेनेन्द्रे सावकाशत्वान्नानिर्धारणमित्यत आह ॥ योगेन चेति ॥ नन्वंतस्स्थो विष्णुः अन्यो वेति सन्देहे अन्य एवेत्यवधारणेन प्रवृत्तस्य पूर्वपक्षस्य सन्देहाद्विशेषः सम्भवतीत्यतः विष्णोरन्य एवेत्यवधारणमनुपपन्नमित्याह ॥ समुद्रस्थत्वादीति ॥ अनेकेश्वरापातादिति ॥ न चास्त्वनेकेश्वरापात इति वाच्यम् । अनेकेषां संमत्ययोगेन विमतौ प्रवृत्त्यादिकमेव न स्यादिति भावः । नन्विन्द्र

(पाण्डुरङ्गि)

एवान्तस्स्थ इत्यवधारणमयुक्तम् । वरुणादिप्रापकलिङ्गादेः सत्त्वादित्यत आह ॥ इन्द्र इति ॥ इन्द्रबृहस्पत्यादिश्रुतीनां श्रुतित्वाविशेषेपीन्द्रश्रुतेरभ्यस्तायाः बलवत्त्वादिति भावः ।

तात्पर्यचन्द्रिका

सूर्य एवान्तस्स्थः । सप्त युंजन्ति रथमेकचक्र''मिति निरवकाशलिङ्गसहितया ''सवितारं बृहस्पति''मिति सवितृश्रुत्येन्द्रादिश्रुतीनां स्वोचितैश्वर्यादिमति सूर्ये सम्भवादित्यन्यः । वरुण एवान्तस्स्थः । वरुणलिङ्गस्यांते श्रवणात्पूर्वदौर्बल्यन्यायेन तेनेतरबाधादित्यपर इति पक्षभेदेनावधारणात् । अन्येतु यथा सिद्धान्तप्रापकसद्भावेपि तदज्ञानेन पूर्वपक्षस्तथा सूर्यादिप्रापकसद्भावेपि तदज्ञाननेन्द्राद्येकैकावधारणेनानेके पूर्वपक्षा इत्याहुः ।

द्वितीयो वास्तु । अन्तस्स्थो विष्णुरन्योवेति सन्देहे अन्य एवेत्येकावधारणेन प्रवृत्तस्य पूर्वपक्षस्य सन्देहाद्विशेषसद्भावात् । सोऽन्य इन्द्र एवेत्यादिनिर्धारणं तु नास्ति । इन्द्रादिप्रापकाणां बलाबलानिश्चयात् । विष्णुलिङ्गानां त्विन्द्रादिश्रुतिभ्यो दौर्बल्यं निश्चितमिति तदन्यत्वेनावधारणं युक्तम् । विष्णुलिङ्गानां बहुत्वेपि बहुत्वप्रयुक्तप्राबल्यस्य स्वभावप्रयुक्तप्राबल्याद्दुर्बलत्वात् । न च तेषां निरवकाशत्वम् । समुद्रस्थत्वादेर्वरुणादावपि सम्भवात् । यद्वा निरवकाशत्वेपि लिङ्गस्य प्रबलया श्रुत्या बाधोस्तु । न हि निरवकाशः शशशावको मृगेन्द्रेण न बाध्यते । न वा निरवकाशमिदं रूप्यमिति ज्ञानं नेदं रूप्यमित्यनेन न बाध्यते । सूर्यलिङ्गं तु सवितृश्रुत्यनुगृहीतमिति न तस्यापि दौर्बल्यनिश्चयापत्तिः । ''ब्रह्मेन्द्रमग्नि''मिति ब्रह्मशब्दस्तु ''ब्रह्मान्वविन्द''दित्यादाविव ''तपसान्वविंददित्युत्तरवाक्यस्थक्रिया-पेक्षितकर्तृसमर्पकत्वेन प्रथमान्ततया पुंल्लिङ्गत्वाच्च चतुर्मुखपरो नतु परब्रह्मपरः । ''अपां नेतार''मिति वरुणलिङ्गस्य दौर्बल्यनिश्चयेपींद्रसवितृबृहस्पत्यादिषु श्रुतत्वा-विशेषादनवधारणं युक्तम् । टीकायां पूर्वपक्षे वरुणलिङ्गोक्तिस्तु सतीष्वपीन्द्रा-दिलिङ्गश्रुतिषु यदि विष्णुलिङ्गादंतस्स्थो विष्णुस्तर्हि वरुणलिङ्गाद्वरुणोपि स्यादिति सिद्धान्तिनं प्रत्यनिष्टं दर्शयितुम् ।

प्रकाशिका — सप्तेति ॥ सप्ताश्वत्वमेकचक्ररथत्वं च लिङ्गमिति ध्येयम् । यथा द्युभ्वाद्यधिकरणे मुक्तोपसृप्यत्वरूपलिङ्गसहितयाऽऽत्मश्रुत्या विष्णुरिति निर्धारणं तथेति भावः ॥ अन्त इति ॥ ''अपां नेतारं भुवनस्य गोपा''मित्यस्य सवित्रादि-श्रुतिलिङ्गापेक्षयांऽते श्रवणादित्यर्थः । यद्यपीन्द्रं निचिक्युरितीन्द्रश्रुतेरेतदनन्तरं श्रवणमस्ति तथापि निरवकाशलिङ्गसन्निधानाद्वितीयांतत्वेनापां नेतारमित्यस्य विशेषणत्वेन सावकाश-तोपपत्तेरिति भावः ॥ पूर्वदौर्बल्येति ॥ ''प्रथमेऽश्रवणादिति चेन्न ता एव ह्युपपत्ते''रिति वक्ष्यमाणन्यायेनेति भावः । ननु पूर्वप्राबल्यमपि जन्माधिकरण उक्तमिति चेत्सत्यम् । निरवकाशत्वेनैव न तु स्वत इत्यदोषः । एवं स्वयमितरप्रापकोपमर्देनावधारणेन पूर्वपक्ष उक्तः । उत्तानदृशां पक्षमाह ॥ अन्येत्विति ॥ एकस्मिन्नेव वाक्य एकप्रापकदर्शन-मितरप्रापकादर्शनं चायुक्तमित्यरुचिं सूचयत्यन्ये त्विति । अन्यो वेति टीकायां तथैव संशयप्रदर्शनात् । अस्माभिस्त्वन्यशब्दार्थविवरणायेन्द्रादिरित्युक्तमिति भावः । ननु विष्णु-लिङ्गसद्भावात्कथमन्यत्वेन निश्चय इत्यत आह ॥ विष्णुलिङ्गानामिति ॥ हेतुर्गमिदम् । लिङ्गत्वादेवेत्यर्थः । ननु जात्या श्रुतेर्बलवत्त्वेपि वक्ष्यमाणरीत्या लिङ्गानां बहुत्वात्प्राबल्यम् । वक्ष्यते च प्राणस्तथेत्यत्र लिङ्गबाहुल्यान्मुख्यप्राण इति पूर्वपक्ष इत्यत आह ॥ विष्णुलिङ्गानामिति ॥

द्विविधं बलवत्त्वं च बहुत्वाच्च स्वभावतः ।
तयोस्स्वभावो बलवानुपजीव्यादिकश्च सः ।

इत्यादिवचनादिति भावः । अत एव ''शब्दादेव प्रमित'' इत्यत्र बहुलिङ्गानामपि वामनश्रुत्या बाधो वक्ष्यत इति भावः । ननु निरवकाशेन लिङ्गेन श्रुतेरपि सावकाशाया बाधोस्त्वित्यत आह ॥ न चेति ॥ समुद्राधिष्ठातृत्वाद्वरुणस्येति भावः । यस्याण्ड-कोशमित्युक्तब्रह्माण्डवीर्यत्वादिलिङ्गाशयेनाह ॥ यद्वेति ॥ प्रबलया श्रुत्येति ॥ स्वभावतः प्रबलयेत्यर्थः । स्वभावप्राबल्यादपि निरवकाशत्वप्रयुक्तप्राबल्यवत्तायां एतदधिकरण-सिद्धान्तात्पूर्वमसिद्धेरिति भावः । एवं तर्हि सूर्यस्य पूर्वपक्षे प्राप्तिर्न स्यादित्यतः श्रुत्या तदुज्जीवनमित्याह ॥ सूर्यलिङ्गं त्विति ॥ नन्वेवं ब्रह्मश्रुत्यनुग्रहाद्विष्णुलिङ्गानामुज्जीवनं किं न स्यादित्यतो ब्रह्मश्रुतिर्नास्त्येवेति भावेनाह ॥ ब्रह्मेन्द्रमिति ॥ वाचो वीर्यं तपसाऽन्व-विन्ददिति वाक्यस्था या क्रिया तदपेक्षयेत्यर्थः। एतत् श्रुत्यर्थो न्यायविवरणटीकायां स्पष्टः।

(प्रकाशिका)

यद्येवं तर्हि वरुणप्राप्तिः पूर्वपक्षे न स्यात् । तथाच यः कश्चिदिति कथमनवधारणमित्यत आह ॥ अपामिति ॥ तर्हि वरुणप्रापकस्य बलवतोऽभावाद्वरुणलिङ्गाद्वरुणप्राप्तिः कथं टीकायामुक्तेत्यत आह ॥ टीकायामिति ॥ अत एव सुधायां न तत्प्राप्त्युक्तिरिति भावः ।

पाण्डुरङ्गि — पक्षभेदेनावधारणादिति ॥ त्वष्टृश्रुतिर्विविधकर्तृत्वादिलिङ्गसहिता । त्वष्टारं रूपाणि विकुर्वन्तमिति । बृहस्पतिश्रुतिरपि वाचो वीर्यमित्युक्तवागाधिपत्यरूप-लिङ्गसहितेति ज्ञातव्यम् ॥ अन्येत्विति ॥ उक्तरीत्या तत्प्रापकज्ञानेपि पूर्वपक्षस्योपपादि-तत्वादज्ञानेन पूर्वपक्षस्यायुक्तत्वादित्यस्वरसबीजमत्र द्रष्टव्यम् । नन्विन्द्रादिप्रापकाणां बलाबलानिश्चयादिन्द्र एवेत्यवधारणानुपपत्तिवत् विष्णुप्रापकाणां समुद्रान्तःस्थत्वादिलिङ्गानां सत्त्वाद्विष्णोरन्य एवेत्यवधारणानुपपत्तिरित्यत आह ॥ विष्णुलिङ्गानामिति ॥ ननु विष्णुलिङ्गानां समुद्रस्थत्वादीनां यदि लिङ्गत्वेन दौर्बल्यं तर्हि तत एव वरुणादिलिङ्गानामपां नेतारमित्यादीनामपि लिङ्गत्वेन दौर्बल्यं स्यात् । न च लिङ्गत्वा- विशेषेपि ब्रह्मलिङ्गानामेव दुर्बलत्वं निश्चितमिति वाच्यम् । नियामकाभावेन वैपरीत्यस्यापि वक्तुं शक्यत्वात् । तथाच विष्णोरन्य एवेत्यवधारणानुपपत्त्या सन्देहाद्विशेषो न स्यादिति पूर्वदोषस्तदवस्थ एवेत्यस्व-रसादाह ॥ यद्वेति ॥ यदि निरवकाशस्यापि लिङ्गस्य स्वभावप्रबलया श्रुत्या बाधोऽभ्यु-पगम्यते तर्हि सूर्यलिङ्गादेरपि तथा स्यात् । तथाच सूर्यादेरंतस्थत्वं न स्यादित्यत आह ॥ सूर्येति ॥ ननु सूर्यलिङ्गस्य सवितृश्रुत्यनुगृहीतत्वेन दौर्बल्यनिश्चयाभाववत् ब्रह्मेन्द्रमग्नि-मित्यादिब्रह्मश्रुत्यनुगृहीतत्वेन समुद्रस्थत्वादेरपि दौर्बल्याभावनिश्चयसम्भवाद्विष्णोरप्यंत-स्थत्वं स्यादित्यत आह ॥ ब्रह्मेति ॥ समुद्रान्तस्स्थत्वादिलिङ्गमात्रस्येन्द्रादिश्रुत्यपेक्षया दुर्बलत्वेन विष्णुप्रापकत्वाभावे वरुणलिङ्गस्यापि तथात्वेन कथं तद्बलेन वरुणस्यां-तस्स्थत्वोक्तिरित्यत आह ॥ अपां नेतारमिति ॥ वरुणलिङ्गस्येति ॥ तथाच वरुणस्यापि परित्यागेनेन्द्रबृहस्पत्यादिष्वेव मध्ये कश्चिदंतस्थ इत्यर्थः । तत्र हेतुः श्रुतत्वाविशेषादिति ॥ इन्द्रादि- श्रुतिसहितत्वादित्यर्थः । तत्प्रापकश्रुतेः सत्त्वादिति वा । न तु लिङ्गस्य श्रुत्युक्तत्वादिति । तथात्वेऽग्नेतृत्वादिलिङ्गस्यापि श्रुत्युक्तत्वादुक्तानुपपत्तिः शङ्कचेतेति भावः। अनेनैक एवेत्यवधारणं किं न क्रियत इति शङ्का निरस्ता । तर्हि टीकायां वरुणलिङ्गोक्तिविरोध इत्यत आह ॥ टीकायामिति ॥

तात्पर्यचन्द्रिका

यद्वा वरुणलिङ्गस्यान्ते श्रवणात्पूर्वदौर्बल्यन्यायेन न तस्यापि दौर्बल्यनिश्चयः । तृतीयो वास्तु । विष्णुलिङ्गानां निरवकाशत्वेनाबाध्यत्वादिन्द्रादिश्रुतीनां च श्रुतित्वादेव लिङ्गाबाध्यत्वादुभयानुग्रहार्थं विष्णुरेव तत्तदुपाधिवशादिन्द्रादिसंज्ञां लभत इति वदता पूर्वपक्षिणेन्द्रादीनां विष्णवैक्याङ्गीकारेणानेकेश्वरापत्त्यभावात् । तथाच श्रुतिः ''स ब्रह्मा स शिवः सेन्द्रः सोऽक्षर'' इत्यादिका । स्मृतिश्च ''अहं भवो भवंतश्च सर्वं नारायणात्मक''मित्यादिका । न चैवं विष्णोरेवान्तस्स्थत्वापत्तिः । कल्पितभेदस्योपहितस्य प्रसिद्धस्येन्द्रादेरेवान्तस्स्थत्वात् । विष्णुलिङ्गानां चानुपहित-रूपाभिप्रायेणोपपत्तेः । एतच्च पूर्वपक्षत्रयं सुधायामत्र च पूर्वपक्ष इन्द्रादीनां विष्णव-भेदस्याप्युक्तत्वात् । अत्र च टीकायां ''इन्द्रादिःस्या''दित्युक्त्वा ''इन्द्राद्यन्यतम'' इत्यप्युक्तत्वात् । आनन्दमयाधिकरणे च हिरण्यगर्भरुद्राद्यनेकप्रापकयुक्ते ''पूर्वपक्षा-नाहे''ति बहुवचनप्रयोगाच्च टीकाभिप्रेतम् । भाष्ये च पक्षत्रयसाधारण्येन ''अन्यः प्रतीयत'' इत्युक्तम् । एवमन्यत्राप्यनेकप्रापकयुक्ते पूर्वपक्षो यथासम्भवमूह्यः । एवं चेन्द्रबृहस्पत्यादीनामेवानन्दमयत्वात्तेषामानन्दमयाद्भेदव्यपदेशोप्ययुक्त इति ।

प्रकाशिका — यद्येवं टीकायामिन्द्रादिप्रापकतुल्यकक्ष्यतया वरुणलिङ्गोक्तिरयुक्तेत्यत आह ॥ यद्वेति ॥ एवं यः कश्चिदित्यनवधारणपक्षं समर्थ्येदानीं भेदव्यपदेशसूत्रव्यावर्त्यं सर्वेपीति तृतीयपक्षं वदन् ''अनेकेश्वरापाता''दित्युक्तदोषं निरस्यन्नाह ॥ तृतीयो वास्त्विति ॥ उभयानुग्रहार्थमिति ॥ ननु भेदमाश्रित्योभयपरत्वेपि विष्णुतदितरप्रापकाणामुपपत्ते-र्नाभेदस्सिध्यतीति चेत् किं मुख्यवृत्त्योभयपरत्वमुतामुख्यवृत्त्योत मुख्यामुख्योभयवृत्त्या । नाद्यः । वाक्यभेदादिप्रसङ्गेनासम्भवात् । पादांत्यप्राणनये त्वगत्या वाक्यभेदोपगमः पूर्वपक्षे । न द्वितीयः । क्वचिन्मुख्यत्वस्य वक्तव्यत्वात् । तृतीयेपि किमिन्द्रादावमुख्यत्वं विष्णौ मुख्यत्वमुत विपरीतम् । नाद्यः । इन्द्रादौ निरूढश्रुत्यादिविरोधात् । न द्वितीयः । तस्याभेदपक्षाश्रयणं विनाऽयोगात् । मुख्यवृत्त्योपहितेन्द्रादिपरत्वेप्यमुख्यवृत्त्यानुपहितविष्णु-परत्वसम्भवात् । अन्यथाऽनेकशास्त्रत्वापत्तेरिति भावः । इन्द्रादीनां विष्णवैक्येऽर्थापत्ति-रुक्ता । श्रुतिस्मृती चाह ॥ तथाचेति ॥ एवं तर्हि सिद्धान्तिनो नानिष्टमित्यत आह ॥ न चैवमिति ॥ इन्द्रादीनां विष्णवैक्ये ॥ कल्पितेति ॥ तथाच स्वरूपाभेदेपि

(प्रकाशिका)

विष्णोरिन्द्रादेश्चाविद्यकभेदस्यापि सत्त्वेन विष्णोर्नेति निरासोपपत्तेरिति भावः । उपहितस्य उपाधिविशिष्टस्य । इतरप्रापकसद्भावात्कुत एतदित्यत आह ॥ विष्णिवति ॥ उपहितधर्माणां चानुपहिते शुद्धेऽयोगादिति भावः ॥ एतच्चेति ॥ टीकाभिप्रेतमित्यन्वयः । कथं टीकाद्वय-पूर्वपक्षे पक्षत्रयमभिप्रेतमित्यत आह ॥ विष्ण्वभेदस्यापीति ॥ सुधायामिन्द्रादिप्रापकाणां प्राबल्यसमर्थनेनावधारणपक्षस्य सर्वसाधारण्येन प्राबल्यसमर्थनेन चानवधारणपक्षस्य चावगतेः स्पष्टत्वान्नोक्तः । टीकायां पक्षद्वयं ज्ञापकोक्त्या दर्शयति ॥ अत्रचेति ॥ एवमन्यत्रापीति ॥ आनन्दमयाधिकरणेऽतीते पादांत्यप्राणाधिकरणे द्युभ्वाद्यधिकरणे ''मांसादिभौमं यथा शब्दमितरयोश्चे''त्यादि वक्ष्यमाणाधिकरणेष्वित्यर्थः । पूर्वतन्त्रेपि निवीताद्यधिकरणे-ष्वनेककोटिकपूर्वपक्षः प्रसिद्ध इति भावः । पादांत्यप्राणनयादौ नाभेदपूर्वपक्षः किन्तु वाक्यभेदेन । अत उक्तं यथासम्भवमिति ॥ तथाच तत्र तत्र वक्ष्यामः । आद्यपक्षद्वये आनन्दमयसूत्रमाक्षेप्यमिति स्पष्टं टीकातोऽवगम्यते । अभेदपूर्वपक्षे तु नेति सुधोक्तमेवाक्षेप्यं दर्शयति ॥ एवं चेति ॥ एतेनैतत्परास्तं अभेदेनेह पूर्वपक्षो न युक्तः । तथात्वे प्राचीनभेदव्यपदेशविरोधादिति । तस्यासम्प्रतिपत्तेरिति । अत्राह कश्चित् श्रुत्यादिप्रमाण-षट्केन विष्णुत्वेन निर्णीतस्यानन्दमयस्य कथमेकेनान्यगतेन लिङ्गेनान्यत्वाध्यवसायः । ''त्यजेदेकं कुलस्यार्थे'' इति न्यायेन लिङ्गस्यैव बाध्यत्वात् । न चैकेनापि निरवकाशेन बहूनां प्रतिबन्ध इति वाच्यम् । श्रुत्यादेरपि निरवकाशताया उक्तत्वादिति । अत्राहुः । इन्द्रादिप्रापकप्राबल्येनान्यस्यांतस्स्थत्वेऽवश्यं वाच्ये तत्र श्रुतमदृश्यत्वमन्यत्र निरवकाशमिति तस्मिन्निरवकाशेऽन्यप्रापके सहकारिणि सत्यानन्दमयस्य विष्णुत्वे प्रागुक्तानि बाधकानि मूर्धानमुद्धुन्वत इत्यनेकबाधकोपेतत्वेन न विष्णुरित्यवधारणोपपत्तिः । न च श्रुत्यादिविरोधः। तेषामभावाभिमानात् । भावे वाऽन्यथयितव्यत्वाभिमानात् । अत्रत्यानामिन्द्रादिप्रापकाणां प्राबल्याभिमानात् । एवमुत्तरत्रापि द्रष्टव्यम् । केचित्तु निश्चयाभावेप्यानन्दमयोप्यन्यः किं न स्यात् । सन्देहेनापि विष्णुरेवेत्यवधारणप्रतिबन्धसिद्धेः । भाष्ये ''तस्मात्स एवानन्दमय'' इत्येवकारस्य तस्मादेवेति सम्बन्ध इत्याहुः ।

पाण्डुरङ्गि — टीकास्वारस्यानुरोधेन पक्षान्तरमाह ॥ यद्वेति ॥ तर्हीन्द्रादिसम-कक्ष्यत्वेन वरुणोक्तिरयुक्तेत्यतो वा आह ॥ यद्वेति ॥ पूर्वदौर्बल्यन्यायेनेति ॥ ''पूर्वापर-योरविरोधे पूर्वदौर्बल्यं प्रकृतिव''दिति न्यायेनेत्यर्थः ॥ एतच्चेति ॥ आद्येनोक्तत्वादित्यंतेन तृतीयपूर्वपक्षस्य टीकासुधासंमतत्वमुक्तम् । द्वितीयेनोक्तत्वादित्यंतेनान्यतमस्यां तस्स्थत्वमिति

द्वितीयपूर्वपक्षस्य टीकासंमतत्वमुक्तं वेदितव्यम् । पूर्वपक्षानिति आनन्दमयाधिकरणे विष्णुपक्षे बाधकबाहुल्यात्तत्र विष्णुत्वानिर्धारणस्य सुलभत्वात्तत्रायं विवेको न कृतः । द्वितीयसूत्र-व्यावर्त्यामाशङ्कामाह ॥ एवं चेति ॥

तात्पर्यचन्द्रिका

॥ सिद्धान्तस्तु ॥

लिङ्गादिभ्यो बलवती श्रुतिर्यद्यपि च स्वतः ।
अवकाशोज्झितैर्लिङ्गैस्सावकाशातु बाध्यते ॥ १ ॥

यद्यपि ''ऐंद्र्या गार्हपत्यमुपतिष्ठत'' इत्यादौ श्रुत्या लिङ्गबाधेन श्रुतेरुत्सर्गतो बलवत्त्वम् । तथापि यथा ''श्येनेनाभिचरन्यजेते''त्यादौ श्येनशब्दोन्यत्र रूढोऽपि ''यथावै श्येनो निपत्यादत्त'' इति वाक्यशेषोक्तस्य श्येनसादृश्यस्य श्येनेऽनुपपत्त्या यागपरः तथा समुद्रान्तस्स्थत्वादीनामन्यत्रासम्भवादिंद्रादिशब्दा विष्णुपरा एव ।

लोके श्रुतौ स्मृतौ चैव विष्णुलिङ्गतया स्थितम् ।
समुद्रान्तरवस्थानपूर्वकं कथमन्यगम् ॥ १ ॥

श्रुत्यादिकं च भाष्य उदाहृतम् । एवं च ''आनर्थक्यप्रतिहतानां विपरीतं बलाबल''मिति न्यायेन निरवकाशलिङ्गेन वैदिकतया सर्वथा बाधायोग्येन सावकाश श्रुतिबाधः । तदेतदभिप्रेत्योक्तं न्यायविवरणे ''श्रुतिसन्देहेऽनन्यथासिद्धलिङ्गेन निर्णयोपपत्ते''रिति ।

प्रकाशिका — ''लिङ्गेन श्रुत्यादिबाधोपपत्ते''रित्यादिटीकोक्तं सिद्धान्तन्यायं सङ्गृह्णाति ॥ लिङ्गादिभ्य इति ॥ वाक्यप्रकरणादिकमादिपदार्थः । यद्यपि लिङ्गमेव प्रकृतं तथापि कैमुत्यन्यायसिद्धानुवादः । चोवधारणे । स्वत एव जात्यैवेति सम्बध्यते ॥ लिङ्गैरिति ॥ समुद्रेऽन्तः कवयो विचक्षते यस्याण्डकोशं शुष्ममाहुः ब्रह्मा तपसान्वविंद''दिति समुद्रान्तस्स्थत्वब्रह्माण्डवीर्यत्वब्रह्मतपोलभ्यत्वादिलिङ्गैरित्यर्थः । सावकाशा इन्द्रादिश्रुति-रित्यर्थः । पूर्वार्धं दृष्टान्तोक्त्या विशदयति ॥ यद्यपीति ॥ श्रुतिलिङ्गविरोधाधिकरणं

(प्रकाशिका)

प्राग्विवृतम् । श्रुत्या ऐंद्र्येति गार्हपत्यशेषत्वबोधकतृतीयाश्रुत्या । इन्द्रप्रकाशनसामर्थ्य-रूपलिङ्गबाधेनेत्यर्थः । उत्तरार्धं दृष्टान्तोक्त्या विवृणोति ॥ तथापीति ॥ आद्याध्याये नामपादे ''तद्व्यपदेशं चे''ति चतुर्थेधिकरणे चिन्तितम् । ''श्येनेनाभिचरन्यजेते''त्यत्र श्येनशब्दः किं गुणविधिः किं वा कर्मनामेति विशये लोके द्रव्यविशेषपरत्वेनात्यन्त-निरूढत्वात्काम्यगुणेनोत्पत्तिशिष्टस्यापि नित्यस्य सोमस्य बाधसम्भवेन ज्योतिष्टोमेऽभि-चारार्थो गुणविधिः । अथवा मत्वर्थलक्षणाश्रयणेन विशिष्टकर्मान्तरविधिः । न च ''यथा वै श्येनो निपत्यादत्ते एवमयं द्विषंतं भ्रातृव्यं निपत्यादत्ते'' इति वाक्यशेषदर्शितक्रियासामान्येन गौण्या कर्मपरत्वम् । लक्षितलक्षणापर्यवसायिन्या गौण्या लक्षणातो जघन्यत्वादिति प्राप्ते गुणविधौ तस्यैव स्तोतव्यत्वात् स्वस्य स्वात्मना सादृश्यायोगेन वाक्यशेषानुपपत्तेर्गौरवेण विशिष्टविध्ययोगाच्च कर्मनामत्वमिति । एवं चेन्द्रादिषूत्सृष्टस्यापि श्रुतिप्राबल्यस्य यथा श्येनादिषु वाक्यशेषोपस्थापितानन्यथासिद्धलिङ्गबलेनापवादो न दोषाय तथा प्रकृतेपीति वाक्यार्थः । ननु विषमोऽयमुपन्यासः । दृष्टान्त इवात्र लिङ्गानां निरवकाशत्वाभावादित्यत आह ॥ लोक इति ॥ क्षीराब्धिशायित्वस्य नारायणे लोकप्रसिद्धत्वादित्यर्थः । यथोक्तं भाष्ये ''प्रसिद्धत्वात्सूचितत्वा''दिति । साध्यभागमध्याहृत्य ''नहि निरवकाश'' इत्यादि-नोक्तं दोषं निरस्यन्नुत्तरार्धाक्षरार्थमाह ॥ एवं चेति ॥ यदि श्रुत्यादिषु पूर्वपूर्वसिद्धार्थस्वीकार उत्तरोत्तरं च प्रमाणमनर्थकं स्यात् । तथाच विपरीतो भवतीति बलाबलाधिकरण-वार्तिकोक्तन्यायेनेत्यर्थः । निरवकाशबाध इव तर्ह्यप्रमाणतैव स्यादित्यत आह ॥ वैदिकतयेति ॥ उक्तं प्रमेयं समूलमित्याह ॥ तदेतदिति ॥ सन्देहे सावकाशत्व इत्यर्थः । एतेन ''लिङ्गेन श्रुत्यादि बाधोपपत्ते''रित्यादिटीका विवृता । न्यायविवरणमूला चेत्युक्तं भवति ।

पाण्डुरङ्गि — विष्णुरेवान्तस्स्थः । समुद्रस्थत्वादिलिङ्गानां सत्त्वात् । न चेन्द्रादिश्रुत्या तद्बाध इत्याह ॥ लिङ्गादिभ्य इति ॥ ननु समुद्रस्थत्वादेर्वरुणादावपि सम्भवात्कथं निरवकाशत्वमित्यत आह ॥ लोक इत्यादिना ॥ विपरीतं बलाबलमिति न्यायेनेति ॥ यदि श्रुत्यादिषु पूर्वपूर्वप्रमाणसिद्धार्थस्वीकारः तर्ह्युत्तरोत्तरं प्रमाणमनर्थकं स्यात् । तथाच विपरीतबाधो भवतीति बलाबलाधिकरणे वार्तिकोक्तन्यायेनेत्यर्थः ॥ आनर्थक्येति ॥ यदि निरवकाशमपि लिङ्गं श्रुतिबाधकं न स्यात्तदा लिङ्गस्यानर्थक्यं स्यादिति तत्र विपरीतं बलाबलम् । लिङ्गमेव श्रुत्यपेक्षया प्रबलमिति विपरीतमित्यर्थः ।

तात्पर्यचन्द्रिका

किञ्च "इन्द्रं मित्रं वरुणमग्निमाहु"रित्यादिश्रुत्येन्द्रादिशब्दानां विष्णावेव विद्वद्रूढेः सत्त्वेन इन्द्रादिशब्दप्रवृत्तिनिमित्तस्य परमैश्वर्यादेर्विष्णावेवानन्याधीनत्वनिरवधिकत्वाभ्यां मुख्यतः सम्भवेन महायोगस्यापि सत्त्वेन चेन्द्रादिश्रुतिर्विष्णावेव मुख्या । न चेन्द्रं मित्रमित्यादिवाक्यमिन्द्राद्यभेदपरम् । आहुरिति तत्तच्छब्दवाच्यत्वस्यैवोक्तेः । "सप्तार्धगर्भा भुवनस्य रेतो विष्णोस्तिष्ठंति प्रदिशा विधर्मणी"ति वाक्यशेषे भेदोक्तेश्च । "यो देवानां नामधा" इति श्रुत्यन्तरसंवादाच्च । "सोऽतकः सरुद्रः स प्राणभृत्स प्राणनायकः स ईशो यो हरि'रिति श्रुत्यन्तरेऽभेदविवक्षायां सरुद्र इत्यनेन स ईश इत्यस्य पौनरुक्त्यापत्त्या तत्तच्छब्दवाच्यताया एव विवक्षणीयत्वाच्च । "स प्रथमः सङ्कृतिर्विश्वकर्मा स प्रथमो मित्रो वरुणो अग्निः । स प्रथमो बृहस्पति"रिति श्रुत्यन्तरे प्रथमपदेन भेदेन प्रतीतेश्च । "यमिन्द्रमाहुर्वरुणं यमाहुर्यं मित्रमाहुर्यमु सत्यमाहु"रिति श्रुत्यन्तरे "यो देवानां देवतमस्तस्मै त्वा तेभ्यस्त्वे"ति भेदोक्तेश्च । "भीषास्माद्वातःपवते" इति "भयादस्याग्निस्तपती"ति च श्रुत्यंतरे भेदोक्तेश्च ।

नतु नारायणादीनां नाम्नामन्यत्र सम्भवः ।
अन्यनाम्नां गतिर्विष्णुरेक एव प्रकीर्तितः ।

इति स्मृतेश्च ।

प्रकाशिका — अत्र श्येनयागदृष्टान्तकथनेन तत्रेवात्रापीन्द्रादिश्रुतेर्विष्णावमुख्यत्वं प्रतीतं तन्निवारयितुमाह ॥ किञ्चेति ॥ यद्वा लिङ्गेन श्रुतिबाध उक्तः । सोपि नात्यन्तम् । यथोत्सर्गस्य सर्वविषयकत्वभ्रांतौ सत्यामपवादेन भ्रान्तिनिरासपूर्वकमुत्सर्गविषयस्स्वतस्सिद्ध एवापवाद विषयभिन्नो ज्ञाप्यते तद्वद्विष्णौ मुख्यत्वमन्यत्र मुख्यत्वभ्रान्तिनिरासेन ज्ञाप्यत इति भावेन श्रुतेर्हरावेव मुख्यवृत्तिरित्याह ॥ किञ्चेति ॥ वस्तुतस्तु ननु यथा लिङ्गानां निरवकाशत्वं तथेन्द्रादिश्रुतीनामिन्द्रादौ योगरूढ्योर्भावेन तत्रैव मुख्यत्वेन हरौ निरवकाशत्वमित्यतो भगवत्येव महायोगविद्वद्रूढ्योर्भावेन तत्रैव मुख्यत्वमिति भावेन —

(प्रकाशिका)

इन्द्रं मित्रं यमिन्द्रं च प्रथमस्संकृतिस्तथा ।
नामधाः सर्वदेवानामेक इत्यादिका श्रुतिः ।

इति चतुर्थपादीयानुव्याख्यां हृदि कृत्वा ''नचेन्द्रादिष्वि''त्यादिटीकां विवरीतुमाह ॥ किञ्चेति । ''इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यस्स सुपर्णो गरुत्मान् । एकं सद्विप्रा बहुधा वदंत्यग्निं यमं मातरिश्वानमाहु''रिति श्रुत्येत्यर्थः ॥ विष्णावेवेति ॥ वामनसूक्तत्वेन प्रसिद्धेरस्य सूक्तस्य सप्तार्धगर्भेति पूर्ववाक्ये प्रस्तुतस्य विष्णोरेवान्वयाच्चेति भावः ॥ विद्धदिति ॥ आहुः प्राज्ञा इति विदुषां प्रयोगबाहुल्यरूपरूढेः प्रतीयमानत्वादिति भावः । अज्ञरूढ्यपेक्षया प्राज्ञरूढेः प्राबल्यस्य जन्माधिकरणोक्तदिशा यववराहाद्यसिद्धत्वादिति ध्येयम् ॥ अनन्याधीनत्वेति ॥ अन्यगतं प्रति स्वातन्त्र्येणेत्युपलक्ष्यते । ''न ते विष्णो जायमानो न जातो देव महिम्नः परमन्तमापे''त्यादिश्रुत्यादिसिद्धत्वादिति भावः । नात्र श्रुतौ रूढिरुच्यते किं त्वभेद इत्यत आह ॥ न चेति ॥ भुवनस्य रेतः रतिप्रदस्य । विष्णोः प्रदिशा आज्ञया। अर्धगर्भाः आसमन्ताद्दृढं ब्रह्माण्डं तद्गर्भाणि सप्तमहाभूतमहदहंकारतत्वानि तदभिमानिनः। विधर्मणि विविधधारणकर्मणि । तिष्ठन्तीति विष्णुना भेदोक्तेरित्यर्थः ।

॥ य इति ॥ अजस्य नाभावध्येकमर्पितमित्युक्तपद्मनाभो विष्णुरेव विश्वकर्मसूक्ते यो देवानां नामधाः नामवाच्यतया तद्धारक एक एवेति समाख्याबलाच्चेन्द्रादिशब्दवाच्यतैवार्थ इत्यर्थः ॥ सोंतक इति ॥ द्युभ्वाद्यधिकरणे भाष्यकृदुदाहृतश्रुत्यन्तर इत्यर्थः । ''स प्रथमो बृहस्पतिश्चिकित्वान् तस्मा इन्द्राय सुतमाजुहोमी''ति याजुषश्रुतौ स प्रथमो विश्वकर्मेत्याद्युक्त्याऽप्रथमोपि कश्चन विश्वकर्मादिः प्राप्तः । अन्यथा प्रथम इत्यस्य व्यर्थत्वात्। तथाच कथमभेद इत्यर्थः । ''यमिन्द्रमाहुर्वरुणं यमाहुर्यं मित्रमाहुर्यमु सत्यमाहुः। यो देवानां देवतमस्तपोजास्तस्मै त्वा तेभ्यस्त्वे''ति याजुषश्रुतावेवं यमिन्द्रादिशब्दवाच्यमाहुः किं तैरभेदेन नेत्याह ॥ यो देवानामिति ॥ इन्द्रादीनां श्रेष्ठतमस्तन्नियामकस्तत्स्वामी तस्मै देवतमाय तेभ्यो देवेभ्यश्च त्वा सोमं सुनोमीत्याद्युक्तेः । तत्राभेदविवक्षायां देवतम इति तस्मै तेभ्य इति च भेदोक्तिरयुक्तेत्यर्थः । उक्तं चैतरेयभाष्ये ''यमिन्द्रमाहुरित्याद्युक्त्वा तस्मै त्वा तेभ्यस्त्वेति भेदावगमाच्चे''ति । तथाचाथर्वणभाष्योक्ता ब्रह्माण्डस्मृतिः

यमिन्द्रमाहुर्वरुणं यमाहुर्यं मित्रमाहुर्यमु सत्यमाहुः ।
यो देवानां देवतमो जनित्रं वायोस्तस्मै सोममेभ्यो जुहोमि ॥

इति ॥ भीषास्माद्वातःपवत इति ॥ अस्मात् अस्य परमात्मनः । भीषा भयेन वायुसूर्याग्न्यादयस्स्वस्वव्यापारान् कुर्वन्तीति तैत्तिरीयश्रुतावानन्दमयादिशब्दार्थत्वेन प्रकृतस्य विष्णोर्वाय्वादिभिर्भेदोक्तेः । ''भयादस्याग्निस्तपति भयात्तपति सूर्यः'' इत्यादिकाठकश्रुतौ कम्पनादित्यत्र विष्ण्वर्थत्वेन निर्णेष्यमाणवज्रशब्देन प्रकृतस्य परमात्मनो देवानां च भेदोक्तेश्चेत्यर्थः । तथाचेन्द्रं मित्रमित्यादिश्रुतिजातं तत्तच्छब्दवाच्यत्वमेव विष्णोराह न त्वभेदमिति स्थितम् । ननु यथेन्द्रादिशब्दवाच्यत्वं विष्णोस्तथा नारायणादिशब्द-वाच्यत्वमन्यस्य स्यात् । तथाचानिर्णय इत्यत आह ॥ नत्विति ॥ वामनस्मृतेरित्यर्थः । एतेन ''इन्द्रमित्यादिना तेषां भगवति विद्धद्रूढिसद्भावस्य सिद्धत्वा''दिति सुधावाक्यं समर्थितं भवति । नन्वेवमिन्दादिश्रुतीनां विष्णावेव महायोगविद्धद्रूढिभ्यां मुख्यत्वे ''मुख्यामुख्ययोर्मुख्ये सम्प्रत्यय'' इति न्यायेनेन्द्रादिश्रुतिभिर्मुख्यार्थस्य विष्णोरेव ग्रहणसिद्धौ सूत्रे निरवकाशलिङ्गोक्तिर्व्यर्थेति चेत्सत्यम् । ''सति चैवमभ्युपगमवादेनैव तद्धर्मोपदेशादित्युक्त''मिति न्यायविवरणटीकायामेवोक्त्याऽभ्युपगमवादेन वा मुख्ये सम्प्रत्यय इत्युत्सर्गस्येन्द्रस्यात्मेत्यादाविवापवादकं नास्ति प्रत्युत तत्साधकमेवास्तीति वक्तुं वा तदुक्तिरिति भावः । एतच्च महायोगविद्धद्रूढिसमर्थनं समन्वयसूत्रात्तत्त्वित्यनुवृत्तेस्तत्र तु शब्दस्यावधारणार्थत्वादंतस्स्थो विष्णुरेवेत्युक्त्या अन्यत्राज्ञरूढ्यल्पयोगयोस्सत्वेन तद्व्यवच्छे-दायोगान्महायोगविद्धद्रूढ्योरेवान्यत्र व्यवच्छेद्यत्वादिन्द्रादिश्रुतीनां विष्णौ महायोग-विद्धद्रूढ्योस्सूचितत्वादिति ध्येयम् ।

पाण्डुरङ्गि — ननु समुद्रान्तस्स्थितत्वादेर्निरवकाशत्वेपि न विष्णोरन्तस्स्थत्वं युज्यते । इन्द्रादिप्रापकेन्द्रादिश्रुतीनां त्रेधा प्राबल्यवत्त्वेन ततोपि बलवत्त्वेनेन्द्रादेरेवान्तस्स्थ-त्वौचित्यात् । किञ्चेन्द्रादिशब्दानां विष्णुपरत्वं हि योगेन वक्तव्यम् । तत्रेन्द्रादिषु रूढेः सत्वाद्रूढेश्च योगापेक्षया बलवत्त्वाद्रूढ्येन्द्रादिपरत्वेन तेषामेवान्तस्स्थत्वादित्यत आह ॥ किञ्चेति ॥ नन्विन्द्रादिशब्दानां विष्णौ विद्धद्रूढिसद्भावे किं मानमित्यत उक्तमिन्द्रमिति ॥ न चात्र रूढिः केनोक्तेति वाच्यम् । प्रयोगबाहुल्यकथनपरस्याप्याहुरित्यस्यैव रूढिप्रदर्श-कत्वात् । तथाच महायोगविद्धद्रूढिभ्यामिन्द्रादिश्रुतयो विष्णावेव मुख्या इति तस्यैवान्त-स्स्थत्वमिति भावः । नन्विन्द्रमिति वाक्यस्येन्द्रादीनां विष्णुभेदपरत्वान्न तेन तच्छब्द-वाच्यत्वसिद्धिरित्याशङ्क्य निषेधति ॥ न चेति ॥ आहुरितीति ॥ वचनक्रियां प्रति शब्दस्यैव कर्मत्वादिति भावः । आहुरित्येतदिंद्राद्यभेद आर्यसंमतिप्रदर्शनपरं किं न

(पाण्डुरङ्गि)

स्यादित्यत आह ॥ सप्तार्धेति ॥ तत्र सकलाधारत्वस्योक्तत्वादिति भावः । श्रुत्यन्तर-संवादेनाप्याहुरित्यस्य तच्छब्दवाच्यत्वप्रदर्शनपरत्वमित्याह ॥ य इति ॥ तत्तन्नामवाच्यत्व उपोद्बलकं श्रुत्यन्तरं चाह ॥ सोऽन्तक इति ॥ प्रथमेति ॥ तथाच द्वितीयोऽन्यो रुद्रोऽस्तीति प्रतीयत इति भावः । यमिन्द्रमित्यादि तस्मैत्वेत्यादि । अत्र येत्वामिन्द्रमाहुः एवं वरुणमित्यादि । यश्च देवानां देवतमस्तस्मै तेभ्यश्च मयि महदिंद्रियमस्त्विति योजना । यद्वा यमिन्द्रमित्याहुस्तस्मै तुभ्यं त्वामेवोपगता इति भगवदधीनत्वमुच्यते । षष्ठीचतुर्थीभ्यां परमात्मनः सकाशात्तेषां भयकथनेन भेदस्य प्रतीतेरिति भावः ।

तात्पर्यचन्द्रिका

यदि च श्रुतिलिङ्गयोरनुग्रहायाभेदस्तर्हि ''आकाशादेव समुत्पद्यन्त'' इत्याकाश-श्रुतेः कारणत्वादिरूपलिङ्गस्य चानुग्रहायाकाशब्रह्मणोः तथा ''कदाचनस्तरीरसि नेन्द्रे''ति मन्त्रस्थस्येन्द्रप्रकाशनसामर्थ्यरूपलिङ्गस्य ''ऐंद्या गार्हपत्यमुपतिष्ठत'' इति द्वितीयाश्रुतेश्चाविरोधायेन्द्रगार्हपत्ययोः तथा व्रीहियवशास्त्रयोः षोडशिग्रहणाग्रहण-शास्त्रयोश्चाविरोधाय व्रीहियवयोर्ग्रहणाग्रहणयोश्च विरुद्धांशत्यागेनैक्यं च स्यादिति बहुविप्लवापत्तिः । स ब्रह्मेत्यादिश्रुतिरपि तत्तच्छब्दप्रवृत्तिनिमित्तोक्तिमुखेन तत्तच्छब्द-समन्वयपरा । न तु प्रसिद्धदेवाभेदपरा । अन्यथा ''सोक्षर'' इत्युक्तेर्ब्रह्म-प्रसिद्धाकाराद्यक्षरात्मकं स्यात् । ''अहं भव'' इत्यादिस्मृतिरपि

पुरुष एवेदं सर्वं भूतं भव्यं भवच्च यत् ।
इत्युच्यते तदीयत्वान्न तु सर्वस्वरूपत ।
इत्यादिस्मृतिवशात्तदीयत्वपरा वा
यस्तान्द्वेष्टि समां द्वेष्टि यस्ताननु स मामनु ।
ऐकात्म्यमागतं विद्धि पाण्डवैर्धर्मसंश्रयैः ।

इत्यादिवदत्यन्तप्रियत्वाभिप्राया वा द्रष्टव्या । इन्द्रादीनां ब्रह्मणोऽन्यत्वं स्वीकृत्य वाक्यस्येन्द्रादिपरत्वाङ्गीकारे त्वर्थैकत्वाभावाद्वाक्यभेदः स्यात् । एवं च

अग्नींद्रादिश्रुतिर्नाना मार्गालिङ्गैर्हि वैष्णवैः ।
नीतैककण्ठ्यं नो चेत्तत्कलहं को निवारयेत् ॥ १ ॥

इन्द्राग्न्यादिशब्दानां ब्रह्मणि परममुख्यत्वेपि यत्र बाधकं तत्र तद्देवतापरत्वं युक्तमेव । पादांत्यप्राणाधिकरणन्यायेन च सूर्यवरुणादिलिङ्गमपि तत्तदन्तर्गत-भगवत्येव मुख्यमिति त्रिविधपूर्वपक्षोऽप्ययुक्तः ।

प्रकाशिका — एवं निरवकाशलिङ्गेनेन्द्रादिशब्दानां भगवति मुख्यत्वे चान्तस्थो विष्णुरेवेत्याद्यसूत्राभिप्रेतत्वेनाद्यपूर्वपक्षं निरस्य द्वितीयपूर्वपक्षमग्रे निरसिष्यन् इदानीमभेदरूप-तृतीयपूर्वपक्षं द्वितीयसूत्राभिप्रेतबाधकोक्त्या निरसितुं किमुभयप्रापकश्रुतिलिङ्गप्राबल्या-न्यथानुपपत्त्या द्वयोरभेद उच्यत उत स ब्रह्मेत्यादिशास्त्रांतराविरोधायेति विकल्पौ हृदि कृत्वाऽऽद्यमनिष्टकथनेन निरस्यति ॥ यदि चेति ॥ आकाशब्रह्मणोरिति ॥ उत्तराधिकरणे हि ''आकाश इति होवाच सर्वाणि हवा इमानि भूतान्याकाशादेव समुत्पद्यन्त'' इत्यत्राकाशशब्दो भूताकाशपर इति प्राप्ते कारणत्वलिङ्गात्परब्रह्मपर इत्युच्यते । तन्न स्यात् । तत्रापि श्रुतिलिङ्गोभयानुग्रहाय तयोरैक्यं स्यादित्यन्वयः । कारणत्वादीति पररीत्येति ध्येयम् । ऐंद्र्यधिकरणं ग्रहणाधिकरणं चोक्तम् ॥ कदाचनेति ॥ यद्यपि ''निवेशनस्संगमनो वसूनामित्यैंद्र्या गार्हपत्यमुपतिष्ठत'' इत्यग्निप्रकरणस्थं वाक्यं शाबरभाष्यादावुदाहृतं तथाप्यग्निहोत्रप्रकरणे महोपस्थानेषु ''ऐन्द्र्या गार्हपत्यमुपतिष्ठत'' इति वाक्यदर्शनादे-तन्मन्त्रोपन्यासः ॥ व्रीहियवेति ॥ द्वादशे तृतीयपादे एकार्थास्तु विकल्पेरन् समुच्चये त्वावृत्तिस्स्यादिति चतुर्थेऽधिकरणे चिन्तितं ''व्रीहिभिर्यजेते''त्यादौ विकल्पसमुच्चयसन्देहे सर्वाङ्गोपसंहारप्रयोगवचनानुग्रहायाष्टदोषनिदानविकल्पपरिहाराय च ज्योतिष्टोमवदभ्या-समाश्रित्य समुच्चयो मिश्रैर्वा याग इति प्राप्ते एकार्थानामेकस्मिन्नुपकारेऽन्योन्यानपेक्षया विनियुक्तानां विकल्पस्स्यात् । ज्योतिष्टोमे हि द्रव्यदेवतासंयोगानामदृष्टार्थानां प्रकरणेन युगपद्ग्रहणादभ्यासो न्याय्यः । व्रीहियवौ तु वाक्यद्वयेनान्योन्यनैरपेक्ष्येण पुरोडाशप्रकृति-द्रव्यतया विधीयमानौ प्रयोगवचनं पर्यायेण गृह्णाति । न युगपत् । येन बलात्प्रधा-नावृत्तिस्स्यात् । मिश्रत्वमपि निरपेक्षविधानादेव युक्तमेवेत्यगत्या विकल्पाश्रयणमिति । तथाचायमर्थः । यदि श्रुतिलिङ्गयोरन्यतराबाधेनोभयानुग्रहायाभेदाश्रयणं तदाकाशब्रह्मणो-राकाशत्वब्रह्मत्वरूपधर्मत्यागेन तथा मन्त्रब्राह्मणयोर्लिङ्गश्रुत्योरनुग्रहायेन्द्रगार्हपत्ययोरिन्द्र-त्वगार्हपत्यत्वरूपधर्मत्यागेन विशेष्यैक्यं स्यात् । न तु लिङ्गेन श्रुतिबाधो वा श्रुत्या लिङ्गबाधोवा स्यात् । यदि शास्त्रद्वयाविरोधायाभेदाश्रयणं तदा व्रीहियवयोर्ग्रहणा-ग्रहणयोर्व्रीहित्वादिधर्मत्यागेनैक्यं स्यात् । न तु विकल्पाश्रयणेन पाक्षिको बाधः । तथाच

(प्रकाशिका)

सर्वमीमांसोन्मूल्येतेति । स ब्रह्मेत्यादिशास्त्रान्तराविरोधायेति द्वितीयं निराह ॥ सब्रह्मेति ॥ स्मृतेर्द्वैधाभिप्रायमाह ॥ अहं भव इति ॥ यद्भूतादि इदं सर्वं पुरुष एवोच्यते । तदीयत्वादेव । नत्वभेदादित्यर्थः ।

एवमवधारणपूर्वपक्षमभेदपूर्वपक्षं च निरस्याधुनानवधारणेनेन्द्राद्यनेकपरत्वरूपद्वितीयपक्षं निरस्यति ॥ इन्द्रादीनामिति ॥ अर्थैकत्वाभावादिति ॥ ''अर्थैकत्वादेकं वाक्यं साकांक्षं चेद्विभागे स्या''दिति सूत्रकृता जैमिनिनैकवाक्यताया अर्थैकत्वनिबन्धनत्वोक्तेरिति भावः । यद्यप्ययमादावेव दूष्यः तथापि स्फुटदोषत्वादभेदपक्षदूषणस्य प्राक्संगतत्वाद्वांऽते दूषितः । ननु तर्ह्यभेदपक्षस्य दूषितत्वादिन्द्रादिप्रापकाणां बलाबलानिश्चयात्कथमेकवाक्यतेत्याशङ्क्य वैष्णवत्वेनैकवाक्यतामाह ॥ एवं चेति ॥ नानामार्गा नानार्थप्रतिपादिका । अग्नीन्द्रादि-श्रुतिर्विष्णुलिङ्गैरैककण्ठ्यं विष्णुरूपैकार्थप्रतिपादकतां नीता । न चेदग्नीन्द्रादिश्रुतिकलहं अहमग्निमेव प्रतिपादयाम्यहमिन्द्रमेवेति विवादं को निवारयेत् । न कोपीत्यर्थः । ननु यदीन्द्रशब्दमुख्यवाच्यो हरिरेव तर्हि ''इन्द्रस्यात्मा निहितः पञ्चहोते''त्यत्रेन्द्रस्य विष्णुत्वे पुरन्दरान्तर्यामित्वेनात्र भेदव्यपदेशोऽसिद्धस्स्यादित्यत आह ॥ इन्द्राग्न्यादीति ॥ अत्रात्मपदोक्तान्तर्यामिणोऽन्यस्य श्रवणेनेन्द्रः पुरंदर एवेति भावः । नन्वेकचक्रत्वादि-सूर्यादिलिङ्गानां का गतिः । न च तान्यप्रमाणानि । वैदिकत्वादित्यत आह ॥ पादान्त्येति ॥ स्पष्टं चाग्रेऽधिकरणशरीरम् । न च तेनैवेदं गतार्थमिति वाच्यम् । निरवकाश-श्रुतिसत्त्वेंऽतर्यामिगतत्वायोगादितीह पूर्वपक्षकरणात् । यद्वा तत्र बाधकादन्तर्यामिग-तत्वाङ्गीकारेपि नेह तथात्वम् । बाधकाभावान्निरूढश्रुतिसत्त्वाच्चाभेदेनाप्युपपत्तेरिति पूर्वपक्षकरणादिति भावः ।

पाण्डुरङ्ग — नन्विन्द्रादिश्रुतीनां विष्णुपरत्ववद्विष्ण्वादिनाम्नामपि रुद्रादिपरत्वं किं न स्यादित्यत आह ॥ यदि चेति ॥ अथवा तृतीयं पूर्वपक्षं निषेधति ॥ यदि चेति ॥ ननु दृष्टांतदार्ष्टान्तिकयोर्वैषम्यम् । आकाशादेर्ब्रह्माभेदे प्रमाणाभावेन तत्र श्रुतिलिङ्गयोरुभयोर-विरोधायाकाशादेर्ब्रह्माभेदस्यासम्भवेपि प्रकृते स ब्रह्मा स शिवः स हरिः सेन्द्र इत्यादेरेव जीवब्रह्माभेदे प्रमाणत्वेन तत्र श्रुतिलिङ्गयोरुभयोरनुग्रहायेन्द्रादेर्ब्रह्माभेदोङ्गीकार्य इत्यत आह ॥ स ब्रह्मेतीति ॥ प्रसिद्धेति ॥ प्रसिद्धं यदकारेकाररूपमक्षरं तदात्मकं स्यादित्यर्थः । तथापि स्मृत्या जीवब्रह्माभेदो भविष्यतीत्यत आह ॥ अहमित्यादि ॥ नन्वस्त्विन्द्रादीनां

ब्रह्मणो भेदः । तथापि वाक्यमिदमिन्द्रादिपरमेव किं न स्यादित्यत आह ॥ इन्द्रादीनामिति ॥ यद्वा द्वितीयं पूर्वपक्षं निषेधति ॥ इन्द्रादीनामिति ॥ अग्नीन्द्रादिश्रुतिरिति ॥ अग्निश्चेन्द्रादयश्चाग्नीन्द्रादयः तेषां श्रुतिरित्यर्थः । एवं च ''ध्यंतादजाद्यदन्तं पदं पर''मित्यस्याप्राप्तेर्नाग्निशब्दस्य परनिपात इति ज्ञेयमित्याहुः । एवमिन्द्रादिशब्दानां विष्णावेव विद्वद्रूढिमहायोगयोः सत्त्वेन विष्णावेव मुख्यमित्युक्तम् । तदयुक्तम् । तथात्व इन्द्रादिशब्दानां कुत्रापि प्रसिद्धेन्द्रादिपरत्वं न स्यात् । तथाच भेदव्यपदेशाद्यसिद्धिः । इन्द्रस्यात्मेत्यादावपि ब्रह्मपरत्वप्राप्तेरित्यत आह ॥ इन्द्राग्न्यादिशब्दानामिति ॥ बाधकमिति ॥ मुख्यया वृत्त्या ब्रह्मपरत्वेप्यमुख्यवृत्त्याऽन्यपरत्वाभावेऽनुपपद्यमानत्वरूपं बाधकं यत्र तत्रैवेत्यर्थः । ननु निरवकाशसमुद्रान्तस्स्थत्वादिलिङ्गबाधितत्वेनेन्द्रादिशब्दानां प्रसिद्धेन्द्रादेरन्तस्स्थत्वसाधकाभावेपि सप्ताश्वयुक्तरथोपेतत्वादिरूपलिङ्गस्य निरवकाशत्वेन साधकत्वं स्यादेवेत्यतस्तस्यापि सावकाशत्वं दर्शयति ॥ पादांत्येति ॥ यथेन्द्रादिश्रुतिर्विष्णावेव मुख्या एवं लिङ्गमपि विष्णावेव मुख्यमिति योजना ।

तात्पर्यचन्द्रिका

तत्राद्यद्वितीयौ प्रथमसूत्रेण निरस्तौ । तृतीयस्तु द्वितीयेनेति द्रष्टव्यम् । न च ''इन्द्रस्यात्मे''त्यादावात्मशब्दः स्वरूपपरः । तथाच सूत्रोक्तो भेदव्यपदेशोऽसिद्ध इति शङ्क्यम् । ''सहैव सन्तं न विजानंति देवा'' इति साहित्यकर्मकर्तृभावादिना भेदव्यपदेशात् षष्ठ्या औपचारिकत्वापाताच्च । इन्द्रादिशब्दवाच्य उपहिते परमात्माभेदस्य परेणाप्यनङ्गीकृतत्वेनेन्द्रादिप्रातिपदिके लक्षणापाताच्च । अत्रैव प्रकरणे ''आत्मा जनाना''मित्यन्तर्यामिण्यात्मशब्दप्रयोगाच्च । न च तत्राप्यात्मशब्दः स्वरूपपरः । अस्मिन्नेव प्रकरणे ''शास्ता जनाना''मित्यस्यायोगात् । अत्रैव प्रकरणे ''सर्वात्मे''ति चात्यन्तायुक्तं स्यात् । ज्ञानादिरूपस्य ब्रह्मणस्तद्विरुद्धजडरूपतायाः केनाप्यनङ्गीकृतत्वात् । तस्मात् ''इन्द्रस्यात्मे''त्यादावात्मशब्दो न स्वरूपवाची । किन्तु शरीरप्रतिसम्बन्धिवाची । तत्र तस्य प्रयोगबाहुल्यात् । तथाच ''इन्द्रस्यात्मे''त्यादिश्रुतिरिन्द्रादेरीश्वरशरीरस्थानीयत्वाभिप्राया । ''इन्द्रो राजे''त्यादाविन्द्रशब्दस्य ब्रह्मपरत्वेपि ''इन्द्रस्यात्मे''त्यादावन्यपरता च बाधकबलाद्युक्ता ॥

प्रकाशिका — उक्तं पूर्वपक्षत्रयनिरासं सूत्रारूढं करोति ॥ तत्रेति ॥ समुद्रान्तस्थत्वादिविष्णुधर्मोपदेशादंतस्थो विष्णुरित्युक्त्या इन्द्र एवेत्याद्यवधारणपक्षस्येन्द्राद्यन्यतमः स्यादित्यनवधारणपक्षस्य च निरासप्रतीतेरिति भावः । द्वितीयसूत्रार्थं समर्थयितुमाह ॥ न चेति ॥ इन्द्रस्येति षष्ठ्या इत्यर्थः । आत्मशब्दस्य स्वरूपार्थत्वे प्रत्ययास्वारस्यमुक्त्वा प्रातिपदिकास्वारस्यमाह ॥ इन्द्रादीति ॥ समासीन आत्मा जनानामित्यत्रात्मशब्दस्यान्तर्यामिपरत्वात्तदेकप्रकरणे श्रुतस्य स्वरूपार्थत्वमन्याय्यमित्याह ॥ अत्रैवेति ॥ शास्ता जनानामिति स्वरूपत्वे शास्तृत्वायोगादिति भावः । अयुक्ततामेवाह ॥ ज्ञानादीति ॥ तथाच श्रुत्यर्थं निष्कृष्याह ॥ तस्मादिति ॥ इन्द्रशब्दस्यात्र प्रकरणे विष्णुपरत्वात्कथमेवमित्यतः प्रागुक्तमेव स्मारयति ॥ इन्द्रो राजेति ॥ बाधकबलादिति ॥ नियम्यत्वरूपादित्यर्थः । यथा ''बहुगणवतुडति संख्ये''त्यत्र संज्ञापरस्यापि संख्याशब्दस्य ''ष्णान्ताष''डित्यत्र संज्ञिपरत्वं तद्वत् । यथा वा ''आत्मन आकाशस्सम्भूत'' इत्यत्र भूतपरत्वेप्याकाशशब्दस्य ''यदेष आकाश'' इति वाक्ये ब्रह्मपरता तद्वत् । यथा वा ''दहरोस्मिन्नंतर आकाश'' इत्यत्राकाशशब्दस्य भूतपरत्वेपि ''यावान्वायमाकाश'' इत्युत्तरवाक्ये ब्रह्मपरता यथा वा ''अक्षरात्परतः पर'' इत्यत्राक्षरशब्दस्यान्यपरत्वेपि ''अक्षरात्सम्भवतीह विश्व''मित्यत्र ब्रह्मपरता तद्वदिति द्रष्टव्यम् । एतच्च ''तथाप्येतद्विरोधे तु तद्वाचित्वमपोद्यते'' इत्यनुव्याख्यानेन तुल्यन्यायतया सूचितम् । बाधकबलादित्युक्त्यैव ''न ह्येकशब्देन द्विरुक्तेन भेदश्रुतिं विना वस्तुद्वयं कुत्रचिदुच्यत इति तार्तीयगीताभाष्यविरोधोप्यपोढः । नन्वव्यक्तात्पुरुषः पर इत्यादाववरत्वादिबाधके सत्यपि तदधीनत्वन्यायेनान्यगतावरत्वं प्रति स्वातन्त्र्येण निमित्तेनाव्यक्तादित्यादिपंचम्यंतादिपदवाच्यत्वं विष्णोर्वीक्ष्यते । तथेहाप्यन्यगतनियम्यत्वं प्रति स्वातन्त्र्येणेन्द्रस्येत्यादिषष्ठ्यन्तपदवाच्यत्वं युक्तम् । एवं च न मुख्यार्थत्यागः । एकप्रकरणस्थस्यार्थान्तरपरत्वदोषोपि नेति चेन्न । अव्यक्तादित्यस्याब्रह्मत्वे ''अनाद्यनन्तं महतः परं ध्रुव''मित्युत्तरवाक्यस्याप्यब्रह्मपरत्वं स्यात् । महत्परत्वलिङ्गात् । तच्चानिष्टं मुक्तिहेतुत्वश्रवणात्तत्रेति कथंचिद्बाधकनिरासेनाव्यक्तादित्यस्य ब्रह्मपरत्वमुपेतम् । न चेहेन्द्रस्येत्यादेरब्रह्मपरत्वे बाधकमस्ति । इन्द्रादिपदप्रवृत्तिरूपगुणलाभस्येन्द्रो राजेत्यादिवाक्यगतेन्द्रादिपदसमन्वयेनैव सिद्धेः । इन्द्रो राजेत्यादिवाक्यस्थेन्द्रादिशब्दसमन्वयमात्रेणैवादृश्यत्वमुखकृतपूर्वाक्षेपसमाधानसिद्धेश्च । न चैवं ''अनेन जीवेनात्मने''त्यादिवाक्यस्थजीवशब्दसमन्वयेनैव तच्छब्दगुणलाभात् ''जीवा एव तु दुःखिन''

इत्यादिवाक्यस्थजीवादिशब्दसमन्वयो न स्यादिति वाच्यम् । ''स बद्धस्सदुःखी स बद्धयति सदुःखयती''ति विशेषवचनादिह तथा नियामकाभावादिति । यद्वा सर्ववेदगतसर्वशब्दवाच्यत्वसिद्धयै तत्रापि विष्णवङ्गीकारेप्यदोषः । अत एवान्यपरतेत्युक्तम् । नत्वन्यमात्रपरतेति ।

पाण्डुरङ्गि — ननु पूर्वपक्षत्रयनिरासः प्रथमसूत्रेण प्रतीयत इत्यत आह ॥ तत्रेति ॥ अत्राद्यद्वितीयावित्यनेनाकाङ्क्षाक्रमानुसारिपूर्वपक्षनिरासकत्वं सूत्रक्रमनिमित्तं चोक्तं भवति । ननु भाष्ये इन्द्रस्यात्मेति भेदव्यपदेशोदाहरणमयुक्तम् । तत्रात्मशब्दस्य स्वरूपपरत्वेन तेन भेदासिद्धेरित्याशङ्क्य निराकरोति ॥ न चेति ॥ सहैवेति ॥ अत्र देवा इति देवानां कर्तृत्वस्य सन्तमित्यन्तस्थस्य कर्मत्वस्योक्तत्वात् उत्सर्गतःकर्तृकर्मणोर्भेदस्याङ्गीकृतत्वात्परेणाप्येकस्यैव कर्तृकर्मभावस्यानभ्युपगमेन तथा साहित्यस्यापि भेदव्याप्तत्वेन भेदसिद्धेरित्यर्थः । कर्मकर्तृभावादिनेत्यत्रादिपदेन ज्ञातृज्ञेयभावोऽज्ञातृत्वमज्ञेयत्वं च गृह्यते ॥ षष्ठ्या इति ॥ सम्बन्धषष्ठ्या वक्तव्यसम्बन्धस्य च भेदव्याप्तत्वेन स्वरूपत्वे घटस्य स्वरूपमित्यादिवदौपचारिकत्वं स्यादिति भावः । किं चेन्द्रादेर्विशिष्टत्वाद्विशिष्टस्य शुद्धभेदानङ्गीकारादिन्द्रप्रातिपदिके लक्षणा स्वीकर्तव्या । तथाच लक्षणापत्तिरूपो दोषश्च स्यादित्याह ॥ इन्द्रादीति ॥ सकृच्छतस्यात्मशब्दस्य क्वचित्स्वपरत्वं क्वचिदन्तर्यामिपरत्वमित्ययुक्तं चेत्याह ॥ अत्रैवेति ॥ जनानां विशिष्टत्वाद्विशिष्टस्य शुद्धेनाभेदस्य बाधितत्वाज्जनपदेन लक्षणा स्वीकर्तव्येति दोषे सत्येव दोषान्तरमाह ॥ अस्मिन्नेवेति ॥ एवं च सिद्धमर्थमाह ॥ तथाचेति ॥ बाधकबलादिति ॥ इन्द्रस्यात्मेत्यत्रेन्द्रशब्दस्य ब्रह्मपरत्वे आत्मशब्दोक्तं स्वामित्वं तस्यैव वक्तव्यम् । न च स्वस्यैव स्वनियामकत्वं सम्भवतीति भावः ।

तात्पर्यचन्द्रिका

अन्येतु ''य एषोंतरादित्ये हिरण्मयः पुरुषो दृश्यते य एषोंतरक्षिणि पुरुषो दृश्यत'' इत्यक्ष्यादित्ययोरंतस्स्थः प्रतीयते । स विद्याकर्मातिशयलब्धैश्वर्यः कश्चित् संसारी न तु परमात्मा । ''हिरण्यश्मश्रु''रित्यादौ रूपादिश्रवणात् । परमात्मनश्चारूपत्वेन श्रुतत्वादिति प्राप्ते परमात्मैवेति सिद्धान्तः । आदित्यवाक्ये ''सर्वेभ्यः पाप्मभ्य उदित'' इति श्रुतस्य सर्वपापराहित्यस्याक्षिवाक्ये ''सैवर्क्तत्सामे''त्यादौ श्रुतस्य सार्वात्म्यस्य च संसारिण्यसम्भवात् । रूपादिकं तु नीरूपेऽपि

(तात्पर्यचन्द्रिका)

सविशेषब्रह्मणि साधकानुग्रहार्थमैच्छिकमुपास्यं मायामयमस्ति । यद्वा सर्वस्य कार्य-जातस्य ब्रह्मोपादानकत्वादुपादेयस्य चोपादानादनन्यत्वात्कार्यशरीरगतरूपादिभिर्ब्रह्म व्यपदिश्यते । मुमुक्षुं प्रति सविशेषनिरूपणं च मोक्षसाधननिर्विशेषब्रह्मज्ञानार्थम् । यथोक्तं

निर्विशेषं परं ब्रह्म साक्षात्कर्तुमनीश्वराः ।
ये मंदास्तेनुकंप्यन्ते सविशेषनिरूपणैः ॥

इत्यादीत्याहुः ।

प्रकाशिका — एवं स्वमतेऽधिकरणशरीरं सूत्रार्थं च समर्थ्य परमतं प्रत्याख्यातुमनुवदति ॥ अन्ये त्विति ॥ छान्दोग्ये आद्येध्याये श्रूयते ''य एषोन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्यकेश आप्रणखात्सर्व एव सुवर्णस्तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी तस्योदितिनाम स एष सर्वेभ्यः पाप्मभ्य उदितः उदेतिह वै सर्वेभ्यः पाप्मभ्यो य एवं वेद । इत्यधिदैवतम् । अथाध्यात्मम् । य एषान्तरक्षिणि पुरुषो दृश्यत'' इत्यादि । अत्र किमादित्य- मण्डलादिस्थो हिरण्मयः पुरुषो विद्याकर्मवशात् प्राप्तैश्वर्यः कश्चित्संसारी उत परमात्मेति संशये ''हिरण्यश्मश्रु''रित्यादिरूपस्य ''य एषो-न्तरादित्य'' इत्याद्याधारस्य ''येचामुष्मात्परांचो लोकास्तेषां चेष्ट'' इति सावधिकैश्वर्य-मर्यादायाश्च श्रवणात्तेषां च ''अरूपमस्पर्श''मिति श्रुत्याऽरूपे ''स्वे महिम्नी''ति श्रुत्याऽऽधाररहिते ''एष सर्वेश्वर'' इति श्रुत्या निरवधिकैश्वर्ये परमात्मन्यसम्भवात् । यथोक्तं भामत्यां

मर्यादाधाररूपाणि संसारिणि परेतु न ।
तस्मादुपास्यस्संसारी कर्मानधिकृतो रविः ॥ इति

एवं प्राप्ते आदित्यवाक्ये ''सर्वेभ्यः पाप्मभ्य'' इति सर्वपापराहित्यस्य अक्षिवाक्ये ''सैवर्क्तत्सामे'' त्यादौ सार्वात्म्यस्य परमात्मधर्मस्योपदेशात् तयोश्चापहतपाप्मेत्यादिश्रुत्या नित्यशुद्धे सर्वोपादानतया सर्वाभिन्ने परमात्मनीवान्येष्वयोगात् ''य आदित्ये तिष्ठन्नादि-त्यादन्तरोऽयमादित्यो न वेदे''त्यादित्यदेवतायाः परमेश्वराद्भेदोपदेशाच्च संसारिणोन्यः परमात्मैवान्तस्थ इति सिद्धान्त इत्यर्थः । ननु तर्हि रूपादिकमनुपपन्नमित्यतस्तदुक्तं द्वेधा

परिहारमनुवदति ॥ रूपादिकं त्विति ॥ साधकेति ॥ साधनानुष्ठातारः साधका इत्यर्थः । नन्वेवं मुमुक्षुं प्रति सविशेषनिरूपणमनर्थकमित्यत आह ॥ मुमुक्षुमिति ॥

पाण्डुरङ्गि — ननु तर्हि परमात्मनो रूपरहितत्वाद्रूपप्रतिपादकश्रुतिर्विरुद्धेत्यत आह ॥ रूपादिकं त्विति ॥ मायामयं रूपं तत्र किमर्थमङ्गीकर्तव्यमित्यत आह ॥ साधकेति ॥ भक्तानामनुग्रहार्थमित्यर्थः । रूपप्रतिपादकश्रुतेर्गत्यन्तरमाह ॥ यद्वेति ॥ ननु सविशेषज्ञानस्य मोक्षासाधनत्वान्मुमुक्षुं प्रति तदुपदेशो न युक्त इत्यत आह ॥ मुमुक्षुं प्रतीति ॥

तात्पर्यचन्द्रिका

केचित्तु इदमेव वाक्यमुदाहृत्यैवमेव च पूर्वपक्षयित्वा ''तस्य यथा कप्यासं पुण्डरीकमिति श्रुतं पुण्डरीकाक्षत्वं सिद्धान्तयुक्तिमाहुः । तदुभयमपि न । अस्मद्रीत्याऽऽनन्दमयाधिकरणाक्षेपायादृश्यत्वादिगुणयुक्तस्य स्वप्रकरणस्थभेद-व्यपदेशवतश्च वाक्यस्योदाहरणत्वसम्भवे तद्रहितस्य तदयोगात् । उक्तं हि त्वयैव ''य आदित्यमन्तरो यमयतीति श्रुत्यन्तरे भेदव्यपदेशा''दिति ।

प्रकाशिका — दूषणसौकर्याय रामानुजमतमपि पूर्वसाम्यादत्रैवानुवदति ॥ केचित्त्विति ॥ हिरण्यश्मश्रुरित्यादिशरीरित्वश्रवणाज्जीव एवान्तस्थः । तस्यैव स्वकर्मफलभोगाय शरीरयोगोपपत्तेरिति प्राप्ते सर्वपापराहित्यपुण्डरीकाक्षत्वादिलिङ्गात्परमात्मा । हिरण्यश्मश्रु-रित्यादिनोक्तस्य ''आदित्यवर्णं तमसः परस्ता''दिति श्रुतेरप्राकृतशरीरस्य परमपुरुषे सम्भवात् । य आदित्ये तिष्ठन्य आत्मनि तिष्ठन्निति भेदव्यपदेशाच्चेत्याहुरित्यर्थः । उदाहरणानौचित्येन मतद्वयमपि निरस्यति ॥ तदुभयमपि नेति ॥ आक्षेपाय तदाक्षेपेण पूर्वपक्षोत्थानाय । तद्रहितस्य पूर्वाक्षेपकलिङ्गरहितस्य भेदव्यपदेशरहितस्य च उदाहरणत्वायोगादित्यर्थः । स्वप्रकरणे भेदव्यपदेशो नेत्येतदुभयसंमतमित्याह ॥ उक्तमिति ॥ त्वयेति वादिद्वयं प्रत्युच्यते । तथाच श्रुत्यधिकरणसङ्गत्योरभावादयुक्तोयं विचार इति भावः ।

पाण्डुरङ्गि — प्रायेणैकार्थत्वेन दूषणसाम्यात्केचिन्मतमप्युपन्यस्यति ॥ केचित्त्विति ॥ किमत्रानन्दमयाधिकरणसङ्गतस्वप्रकरणस्थभेदव्यपदेशवतो वाक्यस्योदाहरणत्वासम्भवाद्वाक्यान्तरोदाहरणमुत विशेषयुक्तिलाभार्थम् । न द्वितीयः । तददर्शनात् । नाद्य इत्याह ॥ अस्मद्रीत्येति ॥ न मदुदाहृतेपि भेदव्यपदेशोस्त्येवेत्यत आह ॥ उक्तं हीति ॥

तात्पर्यचन्द्रिका

किञ्च

नीरूपेऽपि च रूपादि यद्युपास्त्यर्थमुच्यते ।
जीवेऽपि पाप्माभावादि तर्ह्युपास्त्यर्थमुच्यताम् ॥ १ ॥

ननु जीवे पाप्मनो व्यावहारिकत्वात्तद्राहित्यं प्रातिभासिकम् । ब्रह्मणि तु नीरूपत्वस्य तात्विकत्वाद्रूपं व्यावहारिकम् । न च व्यावहारिकविषयत्वेन प्रामाण्यसम्भवे श्रुतेः प्रातिभासिकविषयत्वं युक्तमिति चेन्न । त्वन्मत उपास्यस्य नामादौ ब्रह्मत्वादेः प्रातिभासिकत्वनियमेनात्रापि तथैव युक्तत्वात् । त्वन्मते चोपासनावाक्यस्य तत्कर्तव्यतामात्रपरत्वेनार्थपरत्वाभावात् । कर्तव्यतायां च व्यावहारिकप्रातिभासिकविभागाभावात् । श्रुतौ श्रद्धालुना श्रुत्योर्विषयभेदेन तात्विकविषयत्वस्यैव वक्तव्यत्वाच्च । न च हिरण्यश्मश्रुत्वादिकमन्यतः प्राप्तम् । येन तद्वाक्यमनुवादकं सत्तत्रातात्पर्यादप्रमाणं न स्यात् । किं च जीवे पाप्मादेर्व्यावहारिकत्वेपि तद्राहित्यश्रुतिस्त्वंपदलक्ष्यशुद्धरूपाभिप्राया पारमार्थिकविषयैवास्तु । न च शुद्धं रूपं ब्रह्मैवेति ब्रह्मविषयत्वापत्तिः । त्वयाऽस्य वाक्यस्य सविशेषाशुद्धब्रह्मविषयत्वाङ्गीकारात् ।

प्रकाशिका — एवं साधारणेन मतद्वयं निरस्य प्रातिस्विकरूपेणाप्यद्वैतिमतं निरसितुं तन्मते सिद्धान्ते रूपादेर्या द्वेधा गतिरुक्ता तत्राद्यायां तावद्दोषमाह ॥ किञ्चेति ॥ उच्यतामिति ॥ अविद्यमानारोपस्योभयत्र तुल्यत्वात् । तथाच सिद्धान्तानुत्थितिरिति भावः। ''रोगाख्यायां ण्वुल् बहुल''मिति बहुलग्रहणात् क्तिन्नंतत्वेनोपास्तीति साधु । वैषम्यमाशङ्क्य निरस्यति ॥ नन्विति ॥ ततश्च किमित्यत आह ॥ न चेति ॥ नामादाविति ॥

नामब्रह्मेत्युपासीतेत्युक्तनामादावित्यर्थः । यदपि व्यावहारिकपरत्वलाभायैवमुक्तिरिति तदयुक्तं वैषम्यकथनमित्याह ॥ त्वन्मते चेति ॥ श्रुत्योः नीरूपत्वसरूपत्वश्रुत्योः । विषयभेदेन प्राकृताप्राकृतादिविषयभेदेनेत्यर्थः । न तु व्यावहारिकरूपविषयत्वेनाप्रामाण्यमित्यर्थः । ननु मिथ्यारूपविषयत्वेपि नाप्रामाण्यम् । तत्र तात्पर्याभावादित्यत आह ॥ न चेति ॥

पाण्डुरङ्गि — ननूदाहृतेपि वाक्येऽपहतपाप्मत्वादीनां ब्रह्मलिङ्गानां सत्त्वात्तैरंतस्थस्य ब्रह्मत्वनिर्णयसम्भवेन तदुदाहरणं युक्तमेवेत्यत आह ॥ किञ्चेति ॥ तथाचापहतपाप्मत्वस्य जीवेपि सम्भवान्न तेन ब्रह्मत्वनिश्चय इति भावः । ननु जीवस्य कल्पितत्वेन तत्र पापराहित्यस्य पारमार्थिकत्वासम्भवेन प्रतियोगितन्निवृत्त्योर्वैलक्षण्यस्यावश्यकत्वेन पापराहित्यप्रतियोगिभूतपापस्य व्यावहारिकत्वेन तन्निवृत्तिरूपस्य पापराहित्यस्य व्यावहारिकत्वासम्भवेन प्रातिभासिकत्वस्य वक्तव्यत्वेन जीवे पापराहित्यमुपास्त्यर्थं वक्तुमशक्यम् । तथा सति श्रुतेरतत्वावेदकत्वं स्यादित्याशङ्कते ॥ नन्विति ॥ तथात्वे नीरूपे ब्रह्मणि रूपमप्युपास्त्यर्थं न वक्तुं शक्यम् । तस्यापि प्रातिभासिकत्वेन श्रुतेरप्रामाण्यापातादित्यत आह ॥ ब्रह्मणि त्विति ॥ किं चोपासनावाक्यानामुपासनाकर्तव्यत्वे तात्पर्यस्य विद्यमानत्वेनोपासनाविषयीभूतेऽर्थे प्रातिभासिकव्यावहारिकभेदसद्भावेपि तत्रोपासनावाक्यानां तात्पर्याभावात् तत्तात्पर्य विषयीभूतोपासनाकर्तव्यतायाश्च सर्वत्र व्यावहारिकत्वेन तत्र तात्पर्यवतां वाक्यानां प्रामाण्यसम्भवेन जीवे पापराहित्यस्य प्रातिभासिकत्वेपि न दोष इत्याशयेनाह ॥ त्वन्मत इति ॥

किञ्च ब्रह्मणि रूपस्य व्यावहारिकत्वेप्यतात्विकत्वेन तत्प्रतिपादकवाक्यानामप्रामाण्यापत्त्या रूपस्य व्यावहारिकत्वं परित्यज्य तात्विकत्वमेवाभ्युपेयम् । न चैवं विरोधः । रूपवत्तदभावस्यापि तात्विकत्वाभ्युपगमादिति वाच्यम् । एकविषयत्वे हि विरोधः । प्रकृते च रूपवदेव किंचिद्वस्तु हिरण्यश्मश्रुरित्यादिवाक्येन प्रतिपाद्यते रूपाभावप्रतिपादकेन च तादृशं वस्त्विति विषयभेदाभ्युपगमेन विरोधाभावात् । तस्माद्रूपादेर्व्यावहारिकत्वाभ्युपगमेऽप्रामाण्यतादवस्थ्यमेवेत्यभिप्रायेण दूषणान्तरमाह ॥ श्रुतौ श्रद्धालुनेति ॥ न रूपादिश्रुतेस्तात्विकरूपादिपरत्वं कल्प्यम् । प्रयोजनाभावात् । न चैवं रूपप्रतिपादकवाक्यानामप्रामाण्यं स्यादिति वाच्यम् । तेषामनुवादकत्वेन तात्पर्याभावादित्यत आह ॥ न चेति ॥ तथाच मानान्तरप्राप्त्यभावेन रूपप्रतिपादकवाक्यानामनुवादकत्वं न सम्भवतीति तत्र

(पाण्डुरङ्गि)

तात्पर्येऽवश्यं वाच्ये अतात्विकार्थपरत्वेनाप्रामाण्यं स्यादेवेति तत्परिहारार्थं रूपादेर्व्यावहारिकत्वमेव परित्यज्यतामिति भावः । यदुक्तं जीवगतपापाभावविषयत्वे श्रुतेः प्रातिभासिकविषयत्वेनाप्रामाण्यं स्यादिति तद्दूषयति ॥ किञ्चेति ॥ ननु जीवस्य विशिष्टत्वात्तत्र तात्विकपापराहित्यं न सम्भवतीत्यत आह ॥ त्वं पदेति ॥ ननु शुद्धरूपस्य ब्रह्मत्वात्तद्विषयत्वे ब्रह्मविषयत्वमेव स्यादित्याशङ्क्य निषेधति ॥ न चेति ॥

तात्पर्यचन्द्रिका

यच्चोपादानं ब्रह्म कार्यकारणयोरभेदात्कार्यगतधर्मैर्व्यपदिश्यत इत्युक्तं तन्न । स्वर्णे कटकत्वादेरिव कटकादावपि स्वर्णत्वस्य व्यवहारेण ब्रह्मधर्मैः कार्य एव व्यपदेशापातात् । न चैतदधिकरणप्रतिपाद्यं सविशेषं ब्रह्मशरीरादि- भ्रमाधिष्ठानम् । येनाधिष्ठान एवारोप्यधर्मव्यवहारो न तु विपरीतमिति शङ्क्येत । कथं चाधिष्ठाने ब्रह्मणि पापराहित्याद्यसाधारणरूपेण भासमाने तत्राध्यस्तगतधर्मव्यवहारः । किञ्चैवं ब्रह्मणो विरुद्धधर्माधिकरणनानाकार्योपादानतया ब्रह्मविषयकवाक्यविरोधः क्वाप्यपरिहार्यः स्यात् ।

प्रकाशिका — रूपादेराद्यां गत्युक्तिं निरस्य द्वितीयामनूद्य निरस्यति ॥ यच्चेति ॥ ब्रह्मधर्मैरिति ॥ तथाच पापराहित्यादिब्रह्मधर्माणां ब्रह्मकार्ये जीवेपि सम्भवेनास्मिन्नपि परिहारे सिद्धान्तानुन्मेष इति भावः । ननु–

समारोप्यस्य धर्मेण विषयो रूपवान्भवेत् ।
विषयस्य तु रूपेण समारोप्यं न रूपवत् ॥

इत्यद्वैतिभिरङ्गीकारेणाधिष्ठान एवारोप्यधर्मव्यपदेश इति कथमेवमापादनमित्यत आह ॥ न चेति ॥ ब्रह्मेत्यंतमनुवादः । अत्र प्रतिपाद्यस्याधिष्ठानत्वमेव नेत्युक्तम् । अङ्गीकृत्याप्याह ॥ कथंचेति ॥ भासमाने अत्र वाक्ये प्रतीयमाने । किञ्चैवं सति मीमांसामात्रोच्छेद इत्याह ॥ किञ्चैवमिति ॥

पाण्डुरङ्गि — कार्यकारणयोरभेदेपि न कार्यगतधर्मैः कारणं व्यपदिश्यते । किन्तु कारणगतैरेव धर्मैः कार्यं व्यपदिश्यते । तथा लोके दृष्टत्वात् । तथाच ब्रह्मधर्मैर्जगत्येव

व्यपदेशः स्यादित्याह ॥ स्वर्ण इति ॥ स्यादेतत् । यदि स्वर्णस्येव ब्रह्मणः परिणामिकारणत्वमभ्युपगम्येत । न चैवम् । शुक्ते रजतारोपाधिष्ठानत्ववत्सविशेषब्रह्मणः शरीरभ्रमाधिषठानत्वरूपकारणत्वस्याभ्युपगमात् । तथाचाध्यस्तगतैर्धर्मैस्तदधिष्ठानं यथा व्यपदिश्यते नैवमधिष्ठानधर्मेणाध्यस्तम् । तथाच प्रकृतेप्यध्यस्तशरीरादिगतरूपादिना तदधिष्ठानस्य ब्रह्मणो व्यपदेशसम्भवेपि न ब्रह्मगतेन पापादिराहित्येन जीवव्यपदेश इत्यत आह ॥ न चेति ॥ सविशेषमिति हेतुगर्भं विशेषणम् । स्वयं कल्पितस्य शरीरादिभ्रमाधिष्ठानत्वायोगादिति भावः । किं च ब्रह्मणोऽध्यस्तगतरूपाद्यारोपानुपपत्तिः । असाधारणाधिष्ठानभूतब्रह्मज्ञानसद्भावात् । अन्यथा तस्य कदापि निवृत्तिर्न स्यात् । न च पापराहित्येन ब्रह्मज्ञाने पापारोपासम्भवेपि नीरूपत्वेन तज्ज्ञानाभावाद्रूपारोपः सम्भवतीति वाच्यम् । पापाराहित्येपि शुद्धत्वस्यैव प्रयोजकत्वान्निर्विशेषत्वेन ज्ञानस्यावश्यकत्वेन तज्ज्ञाने विद्यमाने रूपाद्यारोपानुपपत्तिरित्याह ॥ कथं चेति ॥ किं च ब्रह्मणः कारणत्वाकारणत्वप्रतिपादकवाक्यविरोधोपि न परिहार्यः । तत्रापि ब्रह्मणोपि कारणोपादानत्वेन कारणधर्माणां ब्रह्मणि व्यपदेशोपपत्तेरित्याह ॥ किञ्चैवमिति ॥

तात्पर्यचन्द्रिका

यच्चोक्तं सविशेषनिरूपणं मोक्षसाधननिर्विशेषज्ञानार्थमिति तन्न । ''उदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं वेदे''ति श्रुतसर्वपापनिवृत्तिरूपमुक्तिफलहानस्याश्रुतफलांतरकल्पनस्य चायोगात् । किञ्च किं सविशेषज्ञानं निर्विशेषज्ञानार्थं किं वा तस्य ज्ञानविजातीयवृत्त्यन्तररूपमारोपितविषयमुपासनापरपर्यायं ध्यानम् । नाद्यः । निर्विशेषशब्देन विशेषाभावविशिष्टस्योक्तौ त्वन्मते विशिष्टज्ञानस्य मोक्षाहेतुत्वात् । तदभावेनोपलक्षितस्योक्तौ च काकेन गृहे संस्थानविशेषस्येव विशेषाभावेन विशेषस्यैवोपलक्ष्यत्वे तस्य विशिष्टग्राहिणा ज्ञानेन प्रागेव ज्ञातत्वात् अन्यस्य चोपलक्ष्यस्याभावात् उपलक्ष्यत्वाकारेण च ज्ञानस्य त्वन्मते मोक्षासाधनत्वात् । न च विशेषणाविषयं विशेष्यज्ञानं प्रागसिद्धमिति वाच्यम् । विशिष्टज्ञानस्य विशेषणज्ञानाभावार्थत्वायोगात् । तथाच –

विशिष्टब्रह्मधीसाध्या शुद्धधीरित्यसङ्गतम् ।
विशिष्टप्रत्यये यस्माद्विशेष्यं भासतेतराम् ॥ १ ॥

(तात्पर्यचन्द्रिका)

किं च सविशेषज्ञानं निर्विशेषज्ञानस्य न तावदृष्टद्वारा हेतुः । तद्विशिष्टज्ञान-जन्येनाज्ञानध्वंसेन चित्तवशीकरणेन वा तदभावविशिष्टज्ञानस्य वा तदभावोप-लक्षितज्ञानस्य वा तद्विशेषणाज्ञानस्य वा क्वाप्यदर्शनात् । रूपादियुक्तपराग्भूत-सविशेषज्ञानेन तद्विपरीतनिर्विशेषज्ञानायोगाच्च । निषेधोपयोगिनो बुद्धिपूर्वकारोप-स्यापि शब्दप्रमाणानपेक्षत्वात् । न ह्यत्र घटोस्तीत्युक्त्वाऽत्र स नास्तीति वक्तव्यम् । नाप्यदृष्टद्वारा । विहितक्रिया जन्यत्वाददृष्टस्य । त्वन्मते च ज्ञानस्याविधेयत्वात् । नापि ज्ञानप्रतिबन्धकदुरितनिवृत्तिद्वारा । तस्य नित्यादिकर्मणैव निवृत्तेः । नित्यादि-कर्मणामपीहैव शास्त्रे निरूपणापत्तेश्च । त्वन्मते ज्ञानस्याज्ञानमात्रनिवर्तकत्वाच्च । न च व्यावहारिकं दुरितं व्यावहारिकसविशेषब्रह्माज्ञानकार्यम् । येनाज्ञाननिवृत्त्या तत्कार्यं पापं निवर्तेत । एतेन सविशेषज्ञानसन्तानरूपं निदिध्यासनमदृष्टद्वारा वा दुरितनिवृत्तिद्वारा वा चित्तवशीकरणद्वारा वा निर्विशेषज्ञानार्थमिति निरस्तम् । श्रुतहान्याद्यापातात् । सविशेषनिदिध्यासनस्यापि निर्विशेषनिदिध्यासनवत्स्व-विषयापरोक्षहेतुताया एव युक्तत्वाच्च । दशमस्त्वमसीत्यादाविव शाब्दे ज्ञाने चित्तवशीकरणानपेक्षणाच्च । आपरोक्ष्यहेतुचित्तैकाग्र्यादेश्च निर्विशेषपरोक्षज्ञानाधीन-तन्निदिध्यासनादेव सिद्धेः । चित्तवशीकरणाभावे सविशेषनिदिध्यासनस्यैवायोगाच्च ।

नापि सविशेषध्यानं निर्विशेषज्ञानार्थमिति द्वितीयः । ज्ञानविशेषो ध्यानमित्यन्यत्रोक्तत्वात् । इह "य एवं वेदे"ति ज्ञानार्थविदधातुश्रवणाच्च । भगवति रूपं तात्विकमित्यन्यत्रोक्तत्वाच्च । "हिरण्मयः पुरुषो दृश्यत" इत्यपरोक्षज्ञान-विषयत्वोक्तेश्च । न हि योषित्यग्नित्वं दृश्यत इत्युच्यते । किञ्च योषिदादेरग्नित्वा-द्यभावेपि तथा ध्यानवन्निर्विशेषब्रह्मण एव हिरण्यश्मश्रुत्वादिना ध्यानसम्भवेन सविशेषब्रह्मणः साधकानुग्रहार्थमैच्छिकरूपपरिग्रहोक्तिरयुक्ता । तस्मान्न सविशेष-निरूपणं निर्विशेषज्ञानार्थम् । अन्यथा वैपरीत्यं स्यात् । "सत्यं ज्ञान"मित्यादि सद्ब्रह्मनिरूपणमपि "असद्वा इदमग्र आसी"दित्यादिश्रुतिसिद्धा सद्ब्रह्मज्ञानार्थं स्यात् । एवं च

असद्रूपं परं ब्रह्म साक्षात्कर्तुमनीश्वराः ।
ये मंदास्तेनुकंप्यंते सद्ब्रह्मप्रतिपादनैः ॥ १ ॥
निर्विशेषं परं धर्ममनुष्ठातुमनीश्वराः ।
ये मंदास्तेनुकंप्यन्ते सविशेषनिरूपणैः ॥ २ ॥

इति स्यात् । शक्यं हि ब्रह्मकाण्डे लक्षणया निर्विशेषब्रह्मेव कर्मकाण्डेप्य-ग्निहोत्रादिसविशेषधर्मविलक्षणः कश्चिन्निर्विशेषो धर्मः प्रतिपाद्यत इति वक्तुम् ।

किञ्च–

आद्यसूत्रे धर्मशब्दाद्वितीये भेदशब्दतः ।
निर्धर्मकत्वमैक्यं च निरस्तं परवस्तुनः ॥ १ ॥
धर्मो भेदश्च मिथ्यात् चेत् श्रुतिसूत्राप्रमाणता ।
व्याख्याव्याजेन चोक्ता स्यात्त्वया सौगतसौहृदात् ॥ २ ॥

परमतेऽस्याधिकरणस्य ''अन्तर उपपत्ते''रित्यनेन पौनरुक्त्यं स्वमते तदभावश्च तत्रैव वक्ष्यते ।

प्रकाशिका — एवं सिद्धान्ते रूपाद्युक्तेर्द्वेधापि गतिकथनं निरस्य इदानीं यदपि सविशेषनिरूपणस्य फलमुक्तं तदपि श्रुतहानाश्रुतकल्पनादोषाभ्यां निरस्यति ॥ यच्चोक्तमिति ॥ अस्तु वा सविशेषनिरूपणं निर्विशेषज्ञानार्थमिति । तथापि सविशेषज्ञानं वा तदर्थमुत सविशेषध्यानं वेति ध्यानस्वरूपं निरूपयन्नेव विकल्प्य निरस्यति ॥ किञ्चेति ॥ तस्य सविशेषस्य । निर्विशेषशब्देन विशेषाभावविशिष्टमुच्यते तदुपलक्षितं वेति विकल्पौ हृदि कृत्वा क्रमेण निरस्यति ॥ निर्विशेषेति ॥ उपलक्षणपक्षेपि विशेषाभावोपलक्ष्यं विशेष्यमात्रं वा ब्रह्मगतः कश्चन धर्मो वेति विकल्पौ हृदि कृत्वाह ॥ तदभावेनोपलक्षितस्योक्तौ चेति ॥ विशिष्टग्राहिणा सविशेषग्राहिणा । विशिष्टग्राहिणा स्वरूपस्य ग्रहणेप्युपलक्ष्यत्वे तद्ग्रहणं नेत्यत आह ॥ उपलक्ष्यत्वाकारेणेति ॥ मोक्षासाधनत्वादिति ॥ निर्विकल्पकज्ञानस्यैव तथात्वादिति भावः । ननु विशिष्टज्ञानेन विशेष्यसिद्धावपि विशेषणाविषयकतया विशेष्यज्ञानार्थं तदित्यत आह ॥ नचेति ॥ उक्तं संगृह्णाति ॥ तथाचेति ॥ एवं

(प्रकाशिका)

सविशेषज्ञानं न निर्विशेषज्ञानार्थमित्युक्तम् । अस्तु वा तत् । तथापि सविशेषज्ञानं दृष्टद्वारा निर्विशेषज्ञानहेतुरुतादृष्टद्वारा प्रतिबन्धकदुरितनिवृत्तिद्वारा वा । आद्येपि किं दृष्टमज्ञानध्वंसः चित्तवशीकरणं वेति विकल्पान्हृदि निधाय क्रमेण निरस्यति ॥ किञ्चेति ॥ तदभाव-विशिष्टज्ञानस्य वेत्यादित्रितयं निर्विशेषज्ञानशब्दार्थः । अयुक्तं चेदं चित्तवशीकरणद्वारा तदर्थत्वमित्याह ॥ रूपादीति ॥ हिरण्यश्मश्रुत्वादिरूपादियुक्तत्वात्परागभूतेत्यर्थः । ननु निषेधज्ञाने प्रतियोग्यारोपस्यावश्यकतया विशेषाभावज्ञानाय सविशेषज्ञानं युक्तमेवेत्यत आह ॥ निषेधेति ॥ तदेवाह ॥ न हीति ॥ तथाच ब्रह्मनिर्विशेषमिति वक्तुं रूपादिविशेषकथनं न युज्यत इति भावः । द्वितीयं निरस्यति ॥ नापीति ॥ अस्तु ज्ञानं विहितक्रियेत्यत आह ॥ त्वन्मते चेति ॥ तृतीयं निरस्यति ॥ नापीति ॥ दुरितनिवर्तकत्वं च ज्ञानस्य किं साक्षादुताज्ञाननिवृत्तिद्वारा । नाद्य इत्याह ॥ तस्येति ॥ द्वितीय आह ॥ न च व्यावहारिकमिति ॥ एतेनेत्युक्तमेवाह ॥ श्रुतेति ॥ सर्वपापराहित्यरूपश्रुतफलहानिर-श्रुतफलकल्पनाचेत्याद्युक्तदोषानिवृत्तेरित्यर्थः । अयुक्तं चान्यनिदिध्यासनेनान्यज्ञानमित्याह ॥ सविशेषेति ॥ चित्तवशीकरणोपयुक्ततया तन्निदिध्यासनं न तु साक्षान्निर्विशेषज्ञानायेति चेत् तत्किं शाब्दज्ञाने वाऽपरोक्षज्ञाने वा । नाद्य इत्याह ॥ दशम इति ॥ न द्वितीय इत्याह ॥ आपरोक्ष्येति ॥ चित्तैकाग्र्यादेः प्रागेव सिद्धत्वान्न विशेषज्ञानसाध्यत्वमित्याह ॥ चित्तेति ॥ एवं सविशेषज्ञानं निर्विशेषज्ञानार्थमित्याद्यो निरस्तः । द्वितीयं निरस्यति ॥ नापीति ॥ अन्यत्र न्यायामृते तृतीयपरिच्छेदे । तथाच प्रागुक्त एव दोष इति भावः ॥ इहेति ॥ ''उदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं वेदे''ति श्रवणादित्यर्थः ।

ननु हिरण्मय इत्याद्युक्तरूपस्य मिथ्यात्वात्तद्विषयकं ध्यानं कथं ज्ञानं स्यात् । अविद्यमानस्य ज्ञानायोगेपि योषितमग्निं ध्यायीतेतिवद्ध्यानस्योपपत्तेरित्यत आह ॥ भगवतीति ॥ अन्यत्र न्यायामृते । तात्विकत्वे विषयवाक्यस्थयुक्तिमाह ॥ हिरण्मय इति ॥ तावता कथं तात्विकत्वमित्यत आह ॥ न हीति ॥। यदि मिथ्याभूतस्यापि ध्यानं युक्तं तर्हि सविशेषोक्तिरयुक्तेति दोषान्तरमाह ॥ किञ्चेति ॥ अन्यथेति ॥ अन्यनिरूपणादन्यज्ञाने सतीत्यर्थः । निर्विशेषनिरूपणं सविशेषज्ञानार्थं स्यादित्यर्थः । अतिप्रसङ्गान्तरमाह ॥ सत्यमिति ॥ अन्यथेत्यत्रापि सम्बध्यते । उक्तातिप्रसङ्गं सङ्गृह्यनतिप्रसङ्गान्तरमपि श्लोकेनाह ॥ एवं चेति ॥ ननु निर्विशेषब्रह्मेव निर्विशेषधर्म एव नास्तीति कथमतिप्रसङ्ग इत्यत आह ॥ शक्यं हीति ॥ यथाऽप्रतीयमानमपि निर्विशेषं लक्षणया प्रतिपाद्यतया कल्प्यते तद्वदित्यर्थः ।

अत्राधिकरणे सूत्रद्वयमपि परस्य प्रतिकूलमित्याह ॥ किञ्चेति ॥ ऐक्यं जीवात्मभिः । सूत्रितयोर्धर्मभेदयोर्व्यावहारिकत्वात्तादृशस्य मयाङ्गीकारात्को दोष इत्यत आह ॥ धर्म इति ॥ श्रुतीति ॥ सर्वेभ्यः पाप्मभ्य उदित इत्यादित्वदुदाहृतश्रुतिसूत्रयोश्चेत्यर्थः । ननु कथं सौहृदादिति । ''हृद्भगसिंध्वंते पूर्वपदस्य चे''त्युभयपदवृद्धौ सौहार्दादिति वाच्यमिति चेदत्राह दुर्घटवृत्तिकारः । संज्ञापूर्वकविधेरनित्यत्वाद्धृद्भगेत्युभयपदवृद्धेरप्रवृत्तेः ''तद्धितेष्वचामादे''रित्यादिवृद्धिरेवेति । ''अर्थवतो ग्रहणेनानर्थकस्ये''ति परिभाषायाः ''स्वं रूपं शब्दस्याशब्दसंज्ञे''त्यत्र रूपग्रहणेन ज्ञापितत्वात् हृद्भगेति सूत्रेऽर्थवत एव हृच्छब्दस्योपादानात् ''सुहृदुर्हृदौ मित्रामित्रयो''रिति निपातिते सुहृच्छब्दे समुदायस्यैवार्थवत्त्वेन तदवयवहृच्छब्दस्यानर्थकत्वात्तस्योभयपदवृद्धिर्न भवति । किंत्वादिवृद्धिरेवेति । चान्द्रास्तु हृद्भगेत्यत्र प्रतिपदोक्तहृच्छब्दस्यैव हृदयपर्यायस्य ग्रहणम् । न तु ''हृदयस्य हृल्लेखयदण्लासेष्वि''त्युक्तहृदादेशस्य । सौहृदमित्यादौ तु हृदादेश एवेति मन्वते । अत एव ''क्षणभिन्नसौहृद'' इति कुमारसम्भवे प्रयोग इति । ननु सुधोक्तं पौनरुक्त्यदूषणं कस्मान्नोक्तमित्यत आह ॥ परमत इति ॥ इदं च पौनरुक्त्यं परमतद्वयेपि सममिति ध्येयम् ।

एतेन यत्केनचित्प्रलपितं भामत्युक्तमेव वाक्यमुदाहृत्य ''एवमेवास्याक्षिणी'' इति नयनद्वयोपदेशाद्देवताविशेष एवादित्यान्तस्थ इति प्राप्ते ''स एष सर्वेषां लोकानामीष्ट'' इति सर्वलोकेश्वरत्वधर्मोपदेशात्तस्य च ''एक एव रुद्रो न द्वितीयाय तस्थ'' इति शिवनिष्ठत्वाच्छिव एवादित्यान्तस्थः । नयनद्वयोपादानं तु विकसितपुण्डरीकसादृश्यस्य द्वयोरेव भावात्तृतीयस्य मुकुलितत्वेन तदभावाद्युज्यत इति । तन्न । उदाहरणानौचित्यस्योक्तत्वात् । पौनरुक्त्यस्य वक्ष्यमाणत्वात् । शिवस्य विरूपाक्षताप्रसिद्ध्या पुण्डरीकाक्षत्वस्य विष्णुलिङ्गतया प्रसिद्धत्वात् । ध्येयस्सदेत्यादि वचनविरुद्धत्वात् ।

तापनी पाचनी चैव शोषणीच प्रकाशनी ।
नैव राजन्नवेशशक्तिरशक्तिर्नारायणस्य च ॥

इति पाद्मवचनविरोधाच्च । यदादित्यगतं तेजो जगद्भासयतेऽखिलम् । यच्चंद्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम् ॥ इति गीताविरोधाच्च । ''अहं तत्तेजो रश्मीन्नारायण'' मिति ''वृत्रं यदिन्द्र शवसा वधीरहिमादित्सूर्यं दिव्यारोहयोदशे । यत्सूर्यस्य हरितः पतंतीः पुरस्सतीरुपरा एतशेकः । येनावृतं खं च दिवं महीं च येनादित्यस्तपति तेजसा भ्राजसा

(प्रकाशिका)

च। यमंतस्समुद्रे कवयो वयन्ती''त्यादितैत्तिरीयभाष्ये य एष इति वाक्यस्य वैष्णवत्व-समर्थनाच्च । छान्दोग्यभाष्ये विष्णुपरत्वेनैव प्रमाणैर्व्याख्यातत्वात् । रुद्रादिशब्दानां ''नामानि सर्वाणी''त्यादिश्रुत्या ''सोन्तकस्सरुद्रस्सप्राणभृ''दित्यादिश्रुत्या एतदधिकरणे भाष्यकृदुदाहृतवचनजातेन च विष्णुपरत्वाच्च । ''तमेतास्सप्ताक्षितय उपतिष्ठन्ते या इमा अक्षन्लोहिन्योराजयस्ताभिरेनं रुद्रोन्वायत्त'' इत्यादौ रुद्रस्याक्षिस्थोपासकत्वोक्तेश्च । एतेन यदप्युक्तं महोपनिषदि ''अन्तरादित्ये हिरण्मयः पुरुष'' इत्युक्त्वा ''एष पुरुष एष भूतानामधिपति''रिति तस्य भूतपतित्वमुक्त्वा ''सर्वो वै रुद्र'' इत्यारभ्य ''हिरण्यबाहवे हिरण्यपतयेंऽबिकापतये'' इत्युपसंहारेण तत्समाख्यानादत्रापि तथेति । तदपि निरस्तम् । रुद्रादिशब्दवाच्यत्वस्य विष्णावेव मुख्यत्वादिति दिक् ।

पाण्डुरङ्गि — सविशेषज्ञानस्य निर्विशेषज्ञानार्थत्वं किं मुक्तिफलार्थं वा फलान्तरार्थं वा । नोभयमपीत्याह ॥ उदेतीति ॥ तथाच निर्विशेषज्ञानार्थत्वस्योक्तत्वेन श्रुतमुक्तिरूपफलं परित्यज्याश्रुतकल्पने ज्योतिष्टोमादेरपि श्रुतस्वर्गरूपं फलं परित्यज्याश्रुतकल्पना स्यादिति भावः । ननु न श्रुतहानाश्रुतकल्पने । सविशेषज्ञानस्य निर्विशेषज्ञानद्वारा श्रुतमुक्ति-फलकत्वस्यैवाङ्गीकारादित्यत आह ॥ किञ्चेति ॥ निर्विषज्ञानार्थत्वेनोच्यमानं यत्स-विशेषज्ञानं तत्किंज्ञानमेवोत ध्यानमिति विकल्पार्थः ॥ किं वा तस्येति ॥ सविशेषस्येत्यर्थः। आद्येपि सकृज्ज्ञानं वोत ज्ञानसंततिरूपं वा निदिध्यासनं वा । नाद्य इत्याह ॥ नाद्य इति ॥ तत्रापि सकृत्सविशेषनिर्विशेषज्ञानसाधनमिति प्रथमेपि द्रष्टव्यम् । निर्विशेषज्ञानं नाम विशेषाभावविशिष्टज्ञानं वा विशेषाभावोपलक्षितज्ञानं वा विशेषणाविषयकं ज्ञानं वा । तत्राद्यमनूद्य दूषयति ॥ निर्विशेषशब्देनेति ॥ द्वितीयमनुवदति ॥ तदिति ॥ विशेषाभावेनोपलक्ष्यः किं विशेषो वोतान्यद्वा । आद्यं दूषयति ॥ काकेनेति ॥ तस्येति ॥ विशेषाभावेनोपलक्ष्यस्य विशेषस्येत्यर्थः । तथाचोपलक्षणीभूताद्विशेषाभावात्पूर्वमेव ज्ञातस्य न तदुपलक्ष्यत्वमिति भावः । द्वितीये द्वितीयं दूषयति ॥ अन्यस्य चेति ॥ किं च विशेषाभावेनोपलक्षितत्वेन तज्ज्ञानार्थं सविशेषज्ञानमिति वक्तव्यम् । अन्यथा स्वरूपमात्रस्य विशिष्टग्राहिणैव गृहीतत्वेन निर्विशेषज्ञानस्य वैयर्थ्यप्रसङ्गात् । विशेषाभावोपलक्षितत्वेन निर्विशेषज्ञानं च विशिष्टज्ञानत्वान्न मोक्षसाधनमिति न तत्साधनत्वं सविशेषज्ञानस्येत्याशय-वानाह ॥ उपलक्ष्यत्वाकारेण चेति ॥ विशेषणाविषयं ज्ञानं निर्विशेषज्ञानमिति तृतीयमनूद्य दूषयति ॥ न चेति ॥ नन्वत्र विशिष्टज्ञानस्य विशेषणाविषयविशेष्यज्ञानार्थत्वस्यादृष्टत्वेपि

ब्रह्मविषयविशिष्टज्ञानस्य केवलविशेष्यज्ञानार्थत्वमस्त्वित्यरुचेराह ॥ किञ्चेति ॥ सविशेषज्ञानस्य निर्विशेषज्ञानं प्रति हेतुत्वं परंपरया साक्षाद्वा । आद्येपि किं दृष्टद्वारा वा हेतुरदृष्टद्वारा वा ज्ञानप्रतिबन्धकदुरितनिवृत्तिद्वारा वा । नाद्य इत्याह ॥ न तावदिति ॥ दृष्टद्वारमप्यज्ञानध्वंसश्चित्तवशीकरणं वा । नोभयमपीत्याह ॥ तद्विशिष्टेति ॥ एवं निर्विशेषज्ञानमित्यत्र विशेषाभावविशिष्टज्ञानं वा तदभावोपलक्षितज्ञानं वा तद्विशेषणाज्ञानं वा । न त्रयमपीत्याह ॥ तदभावेति ॥ अन्यथाऽदृष्टकल्पनाप्रसङ्ग इति भावः । नन्वादावेव निराकारेंऽतःकरणप्रवेशासम्भवेन प्रथमतः साकारेंऽतःकरणं प्रवेश्य पश्चान्निराकारेंऽतःकरणं प्रवेश्यत इत्यनेन प्रकारेण तस्य तत्र हेतुत्वमत आह ॥ रूपादीति ॥ तथाचानयोः परस्परं विरुद्धत्वान्न कार्यकारणभाव इति भावः । नन्वभावज्ञाने प्रतियोग्यधिकरणसंसर्गारोपस्य कारणत्वेन निर्विशेषज्ञानं प्रति सविशेषज्ञानस्य प्रतियोग्यधिकरणसंसर्गारोपत्वेन रूपेण साधनता भविष्यतीत्यत आह ॥ निषेधोपयोगिन इति ॥ निषेधबुद्धावारोपस्य हेतुत्वं न तु शब्दजन्यारोपस्येति भावः । ननु शाब्दनिषेधबोधे शब्दारोप एव हेतुरित्यत आह ॥ न हीति ॥ द्वितीयं दूषयति ॥ नापीति ॥ ज्ञानस्यापि विहितक्रियात्वाददृष्टजनकतेत्यत आह ॥ त्वन्मत इति ॥ ज्ञानसामान्यस्याविधेयत्वेपि तद्विशेषस्य विधेयत्वस्यास्माभिरङ्गीकारेपि न तत्परेणाङ्गीकर्तुं शक्यत इत्यभिप्रायेण त्वन्मत इत्युक्तम् । तृतीयं प्रत्याह ॥ नापीति ॥ तस्येति ॥ निर्विशेषज्ञानप्रतिबन्धकदुरितस्येत्यर्थः ।

किं च यदि निर्विशेषज्ञानप्रतिबन्धकदुरितनिवर्तकत्वात्सविशेषनिरूपणं तर्हि नित्यकर्मादेरपि निरूपणं कर्तव्यं स्यात् । तस्यापि तज्ज्ञानप्रतिबन्धकदुरितनिवर्तकत्वाविशेषादित्याह ॥ नित्यादीति ॥ ननु नित्यादिकर्मणां धर्ममीमांसायामेव निरूपितत्वान्न तेषामिह निरूपणम् । सविशेषस्य त्वन्यत्रानिरूपितत्वादिह तन्निरूपणं क्रियत इत्यत आह ॥ त्वन्मत इति ॥ ज्ञानमज्ञानस्यैव निवर्तकमिति त्वदभ्युपगमादिति भावः । ननु निर्विशेषज्ञानप्रतिबन्धकीभूतदुरितस्य सविशेषाज्ञानकार्यत्वेन सविशेषज्ञानेन सविशेषाज्ञाननिवृत्तौ उपादाननिवृत्तावुपादेयनिवृत्तेरावश्यकत्वादुरितस्यापि निवृत्तिः सम्भवतीति तद्द्वारा निर्विशेषज्ञानार्थत्वं स्यादित्यत आह ॥ न चेति ॥ सर्वस्य ब्रह्माज्ञानकार्यत्वेन न सविशेषाज्ञानकार्यत्वमिति भावः । सविशेषज्ञानसंततिरूपं निदिध्यासनं निर्विशेषज्ञानार्थमित्याद्यद्वितीयपक्षं दूषयति ॥ एतेनेति ॥ श्रुतेति ॥ श्रुतपापनिवृत्तिरूपफलत्यागाश्रुतनिर्विशेषज्ञानार्थत्वस्वीकारापातादित्यर्थः । सविशेषनिदिध्यासनस्यापि स्वविषयापरोक्ष्यस्य प्रयोजनांतराभावाच्चित्तव-

(पाण्डुरङ्गि)

शीकरणद्वारा निर्विशेषज्ञानार्थत्वमित्यत आह ॥ दशम इति ॥ नन्वापरोक्ष्यस्य चित्तैकाग्र्य-हेतुकत्वात् सविशेषध्यानाभावे चित्तैकाग्र्याभावेन निर्विशेषापरोक्ष्यं न स्यादित्यत आह ॥ आपरोक्ष्यहेत्विति ॥ चित्तवशीकरणाभाव इति ॥ तथाच सविशेषज्ञानात् पूर्वं विद्यमानस्य न तदधीनत्वमिति भावः । किं च सविशेषज्ञानं विजातीयवृत्त्यन्तररूपमारोपितविषयमु-पासनापरपर्यायं ध्यानमिति नोपपद्यते । तथासति भगवति रूपादिज्ञानार्थत्वमुक्तं न स्यात् । रूपादिज्ञानस्यारोपितविषयत्वाभावेन ध्यानत्वाभावात् । रूपादेस्तात्विकत्वस्यैवान्यत्र प्रतिपादितत्वादित्याह ॥ भगवतीति ॥ किं च रूपस्यापरोक्षज्ञानविषयत्वान्न तात्विकत्व-मित्याह ॥ हिरण्मय इति ॥ अस्त्वतात्विकस्यापरोक्षज्ञानविषयतेत्यत आह ॥ न हीति ॥ य एष इत्यत्र ब्रह्मप्रतिपादने हिरण्मयत्वादिप्रतिपादकश्रुतिविरोध इत्युक्ते साधकानुग्रहार्थ-मैच्छिकं मायामयं वा रूपमङ्गीक्रियत इत्युक्तम् । तदयुक्तम् । तद्विज्ञानार्थं वा ध्यानार्थं वा । नाद्यः । केवलज्ञानस्य निष्प्रयोजनत्वात् । न द्वितीयः । योषित्यग्नित्ववदविद्यमानस्यापि ध्यानोपपत्तेरित्याह ॥ किञ्चेति ॥ अन्यथेति ॥ एवमपि सविशेषनिरूपणस्य निर्विशेष-ज्ञानार्थत्व इत्यर्थः । वैपरीत्यमेव विशदयति ॥ सत्यमिति ॥ ननु निर्विशेषधर्मस्य क्वाप्यप्रतिपादितत्वेन तत्सत्वे प्रमाणाभावान्न सविशेषधर्मनिरूपणं निर्विशेषधर्मज्ञानार्थ-मित्यत आह ॥ शक्यं हीति ॥ किं चेदं सूत्रद्वयं परप्रतिकूलम् । परेण निर्धर्मकत्वस्य जीवब्रह्मैक्यस्य चाङ्गीकृतत्वात् । अत्र च सधर्मकत्वभेदयोरेव प्रतिपादनादित्याह ॥ किं चेति ॥ ननु तयोर्मिथ्यात्वान्न सूत्रयोः प्रतिकूलत्वमित्यत आह ॥ धर्म इति ॥ नन्वंतरउपपत्ते-रित्यनेनास्याधिकरणस्य परमते पौनरुक्त्यं कुतो नोच्यत इत्यत आह ॥ परमत इति ॥

तात्पर्यचन्द्रिका

॥ टीकाक्षरार्थस्तु ॥ प्राबल्याद्यविवेकेनेति ॥ श्रुतिलिङ्गाधिकरणसिद्धान्ता-त्प्रागिव श्रुतिः प्रबला लिङ्गं तु दुर्बलमित्यविवेकेनेत्यर्थः । यद्वा श्रुतेः स्वतो बलव-त्त्वाल्लिङ्गस्य च निरवकाशत्वेन बलवत्त्वादिदं प्रबलमिदं दुर्बलमित्यविवेकेनेत्यर्थः ॥ सङ्गतत्वाद्ग्रहणमिति ॥ अल्पाक्षरे सूत्र एकलिङ्गसमन्वयोक्त्याऽनेकनामसमन्वय-स्यार्थिकसिद्धेरेव सङ्गतत्वात् । अनेकसमन्वयोक्त्या त्वेकस्य समन्वयस्यार्थिक-सिद्धेरसङ्गतत्वात् । एकनामसमन्वयोक्त्या चोदाहरणवाक्यस्थसजातीयनामसमन्व-याक्षेपस्य विजातीयलिङ्गसमन्वयाक्षेपस्य च सति गत्यन्तरे गौरवापादकतया

क्लिष्टत्वेनासङ्गतत्वात् । सजातीयस्योपलक्षणं विजातीयस्याक्षेप इत्यस्यापि वैरूप्येणा-सम्भावितत्वादित्यर्थः ।

यद्वा यत्रैकं साक्षादन्यदर्थादिति नामलिङ्गात्मकमुभयं तत्रान्यत्र निरूढनाम-समन्वयस्य प्रथमं बुद्धावनारोहान्न तन्मुखेन लिङ्गसमन्वयः सङ्गतः । अनिरूढ-लिङ्गमुखेन तु नामसमन्वयः सङ्गतः । अत एव पूर्वमानन्दमयलिङ्गसमन्वयमुखेना-नन्दादिनामसमन्वयो युक्तः । यस्तु द्वितीयपादे वैश्वानराधिकरणे नामसमन्वयमुखेन लिङ्गसमन्वयः सप्रथमपादेऽन्यत्र निरूढनामसमन्वयस्योक्तत्वेन बुद्धावारोहात्पाच-कत्वादिलिङ्गानामप्यन्यत्र निरूढत्वाद्बहुत्वाच्च युक्त इत्यर्थः ।

यद्वा अंतस्स्थनिष्ठतया श्रुतेन समुद्रस्थत्वादिनां तस्स्थस्यैव विष्णुत्वसाधने सामानाधिकरण्येन सङ्गतिः इन्द्रादेस्तु तत्साधने वैयधिकरण्येनासङ्गतिः स्यादित्यर्थः । यद्वा अन्तस्स्थस्याविष्णुतयाऽऽनन्दमयस्यापि विष्णुत्वाक्षेपो युक्तः । तद्धर्मस्यादृश्यत्वस्यांतस्स्थे साक्षाच्छ्रवणात् । नन्विन्द्रादेरविष्णुत्वेन । तत्रादृश्य-त्वाश्रवणात् । ततश्च पूर्वाधिकरणसङ्गत्यर्थं लिङ्गग्रहणमित्यर्थः ॥ छ ॥ अन्तस्स्थत्वाधिकरणं सम्पूर्णम् ॥ ७ ॥

प्रकाशिका — ''अदृश्यत्वलिङ्गमिन्द्रादिश्रुतिश्च प्राबल्याद्यविवेकेन सन्देहबीज''मिति वाक्येऽविवेकशब्दमप्रतीतेर्द्वेधा व्याचष्टे ॥ श्रुतिलिङ्गेति ॥ पूर्वतन्त्रीयं श्रुतिलिङ्गाधिकरणं प्रागुक्तम् । नामनिर्णयेन लिङ्गनिर्णयेपि लिङ्गस्य सङ्गतत्वाद्ग्रहणमित्यत्र नाम्नो सङ्गतत्वाद-ग्रहणमिति सूचितम् । तत्कथं सङ्गतत्वासङ्गतत्वे इत्यतोऽनेकप्रकारेणाह ॥ अल्पाक्षर इति ॥ तर्ह्येकमेव नाम समन्वीयतामनेकनामलिङ्गसमन्वयार्थमित्यत आह ॥ एकनामेति ॥ ननु न गौरवम् । अनेकनाम्नामुपलक्षणत्वेनैकनामोपादानात् । लिङ्गस्य चार्थादेव समन्वयसिद्धेरित्यत आह ॥ सजातीयस्येति ॥ आनन्दमयलिङ्गेति ॥ तत्त्वप्रदीपानुसारेणेयमुक्तिरिति ध्येयम् । एवं तर्हि वैश्वानराधिकरणविरोध इत्यत आह ॥ यस्त्विति ॥ इन्द्रादेस्तु इन्द्रादिशब्दार्थस्य तु । तत्साधने अन्तस्थत्वसाधने । इन्द्रादिस्तद्धर्मोपदेशादित्युक्ताविति यावत् । ''समुद्रेंतः कवयो विचक्षते'' इत्यस्यांतस्थनिष्ठतयेंद्रादिनिष्ठत्वाभावादसङ्गतिरित्यर्थः ॥ अविष्णुत्वेनेति ॥ आनन्दमयस्य विष्णुत्वाक्षेप इति सम्बध्यते । शिष्टमुपन्यासमुखेनैव विवृतमिति भावः ॥ अन्तस्स्थत्वाधिकरणं सम्पूर्णम् ॥ ७ ॥

पाण्डुरङ्गि — प्राबल्याद्यविवेकेनेति टीकोक्तं प्राबल्याद्यविवेकं दर्शयति ॥ श्रुतीति ॥ ननु श्रुतिर्यदि प्रबला लिङ्गं दुर्बलमिति श्रुतिलिङ्गयोः प्राबल्यं न निश्चितं तर्हि श्रुत्यादिभ्यो लिङ्गमात्रस्य दुर्बलत्वादित्यादिपूर्वपक्षानुपपत्तिरित्यत आह ॥ यद्वेति ॥ नन्वेवं वैश्वानराधिकरणे नामसमन्वयेन लिङ्गसमन्वयोक्तिरयुक्ता स्यात् । उक्तानुपपत्तेस्तत्रापि वक्तुं शक्यत्वादित्यत आह ॥ यद्वेति ॥ यद्वा ननु सजातीयस्योपलक्षणाभावेप्यंतस्स्थनिष्ठतया श्रुतस्यादित्यादिशब्दानामिन्द्रपरत्वाभावे तत्समानाधिकरणेंद्रादिशब्दस्यापि तत्परत्वानुपपत्तेस्तदुपादानेनार्थादेव सजातीयाग्निसवित्रादिशब्दानां विजातीयांतस्स्थत्वलाभान्न वैरूप्यमित्यत आह ॥ यद्वेति ॥ आनन्दमयाधिकरणे लिङ्गविचारादिति तत्वप्रदीपानुसारादाह ॥ अत एवेति ॥ लिङ्गस्य निरूढत्वादेवेत्यर्थः । नन्वेवं वैश्वानराधिकरणेपि नामसमन्वयो न वक्तव्यः । नाम्नो निरूढत्वाल्लिङ्गस्यानिरूढत्वात्तन्मुखेनैव वक्तव्य इत्यत आह ॥ यस्त्विति ॥ नन्वानन्दमयाधिकरणन्यायेन नामसमन्वयस्य सिद्धत्वान्नाम्नोपि प्रथमं बुद्धावारोहो युक्त इत्यत आह ॥ यद्वेति ॥ ननु सहैव सन्तं न विजानन्ति देवा इत्यन्तस्स्थे श्रुतस्यादृश्यत्वस्याऽन्यनिष्ठत्वेऽदृश्येऽनात्म्य इत्यादिनोक्तमप्यदृश्यत्वमन्यस्यैवेति कुतः । नियामकाभावात् । तथाचाक्षेपानुपपत्तिरिति चेन्न वाक्यद्वयस्यापि समानत्वात् । सहैव सन्तमित्यत्रेन्द्रादिश्रुत्याऽदृश्यत्वस्यान्यनिष्ठत्ववत् आनन्दादि- श्रुत्यादिनाऽदृश्येनात्म्य इत्यत्राप्यदृश्यत्वस्यानिष्ठत्वोपपत्तेः । यदि च निरवकाशलिङ्गेन श्रुतेस्तत्र बाधस्तर्हि न विजानन्तीति वाक्येपि समानम् । यदि च निरवकाशत्वप्रयुक्तप्राबल्यापेक्षयापि स्वभावप्रयुक्तप्राबल्यस्यैव बलवत्त्वात्सहैवेत्यत्रान्यनिष्ठत्वं तदैतददृश्य इति वाक्ये सममित्याक्षेपो युक्त एव । अत एवोत्तराधिकरणे तथैव वक्ष्यति मूलकारः । न च यथा सिद्धान्ते आकाश इति होवाचेत्यत्राकाशशब्दस्य ब्रह्मपरत्वेऽपीत्यादिना । तत्रत्यमेवमुत्तरत्रापि द्रष्टव्यमिति वाक्यं तूपलक्षणपरतया व्याख्येयम् । न्यायसाम्यादिति द्रष्टव्यम् । यथा पूर्वमीमांसायां श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये परदौर्बल्यमिति श्रुतिलिङ्गाधिकरणे श्रुतेर्लिङ्गापेक्षया प्रबलत्वनिश्चयेपि ततः प्राक् तदनिश्चयेन श्रुतिलिङ्गयोः संशयबीजत्वं तथात्रापि शब्दादेव प्रमित इति श्रुतिलिङ्गाधिकरणे श्रुतेर्लिङ्गापेक्षया प्राबल्यनिश्चयेपि ततः प्राक् तदनिश्चयेन श्रुतिर्लिङ्गयोः सहबीजत्वोपपत्तिरिति भावः ॥छा॥ अन्तस्स्थत्वाधिकरणं सम्पूर्णम् ॥ ७ ॥

आकाशाधिकरणम्

॥ ॐ आकाशस्तल्लिङ्गात् ॐ ॥ अत्राधिभूतगताकाशादिनाम्नां समन्वय उच्यते। भूतेष्वाकाशस्य प्राधान्यात्सूत्रे तस्य मुखतः कीर्तनम्। अन्येषां तूपलक्षणम्। अत एव सङ्गतिटीकायां ''आकाशनाम्न'' इत्युक्त्वाऽधिकरणोपसंहारटीकायां ''आधिभौतिकसर्वशब्दोपलक्षके''त्युक्तम्। यद्यपि भूतेतरवाचिनामप्येतन्न्यायविषयाणामनेन समन्वयः सिद्ध्यति तथापि सजातीये भूतशब्दे प्रथमं बुद्ध्यवतारादाधिदैविकेन्द्रादिशब्देष्वाध्यात्मिकप्राणादिशब्देषु च स्वभावप्रवृत्तिनिमित्तकत्वाभावेनेतरत्रैतन्न्यायाप्रवृत्तेश्च टीकायामाधिभौतिकोपलक्षकतोक्तिः। न चात्रापि पूर्वत्रेवाकाशनामसमन्वयार्थमनंतत्वादिलिङ्गसमन्वय एवोच्यतामिति शङ्क्यम्। पूर्वत्रान्तस्स्थत्वरूपैकलिङ्गसमन्वयेन बहुनामसमन्वयात्। अत्र त्वाकाश इत्येकनामसमन्वयेन बहुलिङ्गसमन्वयसिद्धेः। अनन्तत्वादेः सिद्धान्तहेतुत्वेन तत्र संशयानुदयाच्च। अनन्तरसङ्गतिस्त्वधिकाशङ्कां कृत्वा पूर्वन्याय एवातिदिश्यत इत्यातिदेशिकी ॥

प्रकाशिका — ॐ आकाशस्तल्लिङ्गात् ॐ ॥ अत्र सङ्गतिटीकायामाकाशनाम्नस्समन्वय इत्युक्तम्। तदयुक्तम्। एकोदाहरणस्य योगारम्भाप्रयोजकत्वात्। तथात्वे विश्वतो मुखत्वहानेरित्यत एतदधिकरणप्रतिपाद्यं दर्शयन्विषयोपाधिमाह ॥ अत्रेति ॥ ननु सूत्रे आकाशपदस्यैव ग्रहणादाकाशादीति कथम्। न चेतरोपलक्षकत्वेनैकस्योपादानम्। तथाप्यस्यैवोपादाने हेत्वभावादित्यत आह ॥ भूतेष्विति ॥ प्राधान्यादिति ॥ ''आकाशः सम्भूतः। आकाशाद्वायु''रित्यत्र सर्वभूतादित्वेनोपादानादिति भावः। उक्तं च सुधायां ''आकाशस्य भूतेषु प्राधान्यात्तच्छब्दसमन्वयं हरावाह सूत्रकार'' इति। ननु ''टीकायामाकाशनाम्नो ब्रह्मणि समन्वयप्रतिपादना''दित्येकस्यैवोपादानादाकाशादीति कथमित्यत आह ॥ अत एवेति ॥ नन्वत्र वक्ष्यमाणरीत्या स्वभावप्रवृत्तिनिमित्तकाश्शब्दास्समन्वीयंते। ते च भूताभूतशब्दसाधारणा इति भौतिकमात्रोपलक्षणत्वमयुक्तमित्याशङ्क्य द्वेधा समाधानमाह ॥ यद्यपीति ॥ एतन्न्यायेति ॥ अचेतनस्वभावत्वान्न भगवन्नियम्यत्वमित्यादिपूर्वपक्षन्यायविषयाणामित्यर्थः। अनेन स्वभावस्यापीशाधीनत्वसाधकेनाधिकरणेनेत्यर्थः ॥ आधिदैविकेति ॥ अतीताधिकरणविषयेषूत्तराधिकरणविषयेषु चेत्यर्थः। एतेनाधिदैविकादिव्यावृत्त्यर्थमेव तथोक्तिरित्युक्तं भवति। ननु पूर्वाधिकरणे लिङ्गस्य समन्वितत्वेन बुद्धौ

(प्रकाशिका)

विपरिवर्तमानलिङ्गत्यागे हेत्वभावात्तदेव समन्वेतव्यम् । न तु नामेत्याक्षिप्य हेतुमाह ॥ न चात्रापीति ॥ नामेति ॥ तथाच फलतः पादसङ्गतिर्भविष्यतीति भावः । अत्र किं सर्वभूतकारणत्वादिलिङ्गस्य समन्वयश्चोद्यते सिद्धान्त्यभिमतस्य वा । आद्य आह ॥ पूर्वत्रेति ॥ एकनामेति ॥ वैश्वानराधिकरणवदिति भावः ।

नन्वत्राप्याकाशनाम्नो बहुकृत्वश्श्रवणेन बहूनां समन्वयोस्तीति चेन्न । प्रवृत्तिनिमित्त-भेदाभावेनैकसमन्वये सति पुनः श्रुतसमन्वये यत्नाधिक्याभावेन भिन्नप्रवृत्तिनिमित्त-कनामबहुत्वस्य विवक्षितत्वेनात्र तदभावादिति तात्पर्यात् । न च वाच्यमेकलिङ्गसमन्वये-नाप्यनेकलिङ्गानां नाम्नश्च समन्वयोऽर्थात्सिध्यतीति लिङ्गमेव समन्वेतव्यमिति । एकलिङ्ग-समन्वयेन सजातीयविजातीयसमन्वयाक्षेपस्य गत्यन्तरे सति गौरवहतत्वात् । न चान्यत्र निरूढनामसमन्वयस्य प्रथमं बुद्धावनारोहादन्यत्रानिरूढलिङ्गसमन्वयस्य प्रथमं बुद्धाव-नारोहादन्यत्रानिरूढलिङ्गसमन्वय एव वाच्य इति वाच्यम् । पूर्वत्र तादृशस्यापीन्द्रादि-नाम्नस्समन्वयोक्त्याऽत्र बुद्धावारोहसम्भवादिति भावः । द्वितीये त्वाह ॥ अनन्तत्वादेरिति ॥ अन्यथा सन्दिग्धासिद्धत्वापातादिति भावः । उपलक्षणमेतत् । अन्यत्र प्रसिद्धाकाशादि-श्रुतित्वादिरूपपूर्वपक्षन्यायस्य मुखतस्सूचनाभावाच्चेत्यपि ध्येयम् । नन्वेतत्समुद्रान्त-स्स्थितत्वादेर्विष्णुलिङ्गत्वनिश्चयेपि अनन्तत्वादेस्तदनिश्चयादिति वक्ष्यमाणेन विरुध्यत इति चेन्न । वास्तवाभिप्रायेणात्र स्वारसिकसंशयानुदयोक्तेः । तत्राकाशश्रुत्यादिसाहचर्येणाहि-तसंशयोक्तेः । श्रुत्याऽऽहितसंशयोपादानेन लिङ्गसमन्वयोक्त्याऽनुपजीव्यत्वेन श्रुतिसमन्व-यस्यैव न्याय्यत्वादिति तात्पर्यादिति । अतो नामसमन्वय एव युक्तः । मुखतः पादसङ्गतेरपि सत्त्वादिति स्थितम् । एतेनाकाशनाम्न इत्यादिसङ्गतिटीका समर्थिता । पूर्वाधिकरण-सङ्गतिमाह ॥ अनन्तरेति ॥ पूर्वसिद्धान्तस्योपरि तदनिवर्त्यां शङ्कां कृत्वा तदुपमर्दनपूर्वकं निरवकाशलिङ्गेन सावकाशश्रुतिबाधरूपन्याय एवेत्यर्थः । अनेन ''कृत्वा त्वभ्यधिकाशङ्कां पूर्वमेवातिदिश्यते । तत्रातिदेशिकी प्रोक्ते''ति लक्षणं स्मारितं भवति । इयं च सङ्गतिः ''चेष्टाही''त्याद्यनुव्याख्यानात्स्पष्टं प्रतीयत इति भावः ।

पाण्डुरङ्गि — ॐ आकाशस्तल्लिङ्गात् ॐ ॥ एतदधिकरणोपाधिमाह ॥ अत्राधिभूतेति ॥ विभक्त्यर्थेऽधीत्यव्ययम् । तथाच भूतेष्वित्यधिभूतम् । अधिभूतं गताः अधिभूतगताः । भूतेषु वर्तमाना इत्यर्थ इति द्रष्टव्यम् । नन्वेवं सूत्रविरोध इत्यत आह ॥

भूतेष्विति ॥ ''अत आकाशशब्दोक्तस्तद्देवोत्र विनायक'' इत्यनुव्याख्यानोक्तावपि ''महामानी''त्यादि तत्रैवोक्तत्वात् ''इन्द्रियेभ्यः पराह्यर्था''इत्युक्तरीत्या भूतोत्पत्तिप्रसङ्गे तदुत्तमाभिमानिप्राधान्यक्रमेणोत्पादकस्योत्पाद्यात् प्राधान्यक्रमेण च जडभूतस्य तदभिमानिनश्चात्राप्राधान्यं ज्ञेयम् ॥ अत एवेति ॥ सूत्रस्थाकाशशब्दस्यापि भूतगतपृथिव्यादिशब्दान्तरोपलक्षकत्वादेवेत्यर्थः । ननु तथाप्यस्मिन्नधिकरणे स्वभावप्रवृत्तिनिमित्तकानां शब्दानां समन्वयप्रतिपादनेनाधिभूतगतानां शब्दानामेव समन्वयाप्रतिपादनादुपसंहारस्थाधिभौतिकसर्वशब्दोपलक्षकेत्यादिटीकाऽनुपपन्नैवेत्यत आह ॥ यद्यपीति ॥ तथाच टीकायामाधिभौतिकोपलक्षकतोक्तिरयुक्तेति शेषः । ननु पूर्वाधिकरणवदत्राप्यनन्तत्वलिङ्गसमन्वयः किं नोच्यत इत्याशङ्क्य निषेधति ॥ न चेति ॥ वैषम्येण परिहरति ॥ पूर्वत्रेति ॥ ननु पूर्वत्रान्तस्स्थत्वरूपलिङ्गसमन्वयेनेन्द्राद्यनेकनामसमन्वयसिद्धिवत् अत्राप्यनन्तत्वादिलिङ्गसमन्वयेन पृथिव्याद्यधिभूतगतसर्वगतशब्दसमन्वयसिद्धेः सम्भवेन कथमेतदित्यत आह ॥ अनन्तत्वादेरिति ॥ अव्यवहितपूर्वाधिकरणेन सङ्गतिमाह ॥ अनन्तरेति ॥

तात्पर्यचन्द्रिका

यद्यपि ''अत एव प्राण'' इत्याद्यधिकरणत्रयेप्यंतरधिकरणन्यायातिदेशः तथाप्यधिकाशंकाक्रमात्तत्क्रमः । शङ्काक्रमश्च तत्र तत्र वक्ष्यते । यद्वा ''आकाशाद्वायुः वायोरग्नि''रिति श्रुत्याऽऽकाशादेर्वाय्वादिकारणत्वोक्तेस्तदनुसारेणाकाशप्राणज्योतिरधिकरणानां क्रमः । ''कोह्येवान्या''दिति भाष्ये तु ''आकाश इति होवाचे'' त्यत्राकाशस्य विष्ण्वन्यत्वे ''यदेष आकाश'' इत्यत्राप्यन्यः स्यादित्यानन्दमयोप्यन्यः प्रसज्येतेति पूर्वपक्षे आनन्दमयाधिकरणाक्षेपात् सिद्धान्तेच तत्समाधानात्सफलोऽयं विचार इत्युक्तम् । न च यथासिद्धान्ते ''आकाश इति होवाचे''त्यत्राकाशशब्दस्य ब्रह्मपरत्वेपि ''आकाशः सम्भूत'' इत्यत्र भूतपरत्वं तथा सिद्धान्ते ''यदेष आकाश'' इत्यत्रापि भूतपरत्वमस्तु । यदि तु ''यदेष'' इत्यत्र ब्रह्मलिङ्गाद्ब्रह्मपरता तर्हि यथा सिद्धान्ते सम्भूतवाक्य आकाशशब्दस्य भूतलिङ्गाद्भूतपरत्वेपि यदेष इति वाक्ये ब्रह्मलिङ्गाद्ब्रह्मपरता तथा पूर्वपक्षे इति होवाचेति वाक्ये भूतपरत्वेपि यदेष इत्यत्र ब्रह्मलिङ्गाद्ब्रह्मपरता भविष्यतीति नानन्दमयाधिकरणाक्षेप इति शङ्क्यम् ।

(तात्पर्यचन्द्रिका)

सिद्धान्ते सम्भूतवाक्ये सम्भूतत्ववद्यदेष इति वाक्ये कस्यचिद्भूतलिङ्गस्याभावात् । भूते प्रसिद्धिमात्रस्य चैतत्सिद्धान्तेन निरासात् । ''इति होवाचे''ति वाक्ये च पूर्वपक्षे प्रबलभूतलिङ्गाभावात् । ब्रह्मलिङ्गानामेव च भावात् । भूते प्रसिद्धिमात्रेण ब्रह्मलिङ्गानामन्यथाकरणस्य ''यदेष'' इति वाक्येपि साम्यात् । तस्माद्युक्तं प्रयोजनम् । एवमुत्तरत्रापि द्रष्टव्यम् ।

प्रकाशिका — नन्वेवमुत्तरेषामपि पूर्वानंतर्यं स्यान्नतु व्यवधानमित्याशङ्क्याह ॥ यद्यपीति ॥ तदनुसारेण श्रुतिक्रमानुसारेण । वायोरेवाध्यात्मं प्राणत्वादग्निज्योतिश्शब्दयोरेकार्थत्वादिति भावः । ननु यदि पूर्वेणातिदेशिकीसङ्गतिस्तर्हि ''को ह्येवान्यात्कः प्राण्याद्यदेष आकाश आनन्दो न स्यादित्याकाशस्यानन्दत्वे हेतुरुक्तः । नतु विष्णोरिति न मन्तव्य''मित्यानन्दमयाधिकरणाक्षेपसङ्गतिपरभाष्यं विरुध्येतेत्यतस्तद्भाष्यं न सङ्गतिपरं किन्तु फलमात्रपरमिति भावेनाह ॥ कोह्येवान्यादितीति ॥ अयं विचारः आकाशस्य विष्णुत्वविचारः । एतेन टीकापीत्थमेव व्याख्येयेत्युक्तं भवति । अनन्तरसङ्गतिस्तूत्तरप्रस्थानाद्धेयेति तात्पर्यमिति भावः । ननु यदुक्तं भाष्यटीकयोः आकाश इति होवाचेत्यत्राकाशो भूतं चेत्को ह्येवान्यादित्यत्रत्योप्याकाशो भूतं स्यात् । अतस्तस्य विष्णुत्वसिद्धये आकाश इति होवाचेत्ययमाकाशो विष्णुरिति विचार्यत इति साफल्यं विचारस्येति तदयुक्तम् । छान्दोग्यस्थाकाशस्य विष्णुत्वेपि कोह्येवान्यादित्यत्रत्यस्य विष्णुत्वासिद्ध्या विचारस्य साफल्यायोगादिति भावेन दृष्टान्तोक्तिपूर्वमाक्षिपति ॥ न चेति ॥ शङ्क्यमित्यन्वयः ॥ भूतपरत्वमिति ॥ ननु ''कारणत्वेन चाकाशादि''ष्वित्यधिकरणे सम्भूतवाक्यगताकाशादिशब्दस्य ब्रह्मपरत्वं वक्ष्यते । यद्वक्ष्यति ''भूतपरत्वे शङ्किते तन्निरास'' इति । तथाच कथं भूतपरत्वोक्तिरिति चेत्सत्यम् । तत्र भूतपरत्वापरित्यागेनैव ब्रह्मपरत्वाभिधानेन भूतपरत्वस्यापि सत्त्वात् । अन्यथा भूतोत्पत्त्यसिद्धिप्रसङ्गाद्वाक्यान्तरस्याप्येतत्तुल्यत्वात् । अत एवोक्तं प्राक् ''प्राबल्यं हि तस्य शब्दस्य तद्युक्तवाक्यस्य वाऽपरमुख्यवृत्त्याऽन्यपरत्वं विनाऽनुपपद्यमानत्व''मिति ॥ अत एवानुव्याख्याने ''भूतं भूताभिमानीच तद्देहोंतर्नियामक'' इत्युक्तमिति भावः । ननु सम्भूतवाक्ये भूतलिङ्गाद्भूतपरत्वेपि को ह्येवान्यादित्यत्र जगच्चेष्टकत्वादिब्रह्मलिङ्गाद्ब्रह्मपरता एतदधिकरणसिद्धान्तन्यायेन स्यात् । तथाच सिद्धान्ते प्रयोजनं सेत्स्यतीत्याशङ्क्य तर्हि पूर्वपक्षे पूर्वोक्ताक्षेपरूप-

फलासिद्धिरिति सदृष्टान्तमाह ॥ यदि त्विति ॥ ननु सम्भूतवाक्य इव यदेष इति वाक्येप्युभयपरत्वमस्तु । आकाशश्रुतिब्रह्मलिङ्गयोस्सत्त्वात् । तथाच तस्य भूतपरत्वेपि विष्णुपरत्वस्यापि सत्त्वादानंदमयस्य विष्णुत्वे हेतुव्यपदेशत्वं सेत्स्यतीति चेन्न । सम्भूतवाक्येऽन्यपरत्वानभ्युपगतौ भूतोत्पत्त्याद्यसिद्धिवदिहान्यपरत्वाभावे बाधकाभावात् । निरवकाशब्रह्मलिङ्गानुपपत्तेश्च । उक्तं च चतुर्थपादीयानुव्याख्याने

तेषु तेषु पदार्थेषु रूढिरङ्गीकृता यतः ।
प्रयोजनबहुत्वेन तस्य तस्याविरोधतः ।
उपदेशादिसामर्थ्याद्विष्णौ शक्तिश्च गृह्यते ।
तथाप्येतद्विरोधे तु तद्वाचित्वमपोद्यत ।

इति । यत्तावत्सिद्धान्तिनं प्रत्यापादितं सम्भूतवाक्य इव को ह्येवान्यादित्यत्रापि भूतपरत्वं स्यात् । तथाच न सिद्धान्तफलसिद्धिरिति तद्वैषम्यप्रदर्शनेन परिहरति ॥ सिद्धान्त इत्यादिना ॥ ननु भूतलिङ्गाभावेपि भूते प्रसिद्धाकाशश्रुतिरस्तीत्यत आह ॥ भूत इति ॥ एतदिति ॥ निरवकाशलिङ्गेनान्यत्र प्रसिद्धिबाधकथनरूपेणेत्यर्थः । एवं सिद्धान्ते ''आकाश इति होवाचे''ति वाक्यस्य ''को ह्येवान्या''दिति वाक्यस्य च तुल्यन्यायविषयताप्रदर्शनेन सिद्धान्ते प्रयोजनसिद्धिं समर्थ्य इदानीं पूर्वपक्षेपि द्वयोस्तुल्यन्यायविषयताप्रदर्शनेन पूर्वपक्षफलं च समर्थयते ॥ इति होवाचेति ॥ साम्यादिति ॥ तथाच पूर्वपक्षेपि इति होवाचेत्यस्य भूतपरत्वे को ह्येवान्यादित्यपि भूतपरं स्यादिति भावः ॥ प्रयोजनमिति ॥ पूर्वपक्षे सिद्धान्ते चेति शेषः ॥ एवमिति ॥ यत्र यत्र पूर्वाक्षेपः प्राणज्योतिरधिकरणादौ तत्र सर्वत्रापि तुल्यन्यायविषयतामापाद्य व्युत्पादनीयमित्यर्थः ।

पाण्डुरङ्गि — नन्वनंतराधिकरणन्यायातिदेशस्याधिकरणत्रयेपि सत्त्वात्कथमेतेषां क्रम इत्यत आह ॥ यद्यपीति ॥ अधिकाशङ्काक्रमादिति ॥ प्रबलाधिकशङ्काक्रमादित्यर्थः । तथाच सोपानारोहणन्यायेन यत्राधिकशङ्काया अल्पत्वं तस्य प्राथम्यमिति भावः । महामल्लभङ्गन्यायेन वैपरीत्यमेव किं न स्यादित्यत आह ॥ यद्वेति ॥ ननु भिन्नभिन्न-शाखास्थवाक्यनिर्णायकानां सूत्राणां परस्परं सङ्गत्यभावेन पुरुषोत्प्रेक्षयैवाभ्यधिकाशङ्काक्रमेणाधिकरणानां क्रमश्चेत् तर्ह्यन्यथापि पुरुषोत्प्रेक्षासम्भवेन प्रकारान्तरेणापि सङ्गतिः स्यादित्यनुशयाद्वाऽऽह ॥ यद्वेति ॥ नन्वेवं साक्षादन्तरधिकरणसङ्गतिरेव चेदाकाशस्य

(पाण्डुरङ्गि)

सङ्गतिः तर्ह्यानन्दमयाधिकरणेन सह सङ्गतिप्रदर्शकको ह्येवान्यादित्यादिभाष्यविरोध इत्यतो न तत्सङ्गतिप्रदर्शकं किं नाम विचारसाफल्यमात्रकथनमित्यतो न विरोध इति भावेनाह ।। को हीति ।। नन्वेतदयुक्तम् । सिद्धान्ते आकाश इति होवाचेत्यत्राकाशशब्दस्य ब्रह्मपरत्वेपि यदेष आकाश इति वाक्ये आकाशशब्दस्य भूतपरत्वस्यैव सम्भवात्कथं सिद्धान्ते तत्साधनम्। न चैकत्राकाशशब्दस्य ब्रह्मपरत्वेऽन्यत्रापि ब्रह्मपरत्वमेव स्यादिति वाच्यं तथात्वे सिद्धान्ते आकाश इति होवाचेति वाक्ये आकाशशब्दस्य ब्रह्मपरत्वेनात्मन आकाशः सम्भूत इति सम्भूतवाक्येप्याकाशशब्दस्य ब्रह्मपरत्वापातात् । न च सति ब्रह्मलिङ्गे आकाशशब्दस्य ब्रह्मपरत्वाभ्युपगमात्सम्भूतवाक्ये ब्रह्मलिङ्गाभावेन तत्राकाश-शब्दस्य ब्रह्मपरत्वाभावेपि यदेष आकाश इति वाक्ये ब्रह्मलिङ्गानां विद्यमानत्वेना-काशशब्दस्य ब्रह्मपरत्वं सम्भवतीति समाधानं युक्तमिति वाच्यम् । तथात्वे सिद्धांते संभूतवाक्ये ब्रह्मलिंगाभावेनाकाशशब्दस्य ब्रह्मपरत्वाभावेऽपि यदेष आकाश इति वाक्ये ब्रह्मलिङ्गानां सत्वेनाकाशशब्दस्य विष्णुपरत्ववत् पूर्वपक्षेपि आकाश इति होवाचेति वाक्ये ब्रह्मलिङ्गानामभावेनाकाशशब्दस्य ब्रह्मपरत्वाभावेपि यदेष इति वाक्ये ब्रह्मलिङ्गानां विद्यमानत्वेनाकाशशब्दस्यान्यपरत्वं स्यादित्यानन्दमयोप्यन्यएवेत्याक्षेप एवानुपपन्न इति पूर्वपक्षे आनन्दमयाधिकरणाक्षेपात्सिद्धान्ते तत्समाधानात्को ह्येवान्यादिति वाक्यचिन्ता-साफल्यमात्रपरमित्युच्यते । तथाचास्य भाष्यस्य चिन्तासाफल्यपरत्वासम्भवेनानन्द-मयाधिकरणसङ्गतिप्रदर्शनपरत्वस्यैवावश्यकत्वात् साक्षादनन्तराधिकरणसङ्गत्यभिधाने भाष्य-विरोधः स्यादेवेत्याशयेन शङ्कते ।। न चेत्यादि ।। इति होवाचेति वाक्ये आकाशस्य ब्रह्मपरत्वे यदेष इति वाक्येपि ब्रह्मपरत्वं स्यादेवेति सिद्धान्ते आनन्दमयाक्षेपपरिहारः । न च इति होवाचेति वाक्ये आकाशशब्दस्य ब्रह्मपरत्वेपि सम्भूतवाक्ये तदभाववत् यदेष इति वाक्येपि तदभावः किं न स्यादिति वाच्यम् । तत्राकाशशब्दस्य ब्रह्मपरत्वेपि सम्भूतवाक्ये आकाशशब्दस्य ब्रह्मपरत्वे बाधकाभावेन ब्रह्मपरत्वोपपत्तेः । तथाहि । बाधकं भवत्सम्भूतत्वं वा स्यादाकाशशब्दस्यान्यत्र प्रसिद्धत्वं वा स्यात् । नाद्यः । यदेष इति वाक्ये सम्भूतत्वादेरभावात् । न द्वितीयः । तल्लिङ्गन्यायेन तस्यापि परिहारात् । तस्मादिति होवाचेति वाक्ये आकाशशब्दस्य ब्रह्मपरत्वे यदेष इति वाक्येपि ब्रह्मपरत्वं स्यादित्या-नन्दमयस्यापि ब्रह्मत्वमित्यानन्दमयाक्षेपसमाधानं सिद्धान्ते युक्तमेव । एवं पूर्वपक्षेपि इति होवाचेत्यत्राब्रह्मत्वे यदेष इति वाक्येप्यब्रह्मत्वस्य वक्तुं शक्यत्वेनानन्दमयाक्षेपकतोपपन्ना । न

च सिद्धान्ते सम्भूतवाक्येऽब्रह्मत्वेपि ब्रह्मलिङ्गाद्यदेष इति वाक्ये ब्रह्मत्ववत् इति होवाचेत्यत्र ब्रह्मपरत्वेपि यदेष इति वाक्ये ब्रह्मपरत्वं स्यादिति शङ्क्यम् । यदेष वाक्ये ब्रह्मलिङ्गवादिति होवाचेत्यत्रापि ब्रह्मलिङ्गानां सत्त्वात्तत्रोक्तस्यापि ब्रह्मत्वम् । यदि च तत्रान्यत्रप्रसिद्धिमात्रेण लिङ्गानां सावकाशत्वापत्तावत्रोक्तस्यापि ब्रह्मत्वं न स्यादेव । तथाचेति होवाचेति वाक्ये आकाशस्याब्रह्मत्वे यदेष इति वाक्येप्यब्रह्मत्वं स्यादित्यानन्दमयोप्यन्यएव स्यादिति पूर्वपक्षे आनन्दमयाधिकरणाक्षेपो युक्त एव । तथाच भाष्यस्य चिन्तासाफल्यमात्रप्रदर्शनपरत्वेन सङ्गतिप्रदर्शनपरत्वाभावात्साक्षात्सङ्गत्यभिधानेन भाष्यविरोध इत्याशयवान्परिहरति ॥ सिद्धान्त इत्यादिना ॥ ननु भूतेषु प्रसिद्ध्या यदेष आकाश इति वाक्यस्थाकाश-शब्दस्याप्यन्यपरत्वमित्यत आह ॥ भूते प्रसिद्धिमात्रस्येति ॥ ननु तत्रत्यब्रह्मलिङ्गाति-प्रसिद्ध्याऽन्यथा क्रियत इत्यत आह ॥ भूत इति ॥ उक्तन्यायमन्यत्राप्यतिदिशति ॥ एवमिति ॥

तात्पर्यचन्द्रिका

ननु यद्येवमानन्दमयाधिकरणाक्षेपस्तर्हि साक्षात्तदाक्षेपार्थमानन्दमयशब्दे मयटो विकारार्थत्वमिव यदेष इति वाक्ये आकाशशब्दस्य भूताकाशपरत्वमाशङ्क्या-नन्दमयस्य विष्णुत्वसिद्धये ब्रह्मणि समन्वय उच्यताम् । अन्तस्स्थत्वस्य त्वानन्द-मयप्रकरणे श्रवणेपि तस्य स्वतोन्यत्र प्रसिद्ध्यभावादन्यत्र प्रसिद्धेन्द्रादिश्रुति-साहचर्यस्य तत्प्रकरणेऽभावेन तत्र पूर्वपक्षानुदयाद्वाक्यान्तरोदाहरणं युक्तम् । आकाशशब्दस्त्वानन्दमयप्रकरणे श्रुतः स्वतोन्यत्र प्रसिद्धश्चेति तत्रैव पूर्वपक्षोदय इति वैषम्यम् । सत्यम् । तथापि मयट इवाकाशशब्दस्य समन्वेतव्यानन्दमयशब्दान्त-र्भावाभावेन न्यायभेदेन चाधिकरणभेदे स्थिते "आकाश इति होवाचे"ति वाक्यान्तरस्यापि समन्वये एतत्प्रकरणस्थबहुगुणलाभात् तथैतत्समन्वयेन निर्णीत-ब्रह्मप्रकरणस्थयदेषवाक्यसमन्वयवद्यदेष इति वाक्यसमन्वयेनानिर्णीतब्रह्मप्रकरण-स्थैतद्वाक्यसमन्वयासिद्धेः तथा सिद्धान्तिना सावकाशयितव्यानां भूतलयाधिष्ठान-त्वादिपूर्वपक्षयुक्तीनां निरवकाशयितव्यानां परोवरीयस्त्वादिसिद्धान्तयुक्तीनां च यदेष इत्यत्राभावाच्च वाक्यान्तरोदाहरणं युक्तम् । अत्र यद्यपि "आकाश इति

(तात्पर्यचन्द्रिका)

होवाचे''त्यत्राकाशस्यान्यत्वे ''आकाशादेव समुत्पद्यन्त'' इति तत्प्रकरणे श्रुतं कारणत्वमप्यन्यस्यैव स्यादिति जन्मादिसूत्रमप्याक्षेप्तुं शक्यं भाति तथापि समुत्पद्यन्त इत्यस्योपादानत्वेप्युपपत्तेर्जन्मादिसूत्रोक्तकर्तृत्वाक्षेपायोगादानन्दमयाधिकरणानाक्षेपे तदाक्षेपकान्तरधिकरणप्राणाधिकरणयोर्मध्येऽस्य निवेशायोगाच्चानन्दमयाधिकरण-मेवाक्षिप्तम् ।

प्रकाशिका — ननु यदि कोह्येवान्यादित्यत्रत्याकाशस्य विष्णुत्वसिद्धिः फलं तर्हि नाधिकरणान्तरमारम्भणीयम् । ''विकारशब्दान्नेति चे''दितिवत् हेतुव्यपदेशसूत्रानन्तरं आकाशशब्दान्नेति चेत्तल्लिङ्गादिति गुणसूत्रेणैव विष्णोरेवाकाशशब्दवाच्यत्वोक्तिसम्भवात् । अधिकरणान्तरत्वेपि कोह्येवान्यादित्यस्यैव विषयत्वसम्भवे वाक्यान्तरोदाहरणस्यायुक्तत्वादि-त्याशङ्कते ॥ ननु यद्येवमिति ॥ साक्षादिति ॥ इति होवाचेत्यस्य भूतपरत्वात्त-त्तुल्यन्यायतयाऽयमपि भूतपरस्स्यादित्यस्य वक्रत्वादिति भावः । इयं शङ्का अन्तरधिकरण एव कुतो न कृता । किं विशिष्यात्रेत्यत आह ॥ अन्तस्स्थत्वस्य त्विति ॥ यद्यपि ''यो वेद निहितं गुहाया''मिति मन्त्रवर्ण एवान्तस्स्थत्वं श्रुतं तथापि मन्त्रवर्णोक्तस्यै-वानन्दमयशब्देनोच्यमानत्वात्तत्प्रकरणे श्रवणेपीत्युक्तम् । यत्तावदुक्तमधिकरणान्तरं न कार्यमिति तत्तावन्नेत्याह ॥ तथापीति ॥ न्यायेति ॥ अचेतनस्वभावस्यापि भगवदधीनत्व-प्रतिपादनरूपन्यायभेदेनेर्थः । अधिकरणान्तरत्वेपि वाक्यान्तरमयुक्तमित्येतन्निरस्यति ॥ आकाश इतीति ॥ एतदिति इतिहोवाचेत्येतत्परामृश्यते । नन्वस्त्वधिकरणान्तरं वाक्यान्तरोदाहरणं च । तथापि न भाष्योक्तं प्रयोजनम् । सर्वाणि ह वा इमानि भूतान्याकाशादेवे''ति साक्षात् श्रुतकारणत्वस्य पूर्वपक्षे भूतनिष्ठत्वेन जन्मादिसूत्राक्षेपस्य ऋजुत्वादित्याशङ्क्याह ॥ अत्रेति ॥ उपादानत्वेपीति ॥ ननूपादानत्वोक्तौ का सङ्गतिरिति चेदयं भावः । अस्य लोकस्य का गतिरिति पृथिवीगतिप्रश्नस्याकाश इत्युत्तरमभिधाय कथमेतत् अपां कार्यं हि पृथिवी तत्रैव च लीयत इति तासामेव पृथिवीगतित्वोपपत्तेरि-त्याशङ्क्य मैवं मूलोपादानत्वादित्याह सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्त इति । न च तर्ह्यात्मन आकाश इति श्रुतेरात्मा वाच्य इति शङ्क्यम् । भूतविषयविचारे वियत एव वक्तव्यत्वात् । न चाकाशस्यापि भूतत्वात्सर्वाणीति विरुद्धम् । इदं सर्वमसृजतेतिवद्व्यतिरिक्तग्रहणोपपत्तेः । न चावधारणानुपपत्तिः । परम्परया भूतोपादानस्या-परस्याभावादिति । हेत्वन्तरमाह ॥ आनन्दमयेति ॥ तत्राक्षेपान्तराभावादिति भावः ।

पाण्डुरङ्गि — नन्वानन्दमयाधिकरणाक्षेपेणास्तु विचारसाफल्यम् । तथापि वाक्यान्तरोदाहरणमयुक्तं आनन्दमयप्रकरणस्थे यदेष इत्यत्रैव पूर्वपक्षसिद्धान्तौ कर्तव्यौ । लाघवादिति शङ्कते ॥ नन्विति ॥ तर्ह्यानन्दमयप्रकरणेऽतस्स्थत्वस्य श्रुतत्वादन्तरधिकरणेपि वाक्यान्तरं नोदाहर्तव्यम् । अत आह ॥ अन्तस्स्थत्वस्येति ॥ तस्य स्वतोन्यत्र प्रसिद्धच-भावादिति ॥ यद्यपि द्युभ्वाद्यधिकरणे एवं सर्वगतत्वादीनि ब्रह्मण्ययुक्तत्वादेवान्यत्र प्रसिद्धानीति वक्ष्यमाणत्वात् गुहानिहितत्वरूपान्तस्स्थत्वस्यापि स्वत एवान्यत्र प्रसिद्धिर्वक्तुं शक्या तथापि अथवान्यत्र प्रसिद्धेरन्यत्र प्रसिद्धान्यसाहित्यसापेक्षत्वादिति तत्पूर्वोक्त-पक्षानुसारेणेदमित्यविरोधः ॥ तत्प्रकरणेऽभावेनेति ॥ यद्यपि ते ये शतं प्रजापतेरानन्दाः ते ये शतं बृहस्पतेरानन्दा इतीन्द्रादिश्रुतिरप्यस्ति तथाप्यस्य उपहंसारस्थाया उपक्रमस्थगुहा-निहितत्वेन मध्यस्थसृष्ट्यन्नमयादिप्रकरणैरव्यवधानात् प्रकृते चान्तस्थप्रश्नप्रकरण एवेन्द्रादि-श्रुतिश्रवणाद्वैषम्यमित्याशयेनोक्तं तत्प्रकरण इति ॥ किं वा बाधकपरिहारत्वादस्य विकार-शब्दादिवत् अधिकरणान्तर्भाव इत्याशयः किं वा भिन्नाधिकरणत्वेपि वाक्यं तदेवोदाहर्य-मिति विकल्पं मनसि निधाय क्रमेण निराह ॥ सत्यमित्यादिना ॥ नन्वेवं तर्हि पुनर्वैषम्यापत्त्योक्ताक्षेपानुपपत्तितादवस्थ्यमिति चेन्न । तथा पूर्वपक्षफलस्य जिज्ञासाक्षेपपर्य-न्तस्य सिद्धये विद्यमानस्याप्यस्य विषयत्वस्य पूर्वपक्षिणा विवक्षणोपपत्तेः यद्वा भूतलयाद्यधि-ष्ठानत्वादिभूतलिङ्गोपेतस्यापि इति होवाचेति वाक्यस्य ब्रह्मलिङ्गाद्ब्रह्मपरत्वे भूतलिङ्गविधुरस्य यदेष इति वाक्यस्य ब्रह्मपरत्वं किमु वाच्यमिति सिद्धान्ते कैमुत्येनैव सिद्धान्त-फलसिद्धेरभिप्रेतत्वात्तदनुसारेण पूर्वपक्षेपि परोवरीयस्त्वादिब्रह्मलिङ्गोपेतस्यापि भूतपरत्वे भूतप्रसिद्धिबाधकब्रह्मलिङ्गविधुरस्य भूतपरत्वं कैमुत्येनैव स्यादित्याक्षेपाभिप्रायः ॥ न्यायभेदेनेति ॥ आनन्दमयाधिकरणे गुणिसामान्यवाचिनां गुणवाचिनां च समन्वयः आकाशाधिकरणे चाधिभूतगताशेषशब्दसमन्वयः प्रतिपाद्यत इति न्यायभेदेनेत्यर्थः । यद्वा अचेतनस्वभावस्यापि भगवदधीनत्वमित्येतदधिकरणन्यायेनेत्यर्थः । ननु यदेष इति वाक्य-समन्वयेनैव इति होवाचेत्यस्यापि समन्वयसिद्धौ तद्वाक्यस्थगुणलाभस्यापि सम्भवेन वाक्यान्तरोदाहरणमयुक्तम् । अन्यथा यदेष इत्यस्य समन्वयार्थमप्यधिकरणान्तरमारभ्येतेत्यत आह ॥ तथैतदिति ॥ ननु यदेष इति वाक्यसमन्वय उक्ते एतत्समानन्यायानामपि समन्वयः सेत्स्यतीति निर्णीतत्वानिर्णीतत्वे अप्रयोजके इति न वाक्यान्तरमुदाहर्तव्यमित्यत आह ॥ तथा सिद्धान्तिनेति ॥ ननु चात्र जन्माधिकरणाक्षेपस्यापि सम्भवेन प्रयोजनस्यान्यथा-

(पाण्डुरङ्गि)

प्युपपत्तेर्नैतद्भाष्यं चिन्तासाफल्यपरम् । अन्यथा अन्तरधिकरणेप्यदृश्येऽनात्म्य इत्यादि-भाष्यस्य चिन्तासाफल्यपरत्वापत्त्या सङ्गतिप्रदर्शकत्वाभावापत्तेः । तत्र तथाभ्युपगमेचात्रापि तथैव स्यादित्यत आह ॥ अत्र यद्यपीत्यादिना ॥ ननु समुत्पद्यन्त इत्यस्य निमित्त-कारणपरत्वेप्युपपत्तेर्जन्मादिसूत्रोक्तकर्तृत्वाक्षेपः स्यादेवेत्यत आह ॥ आनन्दमयाधि-करणानाक्षेप इति ॥

तात्पर्यचन्द्रिका

केचित्तु अचेतनस्यैव पूर्वपक्षिणाऽऽकाशत्वेन शङ्क्यमानत्वाज्जन्मादिसूत्रोक्त-कर्तृत्वानाक्षेप इत्याहुः । तन्न । अचेतनस्याप्यभिमानिद्वाराऽनन्दमयत्ववत्कर्तृत्व-स्याप्युपपत्तेः । अन्ये तु सन्निकृष्टानन्दमयाक्षेपसम्भवे विप्रकृष्टजन्मादिसूत्राक्षेपो न युक्त इत्याहुः । तन्न । टीकायामानन्दमयाक्षेपस्य व्यवहितजिज्ञासाक्षेपपर्यन्तत्वोक्तेः ।

प्रकाशिका — उत्तानदृशां परिहारमनूद्य निरस्यति ॥ केचित्त्विति ॥ अभिमानिद्वारेति ॥ ''आकाशस्याचेतनत्वेनानन्दानुपपत्तावप्यभिमानिद्वारा तदुपपत्ते''रिति टीकोक्तेरिति भावः । आपाततः प्रतीयमानपरिहारान्तरमुद्टंक्य निरस्यति ॥ अन्ये त्विति ॥ टीकायामिति ॥ यद्यप्येतदधिकरणटीकायां न जिज्ञासासूत्राक्षेपपर्यन्तत्वोक्तिरस्ति तथाप्यं-तरधिकरणादौ तत्र तत्र टीकायां तदाक्षेपपर्यन्तत्वोक्तेरनुक्तिस्थलेपि तदाक्षेपपर्यन्तत्व-मभिप्रेतमिति भावः ।

पाण्डुरङ्गि — केचित्त्विति ॥ बुद्ध्यादिमत्त्वघटितं कर्तृत्वमचेतने न सम्भवतीति भावः । एवं ह्यानन्दमयत्वमपि कथमचेतने स्यात् । न चाभिमानिद्वारा तदुपपत्तिः । कर्तृत्वस्याप्यभिमानिद्वारोपपत्तेरित्याह ॥ तन्नेति ॥

तात्पर्यचन्द्रिका

अत्राकाशः किं भूताकाशः किं वा ब्रह्मेति चिन्ता । तदर्थं किमाकाश-श्रुतिप्रसिद्ध्यनुसारेण परोवरीयस्त्वादिलिङ्गं बाध्यं किं वा विपरीतमिति । तदर्थं प्रसिद्धिबाधे श्रुतेः किं मुख्यत्वहानिरुत नेति । तदर्थमाकाशशब्दप्रवृत्तिनिमित्तं ब्रह्मणि किं नास्त्युतास्तीति । तदर्थं जडस्वभावः किमीश्वरानधीन उत तदधीन

इति। यद्यधीनस्तदा तदधीनत्वन्यायेन ब्रह्मणि मुख्यत्वमन्यथा तु न । यद्यपि निरवकाशलिङ्गैर्लोकप्रसिद्धिबाध इह पूर्वत्र चाविशिष्टः विषयवाक्यभेदमात्रेण च नाधिकरणभेदः तथाप्यधिकाशङ्कानिरासादपौनरुक्त्यम् । शङ्का च

चेष्टा हि चेतनानां या सा भवेत्तत्प्रसादतः ।
अचेतनस्वभावस्तु विवरादिः कथं ततः ॥

इत्यनुव्याख्याने दर्शिता ।

प्रकाशिका — एवं सङ्गतिमुक्त्वा भाष्यकारीयां प्रयोजनोक्तिं तत्र वाक्यान्तरोदाहरणं च समर्थ्येदानीं विषयसंशयौ व्यनक्ति ॥ अत्रेति ॥ छान्दोग्ये ''अस्य लोकस्य का गतिरिति आकाश इति होवाच सर्वाणि हवा इमानि भूतान्याकाशादेव समुत्पद्यन्ते आकाशं प्रत्यस्तं यन्ति आकाशो ह्येवैभ्यो ज्यायानाकाशः परायणं स एष परोवरीयानुद्गीथः स एषोनन्त'' इति श्रुते वाक्ये शालावत्येन कृतस्य पृथिवीगतिप्रश्नस्योक्तत्वेन प्रवाहणेनोक्त आकाशोऽत्र विषय इत्यर्थः । उपलक्षणमेतत् । वाय्वादिभूतवाचिनस्सर्वेपीति ध्येयम् । भूतेति ॥ आकाशशब्दस्यावकाशसाधारणत्वेपि भूतप्रकरणत्वाद्भूताकाश इत्युक्तम् ॥ बाध्यमिति ॥ सावकाशयितव्यमित्यर्थः ॥ विपरीतमिति ॥ लिङ्गानुसारेण श्रुतिर्बाध्येत्यर्थः । प्रसिद्धि-बाधेऽन्यपरत्वत्याजने । अस्पष्टांशे फलफलिभावं स्वयमेवाह ॥ यद्यधीन इति ॥ अन्यत्र स्पष्टमिति भावः । तथाहि यदि जडस्वभाव ईश्वरानधीनस्तदा जडस्वभावं प्रति स्वातन्त्र्य-रूपस्य जडवाचिशब्दप्रवृत्तिनिमित्तस्य ब्रह्मण्यभावात् श्रुतेर्मुख्यत्वहानेन बाधायोगात् श्रुत्या भूतमिति पूर्वपक्षे फलफलिभावः । यद्यधीनस्तदा स्वातन्त्र्यरूपप्रवृत्तिनिमित्तस्य सत्त्वाद्ब्रह्मणि श्रुतेर्मुख्यत्वेन बाधाभावेन विष्णुरिति सिद्धान्ते फलफलिभावः ।

॥ तदधीनत्वन्यायेनेति ॥ ''आनुमानिकमप्येकेषा''मित्यधिकरणे ''तदधीनत्वादर्थव'' दिति गुणसूत्रे ''अव्यक्तात्पुरुषः पर'' इत्यादावव्यक्तादिगतावरत्वस्य भगवद्गतत्वाभावेपि ''अस्मिन्नेवावरत्वादिवाचिशब्दजातमर्थवत् । प्रधानादिगतपरावरत्वादिधर्माणां भगवदधी-नत्वा''दिति वक्ष्यमाणन्यायेन जडस्वभावस्य विवरत्वादेर्भगवत्यभावेपि तदधीनत्वेन जडवाचिशब्दवाच्यत्वं भविष्यतीत्यर्थः । नन्वत्राकाशस्वभाव ईश्वराधीन इति वा भूतस्वभावस्तदधीन इति वा चिंतनीयम् । न तु जडस्वभाव इति चेदयं भावः । न केवलं

(प्रकाशिका)

भूतवाचिन एवोदाहरणम् । किन्तु स्वभावप्रवृत्तिनिमित्तकास्सर्वेपि जडवाचिन इति । वक्ष्यते चैतदनुपदम् । अनुव्याख्यानोक्तप्रमेयाश्रिताभ्यधिकाशङ्कोपयुक्तेयं चिन्तापरंपरा । भाष्यादि-सूचितप्रमाणाश्रिताभ्यधिकाशंकोपयुक्ता तु लिङ्गं बाध्यं किं वा विपरीतमित्यनन्तरं तदर्थं श्रुतिः प्रबला लिङ्गं तु दुर्बलमुत विपरीतमिति । तदर्थं श्रुतिप्राबल्ये हेतुरस्ति न वेति द्रष्टव्या। पूर्वेणेदं गतार्थमित्याक्षिप्य समाधत्ते ॥ यद्यपीति ॥ विषयभेदेनाधिकरणभेद-माशङ्क्य निरस्यति ॥ विषयेति ॥ तथात्वे विषयाणामनन्तत्वेन शास्त्रापर्यवसानं स्यादिति भावः । भाष्येऽनुपलम्भादाह ॥ शङ्का चेति ॥ दर्शितेत्यन्वयः ।

पाण्डुरङ्गि — अंत्यचिन्ताया अव्यवहितोपांत्यचिन्तार्थत्वप्रतीतिं वारयति ॥ यद्यधीन इति ॥ अस्याधिकरणस्य पूर्वाधिकरणेन गतार्थतां परिहरति ॥ यद्यपीति ॥ नन्वभ्यधिका-शंकायाष्टीकादावप्रदर्शितत्वात्तत्प्रदर्शने टीकाविरोधः स्यादित्यत आह ॥ शङ्का चेति ॥

तात्पर्यचन्द्रिका

तत्राकाशशब्दप्रवृत्तिनिमित्तस्य विवरत्वादेर्भगवदधीनत्वेऽचेतनगतत्वं स्वभावत्वं चेति हेतुद्वयं विवक्षितम् । तत्राद्ये भृत्यगतस्य जयस्य राजाधीनत्वेन राजा जयीति प्रयोगस्येवाचेतनगतप्रवृत्तिनिमित्तस्य चेतनाधीनत्वे चेतने जडवाचिशब्दप्रयोगा-दर्शनात्तत्प्रसादलब्धत्वरूपं तदधीनत्वं शब्दप्रवृत्तिनिमित्तम् । न तु यथेष्टविनियोगार्ह-त्वरूपम् । न चाचेतने भगवतः प्रसादोऽस्तीति शङ्काभिप्रायः । अत एवानुव्याख्याने ''तत्प्रसादत'' इत्युक्तम् । एवं चाचेतनगतप्रवृत्तिनिमित्तकाः सर्वेपि शब्दा इह तेन रूपेण विचार्याः । द्वितीये तु इन्द्रादिशब्दप्रवृत्तिनिमित्तानामैश्वर्यादीनामिव विवरत्वा-दीनां स्वभावत्वान्नेशाधीनता । अन्याधीनत्वे स्वभावत्वहानेः । भृत्यादिगतस्वाभा-विकाभिरूप्यादिना राज्ञभिरूपादिशब्दाप्रयोगाच्चेति शङ्काभिप्रायः । अत्रापि स्वाभा-विकप्रवृत्तिनिमित्तकाशब्दास्सर्वेपीह तेन रूपेण विचार्याः । कस्यचिदुदाहर्तव्यत्वा-दानंदमयाक्षेपकत्वाच्चाकाशशब्द उदाहृतः । वाजपेयाधिकरणे उद्भिदादिशब्दानामपि विचार्यत्वेपि वाजपेयशब्द इव ।

प्रकाशिका — श्लोकार्थं विशदयन्नधिकाशङ्काप्रकारमाह ॥ तत्रेति ॥ अत्रेदं द्रष्टव्यम् । अयमाकाशो भूतमेव । न तु विष्णुः । तस्य विष्णुवाचित्वं हि रूढ्या योगेन वा । नाद्यः ।

भूत एव तस्यास्सत्वेनासिद्धेः । द्वितीयेपि योगः कृप्तो वाऽकृप्तो वा । आद्येप्यवकाशत्व-माकाशत्वमिति यद्विवरत्वं प्रवृत्तिनिमित्तं तस्य प्रधानादिगतावरत्वादिवद्भगवदधीनत्वेन वा इन्द्रादिशब्दप्रवृत्तिनिमित्तैश्वर्यादिवद्भगवद्गतत्वेन वा योगोऽभिमतः । नाद्यः । तदभावात् । कुत इत्यतो चेतनस्वभाव इत्यनेनाभिमतं हेतुद्वयमाह ॥ आकाशशब्दप्रवृत्तिनिमित्तस्येति ॥ हेतुद्वयमिति ॥ साक्षाद्वा परंपरया वेति शेषः । तत्राकाशगतं विवरत्वं न भगवदधीनम् । अचेतनगतत्वादचेतनस्वभावत्वाच्चेति साक्षाद्धेतुत्वपक्षे ननु सर्वस्य भगवतो यथेष्टविनियोग-योग्यत्वस्य सिद्धत्वादचेतनगतत्वमनधीनत्वे कथं हेतुरित्याशङ्क्याद्यं हेतुं दृष्टान्तोक्तिपूर्वं विवृणोति ॥ आद्य इति ॥ अदर्शनादिति ॥ ननु मृदब्रवीदापोऽब्रुवन्नित्यादावभिमानिचेतने मृदादिशब्दप्रयोगो दृष्ट इति चेन्न । अत्रत्यसिद्धान्तन्यायेनाभिमान्यधीनत्वे सिद्धे तदधीनत्वा-दिति न्यायेन देवतायां प्रयोगस्य वक्ष्यमाणत्वेनात्रत्यपूर्वपक्षिणो सम्प्रतिपत्तेरिति भावः । एतेनाचेतनगतं विवरादिर्विवरत्वादिकं ततः भगवत्प्रसादात् कथं न कथमपीति योजितम् । अनेन लब्धमर्थमाह ॥ एवं चेति ॥ तेन रूपेण अचेतनगतप्रवृत्तिनिमित्तकत्वेन रूपेण । प्राणगायत्रीज्योतिरादिशब्दा उदाहरणम् । एकस्यानेकत्रोदाहरणं तूपपादयिष्यते । अन्यथा तेषु शब्देषु विष्णुवाचित्ववदत्रापि विष्णुवाचित्वप्रसङ्गादिति भावः । स्वभावत्वहेतुं विवृणोति ॥ द्वितीये त्विति ॥ स्वाभाविकेति ॥ स्वभावसिद्धमनागन्तुकमेव प्रवृत्तिनिमित्तं येषां त इत्यर्थः । तर्हि भाष्याद्युक्तोदाहरणविरोध इत्यत आह ॥ कस्यचिदिति ॥

वाजपेयाधिकरण इति ॥ प्रथमाध्याये चतुर्थपादे ''नामधेये गुणश्रुतेः स्याद्विधान''मिति पञ्चमेधिकरणे चिन्तितं ''वाजपेयेन स्वाराज्यकामो यजेते''त्यत्र वाजपेयशब्दः किं गुणविधिः कर्मनाम वेति सन्देहे यजेतेत्यत्र यागे द्वितीयाद्यभावेन कर्मत्वकरणत्वयोरप्रतीतेः प्रकृतिप्रत्ययाभ्यां यागभावनामात्राभिधानात्समभिव्याहारेण तयोस्सम्बन्धमात्रमेवावगम्यते । तच्च कर्मत्वकरणत्वसाधारणमिति यागकर्मत्वांशे फलसम्बन्धश्च विनैव मत्वर्थलक्षणया तंत्रेण स्यादिति गुणविधिरिति प्राप्ते सम्बन्धमात्रपरत्वे आकाङ्क्षानुदयेन गुणफलयोरन्यतरेणा-प्यसम्बन्धस्स्यात् । लक्षणयाऽन्यतरविशेषपरत्वेऽन्यतरेणैव सम्बन्धस्स्यात् । उभयविषयपरत्वे तु वाक्यावृत्तिर्गुणप्रधानत्वोद्देश्यत्वोपादेयत्वविध्यनुवादत्वकृतं वैरूप्यं च स्यादिति तंत्रसम्बन्धासम्भवाद्गुणविवक्षासामानाधिकरण्यनिर्वाहाय मत्वर्थलक्षणादोषो दुर्वार इति वाजमन्नरूपं सुराद्रव्यं पेयमस्मिन्निति सुराग्रहणविधानात्तत्प्रख्यन्यायेन नामधेयमिति सिद्धान्त इति । अत्र ''सर्वेष्वाख्यातशब्देषु तन्त्रसम्बन्धसम्भवात् । मत्वर्थलक्षणादोषो

(प्रकाशिका)

नास्तीत्याक्षिप्यतेऽधुने''त्युक्तरीत्यापूर्वपक्षे उद्भिदादिषु विशिष्टविधिपक्षोद्भावितमत्वर्थ-लक्षणादोषोद्धारात्सिद्धान्ते तद्व्यवस्थापनाच्चोद्भिदादिशब्दानां विचार्यत्वेपि यथा वाजपेयशब्दोदाहरणं तथा प्रकृतेपीत्यर्थः । एतेन स्वभावरूपं विवरत्वादिकं ततः भगवतः कथं भगवदधीनं कथं स्वभावत्वादिति योजनोक्ता भवति ।

पाण्डुरङ्गि — अचेतने भगवत्प्रसादोस्तीति ॥ सेवासाध्यसेवकेष्टानिष्टप्राप्ति-परिहारानुग्रहेच्छाविशेषस्यैव प्रसादशब्दार्थत्वस्य इच्छानिमित्तको यस्मादित्यनुव्याख्यान उक्तत्वादित्यर्थः । इन्द्रादिशब्दप्रवृत्तिनिमित्तानामैश्वर्यादीनामिवेति व्यतिरेकदृष्टान्तः ॥ अन्याधीनत्वे स्वभावत्वहानेरिति ॥ स्वहेत्वतिरिक्तहेत्वधीनत्वे औत्पत्तिकत्वरूपस्वाभाविकत्वहान्यापातादि-त्यर्थः । नन्वेवमचेतनप्रवृत्तिनिमित्तकानां स्वाभाविकप्रवृत्तिनिमित्तकानां च शब्दानामुदाहरणीयत्वे आकाशशब्दस्यैवोदाहरणं कुत इत्यत आह ॥ कस्यचिदिति ॥ ननु प्रथमातिक्रमे कारणाभावात्पृथिवीशब्द एवोदाहर्तव्य इत्यत आह ॥ आनन्दमयेति ॥ नन्वनेकेषां विचार्यत्वे एकस्यैवोदाहरणं कुत्राप्यदृष्टं प्रकृत एव कथमङ्गीकार्यमित्यतस्तत्र पूर्वसम्प्रतिपन्नदृष्टान्तमाह ॥ वाजपेयाधिकरण इति ॥

तात्पर्यचन्द्रिका

यद्वा विवरत्वादिकं किमिन्द्रादिगतैश्वर्यादिवदीश्वरप्रसादलब्धत्वात्तदधीनं किं वा कुलालाद्यधीनचक्रादिभ्रमणवदागन्तुकत्वमात्रेण । नाद्यः । तस्याचेतनगतत्वेन तद-भावात् । नांत्यः । स्वभावत्वात् । तथाच विवरत्वादिकं नेश्वराधीनमितीश्वरा-नधीनत्वे सापेक्षयोरेवाचेतनगतत्वस्वभावत्वयोर्हेतुत्वम् ।

प्रकाशिका — एवं द्वयोस्तदधीनत्वे साक्षाद्धेतुत्वमुपपाद्य परम्परया हेतुत्वं व्यनक्ति ॥ यद्वेति ॥ विवरत्वादिकं न भगवदधीनं भगवत्प्रसादालभ्यत्वाद्व्यतिरेकेणैश्वर्यादिवत् । तथा नागन्तुकत्वान्नान्याधीनं व्यतिरेकेण कुलालचक्रभ्रमणवत् । तत्रासिद्धौ हेतू इत्यतः क्रमेणाचेतनगतत्वं स्वभावत्वं च हेतुद्वयसमर्थनपरतयेष्यत इति भावेन विकल्पमुखे-नोपपादयति ॥ विवरत्वादिकमिति ॥ सापेक्षयोरिति ॥ उक्तरीत्या मध्ये हेत्वंतरसापेक्ष-योरित्यर्थः । यथा सावयवत्वस्य कार्यत्वद्वारा कर्तृसाधनत्वं तद्वदिति । तथाचानुव्याख्यान-स्येत्थं योजना । विवरत्वादिर्विवरत्वादिकं कथं ततः भगवत्प्रसादात्कथं भगवत्प्रसादलब्धं

अचेतनगतत्वात् । तथाच तत्प्रसादलब्धत्वाभावाद्विवरत्वादिकं कथं ततः तदधीनं न कथमपीति । तथा विवरत्वादिकं कथं ततः तदधीनं कथं अनागन्तुकत्वादिति शेषः । तदेव कुत इति चेत्स्वभावत्वादिति । एवमचेतनस्वभावस्त्वित्यनेन विवक्षितं हेतुद्वयं स्वातन्त्र्य-रूपप्रवृत्तिनिमित्तनिरसने साक्षात्परंपरया वा साधनमित्येतच्छ्लोकारूढतया दर्शितम्। विवरत्वादेर्भगवद्गतत्वेन योगोभिमत इति द्वितीयः कल्पः । तन्निरासस्तु श्लोकाद्बहिरेव ध्येयः। तथाहि । विवरत्वादिकमैश्वर्यादिवन्न भगवद्गतमिति साध्यमध्याहार्यम् । हेतुस्त्वचेतनगतत्वादिति ।

पाण्डुरङ्गि — परस्परनिरपेक्षाभ्यामेवाचेतनगतत्वाचेतनस्वभावत्वाभ्यामाकाश-शब्दप्रवृत्तिनिमित्तविवरत्वादेरीश्वरानधीनत्वं प्रसाध्य सापेक्षयोरप्यचेतनगतत्वस्वभावत्वयो-रीश्वराधीनत्वसाधकमाह ॥ यद्वेति ॥

तात्पर्यचन्द्रिका

यद्वा ''स्वातंत्र्यं तद्गतत्वं च शब्दवृत्तेर्हि कारण''मित्युक्तत्वाद्वयं निमित्तम् । तत्र न तावन्निरवधिकैश्वर्यादिवन्निरवधिकं विवरत्वादिकं ब्रह्मगतम् । तस्याचेतनगत-त्वात् । नापि पुरन्दरादिगतैश्वर्यवत्तदधीनम् । स्वभावत्वात् । तथाच विवरत्वादिकं ब्रह्मण्याकाशादिशब्दवृत्तौ न निमित्तमिति निमित्तत्वाभावे सापेक्षयोर्हेतुत्वम् । श्लोके सार्वविभक्तिकतस्यंतस्य ततश्शब्दस्य तत्रेत्यप्यर्थः । अस्मिन्मते तद्गतत्वपक्षोपि श्लोकेनैव दूषितः । मतान्तरे तु बहिरेव दूष्यः । सुधायां तु ''न तावद्विवरत्वादिक-मैश्वर्यादिवदागन्तुकज्ञानादिरूपहेतुद्वारेश्वरायत्तम् । अचेतनाश्रितत्वात् । नापि स्वरूपतः । स्वभावत्वा''दिति व्याख्यातम् । तत्रेन्द्रादिशब्दप्रवृत्तिनिमित्ते पालनादि-रूपप्रयत्नात्मकैश्वर्ये ज्ञानादेरेव हेतुत्वदर्शनादत्रापि ज्ञानादिरेव हेतुर्वाच्यः । स चाचेतने नास्तीत्यभिप्रायः । यत्तु सुधायां अन्तरधिकरण- पूर्वपक्षेऽचेतनस्व-भावस्यान्नत्वादेर्भगवदधीनत्वांगीकरणं तदेतदधिकरणसिद्धान्तन्यायानुसन्धानेन । न ह्येतदधिकरणपूर्वपक्षस्थेनैव तत्रापि पूर्वपक्षिणा भाव्यम् । तथात्व एतदधिकरण-सिद्धान्तेनैव तत्रत्यपूर्वपक्षनिरासेन तत्रत्यसिद्धान्तवैयर्थ्यात् । अनुव्याख्यानसुधा-द्यनुसारेण चात्रापि टीकायां ''आकाशस्याचेतनत्वेनान्याधीनत्वायोगा''दित्या-दावाकाशपदं तत्पदप्रवृत्तिनिमित्तपरम् । तस्मादाकाशादिशब्दानां कृत्रं रूढं वा

(तात्पर्यचन्द्रिका)

''आकाशनमवकाशत्व''मिति सुधोक्तं यौगिकं वा कृत्नं निमित्तं नेश्वरगतम् । नापि तदधीनम् । आसमन्तात्काशत इति कल्प्यो योगस्तु कृत्नया भूताकाशे रूढ्या बाधितः । विद्वद्रूढिमहायोगौ त्वसिद्धौ । वैदिकप्रयोगबाहुल्यादेरद्याप्यसिद्धेः । यत्त्वानन्दमयाधिकरणे ''अध्यात्मगैश्च प्राणाद्यैस्तथैव ह्यधिभूतगै''रित्याद्यनुव्याख्यानं तदानन्दमयप्रकरणस्थाकाशादिशब्दानां ब्रह्मपरत्वायाकाशाद्यधिकरणे वक्ष्यमाणन्यायमुपजीव्य प्रवृत्तमिति न तेन विद्वद्रूढ्यादिसिद्धिः । तस्माद्युक्ताऽभ्यधिकाशङ्का । इयं च प्रमेयाश्रिताऽऽकाशशब्दस्य ब्रह्मणि मुख्यत्वविरोधिनी शङ्का ।

प्रकाशिका — ननूक्तपक्षद्वये तदधीनत्वनिरास एव श्लोकारूढो न तद्गतत्वनिरासः । न च तद्गतत्वं निमित्तमेव नेति वाच्यम् । अनुव्याख्यानविरोधादित्यनुशयेन द्वयोरपि श्लोकारूढतया कल्पान्तरमाह ॥ यद्वा स्वातन्त्र्यमिति ॥ विवरत्वादिकमिति ॥ श्लोके भावप्रधाननिर्देश इत्युक्तं भवति ॥ सापेक्षयोरिति ॥ तद्गतत्वाभावतदनधीनत्वरूपहेतुद्वयं मध्येऽपेक्ष्याचेतनस्वभाव इत्यत्र विवक्षितं हेतुद्वयं निमित्तत्वाभावं साधयतीत्यर्थः ॥ सार्वविभक्तिकेति ॥ यद्यपि ''पञ्चम्यास्तसि''लिपि पञ्चम्यर्थ एव विहितस्तथापि ''प्रतियोगे पञ्चम्यास्तसिः । आद्यादिभ्य उपसंख्यान''मित्युक्तेः ''यतो यतो निश्चरति मनश्चञ्चल'' मित्यादाविव सप्तम्यर्थे तसिरित्यर्थः । तथाचैवं योजना । विवरत्वादिकं कथं ततः तत्र भगवति कथं कुतः अचेतनगतत्वात् ततश्च तद्गतत्वाभावान्न निमित्तमिति । तथा विवरत्वं कथं ततः तदधीनं कथं कुतः स्वभावत्वात् ततश्च तदधीनत्वाभावान्न निमित्तमिति । पूर्वोक्तपक्षयोरस्य पक्षस्य विशेषं स्वयमेवाह ॥ अस्मिन्मत इति ॥ बहिरेवेति ॥ उक्तमिदं प्राक् तत्रैवास्माभिः । एवं स्वयमनुव्याख्यानस्य त्रेधाभिप्रायमुक्त्वा सुधोक्तमपि प्रकारान्तरमनुसन्धेयमिति भावेन तदुक्तं सङ्ग्रहेणानूद्य तदभिप्रायं तावदस्फुटत्वाद्व्यनक्ति ॥ सुधायां त्विति ॥ स्वरूपतः ज्ञानादिहेतुमनपेक्ष्य । नन्वेवं सुधायां ''ननूक्तमन्यत्रान्यरूढेरविद्वत्सम्बन्धित्वाद्योगस्य च परमेश्वरायत्तात्पनिमित्तत्वादमुख्यतेति । सत्यम् । तदन्नौषध्यादिपदार्थेषु स्यान्न तु पुरन्दरादिष्वित्यादिना चेतनस्यापि भगवदधीनत्वोक्तिरयुक्तेत्यत आह ॥ यत्त्विति ॥ नन्वत्रानङ्गीकुर्वन् पूर्वपक्षी तत्र कथमङ्गीकुर्यादित्यत आह ॥ न हीति ॥ उत्तरप्रस्थानाविरोधाय टीकार्थमाह ॥ अनुव्याख्यानेति ॥ यद्वा विवरत्वस्य भगवदधीनत्ववर्णनं टीकाविरुद्धमित्यत आह ॥ अनुव्याख्यानेति ॥ कृत्नो योगो

नेत्युपपादितमुपसंहरति ॥ तस्मादिति ॥ रूढं वेति ॥ शब्दाश्रयत्वादिरूपं वेत्यर्थः । निमित्तमित्यन्वयः । ननु मास्तु कृत्स्नो योगः कल्प्यो भविष्यतीति द्वितीयं पक्षं निरस्यति ॥ आसमन्तादिति ॥ असिद्धत्वे हेतुर्वैदिकप्रयोगेति ॥ आदिपदेन प्रवृत्तिनिमित्तपौष्कल्यग्रहणम् । ननु विद्वद्रूढिमहायोगावसिद्धाविति कथम् । अनुव्याख्यानविरोधादित्यत आह ॥ यत्त्विति ॥ ''अन्नादिशब्दैर्भगवानेको मुख्यतयोदित'' इत्युत्तरार्धेनान्वयः । ननु यद्येवं तर्हि ''यद्यानन्दमयोभ्यासादिति वदतः सूत्रकारस्यैतावानर्थोभिमतो भवेत्तर्हि तत एव गतार्थत्वादन्तस्तद्धर्मोपदेशादित्याद्यधिकरणानामनुत्थानमेव स्या''दित्याशङ्क्य च ''अभ्यधिकाशङ्कासद्भावेनाधिकरणान्तरारम्भोपपत्ति''रित्यन्ताधिकरणोपक्रमसुधाविरोधः । तत्र विद्वद्रूढिमहायोगौ सर्वशब्दानां सिद्धावित्युपेत्य तदाच्छादकाभ्यधिकाशङ्क्याऽधिकरणारम्भसमर्थनोक्तिप्रतीतेरिति चेन्मैवम् । उत्तरत्र तदाच्छादकाभ्यधिकाशङ्कोक्तेरदर्शनात् । ''अन्नौषध्यादिपदार्थेषु स्यान्न तु पुरन्दरादि''ष्विति वाक्यस्य गतेरुक्तत्वात्सूत्रकारस्याकाशाद्यधिकरणन्यायेनाभिमतस्य भाष्यकारेण तत्र कथनेपि विद्वद्रूढिमहायोगयोरसिद्धत्वादिनाऽऽक्षेपेण पूर्वपक्षप्रवृत्तिसम्भवेन तद्वाक्यस्याप्येवं योज्यत्वादिति भावः । तस्माद्विद्वद्रूढिमहायोगयोरेतत्सिद्धान्तात् पूर्वमसिद्धत्वादनुव्याख्यानोक्ता युक्तेत्यर्थः । इयं अनुव्याख्यानोक्ता आकाशपदप्रवृत्तिनिमित्तविवरत्वरूपप्रमेयमाश्रित्य प्रवृत्तेत्यर्थः ॥

पाण्डुरङ्गि — अस्मिन्पक्षे तद्गतत्वपक्षः श्लोकाद्बहिरेव दूष्यो भवतीत्यस्वरसात्पक्षान्तरमाह ॥ यद्वेति ॥ नन्वनुव्याख्याने विवरत्वादेरीश्वराधीनत्वाभाव एव विवरादिः कथं तत इत्यादिनोक्तः । भवद्भिश्च विवरादेरीश्वरगतत्वाभावोपि चेदुच्यते तर्ह्यनुव्याख्यानविरोधः स्यादित्यत आह ॥ श्लोक इति ॥ नन्वेवमनुव्याख्याने सुधाविरोध इत्यतस्तदुक्तं प्रकारान्तरमित्यभिप्रायेण तत्रानुपपत्तिपरिहारपूर्वकं तदनुवदति ॥ सुधायां त्विति ॥ नन्वंतरधिकरणपूर्वपक्षीयसुधायां अचेतनस्वभावस्याप्यन्नत्वादेर्भगवदधीनत्वाभ्युपगमात्कथमत्र तदभावेन पूर्वपक्षकरणे तत्सुधाविरोधो न स्यादित्यत आह ॥ यत्त्विति ॥ नन्वाकाशपदप्रवृत्तिनिमित्तविवरत्वादेर्भगवदधीनत्वाभावेन तद्गतत्वाभावेन शब्दप्रवृत्तिकारणीभूतस्वातन्त्र्यतद्गतत्वयोरभावादाकाशशब्दस्य ब्रह्मपरत्वं न सम्भवतीति पूर्वपक्षे क्रियमाणे टीकाविरोधः स्यात् । टीकायामाकाशस्याचेतनत्वेनेश्वराधीनत्वासम्भवस्य प्रतिपादितत्वादित्यत आह ॥ अनुव्याख्यानेति ॥ आकाशपदं तत्पदप्रवृत्तिनिमित्तपरमित्युपलक्षणम् । अचेतनेत्यत्राचेतनपदं तद्गतपरमित्यपि द्रष्टव्यम् । ननु रूढस्याकाशशब्दप्रवृत्तिनिमित्तस्य भगवद्गतत्वाद्यसम्भवेपि

(पाण्डुरङ्गि)

यौगिकस्य तद्भविष्यतीत्याशङ्कामुपसंहारव्याजेन परिहरति ॥ तस्मादिति ॥ हेतुद्वयं तूक्तमेवेति भावः । नन्वासमन्तात्काशत इति योगलभ्यप्रवृत्तिनिमित्तस्य प्रकाशत्वस्य भगवद्गतत्वात्तद्वाचकत्वमित्यत आह ॥ आसमन्तादिति ॥ रूढिर्योगमपहरतीति न्यायादिति भावः । विद्वद्रूढिमहायोगाभ्यां तद्वाध इत्यत आह ॥ विद्वदिति ॥ वैदिकप्रयोगादेव तत्सिद्धिरित्यत आह ॥ वैदिकेति ॥ नन्वानन्दमयाधिकरणे अध्यात्मगैश्चेत्यनुव्याख्यानेन विद्वद्रूढेः साधितत्वादित्यत आह ॥ यत्त्विति ॥ न केवलमुक्तैवाभ्यधिकाशंका किंत्वन्यापीत्याह ॥ इयं चेति ॥

तात्पर्यचन्द्रिका

प्रमाणाश्रितावाक्यस्य ब्रह्मपरत्वविरोधिनी शङ्कातु युक्तः पूर्वत्र श्रुतित्वमात्र-प्रयुक्तप्राबल्यान्निरवकाशत्वप्रयुक्तप्राबल्यस्य बलवत्त्वान्निरवकाश- लिङ्गेन श्रुतिबाधः। अत्र त्वाकाशश्रुतेः ''आकाशादेव समुत्पद्यन्ते आकाशं प्रत्यस्तं यन्ति आकाशो ह्येवैभ्यो ज्यायान् आकाशः परायण''मिति बहुकृत्वः श्रुतत्वात् श्रुतित्वबहुत्वोभय-प्रयुक्तप्राबल्यान्निरवकाशत्वमात्रप्रयुक्तप्राबल्यस्य दुर्बलत्वान्निरवकाशस्यापि लिङ्गस्य बाधः । अत एव पूर्वत्र सवित्रादिश्रुतेरबहुत्वेन बाधेपीन्द्रश्रुतेर्बहुत्वान्न बाधः । एवं चेन्द्रश्रुतिः श्रुतित्वेन तत्रोदाहरणम् । बहुश्रुतित्वेनात्रापि । यथाग्निहोत्रादिशब्दो नामधेयतया नामधेयपादे तूदाहरणं समुदायानुवादापवादतया शब्दान्तरपादे यथाच जीवकारणता श्रुतिप्राप्ततया द्वितीयस्याद्यपाद उदाहृता । समयप्राप्ततया तु द्वितीयपादे यथा चायमेवाकाशशब्दोऽन्यत्रप्रसिद्धत्वेनात्रोदाहरणमुभयत्रप्रसिद्धत्वेन तु तृतीये तद्वदित्येका । अपरातु युक्तमन्यत्र निरूढानामपीन्द्रादिशब्दानां श्येनादिशब्दानां यजिसामानाधिकरण्यवत् ''मत्सीन्द्रमिन्दो पवमानविष्णुं'' इत्यादौ विष्णुशब्दसा-मानाधिकरण्यात् ''यो देवानां नामधा'' इति विशेषश्रवणादन्यत्रानिरूढान्त-स्थत्वमुखसद्भावाच्च विष्णुपरत्वम् । उत्पत्तिशिष्टसोमावरुद्धेपि याग उत्पन्नशिष्टस्य फलचमसस्य भक्षणमुखेनानुप्रवेशवदर्थान्तरावरुद्धेपीन्द्रादिशब्देऽन्तस्स्थत्वमुखेन ब्रह्म प्रवेशाविरोधात् । आकाशशब्दस्य तु क्वापि तत्सामानाधिकरण्याभावाद्विशेष-श्रुत्यभावादन्यत्रानिरूढमुखाभावाच्च आमिक्षावरुद्धे यागेवाऽजिनवद्विरोधान्न

विष्णुपरत्वमिति । अन्यातु आकाशशब्दस्योपक्रमस्थत्वेनश्रुतित्वेनच प्रबलत्वादिन्द्र-बृहस्पत्यादिशब्दवच्चपरस्परविरुद्धनानार्थोपस्थापकत्वाभावेनैकवाक्यत्व भङ्गाभावात् आकाशब्रह्मणोर्विरुद्धांशत्यागेनैक्याङ्गीकारे च पूर्वत्रेवात्र बाधकस्य भेदव्यपदेशस्या-भावाच्चाकाशशब्दः प्रसिद्धार्थपर इति प्रबलश्रुत्यनुसारेण चानन्तत्वादिलिङ्गानि कथं-चिद्भूताकाशे योज्यानि । एताश्च प्रमाणश्रिताः शङ्का अनुव्याख्याने ''आकाश इति नामचे''त्यन्यत्रानिरूढमुखान्तरेण विष्णुशब्दसामानाधिकरण्येन विशेषश्रवणेन च रहितनामोक्त्या अत्र भाष्यटीकयोरसकृत् श्रुतोपक्रमस्थाकाशैकशब्दवतो भेदव्यपदेश-शून्यस्य च विषयवाक्यस्योदाहरणेन च सूचिताः ।

प्रकाशिका — प्रमाणेति ॥ आकाशपदरूपमाश्रित्य वर्तमानेत्यर्थः ॥ ब्रह्मपरत्वेति ॥ शक्तितात्पर्यावधारणं हि समन्वयः । तत्र पूर्वं शक्तिर्नेत्युक्तम् । अधुना तात्पर्यं नेत्युच्यत इत्यर्थः । भाष्यादावुदाहृतबहुकृत्वःश्रुताकाशपदोपेतविषयवाक्यसूचितामाह ॥ युक्त इति ॥ पूर्वत्र अन्तरधिकरणे । लिङ्गस्य अनन्तत्वादिलिङ्गस्य बाधः सङ्कोच इत्यर्थः । ननु पूर्वत्र बहुकृत्वश्श्रुतस्यापीन्द्रशब्दस्य समुद्रशायित्वादिलिङ्गेन बाध उक्त इत्यत आह ॥ अत एवेति ॥ उभयप्रयुक्तप्राबल्यस्य बलवत्त्वादेवेत्यर्थः ॥ सवित्रादीति ॥ अतद्गुणसंविज्ञानेन बृहस्पत्यादिश्रुतिरिति ध्येयम् । सवितृश्रुतिबहुत्वस्यापि सत्त्वात् । नन्वेकस्याकारभेदे-नाप्यनेकत्रोदाहरणमदृष्टचरमित्यत आह ॥ यथेति ॥ ''अग्निहोत्रं जुहोती''त्यत्र-त्याग्निहोत्रशब्दो यथा ''अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति सायं जुहोती''ति नामधेयत्वा-पादकगुणप्रख्यापकशास्त्रान्तरविषयतया नामधेयपादे ''तत्प्रख्यं चान्यशास्त्र''मिति तृतीयाधिकरणोदाहरणम् । ''दध्ना जुहोती''त्यादिवाक्यप्राप्तहोमसमुदायानुवादकत्वशङ्का-विषयतया द्वितीयाध्यायद्वितीयपादे पञ्चमाधिकरणे उदाहरणं तद्वदित्यर्थः ॥ यथाच जीवकारणतेति ॥ ''इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्ति''रिति युक्तिपादीयसप्तमाधिकरणे ''जीवाद्भवन्ति भूतानी''त्यादिश्रुतिसंवादिचेतनत्वादियुक्तिप्राप्ततयोदाहृतापि जीवकर्तृता ''अन्यथानुमितौ च ज्ञशक्तिवियोगा''दिति समयचरणपञ्चमाधिकरणे प्रकृत्युपसर्जन-पुरुषकर्तृकमतप्राप्ततयोदाहृता तद्वदित्यर्थः । उक्तं च टीकायां इतरव्यपदेशादित्यत्र ''अत्र जीवाद्भवन्ति भूतानीति श्रुतिप्राप्तो जीवकर्तृत्वपक्षो निराक्रियते । उत्तरत्र तु समन्वयप्राप्त इत्यर्थभेद'' इति ॥ तृतीय इति ॥ द्युभ्वादिपादे ''आकाशोऽर्थान्तरत्वादिव्यपदेशा''दिति द्वादशेऽधिकरणे उदाहरणमित्यर्थः । ''विवरादिः कथं ततः''

(प्रकाशिका)

इति शङ्कानिवृत्त्यर्थं आकाश इति नाम च ।
परतोपि वरीयस्त्वपूर्वाल्लिङ्गाद्धरेर्भवेत् ॥

इत्यनुव्याख्याने नामपदसूचितशङ्कान्तरमाह ॥ अपरा त्विति ॥ युक्तमिन्द्रादिशब्दानां विष्णुपरत्वमित्यन्वयः । तत्र हेतुत्रयमभिप्रेत्य सदृष्टान्तमाह ॥ श्येनेति ॥ ''श्येनेनाभिचरन्यजेते''त्यत्र तृतीयान्ततया निर्दिष्टस्य श्येनशब्दस्यान्यत्र निरूढस्यापि प्रत्ययार्थभूतभावनाकरणतासमर्थयागवाचियजिधातुसामानाधिकरण्यात् ''यथा वै श्येनोयं निपत्यादत्त'' इति सादृश्यबोधकवाक्यशेषाच्च यागपरत्वं तथा ''मत्सि सोम वरुणं मत्सि मित्रं मत्सीन्द्रमिन्दो पवमान विष्णु''मिति विष्णुशब्दसामानाधिकरण्याद्यो देवानामिति विशेषश्रवणाच्चेत्यर्थः । न चेन्द्रं विष्णुं च मत्सि मदयसीति पृथगन्वयोपपत्तेस्सामानाधिकरण्यमसिद्धमिति वाच्यम् । तथा सति वरुणादिषु पृथक्पृथङ्मत्सिशब्दवन्मत्सीन्द्रं मत्सि विष्णुमिति पृथङ्मत्सिशब्दश्रवणापातात् । सर्वेषां पृथङ्मत्सिशब्ददर्शनेनैकस्यैवान्यथात्वायोगादश्रुतकल्पनापाताच्च ।

''मत्सि महामिन्द्रमिन्दो मदाये''त्यन्येन्द्रस्य पृथगुक्त्या पौनरुक्त्यापाताच्च । महत्त्वस्यादितिपुत्रत्वेनाग्रजत्वमात्रेणोपपत्तेश्चेति व्यक्तमेतदैतरेयभाष्य इति भावः । तृतीयहेतुं दृष्टान्तेनोपपादयति ॥ उत्पत्तिशिष्टेति ॥ तृतीयेध्याये पञ्चमे पादे ''फलचमसो नैमित्तिको भक्षविकारश्रुतिसंयोगा''दित्युपांत्याधिकरणे चिन्तितं ''यदि राजन्यं वैश्यं वा याजयेत् स यदि सोमं बिभक्षयिषेत् न्यग्रोधस्तिभिनीराहृत्य तास्संपिष्यदधन्युन्मृज्य तमस्मै भक्षं प्रयच्छेन्न सोम'' मित्यत्र राजन्यवैश्यनिमित्तेन सोमविकारतया श्रूयमाणः फलचमसः किं तद्भक्षमात्रे सोमं विकुर्यादुत यागेऽपीति संशये बिभक्षयिषेदिति भक्षं प्रयच्छेदिति तूपक्रमोपसंहाराभ्यां तत्रैव विकारो न यागे । अश्रवणादिति प्राप्ते यागसाधनद्रव्यसंस्काररूपभक्षसम्बन्धित्वेन श्रूयमाणः फलचमसः अन्यथा तत्सम्बन्धायोगाद्यजमानचमसयागाभ्यासासाधनत्वं प्रतिपद्यते । अतो यागेऽपि सोमविकार इति । अत्रोत्पत्तिशिष्टनित्यापेक्षया नैमित्तिकस्योत्पन्नशिष्टस्यापि प्राबल्यात्फलचमसस्य यागसाधनद्रव्यसंस्काररूपभक्षणद्वारा यागसाधनत्वेन यथा यागेऽनुप्रवेशः तथेन्द्रादिशब्देपि पुरन्दरादिरूपार्थान्तरवाचिन्यपि वाच्यतया ब्रह्मानुप्रवेश इत्यर्थः ।

प्रकृते तद्वैषम्यमाह ॥ आकाशेति ॥ तदिति विष्णुवाचिशब्दः परामृश्यते । ननु ''आकाशो वै नाम नामरूपयोर्निर्वहिता ते यदन्तरात्मा तद्ब्रह्म तदमृतं स आत्मे''ति

छान्दोग्ये विष्ण्वसाधारणब्रह्मशब्दसामानाधिकरण्यमस्तीति चेन्न । तत्र प्रसिद्धिद्योतक-निपातबलेन ब्रह्मादिशब्दानां विष्णुवाचित्वस्य पूर्वपक्षिणो संमतेः । ननु तथापि कथं विशेषश्रुत्यभावादिति । ''नामानि सर्वाणि यमाविशन्ती''ति श्रुतेस्सत्वादिति चेन्न । देवानामितिवद्भूतानामिति विशिष्याभावात् । अत एव विशेषेत्युक्तम् । यो देवानामिति श्रुत्यनुसारेण सर्वाणीति सामान्यशब्दस्य सङ्कोचोपपत्तेश्चेति भावः ॥ आमिक्षावरुद्ध इति ॥ द्वितीयस्य द्वितीये पादे ''गुणश्चापूर्वं संयोगे वाक्ययोस्समत्वा''दिति नवमेऽधिकरणे चिन्तितं ''वैश्वदेव्यामिक्षे''ति यागं विधायाम्नाते ''वाजिभ्यो वाजिन''मिति । अत्र किं पूर्वस्मिन्नामिक्षायागे वाजिनं गुणो विधीयते किं वा कर्मान्तरमिति संशये वाजिशब्देनामि-क्षायागदेवतारूपविश्वेदेवप्रत्यभिज्ञानात्तत्र सम्बध्यमानं वाजिनं पूर्वकर्मण्येव विहितं भवति । सम्भवति चैवं गुणमात्रविधाने विशिष्टविधिगौरवं नाश्रयितुं युक्तम् । अतः पूर्वयागे वैकल्पिकद्रव्यविधानमिति प्राप्ते आमिक्षायुक्तस्यैवोत्पत्तौ पूर्वयागस्यावगमाद्वाजिनविधौ तेनैव रूपेणानुवाद्यत्वात्तस्य द्रव्यान्तरसम्बन्धापेक्षायोग्यत्वयोरभावात्तत्र निवेशमलभमानं वाजिनं आत्मनिवेशक्षमं कर्मान्तरं साधयतीति कर्मान्तरविधिरिति । तद्विरोधान्न विष्णुपरत्वमित्यर्थः। अत्रोदाहृतविषयवाक्यपर्यालोचनया प्राप्तं शङ्कांतरमप्याह ॥ अन्यात्विति ॥ उपक्रमाधि-करणन्यायेनोपक्रमस्य प्राबल्यं मन्वानस्य शङ्कितुरुपक्रमस्थत्वेनेत्युक्तिः । ननु श्रुतेरपि पूर्वत्र लिङ्गाद्बाध उक्त इत्यतो वैषम्यं द्वेधा दर्शयति ॥ इन्द्रेति ॥ निरवकाश- लिङ्गविरोध इत्यत आह ॥ प्रबलेति ॥ कथंचिदिति ॥ सङ्कुचितानन्तत्वादिनेत्यर्थः । तदुक्तं सन्यायरत्नावल्यां ''प्रथमपठितत्वात्प्रसिद्धत्वाच्च तत्रैव वाक्यशेषो भाक्तो वर्णनीय'' इति । सुधायां च ''प्रथमावगतस्वभावबलवत्त्वानुरोधेन लिङ्गानि कथंचिद्योज्यानी''ति । उक्ताश्च प्रमाणाश्रि-तास्तिस्रश्शङ्का नानवधेया इति भावेन मूलमाह ॥ एताश्चेति ॥ आद्यतृतीये विषयवाक्यसूचिते । द्वितीयातु नामोक्त्येति ध्येयम् ।

पाण्डुरङ्गि — वाक्यस्येति विरोधित्वोपपादनाय । वाक्यस्य ब्रह्मपरत्वविरोधिनी प्रमाणाश्रिताशङ्कातु इत्येकेत्यन्वयः । कीदृशी सेत्यतस्तामाह ॥ युक्त इत्यादिना ॥ एवं चात्र पूर्वाधिकरणवैषम्येण पूर्वपक्षोत्थानादनंतरसङ्गतिरुक्ता भवति । ननु श्रुतित्वबहुत्व-प्रयुक्तप्राबल्यापेक्षया निरवकाशसमुद्रस्थत्वादिलिङ्गस्य बाध्यत्वमित्यत आह ॥ अत एवेति ॥ निरवकाशत्वमात्रप्रयुक्तप्राबल्यापेक्षया श्रुतित्वबहुत्वप्रयुक्तप्राबल्यस्य प्रबलत्वादेवेत्यर्थः । ननु कथमेकस्यैवैकत्र श्रुतित्वेनान्यत्र बहुश्रुतित्वेनोदाहरणमन्यत्रादृष्टमत्रैव कथमङ्गीकार्य-मित्यतः किं पूर्वतन्त्रेन दृष्टमस्मिंस्तंत्रे वेति विकल्प्य क्रमेण दूषयति ॥ यथेत्यादिना ॥

(पाण्डुरङ्गि)

तत्प्रख्यं चान्यशास्त्रमित्यत्रेत्यर्थः ॥ शब्दान्तरपाद इति ॥ आधाराग्निहोत्रमरूपत्वादित्यत्र अग्निहोत्रं जुहोतीत्यस्य दध्ना जुहोतीत्यादिवाक्यप्राप्तहोमसमुदायानुवादकत्वे तदपवादकत्वं सिद्धान्तितमिति भावः । अन्यत्र निरूढानामपीन्द्रादिशब्दानां विष्णुपरत्वं युक्तमित्यन्वयः । तत्र हेतुत्रयं मत्सीन्द्रमित्यादि ॥ विष्णुशब्दसामानाधिकरण्येनेन्द्रशब्दस्य विष्णुपरत्वमित्यत्र दृष्टान्तः श्येनादिशब्दानामिति ॥ यजिसामानाधिकरण्येन श्येनादिशब्दानां यागपरत्ववदित्यर्थः । अर्थान्तरावरुद्धानां तेषां कथं ब्रह्मपरत्वमित्यत आह ॥ अर्थान्तरावरुद्धेपीऽति ॥ तत्र दृष्टान्त उत्पत्तिशिष्टेति ॥ यागोत्पत्तिविधायके वाक्ये विहितं द्रव्यमुत्पत्तिशिष्टं द्रव्यम् । विशेषेति ॥ यो भूतानां नामधा इति विशेषश्रुत्यभावादित्यर्थः । विरोधात् हेयत्वाभावलक्षणविरोधात् । अत्र दृष्टान्तः आमिक्षावरुद्ध इति ॥ उपक्रमस्थत्वेनेति ॥ उपक्रमस्थत्वेन प्राबल्यं तूपक्रमाधिकरण एव निर्णीतमिति भावः । ननु पूर्वाधिकरण इन्द्रादिशब्दानां तत्तत्परत्व एकवाक्यताभङ्गवत् अत्राप्यनन्तादिशब्दानां विष्णुपरत्वे आकाशशब्दस्य प्रसिद्धपरत्वे एकवाक्यताभङ्गः स्यादित्यत आह ॥ इन्द्रेति ॥ ननु नैकवाक्यताभङ्गाभावः । अत्रापि विरुद्धार्थोपलम्भकस्यानन्तशब्दस्य सत्त्वादित्यत आह ॥ आकाशेति ॥ तर्ह्यनन्तत्वादिलिङ्गानां का गतिरित्यत आह ॥ प्रबलेति ॥ नन्वेतासां शंकानां भाष्यानुव्याख्यानटीकादावनुक्तत्वात्तद्विरोध इति तत्राह ॥ एताश्चेति ॥ तत्र द्वितीयशङ्काऽनुव्याख्याने सूचिता । प्रथमतृतीये तु भाष्यटीकायोरिति विवेकः ।

तात्पर्यचन्द्रिका

ननु च भूतप्रकरणाद्भूतकारणत्वलिङ्गाच्च भाष्ये भूताकाशस्य प्राप्तिरित्युक्तम् । अनुव्याख्याने च विवरत्वादिराकाशस्वभाव इत्युक्तम् । तत्कथम् । अवकाशरूपाव्याकृताकाशस्वभावत्वाद्विवरत्वस्येति चेन्न । ''प्राणेन सृष्टावंतरिक्षं च वायुश्च अन्तरिक्षं वा अनुचरन्ती''त्यादिश्रुत्या ''शब्दमात्रमभूत्तस्मान्नभः श्रोत्रं तु शब्दगम् । भूतानां छिद्रदातृत्व''मित्यादिस्मृत्या चाचार्यैः प्राणिसंचरणाद्यनुकूलत्वरूपं विवरत्वं भूताकाशस्य स्वभाव इत्यङ्गीकारेणाविरोधात् । एवं चाधिकाशङ्कया पूर्वपक्षोत्थानान्न पूर्वेण गतार्थता । यद्वा येन समुद्रान्तस्स्थत्वादिलिङ्गेन पूर्वत्र सिद्धान्तो न तेनैवात्रापि । किं त्वनन्तत्वादिलिङ्गान्तरैरैव । एवं चात्र पूर्वपक्षेऽतरधिकरणे भाष्योदाहृतश्रुत्यादिना समुद्रान्तस्स्थत्वादेर्विष्णुलिङ्गत्वनिश्च-

(तात्पर्यचन्द्रिका)

येऽप्यनन्तत्वादेस्तदनिश्चयादाकाशश्रुतिबलाच्चाकाशस्यैवानन्तत्वादिनिश्चयाद्यु-क्तोऽभ्यधिकाशङ्काभावेपि पूर्वपक्षोदयः । एवं ज्योतिरधिकरणादावपि पूर्वपक्षेऽन-न्तत्वादेर्विष्णुलिङ्गत्वनिश्चयेपि कर्णादिविदूरत्वादेस्तदनिश्चयाज्ज्योतिःश्रुत्यादिबलाच्चा-ग्न्यादेरेव कर्णादिविदूरत्वनिश्चयादभ्यधिकाशङ्काभावेपि पूर्वपक्षोदयः । अत एव तत्तदधिकरणसिद्धान्तभाष्येऽनन्तत्वकर्णादिविदूरत्वादीनां विष्णुलिङ्गत्वसमर्थनम् । अत एव च भाष्येऽभ्यधिकाशङ्कानुक्तिः । अनुव्याख्याने तदुक्तिस्त्वनन्तत्वादि-लिङ्गानां स्वतोवकाशराहित्यरूपं निरवकाशत्वमुपेत्य तदनुसारेणाकाशादिश्रुतीनां ब्रह्मण्यमुख्यत्वे प्रबलश्रुत्यनुसारेण दुर्बलस्यानन्तत्वादिलिङ्गस्यैवाकाशादावमुख्यत्वं स्यात् । सिद्धांत्यभिमतगुणपूर्त्यर्थसमन्वयश्च न सिद्धचेत् । श्रुतीनां ब्रह्मणि मुख्यत्वं तु न युक्तम् । प्रवृत्तिनिमित्तस्य तदधीनत्वादेरभावादिति पूर्वपक्षदार्ढ्याय स्वभाव-नियामकत्वरूपमहागुणलाभाय चेति द्रष्टव्यम् । तस्मान्न पूर्वेण गतार्थत्वम् । ''तदधीनत्वा''दित्यत्र सर्वस्येश्वराधीनतामङ्गीकृत्य तस्याः प्रवृत्तिनिमित्तत्वं नेति प्राप्तेऽस्तीति सिद्धान्तः ।

प्रकाशिका — एवं प्रमेयाश्रिताः प्रमाणाश्रिताश्चाभ्यधिकाशङ्काः प्रदर्श्य ''आकाश-शब्दस्यावकाशेऽपि रूढत्वा''दित्यादिटीकां विवृण्वन्पूर्वोत्तरप्रस्थानयोर्विरोधमाशङ्क्य समाधत्ते ॥ ननु चेति ॥ ''अस्य लोकस्य का गतिरित्याकाश इति होवाचेत्यत्र भूताका-शस्य प्राप्ति''रिति भाष्ये अस्य लोकस्येति पूर्ववाक्योदाहरणं तात्पर्यनिरूपणपरतया ''पृथिवीगतित्वोपपादनाय सर्वाणि हवा इमानी''त्यादिटीकया लब्धार्थानुवादो भूतप्रकर-णादित्यादि ॥ अनुचरन्तीत्युक्त्या विवरत्वं लब्धमिति भावः । श्रुत्या ऐतरेयश्रुत्येत्यर्थः।

तामसाच्च विकुर्वाणाद्भगवद्वीर्यचोदितात् ।
शब्दमात्रमभूत्तस्मान्नभश्श्रोत्रं तु शब्दगम् ।
अर्थाश्रयत्वं शब्दस्य द्रष्टुर्लिङ्गत्वमेव च ।
तन्मात्रत्वं च नभसो लक्षणं कवयो विदुः ।
भूतानां छिद्रदातृत्वं बहिरन्तर्दिगेव च ।
प्राणेन्द्रियात्मधिष्ण्यत्वं नभसो वृत्तिलक्षणम् ।

(प्रकाशिका)

इति तृतीयस्कन्धगतस्मृत्येत्यर्थः । अधिकाशङ्काप्रदर्शनस्य फलमाह ॥ एवं चेति ॥ एवमभ्यधिकाशङ्कया पूर्वपक्षोत्थितिमुक्त्वा इदानीं किं न एतेन यत्नेन विनैवाभ्यधिकाशङ्कां पूर्वपक्षोत्थितिसम्भवात् । अनुव्याख्याने तत्प्रदर्शनस्य दार्ढ्यार्थत्वेनोपपत्तेरिति भात्रेनाह ॥ यद्वेति ॥ अथवा अवश्यवक्तव्यशङ्काया अनुक्तत्वाद्भाष्यस्य न्यूनतेत्याशङ्क्य भाष्याभिप्रायं वक्तुं पक्षान्तरमाह ॥ यद्वेति ॥ अत एवेति ॥ विष्णुलिङ्गत्वानिश्चयादेवेत्यर्थः । अन्यथा तत्र स्यादिति भावः ॥ अत एवचेति ॥ अधिकाशङ्काभावेपि पूर्वपक्षोदयसम्भवादेवेत्यर्थः । इतरथा तदुक्तिरवश्यं स्यादिति भावः । तर्ह्यनुव्याख्याने तदुक्तिर्व्यर्थेत्यत आह ॥ अनुव्याख्यान इति ॥ लिङ्गानुसारेण श्रुतिर्ब्रह्मण्यमुख्यतया नीयते मुख्यतया वा । आद्य आह ॥ अमुख्यत्व इति ॥ प्रबलदुर्बलत्वे स्वभावकृते द्रष्टव्ये ॥ गुणपूर्त्यर्थेति ॥ मुख्यत्वे गुणालाभादिति भावः । द्वितीये त्वाह ॥ श्रुतीनामिति ॥ आकाशादिशब्दानामित्यर्थः । नन्वन्तरित्यनेन द्वेधाऽगतार्थत्वेऽप्यव्यक्ताधिकरणे ''तदधीनत्वादर्थव''दिति गुणसूत्रे दुःखित्वबद्धत्वावरत्वादेर्भगवत्यभावेन तत्तच्छब्दवाच्यत्वं नेति शङ्कायां प्रधानादिगतपरावरत्वादिधर्माणां भगवदधीनत्वादवरत्वादिवाचिशब्दजातमर्थवदिति वक्ष्यमाणतया तेन पौनरुक्त्यमित्यत आह ॥ तदधीनत्वादित्यत्रेति ॥ एतच्च वक्ष्याम इति भावः । तथाचैतदुपजीव्यत्वस्य प्रवृत्तेर्न तेनास्य पौनरुक्त्यमिति भावः । नन्वेवमपि तार्तीयेन पौनरुक्त्यं तत्राप्याकाशशब्दवाच्यत्वोक्तेः । न च तत्र ''आकाशो वै नाम नामरूपयो'' रिति वाक्यं विषयः । अत्र तु ''इहोवाचे''ति वाक्यमिति भेदः । तथात्वे शास्त्रापर्यवसानप्रसङ्गस्योक्तत्वात् । न च वाच्यं तत्राव्याकृताकाशमिति पूर्वपक्षः इह तु भूतमिति अतो भेद इति । निरवकाशलिङ्गेन प्रसिद्धिबाधस्योभयत्र साम्यात् ।

पाण्डुरङ्गि — नन्वत्राकाशः किं भूताकाशोऽव्याकृताकाशो वा । नाद्यः । अनुव्याख्यानविरोधापत्तेः । न द्वितीयः । भाष्यविरोधात् । तत्र भूताकाशस्य पूर्वपक्षितत्वादिति शङ्कते ॥ नन्विति ॥ अत्र भूताकाश इत्याद्यपक्ष एवास्तु । न चानुव्याख्यानविरोध इति वाच्यम् । प्राणिसंचरणाद्यनुकूलछिद्रदातृत्वरूपविवरत्वस्य भूताकाशस्वभावत्वाङ्गीकारेण विराधाभावात् । न चैतदप्रामाणिकम् । श्रुतिस्मृत्योः सत्त्वादित्याह ॥ प्राणेनेति ॥ नन्वेवमभ्यधिकाशङ्कया पूर्वपक्षकरणमयुक्तम् । अभ्यधिकाशङ्काया अनावश्यकत्वात् । अन्यथा भाष्येऽप्यभ्यधिकाशङ्काऽवश्यवक्तव्या स्यादित्यरुचेराह ॥ यद्वेति ॥ विष्णुलिङ्गत्वनिश्चयेपीति ॥ आकाशाधिकरणे भाष्योदाहृतश्रुत्यादिनेति शेषः । ननु

सर्वेषामपि लिङ्गानामानन्दमयाधिकरण एव विष्णुपरत्वस्य निर्णीतत्वात्कथमभ्यधिकाशङ्काभावे पूर्वपक्षोदय इत्यत आह ॥ अत एवेति ॥ अभ्यधिकाशङ्काभावेपि पूर्वपक्षोदयो यतोऽत एवेत्यर्थः । तर्ह्यनुव्याख्यानेऽभ्यधिकाशङ्कोक्तिः कुत इत्यत आह ॥ अनुव्याख्यान इति ॥ अनुव्याख्याने तदुक्तिस्तु पूर्वपक्षदार्ढ्याय स्वभावनियामकत्वरूपमहागुणलाभाय चेत्यन्वयः । तत्र पूर्वपक्षदार्ढ्यं विशदयति ॥ अनन्तत्वादीति ॥ तथापि निरवकाशत्वस्य श्रुतित्वप्रयुक्तप्राबल्यापेक्षया प्रबलत्वान्निरवकाशलिङ्गानुसारेणाकाशश्रुतेरेव ब्रह्मण्यमुख्यत्वमस्त्वित्यत आह ॥ सिद्धांत्यभिमतेति ॥ सूत्रान्तरेणापि वैषम्यदर्शनपूर्वकं गतार्थत्वं परिहरति ॥ तदधीनत्वादित्यत्रेत्यादिना ॥ अचेतनस्वभावस्येशाधीनत्वमित्येतदधिकरणसिद्धान्तन्यायस्य तदधीनत्वादित्यत्राप्रतिपादनान्न पौनरुक्त्यमिति भावः ।

तात्पर्यचन्द्रिका

आकाशोऽर्थान्तरत्वादित्यत्र त्वाकाशशब्दप्रवृत्तिनिमित्तस्य भगवदधीनतां ''आकाश इति होवाचे''त्यादावाकाशशब्दस्य विष्णुपरतां चाङ्गीकृत्य ''आकाशो वै नाम नामरूपयोर्निर्वहिते''त्यादौ वैनामेति प्रसिद्धिद्योतकनिपातबलात्प्रसिद्धाकाशार्थत्वे शङ्कते तन्निरासः । न चात्रापि ''सर्वाणि हवा इमानि भूतानी''ति हवैशब्दश्रवणात्प्रसिद्धार्थतेति शङ्क्यम् । तस्य भूतसन्निधानेन भूतेष्वेव प्रसिद्धिप्रतीतेः । ''कारणत्वेन चाकाशादि''ष्वित्यत्रापि पूर्ववदुभयमप्यङ्गीकृत्य ''आत्मन आकाशः सम्भूत'' इति सम्भूतत्वादिलिङ्गैर्भूताकाशपरत्वे शङ्कते तन्निरासः । इह त्वाकाशशब्दस्य भगवति मुख्यत्वार्थं प्रवृत्तिनिमित्तस्य भगवदधीनत्वमुच्यते । ततश्चैतदधिकरणाभावे क्वापि वाक्ये तस्य भगवति न मुख्यत्वं सिध्यति । ''न वियदश्रुते''रित्यत्र तु भूताकाशस्येश्वरादुत्पत्तिरेव वक्ष्यते । न तु तत्स्वभावस्येश्वराधीनत्वमिति न तैर्गतार्थता । अधिकाङ्कानिरासेन सिद्धान्तस्त्वित्थम् ।

चिद्गतस्येशतंत्रत्वे स्यादेवाचिद्गतस्य तत् ।
यतोऽत्यन्तपराधीनं चेतनादप्यचेतनम् ॥ १ ॥

अस्ति च राजा जयीति प्रयोग इव जडगतस्य मृत्त्वादेरभिमानिदेवताधीनत्वाद्देवतायां मृदब्रवीदित्यादिप्रयोगः । तस्माद्विवरत्वादिकमचेतनगतत्वान्नेश्वराधीनमिति मतं न युक्तम् । नापि स्वभावत्वात्तदनधीनत्वमिति मतं युक्तम् ।

(तात्पर्यचन्द्रिका)

अस्तु खं च्छिद्रमिति या हरीच्छा तद्वशान्नभः ।
छिद्रात्मकं हि संजातमन्यथा निबिडं भवेत् ॥ १ ॥

लोकेपि हि ॥

कुम्भस्वभावः कुम्भत्वं पुंतन्त्रं धर्मिणा सह ।
न शरावार्थयत्नेन कुम्भाकारोहि सिध्यति ॥ २ ॥
ययैव हि मृदा कुम्भः कुम्भकारेण निर्मितः ।
तयैव च मृदा कर्तुं शरावाद्यपि शक्यते ॥ ३ ॥

किन्तु कुम्भादौ कुलालाद्यसङ्कल्पितमपि बहु जायते । ईश्वरासङ्कल्पितं तु नाणुमात्रमपि जायत इति विशेषः । किं चोत्पत्त्यनन्तरमप्याकाशस्य विवरत्वं निह्नूयाविवरत्वं सम्पादयितुं शक्त ईश्वरः । तथेच्छाभावात्तु न सम्पादयति ।

औषधादिवशाल्लोके ताम्रादेरप्यताम्रताम् ।
कुर्वन्नीशस्तु नेष्टे किं छिद्रस्याच्छिद्रताकृतेः ॥ १ ॥

तस्मादन्यथाकरणाभावेप्यन्यथाकर्तुं शक्यत्वाद्यथेष्टविनियोगार्हतास्त्येव । बोधयन्ति च श्रुतिस्मृतयः स्वभावस्यापीश्वराधीनत्वम् ।

स्यन्दन्ते शासनान्नद्यो भीषास्मात्पवतेऽनिलः ।
नभो ददाति श्वसतां मार्गामित्यादिकाश्च ताः ॥ १ ॥

एवं च यथा नवमोक्तरीत्या ''स्रुवेण पार्वणौ होमा''वित्यत्र पर्वशब्दः प्रीयते दीयतेऽस्मिन्निति दर्शादिकाले यौगिको न तु रूढः तथा ''आकाशनमाकाश'' इति सुधोक्तरीत्या यौगिकाकाशशब्दप्रवृत्तिनिमित्तस्याकाशगतस्य विवरत्वरूपस्यावकाश-प्रदत्वस्य न केवलमीश्वरायत्तत्वात्तत्र तस्य महायोगः । किन्तु परिच्छिन्नादाकाशा-दप्यपरिच्छिन्ने ब्रह्मणि ''सर्वभूतगुणैर्युक्त''मित्यादिवचनात् तस्य निरवधिकत्वाद-पीति द्रष्टव्यम् । अत एवोक्तं सुधायां ''न हि देशकालाभ्यां परिच्छिन्नस्याव-काशदातृत्वं निरवधिक''मिति ''आकाशस्यावकाशदातृत्वस्येश्वरायत्तत्वमीश्वरस्यापि

पृथक् तद्वत्त्वं चे''ति च । एवं च यत्पूर्वपक्षिणाऽवकाशप्रदत्वस्याचेतनस्वभावत्वमुक्तं तदभिमानमात्रेण । सिद्धान्ते तस्येशतंत्रत्वसमर्थनं च स्वभावनियामकत्वरूप-महागुणसिद्ध्यर्थं जडमात्रस्वभावनिमित्तकशब्दान्तरसमन्वये न्यायः फलिष्यतीति प्रदर्शनार्थं च कृत्वाचिन्तया युक्तम् ।

यथा तृतीये ''इन्द्रपीतस्ये''ति मन्त्रस्य मैत्रावरुणादिशेषभक्षणे वस्तुत ऊहाभावेपि न्यायव्युत्पादनार्थमूहविशेषनिरूपणार्थान्यनेकान्यधिकरणानि कृत्वा-चिन्तया युक्तानि तद्वत् । असमन्तात्काशत इति वा आसमन्तात्कमश्नातीति वा ईश्वरे यौगिकत्वं तु भगवत्पादैरन्यत्रोक्तत्वात् पूर्वपक्ष्यभिमतरूढार्थमुखेनैव ब्रह्मणि वृत्तेस्तद्बाधोपि नेत्युक्तिदशायामनुपयोगाच्चेह नोक्तम् । अत एव विद्वद्रूढिरपि सिद्धा । वैदिकप्रयोगबाहुल्यात् । एवमुत्तराधिकरणेष्वपि विद्वद्रूढ्यादिकमुपपाद्यम् । तस्मादा-काशशब्दो ब्रह्मणि मुख्यः ।

प्रकाशिका — न्यायभेदमन्तरेण पूर्वपक्षप्रकारभेदमात्रेणाधिकरणभेदेऽतिप्रसङ्गाच्चेति भावेन न्यायभेदमाह ॥ आकाशोऽर्थान्तरत्वादीति ॥ विष्णुपरतां चेति ॥ अन्यथोभयत्र प्रसिद्धता न स्यादिति भावः ॥ निपातेति ॥ अत्र तु श्रुतिबलादिति भावः ॥ तन्निरास इति ॥ एतच्च तत्रैव स्पष्टीकरिष्यत इति भावः । ननु न्यायभेदोऽसिद्धः । अत्रापि तत्रेव निपातस्य सत्त्वादित्याशङ्क्य निराह ॥ न चेति ॥ भूतेष्विति ॥ यानि प्रसिद्धानि भूतानीत्यर्थोपपत्तेरित्यर्थः । तत्र त्वाकाशस्यैवाकाशो वैनामेति सन्निधानमिति भावः । नन्वेवमपि चतुर्थपादीयाधिकरणे विषयवाक्ये निपातस्याभावेन विषयादिभेदमात्रस्याधि-करणान्तरारम्भानापादकत्वेन च तत्राप्याकाशस्य भगवत्परत्वोक्तेस्तेन पौनरुक्त्यमित्यत आह ॥ कारणत्वेन चेति ॥ उभयमिति ॥ प्रवृत्तिनिमित्तस्य भगवदधीनत्वं इति होवाचेत्या-दावाकाशशब्दस्य विष्णुपरत्वं चेत्युभयमित्यर्थः ॥ तन्निरास इति ॥ परममुख्यवृत्त्येति शेषः। अपरमुख्यवृत्त्या भूतपरत्वस्याङ्गीकारादित्यर्थः । वक्ष्यमाणानां प्रमेयमुक्त्वा तद्वैलक्षण्य-ज्ञापनायैतत्प्रतिपाद्यमाह ॥ इहत्विति ॥ ततः किं सिद्धमित्यत आह ॥ ततश्चेति ॥ नन्वेवमपि द्वितीयाध्यायतृतीयपादाद्यधिकरणे आकाशस्य भगवदधीनत्वोक्तेरित्यत आह ॥ नवियदिति ॥ तैरिति ॥ तदधीनत्वादित्यादिभिरित्यर्थः । ननु तथाप्यंतर्याम्यधिकरणे ''य आकाशे तिष्ठ''न्नित्युपक्रम्य ''य आकाशमन्तरा यमयत्येष त आत्मान्तर्याम्यमृत'' इत्याकाशान्तर्यामित्वमुच्यते । अतस्तदधीनत्वं तत्र सिद्धम् । उक्तं चानुव्याख्याने -

(प्रकाशिका)

स्वात्मनाऽनियतं वस्तु प्रतीपं ह्यात्मनो भवेत् ।
स्वाधीनसत्ताशक्त्यादि कथमात्मप्रतीपकम् ॥

इतीति चेन्न । आकाशादेरधिदैवत्वेन भूतत्वाभावात् अत एव सूत्रेऽधिदैवादिष्वित्युक्तम् । तत्र सत्तादेरेव तदधीनत्वोक्त्या स्वभावस्य तदनुक्तेः । आकाशादेर्देवतात्वेन जडत्वाभावाच्च । आकाशशब्दसमन्वयानुक्तेश्चेति भावः । समन्वयसूत्रात्तत्त्वित्यनुवृत्तेराकाशो विष्णुरेवेति भाष्यप्रदर्शितसौत्रप्रतिज्ञाभागस्थावधारणेन विष्णौ महायोगविद्धद्रूढ्योस्सूचनात् शब्दनिमित्तस्वातन्त्र्यतद्गतत्वाभ्यां महायोगं विद्धद्रूढिं च वक्तुं ''आकाशस्य भगवदधीनत्वेन तत्रैव मुख्यत्वान्महायोगविद्धद्रूढ्योर्भावाच्चे''त्यादिटीकां विवृण्वानोऽचेतनस्थं प्रति स्वातन्त्र्यं तावदाह ॥ चिद्गतस्येत्यादिना ॥ यदा पूर्वत्रेन्द्रादिचेतनस्थैश्वर्यादेरीशाधीनतोक्ता तदा कैमुत्यन्यायेनाचेतनस्थस्य छिद्रत्वादेरीशाधीनता सिध्यति ॥ तस्य चेतनादपि पराधीनताया दर्शनादित्यर्थः । एतेनानधीनत्वेऽचेतनगतत्वमप्रयोजकमित्युक्तं भवति । यदप्युक्तं जयिशब्दवज्जडवाचिशब्दस्य स्वतन्त्रे प्रयोगादृष्टेरिति तदप्यसिद्धमित्याह ॥ अस्तिचेति ॥ चिद्गतस्येत्याद्यत्रत्यन्यायेन तुल्यन्यायतयाऽभिमान्यधीनत्वे सिद्धे तदधीनत्वादिति न्यायेनाभिमानिनि मृदादिशब्दं सिद्धं कृत्वा अभिमान्यधिकरणे मृदादिशब्देनाभिमानिदेवतोच्यत इति सूत्रकृता वक्ष्यमाणत्वादिति भावः । ''तस्योत्पत्तिमतोऽवकाशत्वसहितस्यैव परायत्तोत्पत्त्या तत्तोपपत्ते''रिति न्यायविवरणटीकां हृदि कृत्वा स्वभावं प्रत्यपि स्वातन्त्र्यमाह ॥ अस्तु खमिति ॥ हि यतोऽत इति पूर्वेणान्वयः । जनिमतस्स्वभावो जनकायत्त इत्येतल्लोकसिद्धमित्याह ॥ लोकेपि हीति ॥ हि यस्मात्तत्र सिध्यति अतः पुंतन्त्रमिति पूर्वेणान्वयः । ननु घटे कुलालानधीनविशेषवदीशानधीनं छिद्रत्वमस्त्विति प्रश्नोत्तरमाह ॥ किंत्विति ॥ एतेन स्वभावत्वमप्यनधीनत्वेऽप्रयोजकमित्युक्तम् । ''तादृशत्वाच्चतच्छक्ते''रिति गायत्रीनयानुव्याख्यानं हृदि कृत्वा यथेष्टविनियोगार्हत्वरूपं च तदधीनत्वमाह ॥ किञ्चेति ॥ अताम्रतां स्वर्णादिरूपताम् । अच्छिद्रताकृतेः निबिडीकरणस्य । ''अधीगर्थदयेशां कर्मणी''ति षष्ठी । अन्यथेश्वरत्वव्याघातादिति भावः ॥ स्यंदन्त इति ॥ अनेन ''एतस्य वाऽक्षरस्य प्रशासने गार्गि प्राच्यो नद्यस्स्यन्दन्ते । भीषाऽस्माद्वातः पवते । नभो ददाति श्वसतां मार्ग यन्नियमाददः । द्रव्यं कर्मच कालश्च स्वभावो जीव एवचे''त्यादिका इत्यर्थः । एतेन यदप्यचेतनगतत्वेन प्रसादानायत्तत्वात्स्वभावत्वेनानागन्तुकत्वान्नेशाधीनं विवरत्वमिति परम्परया हेतुत्वमिति मतं तदपि निरस्तम् । तथाविधस्याप्यधीनतायाश्श्रुत्यादिसिद्धत्वात् ।

यथेष्टविनियोगयोग्यत्वरूपाधीनत्वसम्भवाच्च । एतेन ''आकाशस्य भगवदधीनत्वा''दिति टीका त्रेधा व्याख्याता । आकाशस्य आकाशपदप्रवृत्तिनिमित्तस्येत्यर्थः प्रागेवोक्तः । एव विवरत्वादिकमीशाधीनमिति समर्थ्य विवरत्वादिकं नेशगतमचेतनगतत्वादिति यत्तृतीयं मत तदपि निराकुर्वन्नेवं सति लब्धार्थमाह ॥ एवं चेति ॥ न केवलमित्यादिनाऽन्वयः । नन् रूढपद्मत्वादिहेतुकस्य पङ्कजादिशब्दस्येवाकाशशब्दस्याकाशे रूढत्वात्तन्निमित्तस्य शब्दस्मवायित्वादेरन्यत्र रूढस्य कथं विष्णौ निरवधिकत्वमित्यतः ''भवेतां यदिवृक्षस्ये''त्युक्तन्यायेन भूतेऽपि यौगिक एवायं शब्द इति सदृष्टान्तमाह ॥ यथेति ॥

नवमे द्वितीयपादे ''पार्वणहोमयोस्त्वप्रवृत्तिस्समुदायार्थसंयोगात्तदभीज्याही''ति पञ्चविंशाधिकरणे दर्शपूर्णमासयोश्श्रुतं ''स्रुवेण पार्वणौ जुहोती''ति वाक्यमुदाहृत्य तद्धितश्रुत्या पर्वदैवत्यौ होमौ विकृतिष्वतिदिश्येते नवेति सन्दिह्य पर्वशब्दस्य काले मुख्यत्वात्तस्य चासंस्कार्यत्वेनासन्निपातार्थत्वादारादुपकारकाविमौ विकृतिष्वतिदिश्येते इति प्रापय्य पृणातेर्दानार्थधातोः पर्वशब्दो निष्पन्नः । स च प्रियते दीयतेऽस्मिन्नित्यधिकरणव्युत्पत्त्या काले मुख्यः । भावव्युत्पत्त्या तु कर्मण्यपि । तत्र प्रकरणात्सामवायिकत्वलाभाच्च कर्मवाचित्वमङ्गीकृत्य तत्संस्कारार्थौ होमावित्युपेयम् । तेषां च कर्मणां तन्त्रेणोक्तानामग्नीषोमयोरिव व्यासक्तं देवतात्वमिति समुदायस्य देवतात्वात्तस्य च विकृतिष्वनतिदेशाद्विकारत्वाच्च सौर्यादेर्न तत्र होमयोरतिदेश इति सिद्धान्तितम् । अत्र पर्वशब्दस्य पूर्वोत्तरपक्षयोर्मुख्यत्वाविशेषप्रदर्शनार्थं पृणातेरधिकरणव्युत्पत्त्या यौगिकत्वमङ्गीकृतं तथेहापि भूतेपि योग एव न तु रूढिः । लाघवादित्यर्थः । एतेन पूर्वपक्षिणा योगो न युक्त इति यदुक्तं तन्निरस्तं भवति ॥ तस्येति ॥ विवरत्वस्य । एवं योगान्महायोगस्य बलवत्त्वान्नात्र ग्रहणम् । नन्वेवं प्रवृत्तिहेतोरीशगतत्वेनैव महायोगोपपत्तौ तस्य पूर्वपक्षे भूतस्वभावत्वोक्तिः सिद्धान्ते यत्नेनेशाधीनतोक्तिश्च व्यर्थेत्यत आह ॥ एवं चेति ॥ कृत्वेति ॥ विवरत्वादिकमीशो नास्तीति कृत्वाचिन्तयेत्यर्थः ॥ यथेति ॥ तृतीये द्वितीयपादे एकादशाद्यधिकरणेषु चिन्तितं भक्षानुवाके श्रुतः ''इन्द्रपीतस्य नराशंसपीतस्य पितृपीतस्य मधुमत उपहूतस्योपहूतो भक्षयामी''ति मन्त्रः किमनैन्द्रप्रदानशेषभक्षणेन प्रयोज्य उत तेष्वप्यूहेन प्रयोज्यो यद्वा सर्वत्र यथासमाम्नात एव प्रयोक्तव्य इति संशये इन्द्रेण पीतो यस्मिन्निति बहुव्रीहेर्द्वयोः पदयोरन्यपरत्वेन दुर्बलत्वात्सवनविशेषणत्वायोगात् इन्द्रेण पीत इति तत्पुरुषस्योत्तरपदे स्वार्थलाभेनाभ्यर्हिततया सोमविशेषणत्वात्तस्यानैंद्रेष्वसामर्थ्यात्समानकर्मणि प्रकृतिविकारासम्भवेनोहा-

(प्रकाशिका)

भावादमन्त्रकं भक्षणमित्येकं पूर्वपक्षमुक्त्वा सत्यपि कर्मैक्ये प्रदानानां भिन्नतया प्रकृति-विकृतिभावसम्भवात् ''इन्द्राय त्वा वसुमते सोमं गृह्णामी''ति मानग्रहणमन्त्रवशात्सोम-स्याभिषवादेरैन्द्रप्रदानधर्मत्वादधर्मकाणामनैन्द्रप्रदानानां तद्विकृतित्वात्तत्र चोदकप्राप्तस्या-न्यमन्त्रस्योहेन प्रयोग इति द्वितीयं पक्षमुक्त्वा अधिकरणमसमाप्य कृत्वाचिन्तारूपेण षड्भिरधिकरणैरूहविषयं विचार्य मानग्रहणमन्त्रयोर्लिङ्गादैन्द्रप्रदानविषयत्वेप्युत्पत्तिवाक्ये श्रुतस्य सोमस्य सर्वाभ्याससाधारण्यात् समानविधानतया प्रकृतिविकृति- भावाभावान्नास्त्यूह इति द्वितीयं पक्षं निरस्य प्रथमपक्षावलंबेन पुनः कृत्वाचिन्तारूपेणाधिकरणद्वयमुपन्यस्य तत्पुरुषाश्रयणेच वसुमद्गणस्य ''सोमदेवत'' इत्यादि सम्बुध्यन्तेन सोमशब्देन त इति प्रत्यक्षविषयेण युष्मच्छब्देन निर्दिष्टस्य शिष्टस्य सोमावयवस्य विशेषणं स्यात् । तथाच हुताहुतसमुदायविषये इन्द्रपीतशब्देऽस्य लक्षणा स्यात् । अतो बहुव्रीह्याश्रयणेन सवनविशेष-णत्वादनैन्द्रेष्वपि यथाम्नातमन्त्रकं भक्षणमिति सिद्धान्त इति । इत्थं हि कृत्वाचिन्ताधिकरणं सवनमुखीमयेषु चमसेष्वैन्द्रेषु सर्वेषु हुतेषु ये होतृकनामकानां मैत्रावरुणब्राह्मणाच्छं-सिपोत्रादीनां चमसाः । तेष्वभक्षितेषु सशेषेष्वेव पुनस्सोममभ्युन्नीय देवतांतरेभ्यो मित्रावरुणादिभ्यो हुत्वा भक्ष्यते । तत्र किं पूर्वप्रकृतप्रधानदेवतेन्द्रोप्युपलक्षणीय इन्द्रमित्रा-वरुणपीतस्येति किं वा नेति विशये उन्नयनकाले देवतानिर्देशाभावात्प्रदानकाल एव तन्निर्देशात् पूर्वशेषस्याप्युन्नीतस्य च चमसस्थत्वेन देवतान्तर सम्बन्धात्पूर्वदेवताऽपेत सम्बन्धत्वान्नोपलक्षणीयेति प्राप्ते यद्यप्युन्नयनकाले न देवतासङ्कल्पः तथाप्युन्नयनं तावत्करिष्यमाणयागार्थमित्यसन्दिग्धम् । यश्च करिष्यमाणयागार्थस्तस्यैव तदीयदेव-तासम्बन्धो नान्यस्य । तस्मात्पूर्वशेषस्य स्वदेवतासम्बन्धानपायात्साप्युपलक्षणीयेति सिद्धान्त इति । तत्र बहुव्रीह्याश्रयणेन सवनविशेषणत्वान्मित्रावरुणप्रदानशेषभक्षणे मन्त्रस्य वस्तुत ऊहाभावेपि ऊहमुपेत्य प्रवृत्तान्यनेकान्यधिकरणानि यथायुक्तानि तथेत्यर्थः । एवं प्रसिद्धं विवरत्वादिकं प्रवृत्तिनिमित्तमीशगतं समर्थ्य कृत्स्नो योगस्समर्थितः । कल्प्योपि योगोऽन्यत्रोक्तोऽनुसन्धेयः । भूते रूढिरूपबाधकस्य त्याजितत्वादिति भावेन तस्य चानुक्तौ हेतुमाह ॥ आसमन्तादिति ॥ कं सुखमित्यर्थः ॥ अन्यत्रेति ॥ छान्दोग्यभाष्येऽष्टमाध्याये आद्यखण्डे ''आसमन्तात्काशनादाकाशः आसमन्तात्कमश्नातीति वे''त्युक्तत्वादित्यर्थः । हेत्वंतरमाह ॥ पूर्वपक्षीति ॥ रूढार्थेति ॥ प्रसिद्धप्रवृत्तिनिमित्तमुखेनेत्यर्थः । सन्यायरत्नावल्यां तदुक्तिस्तु सोप्यस्तीति दर्शयितुमिति भावः ॥ अत एवेति ॥

प्रसिद्धप्रवृत्तिनिमित्तेन वृत्तेर्भगवति साधितत्वादित्यर्थः । ''विद्धद्रूढिर्वैदिका स्यात्सा योगादेव लभ्यते'' इत्युक्तेरिति भावः ॥ वैदिकेति ॥ यावान्वाऽयमाकाशः । आकाशो वैनाम । योयं बहिर्धा पुरुषादाकाश'' इत्यादाविति भावः । एतेनाकाशे रूढस्य कथं योगमात्रेणापहारो दुर्बलत्वादिति निरस्तम् । महायोगस्य तन्निमित्तस्य प्राज्ञप्रयोगबाहुल्यरूपरूढेश्चोक्तत्वात्

प्रयोगहेतोर्बाहुल्यं ज्ञेयं परममुख्यता ।
तत्र प्रयोगबाहुल्यं ज्ञेयं तत्परता किमु ॥

इत्युक्तमहायोगरूढिलक्षणसत्त्वादिति भावः । एतेन ''महायोगविद्धद्रूढयोर्भावाच्चे''ति टीका विवृता ।

पाण्डुरङ्गि — तत्रादावचेतनगतत्वेन विवरत्वादेरीश्वरानधीनत्वं यदुक्तं तद्दूषयन् सिद्धान्तयति ॥ चिद्गतस्येति ॥ ननु भृत्यगतस्य जयस्य राजाधीनत्वेन राजा जयीति प्रयोगस्येवाचेतनगतप्रवृत्तिनिमित्तस्य चेतनानधीनत्वेन चेतने जडवाचिशब्दप्रयोगस्यादर्शनात् कथं तस्येश्वराधीनत्वमित्यत आह ॥ अस्तिचेति ॥ न च घटादिशब्दानां कुलालादौ प्रयोगापत्तिः । प्रयोगो नाम शक्तिश्चेदिष्टापत्तेः । अभिलाषश्चेदतिसहजबलवति पुरुषे सिंहशब्दाप्रयोगेण निमित्तस्यैव प्रयोगानुरोधित्वेन प्रयोगस्य निमित्तानुसारित्वनियमाभावात् । अन्यथाऽतिप्रसङ्गादिति भावः । ननु कुम्भादिस्वभावस्य कुलालाधीनत्वे आकाशादि-स्वभावस्येश्वराधीनत्वे च कुलालेश्वरयोः को विशेष इत्यत आह ॥ किं त्विति ॥ ननु विवरत्वस्येश्वराधीनत्वेन कदाचित्तदपगमेनाविवरत्वमपि स्यात् । अन्याधीनेऽन्यथाभावस्यापि कदाचिद्दर्शनादित्यत आह ॥ किंचेति ॥ ननु लोकेऽन्यस्य वस्तुनोऽन्यथाभावस्य कुत्राप्य-दर्शनात्कथमीश्वरस्यान्यथाकरणसामर्थ्यमित्यत आह ॥ औषधादीति ॥ अच्छिद्रताकृतेरिति अधीगर्थदयेशां कर्मणीति षष्ठी । इन्द्रादिशब्दप्रवृत्तिनिमित्तानामैश्वर्यादीनामिव विवरत्वादेः स्वभावत्वान्न ब्रह्माधीनत्वमिति परोक्तं बाधकं परिहरति ॥ बोधयंतिचेति ॥ अत्र स्यंदंत इत्यनेन एतस्य वाक्षरस्य प्रशासने गार्गि प्राच्यो नद्यः स्यन्दंत इति श्रुतेः नभ इत्यनेन स्मृतेर्ग्रहणमिति ज्ञातव्यम् । नन्वाकाशशब्दप्रवृत्तिनिमित्तस्य भगवदधीनत्वेनाकाशशब्दस्य भगवत्परत्वे रूढत्वमेवोक्तं स्यात् । तथाच योगाभावान्न गुणपूर्तिसिद्धिरित्यत आह ॥ एवं चेति ॥ नन्वेतस्य सुधादावनुक्तत्वात्तद्विरोध इत्यत आह ॥ अत एवेति ॥ नन्ववकाशप्रद-त्वस्येश्वरगतत्वे कथं तस्याकाशस्वभावत्वमित्यत आह ॥ एवं चेति ॥ तर्हि सिद्धान्ते

(पाण्डुरङ्गि)

ईशतंत्रत्वकथनमयुक्तमित्यत आह ॥ सिद्धान्त इति ॥ कृत्वाचिंतयेति ॥ योगो मास्तु केवलरूढ्यैवेष्टसिद्धिरिति कृत्वाचिन्तयेत्यर्थः । कृत्वाचिन्तयाधिकरणारम्भस्य क्वाप्यदर्शनादित्यत आह ॥ यथेति ॥ नन्वासंमतात्काशत इत्यादिरूपो योगः कुतो नोक्त इत्यत आह ॥ आसमन्तादिति ॥

तात्पर्यचन्द्रिका

अनन्तत्वादिलिङ्गानि तु निरवकाशानि ।

अन्तत्रयोज्झिते विष्णौ निरूढं लोकवेदयोः ।
अनन्तत्वं कथं तिष्ठेद्भूतेऽन्तत्रयसंयुते ॥ १ ॥

यद्यप्यव्याकृताकाशे गुणतोऽनन्तत्वाभावेपि देशकालाभ्यामानंत्ये अनन्तशब्दस्य नैघण्टुकी प्रसिद्धिश्चास्ति । तथापि पूर्वपक्ष्यभिमतेंऽतत्रयवति भूताकाशे ते अपि न स्तः । निरूढश्चांतत्रयहीने विष्णौ भाष्योक्तश्रुतितो लोकतश्च नामत्रयान्तर्गतोऽनन्तशब्दः । लोकप्रसिद्धिमाश्रित्यापि नाकाशश्रुत्या विष्णुलिङ्गं बाधार्हम् ।

द्वाभ्यामावृत्तिजातिभ्यामेव हि प्रबला श्रुतिः ।
अगतित्वपरत्वानेकत्वैर्लिङ्गानि तु त्रिभिः ॥ १ ॥

श्रुतिर्हि जात्याऽऽवृत्त्याच प्रबला । लिङ्गानि तु निरवकाशत्वचरमत्वानेकत्वैः । एवं च यदाच निरवकाशत्वप्रयुक्तमेव प्राबल्यं परनित्यांतरङ्गप्रतिपदविधिषु परबलीयस्त्वमित्युक्तत्वात् कांस्यभोजिन्यायेन सर्वप्राबल्यानां बाधकं तदा किमु वाच्यं चरमत्वादि- युतमिति । परोवरीयस्त्वादिविष्णुलिङ्गानां तु निरवकाशता भाष्य एवोक्ता । दृश्यते च घृतादौ निरूढानामप्याज्यादिशब्दानां मुखान्तरं विनैव ''आज्यैः स्तुवतः'' इत्यादौ तैस्तैर्हेतुभिः स्तोत्रादिनामधेयत्वम् । भूतकारणत्वादितु भूतलिङ्गं श्रुत्यन्तरानुसारेण विष्णावेव मुख्यम् । तस्मादाकाशादिशब्दवाच्यो विष्णुरिति ।

प्रकाशिका — एवं प्रमेयाश्रितां शब्दस्य भगवति मुख्यत्वविरोधिनीं शङ्कां प्रवृत्तिनिमित्तस्येशगतत्वेशाधीनत्वयोस्समर्थनपूर्वं मुख्यत्वप्रसाधनेनाभिमतन्यायं निरस्य इदानीं

प्रमाणाश्रितां वाक्यस्य तत्परत्वविरोधिनीं शङ्कां निरसितुं तल्लिङ्गादित्यनेनाभिमतं न्यायं विशदयन्नाह ॥ अनन्तत्वादीति ॥ अनन्तत्वं तावन्निरवकाशमित्याह ॥ अन्तत्रयेति ॥ देशकालगुणैरित्यर्थः । निरूढं प्रसिद्धम् । उत्तरार्धे भूतपदव्यावर्त्यं शङ्कापूर्वमाह ॥ यद्यपीति ॥ आनंत्ये स्त इति योज्यम् । एतेन ''नभोऽतरिक्षं गगनमनन्तं सुरवर्त्म ख''मिति नैघण्टुकीप्रसिद्धिरव्याकृतविषयाऽज्ञानमूला वेत्युक्तं भवति । पूर्वार्धं विशदयति ॥ निरूढश्चेति ॥ ''विष्णोर्नुकं वीर्याणी''त्यादि श्रुतित इत्यर्थः । लोकप्रसिद्धिः कथमित्यत आह ॥ लोकतश्च नामत्रयेति ॥ अच्युतानन्तगोविन्देति नामत्रयेत्यर्थः । निरूढ इत्यनुवर्तनीयः । निरवकाशत्वोक्तेः फलमाह ॥ लोकेति ॥ यदुक्तं श्रुतित्वबहुत्वोभयप्रयुक्तप्राबल्यस्य दुर्बलत्वादिति तदिदानीं निरस्यति ॥ द्वाभ्यामिति ॥ ''पूर्वान्तवत्स्वरस्सन्धा''वित्यादेर्नात्र यतिभङ्गः । श्लोकं व्याख्याति ॥ श्रुतिरिति ॥ यदाचेति ॥ प्राबल्यं बाधकमित्यन्वयः । तत्र शाब्दिकमीमांसकसंवादमाह ॥ परनित्येति ॥ उक्तत्वादिति ॥

परं विदुः पूर्वपरोपपत्तौ परस्य नित्यस्य च नित्यमेव ।
नित्यांतरङ्गोपगमेऽन्तरंगस्तथाविधात्प्रातिपदो बलीयान् ॥

इति वदद्भिर्वैयाकरणैरिति शेषः । परं पश्चात्तनं सूत्रं कार्यं वा । नित्यं नाम कृताकृतप्रसङ्गि । अन्तरङ्गं नामाल्पापेक्षम् । प्रतिपदिविधिर्नाम निरवकाशविधिः । यथाषष्ठेंऽगपादे ''आडजादीना''मिति सूत्रे वृत्तावेव परापेक्षया नित्यस्य बलवत्त्वमुक्तं ऐज्यंतेति यजतेः कर्मणि लङि कृते तिङादेशः प्राप्नोति । ''लुङ्लङ्लृङ्क्षु'' इत्यडागमश्च । तत्र विप्रतिषेधे परं कार्यमित्याडागमे प्राप्ते लकारमात्रापेक्षत्वेनांतरङ्गत्वाल्लादेशे सति ''सार्वधातुके य''गिति यक् प्राप्नोति । अडागमश्च । तत्र परत्वादटि प्राप्ते परमपि बाधित्वा कृताकृतप्रसङ्गित्वेन नित्यत्वाद्यगेव प्राप्नोति । तस्मिंश्च कृते पुनः परत्वादटिप्राप्ते ''वचिस्वपियजादीनां किती''ति सम्प्रसारणमेव नित्यत्वाद्भवति । तत आडागम इति । नित्यादप्यन्तरङ्गस्य बलवत्त्वं तु तत्रैव नित्यादप्याडागमाल्लादेशस्य पूर्वं प्राप्तत्वाद्द्रष्टव्यम् । ''अचिश्नुधातुभ्रुवां य्वोरियङुवङा''वित्यादौ श्रियौ श्रिय इत्यादिष्वन्तरङ्गत्वाद्यणादेशे प्राप्ते निरवकाशत्वेन इयङेव कृत इति परबलीयस्त्वं द्रष्टव्यम् ॥ कांस्यभोजीति ॥ द्वादशे द्वितीयपादे ''अधिकश्च गुणः साधारणेऽविरोधात्कांस्यभोजिवदमुख्येपी''त्युपांत्याधिकरणे चिन्तितं आग्रयणेष्ट्यां ऐन्द्राग्नवैश्वदेवद्यावापृथिव्यानि हवींष्यामातानि । तत्र द्यावापृथिव्यस्य

(प्रकाशिका)

वैश्वदेवस्य पर्वस्थद्यावापृथिव्यविकारत्वात्प्रसूनं बर्हिः प्राप्तम् । ऐन्द्राग्नादेस्तु प्रसूनमप्रसूनं वा बर्हिर्मात्रम् । तत्र समानतन्त्रेषु प्रसूनमप्रसूनं वोपादेयमुत प्रसूनमेवेति संशये मुख्यत्वाद्भूयस्त्वाच्चानियम एव युक्त इति प्राप्ते न ह्यनियमो नाम किञ्चिदङ्गं यदनुगृह्येत । बर्हिर्मात्रं त्वंगं तच्च प्रसूनोपादानेऽप्यविरुद्धमिति न कस्यचिद्वैगुण्यम् । अनियमे तु द्यावापृथिव्यस्य वैगुण्यं स्यात् । न चावैगुण्यस्य सम्भवे तद्युक्तम् । अतः प्रसूनमेवोपादेयमिति सिद्धान्त इति । प्रसूनपदेन पुष्पितं बर्हिरेवोच्यते । अत्रामुख्यद्यावापृथिव्यबर्हिषः प्रसूनस्योपादाने दृष्टान्तत्वेन कांस्यभोजिन्यायस्सूत्रितः । यथा शिष्यस्य कांस्यभोजनव्रतनियमो गुरोरनियमः । एकत्रोभयसमावेशे गुरुणा शिष्यानुरोधेन कांस्यपात्रमादर्तव्यमिति तन्न्यायेनेत्यर्थः ।

॥ चरमत्वेति ॥ एतेनोपक्रमस्थत्वेनाकाशशब्दस्य प्राबल्यमिति तृतीयशङ्कापि निरस्ता । ''प्रथमेऽश्रवणा''दित्यत्र चरमप्राबल्यस्य वक्ष्यमाणत्वादिति भावः । उत्तरलिङ्गानां परोवरीयस्त्वोद्गीथत्वादीनां निरवकाशता कुतो नोच्यत इत्यत आह ॥ परोवरीयस्त्वादीति ॥ ''परोमात्रया तन्वा वृधान । ॐमित्येतदक्षरमुद्गीथमुपासीते''त्यादिवचनेनेत्यर्थः । तल्लिङ्गादित्येकवचनं समुदायाभिप्रायेणेत्युक्तं भवति । एतेन ''श्रुत्या पूर्वपक्षितेपी''त्यादिटीका विवृता । एवं प्रमाणाश्रिताऽऽद्या शङ्का निराकृता । द्वितीयशङ्कायामपि श्रुत्यन्तरे विष्ण्वादिशब्दसामानाधिकरण्याभावेप्यत्रैवानन्तादिपदसामानाधिकरण्यात् ''आकाशो वै नामे''त्यादौ वक्ष्यमाणब्रह्मपदसामानाधिकरण्याच्च ''नामानि सर्वाणी''त्यादौ सङ्कोचे कारणाभावेन विशेषश्रुतिसद्भावादिति परिहारस्य स्पष्टत्वादाद्यहेतुद्वयं निरस्तं मत्वा अन्यत्र निरूढमुखाभावादित्युक्तहेतोः परिहारमाह ॥ दृश्यते चेति ॥ चित्राज्याधिकरणं प्रागुक्तम् । मुखान्तरं श्येनवन्निपत्यादानरूपक्रियादि- द्वारकं गौरत्वं विनैव तैस्तैः वाक्यभेदादिहेतुभिरित्यर्थः । ननु ''सर्वाणि हवा इमानि भूतानी''त्युक्तभूतकारणत्वविरोध इत्यत आह ॥ भूतेति ॥ सर्वाणि भूतानीत्याकाशादिसर्वभूतकारणत्वमुच्यमानं ''आत्मन आकाशस्सम्भूत'' इति श्रुत्यन्तरानुरोधेनाकाशशब्दितविष्णोरेव मुख्यम् । अन्यथा सङ्कोचस्स्यादिति भावः । एतेन ''न च भूतकारणत्वोक्तिविरोध'' इत्यादिटीका विवृता । यदपि यद्वा येनेत्यादिनाऽभ्यधिकाशङ्कां विना पूर्वपक्षान्तरकरणं तदपि लिङ्गानां वैष्णवत्वसमर्थनेन निरस्तम् । अभेदमतं त्वनेकमानविरुद्धमिति भावेनाकाशपदमुपलक्षणमित्यभिप्रेत्योपसंहरति ॥ तस्मादिति ॥

पाण्डुरङ्गि — एवमाकाशश्रुतेर्ब्रह्मणि मुख्यत्वमुपपाद्य यदुक्तं परेण प्रबलश्रुत्यनुसारेणानन्तत्वादिलिङ्गानि कथंचिद्भूताकाशे नेयानीति तद्दूषयति ॥ अनन्तत्वादीति ॥ नन्वेतावता निरवकाशत्वप्रयुक्तं प्राबल्यं यदि बहुत्वश्रुतित्वप्रयुक्तप्राबल्यापेक्षया दुर्बलं तदा पूर्वोक्तत्यागः यदि च प्रबलं तर्हि त्रितयोक्तिरनुपपन्नेत्यत आह ॥ एवं चेति ॥ यद्वा नन्वन्तरधिकरणन्यायस्यैवातिदेशात्परिहारे विशेषन्यायोक्तिरयुक्ता । तदभावे पूर्वोक्तदृढपूर्वपक्षस्योक्तरीत्या पूर्वन्यायेनापरिहारात्सिद्धान्तानुत्थानादतिदेशानुपपत्तिरित्यत आह ॥ एवं चेति ॥ परनित्यान्तरङ्गप्रतिपदविधिषु परबलीयस्त्वमित्युक्तत्वादिति ॥ यद्यप्यत्रातुल्यबलयोरेकत्र प्रसक्तौ न परेण पूर्वबाधः । यथा सुग्लः सुम्ल इत्यत्र श्याव्यधा इत्याकारान्तलक्षणं णप्रत्ययमनुपसर्गे सावकाशत्वादुर्बलं परमपि बाधित्वा ''आतश्चोपसर्ग'' इति पूर्वः कप्रत्यय एव भवति । तथापि तुल्यबलयोर्विरुद्धयोरेकत्र प्रसङ्गे परेण पूर्वस्य बाधः । यथा वृक्षाभ्यामित्यत्र ''सुपिचेति'' दीर्घत्वं सावकाशं वृक्षेष्वित्यत्र ''बहुवचने झल्येदित्ये'' तत्सावकाशं वृक्षेभ्य इत्यत्रोभयोः प्रसङ्गे परत्वेन दीर्घस्यैव बाधः । रन्धयतीत्यत्र ''रधिजभोरचीति'' नुमागमस्य ''अत उपधाया'' इत्युपधावृद्धौ कृतायामकृतायां वा प्राप्यमाणस्य कृताकृतप्रसङ्गी यो विधिः स नित्य इति नित्यत्वादुपधावृद्धेश्च नुमि कृते ''अलोंत्यात्पूर्व उपधेति'' नकारस्यैवोपधात्वेनाकारस्यानुपधात्वादप्राप्तेः अनित्यत्वात्पूर्वेणापि नित्येनानु माऽनित्यायाः परस्या अपि वृद्धेर्बाधः । तथा प्रजग्ध्येत्यत्र समासावयवभूतानेकपदाश्रयत्वाद्बहिरङ्गो ल्यप् जग्ध्यादेशे कृतेऽकृतेपि जायमानत्वान्नित्योपि ल्यप्यकृते कृते''प्यसिद्धं बहिरङ्गमन्तरङ्ग'' इत्यसिद्धेः प्राप्तेर्नित्यमप्यन्तरङ्गं जग्ध्यादेशं बाधते । नित्यस्य सर्वथा बाधासम्भवात्प्रथमतः स्वारस्येन प्राप्तस्य जघन्यतया स्वाधीनतासम्पादनादिनाऽस्वारस्यमेव बाध इति नित्यस्यापि नित्येन बाधे उदाहरणम् । अशिश्रयत् अदुद्रवत् । इत्यत्रान्तर्भूतचङपेक्षत्वादियङुवङावन्तरङ्गौ बहिर्भूततिबपेक्षत्वाद्बहिरङ्गं लघूपधलक्षणं गुणं बाधेते । न चात्र चङा व्यवधानेन गुणप्राप्तेरेवाभावात्कथं तद्बाधकत्वमियङुवङोरिति वाच्यम् । अप्राप्तेरेवात्र बाधत्वम् । उपचारात् । यद्वा शिवे हीत्यत्र धातूपसर्गकार्यत्वेनान्तरंगो गुणः उपसर्गपदान्तरकार्यत्वेन बहिरङ्गसवर्णदीर्घं बाधते । अश्नुवन्तीत्यत्र प्राप्तं ''इको यणचीति'' यणं ''अचिश्नुधात्विति'' श्नुप्रत्ययरूपप्रतिपदनिमित्त उवङादेशो बाधते । यथोक्तं पदमञ्जर्यां विप्रतिषेधसूत्रे -

(पाण्डुरङ्गि)

परं विदुः पूर्वपरोपपत्तौ परस्य नित्यस्य च नित्यमेव ।
नित्यान्तरङ्गोपगमेंतरङ्गं तस्माद्विधिः प्रातिपदो बलीयानिति ।

एतेषां निरवकाशेन प्रतिपदादिना सावकाशान्तरङ्गादेर्बाधान्निरवकाशत्वप्रयुक्त-प्राबल्यस्यांतरङ्गत्वादिस्वभावप्रयुक्तप्राबल्याद्बलवत्त्वमिति ज्ञायत इति भावः । स्वभावदुर्ब-लमपि निरवकाशं स्वभावप्रबलमपि सावकाशं बाधत इत्यत्र दृष्टान्तमाह ॥ कांस्यभो-जिन्यायेनेति ॥ कांस्यभोजिनयस्यायमर्थः । गुरुशिष्यावेकत्र स्तः । तत्र शिष्यस्य कांस्यपात्रेणैव भोजननियमः । गुरोरनियमः । तथाचैकं कांस्यपात्रम् । इतरत्रार्कपत्रामत्रम् । तत्र गुरोः पूज्यतया स्वारस्येन कांस्यपात्रं प्राप्तम् । इतरच्छिष्यस्य । प्रधानस्योप-सर्जनभूतशिष्यानुरोध्यत्वात् । तथाच सति शिष्यस्य नियमभङ्गेन भोजनमेव न स्यात् । तस्माद्गुणस्यात्यन्तबाधापेक्षया प्रधानस्वारस्यहानमात्रं युक्तमिति कांस्यपात्रं शिष्यस्यैवेति । तथाच स्वभावतो दुर्बलस्यापि शिष्यस्य निरवकाशत्वेन प्रबलत्वात्तेन स्वभावतः प्रबलस्यापि गुरोर्बाधवत् लिङ्गानां निरवकाशत्वेन तैः स्वभावप्रबलश्रुत्यादिबाधो युक्तः । ननु तथापीन्द्रादिशब्दानां विष्णुपरत्वेंऽतस्स्थत्वादिरूपनिरूढमुखान्तरवत् प्रकृतेऽपि निरूढ-मुखान्तराभावात्कथं तस्य ब्रह्मपरत्वमित्यत आह ॥ दृश्यते चेति ॥ तर्हि भूतलिङ्गस्य का गतिरित्यत आह ॥ भूतेति ॥

तात्पर्यचन्द्रिका

अत्रोभयेप्याहुः । ''आकाश इति होवाचे''त्याकाशे निरूढप्रथमानुपसञ्जात-विरोध्याकाशपदानुरोधेन बहून्यपि चरमाणि सर्वकारणत्वज्यायस्त्वानन्तत्वादीनि भूताकाशे कथंचिद्योज्यानीति प्राप्ते यद्यप्याकाशपदं सर्वाणीत्यादितः प्रथमं तथापि परिहारवाक्यस्थाकाशपदादपि प्रथमानुपसञ्जातविरोधिप्रश्नानुसारेण चरमस्योत्तरस्य नेयत्वादस्य लोकस्य का गतिरिति प्रश्नस्य च दृश्यमानसर्वप्रपञ्चविषयत्वात्सर्वलोक-गतिरेवाकाशपदेन प्रतिवक्तव्या । न च लोकान्तर्गतो भूताकाशः सर्वलोकगतिः । किञ्च सर्वलोककारणत्वादिबह्वनुग्रहार्थमेकमाकाशपदं जघन्यवृत्त्या ब्रह्मपरं ''त्यजेदेकं कुलस्यार्थ'' इति न्यायात् । तस्मात्सोपाधिकं ब्रह्मैवाकाशपदेनोपास्यत्वोनोप-क्षिप्तमिति सिद्धान्त इति । अत्र ब्रूमः । प्रथमानुसारेण चरमास्वारस्ये पूर्वाधिकरणेपि

प्रथमहिरण्यश्मश्रुत्वाद्यनुसारेण चरमं पापातीतत्वं जीवे कथंचिन्नेयं स्यात् । इहापि हि प्रश्नस्यानुरोध्यत्वे प्राथम्यमेव हेतुः । प्रश्नोत्तरयोरेकविषयत्वस्योत्तरानुसारेण प्रश्नव्याख्यानेपि सिद्धेः । किञ्च

प्रकृतां पृथिवीं वक्ति प्रश्नस्थं सर्वनाम यत् ।
तस्मात्तदनुरोधीचेत्समाधिश्च तथा भवेत् ॥ १ ॥

तथाहि । ''असौ लोक'' इत्यादिना दाल्भ्योक्तं स्वर्गलोकस्य सामाश्रयत्वं शालावत्यः ''अप्रतिष्ठितं वै किले''त्यादिना दूषयित्वा ''अयं लोक'' इत्यादिना पृथिवीलोकः सामाश्रय इत्यूचे । प्रवाहणस्तु तं ''अन्तवद्वै किले''त्यादिना दूषयत् । तर्ह्यस्य लोकस्य का गतिरिति शालावत्येन प्रकृतपृथिवीलोकगतिरेव पृष्टा न सर्वगतिः । अस्येति सर्वनाम्नः ''प्रास्मा अग्नि''मित्यादाविव प्रकृतपरत्वात् । तथाच प्रश्नानुसारेणोत्तरव्याख्याने ''सर्वाणि ह वा'' इत्यत्र सर्वशब्दः पृथिवीमात्रपरः स्यात् । न च पृथिवीकारणस्यापां प्रसिद्धत्वेन प्रश्नवैयर्थ्यम् । सर्वलोककारणस्यापि वाक्यान्तरतः प्रसिद्धेः । लोकतस्त्वपां पृथिवीकारणत्वस्याप्यप्रसिद्धेः । न च पृथिवीमात्रकारणप्रश्ने आप इति वक्तव्यत्वात्प्रतिवचने आकाशपदं सर्वाणीति सर्वपदमाकाशादेवेत्यवधारणं चायुक्तम् । तस्मात्प्रश्नोपि सर्वलोकगतिविषय इति वाच्यम् । भामत्यां ''प्रश्नानुरोधेनोत्तरव्याख्याना''दित्युक्तत्वेनोत्तरानुसारेण प्रश्नव्याख्यानेऽन्योन्याश्रयात् ।

प्रकाशिका — उत्तरस्येति ॥ आकाश इति होवाचेति परिहारस्येत्यर्थः । तथापि कथमुत्तरस्य ब्रह्मपरत्वमित्यत आह ॥ अस्य लोकस्येति ॥ अस्येति न पृथिवीमात्रपरामर्शः। किन्तु जन्माद्यस्येतिवत्प्रत्यक्षादिसिद्धस्य सर्वस्यास्येति परामर्शेन सर्वलोकगतिप्रश्ने तदनुरोधेनोत्तरे ब्रह्मैवाकाशपदवाच्यमित्यर्थः । ननु रूढ्या परिहारस्याकाशपरत्वात्तदनुसारेण प्रश्नो नेतव्य इत्यत आह ॥ किञ्चेति ॥ ''त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत् । ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजे''दिति भारतोक्तन्यायेनेत्यर्थः ॥ सोपाधिकमिति ॥ आकाशरूपोपाध्यवच्छिन्नमित्यर्थः । अत्र प्रश्नानुसारेण प्रतिवचनस्य नयने प्राथम्यं हेतुत्वेन विवक्षितं प्रश्नप्रतिवचनयोरेकविषयत्वं वा । आद्ये दोषमाह ॥ प्रथमेति ॥ द्वितीये त्वाह ॥

(प्रकाशिका)

प्रश्नेति ॥ यदपि प्रश्नस्य सर्वलोकगतिविषयत्वात्तदनुरोधेनोत्तरं नेयमिति तदपि नेत्याह ॥ किञ्चेति ॥ सर्वनाम अस्येति पदम् । यत् यस्मादित्यर्थः । तथा भवेत् पृथिवीवाचित्वेन भूताकाशपर एव भवेत् । पृथिव्याः प्रकृतत्वं विशदयन् श्लोकं व्याख्याति ॥ तथाहीति ॥ छान्दोग्ये आद्येऽध्याये ''त्रयो होद्गीथे कुशला बभूवुः शिलकश्शालावत्यश्चैकितायनेयो दाल्भ्यः प्रवाहणो जैबिलिरिति । ते होचुरुद्गीथे वै कुशलाः स्मः । हन्तोद्गीथे कथां वदाम इतीत्युपक्रम्योच्यते शालावत्येन का साम्नोगतिरित्यादिप्रश्ने कृते शालावत्यः अयं लोक इति असौ लोक इति दाल्भ्य उवाचेति'' । दाल्भ्येनोक्तमित्यर्थः । उपालब्धेन दाल्भ्येनामुष्य लोकस्य का गतिरिति प्रश्ने कृते शालावत्यः अयं लोक इति पृथिवीलोकस्सामाश्रय इत्युवाचेत्यर्थः ॥ ऊच इति ॥ ''ब्रूञ् व्यक्तायां वाची''त्यस्य ''ब्रुवो वचि''रिति वच्यादेशे रूपम् । तेनात्मनेपदं साधु । तं शालावत्यमपि । उपालब्धेन शालावत्येनेत्यर्थः । ननु पृथिव्याः प्रस्तुतत्वेप्यस्येत्येतत्सर्वपरं किं न स्यादित्यत आह ॥ अस्येतीति ॥ नवमाद्यपादे ''लिङ्गविशेष- निर्देशात्समानविधानेष्वप्राप्तिः सारस्वते स्त्रीत्वा''दिति पञ्चदशाधिकरणे चिन्तितं ज्योतिष्टोमे सवनीयाः पशवः श्रुताः ''आग्नेयमग्निष्टोम आलभेते ऐन्द्राग्नमुक्थ्ये द्वितीयं ऐन्द्रं षोडशिनि तृतीयं सारस्वतीं मेषीं चतुर्थीमतिरात्र'' इति । तत्र ''प्रास्मा अग्निं भरते''त्यध्रिगुवचनं मेष्यां भवत्युतनेति संशये प्रकरणाविशेषात्प्रास्मै पशव इति पशुत्वाभिप्रायेण स्त्रियामपि प्रास्मा इति पुल्लिङ्गोपपत्तेश्चात्राप्यस्त्यध्रिगुवचनमिति प्राप्ते प्रत्यक्षपशुशब्दाभावात्प्रास्मा इति पुल्लिङ्गस्य प्रत्यक्षस्थितपुंपशौ कृतार्थत्वान्नास्ति मेष्यामध्रिगुवचनमिति सिद्धान्त इति । तत्र यथा प्रास्मा इति शब्दस्य प्रकृताजादिपरत्वं तथात्रापीत्यर्थः । अस्येत्यस्य पृथिवीपरत्वे प्रश्नायोगमाशङ्क्य निरस्यति ॥ न चेति ॥ प्रसिद्धत्वं किं वेदादुत लोकतः । आद्य आह ॥ सर्वेति ॥ वाक्यान्तरत इति ॥ ''स इमाँल्लोकानसृजते''त्यादित इत्यर्थः । द्वितीय आह ॥ लोकत इति ॥ प्रश्नस्य पृथिवीगतिमात्रपरत्वे बाधकान्याशङ्क्य निरस्यति ॥ न चेति ॥ आप इतीति ॥ अद्भ्यः पृथिवीति वचनादिति भावः ॥ सर्वाणीति ॥ पृथिवीकारणमात्रात्सर्वोत्पत्तेरभावादन्यस्यापि जनकत्वेनावधारणस्याप्ययोग इति भावः । अन्योन्याश्रयादित्युपलक्षणम् । अपां पृथिवीगतित्वेपि मूलकारणत्वाभिप्रायेणाकाशोक्तिसम्भवात् । मूलकारणतोपपादनार्थमेव ''सर्वाणि ह वा'' इत्यादेरुपपत्तेः । सर्वपदस्य स्वव्यतिरिक्तसर्वपरत्वोपपत्तेः । न च तर्ह्यात्मन आकाश इत्यादेरात्मा वाच्य इति वाच्यं भूतविषयविचारे वियत एव वाच्यत्वात् । परंपरया भूतोपादानस्यापरस्याभावे नावधारणोपपत्तेश्चेत्यपि ध्येयम् ।

पाण्डुरङ्गि — ननु प्रश्नोप्याकाशपर एवास्त्वित्यत आह ॥ अस्येति ॥ प्रत्यक्षादिसिद्धस्येत्यर्थः । ननु प्रश्नोत्तरयोरेकविषयता प्रश्नानुसारेणोत्तरव्याख्यान इवोत्तरानुसारेण प्रश्नव्याख्याने सम्भवत्येवेति सन्देह एव स्यात् । न तु निश्चय इत्यरुचेराह ॥ किञ्चेति ॥ ननु प्रकृतपृथिवीलोकगतिरेव पृष्टेत्ययुक्तम् । तथासत्यस्येत्यनुपपन्नं स्यात् । एतच्छब्दस्य दृश्यमानसर्वप्रपञ्चविषयत्वादित्यत आह ॥ अस्येति ॥ सर्वशब्दः पृथिवीमात्रपरः स्यादिति ॥ पार्थिवकार्यबहुत्वाद्बहुवचनाद्युपपत्तेरिति भावः । प्रसिद्धत्वं किं श्रुतितः किं वा लोकतः । नाद्य इत्याह ॥ सर्वेति ॥ न द्वितीय इत्याह ॥ लोकत इति ॥ नन्वेवं प्रश्नस्य पृथिवीमात्रविषयत्वे परिहारवाक्यानुपपत्तिरित्याशङ्क्य निषेधति ॥ न चेति ॥ अन्योन्याश्रयादिति ॥ न च सर्वाणि ह वा इमानि भूतानीत्युत्तरवाक्यबलेन प्रश्नवाक्यं व्याख्याय तदनुरोधेनाकाश इति होवाचेति प्रतिवचनवाक्यं व्याख्यायत इति नान्योन्याश्रय इति वाच्यम् । अनुपसंजातविरोधिनः पूर्वस्य व्याख्यानायोत्तरानुसरणे उत्तरेण मध्यस्थस्याकाश इति होवाचेत्यस्यैव व्याख्याने लाघवात् । स्वन्यायविरोधापत्तेः ।

तात्पर्यचन्द्रिका

यच्चोक्तं ''त्यजेदेकं कुलस्यार्थ'' इति तन्न । आकाशश्रुतेः प्रधानत्वादप्रधानानेकलिङ्गबाधस्यापि ''आत्मार्थे पृथिवीं त्यजे''दिति न्यायसिद्धत्वात् । उक्तं हि षष्ठे प्रधानखदिराबाधाय तक्षणाद्यनेकगुणबाधेन तक्षणाद्ययोग्योपि पशुनियोजनयोग्यः खदिर एवोपादेयो न तु तक्षणादियोग्यः खदिरप्रतिनिधिः कदर इति । न हि त्वत्पक्षे ब्रह्मण्याकाशशब्दो मुख्यः । किञ्च–

कारणे कार्यगा यद्वत्तथा कार्येपि हेतुगाः ।
व्यपदेष्टुं हि शक्यन्ते धर्मा ऐक्याविशेषतः ॥ १ ॥

पूर्वाधिकरणे त्वत्पक्षे कार्यगतस्य हिरण्यश्मश्रुत्वादेः कारणे व्यपदेश इवेहकारणब्रह्मधर्माणां सर्वकारणत्वादीनां भूताकाशे व्यपदेशोस्तु । तयोरभेदाविशेषात् । किञ्च –

विशिष्टविषयत्वं चेदनंतत्वाद्यसम्भवः ।
विशुद्धविषयत्वं चेज्ज्यायस्त्वादेरसम्भवः ॥ १ ॥

(तात्पर्यचन्द्रिका)

न हि सोपाधिके परिच्छिन्ने ब्रह्मण्यनन्तत्वादिकम् । नापि निर्विशेषे ज्यायस्त्वादिकम् । न हि ज्यायस्त्वमपरिच्छिन्नत्वम् । अनन्त इत्यनेन पुनरुक्तेः । किन्तु परिमाणाधिक्यं गुणाधिक्यं वा । न च तन्निर्विशेषेस्ति । यद्यपि वस्तुतो निर्विशेषे आरोपितो विशेषो न विरुद्धः । तथापि त्वदुक्तः सविशेषनिर्विशेष-विद्ययोरधिकारिभेदः फलभेदो विद्याभेदेन पादभेदश्च न स्यात् । एवमुत्तराधिकरण-विषयवाक्येष्वपि सगुणनिर्गुणोभयलिङ्गयुक्तेषु दोष ऊह्यः । किञ्च सूत्रोक्तं लिङ्गं न तावद्ब्रह्मणि तत्वतोस्ति ।

यदि चारोपितं लिङ्गं तत्साध्याब्रह्मतापि हि ।
आरोपिता स्यादेवं च पूर्वपक्षः स्थिरो भवेत् ॥ १ ॥

तस्मान्मतान्तरमयुक्तम् ॥ टीकाक्षरार्थस्तु ॥ अस्ति शास्त्रादिसङ्गतिरिति ॥ अत्र ब्रह्मणीत्यनेन शास्त्रसङ्गतिः समन्वयेत्यनेनाध्यायसङ्गतिः अन्यत्र प्रसिद्धनाम्न इत्यनेन पादसङ्गतिः सूचिता । एवमुत्तरत्रापि द्रष्टव्यम् ॥ आकाशाधिकरणं सम्पूर्णम् ॥ ८ ॥

प्रकाशिका — उक्तं हीति ॥ षष्ठे तृतीयपादे ''द्रव्यसंस्कारविरोधे द्रव्यं तदर्थत्वा'' दित्येकोनविंशेऽधिकरणे चिन्तितम् । यदा पुनस्तनुत्वात्तक्षरादिसंस्काराणामयोग्यः खदिरो नियोजनमात्रयोग्यो लब्धः कदरस्तु महान्संस्कारयोग्यः तदा कस्योपादानमिति संशये खदिरोपादाने संस्काराणां बहूनां लोपः स्यात् । कदरोपादाने कृते तु तेषामनुग्रहः । खदिरशास्त्रमपि किञ्चिन्यूनं सम्पादितं भवति । अतस्तस्योपादानमिति प्राप्ते बहवोपि द्रव्यार्था एव संस्कारा इति न तद्धशेन द्रव्यपरित्यागो युक्तः । अतः प्रधानभूतः खदिर एवोपादातव्यः । तक्षणादीनि लुप्येरन्निति सिद्धान्त इति । तत्र प्रधानानुग्रहाद-प्रधानानेकबाधनमुक्तमित्यर्थः । नन्वाकाशशब्दो भूत इव ब्रह्मण्यपि मुख्य एव । अतो न ब्रह्मपक्षेपि मुख्यबाध इत्यत आह ॥ न हीति ॥ त्यजेदेकं कुलस्यार्थ इति न्यायेन बह्वनुग्रहायाकाशपदं बाध्यमित्यत्र दोषान्तरमाह ॥ किञ्च कारण इति ॥ तयोः उपादानोपादेयभावापन्नयोरित्यर्थः । इदं विषयवाक्यमद्वैतिमतेऽत्यन्तायुक्तमित्याह ॥ किञ्चेति ॥ श्लोकं व्याख्याति ॥ न हीति ॥ निर्विशेषे ज्यायस्त्वं नेत्युक्तमुपपादयति ॥ न हीति ॥

ननु वास्तवगुणाभावेपि निर्विशेषे कल्पितः परिमाणादिः स्यादित्याशङ्क्यातिप्रसङ्गमाह ॥ यद्यपीति ॥ अधिकारीति ॥ मन्दामन्दरूपाधिकारीत्यर्थः । निर्विशेषज्ञानमोक्षरूपफलभेद इत्यर्थः ॥ विद्येति ॥ सविशेषनिर्विशेषविद्येत्यर्थः । परमते सूत्रं चायुक्तमित्याह ॥ किञ्चेति ॥ एतेन यदत्र मूर्खप्रलपनं आकाशाद्वायुरित्यादिश्रुत्यन्तरे आकाशस्य सर्वभूतकारणत्वेनोक्तेरिति होवाचेत्यत्राप्याकाशो भूतमेवेति प्राप्ते सर्वकारणत्वात्तल्लिङ्गात्परमाकाशभिन्नश्शिव एवात्रोच्यत इति तदुक्तं ''आकाशस्याम्नानाच्छान्दोग्ये सर्वभूतकारणता । आम्नायबोधितेर्थेन च विमतिः कर्तुमुचिता नः । अस्तु स परमाकाशस्तदभेदस्त्वीश्वरोपि तद्धर्मी''त्यादि । तन्निरस्तम् । सर्वभूतकारणत्वस्य भूताकाश एव सावकाशितत्वात् । वैष्णवनामत्रयान्तर्गतानन्तशब्दसामानाधिकरण्यविरोधाच्च । ''ब्रह्मैव हि पृथिव्यात्मा विष्णुराकाशनामकः । आदीप्तत्वाद्बृहीयांश्च परमो हरिरेव ही''ति स्मृतिविरोधाच्च । भाष्यादावुदाहृतवचनविरोधाच्च । लिङ्गानां भाष्यादौ वैष्णवत्वसमर्थनाच्चेति । ''लोकतोऽन्यत्र प्रसिद्धाकाशनाम्नो ब्रह्मणि समन्वयप्रतिपादनादस्ति शास्त्रादिसङ्गति''रित्यत्र कथं सङ्गतित्रयलाभ इत्यत आह ॥ अत्रेति ॥ उपन्यासमुखेन शिष्टं विवृतमिति भावः ॥ आकाशाधिकरणं सम्पूर्णम् ॥ ८ ॥

पाण्डुरङ्गि — ननु प्रधानानुसारेणाप्रधानबाध इत्येतत्कोपलब्धमित्यत आह ॥ उक्तं हीति ॥ ननु दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यम् । दृष्टान्ते हि तल्लक्षणादियोग्यत्वरूपानेकलिङ्गैःखदिरप्रतिनिधिकदरग्रहणे खादिरो यूपो भवतीत्यादिना प्रधानत्वेन श्रुतखादिरादिबाधवत् प्रकृते कारणत्वादिलिङ्गैराकाशशब्दस्य ब्रह्मपरत्वेन प्रधानाबाधात् । प्रधानीभूताकाशश्रुतेर्ब्रह्मणि मुख्यत्वाभ्युपगमादित्यत आह ॥ न हि त्वत्पक्ष इति ॥ पादभेदश्च न स्यादिति ॥ द्वितीयतृतीयपादभेदश्च न स्यादित्यर्थः । नन्वारोपाविशेषेपि प्रातिस्विक्किशेषस्य व्यावहारिकविशेषाभावेन निर्विशेषत्वात्पादभेदादिकं युक्तमिति चेन्न । आरोपेऽवान्तरविशेषस्यैवाप्रामाणिकत्वात् । भावेपि वा पदार्थविनिमयस्यापि व्याख्यानसम्भवेनोक्तव्यवस्थायोगापरिहारात् ॥ शास्त्रादिसङ्गतिरितीति ॥ पूर्वाधिकरणद्वये लिङ्गविचारात्फलतः पादसङ्गतावपि मुख्यतस्तदभावादक्षरार्थकथनास्वारस्यादुपन्यासमुखेनैव व्याख्यातत्वाच्चात्र सङ्गतिटीकाक्षरानुक्तिरिति ज्ञेयम् ॥ एवमुत्तरत्रापीति ॥ उपलक्षणमेतत् । पूर्वत्रापीत्यपि द्रष्टव्यम् ॥ आकाशाधिकरणं सम्पूर्णम् ॥ ८ ॥

प्राणाधिकरणम्

॥ ॐ अत एव प्राणः ॐ ॥ अत्राध्यात्मिकप्राणादिशब्दसमन्वय उच्यते । अत्रापि प्राणशब्दप्रवृत्तिनिमित्तं जीवनादिहेतुत्वमन्वयव्यतिरेकाभ्यां प्राणशब्दार्थत्वेन प्रसिद्धस्य वायोरेवेति स एव प्राणशब्दवाच्यो न तु विष्णुरित्याद्यधिकाशङ्कानिरासेन पूर्वन्याय एवातिदिश्यत इत्यातिदेशिक्यवान्तरसङ्गतिः । भूताकाशस्य त्ववकाशहेतुत्वेऽन्वयव्यतिरेकौ न स्तः । परिच्छिन्नस्य तस्याभावेपि क्वचिदवकाशदर्शनात् । यद्यप्यत्र ''तद्वैत्वं प्राण'' इत्यत्र प्राणस्य विष्णोरन्यत्वे ''प्राणं देवा'' इत्यादावप्यन्यत्वं स्यादित्यपि प्रयोजनं वक्तुं शक्यं तथापि सूत्रे कण्ठोक्तानन्दमयत्वाक्षेपो दर्शनीय इति भाष्यादौ तदुक्तिः । अत एवानन्दमयोक्ताया विष्णोः प्राणताया इहाक्षेपान्न तेन गतार्थता । नापि प्राणशब्दस्योभयत्र प्रसिद्धता ।

प्रकाशिका — ॥ ॐ अत एवप्राणः ॐ ॥ ''आध्यात्मिकाशेषशब्दोपलक्षकप्राणशब्दवाच्यो हरि''रिति टीकां मनसि निधायाधिकरणोपाधिमाह ॥ अत्रेति ॥ प्राधान्यात्प्राणशब्दस्य सूत्रे मुखतः कीर्तनमिति भावः । अत्र भाष्यदिशाऽऽनन्दमयाधिकरणानन्तर्यप्रतीतेः ''अतिदेशो हि तादृश'' इत्यनुभाष्यदिशान्तरधिकरणेन सङ्गतिमाह ॥ अत्रापीति ॥ न केवलं पूर्वत्रेत्यपेरर्थः । जीवनादिहेतुत्वमन्वयव्यतिरेकाभ्यां वायोरेवेत्यन्वयः ॥ इत्यादीति ॥ प्रमाणाश्रितात्वित्यादिना वक्ष्यमाणदिशाऽऽदिशब्दः । तर्हि पूर्वानन्तर्ये को हेतुरित्यतः पूर्ववैषम्यमाह ॥ भूतेति ॥ न च भाष्यविरोध इत्याशङ्क्य तस्य तद्वैत्वं प्राण इति प्राणस्य विष्ण्वन्यत्वे महाभोगशब्दोक्तपूर्णानन्दत्वमपि तस्यैवेत्यानन्दमयोप्यन्यस्स्यादिति पूर्वाक्षेपेण सिद्धान्ते तत्समाधानेन प्रयोजनमात्रपरत्वेनोपपत्तेः । न च पूर्वब्रह्मशब्दादिना विष्णुनिष्ठतयाऽवधारितस्यानन्दमयत्वरूपपूर्णानन्दत्वस्यात्र प्राणे श्रवणात्प्राणो विष्णुरेवेति वैपरीत्यस्यापि सम्भवान्नेदं प्रयोजनं युक्तमिति वाच्यम् । टीकोक्तदिशा सावकाशेन लिङ्गमात्रेण निरवकाशप्राणश्रुतिबाधायोगात् । उक्तं च टीकायां ''न च महाभोगत्वं श्रुतिबाधकम् । श्रुतितो लिङ्गस्य दौर्बल्या''दिति । कथं तर्ह्यानन्दमये श्रुतस्य ब्रह्मशब्दादेर्बाध इति चेत् अत्रत्यपूर्वपक्षन्यायेनान्यत्रप्रसिद्धनिरवकाशप्राणश्रुतिसाहचर्येणानन्दमयत्वस्यान्यत्र प्रसिद्धत्वापत्त्या तद्बलेन ब्रह्मशब्दादेर्मुख्यप्राण एव कथंचित्सावकाशत्वादिति भावः । भाष्योक्तं फलं प्रकारान्तरेणाक्षिप्य समाधत्ते ॥ यद्यपीति ॥

(प्रकाशिका)

नन्वेवमयं प्राणोन्यश्चेत् ''प्राणं देवा अनुप्राणन्ती''त्युक्तोप्यन्यस्स्यादिति साक्षात्प्राणमयाक्षेपसमाधानेन साफल्यसम्भवे महाभोगत्वमुखेनाक्षेपस्तु वक्रो नाश्रयणीय इति शङ्कार्थः । न चात्र वक्ष्यमाणरीत्या प्राणश्रुतिबाहुल्यापादनासाहित्यादिरूपस्येव तत्र विशेषहेतोरभावान्न तदाक्षेप इति वाच्यम् । एकत्र निर्णीतस्यैवार्थस्य बाधकाभावे सर्वत्र ग्राह्यत्वात् । न च तत्र विष्णुपरत्वं बाधकम् । अद्याप्यसिद्धेः । न च तत्र मुक्तप्राप्यत्वादिब्रह्मलिङ्गमेव बाधकमिति वाच्यम् । अन्यत्र प्रसिद्ध्या ब्रह्मलिङ्गानामन्यथानयनस्यात्रेव तत्रापि तुल्यत्वादित्युक्तत्वात् ॥ कण्ठोक्तेति ॥ उपलक्षणमेतत् । महाभोगत्वमुखेनानाक्षेपे विष्णुधर्मतया निर्णीतेन महाभोगत्वेन विष्णुरेव प्राण इति शङ्का स्यात् । सा माभूत् । महाभोगत्वस्यापि वायुधर्मत्वादिति दर्शयितुमित्यपि ध्येयम् । एवं तर्हि प्राणत्वस्यानाक्षेपे गतार्थतादिरत आह ॥ अत एवेति ॥ प्राणतायाः को ह्येवान्यात्कः प्राण्यादित्युक्तायाः । अन्यथा तत्रैव विष्णोर्जीवनहेतुत्वरूपप्राणदत्वस्य सिद्धत्वादिह सिद्धांते तत्समर्थनं न स्यादिति भावः ॥ नापीति ॥ अत एवेत्यनुवर्तते । प्राणपदप्रवृत्तिनिमित्तस्य विष्णावाक्षेपेण प्राणपदस्य भगवति वृत्तेरसंमतेः । अन्यथा ''आकाशोर्थान्तरत्वादी''त्यत्र पूर्वपक्षे ''आकाश इति होवाचे'' त्यत्र विष्णोराकाशताया अनाक्षेपेणोभयत्र विष्णोराकाशतायाः प्रसिद्धिवदुभयत्र प्रसिद्धता स्यादिति भावः ।

पाण्डुरङ्गि — ॥ ॐ अत एवप्राणः ॐ ॥ अधिकरणोपाधिप्रदर्शनपूर्वकमधिकरणप्रतिपाद्यं दर्शयति ॥ अत्रेति ॥ ननु प्राणशब्दप्रवृत्तिनिमित्तस्य जीवनादिहेतुत्वस्यान्वयव्यतिरेकाभ्यां वायौ प्रसिद्धत्ववत् आकाशशब्दप्रवृत्तिनिमित्तस्यावकाशप्रदत्वस्यान्वयव्यतिरेकाभ्यां भूताकाशेपि प्रसिद्धत्वात्कथमियमभ्यधिकाशङ्केत्यत आह ॥ भूताकाशस्य त्विति ॥ परिच्छिन्नस्येति हेतुगर्भविशेषणम् । परिच्छिन्नत्वात्कचिद्भूताकाशव्यतिरेके वक्तव्ये तत्रैवावकाशदर्शनादिति भावः । नन्वानन्दमयाधिकरणे प्राणशब्दस्य भगवत्परत्वस्य प्रतिपादितत्वेनात्रापि तत्प्रतिपादने तेन गतार्थत्वं स्यात् । किं चाकाशस्तल्लिङ्गादित्यादिना इति होवाचेति वाक्ये आकाशशब्दस्य विष्णुपरत्वस्य प्रतिपादितत्वेन आकाशोर्थान्तरत्वादीत्यत्राकाशशब्दस्योभयत्र प्रसिद्धत्ववत् । आनन्दमयाधिकरणे प्राणशब्दस्य भगवत्परत्वेन समर्थितत्वादस्याप्युभयत्र प्रसिद्धत्वापत्त्या पादासङ्गतिश्च स्यादित्यत आह ॥ अत एवेति ॥ तस्यैव विवरणमानन्दमयोक्ताया इत्यादि ।

तात्पर्यचन्द्रिका

अत्र प्राणः किं मुख्यवायुरुत ब्रह्मेति चिन्ता । तदर्थं किं प्राणश्रुतिप्रसिद्ध्यनुसारेण श्रीपतित्वादिलिङ्गं बाध्यं किं वा विपरीतमिति । तदर्थं प्रसिद्धिबाधे किं श्रुतेर्मुख्यत्वहानिरुत नेति । तदर्थं प्राणशब्दप्रवृत्तिनिमित्तं जीवनहेतुत्वं किं ब्रह्मणि नास्त्युतास्तीति ॥ तदर्थं किं जीवनं मुख्यप्राणान्वयव्यतिरेकानुविधाय्युतेश्वरान्वयव्यतिरेकानुविधायीति । तथा "भर्ता सन्भ्रियमाण" इत्यनुवाकस्थेन "तद्वैत्वं प्राण" इति वाक्येनोक्तः प्राणः किं "अन्धः सम्भूत" इत्यनुवाकस्थेन "श्रीश्च ते लक्ष्मीश्च पत्न्या"विति वाक्येनोक्तादन्यः किं वानन्य इति। नन्वत्र प्राणो न तावज्जडरूपो वायुरिति पूर्वःपक्षः । जडं प्रति त्वं प्राणोऽभव इत्याद्युक्त्ययोगात् । "ओषधे त्रायस्वैन"मित्यादेश्च स्वमतेऽभिमानिदेवतापरत्वात् । मीमांसकमते चान्यपरत्वेनाचेतनसम्बोधनपरत्वाभावात् । नापि मुख्यप्राण इति । जीवनस्य तदन्वयव्यतिरेकानुविधानादर्शनेनाधिकाशङ्कायोगात् ।

प्रकाशिका — एवं सङ्गतिमुक्त्वा भाष्योक्तप्रयोजनटीकां च समर्थ्य विषयसंशयटीकां व्यनक्ति ॥ अत्रेति ॥ "तद्वैत्वं प्राणोऽभवः महान्भोगः प्रजापतेः भुजः करिष्यमाणः यद्देवान्प्राणयो नवे"ति तैत्तरीये श्रुतः प्राणो विषय इति ध्येयम् ॥ मुख्येति ॥ प्राणशब्दस्य वायुवृत्त्यादिसाधारणत्वेपि तस्यात्रासम्भवप्रकारस्य वक्ष्यमाणत्वान्मुख्यवायुरित्युक्तम् ॥ विपरीतमिति ॥ लिङ्गानुसारेण श्रुतिर्बाध्येत्यर्थः ॥ जीवनेति ॥ "यद्देवान्प्राणयोनवे"ति वाक्यशेषे तथोक्तेरिति भावः ॥ जीवनमिति ॥ जीवानामिति शेषः । यदि जीवनं मुख्यान्वयव्यतिरेकानुविधायि तदा प्राणशब्दप्रवृत्तिनिमित्तं ब्रह्मणि नेति मुख्यत्वहानेर्न श्रुतिबाधः कार्य इति वायुरेवेति पूर्वपक्षे फलम् । यदा तु विपरीतं तदा ब्रह्मेति सिद्धान्ते फलम् । इयं च चिन्तापरंपरा प्राणस्तत्त्विति सौत्रप्रतिज्ञांशव्यावर्त्यप्रमेयाश्रिताभ्यधिकाशङ्कोपयुक्ता । एषा शङ्काऽनुव्याख्याने कण्ठोक्तेति तदुपयुक्तचिन्तैव प्रथमं विशदीकृता । हेत्वंशव्यावर्त्यप्रमाणाश्रिताभ्यधिकाशङ्कोपयुक्तां चिन्तामाह ॥ तथेति ॥ तत्रैवं द्रष्टव्यम् । प्राणो मुख्यवायुरुत ब्रह्मेति चिन्ता । तदर्थं ब्रह्मत्वसाधकं लिङ्गादिकं नास्त्युतास्तीति । तदर्थं भर्ता सन्भ्रियमाण इत्युक्ता चिन्तेति । यदा त्वन्यस्तदा ब्रह्मलिङ्गमत्र नास्तीति साधकाभावाद्वायुरेवेति पूर्वपक्षे फलम् । यदा त्वनन्यस्तदा ब्रह्मलिङ्गसत्त्वाद्ब्रह्मेति सिद्धान्ते फलमिति ध्येयम् ।

अत्रैवं पूर्वपक्षक्रमः । प्राणपदस्य वायावेव प्रसिद्धेर्वायुरेव प्राणो न विष्णुरिति । यद्यपि निरवकाशलिङ्गैर्लोकप्रसिद्धिबाध इह पूर्वत्र चाविशिष्टः । विषयवाक्यभेदेन च नाधिकरणभेदः। तथापि ''अध्यात्ममन्वयव्यतिरेकतः । प्राणादिहेतुतादृष्टेरतिदेशो हि तादृश'' इत्यनुव्याख्यानोक्तरीत्या ''प्राणशब्दप्रवृत्तिनिमित्तस्य जीवनकारणत्वस्यान्वयव्यतिरेकाभ्यां वायावेव दर्शना''दिति टीकोक्ताभ्यधिकाशङ्क्या पूर्वपक्षोत्थानसम्भवो वाच्यः । स चायुक्तः । प्राणो जडवायुरिति वा मुख्यवायुदेवतेति वा पूर्वपक्षयितव्यत्वात् । तत्राद्यस्त्वयुक्तः । अंत्ये हेतोरसिद्धिरिति भावेन ''प्राणशब्दस्यान्यत्र वृत्तावपी''त्यादिटीकां विवृण्वन्नाक्षिपति ॥ नन्विति ॥ जडं प्रतीति ॥ चेतनं प्रतीव सम्बोधनादिरूपोक्त्ययोगादित्यर्थः । एतेन टीकायां मुख्यत्वोक्तिरुपलक्षणेति सूचितम् । ननु ''ओषधे त्रायस्वे''त्यादौ जडस्यापि सम्बोधनं दृश्यत इत्यत आह ॥ ओषध इति ॥ अन्यपरत्वेनेति ॥ ''अभिधानेऽर्थवाद'' इति मन्त्राधिकरणगुणसूत्रे यत्राचेतना ओषधिग्रावादयस्त्राणश्रवणार्थमामन्त्र्यंते किं पुनर्विद्वांसो ब्राह्मणा इति कर्मणि समुत्साहार्थमित्युक्तेरुत्साहपरत्वेनेत्यर्थः । एतेन न ह्यचेतनं प्रति त्वमेवमभव इति बुद्धिमतोच्यत इति सुधावाक्यं विवृतम् ॥ तदन्वयेति ॥ वायुविकारान्वयव्यतिरेकानुविधायित्वस्यैव जीवनादेः प्रतीयमानत्वेन मुख्यान्वयव्यतिरेकानुविधानादर्शनादित्यर्थः ।

पाण्डुरङ्गि — ननु जडं प्रत्यपि त्वमभव इत्यादि प्रयुज्यते । ओषधे त्रायस्वैनमित्यादौ तथा दर्शनादित्यत आह ॥ ओषध इति ॥ मीमांसकमते चान्यपरत्वेनेति ॥ अर्थवादे तथा शास्त्राधिकरणे अचेतनेऽर्थबन्धनादित्यस्मिन्सूत्रे ओषधे त्रायस्व शृणोत ग्रावाण इति च सम्बोधनं कार्यनियोगाभिमुख्यकरणार्थम् । न चाचेतनस्याभिमुख्यं सम्भवति । न च पशुत्राणे प्रातरनुवाकश्रवणे वाऽचेतनप्रेरणप्रवृत्तिरुपपद्यत इत्यानर्थक्यमर्थविवक्षायाम् । अतोऽदृष्टपरत्वेनाचेतनसम्बोधनपरत्वाभावादिति भावः । अथवा स्तुतिपरत्वेनाचेतनसम्बोधनपरत्वाभावादिति भावः । तथाचोक्तं वार्तिके एवमोषधे त्रायस्वेत्याद्यचेतनसम्बोधनानि स्तुतिपरत्वेन योज्यानि । यस्मिंश्चयन ओषधिरपि त्रायेत तत्र चयनकर्ता त्रायत इति किमु वाच्यम् । तथा ग्रावाणोपि प्रातरनुवाकं शृण्वंति किमुत विद्वांसो ब्राह्मणा इत्यामन्त्रणाभिप्रायः । यद्वा अभिधानेऽर्थवाद इति मन्त्राधिकरणगुणसूत्रोक्तरीत्या ओषधे त्रायस्वैनमित्यादेश्चैतन्यारोपेण क्रतुसाधनीभूतोपकरणविहितस्तुतिपरत्वेनेत्यर्थः ।

तात्पर्यचन्द्रिका

नन्वाकाशाधिकरणपूर्वपक्षे जडस्याप्याकाशस्य आनन्दमयत्वादिकमिवात्रापि जडस्याप्यभिमानिद्वारा सम्बोधनादि युक्तम् । न च मुख्ये मुख्यत्वात्प्राणशब्दस्य कथं जडपरत्वेन पूर्वपक्ष इति युक्तम् । लोकप्रसिद्ध्या पूर्वपक्षयतो ब्रह्मणीव मुख्येपि मुख्यत्वज्ञानाभावादिति चेन्न । ''मुख्यवायावेव मुख्यत्वा''दित्यादिपूर्वपक्षटीकया ''प्रेरकोऽस्यापि यद्धरि''रित्याद्यनुव्याख्यानेन च विरोधात् । त्वमभवः करिष्यमाणः प्राणय इत्यादीनां बहूनाममुख्यार्थत्वापाताच्चेति चेदुच्यते । प्रत्यक्षेण जीवनस्य मुख्यप्राणान्वयव्यतिरेकानुविधानाज्ञानेपि तत्प्राणे प्रपन्न उदतिष्ठत् तत्प्राण उत्क्रान्ते पद्यते'' त्यादिवाक्यात्तज्ज्ञानम् । न च ''प्राणस्तथानुगमा''दिति वक्ष्यमाणन्यायेन ''तत्प्राण'' इत्यत्र प्राणो विष्णुरिति युक्तम् । अत्रत्यसिद्धान्तन्यायेन प्राणशब्द-प्रवृत्तिनिमित्तं जीवनादिहेतुत्वं विष्णोरङ्गीकृत्य निरवकाशान्यलिङ्गेन तत्र पूर्व-पक्षोदयेन तद्विचारस्यैतत्सिद्धान्तानन्तरभावितयैतत्पूर्वपक्षदशायां तत्रत्यसिद्धान्ता-सिद्धेः । यथा ''आकाशोर्थान्तरे''त्यस्य ''आकाशस्तल्लिङ्गा''दित्येतत्सिद्धान्ता-नन्तरभावितया ''आकाशस्तल्लिङ्गा''दित्येतत्पूर्वपक्षदशायामाकाशोर्थान्तरेत्येतत्सि-द्धान्तासिद्धिः तद्वत् ।

प्रकाशिका — मन्दानां जडपरत्वेनापि पूर्वपक्षसम्भवभ्रममाशङ्क्य टीकादिविरोधेन निरस्यति ॥ नन्विति ॥ आनन्दमयत्वादिकमिति ॥ पूर्वत्र स्पष्टमेतत् । अस्यापि मुख्यप्राणस्यापीत्यर्थः । टीकादेरपि किं मूलमित्यत आह ॥ त्वमभव इति ॥ यदुक्तं जडरूपो वायुरिति वा मुख्य इति वा पूर्वपक्ष इति तत्र त्वदुक्तानुपपत्त्यैव जडायोगान्मुख्य एवेति ब्रूम इति भावेन तत्रोक्तं दोषं परिहर्तुमाह ॥ उच्यत इति ॥ ''प्राणशब्द-प्रवृत्तिनिमित्ते''त्यादिटीकां विवृण्वंस्तत्र ''यत्प्राप्ति''रिति स्मृत्युक्तिरुपलक्षणमिति भावेनाह ॥ तदिति ॥ ब्रह्मणश्शरीरमित्यर्थः । आदिपदेन ''यत्प्राप्तिर्यत्परित्याग उत्पत्तिर्मरणं तथे''त्यादि श्रेष्ठश्चेत्यत्र भाष्यस्थमत्र टीकोक्तं ग्राह्यम् । तत्प्राण इति वाक्यं विष्णुपरं न वायुपरमतोऽस्मादपि न जीवनहेतुत्वज्ञानं मुख्यस्येत्याक्षिपति ॥ न चेति ॥ वक्ष्यमाणेति ॥ तत्र हि ''ता वा एताश्शीर्षन् श्रियःश्रिता'' इत्यारभ्य बहुस्थलेषु श्रूयमाणः प्राणो विष्णुरन्यो वेति संशये प्राणसंवादादिलिङ्गान्मुख्यप्राणादिरन्य एवेति प्राप्ते ''तं देवाः

प्राणयन्ते''त्यादिना देवोपदेश्यत्वादिविष्णुलिङ्गानामस्मिन्प्रकरणेऽनुगमादनुवृत्तेरन्यप्रापकाणामन्तर्यामिणि सम्भवात्प्राणो विष्णुरिति वक्ष्यमाणन्यायेनेत्यर्थः । एतदुपजीवनेन तदधिकरणसिद्धान्तोत्थानादेतत्पूर्वपक्षदशायां तत्रत्यन्यायेनास्य वाक्यस्य न विष्णुपरत्वं शङ्कार्हमिति भावेन समाधत्ते ॥ अत्रत्येति ॥ सिद्धांतासिद्धेरिति ॥ अन्यथा स्वर्गकामाधिकरणसिद्धफलान्वयमुपेत्य किं भावार्थस्य फलकरणता किं वा नामार्थस्येति विचारात्मकभावार्थाधिकरणसिद्धान्तेन फलाभावरूपस्वर्गकामाधिकरणपूर्वपक्षानुदयस्स्यादिति भावः ॥ यथाऽऽकाशोर्थान्तरेत्यादि ॥ प्रागेव विस्तृतमेतत् ।

पाण्डुरङ्गि — अस्तु जडवायुरेव प्राण इति पूर्वपक्षः । न चैवं त्वमभव इत्याद्ययोग इति वाच्यम् । अभिमानिद्वारोपपत्तेरित्याशङ्कते ॥ नन्विति ॥ ननु टीकानुव्याख्यानयोरन्यथापि योजयितुं शक्यत्वान्न तद्विरोध इत्यत आह ॥ त्वमभव इति ॥

तात्पर्यचन्द्रिका

एतेन प्राणस्तथेत्यनेनास्य गतार्थत्वशङ्कापि निरस्ता । एतदभावे ब्रह्मणो जीवनहेतुत्वाभावेन तत्र प्राणशब्दस्य मुख्यत्वासिद्धेः । अत एव टीकायामन्वयव्यतिरेकयोः ''यत्प्राप्तिर्यत्परित्याग'' इति स्मृतिरेवोक्ता । यद्वा कुलालशरीरस्य घटं प्रतीव मुख्यप्राणशरीरभूतवायोर्जीवनं प्रत्यन्वयव्यतिरेकदर्शनमात्रेण तस्य तत्र हेतुत्वम् । अत एवोक्तं सुधायां ''वायुविकारशरीरत्वान्मुख्यस्ये''ति । ब्रह्मणस्तु सर्वगतत्वादशरीरत्वाच्च तस्य वा तच्छरीरस्य वा नास्मदादिशरीरेऽभाव इति न तव्यतिरेकाज्जीवनव्यतिरेकः । यद्यप्यंतर्यामीत्यत्रेशस्य गौणं यौगिकं वा शरीरमस्तीति वक्ष्यते । तथापि न जीवनव्यतिरेकस्य गौणादिशरीरव्यतिरेकानुविधानेन तत्कार्यत्वम् । अतिप्रसङ्गात् । भूमाधिकरणे तु सर्वगतस्यापीशस्यास्मदादिशरीरादुत्क्रमणमस्तीति च वक्ष्यते । न तु तत्राभावः । तस्मान्न विष्णोर्जीवनादिहेतुत्वमन्वयव्यतिरेककल्प्यम् । नापि श्रुतिसिद्धम् । अन्वयव्यतिरेकानुसारेण ''येन जातानि जीवन्ती''त्यादेर्मुख्यप्राणविषयत्वात् । ''इतरेण तु जीवन्ती''त्यादावितरशब्दस्तु वायुवृत्तिरूपप्रसिद्धप्राणेतरत्वविवक्षया मुख्यप्राणेऽपि युक्तः ।

प्रकाशिका — ॥ एतेनेति ॥ एतत्पूर्वपक्षदशायां तत्रत्यस्य प्राणस्य वायुपरत्व-कथनेनेत्यर्थः । अन्यथा तत्प्राण इति श्रुतेस्तत्रैव विष्णुपरत्वसिद्धौ विष्णोरेव श्रौतान्व-यव्यतिरेकाभ्यां जीवनहेतुत्वसिद्ध्या प्राणपदमुख्यार्थत्वसिद्धेरेतदनारम्भ एव स्यादिति भावः। तदेव व्यनक्ति ॥ एतदिति ॥ वाक्यात्तज्ज्ञानमित्युक्तपरिहारं टीकारूढं करोति ॥ अत एवेति ॥ प्रत्यक्षेण जीवनहेतुत्वस्य ज्ञानायोगादेवेति वा वचनगम्यत्वादेवेति वार्थः । टीकायां स्मृत्युदाहरणेपि वक्ष्यमाणप्राणनयेनागतार्थत्वादि द्योतयितुमस्माभिश्श्रुतिरुदाहृतेति हृदयम् । एवं टीकानुरोधेन जीवनहेतुत्वादेर्मुख्याधीनत्वं वाक्यसिद्धमित्युक्त्वा इदानीं सुधानुसारेण प्रत्यक्षेणैव सिद्धमित्याह ॥ यद्वेति ॥ यथा घटं प्रति कुलालशरीरस्यान्वयव्यति-रेकदर्शनमात्रेण कुलालात्मनो हेतुत्वं गम्यते तथेत्यर्थः ॥ वायोरिति ॥ जडभूतस्येत्यर्थः । तस्य मुख्यप्राणस्य । तत्र जीवने ॥ अत एवेति ॥ शरीरान्वयव्यतिरेकदर्शनमात्रेण तच्छरीरिणो हेतुत्वावगमादेवेत्यर्थः । एतेन टीकायामपि दर्शनादित्यस्य प्रत्यक्षेण दर्शनादित्यर्थः । स्मृत्युक्तिश्चाभ्युच्चयत्वेनेत्यपि सूचितम् । ननु ब्रह्मणोप्येवं किं न स्यादित्यतो ''वायावेव दर्शना''दिति टीकास्थावधारणव्यावर्त्यं विवृण्वन् तत्किं प्रत्यक्षादि-सिद्धाभ्यामन्वयव्यतिरेकाभ्यां जीवनहेतुत्वं विष्णोरुच्यतेऽथ श्रुत्येति विकल्पौ हृदि निधायाऽऽद्य आह ॥ ब्रह्मणस्त्विति ॥ सर्वगतत्वादिति ॥ ''स एवाधस्तात्स एवोपरिष्टात्। सर्वगतं सुसूक्ष्मं अशरीरः प्रज्ञात्मे''त्यादेरिति भावः ॥ अभाव इति ॥

नन्वक्षराधिकरणेऽणुत्वस्यापि वक्ष्यमाणत्वात्तद्व्यतिरेकोपि सम्भवतीति चेन्न । सर्वगतत्वासमानाधिकरणाणुत्वस्यैव व्यतिरेके प्रयोजकत्वादित्याशयात् । नन्वन्तर्याम्यधि-करणे ''यस्य पृथिवीशरीर''मित्यादिना सशरीरत्वं वक्ष्यते । तत्कथमशरीरत्वमित्याशङ्क्य निरस्यति ॥ यद्यपीति ॥ काण्वभाष्यरीत्याह ॥ गौणमिति ॥ सूत्रभाष्यरीत्याह ॥ यौगिकमिति ॥ नन्वथापि ''भूमा सम्प्रसादा''दित्यत्र ''उत्क्रान्तप्राणान् शूलेन समासं व्यतिषं दहे''दित्युत्क्रमणलिङ्गात्प्राणो वायुरिति प्राप्ते पूर्णसुखत्वलिङ्गादुत्क्रमणस्य च रूपविशेषेण विष्णावपि सम्भवाद्विष्णुरेव प्राण इत्युक्तन्यायेन विष्णोरप्यभावो युक्त इत्यत आह ॥ भूमेति ॥ यथा शरीरस्थस्यैव चक्षुषो ध्रुवादिमण्डलपर्यन्तं निर्गमनं तथा विष्णोरपि विचित्रशक्तिवशाद्रूपविशेषादिना देहे सत एव महत्त्वस्य शक्त्याऽणुत्वस्य व्यक्त्योत्क्रमणोप-पत्तेरिति भावः ॥ अन्वयेति ॥ प्रत्यक्षेणवाऽऽगमेन वा सिद्धाभ्यामन्वयव्यतिरेकाभ्यां कल्प्यं

न भवतीत्यर्थः । यद्यप्यत्र विष्णोर्व्यतिरेकमुपेत्यापि किमन्वयव्यतिरेकौ प्रत्यक्षगम्यावुतागमगम्यौ । आद्येपि किं साक्षादुत शरीरद्वारा । नाद्यः । अयोग्यत्वात् । न द्वितीयः । अशरीरत्वात् । नांत्यः । तत्प्राणे प्रपन्न इत्यादेरिव तद्बोधकागमस्याभावात् । भावे वा तस्य वायुपरत्वादित्यपि वक्तुं शक्यं भाति । तथाप्यस्य स्पष्टत्वादन्वयव्यतिरेकासिद्धत्वेपि श्रुत्या जीवनहेतुत्वं सिध्यतीत्यस्यावश्यापाकर्तव्यत्वाद्वास्तवाभिप्रायेण व्यतिरेकाभावेनैवान्वयव्यतिरेकाकल्प्यत्वमुक्तम् । एतेन ''प्राणादिहेतुता दृष्टे''रित्यत्र प्राणादिहेतुतायाः परमात्मन्यन्वयव्यतिरेकतोऽदृष्टेरदर्शनादित्यनुव्याख्यानयोजना सुधोक्ता व्यतिरेकायोगेनोपपादनीयेति स्पष्टीकृता । एवमदृष्टेरागमेनाप्यदर्शनादित्यर्थान्तरमप्यभिप्रेत्य द्वितीयपक्षमपि निषेधति ॥ नापीति ॥ मुख्यप्राणेति ॥ अन्यथा श्रुत्या प्रत्यक्षेण चोक्तान्वयव्यतिरेकानुपपत्तेरिति भावः । ननु च–

न प्राणेन नापानेन मर्त्यो जीवति कश्चन ।
इतरेण तु जीवंति यस्मिन्नेतावुपाश्रितौ ॥

इत्यत्र प्राणस्य जीवनहेतुत्वनिरासपूर्वं विष्णोरेव तदुक्तेस्तद्विरोध इत्यतः प्राणापानशब्दयोर्जडवायुपरत्वेनेतरशब्देन तद्भिन्नचेतनस्य वायोरेव ग्रहणादित्याह ॥ इतरेण त्विति ॥

पाण्डुरङ्गि — अत एव टीकायामिति ॥ प्रत्यक्षेणान्वयव्यतिरेकग्रहासम्भवेपि श्रुत्या तत्सम्भवस्य टीकाकृदभिप्रेतत्वादेवेत्यर्थः । टीकानुसारेण पूर्वपक्षमुक्त्वा सुधानुसारेण तमाह ॥ यद्वेति ॥ अतिप्रसङ्गादिति ॥ गृहादिरूपं यदेवदत्तस्य गौणं शरीरं तदविनाभूतं यत्किञ्चित्तस्य देवदत्तकार्यत्वप्रसङ्गादित्यर्थः । जडवायुरपि प्राणस्य गौणं शरीरम् । अभिमन्यमानत्वात् । तथाच गौणशरीरान्वयव्यतिरेकाभ्यां वायोर्जीवनादिहेतुत्ववत् अत्रापि पृथिव्यादिरूपगौणशरीरान्वयव्यतिरेकाभ्यां ब्रह्मणोपि जीवनादिहेतुत्वं किं न स्यादिति चेन्मैवम् । अत्र शरीरशब्दस्य मुख्यावच्छेदकशरीरपरत्वात् । मुख्यस्य त्वभिमन्यमानशरीरावच्छेदेनापि सुखोत्पादनात् । न चैवं प्रकृते गौणपृथिव्यादिशरीरावच्छेदेन सुखं वक्तुं युक्तम् । जन्यसुखस्य ब्रह्मणः प्रमाणबाधितत्वादिति भावः ।

तात्पर्यचन्द्रिका

केचित्तु ''अन्वयव्यतिरेकाभ्यां हि हेतुता कल्प्ये''ति सुधायाः प्रातीतिकार्थं गृहीत्वा हेतुताया अन्वयव्यतिरेकमात्रगम्यत्वान्न श्रुतिस्तत्र प्रमाणमिति पूर्वपक्ष्यभिप्राय इत्याहुः । तत्र यागादेः स्वर्गादावहेतुत्वापातात् । अन्येतु व्यतिरेकगर्भिताया हेतुतायास्तद्रहिते परमात्मन्ययोगान्न तस्य जीवनहेतुता श्रुत्यापि बोधयितुं शक्येति तदभिप्राय इत्याहुः । तदपि न । नित्यविभूनामहेतुत्वापत्तेः । तस्माज्जीवनादिहेतुत्वं न ब्रह्मगतम् । नाप्यन्यगतं तदधीनम् । जन्मादिसूत्रोक्तस्थितिहेतुताया असम्भवादिप्रसङ्गात् । तस्मान्मुख्यवायुरेव प्राण इति स एवानन्दमयः । तस्यान्तरधिकरणे पूर्वपक्षितेन्द्रादिवदानन्दवल्लभ्यामानन्दमयात् भेदव्यपदेशाभावेनाकाशाधिकरणे पूर्वपक्षिताकाशवच्च जडत्वाभावेन स्वत एवानन्दमयत्वसम्भवात् । तस्मात् ''अन्वयव्यतिरेकत'' इत्यनुव्याख्यानोक्ताधिकाशङ्का युक्ता । इयं च प्रमेयाश्रिता ।

प्रकाशिका — ननु नापि श्रुतिसिद्धमित्याशङ्कानिरासावयुक्तौ । ''अन्वयव्यतिरेकाभ्यां हि हेतुता कल्प्या । न च परमात्मनः प्राणशब्दप्रवृत्तिनिमित्तजीवनादिहेतुतावगमकान्वयव्यतिरेकौ पश्याम'' इति सुधाविरोधात् । तत्रान्वयव्यतिरेककल्प्यताया एव हेतुत्वस्य प्रतीतेरित्युत्तानदृशां भ्रममनूद्य निरस्यति । केचित्त्विति ॥ अन्वयव्यतिरेकमात्रेति ॥ प्रत्यक्षसिद्धान्वयव्यतिरेकेत्यर्थः ॥ तत्रेति ॥ अन्वयव्यतिरेकद्वारकहेतुतायाम् ॥ यागादेरिति ॥ तत्र प्रत्यक्षसिद्धान्वयव्यतिरेकयोरप्रसरादिति भावः । एतेन न च पश्याम इति सुधागतस्यागमेन न पश्यामः येन जीवन्तीत्यादेरपि मुख्यविषयत्वादित्यपि तात्पर्यमुक्तं भवति । एतेन ''अन्वयव्यतिरेकप्रमाणकत्वाद्धेतुहेतुमद्भावस्येति न्यायविवरणटीकापि क्वाचित्कत्वाशयेति दर्शितम् । नन्वस्त्वीश्वरहेतुत्वे श्रुतिप्रमाणशङ्का । तन्निरासस्तु न मुख्यप्राणविषयत्वमुपेत्य । किं त्वन्यथैवेति भ्रममनूद्य निरस्यति ॥ अन्ये त्विति ॥ तद्रहित इति ॥ नित्यविभुत्वादेशतः कालतो वा स नास्तीति भावः । नित्यविभूनां प्रकृत्यादीनाम् । ''प्राणशब्दप्रवृत्तिनिमित्तस्य वायावेवे''ति टीकास्थावधारणस्य स्वातन्त्र्यरूपस्यापि न विष्णावित्यर्थान्तरमप्युपेत्याह ॥ नापीति ॥ स्वातन्त्र्यस्यापि शब्दप्रवृत्तिहेतुत्वेन प्राणो विष्णुस्स्यादिति शङ्काभिप्रायः ॥ असम्भवादीति ॥ भगवति जीवनरूपस्थितिहेतुत्वस्याभावेनान्यत्र भावेन चासम्भवातिव्याप्ती स्यातामिति भावः । टीकोक्तमानन्दमयाक्षेपमनूद्य

समर्थयते ॥ स एवेति ॥ महाभोग इत्यानन्दमयत्वेनोक्तस्य प्राणस्य मुख्यत्वात्प्रागुक्तानन्दमयोपि स एव स्यादित्यर्थः । इन्द्रादिवत् इन्द्रादेरिव ॥ भेदव्यपदेशेति ॥ भेदव्यपदेशाच्चे''ति सूत्रभाष्योक्तदिशेति भावः । ''प्राणशब्दप्रवृत्ती''त्यादिटीकाया मूलं दर्शयन्नुपसंहरति ॥ तस्मादिति ॥ इयं चेति ॥ अनुव्याख्यानोक्ता प्राणपदप्रवृत्तिनिमित्ताश्रितेत्यर्थः ।

पाण्डुरङ्गि — तर्हिभूमाधिकरणे वक्ष्यमाणमुत्क्रमणमयुक्तं स्यादित्यत आह ॥ भूमेति ॥ ननु यतो वेत्यादिश्रुत्यैव ब्रह्मणो जीवनादिहेतुत्वमस्त्वित्यत आह ॥ नापीति ॥ असम्भवादिप्रसङ्गादिति ॥ जीवनादिहेतुत्वस्य ब्रह्मगतत्वाभावेनासम्भवः । जीवनादिहेतुत्वस्यान्यगतत्वेनातिव्याप्तिरित्यर्थः । ननु मुख्यप्राणस्यापि नानन्दमयत्वं युक्तम् । पूर्वत्र चात्रापि भेदव्यपदेशरूपबाधकसत्वादिति तत्राह ॥ तस्येति ॥

तात्पर्यचन्द्रिका

प्रमाणाश्रिता तु पूर्वत्राकाशश्रुतेरिवेह न श्रुतेरावृत्तिमात्रम् । किन्तु ''त्वं प्राणः देवान्प्राणयः मातरिश्वे''ति श्रुतिबहुत्वमस्तीति निरवकाशेनापि न बाध इत्येका । इयं च भाष्ये बहुश्रुतियुक्तविषयवाक्योदाहरणात्सूचिता । अन्यातु यदि प्राणशब्दस्य योगेन विष्णुपरता तर्हि लक्ष्म्यादिशब्दानामपि योगेन प्राणभार्यापरत्वसम्भवाल्लक्ष्मीपतित्वादिलिङ्गस्यैवासिद्धिः । अथ लक्ष्म्यादिशब्देषु न प्रसिद्धार्थत्यागः तर्हि प्राणशब्देपि तथा । इयं च ''प्रसिद्धेर्वायु''रिति भाष्ये सूचिता । इयं यद्यप्याकाशादिशब्दसाधारणी । आकाशश्रुतेः प्रसिद्धार्थहानावनंतत्वादिलिङ्गानामपि तद्धानिः स्यादिति शङ्कोदयात् । तथापि पूर्वाधिकरणेऽनुद्धृतेत्यधिकाशङ्का । अपरातु मुख्यवायौ मुख्यप्राणत्वप्रसिद्धेः ''मुख्ये मुख्यः प्रकीर्तित'' इति वचनाच्च प्राणशब्दस्य परमात्मनि मुख्यत्वायोगान्मुख्यसम्भवे चामुख्यग्रहणायोगान्नात्र प्राणशब्दः परमात्मपरः। आकाशशब्दस्य तु भूते मुख्यत्वेन प्रमाणमस्तीति । इयं च टीकायां मुख्यपदप्रयोगादिना सूचिता । इतरातु पूर्ववन्निरवकाशब्रह्मलिङ्गाभावान्न ब्रह्मपरतेति ।

प्रकाशिका — ''प्राणशब्दस्य तस्मिन्प्रसिद्धे''रित्यादिटीकायां श्रुतित्वनिरवकाशत्वाभ्यां लिङ्गात् श्रुतेः प्राबल्येन पूर्वपक्षोक्तिरुपलक्षणमिति मत्वाऽऽह ॥ आवृत्तीति ॥ प्राणः प्राणयः इत्यावृत्तिमात्रं नेत्यर्थः । ''त्वं भर्ता मातरिश्वा प्रजाना''मिति

(प्रकाशिका)

मातरिश्वश्रुतिर्ध्येया । निरवकाशेनापि श्रीपतित्वलिङ्गेनेत्यर्थः । अपीत्यभ्युपगमवादः । तदभावस्याग्रे स्पष्टत्वात् । नन्वियं शङ्का गायत्र्यधिकरणे क्रियते । यदाहुः ''कथं प्रसिद्धबहुलशब्दानामन्यथार्थते''तीति चेन्न । अनेकश्रुतिप्रसिद्ध्युपजीवनेन तत्र प्रवृत्तत्वात् । इह बहुत्वमात्रस्योपजीवनात् । यद्वा गायत्रीवाक्पृथिव्यादिश्रुतीनां भिन्नविषयत्वादिहैकविषयतद्बाहुल्यस्याभिप्रेतत्वात् । नन्वथापि पादान्त्यप्राणाधिकरणे तादृक्श्रुतिबाहुल्यशङ्काऽपाक्रियते । यदुक्तं ''बाहुल्यात् श्रुतिलिङ्गयो''रिति । सत्यम् । तत्र बहुश्रुतिगतनिरवकाशत्वोपजीवनेन पूर्वपक्षप्रवृत्तिरिह तु बहुत्वमात्रोपजीवनेन प्रवृत्तिरिति ध्येयम् । वक्ष्यते चैतत्तत्रैव ॥ योगेनेति ॥ लक्षदर्शन इति धातोर्लक्षयति सर्वमित्यादियोगेनेत्यर्थः ॥ भाष्ये सूचितेति ॥ ''भाष्येऽप्यस्य सर्वस्यापि स्वीकारार्थं प्रसिद्धेरित्याहे''ति सुधायां दिक्प्रदर्शनस्य कृतत्वादिति भावः ॥ अनुद्धृतेति ॥ इहैव सौत्रैवकारेण लिङ्गनिरवकाशत्ववाचिनोद्धियते । तथाचानेन रूपेण तदप्यत्रोदाहरणमित्युक्तं भवति ॥ वचनाच्चेति ॥

चेष्टायां बाह्यवायौ च मुख्यप्राणे च गीयते ।
प्राणशब्दस्त्रिषु ह्येषु मुख्ये मुख्यः प्रकीर्तितः ॥

इति वचनाच्चेत्यर्थः ॥ मुख्यत्वायोगादिति ॥ प्रसिद्धिवचनयोरभावादिति भावः । नन्वाकाशशब्दस्य भूते मुख्यस्यापि बाधः कथमित्यत आह ॥ आकाशेति ॥ उपलक्षणमेतत् । इन्द्रादिशब्दस्य तत्र मुख्ये मुख्य इत्यादिवदिन्द्राकाशादौ मुख्य इति वचनाभावात् । अत एव वचनाच्चेत्युक्तम् । आदिनेत्यादिपदेन प्रमाणकथनादिर्ग्राह्यः । पूर्ववत् आकाशाधिकरण इवेत्यर्थः ।

पाण्डुरङ्गि — यद्यपीति ॥ तथाच नेयमभ्यधिकाशङ्केति शेषः । ननु मुख्यवायौ प्राणत्वप्रसिद्ध्यादेरिव भूताकाशस्य घटाकाशत्वप्रसिद्धेः सत्वेन परमात्मनि मुख्यत्वायोगात् मुख्यसम्भवे चामुख्यग्रहणायोगादाकाशशब्दो न ब्रह्मपर इति पूर्वाधिकरणेऽपि शङ्कासम्भवात् कथमियमभ्यधिकाशङ्केत्यत आह ॥ आकाशशब्दस्येति ॥

तात्पर्यचन्द्रिका

न च श्रीपतित्वादिकं लिङ्गं निरवकाशमिति वाच्यम् । ''अभ्यः सम्भूत'' इत्यनुवाके ''श्रीश्च ते लक्ष्मीश्च पत्न्या''वित्युक्तस्य विष्णुत्वेपि ''भर्ता सन् म्रियमाण'' इत्यनुवाके ''तद्वैत्वं प्राण'' इत्युक्तस्य ''त्वं भर्ता मातरिश्वा प्रजाना''मिति

मातरिश्वश्रुत्या ''प्राणापानावजिरं संचरन्ता'' वित्यपानसाहित्यलिङ्गेन चाविष्णुत्वात् । इयमपि शङ्का ''न चात्र वाक्ये पूर्ववदनन्यथासिद्धं लिङ्गमस्ती''ति सुधाग्रन्थेऽत्रपदेन सूचिता । तस्माद्युक्ताधिकाशङ्का । तत्परिहारेण सिद्धान्तस्तु ।

वायुवृत्तिर्यथा मुख्यप्राणदेहस्तथैव सः ।
विष्णोर्देहस्ततस्तस्यैवान्वयव्यतिरेकिता ॥ १ ॥

वायुवृत्तिर्मुख्यप्राणस्येव सोपि हि ब्रह्मणो देहस्थानीयः । युक्तश्च भूमाधिकरण ईश्वरस्यास्मदादिशरीरादुत्क्रमणस्य वक्ष्यमाणत्वादजीवनदशायां रूपविशेषस्य व्यक्त्यात्मना तत्संयोगाभावाद्व्यतिरेकः । ''इतरेणे''ति श्रुताविवरशब्दो ब्रह्मपरः । पूर्वत्र ''मध्ये वामन''मिति वामनशब्दादुत्तरत्र च ''गुह्यं ब्रह्म सनातनमिति ब्रह्मशब्दात् । किञ्च मुख्यप्राणस्य जीवनादिहेतुत्वेपि तस्य भगवदधीनत्वेनापि तत्र प्राणशब्दो मुख्यः । लक्ष्म्यादिशब्दानां तु बहुत्वादन्यत्र प्रयोगाभावान्मुख्यार्थत्यागापातादन्यपरत्वे मानाभावाच्च नान्यत्र यौगिकता । प्राणशब्दस्य त्वेकत्वात् ''प्राणस्य प्राण'' इत्यादौ ब्रह्मणि प्रयोगात्तत्र परममुख्यत्वेन मुख्यार्थात्यागात् ''नामानि सर्वाणी''त्यादिमानसद्भावाच्च ब्रह्मपरता ।

आपेक्षिकाच्च मुख्यत्वाद्वायौ मुख्यपदं भवेत् ।
यथा पराक्षरपदं श्रीतत्वे मध्यमाक्षरे ॥ १ ॥

मुख्यप्राणोहि करणभूतचक्षुरादिप्राणापेक्षया मुख्यः । दृश्यते च मध्यमाक्षरेपि श्रीतत्वे ''तामक्षरं प्राहु''रित्यादौ परशब्दो जडप्रकृतिरूपाधमाक्षरात्परत्वात् । अत एव श्रुतिः ''प्राण एवाकरणस्तस्मान्मुख्यस्तस्मान्मुख्य'' इति । ''योयं मध्यमः प्राण'' इति च । अभ्य इत्याद्यनुवाकद्वयस्य भिन्नार्थत्वेपि ''अभ्य'' इत्यत्र श्रीपतित्वादेरिव ''भर्ता सन्''इत्यत्र ''तमेव मृत्युममृतं तमाहुस्तं भर्तारं तमु गोप्तारमाहुः। यस्तद्वेद यत आबभूव सन्धां च यां सन्दधे ब्रह्मणैष त'' इत्यादिब्रह्मलिङ्गानां सत्त्वात् । एतदेवाभिप्रेत्य भाष्यादौ ''इत्यादितल्लिङ्गा''दित्यादावादिशब्दः ।

प्रकाशिका — तत्र निरवकाशलिङ्गमाशङ्क्य तस्य भिन्नप्रकरणगतत्वेन परिहारमाह ॥ न चेति ॥ अत्र पदेनेति ॥ तदनेन ''नचात्र वाक्ये पूर्ववदनन्यथासिद्धं किमपीश्वरलिङ्गमस्ति । येन श्रुतिबाधं प्रत्येष्याम'' इति वाक्यं श्रीपतित्वादिलिङ्गं भिन्नप्रकरणगतं महाभोगत्वादिकं त्वन्यथासिद्धमित्याशयतया योज्यमित्युक्तं भवति । नन्वेतच्छंकानिरासकन्यायं सूत्रे नोपलभामह इत्याशङ्क्य च प्राणस्तत्त्विति प्रतिज्ञांशतात्पर्यं व्यञ्जयन्नादावनुव्याख्यानोक्तप्रमेयाश्रिताभ्यधिकाशङ्कयोर्मध्ये न विष्णोर्जीवनादिहेतुत्वमन्वय-व्यतिरेककल्प्यमिति यदुक्तं तच्छङ्कानिवर्तनप्रकारं सङ्गृह्णाति ॥ तत्परिहारेणेति ॥ ''प्राणगतजीवनादिकारणत्वस्यापि भगवदधीनत्वा''दिति टीका उपलक्षणम् । अत एव ''प्रेरकोऽस्यापी''त्यनुव्याख्यानं ''अस्यापि जीवनस्यापी''ति सुधायां व्याख्यातमिति भावः । देह इत्युक्त्या मुख्यदेहभ्रमं वारयन् व्याचष्टे ॥ वायुवृत्तिरिति । सोपि मुख्योपि । तथाच यथाप्राणशरीरभूतवायोर्जीवनं प्रत्यन्वयादिदर्शनमात्रेण मुख्यस्य तत्र हेतुत्वं तथा मुख्यस्यापि साक्षात्प्रयत्नाधिष्ठेयत्वेन विष्णुदेहत्वात्तदन्वयादिदर्शनमात्रेण तस्य तत्र हेतुत्वं भविष्यतीत्यर्थः । एतेनाशरीरत्वान्न तच्छरीरस्यास्मदादिशरीरे व्यतिरेक इति निरस्तम् । प्राणस्य तच्छरीरत्वेन व्यतिरेकसम्भवात् । यदप्यस्मदादिशरीरे तस्य सर्वगतत्वाद्व्यतिरेको नेति तन्निरस्यति ॥ युक्तश्चेति ॥ व्यक्त्यात्मनेति ॥ शक्त्यात्मना तत्संयोगस्य सत्त्वेन सर्वगतत्वोक्तिरिति भावः । विवरिष्यते चैतद्भूमादिनये । यदपि नापि श्रुतिसिद्धमित्यादि तच्च येन जीवंतीत्यादेर्ब्रह्मपरत्वं जन्मादिसूत्रे सिद्धमिति भावेन टीकोक्तकाठकश्रुतेर्ब्रह्मपरत्वं साधयति ॥ इतरेणेति ॥ वामनेति ॥ वक्ष्यते च वामनश्रुतेर्वैष्णवत्वं शब्दादेवेत्यत्र । प्राणगतस्येशाधीनत्वे साक्षितया टीकोक्ताऽपीतरेणेति श्रुतिस्तद्गतत्वेपि प्रमाणं भवतीति भावः । एवं जीवनहेतुत्वं प्राणपदप्रवृत्तिनिमित्तं भगवद्गतमिति समर्थ्येदानीं टीकोक्तरीत्याऽन्यगतं च भगवदधीनमेव ततश्च प्राणशब्दार्थो भगवानेवेत्यभिप्रेत्याह ॥ किं चेति ॥ न च प्रागुक्तासम्भवादिप्रसङ्गः । अनन्याधीनजीवनहेतुत्वस्य भगवन्मात्रगतत्वेनान्यगतत्वाभावात्तस्यैव लक्षणत्वेन जन्मादिसूत्रेऽभिप्रेतत्वादिति तात्पर्यात् । अत एव तद्गतत्वस्यापि समर्थनमकारि । टीकायां तु जन्मादिसूत्रादौ सिद्धत्वात्कण्ठतो नोक्तम् । एवं प्रमेयाश्रिताशङ्कां परिहृत्य यापि प्राणशब्दस्य योगेन विष्णुपरत्वे लक्ष्म्यादिशब्दानामपि प्राणभार्यापरत्वमिति प्रमाणाश्रिता तां तावत्सङ्गतत्वात्परिहरति ॥ लक्ष्म्यादीति ॥ लक्ष्मीश्रीह्रीशब्दानां सत्त्वादिति भावः । अन्यत्र प्राणभार्यायाम् । लोकत इति योज्यम् । तेन न रूढिरिति

भावः । ''शं रूपमाश्रिता वायुं श्रीरित्येव च कीर्तिते''त्यादिस्तु न प्रसिद्ध इति लक्ष्मीशब्दे तदभावाच्च । अत एव लक्ष्म्यादीत्युक्तम् । एकत्वादिति ॥ मात गतेर्वक्ष्यमाणत्वादिति भावः । इत्यादौ तलवकारे । ''प्राणादयो वाक्यशेषा प्राणस्य प्राणमित्यादौ वक्ष्यमाणप्राणप्राणदत्वादिलिङ्गसाम्याद्वैष्णवत्वमिति भावः । ॥ प्रवृत्तिनिमित्तपौष्कल्यादिति भावः । यापि मुख्यपदप्रयोगादिना सूचिता निराचष्टे ॥ आपेक्षिकाच्चेति ॥ श्लोकं व्याचष्टे ॥ मुख्यप्राणो हीति ॥ आपेक्षिव मुख्यत्वमित्यत उत्तरार्धं व्याचष्टे ॥ दृश्यते चेति ॥

अपरं त्वक्षरं या सा प्रकृतिर्जडरूपिका ।
श्रीःपरा प्रकृतिः प्रोक्ता चेतना विष्णुसंश्रया ।
तामक्षरं परं प्राहुः परतः परमक्षरम् ।
हरिमेवाखिलगुणमक्षरत्रयमीरितम् ॥

इत्यदृश्यत्वनयभाष्यस्थस्मृताविति्यर्थः । अत एव आपेक्षिकमुख्यत्वादेव ॥ श्रुति ''चक्षुरादिव''त्तिवत्यत्र भाष्योक्ता । तथाच न प्राणशब्दपरममुख्यार्थत्वं मुख्यप्र किंतु हरेरेव ।

अन्यव्यपेक्षया वायौ मुख्यवृत्तिर्विधीयते ।
तस्मात्प्राणादिशब्दाश्च विष्णावेव हि मुख्यतः ॥

इत्यैतरेयभाष्योक्तेरिति भावः । ''अयं वाव शिशुः योयं मध्यमः प्राणः'' इति रण्यकोक्त्या हरिरेवोत्तमप्राण इति लाभादिति भावः । यदपि श्रीपतित्वादेर्भिन्न गतत्वेन ब्रह्मलिङ्गाभावादिति चोद्यं तत्राभ्युपेत्य सन्निहितलिङ्गानि तावद्दर्शयति ॥ इत्यादीति ॥ मारकत्वामृतत्वभर्तृत्वगोप्तृत्वमुक्तिहेतुवेदनविषयत्वादिलिङ्गानामित्यर्थः

पाण्डुरङ्गि — यदुक्तं कुलालशरीरस्य घटं प्रतीव मुख्यप्राणशरीरभूतवा प्रत्यन्वयव्यतिरेकदर्शनमात्रेण तस्य तत्र हेतुत्वमिति तं पूर्वपक्षं निराकरोति ॥ व रित्यादिना ॥ अत्रोक्तं ब्रह्मणः सर्वगतत्वादशरीरत्वाच्च तस्य वा तच्छरीरस्य वाऽ शरीरेऽभावेन तद्व्यतिरेकेण जीवनव्यतिरेको न सम्भवतीति बाधकं परिहरति ॥ युक्त एवं विष्णोर्जीवनादिहेतुत्वमन्वयव्यतिरेकाभ्यामुपपाद्य श्रुत्याप्युपपादयति ॥ इतरेणेति

(पाण्डुरङ्गि)

कथमनया श्रुत्या ब्रह्मणो जीवनहेतुताग्रहः । तस्याः प्राणपरत्वात् । न च प्राणपरत्वे इतरशब्दानुपपत्तिः । वायुवृत्तिरूपप्रसिद्धप्राणेतरत्वविवक्षया प्राणेपि सम्भवादित्यत आह ॥ पूर्वत्रेति ॥ एवं प्रमेयाश्रितां शङ्कां निराकृत्याधुनाऽन्यात्वित्यादिनोक्तां प्रमाणाश्रितां शङ्कां निराकर्तुमाह ॥ किञ्चेति ॥ यदत्रोक्तं तर्हि लक्ष्म्यादिशब्दानामपि योगेन प्राणभार्यापरत्व-सम्भवाद्विष्णुलिङ्गस्यैवासिद्धेर्न प्राणशब्दस्य विष्णुपरत्वमिति तत्परिहरति ॥ लक्ष्म्यादि-शब्दानां त्विति ॥ ह्रीश्चते लक्ष्मीश्चेति पाठान्तरानुसारेण वा पत्न्याविति द्विवचनश्रुति-साहित्येन वा बहुत्वोपपत्तिः । प्राणशब्दे उक्तन्यायवैषम्यमाह ॥ प्राणशब्दस्य त्वेकत्वादिति ॥ अपरातु मुख्यवायौ मुख्यत्वप्रसिद्धेरित्यारभ्य नात्र प्राणशब्दः परमात्मपर इत्यन्तां शङ्कां निराकरोति ॥ आपेक्षिकाच्चेत्यादिना ॥ इतरातु पूर्ववन्निरवकाशलिङ्गाभावादि-त्यादिनोक्ताशङ्का न युक्ता । श्रीपतित्वादिरूपनिरवकाशलिङ्गसद्भावात् । यदत्रोक्तमध्यः सम्भूत इत्यनुवाके श्रीश्चते लक्ष्मीश्च पत्न्याविति युक्तस्य विष्णुत्वेपि भर्ता सन् म्रियमाणो बिभर्तीत्यनुवाके तद्वैत्वं प्राण इत्युक्तस्य मातरिश्वा प्रजानामित्यादिमातरिश्वादिश्रुतिसाहित्येन न विष्णुपरत्वमिति तदाशङ्क्य भिन्नार्थत्वेनाभ्युपेत्य समाधानं तावदाह ॥ अन्नद्य इत्याद्यनुवाकद्वयस्येति ॥

तात्पर्यचन्द्रिका

कथं चानुवाकद्वयं भिन्नार्थम् । ''श्रीश्च ते'' इति युष्मच्छब्देनोक्तस्य ''तद्वैत्वं प्राण'' इत्यत्रापि युष्मच्छब्देन प्रत्यभिज्ञानात् । मातरिश्वश्रुतिरप्यंतराधिकरणन्यायेन ''हरिं हरंतमनुयंति देवा'' इति हरिश्रुत्या हरंतमिति निरुपपदसंहर्तृत्वलिङ्गेन च ब्रह्मपरा । अपानसाहित्यं तु मुख्यप्राणेपि न स्वरसम् । तस्मात्प्राणो विष्णुरेवेति । यद्यपि तैत्तिरीयशाखायां ''ह्रीश्च त'' इति पाठः । तथापि भाष्ये शाखान्तरमाश्रित्य श्रीश्च त इति पठितमिति द्रष्टव्यम् ॥

प्रकाशिका — एकवाक्यतां साधयति ॥ कथं चेति ॥ मातरिश्वश्रुतिविरोध इत्यत आह ॥ मातरिश्वेति ॥ अन्तरिति ॥ तत्राधिदैवगतसर्वशब्दप्रवृत्तिनिमित्तस्य भगवति समर्थनादिति भावः । एतेन श्रुतिबहुत्वमस्तीति प्रथमपक्षोपि निरस्तो ध्येयः । ननु ''प्राणापानावजिर''मित्यपानसाहित्यरूपमुख्यप्राणलिङ्गविरोध इत्यत आह ॥ अपानेति ॥

न स्वरसमिति ॥ स्वस्य स्वेन साहित्यस्यायोगादिति भावः । भाष्योक्तश्रीपतित्व-लिङ्गमसिद्धमित्याशङ्क्याह ॥ यद्यपीति ॥

पाण्डुरङ्गि — वस्तुतस्तु तदेव नास्तीत्याह ॥ कथं चेति ॥ युष्मच्छब्देनेति ॥ ते इति युष्मच्छब्देनेत्यर्थः ॥ युष्मच्छब्देनेति ॥ त्वमित्यनेनेत्यर्थः । एवं विष्णुलिङ्गानां निरवकाशत्वमुपपाद्य परेण प्राणशब्दस्य विष्णुपरत्वे बाधकत्वेनोदाहृतं मातरिश्वश्रुत्यादिकं विष्णौ सावकाशमित्याह ॥ मातरिश्वश्रुतिरिति ॥ यत्किंचित्संहर्तृत्वस्य प्राणेपि सम्भवात्क-थमेतत्प्राणस्य विष्णुपरत्वसाधकमित्यत उक्तं निरुपपदेति ॥ ननु तर्हि प्राणापानावजिरं संचरन्तावित्यपानसाहित्यरूपलिङ्गं ब्रह्मपक्षे न स्वरसमित्यत आह ॥ अपानसाहित्यं त्विति ॥

तात्पर्यचन्द्रिका

अन्ये तु ''प्रस्तोतर्या देवताप्रस्ताव''मित्युपक्रम्य श्रूयते ''कतमा सा देवता । प्राण इति होवाच । सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशन्ती''ति । तत्र प्राणशब्दः प्रसिद्धप्राणपर इति प्राप्ते ब्रह्मपर एव । सर्वभूतसंवेशनादिब्रह्मलिङ्गादिति सिद्धान्तः । न चैवं पूर्वेणेदं गतार्थम् । ''यदा वै पुरुषः स्वपिति । प्राणं तर्हि वागप्येति । प्राणं चक्षु''रित्यादिश्रुतेः स्वापकाले प्रसिद्धप्राणे सर्वभूतसारेन्द्रिय-लयाद्युक्तिद्वारा सर्वभूतलयादिपरा या मानान्तरानुगृहीतत्वेन प्रबलत्वात् । ब्रह्मणि भूतलयादिबोधिकायाश्च ''यतो वा इमानी''त्यादिश्रुतेस्तदननुगृहीतत्वेन दुर्बलत्वात् । प्रस्तावबाक्यमपि प्रबलानुसारेण प्रसिद्धप्राणे सर्वभूतलयादिपरम् । न तु ब्रह्मणि सर्वभूतलयादिपरम् । यद्वा प्रबलस्वापबाक्यानुसारेण प्रस्तावबाक्यमपि प्रसिद्धे प्राण-इन्द्रियमात्रलयादिपरम् । आकाशाद्वायुरित्यादिबाक्यं तु न मानान्तरानुगृहीतमिति तदनुसारेण ''सर्वाणि भूतान्याकाशादेबे''ति बाक्यं न बाय्वादिमात्रकारण-भूताकाशपरमिति पूर्वस्मादधिकाशङ्कायां पुंबाक्ये मानान्तरानुग्रहतदभावाभ्यां प्राबल्यदौर्बल्ये स्तः । अपुंबाक्येऽनाशङ्कितदोषेन ताभ्यां ते स्त इति तन्निरासार्थ-त्वादस्येत्याहुः । तदुक्तं भामत्याम् ।

(तात्पर्यचन्द्रिका)

पुंवाक्यस्य बलीयस्त्वं मानान्तरसमागमात् ।
अपौरुषेयवाक्ये तत्सङ्गतिः किं करिष्यति । इति ।

प्रकाशिका — एवं स्वमतेऽधिकरणशरीरं समर्थ्य परोक्तं निरसितुमाह ॥ अन्ये त्विति ॥ कतमा सेति तच्छब्दपरामर्शविषयं दर्शयितुमित्युपक्रम्येत्युक्तम् । अभिसंविशन्ति । प्राणमभ्युज्जिहते सैषा देवताप्रस्थावमन्वायत्तेति छान्दोग्यप्रथमाध्यायगतप्राणशब्दो विषय इत्यर्थः ॥ प्रसिद्धेति ॥ वायुवृत्तिपरो ब्रह्मपरो वेति विषये प्राणशब्दस्य प्रसिद्धप्राणे रूढत्वेन प्रथमत्वेनानुपसंजातविरोधित्वेन च प्रबलत्वात् तदनुसारेण चरमस्योपसंजातविरोधित्वेन दुर्बलस्य सर्वभूतसंवेशनादेर्नेतव्यत्वाद्वायुवृत्तिरूपप्राणपर इति प्राप्ते प्राणशब्दादपि प्रथमत्वेनानुपसंजातविरोधिनः कतमा सा देवतेति प्रश्नस्य चेतनवाचिदेवतापदमहिम्ना ब्रह्म-विषयत्वात् प्रश्नानुसारेण परिहारस्य व्याख्येयत्वात् रूढ्या प्राणपरपरिहारानुरोधेन प्रश्नव्याख्याने च प्राणे सर्वभूतसंवेशनादिलिङ्गानुपपत्तेर्ब्रह्मपर एवेति सिद्धान्त इत्यर्थः । नन्वाकाशाधिकरण एवास्यार्थस्योक्तत्वान्नेदमारभ्यमित्याशङ्क्याधिकाशङ्क्याऽऽरम्भ इत्याह ॥ न चेति ॥ प्रस्तोतर्यादेवतेत्यादिप्रस्तावाक्यं स्वापवाक्यानुसारात्प्रसिद्ध- प्राणे भूतलयादिपरं यतो वेत्यादिकारणवाक्यानुसाराद्ब्रह्मणि वेति चिन्तायां ''यदा वै पुरुषस्स्वपिती'' त्यादिस्वापवाक्यानुसारात्प्राण एव । न च स्वापवाक्यं न प्रसिद्धप्राणपरमिति वाच्यम् । स्वापकाले प्राणवृत्तावपरिलुप्यमानायामिन्द्रियवृत्तीनां परिलुप्यमानत्वेन प्रबोधकाले प्रादुर्भाववत्त्वेन च प्रत्यक्षेणानुमानेन चासंवादात् । ननु स्वापवाक्यइन्द्रियाणां लय उच्यते प्रस्तावाक्ये भूतानामिति किं केन सङ्गतमिति चेन्न । भूतसारत्वादिन्द्रियाणां तद्द्वारा सर्वभूतलयप्रतिपादने तात्पर्यात् । न च ''यत्प्रयंत्यभिसंविशन्ती''ति ब्रह्मणि सर्वभूतलयप्रतिपादककारणवाक्यानुसारेण प्रस्तावाक्यं ब्रह्मणि सर्वभूतलयपरं किं नेति वाच्यम् । स्वापवाक्यस्य प्रत्यक्षादिमानान्तरसंवादित्वेन प्रबलत्वात् कारणवाक्यस्य ब्रह्मणि भूतलयस्य प्रत्यक्षाद्यसिद्धतया तद्रहितत्वेन दुर्बलत्वात् प्रस्तावाक्यं स्वापवाक्यानुरोधेन प्राण एव सर्वभूतलयादिपरमित्यर्थः । एवं स्वापवाक्ये इन्द्रियपदं भूतपरमुपेत्यैकार्थत्वमुक्तम् । इदानीं प्रस्तावाक्यगतभूतपदमेव भूतसारेन्द्रियपरम् । स्वापवाक्यस्योक्तदिशा बलवत्त्वादि-त्याशयेन पक्षान्तरमाह ॥ यद्वेति ॥ तथाचेन्द्रियलयाद्याधारत्वं वायुवृत्तेरेवेति प्रस्तावाक्यं प्रसिद्धप्राणपरमेवेति भावः । ननु यथा प्रबलस्वापवाक्यानुरोधेन प्रस्तावाक्यं प्रसिद्धप्राणपरमिति शङ्कात्रोच्यते तथा पूर्वत्रापि सम्भूतवाक्यानुरोधेनाकाशादेवेत्यत्राकाशपदं

भूतपरमिति शङ्का स्यात् । अतो नेयमभ्यधिकाशङ्केत्याशङ्क्य सम्भूतवाक्यस्यैतद्बाधने प्राबल्याभावादित्याह ॥ आकाशाद्वायुरिति ॥ परिहारप्रकारमाह ॥ पुंवाक्य इति ॥ तस्य सम्भावितदोषत्वादिति भावः । तथाच स्वापवाक्यस्य प्राबल्याभावान्न तद्वाक्यानुरोधेन प्रस्तावावाक्यं प्राणपरं किं तु यतो वेत्याद्यनुरोधेन ब्रह्मलिङ्गेन च ब्रह्मपरमिति । तत्सङ्गतिः मानान्तरसङ्गतिः ।

पाण्डुरङ्गि — मानान्तरानुगृहीतत्वेनेति ॥ सर्वाणि भूतानि प्राणे विलीयंते सर्वभूतसारेन्द्रियलयाधिकरणत्वादितिमानान्तरानुगृहीतत्वेनेत्यर्थः । ननु ब्रह्मण्यपि भूतलयादिबोधकश्रुतिः प्रबलेत्यत आह ॥ ब्रह्मणीति ॥ सन्दिग्धवाक्यानुसारेणा-सन्दिग्धवाक्यस्य नयनेऽरुच्याह ॥ यद्वेति ॥

तात्पर्यचन्द्रिका

तन्न । पूर्वपक्षे प्राणस्य जडवायुत्वे प्रश्ने ''कतमा सा देवते''ति । प्रतिवचने च ''सैषा देवते''ति देवताशब्दायोगात् । तदभिमानिचेतनत्वे च ''वायुविकार-स्यापश्चवृत्तेः प्राणस्योपादानं युक्त''मित्यादित्वत्पूर्वपक्षभाष्यविरोधात् । स्वापवाक्ये-मानान्तरसंवादस्यैवाभावेन तं स्वीकृत्य पूर्वोत्तरपक्षोत्तथयोगाच्च । तथाहि ।

न हि स्वापे पृथिव्यादेरक्षाणां वा विनाशधीः ।
प्रत्यक्षादनुमानाद्वा देवतायां जडेऽथवा ॥ १ ॥

न तावत्स्वापकाले जडे देवतायां वा महाभूतानां लयादौ मानान्तरसंवादः । तेषां स्वापकालेप्यलीनानामेवानुभावात् । दृष्टिसृष्टिमते च तदा वायुविकारादेर-प्यभावेन तत्र भूतलयायोगात् । नापि स्वापकाले जडे वा देवतायां वेन्द्रियाणां लये प्रत्यक्षसंवादः । तेषामतीन्द्रियत्वात् । नापि स्वापकाले वायुवृत्तेरलोपादिन्द्रियवृत्तीनां च लोपात्तत्र तेषां लयोनुमीयत इत्यनुमानसंवादोस्तीति वाच्यम् । त्वया जन्मादिसूत्रे ब्रह्मण उपादानत्वेपि श्रुतिसंवाद्यनुमानानामुक्तत्वात् । यस्मिन्सव्यापारे सति यन्निर्व्यापारं तत्तत्र लीयत इति व्याप्त्यभावाच्च । पूर्वेद्युर्येन दृष्यं तेनैव चक्षुषा पश्यामीत्यादिप्रत्यभिज्ञाविरोधाच्च । ''यथा सोम्य वयांसि वासो वृक्षं सम्प्रतिष्ठन्ते

(तात्पर्यचन्द्रिका)

एवं ह वै तत्सर्वं पर आत्मनि सम्प्रतिष्ठत'' इति प्रक्रम्य ''चक्षुश्च द्रष्टव्यं च श्रोत्रं च श्रोतव्यं चे''त्यादिना सुप्तौ चक्षुरादीनामनाशस्यैव श्रवणाच्च ।

किं चाकाशाद्वाय्वाद्युत्पत्तिरपि मानान्तरसंवादिनी । अवकाशात्पवनस्य पवनाच्च फूत्काराद्दहनस्य दहनाच्चोष्मतः स्वेदस्य वृष्टितश्च पार्थिवपदार्थानामुत्पत्तेर्दर्शनादिति नाकाशवाक्यात्प्राणवाक्येऽधिकाशङ्का । न च ''कतमा देवतोद्गीथमन्वायत्ता । आदित्य इति होवाचे''त्यादिनोद्गीथादावादित्यादेरब्रह्मण एव देवतात्वेनोक्तत्वात्तत्सन्निहिते प्रस्तावेप्यब्रह्मण एव देवतात्वमित्यधिकाशङ्केति वाच्यम् । पूर्वाधिकरणेपि ''अपां का गतिरिति । असौ लोक इति होवाचे''त्यादिकेनाब्रह्मण एव गतित्वेनोक्ततया तत्सन्निधानादस्य लोकस्य का गतिरिति वाक्येप्याकाशस्याब्रह्मत्वं युक्तमिति साम्यात् ।

प्रकाशिका — प्राणशब्दस्य जडपरत्वं वा चेतनपरत्वं वेति विकल्प्य क्रमेण निरस्यति ॥ पूर्वपक्ष इति ॥ उपलक्षणमेतत् । प्रस्तावान्वायत्तत्वस्य चायोगादित्यपि ध्येयम् । चेतनएव देवताशब्दस्य मन्त्राधिष्ठातृत्वस्य च योगात् । ननु ''कतमा सा देवता प्रतिहारमन्वायत्ता अन्नमिति होवाचे''त्यादावचेतनेपि देवताशब्दोस्तीति चेत् विप्रतिपत्तेरिति भावः । यदपि गतार्थतामाशङ्क्य द्वेधाऽभ्यधिकाशङ्काप्रदर्शनं तदपि नेत्याह ॥ स्वापवाक्य इति ॥ स्यादेवं यदि ॥ ''यदा वै पुरुषस्स्वपिती''ति वाक्ये विवक्षितं लक्षणया भूतलयाधारत्वं मुख्यवृत्त्या वागादीन्द्रियाधारत्वं च प्रसिद्धप्राणस्य मानान्तरसिद्धं स्यात् तदा तदनुसारात्प्रस्तावावाक्येपि तथा स्यात् । न चैवमस्तीत्यर्थः । मानान्तरसंवादाभावमेवाह ॥ न हीति ॥ इन्द्रियलयद्वारा भूतलयपरत्वाशयेनोक्तं पृथिव्यादेरिति ॥ मुख्यवृत्त्या इन्द्रियलयपरत्वपक्षाशयेनोक्तमक्षाणामिति ॥ लयशब्दार्थो विनाशेति ॥ प्रत्यक्षादिति ॥ एतेन मानान्तरं प्रत्यक्षमनुमानं वेति विकल्प्य नोभाभ्यामित्युक्तं भवति ॥ देवतायामिति ॥ एतेन प्राणं वागप्येतीत्यत्र प्राणशब्दः किं जडवायुपर उत तदभिमानिदेवताचेतनपर इति विकल्पस्सूचितः । वागादीनां भूतपरत्वमुपेत्य प्राणे पृथिव्यादिलयाधारत्वमुच्यत इत्याद्यःपक्षः । तत्र तावन्मानान्तरसंवादाभावमुपपादयति ॥ न तावदिति ॥ जड इति प्राणशब्दार्थस्य विकल्पेनानुवादः ॥ मानान्तरेति ॥ प्रत्यक्षानुमानरूपेत्यर्थः ॥ अनुभवादिति ॥ प्रत्युत तद्विसंवाद एवेति भावः ।

ननु दृष्टिसृष्टिपक्षे सर्वदृष्टेरभावात्कथमेतदित्यत आह ॥ दृष्टीति ॥ अक्षाणां वेति द्वितीयपक्षोपलम्भं विशदयति ॥ नापीति ॥ तेषां इन्द्रियाणाम् । एतेन प्रत्यक्षान्न विनाशधीरित्युपपादितम् । अनुमानादित्येतदुपपादयति ॥ नापीति ॥ तत्र वायुविकारे । इन्द्रियाणाम् । तेषां इन्द्रियाणि प्राणे लीयन्ते । प्राणवृत्तौ सत्यामपीन्द्रियवृत्तीनां परिलुप्यमानत्वात् । यस्मिन्सव्यापारे सति यन्निर्व्यापारं तत्तत्र लीयते । यथासंप्रतिपन्नमित्यनुमीयत इत्यर्थः । उक्तत्वादिति ॥ तथाच यतो वेत्यादिवाक्यस्यापि मानान्तरसंवादेन प्राबल्यादौर्बल्योक्त्ययोगादिति भावः । न चोपादानत्वे मानान्तरसंवादेपि न भूतलयाधारत्व इति वाच्यम् । उपादानस्यैव लयाधारत्वादिति तात्पर्यात् ॥ व्याप्त्यभावाच्चेति ॥ सम्प्रतिपन्नदृष्टान्ताभावादिति भावः । यद्वा परमात्मनोपि तथाविधस्य सत्त्वेन तत्र लयाद्यनङ्गीकारेण व्यभिचारादिति भावः । यद्वा कुठारे सव्यापारे सति निर्व्यापारं खड्गादिकं तत्र न लीयत इति व्यभिचारादिति भावः । प्रत्यक्षविरोधं चानुमानस्याह ॥ पूर्वेद्युरिति ॥ एतेन ''वागप्येती''त्यादिश्रुतिविरोधात्प्रत्यभिज्ञाभ्रान्तिरिति निरस्तम् । प्रत्यक्षस्य बलवत्त्वेन श्रुतिगताप्ययशब्दस्य निर्व्यापारत्वार्थान्तरपरत्वेन सावकाशत्वादिति भावः । श्रुतिविरोधं चाह ॥ यथेति ॥ एतत्सर्वमिति सर्वशब्दार्थमेव दर्शयति ॥ चक्षुश्चेति ॥ अनाशस्येति ॥ सम्प्रतिष्ठिति शब्दस्यापि लयार्थत्वे पक्षिणामावासवृक्षाश्रयत्वदृष्टान्तानुपपत्तिरिति भावः । कस्मिन्सर्वे प्रतिष्ठिता इति गार्गिकृतप्रश्नं प्रति परिहारत्वानुपपत्तिश्चेति भावः । परे आत्मनीत्युक्त्या च वायुवृत्तौ चक्षुरादीनामप्ययानुमानमसमञ्जसमिति सूचितम् । श्रवणात् षट्प्रश्ने । एवं स्वापवाक्यं न मानान्तरसंवादीति तदनुसारेण प्रस्तावावाक्यं न प्राणपरं प्रत्युत जन्माधिकरणे त्वदुक्तदिशा यतो वेत्यादिवाक्यमेव मानान्तरसंवादीति तदनुसारेण ब्रह्मपरमेवेति नाभ्यधिकाशङ्कावकाश इत्युक्तं इदानीं यदप्याकाशाद्वायुरित्यादिवाक्यं त्वित्यादिना पूर्ववैषम्यवर्णनं तदपि नेत्याह ॥ किञ्चेति ॥ पवनस्य दहनस्येत्यादेरुत्पत्तेर्दर्शनादित्यन्वयः । अवकाशाभावे पवनादर्शनादिति भावः । कथं पवनाद्दहनस्योत्पत्तिदर्शनमित्यत उक्तं फूत्कारादिति ॥ एवमूष्मत इत्यपि ध्येयम् । वक्ष्यते च भाष्ये भगवत्पादैः ''आप'' इत्यत्र ''घर्मात्स्वेदादिदृष्टे''रिति ।

यदपि च ''आदित्योन्नं चोद्गीथप्रतिहारदेवते''त्यादिनोक्तं परभाष्ये ''कतमा सा देवतेति ॥ आदित्य इति होवाच । सर्वाणि ह वा इमानि भूतान्यादित्यमुच्चैस्संतं गायन्ति । सैषा देवतोद्गीथमन्वायत्ते''ति । यथा ''कतमा सा देवतेति । अन्नमिति होवाच । सर्वाणि

(प्रकाशिका)

ह वा इमानि भूतान्यन्नमेव प्रतिहरमाणानि जीवन्ति । सैषा देवता प्रतिहारमन्वायत्ते''त्यादित्यान्नयोरब्रह्मत्वदर्शनात्तत्सामान्यात् प्राणस्याप्यब्रह्मत्वमिति शङ्कान्तरं तदप्यनूद्य पूर्ववैषम्येण निरस्यति ॥ न चेति ॥ उद्गीथमन्वायत्तेत्यर्थानुवादोयम् । पूर्वाधिकरणविषयवाक्येपि ''का साम्नो गतिरिति । स्वर इति होवाच । स्वरस्य का गतिरिति । प्राण इति होवाच । प्राणस्य का गतिरिति । अन्नमिति होवाच । अन्नस्य का गतिरिति । आप इति होवाच । अपां का गतिरिति । असौ लोक इति होवाचे''ति शालावत्यप्रश्नोत्तरत्वेन दाल्भ्येन स्वर्गलोकस्य गतित्वेनोक्तौ ''अप्रतिष्ठितं वै किल ते दाल्भ्यसामे''ति तत्पक्षे प्रत्याख्याते दाल्भ्येन पुनः ''अमुष्य लोकस्य का गति''रिति प्रश्ने कृते ''अयं लोक इति होवाचे''ति पृथिवीलोकं गतित्वेन शालावत्यो दाल्भ्यमुवाच । तत्पक्षे च जैबिलिना ''अन्तवद्वै किल ते शालावत्यसामे''ति प्रत्याख्याते तर्ह्यस्य लोकस्य का गतिरिति शालावत्यकृतप्रश्नोत्तरत्वेनाकाश इति होवाचेति श्रवणात्प्रायपाठरूपसन्निधानादित्यर्थः । नन्वसौ लोक इत्यादौ ब्रह्मलिङ्गाभावादप्रतिष्ठितं किलेत्यादिना तस्य दूषितत्वाच्च स्वर्गादेरब्रह्मत्वेप्याकाशस्य सर्वभूतकारणत्वादिब्रह्मलिङ्गवत्त्वात्परोवरीयो हास्य भवतीत्यादिफलश्रवणाच्च ब्रह्मत्वमेव । प्रायपाठस्य संशये सत्येव निर्णायकत्वेनेह सन्देहाभावात् । उक्तं च पूर्वतन्त्रे ''विशये प्रायदर्शनादिती''ति चेद्धंत तर्हीहापि भूतसंवेशनादिब्रह्मलिङ्गाद्ब्रह्मपरमस्तु । तदेतदुक्तं साम्यादिति ॥ न चादित्यादावुच्चैस्संतं गायन्तीत्यादिब्रह्मलिङ्गावभासान्न स्वर्गादिवाक्यतौल्यमिति वाच्यम् । एवं तर्हि तस्य तत एव ब्रह्मपरत्वावश्यंभावेनाब्रह्मसन्निधानमसिद्धमिति नाभ्यधिकाशङ्का युक्ता । उक्तं च ''आदित्यसंस्थितो विष्णुर्यत्सदा सर्वगीतभुक् । राजादौ गीतमप्यज्ञैर्भुङ्क्ते गानस्य देवता । उद्गीथदेवता तस्मात्स एव पुरुषोत्तमः । अन्नस्थेनैव जीवंति भूतान्येतानि विष्णुना । प्रतिहारदेवतातस्सः प्रतिहारोहि भोजन''मिति स्मृतावादित्यादेर्विष्णुत्वम् । उक्तं च सुधायां ''आदित्यान्नयोरब्रह्मत्वस्याप्यसिद्धेः । तत्रापि सर्वाणि ह वा इमानि भूतान्यादित्यमुच्चैस्संतं गायन्ती''त्यादिब्रह्मलिङ्गसद्भावात् । अन्नमेव प्रतिहरमाणानीत्येतस्य तु प्रायपाठादुपजीवनार्थत्वेन ग्राह्यत्वा''दिति । एतेनैतत्प्राणस्य ब्रह्मत्वनिर्णयावश्यंभावात्तन्निर्णायकस्यान्यस्याभावादत्रैव निर्णीयत इति निरस्तम् । ब्रह्मलिङ्गस्यात्र सत्त्वात् । पक्षान्तरप्रापकस्य चाभावेन संशयपूर्वपक्षयोरयोगेन पूर्वन्यायेनैव निर्णयसिद्धेरिति । उक्तं च सुधायां ''अत्रापि संशयाद्ययोगा''दिति ।

पाण्डुरङ्गि — अत्र हि पूर्वपक्षे प्राणशब्देन जडवायुः किं वा तदभिमानिचेतन इति विकल्पं मनसि निधायाद्ये दोषमाह ॥ पूर्वपक्ष इति ॥ जडे देवताशब्दस्य काप्यप्रयोगादिति भावः । द्वितीयं दूषयति ॥ तदभिमानीति ॥ मानान्तरसंवादेन प्राबल्यमाश्रित्याभ्यधिकाशङ्कया कृतं पूर्वपक्षं दूषयति ॥ स्वापवाक्य इति ॥ अक्षाणामतीन्द्रियत्वेन प्रत्यक्षादनुमानाद्वेति अव्यवस्थितविकल्पायोगाद्व्यवस्थां दर्शयति ॥ न तावदित्यादिना ॥ ननु दृष्टिसृष्टिपक्षमनुसृत्य स्वापइन्द्रियाणां लय उच्यत इत्यत आह ॥ दृष्टिसृष्टिमत इति ॥ नन्विन्द्रियाणि वायौ स्वापकाले विलीयन्ते वायुव्यापारदशायां लुप्तव्यापारत्वादित्यनुमानेन लयोऽनुमीयत इत्याशङ्क्य निराकरोति ॥ नापीति ॥ व्याप्त्यभावाच्चेति ॥ देवदत्ते सव्यापारेपि निर्व्यापारस्य यज्ञदत्तस्य तत्र लयाभावादिति भावः । अप्राधान्यक्रमेणादौ व्यभिचारमुक्त्वा बाधमाह ॥ पूर्वेद्युरिति ॥

तात्पर्यचन्द्रिका

यच्चोक्तं पुंवाक्यस्येत्यादि तत्र ब्रूमः ।

अपुंवाक्यद्वयेप्येकेनान्यानुसरणे ध्रुवम् ।
कर्तव्ये सति कृप्तत्वात्संवाद्येवानुरुध्यताम् ॥ १ ॥

तथाहि । प्रमाणभूते पुंवाक्ये प्रत्यक्षादौ च संवादिन एवानुसरणीयत्वं कृप्तमितीहापि तथैव युक्तम् । अर्थाबाधरूपप्रामाण्यस्य संवादेन दार्ढ्यात् । अनपेक्षत्वस्य च दैवात्संवादेनाहानेः । सप्रयोजनत्वाय च प्रस्तावावाक्यस्यापूर्वार्थत्वे स्वापवाक्येपि तत्प्रसङ्गात् । स्वापवाक्यस्याप्यभिमानिदेवतापरत्वेऽपूर्वार्थत्वसम्भवाच्च । अनाशङ्कितदोषत्वात्तु द्वयोरपि प्रामाण्यं न त्वन्योन्यमननुसरणम् । अन्यथा श्रुत्या श्रुत्यन्तरसंवादः उपक्रमाद्यानुगुण्यं च नानुसरणीयं स्यात् । मानान्तरविरोधश्च न परिहार्यः स्यात् । उक्तं च भामत्यामपि ''यद्यपि श्रुतयः स्वतः प्रमाणतयानपेक्षाः । तथापि मानान्तरोपनीतार्थवशेन व्यवस्थाप्यन्त'' इति । तस्मात्परेषामधिकरणमयुक्तम् ॥

प्रकाशिका — एवमभ्यधिकाशङ्काप्रकारं निरस्य तन्निवर्तकतयोक्तं सिद्धान्तप्रकारं च निरस्यति ॥ यच्चोक्तमिति ॥ अपुंवाक्येति ॥ प्रस्तावावाक्यं तावदवश्यं स्वापवाक्यकारणवाक्यान्यतरानुरोधेन नेयम् । भूतसंवेशनादिलिङ्गमात्रस्यात्र निर्णायकत्वे पूर्वेण गतार्थ-

(प्रकाशिका)

त्वस्योक्तत्वात् । तत्र द्वयोरपौरुषेयत्वेपि पूर्वपक्ष्युक्तरीत्या मानान्तरसंवादिस्वापवाक्य-मेवानुरोद्धव्यम् । लोके तथा कृप्तत्वात् । तथाच प्रस्तावावाक्यं प्रसिद्धप्राणपरमेवेति न पूर्वपक्षोपमर्द इत्यर्थः । कृप्तत्वादित्येतदुपपादयति ॥ प्रमाणेति ॥ ननु मानान्तरसंवादि-नोऽप्रामाण्यात्कथं तदनुसरणमिति चेत् किमिदमप्रामाण्यं किं ज्ञातार्थकत्वमुत मानांतरसापेक्षत्वरूपम् । आद्य आह ॥ अर्थेति ॥ विषयाबाधरूपं याथार्थ्यमेव प्रामाण्यम् । न त्वनधिगतार्थत्वम् । अन्यत्र निरस्तत्वादिति भावः । एतेन प्रमाणसिद्धे मानान्तरसंवादो व्यर्थ इति निरस्तम् । प्रमाणसिद्धत्वेपि तत्रानाश्वासशङ्कानिरासेन दार्ढ्यार्थत्वादिति । द्वितीय आह ॥ अनपेक्षत्वस्येति ॥ स्वापवाक्यं च न मानान्तरमपेक्ष्यार्थं बोधयति । किन्तु तदुक्तेर्थे दैवान्मानान्तरसंवादः । न च तावता सापेक्षत्वम् । उक्तं च वाचस्पत्ये ''यत्र तु प्रमाणान्तरसंवादस्तत्र प्रमाणान्तरादिवार्थवादादपि सोर्थः प्रसिध्यति । द्वयोः परस्परानपेक्षयो; प्रत्यक्षानुमानयोरिवैकत्रार्थे प्रवृत्तेरिती''ति भावः । स्वापवाक्यानुसरणे बीजान्तरमाशङ्क्याह ॥ सप्रयोजनत्वायेति ॥ ब्रह्मपरत्व एवापूर्वार्थत्वं न तु प्राणपरत्व इति भावः । तत्प्रसङ्गात् अपूर्वार्थत्वप्रसङ्गात् । नन्वत्र ब्रह्मपरत्वेनापूर्वार्थत्ववत्तत्र तन्न सम्भवति । प्राणपरत्वेन सिद्धत्वादित्यत आह ॥ स्वापवाक्यस्येति ॥ प्राणवाग्वभिमानीत्यर्थः । एवं च स्वापवाक्यगतप्राणशब्दस्य तदभिमानिदेवतापरत्वेन तदनुसारेण प्रस्तावावाक्यस्यापि देवता-परत्वेऽपूर्वतालाभान्न ब्रह्मपरत्वसिद्धिरिति भावः । यद्यप्यपुंवाक्यतयानाशङ्कितदोषत्वा-न्नान्यानुसरणमिति तदपि नेत्याह ॥ अनाशङ्कितेति ॥ संवाद इति ॥ नानुसरणीय इति योज्यम् ॥ मानान्तरेति ॥ अन्यथेत्यनुवर्तते । अपौरुषेयेऽप्यन्यानुसरणमित्यत्र तद्वचनमेव संवादयति ॥ उक्तं चेति ॥ एतेन स्वापवाक्यं संवर्गविद्यायां श्रूयते । प्रस्तावावाक्यं तूद्गीथविद्यायां गतम् । अतस्तयोर्नैकवाक्यत्वमिति सिद्धान्त इति निरस्तम् । ब्रह्मकारणवाक्यस्यापि तथात्वादिति । यदत्र कैश्चिदुक्तं ''प्राणस्य प्राणः प्राणबन्धनं हि सोम्य मन इति चोदाहरण''मिति । तत्तु परभाष्य एव संशयानुदयेन दूषितत्वान्ननिराकृतम् ।

पाण्डुरङ्गि — अधिकाशङ्कां निरस्य सिद्धान्तमपि दूषयति ॥ यच्चोक्तमिति ॥ ननु संवादानुसरणमयुक्तम् । वैयर्थ्यादित्यत आह ॥ अर्थाबाधेति ॥ ननु संवादानुसरणे सापेक्षत्वेन निरपेक्षत्वहानिरित्यत आह ॥ अनपेक्षत्वस्येति ॥ ननु प्रस्तावावाक्यस्य प्राणपरत्वे बोधितार्थबोधकत्वेन वैयर्थ्यं स्यात् । ब्रह्मपरत्वे त्वपूर्वार्थत्वेन न वैयर्थ्यमिति तदेव

स्वीक्रियत इत्यत आह ॥ सप्रयोजनत्वायेति ॥ किं च स्वापवाक्यस्याभिमानिदेवतापरत्वेऽपूर्वार्थत्वसम्भवात्प्रस्तावावाक्यमप्यभिमानिदेवतापरत्वेनापूर्वार्थं स्यादिति न ब्रह्मपरत्वमेवेष्टव्यमित्याह ॥ स्वापवाक्यस्यापीति ॥ ब्रह्मपरत्वेप्यपूर्वतालाभसम्भवेपि प्रस्तावावाक्यसमानार्थत्वात् अग्निहोत्रं जुहोतीति प्राप्तहोमांशे दध्नेन्द्रियकामो जुहुयादित्यस्येवापूर्वार्थत्वाभावादभिमानिदेवतापरत्वमुक्तमिति ज्ञेयम् । नन्वन्योन्यानुसरणे सापेक्षत्वेनाप्रामाण्यापत्तिरित्यत आह ॥ अनाशङ्कितेति ॥ ननु विरुद्धार्थत्वेन द्वयोरप्रामाण्यमित्यत आह ॥ नत्विति ॥ तथाच संवादरहितवाक्ये संवादिवाक्यमनुसरणीयमिति न तयोर्विरुद्धार्थत्वेनाप्रामाण्यमिति भावः ॥ अन्यथेति ॥ अन्योन्यानुसरणेऽप्रामाण्येचेत्यर्थः ॥ प्राणाधिकरणं सम्पूर्णम् ॥ ९ ॥

तात्पर्यचन्द्रिका

केचित्तु ॥ कृत्स्नस्य जगतः प्रसिद्धप्राणाधीनप्रवृत्त्यादिदर्शनात्प्रस्तावावाक्ये प्रसिद्धप्राण एवोच्यत इत्याकाशाधिकरणादधिकाशङ्कायां शिलाकाष्ठादिषु तदभावात् ''सर्वाणी''त्यस्यायोग इति परिहारोभिप्रेत इत्याहुः । तन्न । प्राणाधीनप्रवृत्तिकं शरीरमिव तदनधीनप्रवृत्तिकं शरीरादन्यदपि बहुपश्यतः पूर्वपक्षिणः सर्वं प्राणाधीनप्रवृत्तिकमिति शङ्कायोगात् । ग्रन्थस्तु स्पष्टार्थः ॥ प्राणाधिकरणं सम्पूर्णम् ॥ ९ ॥

प्रकाशिका — रामानुजीयमतमपाकरोति ॥ केचित्त्विति ॥ प्रस्तोतर्यादेवतेति वाक्ये निखिलजगत्कारणतया प्राणशब्दनिर्दिष्टः प्रसिद्धः प्राण; परात्मा वेति सन्देहे पूर्वपक्षादिकमनुवदति ॥ कृत्स्नस्येति ॥ शिलेति ॥ शिलाकाष्टाद्यचेतनेषु प्राणायत्तस्थित्यदर्शनात् ''सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशन्ति प्राणमभ्युज्जिहत'' इति सर्वपदायोगात् अत एव सर्वाणि ह वा इमानीति प्रसिद्धवन्निर्देशादेव हेतोः प्राणशब्दनिर्दिष्टः परमात्मैवेति सिद्धान्त इत्यर्थः । पूर्वपक्षस्य निर्दलत्वेनानूदितं निरस्यति ॥ तन्नेत्यादिना ॥ एतेन यत्केनचित्प्रलपितं पूर्वत्राकाशपदेन परमाकाशस्य परप्रकृतिरूपस्य ग्रहणेन तदभेदादस्त्वीश्वर आकाशः । प्रस्तावावाक्यगतप्राणस्तु ''प्राणाद्धचेव खल्विमानि भूतानी''त्यादिश्रुते; प्रसिद्धप्राण एवेति शङ्कायां सर्वकारणत्वादिलिङ्गात्प्राणश्शिव एव । प्राणाद्धचेवेति श्रुतेस्त्वानन्दरूपस्य ब्रह्मणः कारणत्व एव तात्पर्यमिति परिहार इति । उक्तं च ''प्राणे तु का गतिरिह प्राणाद्धचेवेत्यपि श्रुतेन्यत्र । शिव एव सोपि लिङ्गात्सा

(प्रकाशिका)

श्रुतिरानन्दविश्रान्ते''ति तन्निरस्तम् । पूर्वत्राप्याकाशाद्वायुरिति श्रुतेस्सत्वात् । ऐकाधिकरण्ये त्वत एवेति विन्यासायोगात् । प्राणाद्ध्रुवेवेत्यादेर्विष्णुपरत्वेनानन्दमयाधिकरण एव साधितत्वाच्च । सिद्धान्तोप्ययुक्तः ।

प्राणस्थविष्णुना सर्वे प्रसूयन्ते यतस्ततः ।
प्रस्तावदेवता स स्यात् प्रस्तावस्तु जनिर्यतः ॥

इत्यादि व्याख्यानरूपस्मृतिविरोधाच्च । ''प्राणस्थूणा अयं वाव शिशुर्योयं मध्यमः प्राण'' इति श्रुतिविरोधाच्च ।

द्वावात्मानौ हि देवेषु द्वौ प्राणौ द्वौ च चेतनौ ।
अज्ञानाभिभवास्पृष्टौ वायुर्नारायणश्च तौ ।
तदन्ये चेतनास्सर्वे प्राणाश्चात्मान एव च ।
अज्ञानाभिभवस्पृष्टास्तस्मात्ते ह्यधमास्स्मृताः ।
मध्यमो वायुरेवैक उत्तमः केवलो हरिः ॥

इति ब्रह्माण्डपुराणविरोधाच्चेति । उपन्यासमुखेनैव टीकाग्रन्थस्य विवृतत्वान्नाक्षरार्थ-वर्णने यतितव्यमित्याह ॥ ग्रन्थस्त्विति ॥ प्राणाधिकरणं सम्पूर्णम् ॥ ९ ॥

ज्योतिरधिकरणम्

ॐ ज्योतिश्चरणाभिधानात् ॐ ॥ अत्र त्रीणि दर्शनानि । ज्योतिरित्यादि-चतुस्सूत्र्येकमधिकरणम् । विषयवाक्यं त्वग्निसूक्तस्थं ''ज्योतिर्हृदय आहितं य''दिति वाक्यमेवेत्येकं मतम् । इदं च ज्योतिरित्यस्य सूत्रस्याग्निसूक्तस्थं वाक्यमेवोदाहृत्य ''इदं चैकमधिकरण''मिति वदतस्तत्वप्रदीपकृतोऽभिप्रेतम् । मतान्तरं तु चतुस्सूत्र्या एकाधिकरणत्वेपि विषयवाक्यं ज्योतिरित्यस्यापि ''अथ यदतः परो दिवो ज्योति''रिति छान्दोग्यवाक्यमेवेति । इदं च ''छन्दोभिधाना''दिति सूत्रव्या-ख्यानरूपं ''नित्यत्वादेव शब्दानां'' इत्यनुव्याख्यानं 'ज्योतिश्चरणाभिधानादि-

(तात्पर्यचन्द्रिका)

त्यधिकरणं तात्पर्यतो विवृणोती''त्यवतार्य ज्योतिरिति सूत्रस्य छान्दोग्यवाक्यमेवोदाहरतस्सन्यायरत्नावलीकारस्याभिप्रेतम् ।

मतान्तरं तु ज्योतिस्सूत्रमेकमधिकरणम् । छन्दइत्यादि त्रिसूत्री त्वधिकरणान्तरमिति । इदं च टीकाकारस्याभिप्रेतम् । न चात्राद्यपक्षेऽग्निसूक्ते गायत्रीरूपछन्दोभिधानभूतादिपादव्यपदेशोपदेशभेदानामभावेन छन्दोभिधानादित्यादेरयोग इति वाच्यम् । ज्योतिर्हृदय आहितं यदित्यग्निसूक्तस्थस्यैव ज्योतिषः छान्दोग्येपि ज्योतिश्श्रुत्या ''योयमन्तर्हृदय'' इति हृदयनिहितत्वधर्मेण च शाखान्ताराधिकरणन्यायेन प्रत्यभिज्ञायमानत्वेनैकत्वात् । अन्यथाऽनेकाधिकरणपक्षेपि छान्दोग्योक्तस्य ज्योतिषो ''गायत्री वा इदं सर्व''मिति श्रवणाच्छन्दस्त्वेप्यग्निसूक्तस्थस्य छन्दस्त्वानापत्त्या पूर्वाधिकरणसिद्धान्ताक्षेपेणोत्तराधिकरणपूर्वपक्षो न स्यात् । तथाच छन्दोभिधानादित्यस्यायमर्थः । अग्निसूक्तस्थं ज्योतिर्न विष्णुः । अस्यैव ज्योतिषः छान्दोग्ये गायत्रीत्वाभिधानादिति । एवं भूतादिपादव्यपदेशादावपि द्रष्टव्यम् ।

प्रकाशिका — ॐ ज्योतिश्चरणाभिधानात् ॐ ॥ ''टीकासुच यदस्पष्ट''मिति प्रतिज्ञानुरोधेन टीकाकृतां योजनाभेदेषूपपत्तीर्विवक्षुर्विरोधं च परिजिहीर्षुस्तदुक्तयोजनाभेदान् दर्शयति ॥ अत्रेति ॥ त्रीणि दर्शनानीत्युक्त्या त्रयमप्युपादेयमिति सूचयति ॥ चतुस्सूत्रीति ॥ ज्योतिरित्येकं छन्दोभिधानान्नेति चेन्न तथाचेतोर्पणनिगदात्तथाहि दर्शनं भूतादिपादव्यपदेशोपपत्तेश्चैवं उपदेशभेदान्नेति चेन्नोभयस्मिन्नप्यविरोधादिति चतुस्सूत्री ॥ तत्वप्रदीपेति ॥ प्राचीनभाष्यव्याकर्तुः । सूत्रव्याख्यानरूपमिति सुधारीत्योक्तम् । एतन्मते ज्योतिस्सूत्रस्यापि तात्पर्यतो व्याख्यानरूपत्वात् । यद्वा साक्षाच्छन्दस्सूत्रस्यैव व्याख्यानरूपत्वाभिप्रायेणैवमुक्तम् । इत्यनुव्याख्यानमित्यवतार्येत्यन्वयः ॥ सन्न्यायेति ॥ प्राचीनानुव्याख्यानव्याख्यातुः ॥ टीकाकारस्येति ॥ तत्वप्रकाशिकाकृतः । एवं मतभेदमुपन्यस्य तत्वप्रदीपपक्षे ''विमे कर्णा पतयन्त'' इत्यग्निसूक्तगतस्यैव सर्वत्रविषयवाक्यत्वेऽनुपपत्तिमाशङ्क्य च समाधत्ते ॥ न चेति ॥ अभावेनेति ॥ ''गायत्री वा इदं सर्वं भूतं यदिदं किंचे''त्यादि छान्दोग्यवाक्य एव सत्त्वेन तस्य छन्दःप्रभृतिसूत्रेष्वविषयत्वे तेषामयोग इत्यर्थः । ज्योतिश्श्रुत्या ''अथ यदतः परो दिवो ज्योतिर्दीप्यत'' इति ज्योतिश्श्रुत्या ।

(प्रकाशिका)

॥ शाखान्तरेति ॥ अधिकरणशरीरं प्रागुक्तं शास्त्रयोनिसूत्रे । ''एकं वा संयोग-रूपचोदनाख्याविशेषा''दिति सिद्धान्तसूत्रोपन्यस्तेन फलसंयोगादिसाधारणधर्मकृतप्रत्यभि-ज्ञारूपेण न्यायेन यथा शाखाभेदेप्यग्निहोत्रज्योतिष्टोमादिकर्माभेदस्तथा वेदभेदेपि शब्दैक्याद्धर्मैक्याज्ज्योतिरभेद इत्यर्थः । अग्निसूक्तगतस्य छान्दोग्यगतस्य च ज्योतिष एकत्वमवश्यमभ्युपेयम् । अन्यथा टीकाकृत्पक्षेऽप्ययुक्तिरित्याह ॥ अन्यथेति ॥ उक्तदिशा एकत्वानभ्युपगतौ ॥ पूर्वेति ॥ ज्योतिरधिकरणेत्यर्थः । अस्त्वेकत्वं ज्योतिषः किं तत इत्यतः प्रागुक्तानुपपत्तिनिरासप्रकारमाह ॥ तथाचेति ॥ नन्वेवं पूर्वपक्षे अग्निसूक्तस्थं ज्योतिर्न विष्णुः अन्यत्र निरूढज्योतिश्श्रुतेरिति स्वप्रकरणगतज्योतिश्श्रुतिरूपपूर्वपक्षयुक्त्य-भिधानसम्भवेन प्रकरणान्तरगतज्योतिषैक्यं प्रसाध्य तत्रत्यछन्दस्त्वादित्युक्त्यभिधानम-सङ्गतम्। न च ज्योतिश्श्रुतेरधिदैवशब्दत्वेऽधिभूतशब्दत्वे वा पूर्वन्यायेन विष्णुपरतया सावकाशत्वेन न निरवकाशविष्णुलिङ्गात्प्राबल्यमिति न सैव पूर्वपक्षप्रापिकेति वाच्यम् । भाष्याद्युक्तदिशा सूक्तरूपनिरवकाशप्रकरणानुगृहीततया प्राबल्यादिति चेन्न । वक्ष्यमाणरीत्या प्रकरणान्तरगतज्योतिषोऽपि विष्णुत्वं निर्णेतुमेतत्प्रकरणगतप्रापकापरित्यागेन प्रकरणान्तर-गततत्तत्प्रापकाभिधानमुखेनैवंजातीयकसर्वगतज्योतिषो विष्णुत्वाक्षेपाभिप्रायेणान्यगतप्राप-काभिधानात् । न चैवं छान्दोग्यवाक्यमेव सर्वत्रोदाहृत्य तत्रत्यज्योतिषो विष्णुत्वनिर्णये कृते तदैक्यादग्निसूक्तगतज्योतिषोऽपि तन्निर्णयस्सेत्स्यतीति वाच्यम् । अस्मिन्पक्षेपि सिद्धान्ते छान्दोग्यस्थं ज्योतिर्विष्णुः अस्यैव ज्योतिषोऽग्निसूक्ते चरणाभिधानादिति वक्राश्रयणस्य तुल्यत्वात् । नन्वस्मिन्पक्षे केवलं सिद्धान्ते चरणरूपैकयुक्त्यभिधानाय प्रकरणान्तरानुसरणे तदर्थं सूत्रं चैकं तत्वप्रदीपपक्षे च पूर्वोत्तरपक्षयोरनेकयुक्त्यभिधानायान्यप्रकरणानुसरणं तदर्थसूत्राणि त्रीणिति गौरवमिति चेन्न । प्रकरणान्तरानुसरणे समाने युक्त्यादि-गतैकानेकत्वादेरप्रयोजकत्वात् । प्रधानसूत्रे प्रकरणान्तरानुसरणापेक्षया गुणसूत्रेष्वेव तदनुसरणस्य न्याय्यत्वाच्च । चरणेन ज्योतिषो विष्णुत्वे पूर्वमभिहितेऽन्यप्रकरणगत-प्रापकान्तरावष्टंभेन पूर्वोक्ताक्षेपरूपशङ्काया अनन्तरमेवोदयाच्चेति तात्पर्यात् । उक्तं च तत्वप्रदीपे ''अग्निसूक्तमुदाहृत्य मन्त्रगोचरं विचारमाचरता परमवैदिकेनाचार्येण निखिलोपि वेदसमन्वयो विचारितो भवतीति भूयानयं लाभ'' इति ॥ एवमिति ॥ अग्निसूक्तस्थं ज्योतिर्विष्णुरेव । अस्यैव ज्योतिषः छान्दोग्ये भूतादिपादव्यपदेशात् । उपदेशभेदेप्यविरो-धादिति द्रष्टव्यमित्यर्थः ।

पाण्डुरङ्गि — ॐ ज्योतिश्चरणाभिधानात् ॐ ॥ ननु ज्योतिरधिकरणटीका न व्याख्येया । अनुपपन्नत्वान्मानान्तरविरुद्धत्वाच्चेत्यतो मानान्तराविरोधं दर्शयितुं तत्रान्तरानुपपत्तीश्च परिहरन् मतान्तरमुपन्यस्यति ॥ अत्रेति ॥ यद्वा टीकासुच यदस्पष्टं तच्च स्पष्टीकरिष्यत इति प्रतिज्ञामवंध्यां कर्तुमाह ॥ अत्रेति ॥ सिद्धान्तिनामितिशेषः । नन्वत्राद्यं मतमनुपपन्नम् । तथाहि । तद्विषयत्वेनाभिमते हृदय आहितमिति वाक्ये छन्दोभिधानभूतादिपादव्यपदेशोपदेशभेदानामभावात् । किं च पूर्वत्राग्निसूक्तमग्निपरमित्येव पूर्वपक्षात् छन्दस्सूत्रे छान्दोग्यवाक्यं छन्दःपरमित्येव पूर्वपक्षात् पूर्वपक्षयुक्तिभेदस्य विद्यमानत्वेनाधिकरणभेदस्यैव वक्तव्यत्वेन चतुस्सूत्र्या एकाधिकरणत्वासम्भवात् । किञ्चाग्निसूक्तोक्तकर्णादिविदूरत्वविरुद्धस्य दृष्टत्वादेश्छान्दोग्ये प्रतिपादितत्वात्तस्यैकार्थप्रतिपादकत्वानुपपत्तेरित्याशङ्क्य च निराकरोति ॥ न चेत्यादिना तस्मादाद्यं मतं युक्तमित्यन्तेन ॥ आकारभेदेनेति ॥ कात्स्न्र्येन दृष्टत्वाद्यभावाददृष्टत्वादिकं किञ्चिद्दर्शनादेर्दृष्टत्वादिकमित्यर्थः ।

तात्पर्यचन्द्रिका

न च पूर्वपक्षेऽग्निसूक्तस्याग्निपरत्वाच्छान्दोग्यस्य च छंदःपरत्वात्प्रत्यभिज्ञायोग इति शङ्क्यं । अस्मिन्मते '' तेजो वै ब्रह्मवर्चसं गायत्री''ति श्रुतावग्निशब्दानतिभिन्नार्थतेजश्शब्दगायत्रीशब्दयोः सामानाधिकरण्यदर्शनेनाग्नौ गायत्रीशब्दस्य गायत्र्यां चाग्निशब्दस्य सम्भवेन अग्निसूक्तवच्छांदोग्यस्याग्निपरतायाश्छांदोग्यवदग्निसूक्तस्यापि गायत्रीपरतायाश्च संभवेन द्वयोरप्येकार्थत्वात् । न चाग्निसूक्तस्थेन कर्णादिविदूरत्वेन ''तदेतदृष्टं च श्रुतं चे''ति छांदोग्यस्थदृष्टत्वादिकं विरुद्धमिति शङ्क्यं आकारभेदेनाविरोधात् ।

एकाधिकरणत्वादेवहि ''छन्दोभिधाना''दिति सूत्रे समन्वेतव्यशब्दांतरमनुक्त्वा ''विकारशब्दान्नेति चे''दित्यादाविव पूर्वसूत्रोक्तसमन्वयबाधकमात्रमुद्धृतम् । भाष्येऽपि छन्दस्सूत्रव्याख्यानावसरे ''अग्निगायत्र्यादी''त्यग्निपदं प्रयुक्तम् । तस्मादाद्यं मतं युक्तम् । द्वितीयेपि छान्दोग्ये चरणाभिधानाभावेऽप्युक्तरीत्या वाक्यद्वयोक्तस्य ज्योतिष एकत्वात् ''चरणाभिधाना''दित्येतन्न व्यधिकरणम् । तथाच चरणाभिधानादित्यस्यायमर्थः । छान्दोग्यस्थं ज्योतिर्विष्णुः । अस्यैव

(तात्पर्यचन्द्रिका)

ज्योतिषोऽग्निसूक्ते विचरणाभिधानादिति । यद्यपि छन्दोग्योक्तस्य ब्रह्मत्वे ''यद्वैतद्ब्रह्मे''त्यादिश्रुतिलिङ्गानि स्ववाक्यस्थानि सन्ति । तथापि तत्तत्सूक्तस्थनिरवकाशविष्णुलिङ्गैः सावकाशश्रुतिसूक्तबाधेन भिक्षुकपादप्रसरणन्यायेन सर्ववेदानां विष्णौ समन्वयं दर्शयितुं सूत्रकारेणाग्निसूक्तस्थं लिङ्गमुक्तम् । तस्माद्वितीयमपि निरवद्यम् ।

प्रकाशिका — ननु भवेदेवमनुपपत्तिपरिहारो यद्युभयगतज्योतिषोरेकत्वं स्यात् । न चैवम् । वाक्यद्वयस्यापि भिन्नार्थपरत्वात् । अन्यथा ''वागेवास्य ज्योतिः अथैष ज्योति''रित्यादावपि ज्योतिश्श्रुत्यैकत्वं स्यादित्याशङ्क्याह ॥ न चेति ॥ नन्वेवमप्यग्निसूक्तस्थस्य ''विमे कर्णा पतयन्तो विचक्षु''रिति कर्णचक्षुराद्यगोचरत्वमुच्यते तत्र च ''तदेतदृष्टं च श्रुतं चे''ति छान्दोग्ये तृतीये दृष्टत्वादिकमुच्यते ततो नैकार्थ्यमित्याशङ्क्याह ॥ न चेति ॥ आकारेति ॥ शुद्धरूपेणादृष्टत्वादिविशिष्टरूपेण दृष्टत्वादिकमित्यर्थः । यद्वा कात्स्न्र्येनादृष्टत्वादि एकदेशेन दृष्टत्वादीत्यर्थः । यद्वा सूक्ष्मस्थूलाकारभेदेनेत्यर्थः । ननु कुत एवं कर्णादिविदूरत्वदृष्टत्वादेराकारभेदेनाविरोधं व्युत्पाद्य अग्निपर्यायतेजश्शब्दस्य गायत्र्यां श्रवणेनाग्निसूक्तस्थछान्दोग्यस्थवाक्ययोरैकार्थ्यं चापाद्य ज्योतिश्श्रुत्या गुहानिहितत्वधर्मेण चानेकत्र श्रुतज्योतिष एकत्वव्युत्पादनेनैकाधिकरण्यसमर्थनक्लेशः । भिन्नविषयतयाऽधिकरणद्वयमेवास्त्वित्यत ऐकाधिकरण्ये सूत्रे भाष्ये च ज्ञापकमाह ॥ एकाधिकरणत्वादेवेति ॥ अनुक्त्वेति ॥ अन्यथाऽऽकाशस्तल्लिङ्गादत एव प्राण इत्यादाविव गायत्र्यादिसमन्वेतव्यशब्दोपादानं स्यादिति भावः ॥ अग्नीति ॥ अन्यथा गायत्रीपदमेव प्रयुञ्जीतेति भावः । नन्वेवमपि सन्न्यायरत्नावलीकृन्मते छान्दोग्यवाक्यस्यैव ज्योतिरादिसूत्रचतुष्टये विषयत्वात्तत्र छन्दोभिधानादिसम्भवेपि चरणशब्दितकर्णादिविदूरत्वादेरभावेन चरणाभिधानादित्ययुक्तमित्यत आह ॥ द्वितीयेपीति ॥ पक्ष इति वर्तते । नन्वयुक्तमेतत् । छान्दोग्यगतज्योतिषो विष्णुत्वे तत्रत्यानां ''ततो ज्यायांश्च पुरुषः यद्वै तद्ब्रह्म य एतामेव ब्रह्मोपनिषदं वेदे''ति श्रुतीनां ''एतामेव नातिशीयन्त'' इति सर्वोत्तमत्वगानत्राणकर्तृत्वभूतादिपादत्वादिलिङ्गानां च त्यागेनान्यगतलिङ्गोदाहरणे प्रयोजनाभावादित्याशङ्क्याह ॥ यद्यपीति ॥ एवं तद्वय एकैकं वाक्यमुदाहरणमुपेत्य सूत्राणां सामंजस्यमुक्तम् ॥

पाण्डुरङ्गि — ननु द्वितीयं मतमयुक्तम् । तत्र विषयवाक्यतयाऽभिमते अथ यदतः परो दिव इत्यत्र प्रथमसूत्रोक्तस्य कर्णादिविदूरत्वस्याश्रवणात् । किं च तत्तत्प्रकरणस्थानामेव यद्वै तद्ब्रह्मेत्यादिश्रुतिलिङ्गादीनां सत्वेन तेनैव तत्रोक्तस्य ब्रह्मत्वसाधनस्योपपत्त्या सूत्रकारीयं सूक्तान्तरस्थकर्णादिविदूरत्वरूपलिङ्गग्रहणमनुपपन्नमित्यत आह ॥ द्वितीयेऽपीत्यादिना ॥ उक्तरीत्येति ॥ ज्योतिर्हृदय आहितं यदित्यग्निसूक्तस्थस्यैव ज्योतिषः छान्दोग्ये ज्योतिश्श्रुत्या योऽयमन्तर्हृदय इति हृदयनिहितत्वधर्मेण च शाखान्तराधिकरणन्यायेन प्रत्यभिज्ञाय मानत्वेनैकत्वादित्युक्तरीत्येत्यर्थः ॥ स्ववाक्यस्थानीति ॥ तथाच स्ववाक्यस्थलिङ्गादिपरिग्रहे लाघवमिति भावः ॥ भिक्षुकपादेति ॥ भिक्षुकस्य वामनस्य बलिदत्तत्रिपादस्थलग्रहणमिषेण सर्वां त्रिलोकीं ग्रहीतुमभिवृद्धीकृतप्रसारणवदित्यर्थः ।

तात्पर्यचन्द्रिका

यद्वा मतद्वयेपि वाक्यद्वयमप्युदाहरणम् । यथा ह्यग्निसूक्तस्थवाक्ये प्रकरणानुगृहीतश्रुत्या पूर्वःपक्षः । तथा छान्दोग्येपि ''गायत्रीवा इदं सर्व''मित्युपक्रमात् ''सैषा चतुष्पदा षड्विधा गायत्री''ति चोपसंहारात्तस्य गायत्रीप्रकरणत्वेन तदनुगृहीतज्योतिःश्रुत्या पूर्वपक्ष इति पूर्वपक्षयुक्तिसाधारण्यात् । तथाग्निसूक्ते निरतिशयवैभवत्वलक्षणचरणेन सिद्धान्तवच्छान्दोग्येपि ''एतामेव नातिशीयन्त'' इति निरतिशयवैभवरूपेण चरणेन सिद्धान्त इति सिद्धान्तयुक्तिसाधारण्याच्चैकाधिकरणता । यथाऽऽघाराग्निहोत्राद्यधिकरणेषु ''आघारमाघारयति अग्निहोत्रं जुहोती''त्याद्युदाहरणभेदेपि द्रव्यदेवतालक्षणयागरूपाभावान्नानयोर्यागविधित्वमिति पूर्वपक्षयुक्तिसाधारण्यात् मन्त्रवर्णादिना देवतादिलाभान्न रूपाभाव इति सिद्धान्तयुक्तिसाधारण्याच्चैकाधिकरणता तद्वत् । छन्दःसूत्रे तु छन्दश्शब्दोऽग्नेरप्युपलक्षकः । अत एव ''अग्निगायत्र्यादी''ति भाष्येऽग्निपदप्रयोगः । उपदेशभेदादि पूर्वपक्षयुक्तिः ''भूतादिपादे''ति सिद्धान्तयुक्तिश्च छान्दोग्यवाक्यमात्रासाधारणी । एवं च यथाऽर्थवादनये भट्टमत एको विचारोऽर्थवादमन्त्रादिसाधारणोऽन्यस्त्वर्थवादमात्रासाधारण इति द्विपर्वा विचारः तथात्राप्युक्तरीत्या द्विपर्वा विचारः । अत एवास्य तत्वप्रदीपेंऽतर्भेदाधिकरणत्वमुक्तमिति दिक् ।

प्रकाशिका — अधुना मतद्वयेपि वाक्यद्वयमप्युदाहरणम् । पूर्वोत्तरपक्षन्यायसाम्याच्चैकाधिकरणता । न हि विषयभेदमात्रेणाधिकरणभेदः । अतो न वैयधिकरण्यमित्याह ॥ यद्वेति ॥ छांदोग्येपीति ॥ तदनुगृहीतश्रुत्येत्यन्वयः । तत्र गायत्रीप्रकरणत्वं साधयति ॥ गायत्रीवा इदमित्यादिना ॥ चरणेनेति ॥ कर्णादीन्द्रियापरिच्छेद्यत्वरूपविचरणेनेत्यर्थः ॥ साधारण्यादिति ॥ भूतादीति युक्त्यंतरं तु छान्दोग्यमात्रासाधारणमिति वक्ष्यत इति भावः । वाक्यभेदेपि न्यायसाम्यादैकाधिकरण्ये दृष्टान्तमाह ॥ यथेति ॥ अधिकरणशरीरं प्रागुक्तं समन्वयसूत्रे । द्रव्यदेवते हि यागस्य रूपमुच्यते । तदलाभे सति विधानयोग्यस्वरूपविशेषानवगत्या नानयोर्यागविधित्वमिति ''दध्ना जुहोति सन्ततमाघारयती''त्यादिवाक्यप्राप्तहोमाघारसमुदायानुवादत्वरूपपूर्वपक्षयुक्तिसाधारण्यात् ''अग्निर्ज्योतिरग्निस्स्वाहेति सायं जुहोति इन्द्रं ऊर्ध्वोध्वरमाघारयती''ति वचनविनियुक्तमन्त्रवर्णात् ''दध्ना जुहोति चतुर्गृहीतं वा एतदभू''दित्यादिनाच देवताद्रव्यलाभरूपस्वतन्त्रहोमाघारविधिरिति सिद्धान्तयुक्तिसाधारण्याच्चेत्यर्थः । आदिशब्देन चित्राज्याधिकरणयववराहाधिकरणादेर्ग्रहणम् । ननु वाक्यद्वयेपि ज्योतिष एव विषयत्वेन ज्योतिस्सूत्रे ज्योतिर्मात्रग्रहणेपि छन्दस्सूत्रे छन्दोमात्रग्रहणं न युक्तम् । नह्युभयत्र छन्द इत्येव पूर्वपक्षः । किंतु सूक्तेऽग्निरिति छान्दोग्ये छन्द इति ॥ अत आह ॥ छन्दस्सूत्र इति ॥ गायत्रीरूपछन्दस्युपदेशभेदादिरूपानुपपत्त्यंतरमुद्भाव्य समाधातुं तस्य मुखतः कीर्तनमिति भावः । उपलक्षकत्वे ज्ञापकमत एवेति । नन्वाद्यसूत्रद्वयस्य कथं चिद्वाक्यद्वयसाधारण्यसम्भवेऽप्युत्तरसूत्रद्वयस्य न तत्सम्भवति । सूक्ते भूतादिपादव्यपदेशादेरभावादित्यत आह ॥ उपदेशेति ॥ यथानन्दमयाधिकरणे तद्धेतुव्यपदेशादित्यानन्दमयमात्रासाधारणं तद्वदिति भावः ।

मीमांसकसम्मत्या चोक्तमर्थं निष्कृष्याह ॥ एवं चेति ॥ अर्थवादाधिकरणं प्रागुक्तमाद्याधिकरणे । तत्र ''आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थाना''मिति सूत्रेणाक्रियार्थानामर्थवादमन्त्रनामधेयानामानर्थक्यादप्रामाण्यमिति पूर्वः पक्षः । ''विधिना त्वेकवाक्यत्वात्स्तुत्यर्थत्वेन विधीनां स्यु''रिति सिद्धान्तसूत्रस्थेन तुशब्देन ''तुल्यं च सांप्रदायिक''मिति सूत्रेण वा कृत्स्नस्वाध्यायपुरुषार्थपर्यवसाय्यध्ययनविधिमहिम्नाऽर्थवादादीनां सप्रयोजनत्वावसायेन प्रामाण्यमिति सिद्धान्त इति साधारण एको विचारः । पुनरर्थवादानां द्वाराभावादप्रामाण्यमिति पूर्वः पक्षः । सिद्धान्तसूत्रे स्तुतिग्रहणाद्वारसम्भवात्प्रामाण्यमित्यसाधारणोऽन्यो विचार इति यथा द्विपर्वाविचारः तथेहापि वाक्यद्वयगतज्योतिश्शब्दार्थो

विष्णुरन्यो वेति संशये अग्निछन्दस्त्वाभिधानाद प्रसिद्धज्योतिर्गायत्रीपदप्रयोगे प्रयोजनाभावान्न विष्णुः किं त्वन्य इति प्राप्ते उभयत्र चरणशब्दितापरिच्छिन्नवैभवत्वस्याभिधानात्तथोपासनार्थमप्रसिद्धपदप्रयोगस्यापि सम्भवाद्विष्णुरिति सिद्धान्त इत्येको विचारः । पुनश्छान्दोग्यस्थज्योतिर्न ब्रह्म किंतूपदेशभेदादिति प्राप्ते भूतादिपादव्यपदेशादिना सिद्धान्त इत्यन्यो विचार इति द्विपर्वा विचार इत्यर्थः । अत एव साधारणासाधारणद्विरूपविचारत्वादेवेत्यर्थः । ननु ''नित्यत्वादेव शब्दानां तत्स्वभावः कथं तत'' इत्यनुव्याख्यानोक्तायाः पूर्वपक्षयुक्तेः ''तादृशत्वाच्च तच्छक्ते''रित्युक्तसिद्धान्तयुक्तेश्चाग्निसूक्तस्थज्योतिष्ययोगात्कथमिदमुदाहरणमिति चेन्न । तयोर्भूतादिपादव्यपदेशादिवद्गायत्रीवाक्यमात्रासाधारण्येनोपपत्तेः । अत एव द्विपर्वा विचार इत्युक्तम् । नन्वथापि ज्योतिस्सूत्रे इदमग्निसूक्तमेव न विष्णुसूक्तमित्यध्यापकप्रसिद्धेरज्ञानमूलत्वादिरूपो न्यायो व्युत्पाद्यः । उत्तरत्रिसूत्र्यामनादिनित्यस्यापीशाधीनत्वादिव्युत्पादकन्याय इति न्यायस्य व्यवस्थितत्वात्तद्विषयस्यापि व्यवस्थाऽधिकरणभेदश्च वाच्य इति चेन्न । अन्तरागर्भिणीन्यायेनोपपत्तेः । अत एवान्तर्भेदाधिकरणत्वमुक्तमित्युक्तम् । एवमन्यदप्यूह्यमिति भावेनोक्तं दिगिति ॥

पाण्डुरङ्गि — ननु ज्योतिस्सूत्रे हृदय आहितमिति विषयवाक्यं छन्दस्सूत्रेतु अथ यदतः पर इत्यादिविषयवाक्यमित्याद्यमतद्वयमयुक्तम् । यत्रहि यन्निर्णीयते तत्र तदेव विषयवाक्यमित्युच्यते । न तु विषयवाक्यं नाम किंचिज्जात्या भिन्नमस्ति । तथाच ज्योतिस्सूत्रे हृदय आहितमित्यस्येवाथ यदतः पर इत्यादेरपि निर्णेतव्यत्वेन विषयवाक्यत्वात् तत्र हृदय आहितमित्येतदेव विषयवाक्यमित्यनुपपन्नम् । एवं छन्दस्सूत्रे अथ यदतः पर इत्यादेरिव हृदय आहितमित्यादेरपि निर्णेतव्यत्वेन विषयवाक्यत्वात् अथ यदत इत्येतदेव विषयवाक्यमित्यनुपपन्नमित्यस्वरसात्पक्षान्तरमाह ॥ यद्वेति ॥ ननु तेजो वै ब्रह्मवर्चसं गायत्रीति श्रुतेर्लक्षणया गौण्या वा वृत्त्या प्रवृत्तेः कथं तद्बलाद्गायत्रीज्योतिषोरभेदः स्यात् । तथा सति ब्रह्मवर्चस- शब्दसामानाधिकरण्याद्ब्रह्मवर्चसाभेदोपि गायत्र्या अङ्गीकार्यः स्यात् । किं च प्रमेयभेदे शब्दैक्यमात्रेण कथमधिकरणैक्यमित्यतो वाह ॥ यद्वेति ॥ नन्वेवं मतद्वयेपि वाक्यद्वयस्य विषयवाक्यत्वे विषयवाक्यभेदेनाधिकरणभेदः स्यादित्यतो न विषयवाक्यभेदमात्रमधिकरणभेदप्रयोजकम् । किंतु पूर्वपक्षसिद्धांतयुक्तिभेद एव प्रयोजकः । पूर्वतन्त्र एतत्तन्त्रेच तथैव दर्शनादित्यभिप्रायेणाह ॥ यथाहीत्यादिना ॥ ननु छन्दस्सूत्रेऽग्निशब्दाभावात्कथमग्निसूक्तस्य विषयवाक्यत्वमित्यत आह ॥ छन्दस्सूत्र इति ॥ अत एवेति ॥

(पाण्डुरङ्गि)

छन्दस्सूत्रस्याग्र्युपलक्षकत्वादेवेत्यर्थः । ननु पूर्वपक्षसिद्धान्तयुक्तिसाधारण्यमयुक्तम् । उपदेशभेदादिरूपायाः पूर्वपक्षयुक्तेर्भूतादिपादेति सिद्धान्तयुक्तेः छान्दोग्यवाक्यमात्रसाधारण्यादित्यतः तस्य तन्मात्रसाधारण्यं न दोषः । न चेदं कुत्रापि न दृष्टम् । अस्यामेव मीमांसायामानन्दमयाधिकरणेऽन्नमयादिपञ्चानां ब्रह्मत्वसाधकब्रह्मशब्दाभ्यासादेरिवानन्दमयमात्रस्य ब्रह्मत्वसाधकीभूततद्धेतुव्यपदेशाभिधानादिति स्पष्टत्वादनुपदर्श्य पूर्वमीमांसायामपि दृष्टान्तमस्तीत्याह ॥ उपदेशभेदादीति ॥ अर्थवादमन्त्रादीत्यादिपदेन नामधेयसङ्ग्रहः ॥ अन्यस्त्विति ॥ अर्थवादानां प्राशस्त्यलक्षणया विधिवाक्यैकवाक्यत्वेन प्रामाण्यमित्यादिरित्यर्थः ॥ द्विपर्वाविचार इति ॥ विध्यतिरिक्तवेदस्याक्रियार्थत्वादप्रामाण्ये प्राप्ते विध्येकवाक्यत्वेन प्रामाण्यमिति साधारणः । अर्थवादानामभूतार्थत्वेन क्रियार्थत्वं स्तावकत्वेन प्राशस्त्यलक्षणयैकवाक्यत्वमित्यर्थवादमात्रासाधारण इति द्विप्रकारको विचारो यथा तथा ज्योतिर्गायत्र्योर्विष्ण्वन्यत्वेन प्रकारेण साधारणः गायत्रीत्वेन ज्योतिष्ट्वेन चासाधारण इति द्विप्रकारकोऽत्रापि विचार इत्यर्थः ।

तात्पर्यचन्द्रिका

तृतीयेऽपि ''कम्पनात् शब्दादेव प्रमित'' इत्यादाविवाधिकरणान्तरत्वेपि समन्वेतव्यशब्दान्तरस्य साक्षादनुक्तिर्न विरुद्धा । सूचनं तु प्रकृतेपि ''छन्दोभिधाना''दित्यनेन कृतम् । भाष्येऽग्निपदं त्वन्यत्र प्रसिद्धगायत्रीपदस्य विष्णौ प्रयोगे प्रयोजनमत्र वदता सूत्रकृता पूर्वत्रोत्तरत्र चाग्र्यादिपदस्य विष्णौ प्रयोगे प्रयोजनं सूचितमिति दर्शयितुम् । अन्यथा मतान्तरेपि ''अग्निगायत्र्यादी''त्यादि पदं व्यर्थं स्यात् । अनुव्याख्यानन्यायविवरणयोर्ज्योतिरित्यत्राधिकाशङ्कानुक्तिस्तु ''अग्निसूक्तस्थत्वा''दिति भाष्य एवोक्तत्वात् । न तु तस्यैकाधिकरणत्वात् । ''अधिभूताध्यात्माधिदैवगतानामपि शब्दाना''मिति न्यायविवरणे ज्योतिरधिकरणस्य पृथगुपाध्यनुक्तिरपि तस्याकाशाधिकरणवदधिभूतगतशब्दविषयत्वं वांऽतरधिकरणवदधिदैवगतशब्दविषयत्वं वेत्यभिप्रेत्य । न त्वेकाधिकरणत्वमभिप्रेत्य । सूक्तविषयत्वमेव हि ततोऽस्य विशेषः । इदं च मतत्रयं सूत्रयोजनामात्रे भिन्नम् । प्रमेये त्वविरुद्धम् । एवमन्यत्राप्यविरोध ऊह्यः ॥ तत्र ज्योतिरधिकरणे सूक्तस्था ज्योतिरादिशब्दा उदाहरणम् । प्राणाधिकरणन्यायागोचरत्वप्रदर्शनेन पूर्वपक्षोत्थानादनन्तरसङ्गतिः ।

प्रकाशिका — एवं मतद्वयं समर्थ्य टीकाकारमतं चोपपन्नमित्याह ॥ तृतीयेपीति । पक्ष इति सम्बध्यते । यदुक्तं समन्वेतव्यशब्दानुक्तेश्छन्दःप्रभृतिसूत्रत्रयं न भिन्नाधिकरणमिति तत्र किं साक्षादनुक्तिरभिप्रेतार्थसूचनमपि वेति । आद्यः कल्पो व्यभिचारीत्याह । कम्पनादिति ॥ तत्र ''महद्भयं वज्रमुद्यत''मिति वज्रशब्दस्समन्वीयते । शब्दादित्रेशानशब्दः । पत्यादिशब्देभ्य इत्यत्र ब्राह्मणशब्दः । न च तत्र त उपात्ताः तथाप्यधिकरणान्तरत्वं तत्र संमतमित्यर्थः । द्वितीये त्वाह ॥ सूचनं त्विति ॥ छन्दश्शब्देन गायत्रीशब्दसूचनादिति भावः । ननु तत्सूत्रभाष्ये गायत्रीपदप्रयोगमात्रे कर्तव्ये ''अग्निगायत्र्यादिशब्दार्थरूपोऽसाविति चेतोर्पणार्थं हि निगद्यत'' इत्यग्निपदोपादानमयुक्तमित्यत आह ॥ अग्निपदं त्विति ॥ प्रयोजनमिति ॥ तत्तत्पदप्रवृत्तिनिमित्तगुणवत्तयोपासनारूपप्रयोजनमित्यर्थः । अत्र अधिकरणे ॥ अग्र्यादीति ॥ अग्र्याकाशप्राणभूमाक्षरादिपदस्येत्यर्थः । मतान्तरे प्रागुपन्यस्तमतद्वयेऽपीत्यर्थः । नन्वधिकरणान्तरत्वे पूर्वत्राकाशप्राणाधिकरणयोरिवोत्तरत्र छन्दोधिकरण इव च ज्योतिरधिकरणेऽभ्यधिकाशङ्कोक्तिस्स्यादित्यत आह ॥ अनुव्याख्यानेति ॥ उक्तत्वादिति ॥ विवरिष्यते चैतदिति भावः ।

नन्वधिकरणोपाध्युक्तिपर्यालोचनया च ज्योतिरादिचतुस्सूत्र्या एकाधिकरण्यं प्रतीयते । अन्यथा सूक्तगता इत्यप्युच्येतेत्यत आह ॥ अधिभूतेति ॥ ननु तर्हि तेनैव गतत्वात्किमर्थमेतदित्यत आह ॥ सूक्तेति ॥ ननु तर्हि परस्परविरुद्धत्वान्मतत्रयस्यापि प्रामाण्याद्वस्तुनि विकल्पस्स्यादित्यत आह ॥ इदं चेति ॥ एवमिति ॥ कारणत्वेन चाकाशादिष्वित्यादावित्यर्थः । तथाच तत्र वक्ष्यामः । एवं टीकारीत्याधिकरणभेदे समर्थिते सति । अन्यत्र अनुक्तेः । कस्तर्ह्यस्य विषयोपाधिः । ज्योतिश्शब्दस्य देवतावाचित्वे जडवाचित्वे वान्तराद्यधिकरणन्यायेन गतत्वादित्यत आह ॥ तत्रेति ॥ सूक्तगतत्वं विषयतावच्छेदकम् । ज्योतिश्शब्दस्य च वायुवाचिप्राणशब्दसमन्वयेन तज्जन्याग्निवाचित्वेन बुद्धौ सन्निधानादितरोपलक्षकत्वेनोपादानमिति भावः । नन्वस्य टीकारीत्या शास्त्राध्यायसङ्गतत्वेऽपि नात्रपादे सङ्गतिः । तथाहि । ज्योतिश्शब्दस्य भूतपरत्व आकाशाधिकरणन्यायेन देवतापरत्वेंऽतरधिकरणन्यायेन विष्णौ प्रयोगात् ''आकाशोर्थान्तरत्वादी''त्यादावाकाशशब्दस्येव पूर्वोक्त्यन्यत्रप्रसिद्धिभ्यामुभयत्र प्रसिद्धतापत्त्या नात्र समन्वयो युक्तः । न च पादांत्यप्राणाधिकरणे प्राणशब्दस्य पूर्वं समन्वयेपि लोकप्रसिद्ध्याऽन्यत्रप्रसिद्धत्ववदिहापि स्यादिति वाच्यम् । तत्र पूर्वपक्षे

(प्रकाशिका)

पूर्वोक्तसमन्वयस्याक्षेपेण तथात्वसम्भवेपि इह पूर्वोक्ताक्षेपाभावेन तदसम्भवात् । न च पूर्वं ज्योतिश्शब्दपर्यायाग्निशब्दस्यैव समन्वयो न ज्योतिश्शब्दस्येति वाच्यम् । अत्तेत्यधिकरण-टीकायामदितिश्रुतेस्सावकाशत्वोक्त्ययोगात् । सवित्रादिशब्दसमन्वयमात्रेण तत्पर्यायस्यादि-त्यशब्दस्य सर्वत्रेत्यधिकरणे सावकाशताया वक्ष्यमाणत्वाच्च । अत एवाग्रे वक्ष्यति ''सावकाशाग्निश्रुत्या सावकाशविष्णुलिङ्गबाधादिती''ति चेत्सत्यम् । लोकतोऽन्यत्र प्रसिद्ध-प्रकरणेन ज्योतिर्नाम्नोप्यन्यत्र प्रसिद्धत्वात् । उक्तं हि ''श्रुत्यादितो लोकतो वापीतरेषु प्रसिद्धते''ति ।

न चैवं निरवकाशप्रकरणवशेनान्यत्रैव प्रसिद्धता स्यात् । ''बलवत् श्रुतिलिङ्गाद्यैरन्येष्वेव प्रसिद्धते''त्युक्तेरिति वाच्यम् । नाम्नो विष्णावपि सावकाशत्वात् । प्रागुक्तदिशा तत्र विवक्षितबलवत्त्वस्येहाभावाच्च । लोकत इति टीकातु प्राक् साक्षादसमन्वितत्वात् समन्वितत्वेप्यापाततो लोकप्रसिद्ध्यावा प्रकरणस्य लोकतः प्रसिद्ध्यावा परम्परया पूर्वत्रेवात्रान्यप्रसिद्धिबाधकनिरवकाशलिङ्गाभावादिति वा नेया । नचैवं येन श्रुतेरन्यत्र प्रसिद्धता तदेव प्रागसमन्वितं प्रकरणं ''ईक्षतिकर्मे''त्यत्र स्थानमिवेह समन्वीयताम् । पादसङ्गतिस्त्वंतरित्यादेरिव फलतस्सेत्स्यतीति वाच्यम् । प्राङ्नाम्नः समन्वितत्वेन तस्यैवेह बुद्धिस्थत्वात् । न च प्रागपि नामद्वारा तत्तन्नामयुक्तं प्रकरणमर्थात्समन्वितमिति वाच्यम् । नाम्न एव साक्षात्समन्वितत्वेनेहापि धीस्थत्वात् । साक्षादर्थनिष्ठनामद्वारेणैव प्रकरण-समन्वयस्योचितत्वाच्च । स्थानस्यापि सन्नामद्वारेणैव समन्वेष्यमाणत्वाच्च । यद्वा न पूर्वोक्त्यन्यत्रप्रसिद्धिभ्यामुभयत्रप्रसिद्धता । किन्तु श्रुतिलिङ्गादितौल्येन वा प्रवृत्तिनिमित्त-साम्येन वा सा । न चात्र तथा । येनासङ्गतिः । ''आकाशोर्थान्तरत्वादी''त्यत्राकाश-शब्दस्योभयत्र प्रसिद्धता तु पादांत्यप्राणाधिकरणेऽन्यथैव वक्ष्यत इति । ननु भाष्यरीत्या सङ्गत्याश्रयणे आनन्दमयाधिकरणानन्तर्यप्राप्तेरत्र निवेशो न युक्त इत्यतः पूर्वसङ्गतिमाह ॥ प्राणेति ॥ एतच्चाग्रे स्पष्टमिति भावः ॥ सङ्गतिरिति ॥ प्रत्युदाहरणरूपेत्यर्थः । उक्तं च ''पूर्वन्यायात्ययो यत्र प्रत्युदाहरणातु से''ति । ''यो वेद निहितं गुहायामित्युक्त''मिति भाष्यन्तु यद्यग्निसूक्तगतं ज्योतिर्विष्णोरन्यत्तर्हि तन्निष्ठगुहानिहितत्व- युक्तानन्दमयोप्यन्यः प्रसज्येतेति पूर्वपक्षे आनन्दमयाधिकरणाक्षेपात् सिद्धान्ते च तत्समाधानात्सफलोयं विचार इति प्रयोजनमात्रपरमिति भावः । एतच्चांतरधिकरणप्रयोजनसमर्थनरीत्या समर्थनीयम् । नन्वेवं यदि ज्योतिर्विष्णोरन्यत्तर्हि तस्यैव गुहानिहितत्वात्प्रागुक्तांतस्थत्वमपि

तस्यैवेत्यन्तरधिकरणमप्याक्षेप्तुं शक्यते । एवं च पूर्वोक्ताक्षेपेणोभयत्र प्रसिद्धत्वशङ्कापि नोदेष्यति ॥ न च गुहानिहितत्वमन्यदन्तस्थत्वं चान्यदिति वाच्यम् । तस्यापि ''निहितं गुहा''स्विति गुहानिहितत्वरूपत्वादिति तत्रैवोक्तत्वात् ज्योतिषो गुहानिहितत्वात् तस्य च यो वेद निहितमिति मन्त्रवर्णे श्रवणात् मांत्रवर्णिकस्यैवानन्दमयत्वात्सोपि ज्योतिरित्याक्षेपादस्याक्षेपस्य ऋजुत्वादिति चेन्न । पूर्वत्र तदधिकरणस्यैवाक्षेपेणेहापि तथात्वस्यैवौचित्यात् । व्यवहिताक्षेपस्याविशेषात् अंतर्नयाक्षेपस्याप्यानन्दमयनयाक्षेपपर्यंतत्वस्यावश्यकत्वाच्च । अन्यथा जिज्ञासाक्षेपपर्यवसानायोगात् । साक्षादेव तदाक्षेपसम्भवे तद्वारा तदाक्षेपस्य वक्तव्यत्वाच्च । न चैवं मनश्चक्षुराद्यगोचरत्वरूपादृश्यत्वश्रवणात्तद्युक्तानन्दमयोपि ज्योतिरित्यस्य ऋजुत्वात्तथैवाक्षिप्यतामिति वाच्यम् । अनेकसमभिव्याहारलभ्यादृश्यत्वमुखाक्षेपापेक्षया एकवाक्यलभ्यसन्निहितगुहास्थत्वमुखेनाक्षेपस्यैव ऋजुत्वादिति ॥

पाण्डुरङ्गि — ननु तृतीयं मतमनुपपन्नम् । ज्योतिस्सूत्रं यदि पृथगधिकरणं स्यात्तदा छन्दस्सूत्रे समन्वेतव्यशब्दो वक्तव्यस्स्यात् । तथाच तदनुक्तिर्दोषः । एवं छन्दस्सूत्रभाष्ये अग्निगायत्र्यादीत्यत्रत्याग्निपदमनुपपन्नम् । ज्योतिस्सूत्रे आकाशादिसूत्रादाविवानुव्याख्यानन्यायविवरणयोरधिकाशङ्का वक्तव्या । तथाच तदनुक्तिर्दोषः । तथा ज्योतिरधिकरणे पृथगुपाध्यनुक्तिश्चायुक्ता । तद्बलाच्चतुस्सूत्र्या एकाधिकरणत्वमेवावगम्यत इति तद्विरुद्धं टीकाकारमतमनुपपन्नमेवेत्यतस्तत्रानुपपत्तीः परिहरति ॥ तृतीय इति ॥ अन्यथा मतान्तरेपीति ॥ एतद्भाष्योपात्तशब्दस्यात्र समन्वेतव्यत्वनियम इत्यर्थः। । तत्रादिपदेनापि समन्वेतव्यशब्दसमकक्षतया साक्षादसमन्वेतव्यवाक्पृथिव्यादिशब्दोपादानस्यास्वारस्येन मुख्यतः समन्वेतव्यपूर्वोत्तराधिकरणस्थशब्दानामेव ग्रहणस्यावश्यकत्वादित्यर्थः । ननु यथाऽऽकाशाधिकरणवदधिभूतगतशब्दविषयत्वं वांऽतराधिकरणवदधिदैवगतशब्दविषयत्वं वा यद्यस्याभ्युपगम्यते तर्हि तदधिकरणद्वयशेषत्वापत्त्याऽधिकरणान्तरत्वमनुपपन्नमित्यत आह ॥ सूक्तेति ॥ ननु यदि मतत्रयमपि प्रामाणिकं स्यात्तर्हि वस्तुनो द्वैरूप्यं स्यात् । तथाच कथं मतत्रयमपि प्रामाणिकमित्युच्यत इत्यत आह ॥ इदं चेति ॥ अनन्तरसङ्गतिरिति । आतिदेशिकीत्यर्थः ।

तात्पर्यचन्द्रिका

अत्र ज्योतिः किमग्निः किं वा विष्णुरिति चिन्ता । तदर्थं किं ज्योतिश्श्रुति-प्रसिद्ध्यनुसारेण कर्णादिविदूरत्वलिङ्गं बाध्यमुत विपरीतमिति । तदर्थं किं श्रुत्यनु-ग्राहकं सूक्तं निरवकाशमुत सावकाशमिति । पूर्वपक्षस्तु । युक्तः पूर्वत्र वायुसूक्त-स्थस्य प्राणश्रुतिमात्रस्य निरवकाशविष्णुलिङ्गैर्बाधः । अत्र तु ज्योतिश्श्रुतेर्न बाधः । प्रकरणरूपेण सूक्तेनानुगृहीतत्वात् । यद्यपि ज्योतिश्शब्दस्तमोविरोधिमात्रे प्रसिद्धः तथापि हृदयाहितत्वलिङ्गात् । ''त्वामग्ने तमसी''त्यग्निशब्दसन्निधानाच्चाग्निपरः । नत्वग्निसूक्तस्थत्वाज्ज्योतिश्शब्दोऽग्निपरः । तथात्वे सूक्तस्याग्निश्रुतिसम्पादकत्वेन श्रुत्यनुग्राहकत्वायोगात् । एतेन ज्योतिश्शब्दाग्निशब्दौ देवतापरौ चेदंतरधिकरण-न्यायेन ब्रह्मपरौ । भूतपरौ चेदाकाशाधिकरणन्यायेन ब्रह्मपरौ । सावकाशाग्नि-श्रुतेर्निरवकाशविष्णुलिङ्गैर्बाधात् । न चाग्निश्रुतिः प्रकरणानुगृहीतेति वाच्यम् । तत्तत्सूक्तस्थाग्न्यादिश्रुतीनां विष्णौ सावकाशत्वे सूक्तानामपि तथात्वात् । सर्व-सूक्तानां वैष्णवत्वेपीदमग्निसूक्तमिदं त्वन्यदिति व्यवस्थातु ''अभिव्यक्तेरित्या-श्मरथ्य'' इति वक्ष्यमाणन्यायेन युक्ता । एवं च सावकाशसूक्तस्य निरवका-विष्णुलिङ्गैः सुतरां बाधेन पूर्वपक्षानुदय इति परास्तम् । सावकाशाग्निश्रुत्या सावकाशविष्णुलिङ्गबाधात् ।

प्रकाशिका — अत्रेति ॥ ''विमे कर्णापतयतो विचक्षुर्वी३दं ज्योतिर्हृदय आहितं यत्। विमे मनश्चरति दूर आधीः किं स्विद्वक्ष्यामि किमुनू मनिष्य'' इत्यग्निसूक्तादि-गतज्योतिरादिशब्दो विषय इत्यर्थः ॥ अग्निरिति ॥ कोट्यंतरप्राप्त्यभावस्य वक्ष्यमाण-त्वादिति भावः ॥ विपरीतमिति ॥ लिङ्गात् श्रुतिर्बाध्येत्यर्थः । यदि सूक्तं निरवकाशं तदा तदनुगृहीतया बलीयस्या कृत्या लिङ्गस्य बाधादग्निरिति पूर्वपक्षे फलम् । यदि सावकाशं तदा दुर्बलया श्रुत्या निरवकाशलिङ्गबाधायोगाद्विष्णुरिति सिद्धान्ते फलमिति स्पष्टत्वा-त्फलफलिभावो नोक्तः । द्वावत्र पूर्वपक्षौ । एकस्तावदभ्यधिकाशङ्कां विनैव ज्योतिश्श्रुति-विष्णुलिङ्गयोः पूर्वोत्तरपक्षप्रापकयोस्सावकाशत्वमुपेत्य जात्या बलवत्या श्रुत्यैव लिङ्गबाधः सूक्तस्थत्वं त्वभ्युच्चययुक्तित्वेनोच्यत इति । अन्यस्तु विष्णुलिङ्गस्य निरवकाशत्वमुपेत्य श्रुतिमात्रेण पूर्वपक्षोदयायोगादभ्यधिकाशङ्क्येति । आद्यस्तु टीकानुसारी । अंत्यस्तु

सुधानुसारी । तत्रेयं चिन्तापरंपरा द्वितीयपूर्वपक्षानुरोधेन । आद्यपूर्वपक्षे तु उत विपरीतमिति द्वितीयचिन्तानन्तरं तदर्थं श्रुत्यनुग्राहकमित्यत्र तदर्थं लिङ्गं सावकाशमुत निरवकामिति चिन्ता द्रष्टव्या । यदि सावकाशं तदा श्रुत्या लिङ्गबाधादग्निरिति पूर्वपक्षे फलम् । यदि निरवकाशं तेन सावकाशश्रुतिबाधाद्विष्णुरिति सिद्धान्ते फलं ध्येयम् । अत्र ज्योतिरग्निर्विष्णुर्वा । तदर्थं श्रुत्या लिङ्गं बाध्यमुत लिङ्गात् श्रुतिः । तदर्थं श्रुतिबाधे मुख्यार्थहानिरुत नेति तदर्थं ज्योतिश्श्रुतिप्रवृत्तिनिमित्तं विष्णौ न युक्तमुत युक्तमिति । तदर्थं तमोविरोधित्वं प्रवृत्तिनिमित्तमुत प्रकाशत्वादिरूपमिति प्रमेयाश्रिताभ्यधिकाशङ्कोपयुक्ता चिन्तापरम्परा स्पष्टैवेति प्रमाणाश्रिताशङ्कोपयुक्तैव सा प्रदर्शितेति ध्येयम् ।

पूर्वन्यायाविषयत्वप्रदर्शनपूर्वं द्विविधं पूर्वपक्षं सङ्गृह्येण निर्दिशति ॥ युक्त इति ॥ अत्रैवं योजना । इदं ज्योतिरग्निरेव न विष्णुः । अग्नौ निरूढज्योतिश्श्रुतेः । न च पूर्ववन्निरवकाशलिङ्गेन ज्योतिश्श्रुतिबाध इति । युक्तः पूर्वत्र वायुसूक्तस्थस्येत्यादि ॥ प्रकरणेति ॥ उपलक्षणमेतत् । पूर्ववन्निरवकाशलिङ्गाभावादित्यपि ध्येयम् । सूक्तेनानुगृहीतत्वादिति युक्तिः आद्ये पूर्वपक्षेऽभ्युच्चयत्वेन द्वितीये तु पूर्वपक्षोत्थानार्थमुक्तेति ध्येयम् । ननु पक्षद्वयेपि न सूक्तस्य श्रुत्यनुग्राहकत्वम् । यावता श्रुतेः सवित्रादिपरत्वत्याजनेनाग्न्यादिपरत्वसम्पादनेवोपक्षयादित्याशङ्क्यानुग्राहकत्वं साधयति ॥ यद्यपीति ॥ हृदयेति ॥ तच्च जाठरजातवेदसि प्रसिद्धमिति भावः ॥ त्वामग्न इति ॥ ''विश्वेदेवा अनमस्यन्भियानास्त्वामग्ने तमसि तस्थिवांस''मिति श्रवणेन तत्सन्निधानात् । छागपशुन्यायेन विशेषश्रुत्या सामान्यश्रुतेरर्थोपपत्तेरिति भावः । एवं सूक्तस्य श्रुत्यनुग्राहकत्वं समर्थ्येदानीं पूर्वेण गतार्थतया पूर्वपक्षानुदयशङ्काप्रकारमनूद्य सुधोक्तदिशाऽधिकाशंकयोत्थानं वक्ष्यन् लिङ्गस्य निरवकाशत्वाभावादधिकाशङ्कां विनैव पूर्वपक्षोदय इति भावेन टीकाभिमतं पक्षं तावद्विशदयति ॥ एतेनेत्यादिना ॥ सूक्तस्य श्रुत्यनुग्राहकत्वकथनेन निरवकाशलिङ्गाभावेन चेत्यर्थः ॥ अंतरिति ॥ निरवकाशलिङ्गेन सावकाशदेवतावाचिश्रुतीनां प्रवृत्तिनिमित्तस्यैश्वर्यादेर्भगवद्गतत्वोक्त्या विष्णुवाचित्वसाधनरूपन्यायेनेत्यर्थः ॥ आकाशेति ॥ अचेतनगतस्यापि प्रवृत्तिनिमित्तस्य भगवदधीनत्वादिसमर्थनन्यायेनेत्यर्थः । तमेव न्यायमाह ॥ सावकाशेति ॥ ज्योतिःपदप्रवृत्तिनिमित्तस्य भगवद्गतत्वेन तदधीनत्वेन चेति भावः । श्रुतेरुज्जीवकमाशङ्क्य तदपि सावकाशमित्याह ॥ न चेति ॥ सूक्तरूपप्रकरणेत्यर्थः । ननु सूक्तानां वैष्णवत्वे इदमग्निसूक्तमिदं विष्णुसूक्तमिति व्यवस्थानुपपत्तेर्निरवकाशतेत्यत आह ॥ सर्वेति ॥

(प्रकाशिका)

वक्ष्यमाणेति ॥ वैश्वानराधिकरणे अग्न्यादिशब्दानां विष्णौ मुख्यत्वे तत्तत्सूक्तानां तत्तद्विद्यानां च वैदिकसिद्धव्यवस्थानुपपत्तेरन्यवाचित्वमेवेति प्राप्ते अग्न्यादिसूक्तादिभिर्विष्णूपासनायामग्न्यादावेव विष्णोरभिव्यक्तत्वाद्वा अग्न्यादिसूक्ताद्युपासकैरग्न्यादावेव विष्णोरनुस्मरणीयत्वाद्वा तत्तदुपासकानामग्न्यादिस्थविष्णुप्राप्तिरूपाद्वा निमित्तात्सूक्तादिव्यवस्थोपपत्तेरग्न्यादिशब्दानां विष्णौ मुख्यत्वं सूक्तादीनां तत्परत्वे व्यवस्थाच युज्यत इति सिद्धान्त इति वक्ष्यमाणन्यायेनेत्यर्थः ॥ सुतरामिति ॥ यदि जात्या प्रबलायाश्श्रुतेर्बाधस्तदा स्वभावतोपि दुर्बलस्य प्रकरणस्य किमु वाच्यं बाध इतीत्यर्थः ।

पाण्डुरङ्गि — नत्वग्निसूक्तस्थत्वादिति ॥ सूक्तं प्रकरणमित्यर्थः । प्रथमोपस्थितशब्दलिङ्गाभ्यामेवाग्निपरत्वे सम्भवति जघन्यप्रकरणप्रतीक्षणायोगादिति भावः । श्रुत्यनुग्राहकत्वायोगात् ॥ तथाच न निरवकाशलिङ्गबाधकत्वं तस्येति शेषः । यावता श्रुतित एव लिङ्गं दुर्बलमित्यादिटीकामवतारयति ॥ एतेनेत्यादिना ॥ विष्णुलिङ्गैर्बाधादिति ॥ हृद्याहितत्वं विश्वेदेवा अनमस्यन् भियाना इति सर्वदेवोपास्यत्वमित्यादिलिङ्गसाहित्येन सिद्धान्तलिङ्गानां बाहुल्यं ज्ञेयम् ॥ सुतरां बाधेनेति ॥ बाध्यदौर्बल्यातिशयस्य बाध उपचारोऽयमिति हृदयम् ।

तात्पर्यचन्द्रिका

नन्वेवं सावकाशलिङ्गस्य सावकाशश्रुत्यैव बाधसम्भवाद्भाष्ये सूक्तोक्तिर्व्यर्था । न च ज्योतिरिति सामान्यश्रुतेरग्निरूपविशेषपर्यवसानार्थं तदुक्तिः । टीकायां ''श्रुतिप्रकरणयो''रिति द्विवचनस्य भाष्ये ''अग्निसूक्तस्थत्वाच्चे''ति चशब्दस्य चायोगात् । सामान्यश्रुतेः ''त्वामग्ने'' इति विशेषोपस्थापके शब्दे सति प्रकरणाप्रतीक्षणाच्चेति चेन्न । लिङ्गस्यातिशयेन बाधाय सूक्तोक्तेः । अत एवोक्तं टीकायां ''यावता श्रुतित एव लिङ्गं दुर्बल''मिति । निरवकाशं तु विष्णुलिङ्गं नास्ति । गुहानिहितत्वस्य जाठराग्नावपि सम्भवात् । निरतिशयवैभवरूपकर्णादिदूरत्वस्य चाग्निश्रुत्यादिबलादग्नावप्युपपत्तेः । सुधायां तु ज्योतिरधिकरणे ''अधिकाशङ्का अग्निसूक्तस्थत्वादिति भाष्य एव दर्शिते''त्युक्तम् । तत्र च श्रुतिमात्रेण पूर्वपक्षानुदयात्तदुदयार्थमधिकाशङ्कोक्तिरिति नाभिप्रायः । उक्तरीत्या सूक्ताभावेपि पूर्वपक्षोदयसम्भवात् । किन्तु

पूर्वपक्षदार्ढ्यार्थं तदुक्तिरित्यभिप्रायः । यद्वा सुधायां प्राणाद्यधिकरणेष्वधिकाशङ्का-प्रदर्शकस्यानुव्याख्यानस्य ''नन्वेतदपि पूर्वन्यायेन परिहृतम् । न सूत्रारम्भं प्रयोजयतीत्यतोऽभ्यधिकाशङ्कां दर्शयती''त्यवतारितत्वादिहापि पूर्वपक्षोदयार्थमेव भाष्येऽधिकाशङ्कोक्तिरिति सुधाभिप्रायः ।

प्रकाशिका — नन्वेवमिति ॥ श्रुतिलिङ्गयोस्सावकाशत्वे सतीत्यर्थः ॥ न चेति ॥ प्रकरणस्य विशेषोपस्थापकत्वादिति भावः ॥ द्विवचनस्येति ॥ अन्यथा सावकाशलिङ्गमात्रात्सावकाशश्रुतेर्बलवत्त्वादित्येवब्रूयात् । प्रकरणस्याग्निश्रुतिसम्पादकत्वेनोपयोगात्तत्समतया निर्देशो न स्यादित्यर्थः । ननु तमोविरोधिमात्रे प्रसिद्धज्योतिश्शब्दस्याग्न्युपस्थापकत्वं कथमित्यत आह ॥ सामान्येति ॥ अत एवेति ॥ श्रुतिवत्सूक्तस्यापि स्वतन्त्रत्वादेव । टीकायां ''न हि लिङ्गं श्रुतिप्रकरणबाधने शक्तम् । यावता श्रुतित एव दुर्बल''मित्युक्तम् । अतो ज्ञायते सूक्तरूपं प्रकरणमतिशयार्थमुक्तमिति । ननु लिङ्गस्य निरवकाशत्वे कथं श्रुतित एव बाध इत्यत आह ॥ निरवकाशं त्विति ॥ निरतिशयेति ॥ सर्वथा कर्णादिविदूरत्वस्य क्वाप्यसम्भवादिति भावः । अस्मिन्पक्षे सुधाविरोधमाशङ्क्य सापि टीकानुसारेण नेयेति भावेन तत्तात्पर्यं वक्तुमाह ॥ सुधायामिति ॥ उक्तेति ॥ सावकाशश्रुत्या सावकाशलिङ्गबाध इत्युक्तरीत्येत्यर्थः । सुधावाक्यस्य यथा श्रुतार्थमनुसृत्याभ्यधिकाशङ्क्या पक्षान्तरमाह ॥ यद्वेति ॥

पाण्डुरङ्गि — ननु यदि सावकाशश्रुत्यापि लिङ्गस्य बाधात्पूर्वपक्षस्तर्हि सुधाविरोधः स्यात् । सुधायां ज्योतिरधिकरणे ''अभ्यधिकाशङ्का अग्निसूक्तत्वादिति भाष्ये एव प्रदर्शिते''त्युक्तत्वेन केवलश्रुतिमात्रस्य लिङ्गबाधकत्वाभावस्याभिप्रेतत्वादित्यत आह ॥ सुधायां त्विति ॥ उक्तरीत्येति ॥ सावकाशाग्निश्रुत्या सावकाशविष्णुलिङ्गबाधादित्युक्तरीत्येत्यर्थः । नन्वेवमभ्यधिकाशङ्काप्रायपाठत्यागः । पूर्वाधिकरणेषु श्रुतिमात्रेण लिङ्गस्य बाधासम्भवेन तदर्थमभ्यधिकाशङ्काया उक्तत्वादत्र दार्ढ्यार्थं तदुक्तिरित्यङ्गीकारादित्यरुचेराह ॥ यद्वेति ॥

तात्पर्यचन्द्रिका

एवं च तत्रेत्थं पूर्वपक्षः । यद्यपि पूर्वाधिकरणन्यायेन निरवकाशब्रह्मलिङ्गैः सावकाशाग्निश्रुतिबाधः । यद्यपि च सर्वसूक्तानां वैष्णवत्वेप्यभिव्यक्ते-

(तात्पर्यचन्द्रिका)

रित्यादिन्यायेनेदमग्निसूक्तमिदं वायुसूक्तमिति व्यवस्था सम्भवति । तथापीदमग्निसूक्तं न तु विष्णुसूक्तमित्यध्यापकप्रसिद्धेरयोगात्सूक्तं निरवकाशम् । एवं च निरवकाश-प्रकरणानुगृहीतश्रुत्या निरवकाशमपि कर्णादिविदूरत्वलिङ्गं बहुवैभवाभिप्रायेण कथं-चिदग्रावपि नेयम् । निरवकाशत्वमात्रप्रयुक्तस्य लिङ्गगतस्य प्राबल्यस्य श्रुतिगतान्नि-रवकाशसूक्तसाहित्यश्रुतित्वोभयप्रयुक्तप्राबल्यादुर्बलत्वात् । लिङ्गे बहुत्वप्रयुक्ते प्राबल्ये सत्यपि तस्य श्रुतित्वरूपस्वभावप्रयुक्तप्राबल्यादुर्बलत्वात् । अन्तरधिकरणस्थे-न्द्राग्न्यादिश्रुतिस्तु न सूक्तानुगृहीतेति । एवं चात्र टीकायां पूर्वपक्षहेतोः सूक्तस्य सिद्धान्तहेतोर्लिङ्गस्य च सावकाशत्वमिति पूर्वःपक्षः । सुधायां तूभयोर्निरव-काशत्वमिति भेदः ।

प्रकाशिका — ननूक्तरीत्या पूर्वेणागतत्वात्कथमधिकाशङ्कावकाश इत्यत आह ॥ एवं चेति ॥ तथापीति ॥ एतेन वैश्वानराधिकरणेन गतार्थतापि निरस्ता । एतच्छङ्कानिरासस्य तत्राकृतत्वादिति ॥ कथंचिदिति ॥ स्वावरापेक्षया बहुवैभवसत्त्वादिति भावः । निरवकाशेति सूक्तमात्रविशेषणम् । ननु गुहानिहितत्वकर्णादिविदूरत्वविश्वदेवनियामकत्वादिलिङ्गानां बहुत्वादुभयप्रयुक्तप्राबल्याद्बलवत्त्वं लिङ्गस्येत्यत आह ॥ लिङ्ग इति ॥

द्विविधं बलवत्त्वं च बहुत्वाच्च स्वभावतः ।
तयोः स्वभावो बलवानुपजीव्यादिकश्च सः ॥

इत्युक्तेरिति भावः । इयं च शङ्का न पूर्वाधिकरणेऽस्तीत्याह ॥ अंतरिति ॥ टीकाद्वयपूर्वपक्षाशयं निष्कृष्य दर्शयति ॥ एवं चेति ॥

पाण्डुरङ्गि — ननु तर्हि कर्णादिविदूरत्वलिङ्गस्य का गतिरित्यत आह ॥ एवं चेति ॥ ननु तर्ह्यंतरधिकरणस्थेन्द्रादिश्रुतेरपि सूत्रानुगृहीतत्वेन प्रबलत्वान्न विष्णुपरतेत्यत आह ॥ अन्तरधिकरणेति ।

तात्पर्यचन्द्रिका

यद्वा सुधानुसारेणात्रापि ''सावकाशश्रुतिप्रकरणयो''रिति टीकायां सावकाशत्वं श्रुतेरेव विशेषणं न तु प्रकरणस्य । टीकायां लिङ्गस्य सावकाशत्वोक्तिश्च

कर्णादिविदूरत्वस्य निरवकाशत्वेपि गुहानिहितत्वस्य सावकाशत्वमभिप्रेत्य वा स्वतो निरवकाशस्यापि सूक्तानुगृहीत श्रुतिविरोधात्कल्प्यावकाशमभिप्रेत्य वा द्रष्टव्या । लिङ्गस्य श्रुतित एव बाधोक्तिरपि सावकाशलिङ्गाभिप्रायेति । एते च शङ्के प्रमाणाश्रिते। प्रमेयाश्रिता तु तमो विरोधित्वस्य ज्योतिश्शब्दप्रवृत्तिनिमित्तस्य सर्वगतत्वेन तमसा सह स्थिते ब्रह्मण्ययोग इति । तत्र यद्यपि वैश्वानरो जायमान इत्यग्निसूक्ते वैश्वानरश्रुतिर्जायमानत्वलिङ्गं चास्ति तथापि विष्णौ श्रुतेः सावकाशताया वैश्वानराधिकरणे लिङ्गस्य सावकाशतायाश्च द्युभ्वाद्यधिकरणे कण्ठोक्तत्वान्न ताभ्यां पूर्वपक्षितं भाष्यटीकयोः ।

प्रकाशिका — एवं पूर्वपक्षद्वयं प्रस्थानद्वयाभिमतमित्युपपाद्य अधुना टीकाग्रन्थोपि लिङ्गप्रकरणयोर्निरवकाशत्वमुपेत्याधिकाशंकयोत्थपूर्वपक्षपरो नेयः । तथाचैक एवोभयत्र पूर्वपक्ष इति भावेनाह ॥ यद्वेति ॥ श्रुतेरेवेति ॥ तथाचोक्तदिशा सूक्तरूपं प्रकरणं निरवकाशमित्यभिप्रेत- मिति भावः ॥ लिङ्गस्येति ॥ अत एव ''जाठरजातवेदसि लिङ्गस्यापि सावकाशत्वा''दित्युक्तमिति भावः । कर्णादिविदूरत्वादिसाधारण्येनाह ॥ स्वत इति ॥ एते चेति ॥ श्रुतिसूक्तयोर्लिङ्गस्य सावकाशत्वमुपेत्योक्ता निरवकाशत्वमुपेत्योक्ता चेति शङ्काद्वयमित्यर्थः ॥ प्रमेयेति ॥ इयं च पूर्वोत्तरनयानुव्याख्यानेन तुल्यन्यायतया सूचिता । भाष्यादावचातुर्यमाशङ्क्याह ॥ तत्रेति ॥

पाण्डुरङ्गि — ननु कर्णादिविदूरत्वरूपलिङ्गस्य सावकाशत्वस्य पूर्वपक्षिणाप्य- नङ्गीकारात् सावकाशश्रुत्या निरवकाशलिङ्गबाध इति टीकोक्तः पूर्वपक्षोऽनुपपन्न एवेत्य- रुचेराह ॥ ननु सामान्यतः प्रयुक्तस्य लिङ्गशब्दस्य गुहानिहितत्वरूपलिङ्गविशेषपरत्वे लिङ्गपदस्यास्वारस्यं भवतीत्यतः पक्षान्तरमाह ॥ स्वतो निरवकाशस्यापीति ॥ नन्वेवमपि यावता श्रुतित एव लिङ्गं दुर्बलमिति टीकाविरोध इत्यत आह ॥ लिङ्गस्येति ॥

तात्पर्यचन्द्रिका

सिद्धान्तस्तु ॥

कर्णादीनां विदूरत्वं विष्णोरन्यत्र नैव हि ।
अग्नेस्तु श्रुतिसूक्तादि सावकाशं परात्मनि ॥ १ ॥

(तात्पर्यचन्द्रिका)

कर्णादिविदूरत्वं हि यदिति परिच्छेदानर्हवैभवत्वम् । न तु सर्वथा कर्णादिविदूरत्वम् । क्वाप्यसम्भवात् । तच्च परो मात्रयेत्यादिभाष्योक्तश्रुतिभिर्निरवकाशम् । न हि ''अग्निर्वै देवानामवम'' इत्यवमतया ''भीषास्मादग्निस्तपती''ति सभयतया ''परिह्येनं म्रियन्ते विद्युद्वृष्टिश्चन्द्रमा आदित्योग्नि''रिति मरणादिमत्तया च श्रुतस्याग्नेरपरिच्छेद्यं वैभवम् । अग्निश्रुत्यादि तु ''अग्निनाग्निःसमिध्यते तद्देवा ज्योतिषां ज्योतिः नारायणपरो ज्योतिः विष्णुरेव ज्योतिः अहमग्निरहं हुतम् । ज्योतिषामपि तज्ज्योति''रित्यादि श्रुतिस्मृतिभिर्विष्णौ सावकाशम् । इदं न विष्णुसूक्तमित्यध्यापकप्रसिद्धिस्तु ''धान्यमसी''ति मन्त्रस्य मांसहविष्कयागे निविष्टस्य मांसमसीत्यूहे कर्तव्ये मृगोसीत्यूहवत् प्रसिद्धविष्ण्वादिशब्दाभावादज्ञानमूला । तदुक्तं न्यायविवरणे ''संदिग्धश्रुतिलिङ्गाभ्यामप्यसन्दिग्धयोः केवलयोरेव बलवत्त्वा''दिति । अत्र च सन्दिग्धत्वं नाम सावकाशत्वम् ।

प्रकाशिका — सिद्धान्तटीकां विवृण्वन्प्रमाणाश्रितशङ्काद्वयनिरासकन्यायौ तावत्सङ्गृह्याह ॥ कर्णादीनामिति ॥ आद्यार्धेनाद्यपक्षनिरासको न्याय उक्तः । उत्तरार्धेन द्वितीयपक्षनिरासक इति ध्येयम् । श्रुतेस्सावकाशत्वाविवादेपि दृष्टान्तत्वेन वा प्रमेयाश्रितशङ्कापक्षे निरवकाशत्वाभिमानाद्वा श्रुत्युक्तिः । तथाहि । अग्निसूक्तगतं ज्योतिर्विष्णुरेव । न त्वग्निः । चरणशब्दोक्तकर्णादिविदूरत्वरूपलिङ्गात् । न च श्रुतिलिङ्गाभ्यां लिङ्गस्य बाधः । तस्य निरवकाशत्वादित्याद्यः । द्वितीयस्तु ज्योतिर्विष्णुरेव । निरवकाशलिङ्गात् । न च निरवकाशसूक्तानुगृहीतया श्रुत्या बाधः । तयोर्भगवति सावकाशत्वादिति । ननु कर्णादिविदूरत्वं श्रोत्रमनःप्रभृत्यविषयत्वम् । तच्च ब्रह्मणि न युक्तम् । तस्य मनोवृत्तिविषयत्वादित्यतो विष्णौ लिङ्गस्य घटनां तावदाह ॥ कर्णादीति ॥ अन्यत्र नैवेत्युक्तनिरवकाशतामुपपादयन् पूर्वार्धं विशदयति ॥ तच्चेति ॥ हिशब्दोक्तश्रुतीराह ॥ पर इति ॥ मीयन्तेऽनेन विषया इति मात्रा इन्द्रियगणः । ततः परोसीत्यर्थः । यद्वा मात्रायाः मितेः परः । अपरिमितोऽसीत्यर्थः । ''अग्निर्वै देवानामवमो विष्णुः परम'' इति बह्वृचब्राह्मणे स्वोत्तमदेवावमतया श्रुतस्येत्यन्वयः । यद्यपि ''भीषास्मादग्निश्चेन्द्रश्चे''त्येव तैत्तिरीयाणां पाठः । तथापि ''भयादस्याग्निस्तपती''ति श्रुत्यन्तरबलात्तपतीत्यध्याहृत्योक्तम् । यद्वा भीषास्मादिति श्रुतिप्रतीकग्रहणम् । अग्निस्तपतीत्यन्या श्रुतिः । अस्माद्भीषा अस्य

भयेनेत्यर्थः ॥ परीति ॥ ''तमेताः परिम्रियन्त'' इति बह्वृचब्राह्मणम् । ''म्रियन्ते पञ्चदेवता'' इति ऋग्भाष्योक्तेः । परिह्वेनमित्यर्थानुवादः ।

नन्वेवं श्रुत्यादेरपि निरवकाशत्वे तौल्यमेव स्यादित्यत उत्तरार्धं विशदयति ॥ अग्नीति ॥ विष्णौ सावकाशमित्यन्वयः । ''अग्निनाग्निस्समिध्यते कविर्गृहपतिर्युवा । हव्यवाड्जुह्वास्य'' इत्यत्राग्निसमिन्धकस्य भगवतोऽग्निशब्दवाच्यत्वोक्तेरिति भावः । यद्यप्यत्राग्निना गार्हपत्येनाहवनीयाग्निस्समिध्यत इत्यर्थः सम्भवति । उक्तं च ऋग्भाष्ये ''अथवाहवनीयोग्निर्मथितेन समिध्यत'' इति । तथापि ''यस्याऽऽस्ये हूयते सोग्निः परेशेन समिध्यत'' इत्युक्तत्वादस्यैव च मुख्यत्वादेतदुदाहृतमिति ध्येयम् । तद्देवा इति वाजसनेये यस्मादर्वाक् संवत्सरोऽहोभिः परिवर्तते तद्देवा ज्योतिषां ज्योतिरायुर्होपासते मृतमिति श्रुतस्य ज्योतिषां ज्योतिष्वप्रदज्योतिषो ब्रह्मत्वममृतत्वादिलिङ्गात् ''ज्योतिषैकेषा''मिति वक्ष्यमाणदिशा च सिद्धमिति भावः । ''नारायणपरो ज्योतिरात्मा नारायणः परः'' इति नारायणोपनिषदि नारायण एव परंज्योतिरिति परशब्दपर्यायपरस्शब्देनोत्तमज्योतिरित्युक्तेरिति भावः । ''विष्णुरेव ज्योतिर्विष्णुरेव ब्रह्म विष्णुरेवात्मा विष्णुरेव बलं विष्णुरेव यशो विष्णुरेवानन्द'' इति चतुर्वेदशिखायां स्पष्टमेव ज्योतिष्त्वं विष्णोः स्मृतिमप्याह ॥ अहमिति ॥

अहं क्रतुरहं यज्ञः स्वधाऽहमहमौषधम् ।
मन्त्रोहमहमेवाज्यमहमग्निरहं हुतम् ॥

इति गीतायां कृष्णेन स्वस्याग्निस्वरूपसत्तानियामकत्वोक्त्या स्वात्मनोऽग्निशब्दवाच्यत्वोक्तेः । न चात्राभेद उच्यते । विशिष्टाभेदस्य बाधात् । शुद्धे लक्षणापत्तेः । क्रत्वादिजडाभेदायोगाच्चेति भावः । तथा तत्रैव ''ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यत'' इत्यत्र ''अनादिमत्परं ब्रह्मे''ति पूर्वप्रकृतब्रह्मण एव तच्छब्देन परामृश्य ज्योतिषामपि प्रकाशनशक्तिप्रदत्वेन ज्योतिष्त्वोक्तेः । आदिपदेन ''तच्छुभ्रं ज्योतिषां ज्योति''रित्यादिर्गृह्यते । सूक्तस्य निरवकाशत्वं प्रागुक्तमनूद्य सदृष्टान्तं निरस्यति ॥ इदमिति ॥ नवमे आद्यपादे ''गुणशब्दस्तथे''ति त्रयोदशेऽधिकरणे द्वितीयवर्णके चिन्तितं शाक्यानामयनाख्ये षड्विंशत्संवत्सरे सत्रे श्रुतं ''संस्थिते संस्थितेऽहनि गृहपतिर्मृगयां याति । स तत्र यान्मृगान्हंति तेषां तरसमयाः पुरोडाशा''इति । तेषु मांसमयेषु प्रकृतौ दृषदि पेषणाय तंडुलानां विहितो ''धान्यमसि धिनुहि देवा'' निति मन्त्रश्चोदकेन प्राप्तः । स किमूहितव्य

(प्रकाशिका)

उत नेति संशये धान्यशब्दस्य सतुषद्रव्यवाचितया प्रकृतौ तण्डुलप्रकाशनासामर्थ्ये-नासमवेतार्थत्वात्सौरयागे देवस्य त्वेति मन्त्रगतसवित्रादिशब्दवन्नोहनीय इति प्राप्ते प्रकृति-विकारमूलया लक्षणया धान्यशब्दस्य तण्डुलप्रकाशकतया प्रकृतौ समवेतार्थत्वान्मांसमसि धिनुहि देवानित्यूहितव्य इति सिद्धान्त इति ॥ अत्र यथा प्रकृतौ लक्षणाया आर्थिकत्वेना-विवक्षितत्वात्स्वाधीनप्रयोगे लक्षणाश्रयणायोगान्न मांसलक्षकतया मृगोसीत्यूहो न्याय्यः । याज्ञिकानां तु तादृश ऊहाभ्युपगमोयथाऽज्ञानमूलस्तथाध्यापकप्रसिद्धिरपिविष्ण्वादि-शब्दाभावनिमित्ताज्ञानमूलेत्यर्थः । केवलयोरिति ॥ अन्योन्यनिरपेक्षयोश्श्रुतिलिङ्गयोरित्यर्थः। कथमिदमुक्तार्थसंवादीत्यत आह ॥ अत्र चेति ॥ असंदिग्धत्वं च निरवकाशत्व-मित्युक्तप्रायम्। उक्तं च तट्टीकायां ''सावकाशेभ्योऽनेकेभ्योपि निरवकाशस्यैकस्यैव प्राबल्या''दिति । नन्वत्र सावकाशयोः श्रुतिलिङ्गयोरेव निरवकाशेन लिङ्गादिना बाधः प्रतीयते । न तु तादृशयोश्श्रुतिप्रकरणयोः । न्यायविवरणटीकायां चास्य वाक्यस्याकाश-प्राणछन्दोधिकरणपरतया व्याख्यातत्वात् । तत्र च प्रकरणोपष्टंभेन पूर्वपक्षाकरणात्कथ-मुक्तसंवादीति चेन्न । तुल्यन्यायतया वा श्रुतिप्रकरणोपलक्षणत्वाशयेन वा कैमुत्यन्याय-सिद्धतया वाऽस्योदाहरणादिति ।

पाण्डुरङ्गि — निरतिशयवैभवरूपकर्णादिविदूरत्वस्याग्निश्रुत्यादिबलादग्रावप्युप-पत्तेरिति परोक्तं लिङ्गानां सावकाशत्वमग्निश्रुत्यादेः सावकाशत्वं प्रदर्शयन् परिहरति ॥ कर्णादीनामिति ॥ अग्निर्वै देवानामवम इतीति ॥ यद्यप्यत्र परैर्न तारतम्यपरत-याव्याख्यातंतथापिप्रतीयमानस्यबाधकाभावे परित्यागस्यातिप्रसंजकत्वाद्यथाश्रुति ग्राह्यमेव । अग्नौ सर्वे देवा विलीयंत इति श्रुत्यंतरानुसारेणाग्निनीचानां सर्वेषामपि देवानामग्र्यधीन-सत्ताकत्वेनाग्निपदेनैवोपादानसम्भवेन देवानामवम इति निर्धारणोपपत्तेरिति भावः ॥ तपतीति ॥ वातः पवते सूर्य उदेतीत्यादौ तत्तद्योग्यक्रियाया इव भीषास्मादग्निरित्यत्र योग्यक्रियाया अनुक्त्या भयादस्याग्निस्तपतीत्यादि श्रुत्यंतरानुसारेण योग्यश्रौतपदाध्याहारः कृत इति भावः । अग्निश्रुत्यादि त्वित्यत्रादिपदेन वैश्वानरं रथ्यमध्वराणां यज्ञस्य केतुं जनयंत देवाः । आसन्ना पात्रं जनयंत देवा इत्यादिलिङ्गानि ग्राह्याणि ॥ अग्निनाग्निरिति ॥ एतत्पादस्य द्व्यग्निदेवताकत्वात्तृतीयांतनिर्दिष्टोऽन्यः प्रथमांतनिर्दिष्टो विष्णुः । प्रकरणस्य निरवकाश-त्वात्तदनुगृहीत श्रुत्या लिङ्गबाधोऽस्त्वित्यतः प्रकरणमपि विष्णुपरत्वेन सावकाशमित्याह ॥ इदमिति ॥ अज्ञानमूलेति ॥

तात्पर्यचन्द्रिका

एवं सूक्तान्तरेष्वपि द्रष्टव्यम् । तथाहि । ऐन्द्रे ''नत्वावां इन्द्र कश्चन न जातो न जनिष्यत'' इति । तथा ''ईशानमस्य जगतः स्वर्दृशमीशानमिन्द्र तस्थुष'' इति । तथा ''समुद्रे अन्तश्शयत'' इति । तथा बार्हस्पत्ये ''विश्वेषामिज्जनिता ब्रह्मणामसी''ति । तथा सौरे ''सूर्य आत्मा जगतस्तस्थुष'' इति । तथा वारुणे ''यो विश्वस्य जगतो देव ईश'' इति । तथा विश्वकर्मसूक्ते ''विश्वतश्चक्षुः यो नः पिता जनिते''त्यादीनि ब्रह्मलिङ्गानि सन्ति । किंच सौरे ''येना पावक चक्षसा भुरण्यं तं जनाँ अनु । त्वं वरुण पश्यसी''ति सूर्यस्य पावकवरुणादिशब्दैस्सम्बोधनम् । तथा वारुणे ''अथा वयमादित्ये''ति वरुणस्यादित्यादिशब्दैः सम्बोधनम् । तथाऽऽग्नेये ''त्वमग्न इन्द्रो वृषभं सतामसि त्वं विष्णुरुरुगायो नमस्य'' इत्यग्निं सम्बोध्य तत्रेन्द्रविष्ण्वादिशब्दप्रयोगः तत्तत्सूक्तानां सर्वशब्दवाच्यब्रह्मपरत्वे युक्तः । नान्यथा । यदि चेन्द्रादावेव ब्रह्मलिङ्गोक्तिः स्तुत्यर्था तर्ह्याकाशप्राणादावपि ब्रह्मलिङ्गोक्तिस्तदर्था स्यादिति दिक् ।

प्रकाशिका — सूत्रेऽग्निसूक्तस्थस्योपलक्षणत्वेनोपादानात्सर्वत्रायं न्यायोऽनुसन्धेय इति वदंस्तत्प्रकारं क्वचित्क्वचिद्दर्शयति ॥ एवमिति ॥ ऐन्द्रे सूक्त इत्यर्थः । आद्याष्टकगतैन्द्रे ''नत्वावाँ इन्द्र कश्चन न जातो न जनिष्यतेऽति विश्वं ववक्षिथ'' इत्यत्र हे इन्द्र कश्चन कोपि त्वावान् त्वत्सदृशः नास्ति नासीन्न जनिष्यते । विश्वमति ववक्षिथ त्वमेव भर्तासीत्यसदृशत्वविश्वभर्तृत्वादिकं श्रुतम् । तथा पञ्चमाष्टकगत ऐन्द्रे ''अभित्वा शूर नो नुमोऽदुग्धा इव धेनवः । ईशानमस्य'' इत्यत्र जङ्गमस्य च स्थावरस्य चास्य विश्वस्येशानं त्वा त्वां वेदवाच इव पुनः पुनः स्तुम इति जगन्नियामकत्वं ''नत्वावाँ अन्यो दिव्यो न पार्थिवो न जातो न जनिष्यते'' इति हे मघवन् द्युस्थो वा पृथिवीस्थो वा जातो जनिष्यमाणो वान्यस्त्वत्सदृशो नेत्यसदृशत्वं च श्रुतम् । तथा 'समुन्द्रेऽन्तः शयत उन्दा वज्रो अभीवृतः' इति षष्ठाष्टकगतैन्द्रे अष्टमाष्टकस्थे च ''समुद्रेऽन्तः कवयोविचक्षते'' इति समुद्र शायित्वं श्रुतम् । एतानि च ब्रह्मलिङ्गतया प्रसिद्धानीति भावः ॥ तथेति ॥ ''देवाश्चित्ते असुर्यप्रचेतसो बृहस्पते यज्ञियं भागमानशुः । उस्रा इव सूर्यो ज्योतिषा महोविश्वेषामिज्जनिता ब्रह्मणामसी''त्यत्र हे बृहस्पते प्रकृष्टज्ञानिनो देवा अपि ते प्रसादात्

(प्रकाशिका)

यज्ञभागं प्राप्नुवन्ति । त्वं च भूतभविष्यद्वर्तमानचतुर्मुखब्रह्मणां जनयिताऽसीति ब्रह्मजनकत्वादिकं श्रुतम् । तच्च विष्णोरन्यत्र न युक्तमिति भावः ।

॥ सौर इति ॥ आद्याष्टकाष्टमाध्यायगते सौरे ''चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः । आप्रा द्यावापृथिवी अन्तरिक्षं सूर्य आत्मे''त्यत्र स्थावरजङ्गमात्मकविश्वस्वामित्वं श्रुतम् । तच्च नान्यलिङ्गम् । न चात्रात्मशब्दस्स्वरूपपरः । षष्ठ्या औपचारिकत्वप्रसङ्गादिति भावः ॥ य इति ॥ पञ्चमाष्टके ''यो वर्धन ओषधीनां यो अपां यो विश्वस्य जगतो देव ईशे'' इति विश्वेश्वरत्वं श्रुतम् । तच्च ''एष सर्वेश्वर'' इत्यादिना ब्रह्मणि प्रसिद्धम् । ''विश्वतश्चक्षुरुत विश्वतो मुख'' इत्यादिकं च ''सर्वतः पाणिपादं तत्सर्वतोक्षिशिरोमुख''मित्यादिना विष्णौ प्रसिद्धम् । जगज्जनकत्वं च ''यतो वा इमानि भूतानी''त्यादिना प्रसिद्धम् ॥ सन्तीति ॥ तथाच निरवकाशब्रह्मलिङ्गैस्सावकाशश्रुतिप्रकरणयोर्बाध इति भावः । सूत्रे निरवकाशलिङ्गोक्तिरुपलक्षणम् । अन्यत्रान्यवाचिपदप्रयोगानुपपत्त्या च विष्णुपरता ग्राह्येत्याह ॥ किं चेति ॥ सौर इति ॥ चतुर्थाध्यायगते सौर इत्यर्थः ॥ अथावयमिति ॥ आद्याष्टकगते वारुणसूक्ते ''आदित्य व्रते तवानागसोदितये स्यामे''त्यादित्यशब्दसम्बोधनमित्यर्थः ॥ नान्यथेति ॥ तथात्वे नानादेवताप्रापकश्रुतिसद्भावेनैकवाक्यताभङ्ग इति भावः । सूक्तगतब्रह्मलिङ्गानामन्यथासिद्धिमाशङ्क्य निरस्यति ॥ यदि चेति ॥ लिङ्गेत्युपलक्षणम् । पावकादिशब्दोक्तिरपि ध्येया । तथा चाकाशाद्यधिकरणानारम्भस्स्यादिति भावः । एतेनोपासनार्थं तदुक्तिरिति परास्तम् । असदुपासनाया निषिद्धत्वाच्चेति । नन्विन्द्रादीनामन्योन्यं ब्रह्मणा चाभेदात्तत्र ब्रह्मलिङ्गोक्तिः पावकादिशब्दोक्तिश्च युक्ता । अत एव ''त्वमग्न इन्द्रो वृषभ'' इत्यादि च युज्यत इति चेन्न। विशिष्टाभेदस्य बाधितत्वात् । विशेष्यमात्रैक्ये लक्षणापत्तेश्च । आकाशादावपि तथात्वापत्तेश्च । यमिन्द्रमाहुरित्यादिविरोधाच्च । तत्र भेदोक्तेरंतरधिकरणे दर्शितत्वात् । पृथगित्यत्राभेदस्य निरसिष्यमाणत्वाच्च । न च वाच्यं लिङ्गानां स्वावरनियामकत्वादिना सङ्कोच इति बाधकाभावात् । न च पावकादिशब्दानां योगेन सूर्यादौ वृत्तिरविरुद्धेति वाच्यम्। रूढेर्बलवत्त्वात् । नियामकाभावेन वैपरीत्यस्यापि सम्भवात् । तदेतदभिप्रेत्योक्तं दिगिति । यद्वा सूक्तान्तरेष्वप्येवं निरवकाशब्रह्मलिङ्गादीनि द्रष्टव्यानीति भावेनोक्तं दिगिति ।

पाण्डुरङ्गि — प्रकृतौ सतुषशालिवाचिधान्यशब्दस्य वितुषव्रीहिषु लाक्षणिकत्वादार्थिकलक्षणा रचनातिदेश इति ज्ञानाभावमूला यथा मृगोसीति मन्त्रोहविषयिणी

(पाण्डुरङ्गि)

पूर्वपक्षिप्रसिद्धिः तथाग्र्यादिसूक्तेषु विष्णुसूक्तत्वाज्ञानमूलोक्तप्रसिद्धिरित्यर्थः ॥ न्यायविवरण इति ॥ अत्तृत्वाधिकरणस्थमिदं समानन्यायत्वादत्रापि सिंहावलोकनन्यायेन परावृत्तमिति भावः ॥ ईशानमिति ॥ लिङ्गापेक्षया वाक्यस्य जघन्यत्वात् नत्वावाँ अन्यो दिव्यो न पार्थिवो न जातो न जनिष्यत इति वाक्यानुपादानम् ॥ न युक्तमिति ॥ नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्यामित्येकशेष एकवद्भावश्चेति ज्ञेयम् । युक्त इत्यपि क्वचित्पाठः ॥ यदि चेति ॥ आकाशप्राणाद्यधिकरणवैषम्येण पूर्वपक्षयतेष्टा- पत्तेर्वक्तुमशक्यत्वादित्यर्थः ।

तात्पर्यचन्द्रिका

न चैवमत्रत्यसिद्धान्तेनैवान्तरधिकरणादिपूर्वपक्षाणां कैमुत्यन्यायहतत्वात्तत्र-त्यसिद्धान्तन्यायव्युत्पादनं व्यर्थम् । स्वतो बलवतोपि सावकाशस्य स्वतो दुर्बलेनापि निरवकाशेन बाध इत्यन्तरधिकरणन्यायेन विनाऽत्रत्यसिद्धान्तस्यैवासिद्धेः । अत्र आकाशाद्यधिकरणेषु च अधिकाशङ्कानिरासकन्याय एव हि व्युत्पाद्यः । न त्वंतरधि-करणन्यायः । ''ज्योतिर्दर्शना''दित्यत्र त्वग्निसूक्तस्थस्यापि ज्योतिषो म्रियमाण-त्वादिलिङ्गैर्जीवत्वे शङ्किते लिङ्गानि ब्रह्मपरोपक्रमोप संहारमध्यस्थत्वादन्तर्भावि-तण्यंतानीति वक्ष्यत इति न तेनाप्यस्य पुनरुक्तिः । ज्योतिश्शब्दप्रवृत्तिनिमित्तं च प्रकाशत्वं चित्प्रकाशरूपे ब्रह्मण्यप्यस्ति । यद्यप्यत्र वाक्यशेषे ''विश्वेदेवा अनमस्यन् भियाना'' इति सर्वदेवोपास्यत्वादिकमपि निरवकाशविष्णुलिङ्गमस्ति । तथापि कर्णादिविदूरत्ववद्विषयवाक्य एत्राश्रुतत्वादपरिच्छेद्यवैभवान्तर्भूतत्वाच्च न सूत्रका-रादिभिः पृथगुक्तम् । यद्यप्यत्र ज्योतिः प्रतिकर्णादीनां विरुद्धचरणरूपं कर्णादि-विदूरत्वं वक्तुं विचारणाभिधानादिति सूत्रयितव्यम् । तथाप्युपसर्गस्य द्योतकत्वमात्रं धातोरेव तु विचरणाभिधायकत्वमिति प्रदर्शनार्थं सूत्रस्य श्रुत्यनुगमप्रदर्शनार्थं च चरणाभिधानादित्युक्तम् । विचरणाभिधानादित्युक्तौ हि श्रुतौ वीत्यनेन चरतीत्यस्य मे मन इति पदद्वयव्यवहितत्वात् श्रुत्यनुगमो न ज्ञायेत । तस्माद्विष्णुरेवेदं ज्योतिरिति ॥ टीकाक्षरार्थस्तु स्पष्टः ॥ छ ॥ ज्योतिरधिकरणं सम्पूर्णम् ॥ १० ॥

प्रकाशिका — ननु यद्यत्र सूक्तानुगृहीताया अपि श्रुतेर्निरवकाशलिङ्गेन बाधः तदा तदननुगृहीताया इन्द्राकाशादिश्रुतेस्सुतरां बाधेन पूर्वन्यायवैयर्थ्यमित्याशङ्क्यान्तरधि-

(प्रकाशिका)

करणोपजीवनेनास्य प्रवृत्तेर्न दोष इत्याह ॥ न चेति ॥ स्वत इति ॥ जात्येत्यर्थः । ननु यदि तेनैव न्यायेनात्रत्यसिद्धान्तस्तर्हि व्युत्पाद्यन्यायभेदाभावान्नैतदारम्भस्सम्भवति । अत आह ॥ अत्रेति ॥ यद्वा स न्यायोत्रैवोच्यतामत आह ॥ अत्रेति ॥ न्यायद्वयस्यैकत्र व्युत्पादनायोगात् । अन्यथाऽधिकरणभेदो न स्यादिति भावः । ननु तर्हि स एवात्र व्युत्पाद्यतामिति चेन्न । एतदभ्यधिकाशङ्काया निरासकस्य न्यायस्य क्वचित्कर्तव्यत्वात् । नन्वेवमपि ''ज्योतिर्दर्शना''दित्यनेन पुनरुक्तिः । तत्राग्निसूक्तगतस्यापि ज्योतिषो विष्णुत्वमाक्षिप्य समाधानादित्यत आह ॥ ज्योतिरिति ॥ अग्निसूक्तस्थस्येति ॥ ननु तत्र वाजसनेयगतं ज्योतिरुदाह्रियते । नत्वग्निसूक्तगतमिति चेदित्थमाशयः । अग्निसूक्तस्थं ज्योतिर्न विष्णुः । अस्यैव वाजसनेये म्रियमाणत्वादिश्रवणादिति ॥ तत्र ''योऽयं विज्ञानमयः प्राणेषु हृद्यंतर्ज्योति''रिति ज्योतिः किं जीव उत विष्णुरिति संशये ''स समानस्सन्नुभौ लोकावनुसंचरति स वा अयं पुरुषो जायमानश्शरीरमभिसम्पद्यमानः पाप्मभिः संसृज्यते स उत्क्रामन् म्रियमाण'' इत्यादिजीवलिङ्गाज्जीव इति प्रागुक्ताग्निसूक्तस्थमपि ज्योतिर्जीव एवेति प्राप्ते ज्योतिश्शब्दस्य हृद्यंतज्योतिरित्यात्मप्रश्नोत्तरोपक्रमे सुप्त इत्यत्रायं पुरुषः स्वयं ज्योतिरित्युपसंहारे च श्रुतत्वात् आत्मप्रश्नोत्तरोपक्रमोपसंहाराभ्यां च विष्णुपरत्वेन निर्णीतवाक्यमध्यस्थतया जीवलिङ्गानां मारकत्वाद्यर्थकतया कथंचिन्नेयत्वात् इदं ज्योतिर्विष्णुरेवेत्यग्निसूक्तस्थमपि तथेति सिद्धान्त उच्यते । न निरवकाशलिङ्गेन सावकाशबाधन्यायव्युत्पदनं सूक्तगतत्वाधिकाशङ्कानिरासकन्यायव्युत्पादनं वा क्रियते । येन पुनरुक्तिस्स्यादित्यर्थः । एवं प्रमाणाश्रिताशङ्कां निरवकाशलिङ्गरूपप्रमाणोपदर्शनेन निरस्येदानीं प्रमेयाश्रिताशङ्कां ''स्वयं ज्योतिष्त्वाद्भगवत'' इति पञ्चमगीताभाष्योक्तदिशा शब्दप्रवृत्तिहेतुनिरूपणेन निरस्यति ॥ ज्योतिरिति ॥ प्रकाशत्वमिति ॥ तमोविरोधित्वस्य गुरुत्वादिति भावः । ननु यद्यत्रेदं विषयवाक्यं स्यात्तर्हि स्पष्टलिङ्गत्यागेन कर्णादिविदूरत्वप्रत्यायनाय चरणोक्तिरयुक्तेत्याशङ्क्याह ॥ यद्यपीति ॥ विचरणेनापरिच्छेद्यवैभवस्यैवाभिप्रेतत्वेनोक्तत्वात्तैनैव सङ्गृहीतत्वाच्चेत्याह ॥ अपरिच्छेद्येति ॥ नन्वेवमपि विचरणाभिधानादिति वाच्यम् । प्रतिपत्तिलाघवादित्याशङ्कामनूद्य निरस्यति ॥ यद्यपीति ॥ ननु तर्कताण्डवे उपसर्गाणां द्योतकत्वं पूर्वपक्षीकृत्य वाचकत्वस्य समर्थनात्कथं द्योतकत्वोक्तिः । न च तत्पररीत्येति वाच्यम् । ''समिति ह्युपसर्गेण परमुख्यार्थतोच्यत'' इति

उपसङ्क्रमणं चैव द्वितीयोद्देशितं प्रति ।
अतिक्रमं वदन्तं तमुपशब्दो निवारयेत् ॥

इति च भगवत्पादोक्तेरुदाहृतत्वात् । युक्तियुक्ततयोपपादनेनाभिप्रेतत्वावगमाच्चेति चेत्सत्यम् । अभ्युपेत्यवादेन वा पररीत्या वेयमुक्तिः । अत एव पक्षान्तरमुक्त्वा तमुपपादयति ॥ सूत्रस्येति ॥ अधिकरणार्थमुपसंहरति ॥ तस्मादिति ॥ तस्मान्निरवकाशस्य लिङ्गस्य प्रवृत्तिनिमित्तस्य च भगवति सत्वाद्विष्णुरेवेदं ज्योतिरिति ॥ छ ॥ ज्योतिरधिकरणं सम्पूर्णम् ॥ १० ॥

पाण्डुरङ्गि — तर्ह्यन्तरधिकरणादिना त्विदं गतार्थं स्यात् । तत्सिद्धान्तव्यपदेशस्यैवात्र सिद्धान्तव्यवस्थापकत्वादित्यत आह ॥ अत्रेति ॥ प्रमेयाश्रितां शङ्कां परिहरति ॥ ज्योतिश्शब्देति ॥ तमोविरोधित्वापेक्षया प्रकाशत्वस्य लघुत्वात्तदुपपादकतायाः आवश्यकत्वाच्चैतज्ज्योतिःपदप्रवृत्तिनिमित्तं वाच्यमिति भावः । तमसा सहास्थितत्वं प्रकाशस्याप्ययुक्तमित्यत उक्तं चित्प्रकाशेति ॥ तस्य च बाह्यतमःस्थितत्वं युक्तमेव । अन्यथा त्वामग्रे तमसि तस्थिवांसमित्युक्तत्वादग्नावपि प्रकाशत्वं न स्यात् । हृदय आहितमित्युक्तत्वादन्तर्बहिश्च स्यादिति भावः । ननु कर्णादिविदूरत्वं न यथाश्रुतं लिङ्गम् । तस्य कर्णाद्यगोचरत्वरूपत्वेनासम्भवित्वात् । तदुपलक्षितमियदिति परिच्छेदानर्हवैभवत्वमेव लिङ्गं वाच्यम् । तच्चानुपपन्नम् । वाक्यशेषोक्तस्य सर्वदेवोपास्यत्वस्यैव यथाश्रुतस्य लिङ्गत्वसम्भवात् । तत्सम्भवे चोपलक्षितानुसरणस्यानौचित्यादित्याशङ्कते ॥ यद्यपीति ॥ यद्यप्यत्रेत्यादि ॥ अत्र श्रुतौ पतयत इत्यादावुक्तत्वात्पतनाभिधानादिति वक्तव्येपि कर्णाद्यपेक्षया मनसो बहुव्याप्तेरभिमानिनश्चोत्तमत्वात्तन्मुख्यत्वद्योतनाय तत्सहपठितचरणस्यैव निर्देशः । एवं च श्रुतौ मनोगम्यत्वाभावः कर्णादिगोचरत्वाभावे हेतुत्वेनोच्यते । यद्वा मनोदूरत्वोक्त्या कैमुत्यन्यायेन लब्धमेव कर्णादिविदूरत्वं स्पष्टमुच्यते । अत एव किंस्विद्वक्ष्यामीत्यनुक्तवाक्कार्याक्षेपः । कर्णादिग्रहणस्योपलक्षणत्वादित्युक्तं भवति ॥ उपसर्गस्येति ॥ यद्यप्युपसर्गा अपि वाचका एवेति सिद्धान्तः तथापि परमतानुवादोऽयमित्यदोषः ॥ छ ॥ ज्योतिरधिकरणं सम्पूर्णम् ॥ १० ॥

गायत्र्यधिकरणम्

ॐ छन्दोभिधानान्नेति चेन्न तथा चेतोर्पणनिगदात्तथाहि दर्शनं ॐ ॥ अत्राधिवेदगता गायत्र्यादिशब्दा उदाहरणम् । अत्र विषयवाक्यं "अथ यदतः परो दिवो ज्योति"रिति छान्दोग्यस्थं ज्योतिर्वाक्यमित्येकं मतम् । मतान्तरन्तु "गायत्रीवा इदं सर्व"मिति तत्स्थं गायत्रीवाक्यमिति । अत्राद्यं मतं "अथ यदतः परो दिव इति वाक्योक्ते ज्योतिषि संदेहः । किं ब्रह्मोतान्य"दिति सुधोक्तम् । द्वितीयं त्वत्र टीकायां सुधायां चोक्तम् । अत्राद्ये मते ज्योतिरधिकरणेऽग्निसूक्तस्थस्य ज्योतिषोऽग्नित्वनिरासः । अत्र तु छान्दोग्यस्थस्य ज्योतिषश्छन्दस्त्वनिरासः । द्वितीये तु ज्योतिरधिकरणेऽग्निसूक्तस्थस्य ज्योतिषोऽग्नित्वनिरासः । अत्र तु छान्दोग्यस्थायाः गायत्र्याश्छन्दस्त्वनिरास इति भेदः । आद्ये भाष्ये गायत्रीवाक्योपादानं गायत्रीशब्दरूपपूर्वपक्षबीजप्रदर्शनार्थम् । द्वितीये भाष्ये ज्योतिर्वाक्योपादानं पूर्वपक्षे ज्योतिरधिकरणाक्षेपप्रदर्शनार्थम् । आद्येपि छान्दोग्यस्थज्योतिषो गायत्रीवेत्युपक्रमेण गायत्रीत्वादग्निसूक्तस्थमपि गायत्रीत्येकः पूर्वः पक्षः । अपरस्तु अस्त्वग्निसूक्तस्थं ज्योतिः कर्णादिविदूरत्वाद्विष्णुः । छान्दोग्यस्थं तु "तदेतदृष्टं च श्रुतं चे"ति तद्विरुद्धदृष्टश्रुतत्वादिश्रवणान्न विष्णुरिति । न चैवं सति पूर्वपक्षे पूर्वसिद्धान्तानाक्षेपादफलेयं चिन्ता । ज्योतिषो गायत्रीत्वे "इयं वाव सा येयं पृथिवी"ति गायत्र्यभिन्नत्वेनोक्तायां पृथिव्यां "अस्यां हीदं सर्वं प्रतिष्ठित"मित्युक्तस्य स्थितिहेतुत्वादेरपि तद्धर्मत्वापत्त्या जन्मादिसूत्राक्षेपात् । "योयमन्तर्हृदय" इति छान्दोग्यस्थे ज्योतिष्यानन्दमयधर्मभूतहृदयनिहितत्वश्रवणेन ज्योतिरधिकरणमनाक्षिप्यैवानन्दमयाधिकरणाक्षेपाच्च ।

द्वितीयेपि गायत्र्याश्छन्दस्त्वेतामुपक्रम्य छान्दोग्य उक्तस्य ज्योतिषोपि छन्दस्त्वादग्निसूक्तस्थमपि छन्द इत्येकः पूर्वः पक्षः । अन्यस्तूक्तरीत्याग्निसूक्तस्थस्य विष्णुत्वेपि छान्दोग्यस्थं छन्द एवेति । अपरस्तु छान्दोग्यस्थस्यापि ज्योतिषो ज्योतिरधिकरणे विष्णौ निर्णीतज्योतिश्श्रुत्या विष्णुत्वेपि गायत्री न विष्णुः तत्र तत् श्रुतेरभावादिति। अत्रापि द्वितीये प्रथमोत्र टीकायामुक्तः । आद्ये प्रथमद्वितीयौ

(तात्पर्यचन्द्रिका)

(प्रथमद्वितीययोराद्योत्र टीकायामुक्तः । प्रथमे द्वितीयः ।) द्वितीये द्वितीयतृतीयौ च सुधायाम् । अ(त)त्र मतद्वयेप्याद्ये पूर्वपक्षे पूर्वसिद्धान्ताक्षेपादाक्षेपिक्यवांतरसङ्गतिः स्फुटा । आद्ये द्वितीये द्वितीये द्वितीयतृतीययोस्तु पूर्वपक्षयोः पूर्वाधिकरणवैषम्य-प्रदर्शनाय तदुपजीवित्वादवान्तरसङ्गतिः ।

प्रकाशिका — ॐ छन्दोभिधानान्नेति चेन्न तथा चेतोर्पणनिगदात्तथाहि दर्शनं ॐ ॥ टीकायामनुक्तेः ''अधिवेदगताना''मिति न्यायविवरणं हृदि कृत्वैतदधिकरणोपाधिमाह ॥ अत्रेति ॥ गायत्र्युष्णिग्बृहतीत्यादिशब्दा इत्यर्थः । नन्वेवं सूत्रे गायत्रीशब्दमात्रासाधारण-भूतादिपादव्यपदेशाद्युक्त्यनुपपत्तेस्स एवोदाहरणमिति ज्ञायत इति चेन्न । वेदमातुस्त्रैवर्णिक-द्वितीयजन्मजनन्या गायत्र्याः प्राधान्येन तन्नाम्न एवेतरोपलक्षणतया सूचनात् । अतः सर्वसाधारण्यायछन्द इत्यसूत्रयत् । अन्यथा गायत्र्यभिधानादित्येव ब्रूयात् । यद्यप्यत्र वक्ष्यमाणदिशाऽऽकाशादिशब्दा अप्युदाहरणं तथापि तेषामधिकरणान्तरविषयाणां सतामाकारान्तरेणात्र विषयत्वम् । गायत्र्यादिशब्दानां तु सर्वाकारेणापीति विशेषादेवमुक्त-मिति ध्येयम् । अत्र पूर्वसङ्गतिं वक्तुं प्रस्थानद्वये सङ्कलय्य टीकाकृदुक्तान्पक्षान् भाष्यानुगुणोपपत्तीः प्रदर्शयन्विवेचयति ॥ अत्रेति ॥ तत्स्थं छान्दोग्यस्थम् । अत्रेत्यस्य विवरणं टीकायामिति । ''गायत्री वा इदꣳसर्वं भूतं यदिदं किञ्चे''त्युदाहृतत्वादिति भावः ॥ सुधायामिति ॥ छन्दोगाः पठन्ति ''गायत्री वा इदं सर्वं भूत''मित्यादि । तत्र संशयः । ''किं गायत्री ब्रह्म किं वा वर्णसमावेशलक्षणो मन्त्र'' इत्यादिनेत्यर्थः । नन्विदं वा तद्वा फलविशेषाभावाद्व्यर्थो विकल्प इत्यत आह ॥ अत्रेति ॥ मतद्वयमध्ये ज्योतिर्वाक्यपक्ष इत्यर्थः ॥ द्वितीय इति ॥ गायत्रीवाक्यपक्षे । अत्रोक्तपक्षद्वये ''अथ यदतः परो दिवो ज्योतिर्दीप्यत इत्युक्तस्य ज्योतिषो गायत्री वा इदं सर्वमिति गायत्र्या समारम्भः कृत'' इति भाष्यमनुगुणयति ॥ आद्य इति ॥ स्पष्टयिष्यते चैतदग्र इति भावः । एवं वैकल्पिकोदाहरणमुक्त्वेदानीं ज्योतिर्वाक्योदाहरणपक्षे सुधाभिमतपूर्वपक्षद्वयमाह ॥ आद्येपीति ॥ उदाहरणभेदसमुच्चयार्थोपिशब्दः ।

॥ अग्निसूक्तस्थमपीति ॥ ज्योतिश्श्रुत्या हृदयस्थत्वलिङ्गेन ज्योतिर्द्वयस्यैक्य-प्रत्यभिज्ञानाद्दृष्टत्वादिविरुद्धधर्मस्याकारभेदादिनोपपत्तेरिति भावः । द्वितीयपूर्वपक्षेऽनुपपत्तिं प्रकाश्य समाधत्ते ॥ न चैवमिति ॥ अग्निसूक्तस्थज्योतिषो विष्णुत्वमुपेत्य पूर्वपक्षकरणे

(प्रकाशिका)

सतीत्यर्थः ॥ तद्धर्मत्वेति ॥ गायत्रीधर्मत्वापत्त्येत्यर्थः । पूर्वाधिकरणाक्षेपस्यापि व्यवहितजिज्ञासासूत्राक्षेपपर्यंतत्वादिति भावः । ननु पूर्वोत्तराधिकरणानामानन्दमयाक्षेपपूर्वं जिज्ञासासूत्राक्षेपकत्वेन प्रवृत्तत्वात्कथमस्य ततो विलक्षणस्य तन्मध्ये निवेश इत्यतः पक्षान्तरमाह ॥ योयमिति ॥ यद्यपि ''यो वेद निहितं गुहाया''मिति मन्त्रवर्ण एवायं धर्मश्रुतो नत्वानन्दमये तथापि मन्त्रवर्णोक्तस्यैवानन्दमयशब्देनोच्यमानत्वादिति भावः । ज्योतिर्वाक्यपक्षे पूर्वपक्षद्वयमुक्त्वा गायत्रीवाक्यपक्षे पूर्वपक्षत्रयमाह ॥ द्वितीयेपीति ॥ उक्तरीत्येति ॥ कर्णादिविदूरत्वात्तस्य विष्णुत्वेऽपि दृष्टं च श्रुतं चेति तद्विरुद्धदृष्टत्वादि-श्रवणाच्छान्दोग्यस्थं न विष्णुरित्युक्तदिशेत्यर्थः । अस्मिन्पक्षे वक्ष्यमाणपक्षे च सप्रयोजनत्वं पूर्ववदनुसन्धेयम् ॥ तत् श्रुतेरिति ॥ ज्योतिः श्रुतिश्चोपदेशभेदेन भिन्नप्रकरणत्वान्न गायत्र्यां श्रुतेति भावः । उक्त पञ्चपक्षान्संवादयति ॥ अत्रापीति ॥ पञ्चपक्षमध्येऽपीत्यर्थः । आद्ये प्रथमद्वितीयाविति यद्यपि ''अथवात्रापि अथ यदतः परो दिव'' इति वाक्योक्तज्योतिषि सन्देहः । किं ब्रह्मोतान्यदिति । उपक्रमे गायत्रीशब्दश्रवणादन्यदिति प्राप्त''मित्येव सुधावाक्यम् । ननु द्वेधा तत्र पूर्वपक्षोपपादनमस्ति । तथापि पूर्वाक्षेपेण पूर्ववैषम्येण च योजयितुं शक्यत्वादेवमुक्तम् । तथाच तद्वाक्यं द्वेधा योजनीयमित्युक्तं भवति ॥ द्वितीय इति ॥ एतौच सुधायां कण्ठोक्ताविति ध्येयम् । एवं पक्षान्विच्येदानीं सङ्गतिमाह ॥ अत्रेति ॥ ज्योतिर्वाक्यपक्षे गायत्रीवाक्यपक्षे चेत्यर्थः । तदुपजीवित्वादिति उपजीव्योपजीवकभाव इत्युक्तं भवति ।

पाण्डुरङ्गि — ॐ छन्दोभिधानान्नेति चेन्नतथाचेतोर्पणनिगदात्तथाहि दर्शनं ॐ ॥ सङ्गतिकथनसौकर्याय मतभेदमाह ॥ अत्रेति ॥ मतद्वयेऽपि फलभेदमाह ॥ अत्राद्य इति ॥ नन्वाद्ये मते भाष्ये गायत्रीपदोपादानमनर्थकमित्यत आह ॥ आद्य इति ॥ द्वितीये मते ज्योतिर्वाक्योपादानस्य प्रयोजनमाह ॥ द्वितीय इति ॥ अत्राद्यमतानुसारेण पूर्वपक्षमाह ॥ आद्येपीति ॥ द्वितीय इति ॥ गायत्रीवाक्यं विषयवाक्यमिति मत इत्यर्थः । अन्यस्त्वि-त्यादिपक्षद्वये ज्योतिर्वाक्योपादानं तु पूर्वाधिकरणवैषम्यं प्रदर्शयितुमिति ज्ञातव्यम् ॥ अत्रापीति ॥ अथ यदतः परो दिवो ज्योतिरिति छान्दोग्यस्थं विषयवाक्यमिति प्रथमपक्षस्य य आद्यः छान्दोग्यस्थज्योतिषो गायत्री वेत्युपक्रमेण गायत्रीत्वादग्निसूक्तस्थमपि गायत्रीति पूर्वःपक्षः । इयं च गायत्री यदि विष्णोरनन्या स्यात्तदेदं ज्योतिश्च सा स्यादिति गायत्रीनिर्णयोऽवश्यापेक्षित इति सङ्गतिटीकायामुक्तः गायत्रीवा इदं सर्वमिति

(पाण्डुरङ्गि)

विषयवाक्यमिति द्वितीयमतस्य योऽयमाद्यः गायत्र्याः छन्दस्त्वात्तामुपक्रम्य छान्दोग्य उक्तस्य ज्योतिषोपि छन्दस्त्वादग्निसूक्तस्थमपि छन्द इति पूर्वः पक्षः तस्माद्गायत्री न विष्णुः अपि तु छन्दोविशेष एव तथाचेदं ज्योतिरानन्दमयश्च नासाविति पूर्वपक्षोपसंहारटीकायामुक्त इति भावः ॥ प्रथमे द्वितीय इति ॥ अथ यदत इत्येतद्विषयवाक्यमिति मते अस्त्वग्निसूक्तस्थं ज्योतिः कर्णादिविदूरत्वाद्विष्णुरित्यादिनोक्तो यो द्वितीयः पक्षः स इत्यर्थः ॥ द्वितीय इति ॥ गायत्री वेत्येतद्विषयवाक्यमिति द्वितीय इत्यर्थः । द्वितीयतृतीयौ कर्णादिविदूरत्वादि-रूपविष्णुलिङ्गसद्भावादग्निसूक्तस्थज्योतिषोऽग्नित्वेपि छान्दोग्ये कर्णादिविदूरत्वादि-रूपलिङ्गाश्रवणाच्छान्दोग्यस्थं छन्द एवेति द्वितीयः, छान्दोग्यस्थस्यापि ज्योतिषो ज्योतिरधिकरणे विष्णौ निर्णीतज्योतिश्श्रुत्या विष्णौ निर्णीतत्वेपि गायत्री न विष्णुस्तत्र तत् श्रुतेरभावादिति तृतीयश्चेत्यर्थः । यदर्थं मतभेद उपपादितस्तदिदानीमाह ॥ तत्र मतद्वयेपीत्यादिना ॥

तात्पर्यचन्द्रिका

अत्र गायत्री किं छन्दः किं वा विष्णुरिति चिन्ता । तदर्थं किं गायत्रीश्रुति-प्रसिद्ध्यनुसारेण भूतपादत्वादिविष्णुलिङ्गं बाध्यं किं वा विपरीतमिति । तदर्थं प्रसिद्धिबाधे किं श्रुतेर्मुख्यत्वभङ्ग उत नेति । तदर्थं गायत्रीशब्दप्रवृत्तिनिमित्तं ब्रह्मणि नास्त्युतास्तीति । तदर्थं किमनादिस्वभाव ईशानधीन उत तदधीन इति । तथा ब्रह्मपक्षे दिवि दिव इत्युपदेशभेदः किं न युक्त उत युक्त इति । यद्यपि पूर्वत्र निरवकाशलिङ्गैः सावकाशज्योतिश्श्रुतिबाध उक्तोऽत्र ''यद्वै तद्ब्रह्मे''त्यादिश्रुत्यनु-गृहीतैर्भूतपादत्वादिनिरवकाशलिङ्गैः सुतरां सावकाशगायत्र्यादिश्रुतिबाध इति पूर्वपक्षानुदयः । तथाप्यधिकाशङ्क्या तदुदयः ।

शङ्का तु विष्णौ प्रसिद्धेषु शब्देषु सत्स्वन्यत्र प्रसिद्धगायत्र्यादिशब्दप्रयोगे प्रयोजनं नेत्येका । इयं च ''चेतोऽर्पणनिगदा''दिति सूत्रे सिद्धान्ते प्रयोजनोक्त्या सूचिता । आकाशादिशब्दसाधारणी चेयम् । गायत्रीशब्देऽनुपपत्त्यंतरसद्भावात्स उदाहृतः । अत एवाग्निगायत्र्यादीति भाष्य आदिपदप्रयोगो युक्तः । ''अधिकरणान्तरेप्ये-तन्न्यायस्यानुसन्धेयत्वं च सूचयती''ति टीका चोपपन्ना । असाधारणी त्वन्या ।

(तात्पर्यचन्द्रिका)

युक्तमग्निसूक्तस्थज्योतिषो विष्णुत्वम् । उपदेशभेदाभावात् । इह तु दिव इति पञ्चम्युपदेशस्थस्य ज्योतिश्श्रुत्या विष्णुत्वेपि दिवीति तद्विरुद्धसप्तम्युपदेशस्थगायत्र्या न विष्णुत्वमिति ।

अपरातु अग्निसूक्तस्थज्योतिर्निष्ठकर्णादिविदूरत्वविरुद्धदृष्टश्रुतत्वाद्युपदेशान्नेदं ज्योतिर्विष्णुः । ततश्च गायत्र्यपि न विष्णुरिति । इदं च शङ्काद्वयं ''उपदेशभेदा''दिति सूत्रे कण्ठोक्तम् । अपरातु एकस्या वह्निश्रुतेरन्यत्र प्रसिद्धिबाधेपि गायत्रीवाक्पृथिव्याद्यनेकशब्दानामन्यत्र प्रसिद्धिबाधो न युक्तः । अन्तरधिकरण इन्द्रादिबहुश्रुतीनामन्यत्र प्रसिद्धिबाधस्त्वन्यत्र प्रसिद्धान्तःस्थत्वमुखेन युक्तः । न चेह तथामुखमस्तीति । इयं च ''कथं प्रसिद्धबहुलशब्दानामन्यथार्थते''त्यनुव्याख्यान उक्ता । एताश्च प्रमाणाश्रिताः ।

प्रकाशिका — विषयसंशयटीका व्यनक्ति ॥ अत्रेति ॥ छान्दोग्ये तृतीयेध्याये ''गायत्री वा इदं सर्वं भूतं यदिदं किञ्च । वाग्वै गायत्री । वाग्वा इदं सर्वं भूतं गायति च त्रायति च । यावै सा गायत्री । इयं वाव सा येयं पृथिवी । अस्यां हीदं सर्वं भूतं प्रतिष्ठितम् । एतामेव नातिशीयन्ते । यावै सा पृथिवी । इयं वाव सा यदिदमस्मिन्पुरुषे शरीरम् । अस्मिन्हीमे प्राणाः प्रतिष्ठिताः । एतदेव नातिशीयन्ते । तद्वा एतत्पुरुषे शरीरम् । इदं वाव तत् । यदिदमस्मिन्नंतः पुरुषे हृदयम् । अस्मिन्हीमे प्राणाः प्रतिष्ठिताः । एतदेवनातिशीयन्ते । सैषा चतुष्पदा षड्विधा गायत्री । तदेतदृचाभ्युक्तम् । तावानस्य महिमा ततो ज्यायांश्च पुरुषः । पादोस्य सर्वाभूतानि त्रिपादस्यामृतं दिवीति । यद्वै तद्ब्रह्मेति । इदं वाव तत् । योयं बहिर्धा पुरुषादाकाशः योवै सबहिर्धा पुरुषादाकाशः । योयमन्तः पुरुष आकाशः । अयं वाव सः । योयमन्तः पुरुष आकाशः । योवै सोऽन्तः पुरुष आकाशः । अयं वाव सः । योयमन्तर्हृदय आकाशस्तदेतत्पूर्णमप्रवृत्ति । पूर्णामप्रवृत्तिनीं श्रियं लभते य एवं वेद य एवं वेदे''त्याद्युक्त्वाऽऽम्नायते ''अथ यदतः परो दिवो ज्योतिर्दीप्यते सर्वतः पृष्ठेषु विश्वतः पृष्ठेष्वनुत्तमेषूत्तमेषु लोकेषु । इदं वाव तत् । यदिदमस्मिन्नंतः पुरुषे ज्योतिस्तस्यैषा दृष्टिः । यत्रैतदस्मिन् शरीरे संस्पर्शेनोष्णिमानं विजानाति । तस्यैषा श्रुतिः । यत्रैतत्कर्णावपिगृह्य निनदमिव न दधुरिवाग्नेरिव ज्वलत उपशृणोति । तदेतद्दृष्टं च श्रुतं चेत्युपासीत । चक्षुष्यश्श्रुतो भवति य एवं वेद य एवं

वेदे''ति । तत्रत्या गायत्री विषय इत्यर्थः ॥ छन्द इति ॥ वर्णसमावेशलक्षणो मन्त्र इत्यर्थः ॥ भूतेति ॥ गानत्राणकर्तृत्वस्य प्रवृत्तिनिमित्तानतिरेकाद्भूतपादत्वादीत्युक्तम् ॥ किं वेति ॥ लिङ्गात् श्रुतिर्बाध्येत्यर्थः । अर्थप्रतिपादकत्वरूपगानकर्तृत्वस्य गायत्रीशब्दप्रवृत्तिनिमित्तस्य ब्रह्मण्ययुक्ततया वा तद्गतत्वे सत्यप्यनादिस्वभावनियामकत्वरूपमहागुणलाभाय वाऽनुभाष्यदिशा तत्प्रति स्वातन्त्र्यमेव वक्तव्यमित्यभिप्रेत्यानधीन उत तदधीन इत्युक्तम् । यद्यनधीनस्तदा प्रवृत्तिनिमित्तं ब्रह्मणि नेति प्रसिद्धिबाधे मुख्यत्वभङ्गाद्गायत्री छन्द एवेति पूर्वपक्षे फलम् । सिद्धान्ते तु विपरीतमिति स्पष्टत्वात्फलफलिभावो नोक्तः । एवमनुव्याख्यानोक्तप्रमेयाश्रिताभ्यधिकाशङ्कोपयुक्तचिन्तापरंपरामुक्त्वा सूत्रसूचितप्रमाणाश्रितशङ्कोपयुक्तामाह ॥ तथेति ॥ गायत्री छन्द उत ब्रह्मेति चिन्ता । तदर्थं ब्रह्मपक्षे गायत्रीज्योतिषोरेकप्रकरणस्थत्वेनैक्याद्दिवि दिव इत्युपदेशभेदः किं न युक्त उत युक्त इति । तदर्थं सप्तमीपञ्चम्यौ विरुद्धे उत विवक्षाभेदेनाविरुद्धे इति द्रष्टव्यमित्यर्थः । उपलक्षणमेतत् । ब्रह्मपक्षे प्रसिद्धपदत्यागेनाप्रसिद्धगायत्रीपदप्रयोगे प्रयोजनं नास्त्युतास्तीत्यपि ध्येयम् । अत्रैवं पूर्वपक्षक्रमः इयं गायत्री छन्द एव न विष्णुः गायत्रीशब्दस्य तत्रैव रूढत्वादिति टीकायां दर्शितः । अत्र पूर्वपक्षाप्रापकमाशङ्क्याह ॥ यद्यपीति ॥ ''यद्वै तद्ब्रह्म एतामेव ब्रह्मोपनिषद''मिति ब्रह्मश्रुत्यनुगृहीतैरित्यर्थः ॥ अनुपपत्त्यन्तरेति ॥ उपदेशभेदादिरूपेत्यर्थः । आनन्दमयशब्दवदिति भावः । गायत्रीज्योतिषोर्भिन्नप्रकरणस्थत्वमुपेत्यैकां शंकामुक्त्वा एकप्रकरणस्थत्वमाश्रित्य पक्षान्तरमाह ॥ अपरा त्विति ॥ ततश्चेति ॥ तेजो वै ब्रह्मवर्चसं गायत्रीति ज्योतिश्शब्दपर्यायतेजश्शब्दस्य तत्र दर्शनाद्गायत्र्येव ज्योतिरपीति भावः ॥ कण्ठोक्तमिति ॥ उपदेशभेदशब्दस्य यथा दिवि दिव इति भेदव्यपदेशोर्थः तथादृष्टश्रुतत्वादिभेदव्यपदेशोप्यर्थ इति वक्ष्यमाणत्वादिति भावः ॥ अनेकेति ॥ ''गायत्रीवा इदं सर्वं वाग्वै गायत्री इयं वाव सा येयं पृथिवी''त्याद्यनेकशब्दानामित्यर्थः । नन्विदं सर्वमित्युक्तसर्वात्मकत्वस्य गायत्र्यामनुपपत्तेर्बहुबाधोऽपि न्याय्य इति चेद्ब्रह्मपक्षेपि तस्यास्तुल्यत्वादिति । न च वाच्यमत्रैव श्रुतिबाहुल्येन पूर्वपक्षेण सिद्धान्ते सत्युत्तराधिकरणपूर्वपक्षानुत्थितिरिति । एतच्छङ्कायास्तत्रैव निरसिष्यमाणत्वादिति भावः । नन्वेवमप्यंतरधिकरणे समुद्रशायित्वलिङ्गेनेन्द्रबृहस्पत्यादिबहुश्रुतिबाधस्योक्तत्वात्कथमेतत्पक्षोत्थितिरित्यत आह ॥ अंतरिति ॥

पाण्डुरङ्गि — तदर्थं किमनादिस्वभाव इति ॥ इयं चिन्तापूर्वचिन्तार्था ॥ तथा ब्रह्मपक्ष इति ॥ अत्र ब्रह्मपक्ष इत्युक्त्या इयं चिन्ता प्रथमचिन्तार्थेत्युक्ता भवति ॥

(पाण्डुरङ्गि)

आकाशादीति ।। न चैवमभ्यधिकाशङ्कात्वानुपपत्तिः । पूर्वमनुद्धृतत्वमात्रेण तदुपपत्तेः ।। अत एवेति ।। चेतोर्पणनिगदादित्येतन्निवर्त्याशङ्काया आकाशादिशब्दसाधारणत्वादेवेत्यर्थः । गायत्रीवाक्पृथिव्यादीत्यत्रादिपदेन शरीरहृदययोर्ग्रहणम् । अन्तःस्थत्वमुखेन युक्त इति ।। यद्यप्यत्राज्यैः स्तुवत इत्यादाविवान्यत्र प्रसिद्धमुखं नावश्यकं तथापि तत्र सिद्धान्तहेतुविशेषसद्भावान्मुखानपेक्षायामपि प्रकृते तदभावात्पुनः शङ्कोत्थानमिति द्रष्टव्यम् ।

तात्पर्यचन्द्रिका

प्रमेयाश्रितातु युक्तमाकाशाद्यधिकरणोक्तं जन्यभूताकाशस्वभावस्य विवरत्वादेर्ज्योतिश्शब्दप्रवृत्तिनिमित्तस्य चेशाधीनत्वम् । धर्मिणा सह जन्यत्वात् । गायत्रीरूपवेदस्य त्वनादित्वात्तत्स्वभावस्य गानत्राणकर्तृत्वादिरूपप्रवृत्तिनिमित्तस्य नेशाधीनत्वमिति । ननु कृतकक्रमविशिष्टवर्णात्मकस्य वेदस्य नानादित्वम् । उक्तं हि विष्णुतत्वनिर्णयटीकायां ''न हि वयं वेदस्य कूटस्थनित्यतां ब्रूम'' इति । ''क्रमस्य कृतकत्वेपी''ति चेति चेन्मैवम् । तत्व संख्यानटीकायां ''नित्यत्वं नाम कूटस्थतयाऽऽद्यंतशून्यत्वम् । तच्च वेदानां नित्या वेदास्समस्ताश्चेत्यादिप्रमाणसिद्ध'' मित्युक्तत्वात् । युक्तं चैतत् । क्रमस्य सदेश्वरबुद्धिस्थत्वात् । अत एवोक्तं विष्णुतत्वनिर्णये । सर्वज्ञत्वादीश्वरस्य तद्बुद्धौ सर्वदा प्रतीयमानत्वादिति । तट्टीकायां कौटस्थ्यनिषेधस्त्वस्मदादीन् प्रति प्रमापकत्वोपयुक्तस्यास्मदादिबुद्धिस्थस्य क्रमस्योच्चारणाद्यधीनत्वेन कृतकत्वात् । कृत्वाचिन्तया वाऽनादित्वोक्तिः । क्रमस्यानन्याधीनत्वात् । इयं च ''नित्यत्वादेव शब्दानां तत्स्वभावः कथं हरेः'' इत्यनुव्याख्याने दर्शिता ।

प्रकाशिका — ''कथं प्रसिद्धे''त्युत्तरार्धोक्तामाशङ्कां स्फुटीकृत्य ''नित्यत्वादेव शब्दस्ये''ति पूर्वार्धोक्ताशङ्कां विशदयति ।। प्रमेयेति ।। जन्येति ।। भूतप्रकरणादिना तत्र भूताकाशस्यैव पूर्वपक्षितत्वात्तस्य च ''आत्मन आकाशस्सम्भूत'' इति जन्यत्वावगमादिति भावः ।। ज्योतिश्शब्देति ।। प्रकाशत्वत्वादेरित्यर्थः । धर्मिणो जन्यत्वे तद्धर्मस्यापि तथात्वादिति भावः । गानकर्तृत्वमर्थप्रतिपादकत्वम् । त्राणकर्तृत्वं चाध्येतॄणां पापेभ्यो रक्षकत्वम् । तच्च तत्स्वभावः । स्वभावश्चानादित्वान्न जन्यते । अतो न तदधीनमित्यर्थः ।

ईशगतत्वं त्वशक्यशङ्कमिति भावः । तस्माच्छब्दप्रवृत्तिनिमित्ताभावात्प्रसिद्धिबाधे मुख्यत्व-हानेर्गायत्री न विष्णुः किन्तु छन्द एवेति पूर्वपक्षशेषः । ननु यदुक्तं वेदस्यानादि-त्वात्तत्स्वभावो नेशाधीन इति तदयुक्तम् । ''नित्या वेदास्समस्ताश्च शाश्वता विष्णुबुद्धिगा'' इति प्रमाणव्याख्यावसरे तत्वनिर्णयटीकायां ''वर्णास्तावन्नित्यत्वात्सर्वगतत्वाच्च स्वतः क्रमशून्याः । न च क्रमेण विना पदवाक्यभावः । नापि तदन्तरेण प्रामाण्यम् । अतः क्रमः पौरुषेय एवास्थेयः । तत्कथं वेदस्यापौरुषेयत्व''मित्याशङ्क्य ''न हि वयं वेदस्य कूटस्थनित्यतां ब्रूमः । किन्तु शब्दतोऽर्थतश्च सर्वदैकप्रकारतामेव । ततश्च क्रमस्य कृतक-त्वेऽपि पुरुषाभिप्रायप्रवेशेऽपि स्वतन्त्रवक्तुरभावादपौरुषेयत्वमुपपद्यत'' इत्यनेन सादित्वोक्तेः । अङ्गीकृतं चेद्भाट्टैरपि ''यत्नतः प्रतिषेध्या नः पुरुषाणां स्वतन्त्रते''त्युक्तेरित्याऽऽ- शङ्क्य वाक्यान्तरानुसारेणास्याभिप्रायं व्यञ्जयन्ननादित्वमुपपादयति ॥ नन्विति ॥ कृतकक्रमेति ॥ नित्यत्वात्सर्वगतत्वाच्च वर्णानां स्वतः क्रमाभावादिति भावः ॥ तत्वसंख्यानेति ॥ नित्या वेदाः पुराणाद्याः कालप्रकृतिरेव च । नित्यानित्य''मित्यस्य व्याख्यावसरे । ननु व्यामिश्रोक्तौ सत्यामपि कथमनादित्वनिर्णय इत्यत आह ॥ युक्तमिति ॥ एतत् अनादित्वम् । स्वतः क्रमशून्यानां वर्णानां क्रमस्य बुद्धिघटितत्वेऽपीश्वरबुद्धेरनादिनित्यत्वेन तद्घटितत्वादनादित्वोपपत्तेरिति भावः ।

तद्बुद्धौ तन्मनसि । तट्टीकायां प्रागुक्ततत्वनिर्णयटीकायामित्यर्थः । प्रलयेऽविच्छेदाया-वश्यवक्तव्यत्वात् उच्चारणस्य चानादिनित्यत्वाभावात्कूटस्थता नेति क्वचिदुक्तमित्यर्थः । उक्तं च सुधायां वियत्पादे ''नियतविशिष्टानुपूर्वीविशिष्टत्वेनार्थावबोधशक्त्याऽऽविर्भावो जनि'' रिति ॥ आदिपदेनेश्वरोऽपि गृह्यते । तदुच्चारणघटितस्यापि तथात्वात् । अत एव बुद्धिस्थत्वादिति तद्बुद्धावित्येवोक्तम् । उक्तं च तर्कताण्डवे ''आद्युनिकाध्यापकेन स्वबुद्धिस्थपूर्वपूर्वदिवसीयक्रमानुसारेणैवोत्तरोत्तरदिवसेष्विव ईश्वरेणापि स्वबुद्धिस्थप्रवाहानादि-पूर्वपूर्वकल्पीयक्रमानुसारेणैवोत्तरोत्तरकल्पेष्वपि वेदस्योच्चारितत्वेने''त्यादि । यदि च ''ज्ञानं नित्यं क्रिया नित्या बलं शक्तिः परात्मन'' इत्यनुव्याख्यानानुरोधाद्भगवत्क्रियाणाम-नादिनित्यता तदा तद्घटितस्यापि कौटस्थ्यं ध्येयम् । ननु यदीश्वरबुद्धिघटिततया क्रमस्यानादित्वं तर्ह्यागतमीश्वराधीनस्वभावत्वं वेदस्य । न हि यो यद्बुद्ध्यधीनः स न तदधीन इति सम्भवति । वर्णानामन्यथा क्रमेणाप्यनुसंधातुं शक्यत्वादित्यत आह ॥ कृत्वाचिन्तयेति ॥ बुद्धिघटितत्वं विना वेदस्यानादित्वाभाऽवेप्यनादित्वं सिद्धवत्कृत्येशाधीनत्वमाशङ्क्य

(प्रकाशिका)

तादृशस्यापीशाधीनत्वोक्तौ वेदे फलाभावेपि तादृशजीवात्मादेरीशाधीनत्वं सिध्यति फलमिति न वैयर्थ्यमिति भावः । अनादित्वोक्तिः बुद्धचघटितात्मादिसाधारणानादित्वोक्तिः । एतेनानुव्याख्याने नित्यत्वादित्यनेनानादित्वं विवक्षितमित्युक्तं भवति ।

पाण्डुरङ्गि — तत्वसंख्यानतत्वनिर्णयटीकयोर्विरोधं परिहर्तुं शङ्कते ॥ नन्विति ॥ अत्र क्रमो नाम क्रमिकबुद्धिगोचरत्वम् । ईश्वरबुद्धेः सर्वविषयसमूहालंबनत्वेपि वेदस्य प्रमापकत्व-सिद्धयेऽभिव्यक्तिविशेषेण क्रमस्याप्यावश्यकत्वम् । वर्णमात्रे प्रयोगप्रत्यययोरभावात् । क्रमस्य च सर्वगतनित्यवर्णे स्वतो देशतः कालतश्चायोगादिति भावः । अत एवोक्तं तत्वनिर्णये वर्णादयस्तत्क्रमात्मको वेदश्च नित्य एवेति सिद्धमिति ॥ मैवमिति ॥ न च तत्वसंख्याने वेदशब्देन वर्णमात्रग्रहणम् । उदाहृतप्रमाणविरोधात् । पौराणवर्णानामप्यविशिष्टत्वेन पृथङ्नित्यानित्यकोटौ निवेशायोगाच्च । पुराणपदेन तद्वाक्यात्मकग्रन्थस्यैवोक्तौ ऋगादि-पदवाच्यग्रन्थस्यैव प्राधान्येन तदादित्वेन ग्रहणस्यैवौचित्याच्च । वाचा विरूपनित्यया । नित्यया नित्यया स्तौमीत्यादिविशेषवाक्यविरोधाच्च । नित्या वर्णाः समस्तशः तथावेदाः समस्ताश्च तथाऽव्याकृतमम्बरमिति तत्वसंख्यानटीकानियामकवायुपुराणादिप्रमाणविरो-धाच्चेति ज्ञेयम् । टीकावाक्यत्वाविशेषाद्विरोधशंकायां विष्णुतत्वनिर्णयटीकानुरोधेन तत्वसंख्यानटीकैव कुतो न व्याख्येयेत्यतः प्रमाणमुक्त्वा युक्तोऽयुक्तश्च यद्यर्थ इत्यनुव्या-ख्यानोक्तं च न्यायमाह ॥ युक्तं चैतदिति ॥

न चेश्वरबुद्धिस्थत्वाविशेषात्पुराणानामप्यपौरुषेयत्वापत्तिः । कल्पभेदेन क्रमव्यत्या-समात्रेणापौरुषेयत्वाभावस्य पुराणानि तदर्थानीत्यादौ समर्थितत्वात् । तर्ह्याप्तवाक्यस्या-प्रामाण्यमेव प्राप्तमित्यत आह ॥ तट्टीकायामिति ॥ ननु सर्गे सर्गेऽमुनैवैत इति पुराणवाक्योक्तप्रत्यभिज्ञापरामर्शकस्य प्रत्यभिज्ञाविरोधस्योक्तत्वादित्याचार्यवाक्यस्य व्याख्यानावसरे न च सादृश्यादेव त एवेत्युक्तम् । तथासत्यपौरुषेयत्वसिद्धेर्दुर्निवार त्वादित्युत्तरटीकायां कथमीश्वरीयक्रमस्यैव कृतकत्वाभ्युपगम इत्यत आह ॥ कृत्वाचिन्तया वेति ॥ अनादिभूतस्यापीश्वरबुद्धिविषयीभूतवेदक्रमस्योत्पत्त्यङ्गीकारेऽपि पुराणादिव्यावृत्तम-पौरुषेयत्वमक्षतमित्यभ्युपगमवादेनेत्यर्थः । अत एवोक्तं उपलक्षणं चैतत् । जन्मादिवाक्य-गतिकथनविरोधाच्चेत्यपि द्रष्टव्यमिति । तर्हि कृत्वाचिन्तापक्षेऽत्र पूर्वपक्षेऽनादि-त्वोक्त्ययोगादाकाशाधिकरणादभ्यधिकाशङ्कोत्थानायोगादेतदधिकरणवैयर्थ्यमित्यत आह ॥

अनादित्वोक्तिरिति ॥ कृतकस्यापि पूर्वतनक्रमव्यत्यासेन क्रमान्तरस्य केनाप्यकरणात्तदनधीनत्वम् । तावतापि पूर्वपक्षोदयसम्भवादिति भावः । एवं च तत्वसंख्यानटीकाया निरवकाशत्वेन तदनुसारेण तत्वनिर्णयटीकाया व्याख्येयत्वान्न तत्वनिर्णयटीकानुसारेण वेदस्य कृतकत्वसिद्धिः । तथाच वेदस्यानादित्वात्तत्स्वभावस्य गानत्राणकर्तृत्वादिरूपस्य प्रवृत्तिनिमित्तस्य नेशाधीनत्वमित्युपपादितम् । इदानीं तु मास्तु तस्यानादित्वम् । न चैवमनादिस्वभावत्वोक्त्यनुत्पत्तिरिति वाच्यम् । अनादित्वाभावेप्यनादित्वाभ्युपगमेन कृत्वाचिन्तयानादित्वोक्तिसम्भवात् । न च कृत्वाचिन्तयानादित्वोक्तेः प्रयोजनाभावेन कृत्वाचिन्ताया एवानुपपत्तिरिति वाच्यम् । अनादिस्वभावनियामकत्वरूपमहागुणसिद्ध्यर्थ्यमनादिस्वभावनिमित्तकशब्दान्तरसमन्वये न्यायः फलिष्यतीति प्रदर्शनार्थत्वेन तस्यावश्यकत्वात् । यथाकाशाधिकरणेऽवकाशप्रदत्वस्याचेतनस्वभावत्वाभावेपि सिद्धान्ते तस्येशतंत्रत्वसमर्थनं स्वभावनियामकत्वरूपमहागुणसिद्ध्यर्थं स्वभावनिमित्तकशब्दान्तरसमन्वये फलिष्यतीति कृत्वाचिन्तया तथेदमपीति मनसि निधाय वा पक्षान्तरमाह ॥ कृत्वाचिन्तया वेति ॥ कृत्वाचिन्तया वाऽनादित्वोक्तिरित्येकं वाक्यम् । अनादित्वाभावे तथा व्यपदेशे नियामकमाह ॥ अनन्याधीनत्वादिति ॥ स्वतन्त्रपुरुषापूर्वकत्वादित्यर्थः ।

तात्पर्यचन्द्रिका

तत्राद्या शङ्का ''चेतोर्पणनिगदा''दिति सूत्रे प्रयोजनोक्त्या परिहृता । द्वितीयतृतीये तु ''उभयस्मिन्नप्यविरोधा''दित्यनेन परिहृते । तस्य यथा विवक्षाभेदेन सप्तमीपञ्चम्यौ न विरुद्धे इत्यर्थः । तथाऽऽकारभेदेन कर्णादिविदूरत्वदृष्टत्वादि केन विरुद्धे इत्यप्यर्थोपपत्तेः । चतुर्थीतु ''बाहुल्यात् श्रुतिलिङ्गयो''रित्यनुव्याख्याने ''ज्यायांश्च पुरुष इत्यादिशब्दसहितलिङ्गैश्चे''त्यादि न्यायविवरणे च परिहृता । अयं भावः । ''अतो ज्यायांश्च पुरुषः यद्वै तद्ब्रह्म एतामेव ब्रह्मोपनिषद''मित्यादि श्रुतीनां गानत्राणकर्तृत्वं भूतादिपादत्वं एतामेव नातिशीयंत इति सर्वोत्तमत्वमित्यादिलिङ्गानां च बाहुल्यादनेकेषामपि शब्दानां प्रसिद्धार्थत्यागः । पुरुषशब्दोहि ''स वा अयं पुरुषः सर्वासु पूर्षु पुरिशयो नैनेन किं च नानावृत''मित्यत्र सर्वान्तर्यामित्वं पुरुषत्वमित्युक्तेः तथा ''पुरुषो ह वै नारायणः सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपादित्येष ह्येवाचिन्त्यः परः परमो हरिः पुरुषः

(तात्पर्यचन्द्रिका)

परः परमात्माजो ब्रह्म नारायणः प्रभुः''रित्यादि श्रुतेः । ''यथाहि पौरुषे सूक्ते विष्णुरेवाभिधीयते'' इत्यादिस्मृतेश्च पुरुषोत्तमे मुख्य इति । पञ्चमी तु ''तादृशत्वात्तु तच्छक्ते''रित्यनुव्याख्याने परिहृता ।

प्रकाशिका — किं तदुक्तशङ्कानिरासकमित्यतस्तद्दर्शयन्सिद्धान्तयति ॥ तत्रेति ॥ वेदोपदेष्टृत्वपातृत्वरूपगानत्राणकर्तृत्वादिरूपगायत्र्यादिशब्दार्थगुणस्वरूपत्वेन चेतोर्पणार्थमेव तादृशशब्दैर्निगद्यमानत्वादित्युपासनारूपप्रयोजनोक्त्येत्यर्थः। द्वितीयशङ्कापरिहारस्य भाष्यादिदिशोपलंभेपि तृतीयाया अस्मिन्सूत्रेऽदर्शनात्स्वयमेवाह ॥ तस्येति ॥ त्रिसप्तलोकविवक्षाभेदेनेत्यर्थः । स्पष्टयिष्यते चैतदग्र इति भावः ॥ आकारेति ॥ देशकालगुणाद्यपरिच्छिन्नत्वेनाकारेण कर्णादिविदूरत्वं अकात्स्न्र्येन दृष्टत्वादिकम् । यद्वा केवलरूपेण कर्णादिविदूरत्वं किंचिदधिष्ठानाधिष्ठितत्वादिरूपेण दृष्टत्वादिकमित्यर्थः । उक्तं च सुधायां ''न च ज्योतिषो ब्रह्मत्वे दृष्टत्वाद्यनुपपत्तिः । यतस्तदधिष्ठानद्वारा कर्णादिविदूरस्यैव हरेरुपपद्यत'' इति ॥ चतुर्थीति ॥ गायत्रीवागादिबहुश्रुतिबलेनानुव्याख्यानोक्तेत्यर्थः ।

कथं प्रसिद्धबहुलशब्दानामन्यथार्थता ।
इति चेत्तद्धरेरेव बाहुल्यात् श्रुतिलिङ्गयोः

तादृशत्वाच्च तच्छक्ते''रित्यनुव्याख्याने ''तावानस्य महिमा ततो ज्यायांश्चे''त्यादि न्यायविवरणे चेत्यर्थः । ननु पूर्वोत्तरपक्षयोश्श्रुतिबाहुल्यसाम्ये कथं निर्णय इत्यतः श्रुतिसाम्येऽपि लिङ्गानामधिक्यान्निर्णयः स्यादिति भावेन श्रुतिलिङ्गबाहुल्यं दर्शयन्नाह ॥ अयं भाव इति ॥ गानेति ॥ गायति च त्रायति चेत्युक्तमित्यर्थः । ''सैषा चतुष्पदा षड्विधा गायत्री''ति गायत्र्याः प्रागुक्तषड्विधत्वमनूद्य चतुष्पदत्वं व्यपदिश्य तत्रैव पुरुषसूक्तमन्त्रस्संवादायोदाहृतः ''तावानस्य महिमा ततो ज्यायांश्च पुरुषः । पादोऽस्य सर्वाभूतानि त्रिपादस्यामृतं दिवी''ति । अत्रोक्तभूतादिपादत्वमित्यर्थः । एतां गायत्रीम् । ब्रह्मशब्दस्य जन्मादिसूत्रादौ लिङ्गानां च भाष्यादौ विष्णौ मुख्यत्वस्य साधितत्वात्पुरुषशब्दस्य तत्साधयति ॥ पुरुषशब्दोहीति ॥ पुरुषोत्तमे मुख्य इत्यन्वयः । एतेन भाष्यटीकयोर्लिङ्गस्य निरवकाशत्वेन सिद्धान्तकरणमुपलक्षणमिति सूचितम् । सवा अयमिति श्रुतिरष्टमगीताभाष्यटीकायां व्याख्याता । पञ्चमी त्विति ॥ नित्यत्वादेवेत्यनुव्याख्यानोक्ता ।

पाण्डुरङ्गि — तत्राद्येति ॥ विष्णौ प्रसिद्धनारायणादिशब्दपरित्यागेनान्यत्र प्रसिद्धगायत्र्यादिशब्दप्रयोगे प्रयोजनं वाच्यमित्याद्याशङ्क्येत्यर्थः ॥ द्वितीयतृतीये इति ॥ युक्तमग्निसूक्तस्थज्योतिषो विष्णुत्वम् । उपदेशभेदाभावात् । इह तु दिव इति पञ्चम्युपदेशस्थस्य ज्योतिःश्रुत्या विष्णुत्वेपि दिवीति तद्विरुद्धसप्तम्युपदेशस्थगायत्र्या न विष्णुत्वमिति द्वितीया । अग्निसूक्तस्थज्योतिर्निष्ठकर्णादिविदूरत्वविरुद्धदृष्टत्वाद्युपदेशान्नेदं ज्योतिर्विष्णुस्ततश्च गायत्र्यपि न विष्णुरिति तृतीया शङ्केति द्वितीयतृतीये इत्यर्थः । ननूभयस्मिन्नप्यविरोधादित्यनेन द्वितीयशङ्कानिरासस्सम्भवेपि कथं तृतीयशङ्कानिरासः । त्रिसप्तलोकापेक्षयोभयस्मिन्नविरोधेन तन्निरासासम्भवादित्यत आह ॥ तस्येति ॥ चतुर्थी त्विति ॥ एकस्या वह्निश्रुतेरन्यत्र प्रसिद्धिबाधेपीत्यादिनोक्तेत्यर्थः । ज्यायांश्च पुरुष इत्यादिशब्दसन्निहितलिङ्गैश्चेत्यत्रादिशब्दसंग्राह्यं वदन्नेव सूत्रे भूतादीति साक्षाल्लिङ्गस्योक्तत्वेन न्यायविवरणेऽनुक्तमपि लिङ्गबाहुल्यं दर्शयन्नेव पुरुषश्रुतेर्निरवकाशत्वं दर्शयति ॥ अयं भाव इति ॥ पञ्चमी त्विति ॥

तात्पर्यचन्द्रिका

अयं भावः ।

अनादीनां गुणादीनां यथागुण्यादितन्त्रता ।
तथाऽनादिश्रुतेरस्तु क्षेमायेश्वरतन्त्रता ॥ १ ॥

यथा वैशेषिकमते गगनादिपरिमाणादीनामनादिनित्यानामपि स्वाश्रयगगनाद्यधीनता यथा चाद्वैतिमतेऽनादेरात्माज्ञानसम्बन्धस्य जीवब्रह्मविभागादेश्च सम्बन्ध्यज्ञानाद्यधीनता । यथा वा प्राभाकरमते दुःखप्रागभावस्य मोक्षस्य ज्ञानाधीनता यथा वा मतांतरे दुरितप्रागभावस्य निषिद्धाकरणाधीनता । तथा गायत्र्यास्तत्पदप्रवृत्तिनिमित्तस्य चोत्पत्त्यभावेपि स्थितौ विष्ण्वधीनता । किं च सादेरप्युत्पत्तावन्यापेक्षायामपि तदनन्तरं स्थितावनादितो न विशेषः । तत्र च सादिर्नकेवलमुत्पत्तावीशतन्त्रः किंतु स्थितावपीति ''प्रकृतैतावत्त्वं हि प्रतिषेधती''त्यत्र वक्ष्यमाणत्वादनादेरुत्पत्त्यभावेन तत्रान्यानपेक्षायामपि स्थितावीशापेक्षा किं न स्यात् । दृश्यते हि योगेऽन्यापेक्षस्य पराधीनत्ववत्क्षेमेपि तदपेक्षस्य तदधीनता ।

(तात्पर्यचन्द्रिका)

किञ्च- अकर्तुमन्यथाकर्तुं कर्तुं चास्तीश्वरस्य यत् ।
सामर्थ्यं तेन तत्तंत्रमनाद्यपि च सादिवत् ॥ १ ॥

ईश्वरो हि सर्वत्राप्रतिहतशक्तित्वाद्धटेनेवाव्याकृताकाशादिनापि रहितमतीतादिकालं कर्तुं शक्नोति । सङ्कल्पाभावात्तु तदकरणम् । तदभावश्च कार्योन्नेयः । न च शक्त्यभावादेव तदुपपत्तिः । ''स्वभावजीवकर्माणि'' इत्यादिटीकोदाहृतश्रुत्यादिविरोधादैश्वर्यविरोधाच्च । तथाचानादीशेच्छाधीनानादिस्वभावता कथमीशतन्त्रताविरोधिनी । स्वभावमात्रस्येशाधीनताऽऽकाशाधिकरण उक्ता । अत्र त्वनादेरपीति भेदः । पराधीनविशेषावाप्तिलक्षणोत्पत्तिरीशादन्यस्य सर्वस्यापीति वियत्पादे वक्ष्यते । अत्र तु प्रागसतस्सता सम्बन्धरूपोत्पत्तिरहितानामपि स्वरूपसत्तेशाधीनेत्युक्तमित्यविरोधः ।

प्रकाशिका — नन्वनादेरन्याधीनत्वं क्वाप्यनुपलम्भादसम्भावितमित्यतः -

सत्ताप्रधानपुरुषशक्तीनां च प्रतीतयः ।
प्रवृत्तयश्च तास्सर्वा नित्यं नित्यात्मना यतः ।
तथाऽनित्यतयाऽनित्यं नित्यशक्त्या स्वयेश्वरः ।

नियामयति नित्यं चे''ति सांख्याधिकरणानुव्याख्यां हृदि कृत्वाह ॥ अयं भाव इति ॥ गुणादीनां परिमाणजात्यादिधर्माणाम् । दृष्टान्तविवरणपूर्वं दार्ष्टान्तिकं विशदयति ॥ यथेति ॥ अधीनत्वे हेतुस्स्वाश्रयेति । आश्रिते आश्रयाधीनत्वस्य लोक उपलम्भात् । अनादेरिति ॥

जीवो ब्रह्म विशुद्धा चिद्भेदस्तस्यास्तयोर्द्वयोः ।
अविद्या तच्चितोर्योगः षडस्माकमनादयः ॥

इत्युक्तेरिति भावः ॥ अज्ञानाद्यधीनतेति ॥ अन्यथा तन्निवृत्तावपि तन्निवृत्तिर्न स्यादिति भावः ॥ ज्ञानेति ॥ ज्ञानेन दुःखप्रागभावस्योत्तरसमयसम्बन्धरूपपरिपालनं क्रियत इति तैरुच्यमानत्वादिति भावः । एवं दुरितप्रागभावेपि ध्येयम् । ननूत्पाद्यत्वातिरेकेण तदधीनत्वस्यान्यस्याभावात्कथमनादेरन्याधीनता । न चानाश्यत्वमेव तदिति वाच्यम् ।

अनादेर्नाशाभावस्य स्वत एव सिद्ध्याऽन्यानपेक्षणात् । न हि मतान्तरसिद्धदृष्टान्त-मात्रेणानुपपन्नोप्यर्थस्सिध्यति । अपि तु सम्भावितमेवेत्यत आह ॥ किञ्चेति ॥ प्रकृतैतावत्त्वमिति ॥ तृतीयाध्याये द्वितीयपादे ''प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः'' इत्यत्र जगत्पालनं विष्णोर्युक्तमयुक्तं वेति सन्देहे विष्णोस्सृष्टिसंहारकर्तृत्वात्सत्यां च सृष्टौ यावत्संहारमवस्थितेस्स्वत एव सिद्धेस्संहर्तुस्संहारातिरिक्तस्यैव व्यापारस्य रक्षारूपस्या-योगान्न पालनं युक्तमिति प्राप्ते ''नैतावदेनापरो अन्यदस्त्युक्षा स द्यावापृथिवी बिभर्ती''ति श्रुतौ नैतावदिति प्रकृतस्य सृष्ट्यादिकर्तृत्वस्य तावन्मात्रत्वं निषिध्य ततोधिकस्य पालनस्यापीश्वरे वर्णनात्सृष्टिसंहारकर्तुरपि पालकत्वव्यापारोऽन्यो युक्त इति सिद्धान्त इति वक्ष्यमाणत्वात् जन्यवस्तुनि स्थितौ यथा भगवन्नियतता तथात्रापीत्यर्थः । ननु नैतावताऽन्याधीनतेत्यत आह ॥ दृश्यते हीति ॥ भृत्यादौ राजाद्यधीनतायाः प्रसिद्धत्वादिति भावः । ननु यद्यनाद्यपीशाधीनं तर्हि कदाचित्तद्राहित्यमपि कुर्यात् । घटराहित्यमिव । न चैवम् । अतो न तदधीनमित्यतः —

शक्तोऽपि ह्यन्यथाकर्तुं स्वेच्छानियमतो हरिः ।
कारणैर्नियतैरेव करोतीदं जगत्सदा ॥

इति तदनन्यत्वनयानुभाष्यसूचितं समाधिमाह ॥ किञ्चेति ॥ विष्टिगृहीता ईश्वरप्रेरिता वाऽनिष्टमप्यकृत्वा नैवस्थातुमीशते । न च भगवांस्तथेत्यकर्तुं शक्तोपीत्युक्तम् ॥ ईश्वरोहीति ॥ अन्यथेश्वरत्वभङ्ग इति सूचयति । वक्ष्यतेच ''आत्मनिचैवं विचित्राश्चही''त्यत्र युक्तिपादे विचित्राप्रतिहतशक्तिमत्त्वमिति भावः । तदभावस्संकल्पाभावः । ननु सिद्धायां शक्तौ सङ्कल्पाभावनिमित्तं तदकरणम् । सैव कुतस्सिद्धेत्याशङ्क्याह ॥ न चेति ॥

स्वभावजीवकर्माणि द्रव्यं कालश्रुतिःक्रिया ।
यत्प्रसादादिमे संति न संति यदुपेक्षया ॥

इति तदनन्यत्वनयानुव्याख्यानोक्तश्रुत्यादिविरोधादित्यर्थः । एतेन ''तादृशत्वाच्च तच्छक्ते''रित्यस्य नित्यानित्यस्वभावसर्वविषयकत्वादीश्वरशक्तेरित्यर्थ उक्तो भवति । ननु घटादिवदनाद्यप्यस्मदाद्यधीनं किं न स्यादित्यत आह ॥ तथाचेति ॥ अस्मदादावनीश्वर-भावादिति भावः । नन्वाकाशाधिकरण आकाशोपलक्षितसर्वस्वभावस्येशाधीनत्वोक्तेर्गतार्थ-मेतदित्यत आह ॥ स्वभावेति ॥ साद्यनादिसाधारण्येनेत्यर्थः । नन्वनादिस्वभावस्येशाधीनत्वे

(प्रकाशिका)

कैमुत्यन्यायहततया नाकाशाधिकरणपूर्वपक्षोदय इति चेन्न । सामान्यतो चेतनस्वभावस्येशाधीनत्वोक्तावेव विशेषविचारावसरात् । आकाशादिपदप्रवृत्तिनिमित्तसद्भावोपपादनेनाकाशादिशब्दमुख्यार्थत्वोपपत्त्यर्थतया तत्सार्थक्यादिति । ननु द्वितीयस्य तृतीयपादे ''न वियदश्रुते''रित्यादावाकाशाख्यवियदुत्पत्तिमन्नवेति सन्देहे ''अनादिर्वाऽयमाकाशः अनन्तोऽयमाकाशः आकाशवत्सर्वगतश्च नित्य'' इत्यादि श्रुतिष्वनादित्वश्रवणादुक्तानेकश्रुतिविरोधेन सम्भूतवाक्यस्य प्रामाण्यायोगादनुत्पत्तिमदिति प्राप्ते ''स इदं सर्वमसृजत आकाशस्सम्भूत'' इत्याद्युत्पत्तिश्रुतिबाहुल्यादनुत्पत्तिश्रुत्यभावाच्चानादित्वश्रुतेश्चिरंतनत्वाद्यभिप्रायेण भाक्तत्वसम्भवादुत्पत्तिमद्वियदित्यादिन्यायैः अनादेरपि सर्वस्योत्पत्तेर्वक्ष्यमाणत्वादजन्यत्वाङ्गीकारेणेह पूर्वोत्तरपक्षौ तद्विरुद्धावित्यत आह ॥ पराधीनेति ॥ ''असम्भवस्तु सतोऽनुपपत्ते''रित्यधिकरणं हृदि कृत्वाऽऽह ॥ ईशादिति ॥ प्रागसतस्सत्तेति ॥ न्यायरीत्यैतत् । सिद्धान्ते तु कार्यात्मनाऽसतः कारणात्मना सतो घटादेर्यस्सत्तासम्बन्धः पृथ्वाकारताद्यवस्थाविशेषाप्तिः तद्रूपोत्पत्तिरहितानामित्यर्थः । सत्ता सत्वमित्यर्थः । न तु जातिः ।

पाण्डुरङ्गि — स्वाश्रयेति हेतुगर्भविशेषणम् । अत्र गुणादीनां गुण्याश्रितत्वात् स्थितौ ज्ञप्तिविशेषे च गुण्याद्यधीनत्वं विवक्षितमिति ज्ञातव्यम् । अनादिनोपि भगवदधीनत्वं तत्तद्वादिसिद्धदृष्टान्तप्रदर्शनेनोपपाद्यप्रकृतैतावत्वंहीत्यादिवक्ष्यमाणन्यायेनापि तदुपपादयन् तन्न्यायं प्रकृते सङ्गमयति ॥ किञ्चेति ॥ तत्तद्वादिसिद्धसमयसिद्धं दृष्टान्तमुक्त्वा लौकिकदृष्टान्तमप्याह ॥ दृश्यतेहीति ॥ वस्तुस्वभावादनादेरपि नियम्यत्वं पूर्वमुक्तम् । इदानीं नियामकस्वभावाच्च तदुपपत्तिरित्याह ॥ किञ्चेति ॥ कर्तुमकर्तुमन्यथाकर्तुं चेति सम्बन्धः ।

तात्पर्यचन्द्रिका

यद्यप्यनादिस्वभावस्येशाधीनतामनुक्त्वाऽपि गायत्रीशब्दप्रवृत्तिनिमित्तस्य गानत्राणकर्तृत्वस्य वेदोपदेष्टरि रक्षके च विष्णावेव सम्भवेन तस्य विष्णुपरता वक्तुं शक्या । न च योगाद्रूढेः प्राबल्याद्रूढिबाधकमहायोगायेशाधीनत्वोक्तिः । गायति चत्रायति चेति श्रुत्युक्तत्वान्निरवकाशविष्णुलिङ्गानुग्रहाच्च रूढित्यागेन योगस्यैव ग्राह्यत्वात् । भाष्ये विष्णौ पौराणिकरूढेरुक्तत्वाच्च । तथापि यथा व्रीहीनवहंतीत्यत्र द्वितीयाश्रुतिमतंत्रीकृत्यावघातादेर्लिङ्गाद्व्रीहिशेषतोक्ता द्वितीये । तथात्रापि

तद्गतत्वमतंत्रीकृत्य छन्दोगतस्य प्रवृत्तिनिमित्तस्य विष्ण्वधीनत्वेन श्रुतेर्विष्णावेव महायोगेन परममुख्यत्वमिति प्रदर्शनार्थं अनादिस्वभावनियामकशक्तिरूप-महागुणसिद्ध्यर्थम् । विष्णावसम्भवदनादिप्रवृत्तिनिमित्तकशब्दसमन्वयार्थं चेशाधी-नतोक्ता तस्माद्विष्णुरेवाधिवेदगतगायत्र्यादिशब्दवाच्य इति । सूत्रक्रमस्तु आद्य उपक्रमस्थहेतूक्तिः । द्वितीये तूपसंहारोदाहृतमन्त्रस्थहेतूक्तिः । तृतीये बाधकोद्धार इति ॥

प्रकाशिका — अत्रभाष्यादौ प्रयत्नेनानादेरन्याधीनतासमर्थनस्यानौचित्यमा-शङ्क्याभिप्रायोक्त्या निरस्यति ॥ यद्यपीति ॥ वेदोपदेष्टरीति ॥ गायति च त्रायति चेति श्रुत्युक्तयोगानुगतिसूचनमेतत् । विष्णावेवेति ॥ न हि तत् जडेऽकर्तरि मुख्यतो युज्यत इत्येवकारः । ननु नैवं शङ्क्यम् । गायत्रीशब्दस्य छन्दसि रूढत्वेन योगमात्रेणापहारा-योगात् । तद्बाधकमहायोगाय ''स्वातन्त्र्यं तत्र मुख्यं स्या''दित्युक्तदिशेशाधीनत्वोक्ति-रित्याशङ्क्य निरस्यति ॥ न चेति ॥ श्रुत्युक्तत्वादिति ॥ ''आज्यैः स्तुवत'' इत्यादौ ''यदाजिमीयुस्तदाज्यानामाज्यत्व''मिति श्रौतयोगेन रूढित्यागस्य दृष्टत्वेन केवलयो-गापेक्षया श्रौतयोगस्य बलवत्त्वात् । अन्यथा तस्य व्यर्थतापत्तेः । ''कम्पना''दित्यत्र स्मार्तयोगस्यापि रूढिबाधकताया वक्ष्यमाणत्वाच्चेति भावः । प्रागुक्तलिङ्गानुगृहीतत्वाच्च प्राबल्यं योगस्येत्याह ॥ निरवकाशेति ॥ पौराणिकेति ॥ ''सर्वछन्दोभिधो ह्येष सर्ववेदाभिधो ह्यंसा''वित्यादिना पुराणसिद्धरूढेरित्यर्थः ॥ यथेति ॥ द्वितीयाध्यायाद्यपादे ''तानि द्वैधं गुणप्रधानभूतानी''ति चतुर्थेऽधिकरणे व्रीहीनवहंतीत्यत्रावघातादपूर्वमस्त्युत नेति संशये वाक्यसाफल्यायावश्यमपूर्वे कल्प्ये भावार्थाधिकरणन्यायेन धात्वर्थादेव कल्पनं न्याय्यमित्यवघातादस्त्यपूर्वं व्रीहयस्तु तदर्था इति प्राप्ते अवघातसामर्थ्यपर्यालोचनया तुषविमोकद्वारा पुरोडाशनिर्वर्तनरूपदृष्टप्रयोजनलाभेनापूर्वस्यैवाकल्प्यत्वात् दृष्टानुनिष्पादिनो नियमा दृष्टस्य स्वीकारेण वाक्यावैय्यर्थ्याद्व्रीह्यर्थोऽवघात इति सिद्धान्तितम् । तत्र यथा व्रीहीनिति शेषित्वबोधिन्यां श्रुतौ सत्यामपि तदनादरेण सामर्थ्यपर्यालोचनयैवावघातस्य व्रीहिशेषतोक्ता तथाऽत्रापीत्यर्थः ।

ननु तत्र ''सक्तून् जुहोती''त्यादौ द्वितीयाया व्यभिचारित्वादनादरणं तस्या इत्यतस्तर्ह्यत्रापि प्रयोजनविशेषलाभाय तदनादरणमित्याह ॥ महायोगेनेति ॥ ''स्वातन्त्र्यं

(प्रकाशिका)

तत्र मुख्यं स्या''दित्युक्तेरिति भावः ॥ असम्भवदिति ॥ तेनावकाशाकारादिवर्णप्रधानादि-शब्दवाच्यता सिध्यतीति भावः । अधिकरणार्थोपसंहारस्तस्मादिति ॥ परमते सूत्राणामक्रमं मन्वानस्स्वमते तमाह ॥ सूत्रेति ॥ उपक्रमेति ॥ सौत्रदर्शनशब्देन ''गायति च त्रायति चे''त्युपक्रमवाक्योक्तगानत्राणकर्तृत्वलिङ्गोक्तिरित्यर्थः ॥ द्वितीय इति ॥ भूतादिपादेत्यत्र ''सैषा चतुष्पदा षड्विधा गायत्री''ति गायत्र्याः प्रागुक्तषड्विधत्वमनूद्य चतुष्पदत्वं व्यपदिश्य तत्रैव ''तदेतदृचाभ्युक्त''मित्युदाहृते पुरुषसूक्तस्थे तावानिति मन्त्रे भूतादिपादत्वरूप-लिङ्गोक्तिरित्यर्थः । एवं द्वाभ्यां स्वपक्षस्थापने सति उपदेशभेदादिति तृतीये दिवि दिव इत्युपदेशभेदरूपबाधके शङ्किते विवक्षाभेदेन तत्परिहारः क्रियत इत्यर्थः । तदुद्धारप्रकारश्चाग्रे स्पष्ट इत्याशयः ।

पाण्डुरङ्गि — उपक्रमस्थहेतूक्तिरिति ॥ गायति त्रायते चेति वाक्योक्तगानत्राण-कर्तृत्वरूपलिङ्गोक्तिरित्यर्थः ॥

तात्पर्यचन्द्रिका

अत्रोभाभ्यामुक्तं चतुस्सूत्र्येकमधिकरणम् । चरणाभिधानादित्यस्य च पादाभि-धानादित्यर्थः । पादाभिधानं च ''अथ यदत'' इति छान्दोग्यगतमेव । तत्र ''तदेतदृचाऽभ्युक्तम् । पादोस्य सर्वाभूतानि त्रिपादस्यामृतं दिवी''ति पादाभिधा-नादिति । तत्र लाघवार्थं श्रुत्यनुगमार्थं च पादाभिधानादिति सूत्रं स्यादिति सुधायामेवोक्तम् । किं चास्मद्रीत्या ''हृदय आहितं य''दिति गुहानिहितत्वयुक्त-ज्योतिर्वाक्योदाहरणेनानन्दमयाधिकरणाक्षेपेण पूर्वपक्षसम्भवे तदनाक्षेपेण ''अथ यदत'' इति वाक्योदाहरणमयुक्तम् । किंच-

पौनरुक्त्यं परमते ज्योतिर्भूतादिसूत्रयोः ।
पादोपदेशादन्या हि नैवास्ति चरणाभिधा ॥ १ ॥

पादोस्य सर्वाभूतानीति पूर्ववाक्यस्थपादाभिधानादन्यस्य ज्योतिर्वाक्योपा-दाभिधानस्याभावात्तस्य च भूतादिसूत्रेणैवोक्तत्वाच्चरणाभिधानादित्यस्य पौन-रुक्त्यम् । अथ ''चरणाभिधाना''दित्यनेन ''पादोऽस्य सर्वाभूतानी''ति

मन्त्रवाक्यस्थं सर्वभूतानामेकपादत्वममृतस्य त्रिपात्त्वं चोच्यते । ''भूतादिपादे'' त्यनेन तु ''सैषा चतुष्पदे''ति ब्राह्मणवाक्यस्थं भूतपृथिवीशरीरहृदयानां पादत्व-मुच्यते । ब्राह्मणवाक्ये हि ''इदं सर्वं भूत''मिति भूतं ''येयं पृथिवी''ति पृथिवीं ''यदिदमस्मिन्पुरुषे शरीर''मिति शरीरं ''यदिदमस्मिन्नंतःपुरुषे हृदय''मिति हृदयं चोक्त्वा ''सैषा चतुष्पदा षड्विधा गायत्री''ति भूतादीनां चतुर्णां पादत्वं व्यपदिश्यते । ततो न पौनरुक्त्यमिति चेन्न । ''चरणाभिधाना''दित्यनेन ''पादोऽस्य सर्वाभूतानि त्रिपादस्ये''ति मन्त्रस्थपादाभिधानद्वयस्येव ततोऽधि-कार्थस्य ब्राह्मणस्थपादाभिधानस्यापि वक्तुं शक्यत्वेन भूतादिसूत्रवैयर्थ्यात् । अपि च त्वत्पक्षे हि ब्रह्मणस्तत्तत्पादत्वं तत्तदात्मकत्वम् । तथाच सर्वात्मकत्वं चरणाभि-धानादित्यनेनैवोक्तमिति किं तदेकदेशभूतभूताद्यात्मकत्वप्रतिपादकेन भूतादिसूत्रेण । किं च चतुष्पदेत्यत्र चतुश्शब्दो न भूतादिपरः । पूर्ववाक्ये भूतादिवत् ''वाग्वै गायत्री वाग्वा इदं सर्वं''मिति वाचः ''अस्मिन्हीमे प्राणाः प्रतिष्ठिता'' इति प्राणानां चोक्त्या भूतादीनां षट्त्वेन चतुष्त्वायोगात् । अत एव श्रुतौ षड्विधेत्युक्तम् ।

न च वाच्यं भूतादीनां वाक्प्राणरहितानां चतुर्णां पादत्वं तत्सहितानां तु षण्णां विधात्वमिति । पादशब्देन तदात्मकत्वविवक्षायां वाक्प्राणयोरपि तदात्मकत्वाद्धि-धाषट्कान्तर्गतस्य भूतादिचतुष्टयस्य पृथक्कृत्य पादत्वोक्तेर्निष्फलत्वात् । उपासनार्थं ब्रह्मणि भूतादीनां चरणत्वारोपश्चेद्गायत्र्याख्यछन्दस्येव स स्यादिति गायत्री ब्रह्मेति सिद्धान्तासिद्धिः । तस्मात्सैषेत्यत्र न पूर्ववाक्यस्थानां भूतादीनां पादत्वमुच्यते । किन्तु षाड्विध्यमनूद्य चतुष्पदत्वं विधाय तद्विवरणाय पादोऽस्येत्यादि ऋगुदाहृता । अन्यथा मन्त्रब्राह्मणयोर्भिन्नार्थत्वाद्ब्रह्मणोक्ते ''तदेतदृचाऽभ्युक्त''मिति मन्त्रसंमतिर्न स्यात् । ''त्रिपादस्यामृतं दिवि पादोऽस्ये''ति पादशब्दनिर्दिष्टे चतुष्टये सति तदनिर्दिष्टस्य भूतपृथिव्यादेः पादचतुष्टयत्वायोगाच्च । दिवि दिव इति विरुद्धवि-भक्तिसहितद्युप्रातिपदिकार्थसम्बद्धस्यैक्यं तद्रहितचतुस्संख्यासम्बद्धानां तु मंत्र-ब्राह्मणस्थपादानां भेद इत्यस्यात्यंतायुक्तत्वाच्च ।

प्रकाशिका — उभाभ्यामिति ॥ अद्वैतिरामानुजाभ्यामित्यर्थः । तत्र सूत्रार्थविषय-वाक्ययोर्दूषणेनैवाधिकरणशरीरं दूषितं मन्वानः प्रथमसूत्रार्थं निरसितुमनुवदति ॥ चरणेति ॥

(प्रकाशिका)

ननु न पादाभिधानं विमे कर्णेति वाक्येऽस्तीत्यतो नेदमुदाहरणमिति भावेनाह ॥ पादेति ॥ चतुष्पदेति भूतादिसूत्रोक्तपादाभिधानभ्रान्तिं निरसितुं तद्विवृणोति ॥ तत्रेति ॥ लाघवार्थमिति ॥ चरणेत्युक्त्यपेक्षया पादेत्यस्य लघुत्वात् । श्रुतौ पादशब्दस्यैव श्रुतत्वादित्यर्थः । उदाहरणं चायुक्तमित्याह ॥ किं चास्मद्रीत्येति ॥ ननु तत्रापि ''योऽयमन्तर्हृदय'' इति गुहानिहितत्वं श्रुतमिति चेन्न । ज्योतिःसन्निधानेऽश्रवणादिति वा द्वयोर्गुहानिहितत्वयुक्तत्वेऽपि सूक्तस्थस्य चरणयुक्तत्वेन सूत्रानुगुण्यादिति वा तात्पर्यात् ॥ किञ्चेति ॥ हिशब्दो यस्मादित्यर्थे । श्लोकं विवृणोति ॥ पादोऽस्येति ॥ अन्यस्येति ॥ अन्यस्य सत्त्वे हि तत्परत्वेन चरणेत्यस्य न पौनरुक्त्यं न च तदस्तीत्यर्थः ॥ तस्य चेति ॥ पादोस्येत्यनेनोक्तस्येत्यर्थः । उक्तदोषपरिहारमाशङ्कते ॥ अथेति ॥ ब्राह्मणेति ॥ उपनिषद्वाक्य एवमुक्तौ चरणाभिधानादित्यस्य भूतसूत्रेण पौनरुक्त्याभावेप्यनेन तद्वैयर्थ्यं दुर्निरासमित्याह ॥ चरणाभिधानादित्यनेनेति ॥ पररीत्याच भूतादिपादत्वसूत्रवैयर्थ्यं द्रढयति ॥ अपि च त्वत्पक्ष इति ॥ पादशब्दस्य स्वरूपार्थत्वोपगमादिति भावः ॥ पादोऽस्य सर्वाभूतानीत्यसङ्कुचितसर्वपदेन कृत्स्नतादात्म्यलाभेन भूतपृथिवीशरीरहृदयरूपतदेकदेश-चतुष्टयतादात्म्यपरस्य भूतादिसूत्रस्य वैयर्थ्यमेवेत्यर्थः । अभ्युपेत्य मन्त्रब्राह्मणयोः पादाभिधानभेदं दूषणद्वयमभ्यधायि । वस्तुतस्तु तस्य भेद एव नास्ति । तथात्वे संवादित्वेन मन्त्रोदाहरणायोगात् । तथाच सुस्थं पौनरुक्त्यमित्याशयेन ''सैषा चतुष्पदा षड्विधे''ति ब्राह्मणगतस्य ''पादोऽस्ये''ति मन्त्रगतस्य च पादाभिधानस्यैक्यं वक्तुं पीठमारचयति ॥ किञ्चेत्यादिना तस्मादित्यन्तेन ।

भूतादीति ॥ भूतपृथिवीशरीरहृदयपरः । कुत इत्यतो वाक्प्राणयोरपि प्रकृतत्वादित्याह ॥ पूर्वेति ॥ षट्त्वेनेति ॥ वाग्भूतपृथिवीशरीरप्राणहृदयानां क्रमेण प्रकृतत्वादित्यर्थः । ननु न निष्फलत्वं ब्रह्मणि भूतपृथिवीशरीरहृदयरूपचतुष्टयात्मकत्वोपासनाय तदुक्तेरित्यत आह ॥ उपासनार्थमिति ॥ सः आरोपः । असदुपासनाया अविशिष्टत्वादिति भावः । कथं तर्हि चतुष्पदेत्यस्य सङ्गतिरित्यत आह ॥ तस्मादिति ॥ अनुवादायोगादित्यर्थः । एतेन ''प्रागुक्तषड्विधत्वमनूद्य चतुष्पदत्वं व्यपदिश्ये''त्यादिटीका विवृता ॥ अन्यथेति ॥ भूतपृथिव्यादेरेव चतुष्पदत्वोक्तावित्यर्थः । न युक्तं च भूतादेः पादचतुष्टयत्वकथनमित्याह ॥ त्रिपादस्येति ॥ तदिति ॥ पादशब्दनिर्दिष्टस्येत्यर्थः ॥ दिवीति ॥ द्युस्थस्य दिवः परस्य च द्युप्रातिपदिकार्थसम्बन्धितयैकत्वेन प्रत्यभिज्ञायमानत्वस्योपदेशसूत्रे सिद्धान्ततत्वादित्यर्थः ।

ननु भवन्मतेपि भूतानां पादत्वेन निर्देशात्कथं षाड्विध्यम् । यदि विधान्तर्गतानामपि भूतानां पृथक्कृत्य पादत्वमुच्यते सममेतन्ममापीत्यत आह ॥ अस्माकमिति ॥

गायत्र्यां संस्थितो विष्णुस्त्रीरूपस्सूर्यसप्रभः ।
द्वितीयश्चैव मत्स्यादिर्भूतनामाऽवतारगः ॥
तृतीयो वाचि संस्थस्स स्त्रीरूपो हयशीर्षकः ।
चतुर्थः पृथिवीसंस्थस्त्रीरूपः पीतवर्णकः ॥
जीवस्यान्तर्गतो व्याप्यः शरीरमिति नामकः ।
पञ्चमस्तद्धृदिस्थस्तु षष्ठो हृदयनामकः ॥
गायत्रीनामको विष्णुरेवं षड्विध उच्यते ।

इत्यादिभाष्यात्पादोऽस्य सर्वाभूतानीति भूतशब्दितजीवानां चतुष्पादान्तर्भावेपि ''भूतं यदिदं किञ्चे''ति षड्विधान्तर्भूतं मत्स्याद्यवताररूपमेवेति ज्ञेयमित्यर्थः । ''किञ्च चतुष्पदे''त्यादिनोक्तमुपसंहरति ॥ तस्मादिति ॥

पाण्डुरङ्गि — तत्र लाघवार्थमिति ॥ चरणशब्दस्य भक्षणगमनाचार-पादाद्यनेकार्थोपस्थापकत्वेन पादशब्दवज्झडित्यवयवस्वरूपान्यतरार्थोपस्थापकत्वाभावेन प्रतीतिगौरवपरिहारार्थमित्यर्थः । न तु शब्दतो लाघवार्थम् । पर्यायेषु लाघवगौरवचिन्ता न क्रियत इति न्यायात् । नन्वथ यदत इति वाक्योदाहरणेपि अस्मिन्नपि वाक्येऽन्तः पुरुषे ज्योतिरिति हृदयनिहितत्वगुहानिहितत्वस्योक्तत्वेनानन्दमयाधिकरणाक्षेपः सम्भवति । अत्र तस्य ज्योतिषोऽब्रह्मत्वेन तन्निष्ठस्य गुहानिहितत्वस्यान्यनिष्ठत्वापत्त्याऽऽनन्दमयोक्तस्य गुहानिहितत्वस्याप्यन्यनिष्ठत्वस्यादित्यानन्दमयोप्यन्य एव स्यादिति । तथाचानुपपन्नमेत-दित्यरुचेराह ॥ किञ्चेति ॥ अत्र हि पादशब्देन तदात्मकत्वं विवक्ष्यते किं वोपासनार्थं चरणत्वारोपो वा । नाद्य इत्याह ॥ पादशब्देनेति ॥ द्वितीयं निराकरोति ॥ उपासनार्थमिति ॥ अन्यथेति ॥ षाड्विध्यमनूद्य चतुष्पात्त्वविधान इत्यर्थः ।

तात्पर्यचन्द्रिका

अस्माकं मते षाड्विध्यं तु ''गायत्र्यां संस्थितो विष्णु''रित्यादि छान्दोग्य-भाष्याज्ज्ञेयम् । तस्मान्मांत्रवर्णिकादन्यस्य पादाभिधानस्याभावात्तस्य च चरणाभिधानादित्यनेनैवोक्तत्वात्परमते भूतादिसूत्रवैयर्थ्यम् । अस्माकं पक्षे

(तात्पर्यचन्द्रिका)

भूतादीत्यत्रादिशब्दस्तु ''अमृतं दिवी''त्युक्तामृताख्यस्वरूपपरः । न चात्र पादमुद्दिश्य विश्वभूतविधिः । येन पादैकत्वमुद्देश्यविशेषणत्वात् ''ग्रहं संमार्ष्टी''त्यत्र ग्रहगतैकत्ववदविवक्षितमिति चतुष्पदत्वं न सिद्ध्येत् । किन्तु विश्वभूतोद्देशेन पादविधिः । पादानामेव जिज्ञासितत्वात् । अत एव टीकायां ''सर्वाणि भूतान्यस्यैकः पाद'' इति पादविधानं दर्शितम् । तथाच पशुना यजेतेत्यत्र पश्वेकत्ववद्विधेयगतत्वात्पादैकत्वं विवक्षितम् । यथाच ''पौर्णमास्यां पौर्णमास्या यजेते''त्यादौ सप्तम्यंतःपौर्णमास्यादिशब्दः काले मुख्यः तृतीयांतस्तु तत्सम्बन्धिनि कर्मण्यमुख्यः । तथा ''त्रिपा''दित्यत्र पादशब्दः स्वरूपांशे मुख्यः ''पाद्रोऽस्ये'' त्यत्र भिन्नांशे त्वमुख्य इति न कश्चिद्दोषः ।

प्रकाशिका — ननु परमते भूतादीत्यादिपदेन पृथिवीशरीरहृदयानां ग्रहणेन तस्य सार्थक्यम् । भवन्मते तु भूतपादव्यपदेशादित्येतावता पादोस्येत्युक्तभूतपादत्वग्रहसम्भवादादिपदं व्यर्थमित्यत आह ॥ अस्माकमिति ॥ स्यादेवं यदि भूतपादत्वमेवात्र विवक्षितं स्यात् । न चैवम् । किन्तु भूतशब्दितविश्वपादत्वमिवामृतशब्दितनारायणवासुदेववैकुण्ठाख्यस्वरूपत्रयपादत्वमपि विवक्षित्वा चतुष्पदेत्युक्तचतुष्पदत्वस्य वक्तव्यत्वात् भूतं विश्वमादिर्यस्य रूपत्रयस्य तद्भूतादि भूतं स्वरूपत्रयं चेति यावत् । तत्पाद इति व्यपदेशोपपत्तेरित्यर्थसम्भवान्न वैयर्थ्यमित्यर्थः । ननु मन्त्रे भूतानां बहुत्वेन पादबहुत्वापत्त्या भूतानामेकपादत्वं रूपत्रयस्य त्रिपादत्वमित्यस्यासिद्धिरित्यत आह ॥ न चात्रेति ॥ ग्रहं संमार्ष्टीत्यत्रेति ॥ तृतीयेऽध्याये ''एकत्वयुक्तमेकस्य श्रुतिसंयोगा''दित्याद्यपादीयसप्तमाधिकरणे ''ग्रहं संमार्ष्टी''त्युदाहृत्य किमेकस्य संमार्गः किं वा सर्वेषामिति सन्देहे उपादेयगताया इवोद्देश्यगताया अपि संख्यायाश्श्रुतिबलेन विवक्षितत्वादेकस्यैवेति पूर्वपक्षयित्वा किमेकत्वस्योद्देश्यत्वेन विवक्षोत विधेयत्वेन । आद्ये ग्रहं संमार्ष्टि एकं च संमार्ष्टीति प्रत्युद्देश्यं वाक्यपरिसमाप्तेर्वाक्यभेदात् । द्वितीयेऽपि संमार्गस्यापि विधेयत्वाद्ग्रहं संमृज्यात् स च एक इति वाक्यभेदात् । संमार्गक्रियाकर्मत्वस्यैकत्वस्य च प्रत्ययार्थतया युगपत्सम्बन्धेनोद्देश्यविशेषणत्वात् । शेषिविभक्तिनिर्दिष्टत्वेन विधेयसंमार्गविशेषणत्वाभावेनैकत्वस्य विवक्षायोगात् । ग्रहैर्यजेतेत्युक्तानां सर्वेषां संमार्ग इति सिद्धान्तितम् । अत्र यथाग्रहैकत्वमविवक्षितं न तथा प्रकृत इत्यर्थः ॥ पादानामिति ॥ सैषा चतुष्पदेत्युक्त्या के

चत्वारः पादा इति जिज्ञासोत्पादात्तन्निवृत्तये मन्त्रोदाहरणात् ''ब्रह्मविदाप्नोति पर''मित्यत्र किं तद्ब्रह्म कीदृशं च तद्वेदनं काच तत्प्राप्तिरिति जिज्ञासानिवृत्त्यर्थं ''तदेषाभ्युक्ते''ति मन्त्रोदाहरणवदिति भावः ॥ पशुनेति ॥ चतुर्थे ''तत्रैकत्वमयज्ञांगमर्थस्य गुणभूतत्वा'' दित्याद्यपादीयपञ्चमाधिकरणे ''पशुना यजेते''त्युदाहृत्य किमेकत्वमयज्ञांगमविवक्षितं किं वा यज्ञाङ्गं विवक्षितमिति संदिह्य समानपदश्रुत्या पश्वंगत्वावगमाद्वाक्यलभ्यपदान्तरोपात्तयज्ञाङ्गत्वायोगादयज्ञाङ्गमेकत्वमविवक्षितमिति पूर्वपक्षयित्वा एकप्रत्ययोपात्तेन प्रातिपदिकार्थादपि सन्निहितेन प्रधानभूतेन कारकेणावरुद्धमेकत्वं प्रातिपदिकार्थं पशुमनादृत्य क्रियाङ्गमवगम्यमानं वाक्यसमर्पितेन क्रियाविशेषेण सम्बन्धं पश्चादरुणैकहायनीन्यायेन पशुना विशेषणत्वेनार्थात्सम्बध्यते । तादर्थ्यन्तु यज्ञं प्रत्येवेति विवक्षितमेकत्वमिति सिद्धान्तितम् ।

अत्र यथापशोर्विधेयत्वेन तद्गतमेकत्वं विवक्षितं तथापादैकत्वमपीत्यर्थः । नन्वथापि भूतभिन्ने विष्णौ भूतशब्दितविश्वात्मकत्वायोगेन भूतपादत्वायोगः । न च वाच्यं चैत्रस्य चतुर्भागबलो मैत्र इतिवद्भिन्नमेव विश्वं तत्पादपरिमितसामर्थ्याशयेन पादतयोच्यते । न तु मुख्यस्वरूपाभिप्रायेणेति । सूत्रे सकृत् श्रुतस्य श्रुतौ चैकत्र श्रुतस्य पादशब्दस्य भूतेष्वमुख्यता अमृता स्वस्वरूपत्रये च मुख्यतेत्यस्यादृष्टचरत्वादित्यत आह ॥ यथाचेति ॥ एकादशे ''इष्टिराजसूयचातुर्मास्येष्वैककर्म्यादङ्गानां तन्त्रभावः स्या''दिति द्वितीयपादीयद्वितीयाधिकरणे दर्शपूर्णमासयोर्विभज्य पर्वद्वये प्रयुज्यमानयोः किमङ्गानि तन्त्रमुतावर्तेरन्निति सन्दिह्य एकफलत्वात्षण्णामपि यागानामेकोपक्रमावसानत्वावगमात्सकृदनुष्ठितान्यङ्गानि सर्वेषामुपकुर्वंतीति पूर्वपक्षयित्वा षण्णामेकफलत्वेन प्रयोगैक्यावगमेपि वाचनिककालभेदेन प्रयोगभेदो भवति । ''पौर्णमास्यां पौर्णमास्या यजेत । अमावास्यायाममावास्यया यजेते''ति वचनाभ्यां हि पौर्णमास्यमावास्याकरणकः फलार्थो व्यापारः प्रत्ययवाच्यः । तदङ्गत्वेन पौर्णमास्यमावास्याकालौ विधीयेते । तेनाङ्गानामपि तत्र तत्करणफलक्रियान्तर्गतानां तत्कालता विहिता भवति । अतः प्रतिक्रममङ्गान्यावर्तेरन्निति सिद्धान्तितम् । अत्रत्यन्यायेन यथा सप्तम्यन्तः पौर्णमास्यादिशब्दः काले मुख्यस्तृतीयांतस्तु तत्सम्बन्धिनि गौणः तथा प्रकृतेऽपीत्यर्थः । एवं ''प्रथमयो''रित्यत्र प्रथमाशब्देन प्रथमाद्वितीययोरिव सूत्रे पादशब्देन मुख्यामुख्ययोर्ग्रह इति ज्ञेयम् । एवमाद्यतृतीयसूत्रार्थौ मतद्वयाभिमतौ दूषितौ । यत्तु चेतोर्पणनिगदादिति द्वितीयस्य परकीयं व्याख्यानं गायत्र्यधिष्ठाने ब्रह्मणि छन्दोद्वारा चित्तसमाधानाय ''गायत्री वा इदं सर्व''मिति

(प्रकाशिका)

ब्राह्मणवाक्येन सर्वात्मकत्वं निगद्यत इति तत्तु तत्र तत्र ब्रह्मण आरोपाधिष्ठानत्वादिनिरासन्यायेन निरस्तम् ।

पाण्डुरङ्गि — भवन्मतेपि षाड्विध्यानुपपत्तिरित्यत आह ॥ अस्माकमिति ॥ उद्देश्यविशेषणत्वादिति ॥ ननु नोद्देश्यविशेषणत्वमविवक्षायां निमित्तं अग्नीनादधीतेत्यादौ बहुत्वस्योद्देश्यविशेषणत्वेपि विवक्षादर्शनादिति चेन्न । निर्ज्ञातविशेषणत्वादित्यत्र तात्पर्यात् । तदर्थस्तु निर्ज्ञातस्य विशेषणत्वमिति । तथाच बहुत्वेन निश्चितस्य ग्रहस्य विशेषणमेकत्वं न विवक्षितमिति भावः ॥ पादानामेव जिज्ञासितत्वादिति ॥ विशेषणजिज्ञासाया एव तद्विवक्षाहेतुत्वात्तस्याश्च तन्निश्चयतद्विपरीतनिश्चयान्यतरेण निरासे विशेषणविवक्षा नास्तीत्याशयः । पररीत्या पादशब्दस्यैकार्थत्वे सम्भवत्यनेकार्थत्वमन्याय्यमित्याह ॥ यथा चेति ॥ मुख्यार्थानेकत्वं नास्त्येव मुख्यामुख्योभयार्थत्वं दृष्टत्वान्न विरुद्धमिति भावः । न चोक्तस्थले तृतीयासप्तम्युक्तकरणाधिकरणत्वयोरिवार्थभेदकल्पकस्य प्रकृतेऽभाव इति वाच्यम्। अमृतत्वोक्तित एव श्रुत्यर्थाभ्यां विनाशभावाभावयोरर्थभेदकल्पकयोर्लाभादिति भावः ।

तात्पर्यचन्द्रिका

यच्च ''उभयस्मिन्नप्यविरोधा''दित्यस्य परकीयं व्याख्यानं ''यथा वृक्षाग्रसम्बद्धोऽपि श्येनो वृक्षाग्रे श्येनो वृक्षाग्रात्परत्र श्येन इति च व्यपदिश्यते । तथा दिव्येव सद्ब्रह्म दिवःपरमित्यप्युच्यते । यथा वा वृक्षाग्रेणासम्बद्धोऽपि श्येनो वृक्षाग्रात्परत्र श्येनो वृक्षाग्रे श्येन इति चोच्यते । एवं दिवः परमपि ब्रह्म दिवीत्यप्युच्यत'' इति । तदपि न । यस्य वृक्षाग्रस्य यं प्रति मुख्यमाधारत्वमवधित्वं वा तस्यैव तं प्रत्येवामुख्यस्यावधित्वस्य वाऽऽधारत्वस्य वा विवक्षायां वृक्षाग्रात्परत्र श्येन इत्यादिप्रयोगाभावेन दृष्टान्तासिद्धेः । अत्र भामत्यामुक्तम् । यदाऽऽधारत्वं मुख्यंतदावृक्षाग्रादित्यत्रश्येनशब्दोवृक्षाग्रलग्नश्येनावयवादुपरितनश्येनावयवावच्छिन्नश्येनावय विलक्षकः । अग्रशब्दो वाऽग्रादर्वाग्भागलक्षकः । यदा त्ववधित्वं मुख्यं तदाग्र इत्यत्र सप्तमीसामीप्यं लक्षयति । एवं दार्ष्टान्तिकेऽपि ज्योतिश्शब्दो वा दिव इत्यत्र द्युप्रातिपदिकं वा दिवीत्यत्र सप्तमी वा लाक्षणिकीति । तन्न । ज्योतिषो ब्रह्मणो निरवयवत्वात् । लक्षणादिप्रसङ्गात् । ''पृथिव्यां द्यौर्महामेरु''रित्यादिस्मृतिविरोधाच्च

(तात्पर्यचन्द्रिका)

॥ केचित्तु सप्तमी अन्तर्बहिरधरोर्ध्वभागस्थितिसाधारणी । प्रासादस्यांतरधरभागस्थित इव बहिरूर्ध्वभागावस्थितेपि वस्तुनि प्रासादे वर्तत इति प्रयोगात् । पञ्चमी तूपरिस्थित्यसाधारणी । अत उभाभ्यां स्थानविशेषादुपरि स्थितिरेव विवक्षितेत्युभे अपि मुख्यार्थे एवेत्याहुः । तन्न । उभयत्रापि द्युशब्दस्यैकार्थत्वे द्वयोरपि मुख्यार्थत्वायोगात् । सप्तमीह्याधारत्वे । परंतु तदाधारत्वमधरान्तर्भागाभ्यामिवोर्ध्वबहिर्भागाभ्यामप्यवच्छिद्यते । न त्ववयविनोऽवधित्वे सप्तमी । न हि वृक्षात्परतो भ्रमन् श्येनो वृक्षेऽस्तीत्युच्यते । पञ्चमी त्ववधित्व एव । न त्वाधारत्वे । न ह्यूर्ध्वभागावच्छिन्नेपि वृक्षे वसन्वृक्षात्परत इत्युच्यते । किंतु वृक्षस्योर्ध्वभाग इति । तस्मात् ''त्रिसप्तलोकापेक्षये''ति भाष्योक्त एव परिहारः साधुः ।

प्रकाशिका — यदपि तथाहि दर्शनमित्यस्योभयोर्व्याख्यानमन्यत्रापीत्थं दर्शनमिति तन्न । अस्मद्रीत्या विषयवाक्यगतहेतूक्तिपरत्वसम्भवेऽन्यथाव्याख्यानायोगादित्यादिदूषणं स्पष्टं मत्वा चतुर्थसूत्रव्याख्यानं परमते तावदनूद्य निरस्यति ॥ यच्चेति ॥ दिविष्ठत्वमुपेत्य तत्परत्वमुपपाद्येदानीं तत्परत्वमुपेत्य तत्स्थत्वमुपपादयति ॥ यथा वेति ॥ सप्तमी पञ्चम्यर्थयोराधारत्वावधित्वयोर्द्वयोरपि मुख्यत्वायोगादेकस्य मुख्यत्वेऽन्यस्यामुख्यत्वात् श्रुतौ च मुख्यार्थस्यैव ग्राह्यत्वाद्वैषम्येण दृष्टान्तायोग इति भावेन यथाश्रुतभाष्यं निरस्यति ॥ तदपि नेति ॥ भाष्याभिप्रायविवरणमनूद्य निरस्यति ॥ अत्रेति ॥ यदेति ॥ वृक्षाग्रसम्बन्धितादशायामित्यर्थः ॥ उपरितनेति ॥ तद्भागस्याग्रसम्बन्धित्वादिति भावः ॥ अग्रशब्दो वेति ॥ अग्रावाग्भागे श्येनसम्बन्धाभावेनाग्रात् परत इत्यस्याग्रावाग्भागात्परत इत्यर्थ इति भावः ॥ यदा त्विति ॥ असम्बन्धेनाग्रोपरि सञ्चरणदशायामित्यर्थः ॥ ज्योतिश्शब्द इति ॥ द्युसम्बन्धिज्योतिरवयवादुपरितनावयवावच्छिन्नावयविलक्षक इत्यर्थः ॥ द्युप्रातिपदिकं वेति ॥ बाह्यद्युभागातिरिक्तशारीरहार्दद्युभागस्य लक्षकमित्यर्थः । दिविष्ठत्वं मुख्यमुपेत्य लक्षकत्वमुक्तम् । दिवःपरत्वस्य मुख्यत्वपक्ष आह ॥ दिवीति ॥ सामीप्यं [illegible]भयतीत्यर्थः । ज्योतिश्शब्दस्य लक्षकत्वे दोषमाह ॥ ज्योतिष इति ॥ पक्षत्रयसाधारण-

॥ लक्षणेति ॥ भंग्यन्तराभावादेवमाश्रीयत इत्यत आह ॥ पृथिव्यामिति ॥

(प्रकाशिका)

पृथिव्यां द्यौर्महामेरुराकाशे सूर्यमण्डलम् ।
दिवीन्द्रसदनं चैव तत्परे तु दिवःपरे ॥

इतिछान्दोग्यभाष्योदाहृतस्मृत्याद्युशब्दार्थस्याक्षादिशब्दार्थवदनेकत्वेनाधारत्वावधित्व योर्मुख्ययोरेव सम्भवादिति भावः । उक्तदोषाप्रसङ्गान्मतान्तरं पृथगनूद्य निरस्यति ॥ केचित्त्विति ॥ तदेव दर्शयति ॥ प्रासादस्येति ॥ अन्तर्भागेऽधरभागे स्थित इत्यर्थः । बहिरूर्ध्वभागयोस्स्थितेऽपीति ध्येयम् । किमतो यद्येवमित्यतो साधारणपञ्चम्यनुसारेण साधारणसप्तमी नेया । ततश्च द्वयोर्मुख्यार्थलाभ इत्याह ॥ अत इति ॥ उक्तमेव विवेचयति ॥ सप्तमीति ॥ अवयविन इति ॥ अन्तर्बहिराद्यवयवविशिष्टस्येत्यर्थः । सप्तम्या अमुख्यार्थत्वं प्रदर्श्य पञ्चम्यास्तद्दर्शयति ॥ पञ्चमीति ॥ उच्यते मुख्यवृत्त्या कथ्यत इत्यर्थः ।

एतेन यत्केनचित्प्रलपितं ''यदतः परो दिव ''इति वाक्ये ज्योतिश्शिवो वा तदन्यो वेति सन्देहे द्युशब्दस्याकाशवाचित्वात्तस्य च देहबाह्यभूताकाशरूपस्य वाऽन्तरिक्षलोकरूपस्य वा विवक्षितत्वेन तत ऊर्ध्ववर्ती सूर्यो वाऽन्तःपुरुषे ज्योतिरिति पुरुषांतर्वर्तितया जाठराग्निर्वेति प्राप्ते पादोस्य सर्वा भूतानीति सर्वभूतपादाभिधानात्तस्य च परिच्छिन्नगायत्र्या-मयोगाच्छिव एवेति सिद्धान्त इति ॥ उपदेशभेदादेर्भामत्युक्त एव परिहार इति । तदुक्तं ''ज्योतिः पूषा दिवोऽभ्रात्स हि भवति परो जाठरैक्योपदेशाद्वह्निर्वा तन्न शम्भुश्चरण-कथनतस्तत्र हेतोरसिद्धे''रित्यादि । तन्निरस्तम् । उदाहरणायोगस्य चरणपदायोगस्य चोक्तत्वात् । उपदेशभेदादिपरिहारस्य भामतीमतोक्तदोषेणैव दुष्टत्वात् । पौनरुक्त्यंपरमत-इत्यादिदोषसाम्याच्च । वागादेरपिप्रकृतत्वेन भूतादिचतुष्पात्त्वायोगस्योक्तत्वाच्च । यदत्रोक्तं शिवार्कमणिदीपिकायां ''नद्यां घोष इत्युक्त्यनन्तरं गम्भीरायामिति विशेषणे तादृशनदी-सम्बन्धित्वेन नदीशब्दस्तीरपरः । एवं गायत्री वा इदं सर्वं भूतमित्युक्त्यनन्तरं वाग्वै गायत्रीति विशेषणे वाग्रूपगायत्र्यात्मकत्वं भूतस्य लभ्यत इति न तस्याः पार्थक्यमिति । तन्न। एवमपि प्राणेन सह पञ्चपादत्वानिरासात् । किंचैवं सति षाड्विध्यानुपपत्तिः । वाक्त्वस्य गायत्रीविशेषणत्वात् ।

यदत्रोक्तं ''पृथिव्यां सर्वभूतप्रतिष्ठात्वं सर्वभूतानतिवर्तनीयत्वमिति द्वे विधे शरीर-हृदययोर्ये प्राणप्रतिष्ठात्वतदनति वर्तनीयत्वे तयोराश्रयभेदेन चतुष्ट्वेन षाड्विध्योपपत्ति'' रित्यादि । तदपि न । भूतादिरूपेण षाड्विध्यसम्भवे क्लेशायोगात् । एकस्यैव धर्मस्य

धर्मिभेदेन विधान्तरत्वेऽतिप्रसङ्गाच्च । गायत्र्यांसंस्थितोविष्णुरित्यादिस्मृतिविरोधाच्च । किञ्च । ''नारायणपरो ज्योतिरात्मा नारायणः परः विष्णुरेव ज्योतिर्विष्णुरेव ब्रह्म । अहमग्निरहं हुत''मित्यादि श्रुतिस्मृतिविरोधाच्च । ''यदिदं परितः पूर्णं मत्स्यकूर्मादिरूपक''मित्यादि छान्दोग्यभाष्योदाहृतव्याख्यानरूपस्मृतिविरोधाच्च । पुरुषसूक्तगतमन्त्रोदाहरणविरोधाच्च । यदपि पुरुषसूक्तस्य शिवपरत्वकल्पनं तदपि न । ''यज्ञो वै विष्णु''रित्यादि श्रुतिसिद्धय-ज्ञनामविरोधात् । लक्ष्मीपतित्वलिङ्गविरोधात् । चन्द्रिकोक्तदिशा विष्ण्वेकनिष्ठपुरुष-श्रुतिविरोधात् । ''तस्माद्विराडजायत'' इत्युक्तचतुर्मुखजनकत्वलिङ्गस्य विष्णावेव प्रसिद्ध्या तद्विरोधाच्च ।

तस्मिन्काले महाराज राम एवाभिधीयते ।
यथाहि पौरुषे सूक्ते विष्णुरेवाभिधीयते ॥

इति स्कान्दवचनविरोधाच्चेति । ''सुदर्शनाख्यं स्वास्त्रं तु प्रायुङ्क दयितं त्रिपा''दिति भागवतविरोधाच्च । कथं तर्ह्युपदेशभेदपरिहार इत्यत आह ॥ तस्मादिति ॥

पाण्डुरङ्गि — नन्वेवमुक्तरीत्या परिहारासम्भवात्कथमत्र परिहार इत्यत आह ॥ तस्मादिति ।

तात्पर्यचन्द्रिका

भाष्ये ह्येवमभिप्रेतम् । यदा भूर्भूवस्स्वरिति लोकत्रयविवक्षा तदा लक्षयोजनोच्छ्रितांतरिक्षलोकादुपरितनस्य सर्वस्यापि द्युत्वाच्छ्वेतद्वीपानंतासनवैकुण्ठानां चान्तरिक्षादुपरितनत्वात्तत्रत्यं नारायणवासुदेववैकुण्ठाख्यं त्रिपात्संज्ञं रूपत्रयं दिवीत्युच्यते । न च ''पृथिवीस्थेषु सर्वोच्चो लोकोऽनंतासनात्मकः'' इत्युक्तत्वादनन्तासनस्य नान्तरिक्षादुपरितनतेति शङ्क्यम् । तस्य पृथिवीस्थत्वेपि बहुलक्षयोजनोच्छ्रितत्वेनैकलक्षयोजनोच्छ्रितांतरिक्षादुपरितनत्वोपपत्तेः । सर्वपृथिवीस्थोच्चत्वोक्त्या तु नान्ययोगो व्यावर्त्यते । किंत्वयोगः । यदा तु भूर्भुवस्स्वर्महर्जनस्तपस्सत्यमिति सप्तलोकविवक्षा । तदेन्द्रसदनस्य द्युत्वात्तत्परस्य वैकुण्ठस्य दिवःपरत्वम् ।

**पृथिव्यां द्यौर्महामेरुराकाशे सूर्यमण्डलम् ।
दिवीन्द्रसदनं चैव तत्परे तु दिवःपरे ॥**

(तात्पर्यचन्द्रिका)

इति स्मृतेर्मेरोरपि द्युत्वात्तत्परस्यानंतासनस्यापि दिवःपरता । सूर्यमण्डलस्यापि द्युत्वात्तत्परस्य श्वेतद्वीपस्यापि दिवः परत्वम् । अत्र यद्यपि लोकत्रयविवक्षायामप्यनंतासनादीनां मेर्वादिपरत्वेन दिवः परत्वसिद्धिः । स्वर्गलोकात्परत्वंत्वनंतासनश्वेतद्वीपयोर्नास्ति । ''यावानुच्चः स्वर्गलोकस्तावानुच्चतया स च । श्वेतद्वीपो दिविष्ठोऽत'' इत्यादेः । तथापि वैकुण्ठस्य सर्वद्युपरत्वसिद्धये सप्तलोकविवक्षोक्तिः । तदुक्तं ''द्व्यात्मकेभ्यश्च सर्वेभ्यो वैकुण्ठश्चोच्च उच्यत'' इति । एवं च यथा चैत्रो ग्रामेऽस्तीत्युक्त्वा स ग्रामाद्बहिरित्युक्ते आद्ये प्रयोगे ग्रामशब्दो अरण्यादिसहिते वर्तते। द्वितीये तु वाटपरिक्षेपे । तदुक्तं महाभाष्ये । ''ग्रामशब्दोयं बह्वर्थः । अस्ति वाटपरिक्षेपे वर्तते । तद्यथा ग्रामं प्रविष्ट इति । अस्ति सारण्यके स स्थण्डिलके वर्तते। तद्यथा ग्रामो लब्ध'' इतीति । तथा प्रकृतेपि द्युशब्दोऽनेकार्थः । अनेकार्थत्वं च अक्षादिशब्दवद्बुद्ध्व्यवहारादिना सर्वत्र मुख्यत्वेन वा एकत्र मुख्यत्वेप्यन्यत्रामुख्यत्वेन वेति । ''अन्याय्यं चानेकार्थत्व''मिति न्यायस्य नायं विषयः । सर्वतः पृष्ठत्वं चानंतासनादीनां यथासम्भवं पृथिव्यादिलोकोच्चत्वम् । विश्वतः पृष्ठत्वं च मेरुवैजयंतसत्यलोकरूप- चतुर्मुखस्थानादुच्चत्वमिति टीकायामेवोक्तम् । इदं च

पृथिव्यां ब्रह्मणो मेरुर्जयंतं त्वंतरिक्षगम् ।
तृतीयं सत्यलोके च सदनं त्रिविधं स्मृतम् ।
तेभ्योऽनंतासनाद्या यत्परतो विश्वतः परः ॥

इत्यादिवाक्यादवगन्तव्यम् । अत्र यद्यपि वैकुण्ठस्य स्वर्गलोकात्परत्वेनैव दिवः परत्वसिद्धिः । तथापि तस्य सर्वतः पृष्ठेष्वित्यनेनैवोक्तत्वाद्दिवःपर इत्यस्य वैयर्थ्यं मा भूदितीन्द्रसदनस्य द्युत्वोक्तिः ।

यद्वा चित्प्रकृत्यात्मकत्वेन द्योतमाने स्थानत्रये सप्तम्यंतो द्युशब्दो यौगिकः । पञ्चम्यंतस्तु स्वर्गादौ रूढ इत्यविरोधः । अयमपि सूत्राविरोधशब्दार्थ इति द्रष्टव्यम् । अयं च परिहारः

बहुलक्षोच्छ्रिते नित्ये विमाने संस्थितं यतः।
चित्प्रकृत्यात्मनि ततो दिवीति कथितं श्रुतौ ॥

इति छान्दोग्यभाष्ये सूचितः ।

प्रकाशिका — भाष्येऽस्पष्टत्वाल्लोकत्रयविवक्षायां ''परतो लक्षयोजनात् ।

सर्वं द्योरिति विज्ञेयं ततस्ते दिवि संस्थिताः ।
दिवः परश्च भगवान्सप्तलोकविवक्षया ॥

इति छान्दोग्यभाष्यानुरोधेन टीकोक्तमाशयं प्रतीतानुपपत्तिनिरासेन विशदयति ॥ भाष्य इति ॥ अधस्तनानामतलादीनामुपरितनानां महरादीनां भूस्स्वर्ग्रहणेन गृहीतत्वादिति भावः ।

स्वरूपपादा विष्णोस्तु त्रयो हि दिवि संस्थिताः ।
नारायणो वासुदेवो वैकुण्ठ इति ते त्रयः ॥

इति स्मृत्यनुरोधेनाह ॥ नारायणेति ॥ टीकादावन्तरिक्षस्य लक्षयोजनत्व-विशेषणत्वोक्तेः कृत्यं वक्तुं चोदयति ॥ न चेति ॥ सर्वेषु लोकेषूच्चस्सर्वोच्चः सर्वेषु लोकेष्वित्यतः पृथिवीस्थेष्विति योजना । बहुलक्षोच्छ्रिते नित्ये विमाने संस्थितं यत ''इति भाष्योक्तस्मृत्यनुसारेणाह ॥ बह्विति ॥ उक्तं च द्वितीयस्कंधतात्पर्ये षष्ठे -

अनंतासनवैकुंठनारायणपुराणि तु ।
बहुलक्षोच्छ्रितेष्वेषु स वसत्यमृतो हरिः ॥

इति ॥ ननु पृथिवीस्थोच्चत्वोक्त्या नान्योच्चत्वं लभ्यते । अतः कथमेवमित्यत आह ॥ सर्वेति ॥ अन्ययोगः अन्योच्चत्वयोगः ॥ अयोग इति ॥ पृथिवीस्थेषु सर्वेषूच्च एवेत्ययोग इत्यर्थः । पक्षान्तरं विशदयति ॥ यदेति ॥ अधस्तनानामतलवितलसुतलतलात-लरसातलमहातलपातालानां भूर्ग्रहणेन ग्रहणादिति भावः । सप्तलोकविवक्षामाक्षिप्य समाधत्ते ॥ अत्रेति ॥ अनन्तेति ॥ अनन्तासनश्वेतद्वीपवैकुण्ठानां मेरुसूर्यमण्डलेन्द्रसदनेभ्यः परत्वेनेत्यर्थः । ननु त्रयाणां द्युत्वेन प्रसिद्धस्वर्गादुच्चत्वसिद्ध्यै सप्तलोकविवक्षाऽस्तु । त्रित्वविवक्षायां स्वरादेरन्तरिक्षादुपरितनस्य सर्वस्य द्युत्वेन स्वर्गात्परत्वासिद्धेरित्यतो वैकुण्ठस्य तत्सम्भवेपि नान्ययोस्तद्युज्यत इत्याह ॥ स्वर्गेति ॥ यातु द्वितीयस्कन्धतात्पर्ये षष्ठे -

अनन्तासनवैकुण्ठनारायणपुराणि तु ।
त्रीणि धामानि वै विष्णोस्त्रैलोक्याद्बहिरेव हि ॥

(प्रकाशिका)

इतिबाह्यत्वोक्तिःसावैकुण्ठाशयाअलौकिकत्वाशयावा स्वर्गलोकस्येन्द्रसदनादर्वाग्भाग-विवक्षाशया वा । वस्तुतस्तु ''भुवस्स्वर्गश्च कोट्यैव योजनानां प्रविस्तृतौ''इत्युक्तांत-रिक्षस्वर्गलोकयोः कोटियोजनविस्तीर्णत्वेनततो बाह्यप्रदेशस्थितत्वाच्छ्वेतद्वीपादेः तथा भूम्याद्यनेककोटिविस्तीर्णत्वेन क्षीरसमुद्रादिस्थश्वेतद्वीपादेर्भूलोकस्थत्वेऽपि तमतिक्रम्यानेक-लक्षयोजनोच्छ्रितत्वेन ततोपि बाह्यत्वमिति त्रैलोक्याद्बाह्यत्वं ध्येयम् । न तु स्वर्गाद-प्युच्चत्वेनेति न विरोधः । यद्वा सर्वतः पृष्ठेष्वित्यादाविवानंतासनश्वेतद्वीपवैकुण्ठा-नांक्रमाद्भूर्भुवस्स्वर्लोकेभ्यउच्चत्वेन त्रिलोकाद्बाह्यत्वमित्यविरोधः । नन्वेवं द्युशब्दस्यानेकार्थ-त्वेप्येकस्मिन्नेव प्रकरणे नानार्थत्वं न दृष्टचरमित्यत आह ॥ एवं चेति ॥ तदुक्तमिति ॥ आद्यपादे ''हलोनन्तरास्संयोग'' इति सूत्रे । वाटपरिक्षेपेवर्ततेयश्शब्दस्सोऽस्तीत्यादि-योजना। ननु निरर्थकप्रयोगायोगादेकार्थकत्वे वक्तव्येऽर्थान्तरकल्पनमन्याय्यमित्यत आह ॥ अनेकार्थत्वं चेति ॥ नायमिति ॥ यत्रानेकार्थकत्वेन मानं तत्रैवायं न्यायः । अत्र तु पौराणिकप्रसिद्धेस्सत्वान्नैवमित्यर्थः । अत एवोक्तं सुधायां वैशेषिकाधिकरणे ''यत्र ह्येकस्मिन्नर्थे व्यवस्थिते वृथैवार्थान्तराङ्गीकारस्तत्रैवानेकार्थत्वमन्याय्य''मिति । तर्हि सर्वतः पृष्ठेषु विश्वतः पृष्ठेष्वित्यस्य पौनरुक्त्यमित्यतोर्थभेदं टीकोक्तं विशदयति ॥ सर्वत इति ॥ यथासम्भवमिति ॥ पृथिवीलोकादुच्चत्वमनन्तासनस्य अन्तरिक्षादुच्चत्वं श्वेतद्वीपस्य स्वर्गादुच्चत्वं वैकुण्ठस्येत्यर्थः ॥ चतुर्मुखस्थानादिति ॥ क्रमेणानन्तासनादीनामिति भावः । अनेन पृष्ठशब्दस्योच्चत्वमर्थ इत्युक्तं भवति ॥ इत्यादिवाक्यादिति ॥ आदिपदेन

पृथिवीस्थेषु सर्वोच्चो लोकोऽनन्तासनात्मकः ।
अन्तरिक्षात्मकेभ्यश्च श्वेतद्वीपे स्थितो हरिः ।
द्यात्मकेभ्यश्च सर्वेभ्यो वैकुण्ठश्चोच्च उच्यते ॥

इत्यस्य ग्रहणम् । टीकोक्तं वैकुण्ठस्येन्द्रसदनात्परत्वमाक्षिप्य समाधत्ते ॥ अत्रेति ॥ एकस्य शब्दस्याक्षादिशब्दवदनेकत्र रूढ्यङ्गीकारे हि नानार्थत्वं एकत्र रूढस्यैव योगवृत्त्याऽर्थान्तरस्वीकारे नानेकार्थत्वमतोऽन्याय्यं चानेकार्थत्वमित्यस्य नायं विषय इति भावेन पक्षान्तरमाह ॥ यद्वेति ॥ यद्वा छान्दोग्यभाष्योक्तमन्यदपि सूत्रारूढं कर्तुमाह ॥ यद्वेति ॥ अविरोध इति ॥ योगरूढिभ्यां द्युशब्दस्य भिन्नार्थत्वेन द्युस्थत्वदिवःपरत्वविरोधो नेत्यर्थः ।

पाण्डुरङ्गि — तर्ह्यसाधारण्येन पृथिवीस्थोच्चत्वोक्तिरयुक्तेत्यत आह ॥ सर्वपृथिवीस्थेति ॥ सप्तलोकविवक्षायां दिवःपरत्वमुपपादयति ॥ यदा त्विति ॥ तथाप्यनन्तासनस्य दिवःपरत्वं कथमित्यतः स्मृत्यनुसारेण तदाह ॥ पृथिव्यामिति ॥ श्वेतद्वीपस्य तदुपपादयति ॥ सूर्यमण्डलस्येति ॥ ननु सप्तलोकविवक्षाकरणमयुक्तम् । दिवःपरत्वस्य लोकत्रयविवक्षयापि सम्भवादित्यत आह ॥ अत्र यद्यपीति ॥ नन्वनन्तासनश्वेतद्वीपयोः स्वर्गलोकात्परत्वसिद्ध्यर्थं सप्तलोकविवक्षेत्याह ॥ स्वर्गलोकादिति ॥ यावानिति ॥ स्वर्गलोको यावानुच्चः उच्चतया तावान् श्वेतद्वीपो वर्तते । अतः स दिविष्ठ इत्यर्थः ॥ सर्वद्युपरत्वसिद्ध्य इति ॥ इन्द्रसदनमेरुसूर्यमण्डलरूपसर्वद्युपरत्वसिद्ध्य इत्यर्थः । अन्यथा लोकत्रयविविक्षायां मेर्वादेर्द्युत्वस्याविवक्षितत्वात्तत्परत्वं न सिद्ध्येदित्यर्थः । वैकुण्ठस्य सर्वद्युपरत्वे प्रमाणमाह ॥ तदुक्तमिति ॥ नन्वेवं द्युशब्दस्यानेकार्थत्वं स्यात् । लोकत्रयविवक्षापक्षेऽन्तरिक्षोपरितनसर्वलोकपरत्वस्यासप्तलोकविवक्षापक्षे मेरुसूर्यमण्डलेन्द्रसदनपरत्वस्य स्वीकृतत्वादित्यत आह ॥ एवं चेति ॥ अस्ति वाटपरिक्षेपे वर्तत इत्यादौ यो वाटपरिक्षेपे वर्तते स एको ग्रामशब्दोस्तीत्यर्थः ।

तात्पर्यचन्द्रिका

यच्चोक्तं परैर्जागरिते हि जीवस्य शरीरबाह्याकाशः स्थानम् । स्वप्ने तु तन्मध्याकाशः । सुप्तौ तु हृदयाकाशः । तथाचावस्थात्रयविशिष्टो जीवः त्रिपात् । उक्तत्रिविधाकाशं च द्युशब्दार्थ इति । तन्न । जाग्रदाद्यवस्थावतो विश्वादिशब्दवाच्यस्य ''दक्षिणाक्षिमुखे विश्वो मनस्यंतस्तु तैजस'' इत्यादिश्रुत्या स्थानान्तरोक्तेः । जागरादौ जीवस्य बाह्यादिपदार्थभोगेपि ''हृदि ह्येष आत्मे''ति श्रुत्या हृदयस्थस्य जीवस्य बाह्याकाशादिस्थानत्वे मानाभावाच्च । जीवेऽमृतत्वस्यासम्भवाच्च । दिवि दिव इति वाक्ययोरैकार्थ्यस्य संमतत्वेन दिव इति वाक्योक्तस्य ज्योतिषोपि जीवत्वापत्त्या ब्रह्मत्वसिद्धान्तहानेश्च । ''त्रिपादूर्ध्व उदैत्पुरुष'' इत्यादि श्रुतौ ''सुदर्शनाख्यं स्वास्त्रं तु प्रायुङ्क्त दयितं त्रिपा''दिति भागवते भगवत्येव त्रिपाच्छब्दप्रयोगाच्च । यच्चोक्तं परैर्विश्वतः पृष्ठेष्वित्यत्र विश्वशब्दो सङ्कुचितवृत्तिरिति दर्शयितुं सर्वतः पृष्ठेष्वित्युक्तमिति । तत्र व्यक्तमेकस्य वैयर्थ्यम् ।

केचित्तु ''तथाक्षरात्सम्भवतीह विश्वमिति'' श्रुतौ विश्वशब्दः कार्ये प्रयुक्त इत्यत्रापि तत्परः । सर्वशब्दस्तु परिशेषात्कारणपर इत्याहुः । तदपि न । ''स इदं सर्वमसृजते''त्यादौ सर्वशब्दः कार्ये प्रयुक्त इति तत्परः । परिशेषाद्विश्वशब्दः कारणपर इति प्रसङ्गात् । ''सम्भवतीह विश्व''मित्यत्र च सम्भवतिपदसन्निधानेनैव विश्वशब्दः कार्यपरो न तु स्वतः । अन्यथा ''विश्वतः परमान्नित्यं विश्वात्मानं परायणं'' इत्यादावपि कार्यमात्रपरः स्यात् । तस्मात् श्रुतिसूत्रयोरन्योक्तार्थ-स्यायुक्तत्वाद्भाष्योक्त एवार्थ इति ॥ टीकाक्षरार्थस्तु ॥ आदिपदेन वाचोग्रहणमिति ॥ वाग्वै गायत्रीति श्रुतौ वाक्शब्दार्थगुणवत्तयोपासनार्थं विष्णुर्वागित्युक्तः । तथाच वाक्त्वमपि न विष्णुत्वबाधकमिति दर्शयितुं भाष्य आदिपदमित्यर्थः ॥ अनुसन्धेयत्वं च सूचयतीति ॥ आदिपदमित्यनुषङ्गः ॥ आदिपदेन या वै सा गायत्रीति ॥ या वै सेत्यादिना गायत्र्याः पृथिव्यभेदमुक्त्वा ''अस्यां हीदं सर्वं प्रतिष्ठित''मिति पृथिव्याः सर्वाधारत्वमुक्तम् । तच्च विष्णोरेव गायत्रीपृथिव्यादिशब्दार्थत्वे युक्तं नान्यथेत्यर्थः ॥ गायत्र्यधिकरणं सम्पूर्णम् ॥ ११ ॥

प्रकाशिका — त्रिपाच्छब्देन नारायणादिरूपत्रयमिति भाष्यादौ व्याख्यातम् । तत्र परोक्तमनूद्य निरस्यति ॥ यच्चेति ॥ विश्वादेर्जाग्रदाद्यवस्थावज्जीवत्वं पररीत्योपेत्य प्रकृतप्रमेयं दूषयति ॥ जाग्रदिति ॥ श्रुत्या मण्डूकश्रुत्या ॥ हृदि हीति ॥ द्वितीये ''अवस्थिति-वैशेष्यादिति चेन्नाभ्युपगमाद्धृदि ही''ति सूत्रोपात्तषट्प्रश्नश्रुत्येत्यर्थः । यत्तु तृतीये ''मुग्धेर्धसम्पत्तिः परिशेषा''दित्यस्य भाष्ये ''हृदयस्थात्पराज्जीवो दूरस्थो जाग्रदेष्यति । समीपस्थस्तथा स्वप्न''मित्यादिस्मृत्या जीवस्य हृदयादन्यत्राक्ष्यादौ स्थितिकथनं तत्तु सन्निधिविशेषाभिप्रायम् । यथोक्तमैतरेयभाष्ये द्वितीयेध्याये ''हृदिस्थमेव हि तस्य रूपम् । जागारितेऽप्यक्षादिषु विशेषसन्निहितं भवति । दीपप्रकाशव''दित्यादि । अत एवोक्तं बाह्याकाशादिस्थानत्वे इति ॥ अमृतत्वस्येति ॥ ''त्रिपादस्यामृतं दिवी''त्युक्तस्येत्यर्थः । विश्वतःपृष्ठेष्वित्याद्यन्यथा स्वयं व्याख्याय तत्र परोक्तं निरस्यति ॥ यच्चेति ॥ इति प्रसङ्गादिति ॥ तथाचोभयमुभयत्र ग्राह्यमित्येकस्य वैयर्थ्यमेवेत्यर्थः । नन्वेवं कथं विश्वशब्दस्य कार्ये प्रयोग इत्यत आह ॥ सम्भवतीति ॥ परमां परमश्रासौ अश्व तमित्यर्थः । छन्दस्सूत्रसिद्धान्तटीकायामादिपदेन वाचोग्रहणमित्येतदुर्गमत्वात्सुगमयति ॥ आदिपदेनेति ॥

अधिकरणान्तरेप्येतन्न्यायस्यानुसन्धेयत्वंसूचयतीत्यत्र कर्त्राकाङ्क्षायामादिपदेनेति प्रकृतं प्राक्तनं विपरिणामेन सम्बन्धनीयमित्याह ॥ आदिपदमिति ॥ आदिपदेन ''या वै सा गायत्री इयं वाव सा येयं पृथिवी''त्यादेस्सङ्ग्रह इत्येतत्तात्पर्यमस्फुटत्वादाह ॥ या वै सेति ॥ शिष्टं स्पष्टीकृतमुपन्यासमुखेनेति ॥ छ ॥ गायत्र्यधिकरणं सम्पूर्णम् ॥ ११ ॥

पाण्डुरङ्गि — वाग्वै गायत्रीति श्रुताविति ॥ गायत्रीशब्दवद्वाक्शब्दस्य साक्षात्परपक्षसाधकत्वात् पृथिव्यादिशब्दवद्विष्णुलिङ्गोपेतत्वाभावेन छन्दस्त्वे तद्बाधकत्वाभावाच्च समन्वेतव्यशब्दसमकक्षतयोपादानम् ॥ अत एव पृथिव्यादिशब्दानामप्युपादानमत्र सम्भवदप्युल्लंघ्याग्रमादिपदेन कृतमिति ज्ञेयम् । आदिपदमित्यनुषङ्ग इति ॥ इदं चाधिकरणान्तरेप्येतन्न्यायस्यानुसन्धेयत्वं च सूचयतीत्येतत्पाठाभिप्रायेण । तेन हिशब्देनैवास्यार्थस्याभिधानादादिपदानुषङ्गोऽनर्थक इति चोद्यं परिहृतं भवति । चशब्दरहितहिशब्देनेत्येतच्छिरस्कपाठस्य भावबोध उपादानान्न विरोधः । एवं चात्र पाठे चेतोर्पणार्थं हीति भाष्यगतहिशब्दो नेति प्रतिज्ञार्थं प्रति चेतोर्पणनिगदादिति सौत्रपञ्चम्युक्तहेतुत्ववाची । तथाहीतिशब्दस्तु भाष्योदाहृतस्मृतिद्योतक इति द्रष्टव्यम् । आदिपदेनेति ॥ सर्वलोकाभिधो ह्येष इति भाष्योदाहृतस्मृत्यनुरोधेनापि पृथिव्यादेः पृथग्ग्रहणमिति द्रष्टव्यम् ॥ छ ॥ गायत्र्यधिकरणं सम्पूर्णम् ॥ ११ ॥

प्राणाधिकरणम्

॥ ॐ प्राणस्तथानुगमात् ॐ ॥ अत्र श्रुतिलिङ्गबाहुल्येन गायत्र्यधिकरणसिद्धान्तन्यायेन पूर्वपक्षप्रवृत्तेरनन्तरसङ्गतिः । अत्र प्राणः किं मुख्यवाय्वादिः किं वा विष्णुरिति चिन्ता । तदर्थं किं वाय्वादिश्रुत्याद्यनुसारेण विष्णुश्रुत्यादि नेयमुत विपरीतमिति । तदर्थं किं वाय्वादिश्रुत्यादिकं निरवकाशं विष्णुश्रुत्यादिकं तु सावकाशमुत विपरीतमिति । ननु ''अत एव प्राण'' इत्यनेन गतार्थमिदम् । न च पूर्वत्र प्राणशब्दो वायुपरो नेत्युक्तम् । इह त्विन्द्रजीवपरो नेत्युच्यत इति भेदः । इह सूत्रे मुख्यप्राणपदायोगात् । न च पूर्वत्र वायुपरत्वस्यैव निरासः । इह त्विन्द्रजीववायुपरत्वानामिति भेदः । अस्य बहुविषयस्य तेनागतार्थत्वेप्यनेन तस्याल्पविषयस्य गतार्थत्वात् । निरासकन्यायभेदं विना निरसनीयभेदमात्रेणाधिकरणभेदासिद्धेश्च ।

प्रकाशिका — ॥ ॐ प्राणस्तथानुगमात् ॐ ॥ नन्विदमेतदधिकरणभाष्यदिशा पूर्वप्राणाधिकरणसङ्गतं भाति । तदयुक्तमेव । तथात्वे तदानन्तर्यस्यैव प्राप्तेरित्यतस्सुधोक्तदिशा गायत्र्यधिकरणेन सङ्गतिलाभादत्र निवेश इति भावेनाह ॥ अत्रेति ॥ सङ्गतिरिति ॥ आपवादिकीत्यर्थः । ''पूर्वसिद्धान्ततो यत्र पूर्वपक्षः प्रवर्तते । तत्रापवादिकी''त्यादेः । यद्वा पूर्वसिद्धान्तोपजीवना- दुपजीव्योपजीवकत्वरूपेत्यर्थः । एतेनान्यप्रापकश्रुतिलिङ्गबाहुल्योपेताश्शब्दा उदाहरणमिति सूचितं सूत्रस्योपलक्षणार्थत्वादिति ध्येयम् । एतच्चाग्रे स्पष्टीभविष्यति । भाष्यं तु ''मनोवाक्प्राण'' इत्यत्र प्राणो विष्णोरन्यश्चेत्तदा प्राक्तनोप्यन्य इति शंका स्यादिति तस्य विष्णुत्वावधारणार्थत्वात् सफलेयं चिन्तेति प्रयोजनपरं व्याख्येयमिति भावः । यद्यपि ''सर्वे वेदा'' इति सर्ववेदप्रतिपाद्यत्वस्याप्यन्यनिष्ठत्वेन शास्त्रयोनित्वमप्यन्यस्येति शङ्कासमाधानमपि प्रयोजनं शक्यं वक्तुं भाति तथापि तस्यानंदमयाधिकरणानाक्षेपकत्वात्तदाक्षेपायैवमुक्तम् । समन्वीयमानप्राणशब्दमुखाक्षेपस्य ततोप्यन्तरङ्गत्वाच्चेति ध्येयम् । समर्थयिष्यते चैतत्प्रयोजनम् ॥ अत्रेति ॥ ऐतरेयके ''ता एताश्शीर्षच्छ्रियश्चिश्रताश्चक्षुश्श्रोत्रं मनोवाक् प्राण'' इत्यारभ्य बहुस्थलेषु श्रुतः प्राणो विषय इत्यर्थः । आदिपदेनेन्द्रो जीवश्च ग्राह्यः ॥ वाय्वादीति ॥ वक्ष्यमाणवाय्विन्द्रजीवप्रापकश्रुतिलिङ्गानुसारेणेत्यर्थः ॥ विष्णुश्रुतीति ॥ ''ब्रह्मेमं पुरुष''मिति ब्रह्मशब्दादीत्यर्थः । अत्र फलफलिभावः स्फुटः ।

''ननु गतार्थमिदमधिकरणम् । सर्वासां प्राणविद्यानां ''अत एव प्राण'' इत्यनेनैव भगवद्विषयतायास्समर्थितत्वा''दिति न्यायविवरणटीकां विवरितुमाक्षिपति ॥ नन्विति ॥ प्राणशब्दस्य विष्णौ तत्रैव मुख्यत्वसाधनादिति भावः । न च वाच्यं तत्र ''तद्वैत्वं प्राण'' इत्येतदुदाहरणमत्रतु''तावाएता''इत्यादीति । उदाहरणभेदेनाधिकरणभेदेऽतिप्रसङ्गादित्युक्तत्वात् । अथापि निरसनीयभेदाद्वा पूर्वपक्षप्रापकन्यायभेदाद्वा भेदो भविष्यतीत्यतो निरसनीयभेदं तावदाशङ्क्य निरस्यति ॥ न चेति ॥ इहाधिकरणे ''जीवमुख्यप्राणलिङ्गा''दिति सूत्र इत्यर्थः ॥ निरासकन्यायेति ॥ अन्यथाऽऽनन्दमयाधिकरणादावनेकत्वप्रसङ्ग इति भावः । अस्तु तर्हि प्रापकभेदाद्भेद इति चेन्न । तत् श्रुतिमात्रं लिङ्गमात्रं वा ब्रह्मश्रुतिलिङ्गयोरपि भावात् ।

पाण्डुरङ्गि — ॥ ॐ प्राणस्तथानुगमात् ॥

तात्पर्यचन्द्रिका

न च पूर्वत्र प्रसिद्धयवलम्बेन श्रुत्या पूर्वपक्षे लिङ्गैः सिद्धान्तः । अत्र तु लिङ्गैः पूर्वपक्षे श्रुतिलिङ्गाभ्यां सिद्धान्तः । अत एव तत्र पूर्वपक्षे भाष्ये प्रसिद्धेरित्युक्तम् । अत्र तु सूत्रे लिङ्गादित्युक्तमिति वाच्यम् । श्रुत्या प्राप्तस्य पूर्वपक्षस्य लिङ्गमात्रेण बाधितस्य पुनर्विरोधिश्रुतिलिङ्गबाधेन लिङ्गैरुज्जीवनासम्भवात् । न च श्रुतिबाहुल्यादुज्जीवनम् । तद्बाहुल्यप्राप्तस्यापि पूर्वपक्षस्य (द्विधा) गायत्र्यधिकरणे निरासात् । न च तत्र गायत्रीवाक्पृथिव्यादिश्रुतयो भिन्नविषयाः । अत्र तु चक्षुः श्रोत्रं मनोवाक्प्राणः । तत्प्राणे प्रपन्न उदतिष्ठत् स एष प्राण'' इत्यादावेकैव प्राणश्रुतिरावृत्तेति वाच्यम् । तत्रापि ''गायत्री वा इदं सर्वं वाग्वै गायत्री सैषा षड्विधा गायत्री''ति श्रवणात् । आकाशाधिकरणविषयवाक्य आकाशश्रुतेरेवावृत्तेश्च । न च श्रुतिलिङ्गबाहुल्यादुज्जीवनम् । अत एवानुव्याख्याने ''बाहुल्यात् श्रुतिलिङ्गयो''रित्युक्तम् । इह भाष्ये टीकायां च लिङ्गमात्रोक्तिः पूर्वपक्षोपक्रममात्रमिति वाच्यम् । इन्द्रे ''इन्द्रस्य प्रियं धामोपेयाय तमिन्द्र उवाच प्राणो वा अहमस्मी''त्यादिश्रुतीनां महाव्रतयाजित्वादिलिङ्गानां मुख्यप्राणे प्राणादिश्रुतीनां ''ता अहिंसते''ति प्राणसंवादादिलिङ्गानाम् । जीवे ''पुरुषरूपेण य एष तपति स एष पुरुषः समुद्र'' इत्यादिश्रुतीनां ''तावन्ति शतसंवत्सरस्याह्नां सहस्राणि भवन्ती''ति शतसंवत्सरत्वादिलिङ्गानां च बाहुल्येऽपि इन्द्रादिश्रुतेरन्तरित्यत्र प्राणश्रुतेश्चात एव पाण इत्यत्र पुरुषश्रुतेश्च गायत्र्यधिकरणे सावकाशितत्वेन लिङ्गानां च विष्णौ प्रवृत्तप्रबलश्रुत्यनुसारेणान्तरधिकरण पूर्वपक्षोक्तानामपांनेतृत्वादिलिङ्गानामिवविष्णौप्रवर्तनीयत्वेन सम्भावितावकाशतया बहुविष्णुश्रुतिबाधकत्वायोगात् ।

प्रकाशिका – अथ तद्बहुत्वमिति चेत्तत्किं लिङ्गबाहुल्यमुत श्रुतिबाहुल्यमिति विकल्प्याद्यमाशङ्क्य निरस्यति ॥ न चेति ॥ लिङ्गैः श्रीपतित्वादिलिङ्गैः ॥ लिङ्गैरिति ॥ प्राणसंवादादिभिः । सौत्रैकवचनं समुदायाशयमिति भावः ॥ श्रुतीति ॥ ब्रह्मश्रुत्या सर्वदेवोपदेश्यत्वादिलिङ्गेन च बाधेनेत्यर्थः । द्वितीयमाशङ्क्य निरस्यति ॥ न चेति ॥ तद्बाहुल्यप्राप्तस्येति ॥ ''कथं प्रसिद्धबहुलशब्दानामन्यथार्थते''त्युक्तेरिति भावः । ननु तत्र श्रुतिबाहुल्यप्राप्तस्य विष्णुश्रुतिलिङ्गबाहुल्येन निरासः । ''बाहुल्यात् श्रुतिलिङ्गयो''रित्यनुव्याख्यानोक्तेरिति चेदिहापि सिद्धान्ते श्रुतिलिङ्गबाहुल्यसत्त्वादिति तात्पर्यात् ।

(प्रकाशिका)

पूर्ववैषम्यमाशङ्क्य तौल्यमाह ॥ न चेति ॥ स एष इति ''स एषोसुस्स एष प्राणः स एष भू''रिति वाक्यमुपादत्ते । ननु न गायत्र्यधिकरणे श्रुत्या वृत्तिप्रयुक्तपूर्वपक्षस्य निरासः । आकाशाधिकरण एव तस्य निरासात् । अन्यथा पौनरुक्त्यापत्तेः । अत एव प्राग्गायत्री-वाक्पृथिव्यादिश्रुतय एव दर्शिताः । सुधायां च ''गायत्री वा इदं सर्वं वाग्वै गायत्रीत्यादयः प्रसिद्धाः बहवश्शब्दाश्श्रूयंते'' इत्युक्तम् । टीकायां च ''वाक्त्वविधानाच्चे''त्युक्तमिति न गायत्र्यधिकरणेन पौनरुक्त्यमित्यतस्तर्ह्याकाशाधिकरणेन तत्स्यादित्याह ॥ आकाशेति ॥ श्रुत्यभ्यासप्राप्तस्यापि तत्रैव निरासान्न तेनेह पूर्वपक्षोदय इति भावः । ननु तत्र निरवकाशत्वपरत्वबहुत्वप्रयुक्तप्राबल्यैर्लिङ्गैर्निरासः ।

उक्तं च द्वाभ्यामावृत्तिजातिभ्यामेव हि प्रबला श्रुतिः ।
अगतित्वपरत्वानेकत्वैर्लिङ्गं न तु त्रिभिः ॥

इति । न चेह लिङ्गानि तादृशानि । वक्ष्यमाणदिशा बाहुल्यादौ सत्यपि परत्वायोगादिति चेत् बहुत्वेन प्रबलानां लिङ्गानां जात्या बहुत्वेन च प्रबलवैष्णव-श्रुतियुक्तत्वेन सुतरां तद्विरोधित्वात् । यद्वा तत्रापि निरवकाशत्वादिप्रयुक्तप्राबल्यमाश्रित्यैव श्रुत्या वृत्तिप्राप्तस्य निरासः । परत्वं तु वास्तवमभिप्रेत्य वाऽनुपसंजातविरोधित्वेन वाऽऽकाशश्रुतेः प्राबल्यशङ्कायां तन्निरासाय ''प्रथमे श्रवणा''दिति वक्ष्यमाणन्यायेन परत्वस्य प्राबल्यहेतुत्वमभिप्रेत्य वेति तात्पर्यात् । अत्रापि केषाञ्चित्परत्वसम्भवाच्चेति । तृतीयमाशङ्क्य निरस्यति ॥ न चेति ॥ उज्जीवनं पूर्वपक्षस्येत्यनुषङ्गः । ''इन्द्रियैस्स-हाभिधाना''दिति भाष्येण ''एतत्प्राणस्येन्द्रियगणे गणितत्वा''दिति टीकया चैतद्विरुद्ध-मित्यत आह ॥ इहेति ॥ त्वदभिमतश्रुत्यादीनां विष्णौ सावकाशत्वान्न तद्बाहुल्यमपि पूर्वपक्षप्रापकमिति भावेनेन्द्रमुख्यजीवश्रुत्यादिबाहुल्यं स्फुटयन्नाह ॥ इन्द्र इत्यादि ॥ विषयसप्तम्य इमाः ॥ याजित्वादीति ॥ ''इन्द्रो वै वृत्रं हत्वा महानभव''दित्यादि-वाक्योक्तमहाव्रतयाजित्वादीनां ग्रहः ॥ प्राणसंवादादीति ॥ चक्षुरादिसहपाठोत्क्रमण-प्रवेशतन्निमित्तदेहपातोत्थानादिरादिपदार्थः ॥ इत्यादीति ॥ ''स एष पुनः पञ्चविध'' इत्यादिरादिपदार्थः ॥ शतसंवत्सरत्वादीति ॥ ''प्राणो वंश इति विद्या''दित्युक्त-प्राणवंशत्वादिरादिपदार्थः ॥ विष्णौ प्रवृत्तेति ॥ विष्णौ प्रसिद्धब्रह्मशब्दादिश्रुत्यनु-सारेणेत्यर्थः । यद्यप्यग्नेतृत्वमिति वक्तव्यम् । तथापि श्रुत्यनुवादायैवमुक्तम् ॥ बहुविष्णुश्रुतीति ॥ ब्रह्मादिश्रुतेरत्र बहुधाऽऽवृत्तत्वादिति भावः ।

पाण्डुरङ्गि – द्विधा गायत्र्यधिकरणे निरासादिति । एकस्याः वह्निश्रुतेरन्यत्र प्रसिद्धिबाधेपि गायत्रीवाक्पृथिव्याद्यनेकशब्दानामन्यत्र प्रसिद्धिबाधोऽयुक्त इति श्रुतिबाहुल्य-प्राप्तस्य पूर्वपक्षस्य तत्तच्छब्दवाच्यत्वेनोपासनार्थमित्येकः प्रकारः । द्वितीयस्तु ततो ज्यायांश्च पुरुषः यद्वै तद्ब्रह्म एतामेव ब्रह्मोपनिषदं वेदेत्यादिश्रुतीनां गानत्राणकर्तृत्वं भूतादिपादत्वं एतामेव नातिशीयंते इति सर्वोत्तमत्वमित्यादिलिङ्गानां बाहुल्यादनेकेषामपि शब्दानां प्रसिद्धार्थत्यागः इत्येवं प्रकारद्वयेन गायत्र्यधिकरणे निरासादित्यर्थः ।

तात्पर्यचन्द्रिका

दृष्टं हि ''दर्शपूर्णमासाभ्यां यजेते''त्यादौ यजेः प्रवृत्तदर्शपूर्णमासनामानुसारेण षड्यागमात्रपरत्वम् । अन्यथा राजसूययजेरिव सन्निहितसर्वयागपरता स्यात् । सन्ति च विष्णौ प्रवृत्ताः ''ब्रह्मेमं पुरुष''मिति ब्रह्मशब्दाद्याः श्रुतयः । न चेन्द्रश्रुत्यादिकं पश्यन्पूर्वपक्षी तत्सन्निहितं विष्णुश्रुत्यादिकं न पश्यतीति युक्तम् । उक्तं चानन्दमयाधिकरणे ब्रह्मशब्दस्य विष्णौ मुख्यत्वमिति चेन्मैवम् । इन्द्रादिलिङ्गादीनां विष्णौ प्रवर्तयितुमप्यशक्यत्वेन पूर्वपक्षोदयात् । तथाहि । ''इन्द्रो वै वृत्रं हत्वा महानभवत् । यन्महानभवत्तन्महाव्रतमभव''दित्यादौ यो वृत्रहंतेन्द्रो महाव्रतयज-मानः प्रकृतः । स एव ''तमिन्द्र उवाच प्राणो वा अह''मिति तत्रापीन्द्रशब्दे-नोच्यते । न च वृत्रहंतृत्वमहाव्रतयजमानत्वादिकं ब्रह्मणि युक्तम् । नापि ''प्राणो वा अह''मिति प्रसिद्धेन्द्रे प्रयुक्तोहंशब्दो विष्णौ युक्तः । न चाहमित्यस्य मयीत्यर्थः। विभक्तिव्यत्ययप्रसङ्गात् । अन्तर्यामिपरत्वे च लक्षणा स्यात् । न चाहंशब्दः स्वप्रयोक्तन्तर्यामिण्येव मुख्यः । ''तदात्मानमेवावेदहं ब्रह्मास्मि'' । अहं कृत्स्नस्य जगतः इत्यादावीश्वरप्रयुक्ताहंशब्दस्य मुख्यार्थत्वप्रसङ्गात् । यथाच ''वत्समा-लभेते''त्यत्रालम्भनं गुणकर्मभूतगोदोहनादिसाहचर्याद्गुणकर्म । तथा प्राणोप्यप्रधान-चक्षुरादिसाहचर्यादप्रधानभूतः । न तु प्रधानभूतं ब्रह्म ।

प्रकाशिका – दृष्टं हीति ॥ चतुर्थेऽध्याये ''दर्शपूर्णमासयोरिज्याप्राधान्यमविशेषा''दिति तुरीयपादीयैकादशेऽधिकरणे दर्शपूर्णमासयोः किं सर्वेषां यागानां प्राधान्यमुताग्नेयादीनामेव कालयोगिनां प्राधान्यमितरेषां प्रयाजादीनामङ्गत्वमिति सन्दिह्य दर्शपौर्णमासाभ्यामिति

(प्रकाशिका)

नामधेयस्य त्वाख्यातानुसारित्वादाख्यातेन चाविशेषेण सन्निहितसर्वयागान्परामृश्य ''दर्श-पौर्णमासाभ्यां स्वर्गकामो यजेते''ति फले विनियोगात्सर्वेषां प्राधान्यमिति पूर्वपक्षयित्वा अप्रसिद्धार्थस्य नामधेयस्याख्यातपारतंत्र्येपि प्रसिद्धार्थस्य स्वातन्त्र्यात् दर्शपूर्णमासाभ्या-मित्यस्य च षड्यागानामुत्पत्तौ कालयोगाद्विद्धद्वाक्यद्धयेन च त्रिकद्धयसम्पादनाच्च प्रकृतिप्रत्ययार्थप्रसिद्धया प्रसिद्धार्थत्वादाख्यातस्यैव नामपारतन्त्र्यात् षण्णामेव प्राधान्यं समिदादीनां तु तदङ्गत्वमिति सिद्धान्तितम् । अत्र यथा फलवाक्यस्थयजेर्विद्धद्वाक्य-प्रसिद्धदर्शपौर्णमासनामानुसारेण षड्यागमात्रपरत्वं यथा वेन्द्रमित्रमित्यादिश्रुतिप्रसिद्धेन्द्रादि-श्रुत्यनुसारेणापां नेतरामित्यादिलिङ्गानां विष्णुनिष्ठत्वं तथा ''ब्रह्मशब्दः परे विष्णा'' वित्यादिवाक्यप्रसिद्धब्रह्मशब्दानुसारेण प्राणसंवादादिलिङ्गानां विष्णौ प्रवर्तयितुं शक्यत्वेन न तैः पूर्वपक्षोदय इत्यर्थः । प्रवृत्तनामानुरोधेन संकोचानङ्गीकारे बाधकमाह ॥ अन्यथेति ॥ तत्रैव ''प्रकरणशब्दसाम्याच्चोदनानामनङ्गत्वं'' इति चतुर्थपादीयाद्याधिकरणे अनुमत्यादीनि विदेवनादीनि च यागायागकर्माणि प्रकृत्य श्रुतं ''राजा राजसूयेन स्वाराज्यकामो यजेते''ति वाक्यमुदाहृत्य किमनुमत्यादीनां यागानां विदेवनादीनामयागानां च फलसम्बन्धेन प्राधान्यमुत यागानामेवेति सन्दिह्य राजसूयशब्दस्याप्रसिद्धार्थत्वेपि तृतीयान्ततया फलसाध-नपरत्वावगमात् प्रकृतानां फलापेक्षाणां यागायागरूपाणां कर्मणां नामधेयत्वावगमात् यजेश्च छत्रिन्यायेन तेषामेव परामर्शकत्वोपपत्तेः सर्वेषां प्राधान्यमिति पूर्वपक्षयित्वा भावार्थाधि-करणन्यायेन धात्वर्थस्यैव फलसम्बन्धान्नामार्थस्यातथात्वात् यजेश्च यागमात्रवचनात्तत्सा-मानाधिकरण्येन राजसूयशब्दस्यापि तन्नामत्वावगमात्तेषामेव फलसम्बन्धात्तत्प्राधान्यम् । विदेवनादीनां तु ''फलवत्सन्निधावफलं तदङ्ग''मिति न्यायेन तदङ्गत्वमिति सिद्धान्तितम् । तत्र यथा यजेः प्रकृतसर्वयागपरता तथा प्रकृतेपि स्यादित्यर्थः । नन्वस्त्वन्यत्र प्रवृत्तनामानु-सारेण सङ्कोचः । प्रकृते किमित्यत आह ॥ सन्ति चेति ॥ ननु विष्णुश्रुत्यज्ञानेन पूर्वपक्षः किं न स्यादित्यत आह ॥ न चेति ॥ ननु ब्रह्मश्रुत्यादेर्विष्णौ प्रवृत्तत्वमेवाद्याप्यसिद्धम् । येन तद्बलादुक्तमयुक्तं स्यादित्यत आह ॥ उक्तं चेति ॥ ननु जन्माधिकरण एव ब्रह्मशब्दस्य विष्णौ मुख्यत्वमुक्तम् । अत एवानन्दमयाधिकरणे ब्रह्मशब्दं पूर्वपक्षबाधकमाशङ्क्य समाधानमुक्तमिति चेत्सत्यम् । जन्माधिकरणे स्वयं समर्थितत्वेपि भाष्यादौ तत्रानुक्तेरत्र तूक्तेस्तदभिप्रायेणैवमभिधानात् ।

एवं न्यायविवरणटीकागताक्षेपांशं प्रपञ्च्य ''विद्याविशेषेऽधिकाशङ्क्या पुनः प्रत्यवस्थाना''दिति समाधानांशं विवृण्वन्पूर्वपक्षमुज्जीवयति ॥ मैवमित्यादिना ॥ अपिपदेन स्वरसतः प्रवृत्तिर्नास्त्येव बलादपि प्रवृत्तिर्नोपपद्यत इत्याचष्टे । सूत्रे ''न वक्तुरात्मोपदेशा''दितीन्द्रस्य ''जीवमुख्यप्राणलिङ्गा''दिति तयोश्च पूर्वपक्षित्वादिन्द्रप्रापकं तावदाह ॥ इन्द्र इति ॥ उदाहरिष्यमाणन्यायविवरणेऽन्यलिङ्गेन श्रुत्युपजीवनस्य सूचितत्वात्तथैवाह ॥ स एवेति ॥ अन्यस्य तत्र यजमानत्वे शस्त्रशंसितारं विश्वामित्रं प्रत्यनेन ''प्राणो वा अह''मित्युपदेशरूपवरदानायोगादिति भावः । अस्त्वेवं ततः किमित्यत आह ॥ न चेति ॥ पुराणादाविन्द्रस्यैव तथात्वप्रसिद्धेरिति भावः । एतेन न वक्तुरिति सूत्र- पूर्वपक्षांशटीका विवृता । ''न चास्योपदेशस्य सावकाशत्वं वाऽस्ती''ति टीकावाक्यं विवृण्वन् श्रुतिरपि निरवकाशेत्याह ॥ नापीति ॥ विष्णौ योगोहि चतुर्धा । तदभेदेन वा भेदेपि विभक्तिविपरिणामेन मयि प्राणोऽस्तीत्यर्थकथनेन वा मञ्चस्थपुरुषाभिप्रायेण मञ्चाः क्रोशन्तीतिवत्स्वान्तर्याम्यभिप्रायेण लक्षणया वा अन्तर्यामिणि मुख्यत्वेन वा । नाद्यः । अन्तरधिकरण इन्द्राद्यभेदस्य निरस्तत्वात् । पृथगित्यत्र निरसिष्यमाणत्वाच्च द्वितीयं निरस्यति ॥ न चेति ॥ अस्मीत्यस्यास्तीत्यर्थ इत्यपि ग्राह्यम् ॥ विभक्तीति ॥ इन्द्रपरत्वेनोपपत्तौ व्यत्ययादेरयोगादिति भावः । तृतीयं निरस्यति ॥ अन्तर्यामीति ॥ चतुर्थमाशङ्क्याह ॥ न चेति ॥ ब्रह्मैवेदमग्र आसीदिति प्रकृतं ब्रह्म तदिति परामृश्यते । अहं ब्रह्मास्मि इत्यवेदित्यर्थः ।

अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा ।
मत्तः परतरं नान्यत्किंचिदस्ति धनञ्जय ।
विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् ॥

इत्यादौ भगवत्प्रयुक्ताहंशब्दस्यापि तदन्तर्यामिबोधकत्वप्रसङ्ग इत्यर्थः । ''एतेन ''प्राणो वा अहमस्म्यृष इति श्रुति''रिति सुंधावाक्यं च विवृतम् । एवमिन्द्रप्रापकश्रुतिलिङ्गयोर्निरवकाशत्वेनेन्द्रप्राप्तिमुक्त्वा वायुप्राप्तिं दृष्टान्तपूर्वमाह ॥ यथाचेत्यादिना ॥ प्राणशब्दस्य विष्णुवायुसाधारणस्य साहचर्यमात्रात्कथमवधारणमित्यत उक्तम् ॥ यथाच वत्समिति ॥ द्वितीये ''विशये प्रायदर्शना''दिति तृतीयपादीय- षष्ठाधिकरणे अग्निहोत्रगोदोहाधिकारे ''वत्समालभेते''ति श्रुतं वाक्यमुदाहृत्यालभेतेति यागविधिरुत संस्कारविधिरिति विशये ''वायव्यं श्वेतमालभेते''त्यादाविवासत्यपि देवतासंयोगे प्राणिद्रव्यालम्भत्वसामान्याद्या-

(प्रकाशिका)

गविधिरिति पूर्वपक्षयित्वा आलम्भस्य स्पर्शमात्रत्वात्तस्य च लोकेपि दृष्टत्वेन यागं विनानुपपत्त्यभावाद्गुणकर्मभूतगोदोहप्रायपाठदर्शनाद्वत्ससंस्काराख्यं गुणकर्मैव चोद्यत इति सिद्धान्तितम् । तद्वदत्रापि प्राणो विष्णुरन्यो वेति विशये चक्षुरादिप्रायपाठादप्रधानो मुख्य-प्राण एव भवेदित्यर्थः । अत एव वैयाकरणैस्साहचर्यं धर्मग्राहकमिति वदद्भिः ''सर्तिशास्त्यर्तिभ्यश्चे''त्यत्र परस्मैपदसाहचर्याच्छास्तेः परस्मैपदिन एव ग्रहणमित्युक्तम् । अप्रधान-प्रधानपदे हेतुगर्भे । एतेन ''एतत्प्राणस्येन्द्रियगणे गणितत्वा'' दिति टीका विवृता ।

पाण्डुरङ्गि – अन्यथेति ॥ आग्नेयादिषट्के प्रवृत्तदर्शपूर्णमासानुसारेण यजेः षड्या-गपरत्वाभाव इत्यर्थः । नचास्तु सन्निहितयागपरत्वमिति वाच्यम् । तथा सति प्रयाजादि-सर्वयागपरत्वापत्त्या करणेतिकर्तव्यताभेदो न स्यात् । ननु च दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यम् । दृष्टान्ते ह्याग्नेयादियागषट्कप्रसिद्धाया दर्शपूर्णमासश्रुतेः सत्त्वेन तदनुसारेण यजेः षड्यागमात्रपरत्ववत् प्रकृते विष्णौ प्रवृत्तप्रबलश्रुत्यभावेन तदनुसारेण लिङ्गानां विष्णुपरताया असम्भवादित्यत आह ॥ उक्तं चेति ॥

तात्पर्यचन्द्रिका

चक्षुरादिभिश्चातिनिकृष्टैः सर्वोत्कृष्टस्य ब्रह्मणः कलहोऽप्ययुक्तः । शत-संवत्सरत्वं तु जीवादन्यत्र न युक्तमेव । यद्यपि ''तावन्ति शतसंवत्सरस्याह्नां सहस्राणि भवन्ती''त्यत्र शतसंवत्सरत्वं प्राणनिष्ठं न भाति । बृहतीसहस्रवर्णानां शतसंवत्सरस्याह्नां च षट्त्रिंशत्सहस्रत्वेन संख्यासाम्यस्यैवोक्तेः । तथापि ''तं शतं वर्षाण्यभ्यार्च''दित्यत्र ''प्राणो वाव तदभ्यार्च''दिति प्रकृतस्य प्राणस्यान्व-यात्तावन्तीत्यत्रापि तस्यैवान्वयः । अत एव टीकायां ''प्राणो वाव तदभ्यार्च'' दित्यादि पूर्ववाक्यं पठितम् । न च तदन्तर्यामिणि लिङ्गानां सावकाशता । दुःखि-त्वादेरपि प्रसङ्गात् । अपां नेतृत्वादिलिङ्गानामप्यन्तर्यामिगतताऽत्रत्यसिद्धान्ताधीना । न च स्वातन्त्र्यादेवेश्वरे प्राणशब्दः । सति विरोधिश्रुत्यादौ तदयोगात् । न हि दरिद्रो भृत्यो जयीत्यत्र राज्ञि जयिशब्दः । तदेतदभिप्रेत्योक्तं टीकायां ''न चैतल्लिङ्गं विष्णाववकाशं लभत'' इति । अन्विष्याप्यवकाशं न लभत इत्यर्थः । अन्यथा न चैतल्लिङ्गं सावकाशमित्येवावक्ष्यत् । विष्णुश्रुत्यादिकं त्विन्द्रादौ गौणम् ।

प्रकाशिका – चक्षुरादिभिरिति ॥ ''ता अहिंसंत । अहमुक्थमस्म्यहमुक्थमस्मी''त्यादिनोक्त इत्यर्थः । एवमिन्द्रवायुप्राप्तिमुक्त्वा जीवप्राप्तिं च तल्लिङ्गप्राबल्योक्त्या वक्ति ॥ शतसंवत्सरत्वं त्विति ॥ ''एष इमं लोकमभ्यार्चत्पुरुषरूपेण य एष तपति प्राणो वाव तदभ्यार्चत् प्राणो ह्येष य एष तपति तं शतं वर्षाण्यभ्यार्चत् तस्माच्छतं वर्षाणि पुरुषायुषो भवन्ती''ति वाक्योक्तं शतायुष्त्वं ''शतायुः पुरुष'' इत्यादिश्रुतेर्जीव एव युक्तमित्यर्थः । अत्र भाष्ये तावन्तीति वाक्योक्तावपि टीकायां पूर्ववाक्यमुक्त्वा ''प्राणस्योक्तशतायुष्त्वस्योपर्यपि तावन्तीत्यादिना बहुस्थलेष्वनुसन्धानादित्युक्तम् । तदभिप्रायं शङ्कापूर्वं व्यनक्ति ॥ यद्यपीति ॥ ''तस्य वा एतस्य बृहतीसहस्रस्य सम्पन्नस्य षट्त्रिंशतमक्षराणां सहस्राणि भवन्ति तावन्ति शतसंवत्सरस्याह्नां सहस्राणि भवन्ती''त्यत्र प्राणश्रुतेरभावेन प्राणगततयाऽप्रतीतेः कथं प्राणशब्दस्य जीवार्थकत्वं स्यादिति भावः । वर्णानां स्वरव्यंजनरूपाणाम् । तस्यैवान्वय इति ॥ तथाच प्राणस्य यच्छतसंवत्सरं तस्याह्नामित्यर्थ इति भावः । अत एव प्रकृतस्य तत्रान्वयादेवेत्यर्थः । ननूक्तमत्राग्नेतृत्वादिवल्लिङ्गानि सावकाशानीति तत्राह ॥ न चेति ॥ यदि जीवधर्माणामन्तर्यामिगतत्वमुच्यते तर्हि दुःखाज्ञानसमवायादिरूपस्सर्वोपि संसारस्तत्रैव स्यात् । तथाच जीववदल्पशक्तित्वापत्त्याऽन्तर्यामित्वमपि तस्य न स्यादित्यर्थः । कथं तर्ह्यग्नेतृत्वं सावकाशितमित्यतोऽत्र त्यन्यायेनैवेत्याह ॥ अपामिति ॥ ''तदधीनत्वादर्थव''दिति न्यायविषयत्वमाशङ्क्याह ॥ न चेति ॥ गौणमिति ॥ स्वावरापेक्षया पूर्णत्वाद्ब्रह्मादिशब्दवत्त्वमित्यर्थः । नन्विन्द्रादिषु निर्धारित एक एव प्राण इति पूर्वः पक्षोऽनिर्धारितो यः कश्चिदिति वा सर्वेपीति वा । नाद्यः । अनेकप्रापकसत्त्वेन निर्धारणायोगात् ।

न द्वितीयः । निर्धारणाभावे पूर्वपक्षस्य सन्देहादविशेषापातात् । न तृतीयः । वाक्यभेदेनासम्भवादिति चेदत्राहुः । प्राणादिप्रापकलिङ्गापेक्षयेन्द्रप्रापकश्रुतिलिङ्गानां प्राबल्योपपत्तेः । इन्द्रस्य हस्ताधिष्ठातुरिन्द्रियत्वेनेन्द्रियगणे गणितत्वस्य तैस्सहकलहस्य चोपपत्तेः । अत एवैतल्लिङ्गस्य त्रितयसाधारण्यमुक्तं सुधायाम् । शतायुष्त्वस्यापि तथैव कथंचिद्योज्यत्वादिन्द्र एवेत्यवधारणोपपत्तेः । मुख्य एव वास्तु । मुख्यप्राणलिङ्गानामुपक्रमे प्राणो वंश इत्यन्ते च श्रवणेन बलवत्त्वात् । प्राणश्रुतेश्च मुख्ये लोकतः प्रसिद्धाया बहुधाश्रवणेन तद्बलेनेन्द्रादिप्रापकाणां मुख्ये कथंचिन्नेयत्वात् । जीव एव वास्तु । शतायुष्त्वस्य चात्राभ्यस्यमानत्वेन बलवत्त्वात् । इन्द्रियजन्यफलाश्रये तत्सहपाठादेरपि सम्भवादिन्द्रश्रुत्यादेः कथंचिन्नेयत्वादिति । द्वितीयपक्षोपि युक्त एव ।

(प्रकाशिका)

अन्यप्रापकाणामुक्तदिशा बलवत्त्वनिश्चयेन विष्णोरन्यत्वेनावधारणोपपत्तेः । विशिष्यावधारणस्य व्यर्थत्वात् । अत एव टीकायां ''विष्णुरन्यो वे''ति संशयो दर्शितः । ''तेषामन्यतमस्ये''त्यप्युक्तम् । तृतीयो वास्तु । त्रयाणां प्रापकसद्भावेन सर्वत्र मुख्यतया त्रितयपरत्वं वा आद्यंतयोर्लिङ्गदर्शनेन मुख्यस्यैवेदं महाप्रकरणम् । तन्मध्ये ''एष इमं लोक''मित्यारभ्य जीवावान्तरप्रकरणं तन्मध्ये विश्वामित्रमित्यादीन्द्रप्रकरणमिति वा कस्यचिन्मुख्यप्राणपरत्वं कस्यचिज्जीवपरत्वं कस्यचिदिन्द्रपरत्वमिति विभागेन वा त्रितयपरत्वोपपत्तेः । न चार्थैकत्वादेकं वाक्यमित्यादेर्नानार्थकत्वे वाक्यभेददोषः । न्यायप्राप्तत्वेन सह्यत्वात् । उक्तं च सुधायां ''न च वाक्यभेदो दोषः । अनन्यगतिकतया प्राप्तत्वा''दिति । अत्रोक्तपक्षत्रये तृतीय एवाभिमत इति भाति । सूत्रे त्रयस्यापि पूर्वपक्षित्वात् । टीकादौ त्रितयप्रापकस्यापि निरवकाशत्वोक्तेः । वाक्यभेदाङ्गीकाराच्चेति । ननु तर्ह्यनेकप्रापकसत्त्वात्सर्वानुग्रहार्थमिन्द्रादीनां विष्ण्वभेदमेवाशङ्क्य समाधानं कुतो न क्रियते । वाक्यभेददोषस्याप्यभावादिति चेन्न । भेदस्यासूत्रितत्वात् । अन्तरधिकरण एवेन्द्रादिदेवतैक्यस्य निरासात् । उक्तरीत्याऽन्यप्रापकाणां बलवत्त्वात् । विष्णुप्रापकाणां तदभावाभिमानात् । तौल्याभावेनाभेदकल्पकोभयान्यथानुपपत्तेरभावाच्चेति ।

पाण्डुरङ्गि – अपां नेतृत्वादिलिङ्गानामपीति ॥ तथाचान्तर्यामिपरन्यायस्य तत्राव्युत्पादनान्न तेनास्य गतार्थतेति भावः ।

तात्पर्यचन्द्रिका

नन्वथापि ''प्राचीनोप्यन्य'' इति प्रयोजनोक्तिरयुक्ता । आकाशाधिकरणे पूर्वपक्षबीजभूताया भूते प्रसिद्धेर्वाक्यद्वयेपि तुल्यतया ''आकाश'' इति वाक्ये भूतपरत्वे ''यदेष'' इति वाक्येपि तत्परत्वमिति प्रयोजनसम्भवेपि अत्र प्राचीनपूर्वपक्षादत्रत्यपूर्वपक्षे प्राणस्याविष्णुत्वे यो विशेषहेतुस्तदभावादेव प्राचीनप्राणस्य तत्रत्यसिद्धान्तन्यायेन विष्णुत्वोपपत्तेरिति चेन्मैवम् । यथा प्राभाकरमते कामिनियोज्यान्वयबलाल्लिङादेः स्थायिकार्यार्थत्वे निश्चिते तदन्वयशून्येपि नित्याधिकारे तदर्थता । यथा वा मतान्तरे वाक्यशेषेण क्वचिद्यवादिशब्दानां दीर्घशूकाद्यर्थत्वे निश्चितेऽन्यत्रापि तदर्थता । तथात्रेन्द्रादिलिङ्गात्प्राणशब्दस्येन्द्राद्यर्थत्वे निर्णीते ''तद्वैत्वं प्राण'' इत्यत्रापि तदर्थत्वात् । न चात्रामुख्यवृत्त्येन्द्रादिपरत्वेपि

(तात्पर्यचन्द्रिका)

तल्लिङ्गोपपत्तिः । तद्वैत्वं प्राण इत्यत्र तु मुख्यवृत्त्या विष्णुपरताऽस्त्विति वाच्यम् । अत्रेन्द्रादौ मुख्यत्वे बाधकाभावात् । न च विष्णौ मुख्यत्वमेव बाधकम् । तस्याद्याप्यसिद्धेः । इन्द्रादौ योगसम्भवात् । मुख्यप्राणे रूढेरपि सत्त्वाच्च । पूर्वपक्षे सर्वत्रापि वैदिकप्रयोगे प्राणशब्दस्येन्द्रादिपरत्वेन विष्णौ विद्वद्रूढेस्तद्व्याप्यमहायोगस्य चाभावाच्च । न चात्र मुख्यवृत्त्येन्द्रादिपरत्वेपि पूर्वत्रामुख्यवृत्त्या विष्णुपरता सिद्धान्तिनेष्यते । न चेन्द्रादौ विष्णौ च मुख्यता । सत्यां गतावनेकार्थत्वस्यान्याय्यत्वात् । न च वाक्यद्वयस्थप्राणशब्दस्य मुख्यवृत्त्यैकार्थत्वे पूर्वपक्षिणं प्रति बाधकमस्ति । येन मासाग्निहोत्रेऽग्निहोत्रशब्दस्येव तत्र विष्णौ प्राणशब्दस्य गौणता स्यात् । अत एवानुव्याख्याने पूर्वपक्षे ''अन्यस्य मुख्यवाच्यत्वं'' इत्युक्तम् ।

प्रकाशिका – एवं पूर्वपक्षोत्थानं निरवकाशप्रापकोक्त्या समर्थ्ये- दानीं यद्भाष्यकारोक्तं अयं प्राणोऽन्यश्चेत्तद्वै त्वं प्राण इत्युक्तोऽप्यन्यः स्यादिति पूर्वोक्ताक्षेपः पूर्वपक्षे फलं सिद्धान्ते च तत्समाधानमिति तत्र पूर्वपक्षे प्रयोजनोक्तिं समर्थयितुमाक्षिपति ॥ नन्विति ॥ ननु यथाऽऽकाश इति होवाचेत्यत्राकाशस्य भूतत्वे यदेष आकाश इति निर्णीतब्रह्मप्रकरणगतस्याप्याकाशस्यान्यत्वं पूर्वपक्षफलं तथाऽत्र किं न स्यादित्यत आह ॥ आकाशेति ॥ य इति ॥ निरवकाशश्रुतिलिङ्गबाहुल्यरूपः ॥ तत्रत्येति ॥ निरवकाशश्रीपतित्वादिलिङ्गेनेत्यर्थः । ''एकत्र निर्णीतश्शास्त्रार्थस्सर्वत्रे''ति न्यायादत्रत्यस्यान्यत्वेऽन्यत्रापि तथा भवितव्यमित्येतत्सदृष्टान्तमाह ॥ यथेति ॥ स्वर्गकामो यजेतेत्यादौ स्वर्गकामं नियोज्यं प्रति क्रियालिङादिशब्देन कार्यतया बोधयितुमशक्या । कामी हिकाम्यादन्यत्काम्याव्यवहितसाधनमेव कार्यतया वैति । न तु व्यवहितसाधनम् । क्रियाच स्थायित्वेन काम्यव्यवहितत्वान्न कामिनियोज्यान्वययोग्या । तृप्तिकामस्य व्यवहितसाधने पाके कार्यताधीस्तु न तृप्तिकामितया । किं तु तृप्तिसाधनौदनकामितयैव । अन्यथासिद्धान्नस्यापि तृप्तिकामस्य व्यवहितसाधने पाके कार्यताधीस्स्यात् । अतः फलपर्यंतस्थाय्यपूर्वमेव लिङा कार्यत्वेन बोध्यमित्यपूर्वं लिङ्वाच्यमिति कामाधिकारे नियोज्यान्वयसामर्थ्याल्लिङादेस्स्थाय्यपूर्वशब्दितकार्यार्थत्वे निश्चिते ''अहरहस्संध्यामुपासीते''त्यादौ नित्ये कर्मणि कामाश्रवणेन नियोज्यान्वयशून्येप्येकत्र निर्णीतश्शास्त्रार्थः परत्रेति तत्रापि तथैवाङ्गीकृतम् । तद्वदित्यर्थः ॥ यथावेति ॥ मतान्तरे भट्टादिमते । यववराहाधिकरणमुक्तं जन्माधिकरणे ।

''यवमयश्चरुर्भवती''त्यादौ ''यत्रान्या ओषधयो म्लायन्ते एते मोदमाना इवोत्तिष्ठन्ती''ति वाक्यशेषाद्दीर्घशूकाद्यर्थत्वे निश्चिते ''यवान्पच । यवैर्यजेते''त्यादौ यथा तदर्थत्वं तद्वदित्यर्थः। नन्वेकत्र निर्णीत इत्यस्यानुसरणेपि न प्रयोजनोक्तिर्युज्यते । ऐतरेयके यथा वाय्वादित्रितयप्रापकसत्त्वेन त्रितयपरत्वमुच्यते तथा विष्णुलिङ्गादेरपि सत्त्वेन तत्परत्वस्यापि सम्भवात् । तत्रान्तर्नयेऽभेदनिरसनेन विष्णोरिन्द्रादिनैक्यायोगेपि चतुर्थपादीयोदाहरणेषु ''अव्यक्तात्पुरुषः पर'' इत्यादिषु मुख्यतो विष्णुपरत्वममुख्यतोऽन्यपरत्वमङ्गीकृतम् । अन्यथा तारतम्याद्यसिद्धेः । तद्वदत्रापि मुख्यतो विष्णुपरत्वेप्यमुख्यवृत्त्येन्द्रादिपरत्वाङ्गीकार-मात्रेणापीन्द्रादिलिङ्गाद्युपपत्तेः प्राक्तनस्यापि मुख्यतो विष्णुपरत्वस्य वा इन्द्रादिलिङ्गानां बलवत्त्वेनात्र मुख्यत इन्द्रादिपरत्वेप्यमुख्यवृत्त्या विष्णुपरत्वेन पूर्वतनस्याप्यमुख्यतो विष्णुपरत्वस्य वा विष्णुतदन्यप्रापकसत्त्वाविशेषेण मुख्यवृत्त्योभयपरत्वस्यात्रैतरेयके सम्भवेन प्राचीनस्यापि मुख्यत उभयपरत्वस्य वा ऐतरेयगतस्य प्राणस्य मुख्यवृत्त्येन्द्रादिपरत्वेपि तैत्तिरीयगतस्य मासाग्निहोत्रेऽग्निहोत्रशब्दस्येव गौण्या वृत्त्या विष्णुपरत्वस्य वा पूर्वत्र श्रीपतित्वादिविष्णुलिङ्गेन विष्ण्वर्थत्वस्य निश्चितत्वेनात्रापि तदर्थत्वापत्त्या वैपरीत्यस्यैव वा सम्भवेन पञ्चधा विष्णुपरत्वाक्षेपायोगादित्याशङ्क्याद्यं तावन्निरस्यति ॥ न चात्रेति ॥ ऐतरेयक इत्यर्थः ॥ बाधकाभावादिति ॥ ''अव्यक्तात्पुरुषःपर'' इत्यादावन्यस्य मुख्यत्वे बाधकं वक्ष्यत इति भावः । ननु प्रागुक्तरीत्या प्राणशब्दस्य विष्णौ मुख्यत्वं वा इन्द्रादौ योगरूढ्योरसत्त्वं वा विष्णौ प्रयोगबाहुल्यलब्धविद्भद्रूढिमहायोगसत्त्वं वा बाधकमित्याशङ्क्य क्रमेण निरस्यति ॥ न चेति ॥ अद्यापीति ॥ प्रागुक्तस्यापीहाक्षेपादिति भावः ।

॥ योगेति ॥ प्रणेतृत्वादेः खण्डितैश्वर्ययुतेऽपि सत्त्वादिति भावः ॥ सर्वत्रेति ॥ ''प्राणस्य प्राणः प्राण एवाकरण'' इत्यादै ॥ तद्व्याप्येति ॥ विद्भद्रूढिर्वैदिका स्यात्सा योगादेव लभ्यत'' इत्युक्तेरिति भावः । द्वितीयं पक्षं निरस्यति ॥ न चात्रेति ॥ ऐतरेये मुख्यवृत्त्येन्द्रादिपरत्वेप्यमुख्यतो विष्णुपरत्वाङ्गीकारेण प्राचीनस्य तथात्वं सिद्धान्तिनोऽन-भिमतमित्यर्थः । तृतीयं निरस्यति ॥ न चेन्द्रादाविति ॥ अस्य प्राक्तनस्य चेत्यर्थः । ननु ''राजा कुवलयोल्लासी''त्यादाविव किं न स्यादित्यत आह ॥ न चेति ॥ तत्र वक्तृविक्षादिविरोध इव प्रकृते बाधकाभावादिति भावः । यद्वाऽस्य मुख्यवृत्त्येन्द्रादिपरत्वेपि गौण्या वृत्त्या प्राचीनो विष्णुस्स्यादिति चतुर्थपक्षं दृष्टान्तवैषम्योक्त्याऽपाकरोति ॥ न च वाक्येति ॥ ऐतरेयतैत्तिरीयस्थेत्यर्थः । सप्तमे ''उक्तं क्रियाभिधानं तत् श्रुतावन्यत्र विधिप्रदेशस्स्या''दिति तृतीयपादीयाद्याधिकरणे कुण्डपायिनामयने श्रुतं ''मासमग्निहोत्रं

जुहोती''ति वाक्यमुदाहृत्य किमग्निहोत्रशब्दो नैयमिकाग्निहोत्रधर्माणामतिदेशको नेति संशये उभयत्रापि जुहोति सामानाधिकरण्येन निर्देशाविशेषान्नामधेयत्वेन मुख्यत्वान्न धर्माणामतिदेशक इति प्राप्ते एकत्र मुख्यत्वेऽन्यत्र गौणत्वेनाप्युपपत्तावुभयत्र शक्तिकल्पनस्यान्याय्यत्वात् नित्याग्निहोत्रेऽग्नये होत्रमस्मिन्निति प्रवृत्तिनिमित्तसम्भवेन नैयमिके मुख्यत्वादन्यत्र तत्सादृश्यविधित्सया गौण इति तद्धर्मातिदेशक इति सिद्धान्तितम् । तत्र यथा नैयमिकमासाग्निहोत्रयोः प्रकरणभेदेन भेदस्य द्वितीये निश्चितत्वान्मासाग्निहोत्रे प्रवृत्तिनिमित्ताभावेनानेकार्थस्यान्याय्यत्वेन च बाधकेन गौणत्वमुक्तं न च तथात्र किंचिद्बाधकमस्ति । प्रत्युतैकार्थत्वं मुख्यवृत्तिकत्वं चाश्रितं भवतीत्यर्थः ॥ अत एवेति ॥ वाक्यद्वयस्थप्राणशब्दस्य मुख्यवृत्त्यैकार्थत्वे बाधकाभावादेव ''बाहुल्यात् श्रुतिलिङ्गयोः । अन्यस्य मुख्यवाच्यत्वमिति तन्नात्रगस्य ही''त्युक्तमित्यर्थः । इदमाद्यपक्षेऽपि ज्ञापकतया योज्यम् ।

पाण्डुरङ्गि – कामिनियोज्येति ॥ कामीचासौ नियोज्यश्चेति कर्मधारयः । मतान्तरे भट्टमत इत्यर्थः । विष्णौ मुख्यत्वं बाधकमिति वदन्प्रष्टव्यः । इन्द्रादौ प्राणशब्दस्य लाक्षणिकत्वेन योगरूढ्योरभावाद्ब्रह्मणि च रूढियोगयोः सत्त्वान्न तत्र मुख्यत्वमिति वा किं वेन्द्रादौ रूढियोग- योस्सद्भावेपि विष्णौ विद्वद्रूढिमहायोगयोस्सद्भावेन तत्र मुख्यत्वमिति वा। नाद्य इत्याह ॥ इन्द्रादावित्यादि ॥ न द्वितीय इत्याह ॥ पूर्वपक्ष इति ॥ सिद्धान्तिनेति हेतुगर्भविशेषणम् । तथात्वे तदुक्तगुणालाभेन समन्वयकथनवैयर्थ्यं स्यादिति भावः । यावज्जीवकाग्निहोत्रेऽग्निहोत्रशब्दस्य मुख्यत्वेपि मासाग्निहोत्रेऽमुख्यत्ववत् प्राणशब्दस्यापि मुख्यप्राणे मुख्यत्वेपि विष्णावमुख्यत्वस्यैव न्याय्यत्वात्कथमनेकार्थत्वमन्याय्यमित्यतो वैषम्येण परिहरति ॥ न चेति ॥ तत्र तद्वैत्वं प्राण इत्यत्रेत्यर्थः ।

तात्पर्यचन्द्रिका

न च तत्र श्रीपतित्वादिलिङ्गात्प्राणशब्दस्य विष्ण्वर्थत्वे निश्चितेऽत्रापि तदर्थतेति विपरीतं किं न स्यादिति शङ्क्यम् । प्राणसंवादोत्क्रमणप्रवेशादीनां बहुत्वात् श्रुत्यनुगृहीतत्वात्साक्षात्प्राणविशेषणत्वश्रवणाच्च । श्रीपतित्वादिलिङ्गानां तु वैपरीत्यात् । पूर्वस्याविष्णुत्वशङ्कामात्रेण विष्णुत्वनिश्चयोपसम्भवात् । अत एव टीकायां शङ्कापदप्रयोगः । अन्यथा प्राचीनप्राणोप्यन्य एव स्यात् । एकप्रकरणत्वादित्युत्तराधिकरणप्रयोजनटीकायामिवात्राप्यन्य एव स्यादित्यवक्ष्यत् । एकस्य निर्णयस्यानेकन्यायसाध्यत्वेपि निर्णयविरोधितत्तत्पूर्वपक्षन्यायाभासनिरासकन्याय-

साध्यावान्तरनिर्णयभेदादधिकरणभेदश्च युक्तः । यथा प्राभाकरमते चोदनाप्रामाण्यनिर्णयस्याध्यायमात्रसाध्यत्वेप्यवान्तरनिर्णयभेदादधिकरणभेदः । यथावा मतान्तरे ''ऊर्जं पशूनाप्नोति न स पापं श्लोकं शृणोती''त्यादेरर्थवादत्वनिर्णयस्यौदुम्बराधिकरणपर्णमय्यधिकरणसाध्यत्वेप्यवान्तरनिर्णयभेदादधिकरणभेदस्तद्वत् । तस्मात्प्रयोजनोक्तिर्युक्ता । एवमन्यत्रापि पूर्वोक्ताक्षेपेण प्रयोजनोक्तिरुपपाद्या ।

प्रकाशिका – पञ्चमपक्षमनूद्य निरस्यति ॥ न च तत्रेति ॥ प्राणेति ॥ ''अहमुक्थमस्मी''ति प्राणशब्दितेन्द्रियैस्संवादः ''तत्प्राण उत्क्रान्तेऽपद्यत तत्प्राणे प्रपन्न उदतिष्ठ''दित्युत्क्रमणप्रवेशौ तन्निमित्तदेहपातोत्थानशतसंवत्सरत्वप्राणवंशत्वादीनामित्यर्थः ॥ श्रुतीति ॥ इन्द्रेण प्रयुक्ताहमादिश्रुतीत्यर्थः ॥ वैपरीत्यादिति ॥ अबहुत्वात्प्राणश्रुतेस्सन्दिग्धत्वे नानुग्राहकश्रुत्यन्तराभावादद्भ्यस्सम्भूत इत्यनुवाकान्तरगतत्वेन साक्षादश्रवणादित्यर्थः । ननु तत्रापि ''तमेव मृत्युममृतं तमाहुस्तं भर्तारं तमु गोप्तारमाहुः । यस्तद्वेद ब्रह्मणैष रमते । हीश्चते लक्ष्मीश्च पत्न्या'' वित्यादीनामपि बहूनां ब्रह्मलिङ्गानां सत्त्वात् ''हरिं हरंतमनुयंति देवा'' इति हरिश्रुत्यानुगृहीतत्वादमृतत्वादीनां तद्विशेषणत्वश्रवणाच्च कथं वैपरीत्यमिति चेत्सत्यम् । भाष्योक्तश्रीपतित्वादिस्पष्टलिङ्गाभिप्रायेणैवमुक्तिः । तस्य चोक्तवैपरीत्यसम्भवादिति । यद्वा एतदरुच्यैव टीकोक्तं पक्षान्तरमाह ॥ पूर्वस्येति ॥ मास्तु नाम प्राचीनोपीन्द्रादिरेवेत्यवधारणम् । तथाप्यत्रत्यप्राणस्येन्द्रादित्वे प्राचीनोपीन्द्रादिर्वा विष्णुर्वेति संशयसम्भवात्तन्मात्रेण विष्णुरेवेत्यवधारणाक्षेपसम्भवादित्यर्थः । ''तस्य विष्णोरन्यत्वे प्राचीनोप्यन्य इति शङ्का स्या''दिति शङ्कापदप्रयोग इत्यर्थः । ज्ञापकत्वं व्यनक्ति ॥ अन्यथेति ॥ नन्वेवं तद्वै त्वं प्राण इत्यत्र प्राणो विष्णुरन्यो वेति संशयस्यात्रत्यसिद्धान्तन्यायेनोत्पन्ननिर्णयेनैव निरासस्सम्भवेन तत्रत्यसिद्धान्तो व्यर्थः । अतो न तस्य विष्णुत्वावधारणमेतत्सिद्धान्तफलं भवितुमर्हतीत्यतस्सिद्धान्तप्रयोजनं च साधयति ॥ एकस्येति ॥ अवान्तरनिर्णयेति ॥ प्राणपदप्रवृत्तिनिमित्तस्य जीवनहेतुत्वस्य विष्णुगतत्वनिर्णयस्तत्रत्यन्यायसाध्यः । अन्यगतत्वेन प्रसिद्धलिङ्गानामन्तर्यामिगतत्वनिर्णयोऽत्रत्यन्यायसाध्यः । उभाभ्यां सर्वत्र प्राणशब्दार्थो विष्णुरेवेति निर्णयस्साध्य इत्यर्थः ॥ यथा प्राभाकरमत इति ॥ भट्टमते श्रुतिस्मृत्यादिसाधारण्येन धर्मप्रमाणविचार आद्याध्यायस्यार्थः । प्राभाकरमते चोदनाप्रामाण्यमात्रविचार इति व्यवस्था । तत्र ''चोदनालक्षणोर्थो धर्म'' इत्युक्त- चोदनाप्रामाण्यनिर्णयस्याध्यायार्थत्वेऽप्यर्थवादाधिकरणे सापेक्षत्वमूल-

काप्रामाण्यशङ्कानिरासपूर्वकः प्रामाण्यनिर्णयः विधिवन्निगदाधिकरणे त्वेकेन वाक्येनौदुम्बर-त्वसम्बन्धफलसम्बन्धरूपसम्बन्धद्वयविधानाशक्तिमूलकाप्रामाण्यशङ्कानिरासपूर्वकस्तन्निर्णय-इत्यवान्तरनिर्णयभेदाद्यथाधिकरणभेदस्तथेत्यर्थः ॥ यथावेति ॥ भट्टमत इत्यर्थः ।

आद्ये ''विधिर्वा स्यादपूर्वत्वाद्वादमात्रं ह्यनर्थकं'' इति द्वितीयपादीयद्वितीयाधिकरणे ''औदुम्बरो यूपो भवति । ऊर्ग्वा उदुम्बरः । ऊर्क्पशवः । ऊर्जैवास्मा ऊर्जं पशूनाप्नोत्यूर्जोवरुध्या'' इति वाक्यमुदाहृत्य अत्र ''ऊर्जोवरुध्या'' इत्येतदौदुम्बरतायाः फलसमर्पकमुतार्थवाद इति संशये ऊर्जोवरुध्या इति तादर्थ्यचतुर्थी श्रुत्योर्क्शब्दितानां पशूनां साध्यत्वावगमात् साध्यस्य साधनापेक्षत्वात्सन्निहितमौदुम्बरत्वमसत्यपि विधौ साधनमेवेति फलसमर्पकमेतदिति प्राप्ते विध्यभाव उदुम्बरताभवनाक्षिप्तभावनां प्रति सन्निहितत्वेन तस्या एव भाव्यत्वात् फलस्य विप्रकृष्टत्वेनाभाव्यत्वात् तस्यार्थवादत्वमुपेत्यैव विधेरुन्नेयत्वेनार्थवाद एव न फलसमर्पकमूर्जोवरुध्या इत्येतदिति सिद्धान्तितम् । तथाचतुर्थे ''द्रव्यसंस्कारकर्मसु परार्थत्वात्फलश्रुतिरर्थवाद'' इति तृतीयपादीयाद्याधिकरणे ''यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोती''त्युदाहृत्य पर्णमयीत्वं क्रत्वर्थमुत पुरुषार्थमथोभयार्थमिति सन्दिह्य फलश्रवणात्पुरुषार्थमेव । यद्वा क्रत्वर्थजुह्वनुवादेन विधानात्क्रत्वर्थफलश्रवणात्पुरुषार्थं चेति दध्यादिवदुभयार्थमिति द्वेधा पूर्वपक्षयित्वा संयोगपृथक्त्वाभावेन दध्यादिवदुभयार्थत्वाभावात् शृणोतीति वर्तमानापदेशेनापापश्लोकश्रवणस्य साध्यत्वाप्रतीतेः पुरुषार्थत्वस्याप्य-योगात्क्रत्वर्थमेव । अपापश्लोकाश्रवणं त्वर्थवाद इति सिद्धान्तितम् । अत्रोभयत्राप्यूर्जोवरुध्यै न सपापमित्यनयोरर्थवादत्वनिर्णयाविशेषेपि औदुम्बराधिकरण उदुम्बरताया विध्यभावेन साधनत्वाभावमूलकोऽर्थवादत्वनिर्णयः पर्णमय्यधिकरणे त्वपापश्लोकश्रवणस्य वर्तमानापदेशेन साध्यत्वाभावमूलक इति अवान्तरनिर्णयभेदादधिकरणभेदस्तथेत्यर्थः । ऊर्जं पशूनाप्नोतीत्ये-तदूर्जोऽवरुध्या इत्यस्योपलक्षणार्थम् । यद्वा भाष्यवार्तिकादौ शाखान्तरवाक्योक्त्या विचारकरणेपि प्रसिद्धशाखायामाप्नोतीत्यन्तवाक्यश्रवणेन तस्य शृणोतीत्यन्तवाक्येन तुल्यविचारत्वमावश्यकमिति दर्शयितुमाप्नोतीत्यन्तमुक्तम् । आक्षिप्तां प्रयोजनोक्तिमुप-पाद्योपसंहरति ॥ तस्मादिति ॥ अन्यत्रापीति ॥ अन्तराद्यधिकरणेष्वित्यर्थः ॥ उपपादितं चैतत्तत्र तत्र । उपपादयिष्यते चोत्तरत्रापि ।

पाण्डुरङ्गि – ॥ वैपरीत्यादिति ॥ बहुत्वाभावात् श्रुत्यननुगृहीतत्वात्सा-क्षाद्विष्णुविशेषणत्वाश्रवणाच्चेति विपरीतत्वादित्यर्थः । अस्तु वाऽत्रत्यप्राणशब्दस्य मुख्यप्राणपरत्वे तद्वैत्वमित्यत्रापि प्राणस्य मुख्यत्वमेवेतिवत् तद्वैत्वमित्यत्र

(पाण्डुरङ्गि)

श्रीपतित्वादिलिङ्गेन प्राणशब्दस्य विष्णुपरत्व ऐतरेयेऽपि प्राणशब्दस्य विष्णुपरत्वमिति वैपरीत्यम् । तथापि न दोषः । न चैवं पूर्वोक्तः प्राणो मुख्य एवेत्याक्षेपानुपपत्तिः । शङ्कामात्रेणापि विष्णुपरत्वनिश्चयाक्षेपसम्भवादित्याह ॥ पूर्वस्येति ॥ यद्वा अनुवाकद्वयस्योक्तरीत्यैकवाक्यत्वाल्लिङ्गानामपि निरवकाशत्वात्कथं वैपरीत्यमित्याशङ्क्याभ्युपगमवादेनाह ॥ पूर्वस्येति ॥ टीकायामिति ॥ तस्य विष्णोरन्यत्वे प्राचीनोप्यन्य इति शङ्का स्यादिति सङ्गतिटीकायामित्यर्थः । ननु अत एव प्राणः प्राणस्तथानुगमादित्यधिकरणद्वयेन प्राणस्य विष्णुत्वं निर्णेयम् । तच्चैकमेवेति कथमधिकरणभेदः । न च निर्णेयस्यैकत्वेपि न्यायभेदाद्भेदः । निर्णयस्यानेकन्यायसाध्यत्वमात्रेणाधिकरणभेदे आनन्दमयस्य ब्रह्मत्वनिर्णयस्य ब्रह्मशब्दाभ्यासतद्धेतुव्यपदेशमांत्रवर्णिकगानादिरूपानेकन्यायसाध्यत्वेन तत्राप्यधिकरणभेदः स्यादित्यत आह ॥ एकस्येति ॥ अत्रैव पूर्वतन्त्र- सम्प्रतिपन्नदृष्टान्तमाह ॥ यथेति ॥

तात्पर्यचन्द्रिका

एवं च ''अत एव प्राण'' इत्यत्र तैत्तिरीयस्थप्राणशब्दसमन्वय उक्तेपि अत्र पूर्वपक्षे ऐतरेयवाक्यस्थप्राणस्याविष्णुत्वेन तैत्तिरीयस्थस्यापि विष्णुत्वाक्षेपादुभयत्र प्रसिद्धत्वाभावः प्राणशब्दस्य । ''आकाशोर्थान्तरत्वादिव्यपदेशा''दित्यत्र तु ''आकाशस्तल्लिङ्गा''दित्यत्रोक्तस्य ''आकाश इति होवाचे''ति वाक्यस्थाकाशशब्दो ब्रह्मपर इत्यस्यानाक्षेपादुभयत्र प्रसिद्धित्वम् । अत एव तत्र टीकायां पादान्तरस्थं ''तल्लिङ्गा''दित्यधिकरणमनाक्षिप्यैकपादस्थं द्युभ्वाद्यधिकरणमेवाक्षिप्तम् । नन्वेवं सति ''ज्योतिर्दर्शना''दित्यत्र टीकायां तच्च ज्योतिर्यदि विष्णोरन्यत्तदा ज्योतिश्चरणाभिधानादिति पूर्वोक्तमप्यन्यत्स्यादित्युक्तत्वादग्निसूक्तेपि ज्योतिश्शब्दस्य पूर्वपक्षे विष्णुपरत्वाभावादुभयत्र प्रसिद्धत्वाभावात्तस्य तृतीयपादसङ्गतिर्न स्यादिति चेन्मैवम्। न हि ज्योतिर्दर्शनादित्यत्र ज्योतिर्वह्निरिति पूर्वः पक्षः । येन वह्नौ प्रसिद्धेः स्वतस्सिद्धत्वेनान्यत्र प्रसिद्धता । उभयत्रप्रसिद्धतातु क्वचिद्विष्णुपरत्वेन साध्या स्यात् । किन्तु जीव इति पूर्वः पक्षः । न च जीवे स्वतः प्रसिद्धिरस्ति । ज्ञानात्मकत्वात्तु जीवे प्रवृत्तिः । तच्च जीववदीश्वरेप्यस्तीत्युभयत्र प्रसिद्धता ज्योतिर्दर्शनादित्यत्र । ''ज्योतिश्चरणे''त्यत्र तु वह्निरिति पूर्वपक्षितत्वादन्यत्र प्रसिद्धता । ''कारणत्वेने''त्यत्र ''ज्योतिरुपक्रमा''दित्यत्र च पूर्वपक्षे पूर्वोक्ताया

आकाशज्योतिश्शब्दयोर्विष्णुपरताया अनाक्षेपेपि तत्र प्रागनुक्तसमन्वयस्यावान्तरकारणत्वरूपस्य लिङ्गस्यौषध्यादिनाम्नो ज्योतिष्टोमवसन्तादिशब्दस्य च समन्वयोक्तेर्न तयोरुभयत्र प्रसिद्धपादान्तर्भावप्रसङ्गः । यद्वा प्राणादिशब्दानां प्राक्समन्वयोक्तावपि लोकसिद्ध्याऽन्यत्र प्रसिद्ध्यान्यत्र प्रसिद्धता । आकाशोऽर्थान्तरेत्यत्र त्वाकाशशब्दस्य न पूर्वं समन्वयोक्त्योभयत्र प्रसिद्धता । किन्तु वैनामेति निपातद्योतितप्रसिद्धिव्यावर्त्यत्वेन पूर्वपक्षिणाप्यप्रसिद्धस्य ब्रह्मरूपस्याकाशशब्दवाच्यस्याङ्गीकृतत्वेनेति ज्ञेयम् । तस्मात्पादसङ्गतिः पूर्वपक्षोदयश्च ॥

प्रकाशिका – नन्वन्यदेव किञ्चित्प्रयोजनमुच्यतां किं पूर्वोक्तप्राणाक्षेपोपपादनक्लेशेनेत्यतोऽवश्यं चैतत् अन्यथा तृतीयपादे समन्वीयमानाकाशशब्दस्येव पूर्वोक्तन्यायान्यत्रप्रसिद्धिभ्यां प्राणशब्दस्योभयत्र प्रसिद्धत्वापत्त्याऽस्याधिकरणस्यैतत्पादासङ्गत्यापत्तेरित्याह ॥ एवं चेति ॥ यद्वा प्रयोजनोक्तिं समर्थ्येदानीं पूर्वोक्त्यन्यत्रप्रसिद्धिभ्यामाकाशशब्द इवात्राप्युभयत्रप्रसिद्धत्वापत्त्याऽत्रासङ्गतिमाशङ्क्य च पादसङ्गतिं साधयति ॥ एवं चेति ॥ एवमाक्षेपे उभयत्रसिद्धता नेत्येतद्व्यतिरेकमुखेनाह ॥ आकाश इति ॥ अत एवेति ॥ उभयत्रप्रसिद्धार्थत्वलाभादेवेत्यर्थः । अन्यथाऽयमाकाशोऽन्यश्चेत्प्रागुक्तोऽन्यस्स्यादित्येवोच्येत। ''स च विष्णोरितरश्चेत्सर्वाधारत्वमप्यन्यस्य प्रसज्यत'' इति नोच्येतेति भावः । पादान्तरेति एकेतिच हेत्वन्तरम् । यद्येवं प्राणशब्दस्योभयत्रप्रसिद्धत्वाभावस्तर्हि ज्योतिश्शब्दस्याप्युक्तन्यायेन तदभावापत्त्या तृतीये निवेशो न स्यादित्याशङ्कते ॥ नन्वेवमिति ॥ तृतीयेति ॥ आद्य एव स्यादित्यर्थः । तत्र पूर्वोक्त्यन्यत्रप्रसिद्धिभ्यां नोभयसाधारण्यम् । किन्तु प्रवृत्तिहेतुसाधारण्याश्रयेण । अतः पूर्वोक्ताक्षेपेऽपि न क्षतिरिति समाधत्ते ॥ मैवमिति ॥ एवं तर्हि कथमाद्ये ज्योतिश्शब्दसमन्वय इत्यत आह ॥ ज्योतिश्चरणेति ॥ तत्र लोकत एव प्रसिद्धिसत्वादिति भावः । ननु यदि प्रागुक्तानाक्षेपेणाकाशोर्थान्तरेत्यत्रोभयत्रप्रसिद्धता तर्हि चतुर्थपादे समन्वीयमानयोः ''कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः ज्योतिरुपक्रमा''दित्याकाशज्योतिश्शब्दयोरुभयत्रप्रसिद्धता स्यादित्यत आह ॥ कारणत्वेनेति ॥ लिङ्गस्येति ॥ अवान्तरं कारणं चेत्यणुभाष्योक्तेरिति भावः ॥ ओषधीति ॥ ''पृथिव्या ओषधय'' इत्यपि श्रवणादिति भावः ॥ ज्योतिष्टोमेति ॥ यागकालादिवाचिन इत्यर्थः । ननु पूर्वोक्त्यन्यत्रप्रसिद्धिभ्यामुभयत्र

सिद्धत्वम् । तच्चात्र प्राणशब्दे नास्ति । पूर्वोक्तेराक्षेपादित्युक्तमयुक्तम् । अयं प्राणोऽन्यश्चे-
प्राचीनोऽप्यन्य एव न विष्णुरित्याक्षेपायोगेन प्राचीनोन्यो वा विष्णुर्वेति शङ्कामात्रत्वात्
स्य चोभयत्र प्रसिद्ध्यविरोधात्स्यादेव तथात्वं प्राणशब्दस्येत्याशङ्क्य पक्षान्तरमाह ॥
द्धेति ॥ ज्योतिश्शब्देपि प्रवृत्तिहेतुसाधारण्यस्य पूर्वपक्षिणोऽभिमतत्वादिति भावः ॥
नामेति ॥ नामरूपनिर्वहिता प्रसिद्धाकाश इत्युक्तौ न त्वन्योऽप्रसिद्धाकाश इति गम्यते । न
तदनङ्गीकारे प्रसिद्धाकाश एव तन्निर्वहितेत्युक्तिर्युज्यत इत्यर्थः । चशब्दात्प्रयोजनं च ।
ज्यत इति शेषः ।

पाण्डुरङ्गि – ननु तद्वैत्वं प्राण इत्यत्र प्राणस्य विष्णुत्वमङ्गीकृत्यैतरेयेऽन्यलिङ्गे-
न्यपरत्वमित्येवं पूर्वपक्षसम्भवे किमर्थं तदाक्षेपो वर्ण्यत इत्यत आह ॥ एवं चेत्यादि ॥
न्यथोभयत्र प्रसिद्ध्यापत्त्या पादासङ्गत्यापातादिति भावः । नन्वेवं कारणत्वेनेत्या-
वधिकसमन्वयेपि साक्षात्सूत्रोपात्तज्योतिश्शब्दांश उभयत्रप्रसिद्धता स्यादित्यत आह ॥
देति ॥ नन्वाकाशशब्दसमन्वयस्यापि विरोधिसर्वबाहुल्यकारणस्त्रीनिषेधिनामित्याद्युक्त-
त्या कारणत्वेनेत्यत्राङ्गीकारात्कथमेतत् । किं च ज्योतिर्दर्शनादित्यत्रेवात्रापि पूर्वोक्तन्यायेन
णशब्दप्रवृत्तिनिमित्तसाधारण्येनास्तूभयत्र प्रसिद्धता । प्रसङ्गादित्यतो वाह ॥ यद्वेति ॥
दसङ्गतिरिति ॥ उपलक्षणं चैतत् । प्रयोजनोक्तिश्चेत्यपि द्रष्टव्यम् ॥

तात्पर्यचन्द्रिका

॥ सिद्धान्तस्तु ॥ ''तं देवाः प्राणयन्ते''ति देवोपदेश्यत्वं ''तं भूतिरिति देवा
सास्रक्रिर'' इति भूतित्वेन देवोपास्यत्वं ''सर्वे वेदा'' इति सर्ववेदप्रतिपाद्यत्वं
ाणो ह्येष य एष तपती''ति सूर्यमण्डलस्थत्वं ''प्राणस्त्वं प्राणः सर्वाणि
ानि'' इति सर्वान्तर्यामित्वं ''सर्वाणि भूतान्यापिपीलिकाभ्यः प्राणेन बृहत्या
ब्धानी''ति सर्वव्यापित्वमित्यादीनि प्राणे श्रूयन्ते । तानि च ''विष्णुमेवा-
न्देवा'' इत्यादिभाष्योक्तस्मृत्या ''सर्वे वेदा यत्पदमामनन्ति । य एषोन्तरादित्ये
ण्मयः पुरुषो दृश्यते तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी । पुरुष एवेदं
म्। अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणस्स्थित'' इत्यादिश्रुतिभिः ''वेदैश्च
रहमेव वेद्यः । ध्येयस्सदा सवितृमण्डलमध्यवर्ती । तपाम्यहमहं वर्षम् ।

विष्टभ्याहमिदं कृत्स्न''मित्यादिस्मृतिभिश्च विष्णावेव । परकीयश्रुत्यादिकं तु सावकाशम् । तथाहि । इन्द्रस्य प्रसिद्धेन्द्रत्वेपि तत्प्रयुक्तोऽहंशब्दस्तावत् ''अहं मनु''रिति वामदेवप्रयुक्ताहंशब्दवत् श्रुतितुल्यया निरूढया लक्षणया

सर्वान्तर्यामिको विष्णुः सर्वनाम्नाऽभिधीयते ।
एषोऽहं त्वमसौ चेति न तु सर्वस्वरूपतः ॥

इत्यादिस्मृतिभिर्मुख्यवृत्त्या वाऽन्तर्यामिपरः । न च तत्रापि विवादः । विशिष्टस्य वामदेवस्य मन्वादित्वाभावात् । अहंमन्वादिशब्दैश्चैतन्यमात्रलक्षणा चेत्प्राण इन्द्र इति पूर्वपक्षे इन्द्रशब्देन विशिष्टोक्तौ विशिष्टेन्द्राभिन्नस्य प्राणस्य ''प्राणस्त्वं प्राणः सर्वाणी''ति सार्वात्म्योक्तिरयुक्ता स्यात् । इन्द्रशब्देन शुद्धोक्तौ तु प्राणस्य शुद्धब्रह्मत्वेन प्राणो न ब्रह्मेति पूर्वपक्षायोगः ''प्राणो ह्येष य एष तपती''ति पूर्ववाक्यायोगश्च । न हि चिन्मात्रं तापकम् । यद्यपि ''अ इति ब्रह्म तत्रागत-महमिति तस्योपनिषदहमिति । ततोहं नामाभव''दित्यादि श्रुतेः । ''न वा अहमिमं विजानातीति । अहं तत्तेजो रश्मीन्नारायणं पुरुषं जातमग्रतः'' इत्यादिश्रौतप्रयोगात् ''अहेयत्वादहं नामे''त्यादिस्मृतेश्चाहंशब्दोऽहेयत्वाद्यर्थेऽप्यस्ति। न वा इत्यादि-श्रुतावहंशब्दस्यास्मच्छब्दत्वे विजानामीति स्यात् । ''भूरिति शिर'' इत्यादि-नाऽक्षिस्थो भगवान्हि तत्राहंशब्दः । तथापीह प्राणे ''प्राणो वा अहमस्मी''त्युत्त-मपुरुषश्रवणादन्तर्यामिपरतैवोक्ता । चक्षुरादिसाहचर्यं तु सति संशये निर्णायकम् । उक्तं हि ''विशये प्रायदर्शना''दिति । अत्र तूक्तलिङ्गादिना निश्चयान्न संशयः । प्राणसंवादोपि ''त्वमुक्थमसि त्वमिदं सर्वमसि तव वयं स्म'' इत्युत्कर्षपर्य-वसायित्वादन्तर्यामिणि विष्णौ युक्तः । एवं च -

प्राणलिङ्गादिकं यद्यप्यवकाशोज्झितं स्वतः ।
तथाप्यंतर्यामिगततया नेतुं हि शक्यते ॥ १ ॥

''उदासी(नवदास्तांतौ) नौ हि तावास्तां केशवश्चाब्जसम्भव'' इत्यौदासीन्यं तु बाह्यरूपेण । दुःखित्वादिकं त्वंतर्यामिणि बाधितम् । ''शतं वर्षाण्यभ्यार्च''दिति

(तात्पर्यचन्द्रिका)

यच्छतसंवत्सरपर्यंतं प्राणस्य जीवशरीरेऽवस्थानं न तज्जीवलिङ्गम् । किन्तु ''तस्माच्छतं वर्षाणि पुरुषायुषो भवन्ति'' इति तद्धेतुकं शतायुष्त्वम् । तच्च न प्राणे श्रुतम् । तस्मात्

बहुत्वात् श्रुतिसाहित्यादवकाशोज्झितत्वतः ।
बलवद्भिर्विष्णुलिङ्गैः प्राणश्रुत्यादि नीयते ॥ १ ॥

तदेतदभिप्रेत्योक्तं न्यायविवरणे ''न चानन्यथासिद्धत्वमन्यत्र श्रुतिलिङ्गादेः । अन्यगतलिङ्गादीनामपि तद्गतभगवद्रूपापेक्षया युक्ते''रिति ।

प्रकाशिका – एवं निरवकाशलिङ्गादिभिः पूर्वपक्षे कृते ततोपि प्रबलनिरवकाशविष्णु-लिङ्गादिबाहुल्येन सिद्धान्तोत्थितिमाह ॥ सिद्धान्तस्त्विति ॥ तं प्राणं देवाः शिष्यादिषु सम्यङ्नीतवन्त इत्यर्थः । ''स एषोसुः स एष प्राणः स एष भूतिश्चाभूतिश्च तं भूतिरिति देवा उपासांचक्रिरे'' इत्यत्र देवोपास्यत्वम् । ''सर्वे वेदास्सर्वे घोषा एकैव व्याहृतिः प्राण एवे''त्यत्र सर्ववेदोक्तत्वमित्यर्थः ॥ इत्यादीनीति ॥ लिङ्गानीति शेषः । उपलक्षणमेतत् । ''ब्रह्मेमं पुरुषं उदरं ब्रह्मे''त्यादिब्रह्मशब्दाभ्यासोपि ध्येयः । ननु पूर्वपक्षेपि लिङ्गबाहुल्यसत्त्वात्कथं निर्णय इत्यतस्तानि सावकाशयिष्यन्निरवकाशत्वमेषां साधयति ॥ तानि चेति ॥

विष्णुमेवानयन्देवा विष्णुं भूतिमुपासते ।
स एव सर्ववेदोक्तस्तद्रथो देह उच्यत ॥

इति स्कान्दवचनेनेत्यर्थः ।

सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति ।
यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं सङ्ग्रहेण ब्रवीमि ॥

इत्युपक्रम्य ''तद्विष्णोः परमं पद''मिति काठकोक्तेस्सर्ववेदोक्तत्वस्य विष्णोरवगम इत्यर्थः । सूर्यमण्डलस्थत्वं विष्ण्वेकनिष्ठमित्याह ॥ य एष इति ॥ छान्दोग्ये आदित्यांतर्हि-रण्मयपुरुषमभिधाय तस्य पुण्डरीकाक्षत्वलिङ्गोक्त्या विष्णुत्वावगतिरित्यर्थः । विस्तृतं चैतदन्तरित्यत्रास्माभिः । सर्वव्यापित्वस्य विष्णुगतत्वे वाक्यद्वयमाह ॥ पुरुष इति ॥ ''पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यं'' इति पुरुषसूक्ते सहस्रशीर्षत्वादिना प्रकृतस्य विष्णोरेव सर्वव्यापित्वमुच्यते । पुरुषसूक्तं च विष्णुपरमिति ''तस्मिन्काले महाराजे''त्यादिना

प्रसिद्धमित्यर्थः ॥ अन्तर्बहिरिति ॥ नारायणोपनिषदि । आदिपदेन ''सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति । यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं संग्रहेण ब्रवीम्योमित्येतत् । एतद्ध्येवाक्षरं ब्रह्म एतद्ध्येवाक्षरं परम् । एतद्ध्येवाक्षरं ज्ञात्वा यो यदिच्छति तस्य तत् । एतदालम्बनं श्रेष्ठमेतदालम्बनं परम् । एतदालम्बनं ज्ञात्वा ब्रह्मलोके महीयते ॥ यः सर्वज्ञः सर्ववित् यस्यैषा महिमा भुवि । दिव्ये ब्रह्मपुरे ह्येष व्योम्न्यात्मा प्रतिष्ठितः । मनोमयः प्राणशरीरनेता प्रतिष्ठितोऽन्ने हृदयं सन्निधाय । तद्विज्ञानेन परिपश्यन्ति धीरा आनन्दरूपममृतं यद्विभाति ॥ एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च । खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी ॥ अग्निर्मूर्धा चक्षुषी चन्द्रसूर्यौ दिशः श्रोत्रे वाग्विवृताश्च वेदाः । वायुः प्राणो हृदयं विश्वमस्य पद्भ्यां पृथिवी ह्येष सर्वभूतान्तरात्मा ॥ अतः समुद्रा गिरयश्च सर्वेऽस्मात्स्यन्दन्ते सिन्धवः सर्वरूपाः । अतश्च सर्वा ओषधयो रसश्च येनैष भूतैस्तिष्ठते ह्यन्तरात्मा ॥ पुरुष एवेदं विश्वं कर्म तपो ब्रह्म परामृतम् । एतद्यो वेद निहितं गुहायां सोऽविद्याग्रन्थिं विकिरतीह सोम्य ॥ स एवाधस्तात्स उपरिष्टात्स पश्चात्स पुरस्तात्स दक्षिणतः स उत्तरतः । स एवेदं सर्वमिति । अथात्मैवेदं सर्वमिति । आत्मैवेदं सर्वमिति ॥ आत्मा ह्येवैषां स भवति । आत्मा हि परमानन्दः । सर्वं ह्येवैषोऽश्नुते । सर्वं ह्येवैषोऽश्नुते ॥ य एवं वेद ॥ इति ॥'' इत्यादिना प्रसिद्धेन ''यस्सुप्रमाणा ब्राह्मं ज्ञानं परमं त्वेकमेव । य आदित्ये तिष्ठन् सर्वं खल्विदं ब्रह्मे''त्यादि गृह्यते । ''वेदैश्च सर्वैरहमेव वेद्यो वेदान्तकृद्वेदविदेव चाह''मिति गीतावाक्येन ''ध्येयः सदे''ति नारसिंहपुराणवाक्येन ''तपाम्यहमहं वर्षं निगृह्णाम्युत्सृजामि चे''त्यादि ''विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जग''दित्यादिगीतावचनेन च विष्णोरेव तानि लिङ्गानीत्यर्थः । तथाच प्राणो विष्णुरेव । तल्लिङ्गानामत्रानुगमादिति सूत्रार्थ उक्तो भवति । ननु पूर्वपक्षलिङ्गान्यपि निरवकाशानीत्युक्तमित्यतश्शास्त्रदृष्टिसूत्रतात्पर्यमाह ॥ परकीयेति ॥ प्रसिद्धेति ॥ वृत्रहंतृत्वादेर्निरवकाशत्वादिति भावः । ''तमिन्द्र उवाच प्राणो वा अहमस्म्यृषे'' इतीन्द्रेण प्रयुक्तोहंशब्दोंऽतर्यामिपर इत्यन्वयः । लक्षणायां किं प्रयोजनमित्यतो मञ्चाः क्रोशन्तीत्यादौ मञ्चस्थपुरुषाभिप्रायेण मञ्चपदप्रयोगवन्निरूढत्वेन प्रयोजनानपेक्षणादिति भावेनोक्तं ॥ निरूढेति ॥ लक्षणैव दोष इत्यत उक्तं श्रुतीति ॥ सर्वांतर्यामिक इति ॥ आनन्दमयाधिकरणभाष्योदाहृतस्मृत्या ''तत्तन्नाम्नोच्यते विष्णुस्सर्वशास्तृत्वहेतुत'' इत्येतद्भाष्योक्ताभिः स्मृत्यादिभिश्चेत्यर्थः ।

ननु वामदेववदित्ययुक्तम् । तत्प्रयुक्ताहंशब्दस्यान्तर्यामिपरत्वासिद्धेरित्याशङ्क्याद्याध्यायबृहद्भाष्यदिशा साधयति ॥ न च तत्रेति ॥ वामदेवप्रयुक्ताहंशब्दस्यान्तर्यामिपरत्वाभावे तस्यैव मन्वादिभिरैक्यं वाच्यम् । तच्च किं मुख्यतो विशिष्टस्यैवोत चिन्मात्रलक्षणया विशेष्यस्य । आद्यं निरस्यति ॥ विशिष्टस्येति ॥ द्वितीयं शङ्कते ॥ अहमिति ॥ यदि लक्षणया विशेष्यैक्यं तर्हि दार्ष्टान्तिके इन्द्रप्रयुक्ताहंशब्दसामानाधिकरण्यात्प्राण इन्द्र इति पक्षे इन्द्रपदेन विशिष्टं लक्षणया विशेष्यमात्रं वा । आद्ये विशिष्टैक्यस्यानङ्गीकारेण विशिष्टेन्द्रात्मकस्य प्राणस्य सर्वाभेदोक्त्ययोगः । द्वितीये प्राणो न ब्रह्मेत्युक्त्ययोग इति पूर्वपक्षिणं प्रत्यनिष्टमाह ॥ प्राण इन्द्र इतीति ॥ विशेष्यैक्यमात्रमङ्गीकुर्वतः पूर्ववादिनस्तव पक्ष इत्यर्थः । ''न हि मनुसूर्यादिर्भवति वामदेवस्तत्पक्षेपी''त्यैतरेयभाष्ये दृष्टान्तेऽभिहितदोषं दार्ष्टान्तिकेऽप्याह ॥ इति सार्वात्म्येति ॥ इति पूर्ववाक्यायोग इत्युपलक्षणम् । ''अत्र च ''अहं भूमिमददामार्याये''त्यादिना प्रवृत्तिरेवोच्यते । न हि वामदेवेन मन्वादिकर्म क्रियते कदापी''त्याद्यैतरेयभाष्योक्तं च ग्राह्यम् । नन्वहंशब्दस्यान्तर्याम्यर्थकत्वमनुक्त्वैव प्रयोगबाहुल्येन विष्णावेव मुख्यत्वमुपेत्य विष्णुर्ब्रह्मेतिवत् अहं सर्वैरप्यहेयः परमात्मा प्राण इतीन्द्रेणोक्तमित्यपि समाधातुं शक्यत्वात्सूत्रादावंतर्यामिपरत्ववर्णनं किमर्थमित्याक्षिपति ॥ यद्यपीति ॥ तत्र ब्रह्मणि अहमिति पदं वाचकतयाऽवगतमित्यर्थः । उपनिषत् रहस्यं नामेत्यर्थः । रूढिमुक्त्वा योगं चाह ॥ अहेयत्वादिति ॥

(प्रकाशिका)

अहेयत्वादहं नामाऽस्म्यसनान्मनुतेरपि ।
ततो वेत्तीति च त्वं स पूर्णत्वात्सर्वनामकः ॥

इति ब्रह्माण्डवचनात् ''अहं नामा हरिर्नित्यमहेयत्वात्प्रकीर्तित'' इत्यादिश्रुतिश्चेत्यपि ध्येयम् । ननु ''न वा अरे अहमिमं विजानाती''ति मैत्रेयीं प्रति याज्ञवल्क्योक्ते वाक्येऽहं-शब्दस्याहेयत्वार्थत्वं कुत इत्यत आह ॥ न वा इतीति ॥ उत्तमेति ॥ अन्यथा प्राणो वा अहमस्तीति श्रूयेतेति भावः । ननु नेदमुत्तमपुरुषस्य रूपम् । किन्तु ''असनान्मनुतेरस्मी''त्यैतरेयभाष्यदिशाऽर्थान्तरपरमेवेतिचेत्सत्यम् । अस्मीत्यस्योत्तम-पुरुषत्वाहानेनैवैतद्भाष्यदिशा वाक्यमर्यादयाऽर्थान्तरवर्णनमेतदिति ध्येयम् । ननूक्तमत्राहं-शब्दस्यान्तर्यामिणि मुख्यत्वे ''तदात्मानमेवावेदहं ब्रह्मास्मी''त्यादावपि वाजसनेये तथा स्यादितीति चेन्न । तत्र बाधेनान्तर्याम्यर्थत्वास्वीकारादिति भावः ।

एवमिन्द्रप्रापकं विष्णौ सावकाशमिति समर्थ्य वायुलिङ्गान्यपि तथेत्याह ॥ चक्षुरिति ॥ यदुक्तं गोदोहनसाहचर्याद्वत्सालंभनं गुणकर्मेतिवदप्रधानसाहचर्यात्प्राणोऽप्रधान इति तन्न । वैषम्यात् । प्राणो विष्णुरन्यो वेति संशये सत्येव साहचर्यस्य निर्णायकत्वादिह च निरवकाशविष्णुलिङ्गादिना निर्णयसम्भवान्नायं तन्न्यायस्य विषय इत्यर्थः ॥ विशय इति ॥ संशये सति प्रायशब्दित- साहचर्यदर्शनान्निर्णय इत्येव जैमिन्याचार्यैरुक्तमित्यर्थः । हिशब्देन मीमांसकसंमतिमाह । त्वमुक्थमसि । अस्माकमुत्थापकोऽसि । अस्य सर्वस्य त्वमेवेशोऽसि । वयं तव दासास्स्मः । त्वमस्माकं स्वाम्यसीत्युत्तरवाक्यस्योत्कर्षपर्यवसायित्वात् स्वस्योत्तम-ताप्रकाशनायैव निकृष्टैस्तेष्वन्तः स्थित्वा संवादमकरोदित्यर्थः । एतेन ''लिङ्गानां तदन्तर्यामिभगवद्विषयतयोपपत्ते''रिति टीका विवृता । ननु विष्णोस्संवादादिवेलाया-मौदासीन्यावगतेः कथं संवादकर्तृत्वमन्तर्यामितयाऽपीत्यत आह ॥ उदासीनवदिति ॥ यथोक्तं तृतीयस्कन्धतात्पर्ये सप्तविंशेऽध्याये-

यज्ञान्तस्थस्स्वयं पादौ विशन्नोत्थापयद्धरिः ।
शक्तोपि ब्रह्मवाय्वोस्तु बलज्ञस्यै जनार्दनः ।
तत्स्थ उत्थापयामास ब्रह्मदेहं विशन्प्रभुः ॥

इति । अन्तर्यामिभिन्नप्रपदद्वारा प्रविष्टरूपाभिप्रायम् । नत्वंतर्यामिरूपविषयम् । ''न ऋते त्वत्क्रियते'' इत्यादिवचनविरोधादित्यर्थः । ननु कथं चतुर्मुखस्य देहधारणादावौदासीन्योक्तिः । अष्टमे बृहदारण्यकभाष्ये -

प्राणं विना न च ब्रह्मा तं विना प्राण एव च ।
अन्योन्यापाश्रयाच्छक्तौ स्थातुमन्ये कुतस्ततः॥

इत्यादिवामनस्मृत्या प्राणस्योत्क्रमणे सति ब्रह्मणोऽवस्थान एव शक्त्यभावोक्तेरिति । मैवम् । अंशेन प्राणेन सहनिर्गतस्याप्यंशेन देहेऽवस्थानसम्भवात् । औदासीन्यस्य सुस्थर्थत्वोपपत्तेः । यथोक्तं तृतीयस्कन्धतात्पर्ये तत्रैव -

अंशेन सुप्तो ब्रह्मा तु त्वंशेन निरगात्तथा ।
स्वदेहाद्वायुसहितो विष्णुना च जगत्प्रभुः ।
तमुत्थापयितुं देवास्तानृते त्रीन् महाबलान् ।
नाशक्नुवन्नेकसंस्थास्ततस्तत्राविशंस्त्रयः ।
उदतिष्ठद्ब्रह्मदेहस्तदा तेषां प्रभावतः ॥

इति । नन्वेवं जीवगतदुःखसमवायित्वमपि स्यादित्युक्तमित्यत आह ॥ दुःखित्वेति ॥ न हि जातिः पदार्थ इति मते घटो नित्य इत्यनित्यत्वं जातावन्वेतीति भावः । इदानीं जीवप्रापकमन्यथयति ॥ शतमिति ॥ इमं लोकमित्यस्यार्थो जीवशरीर इति ॥ तद्धेतुकं प्राणस्य शतवर्षपर्यंतं शरीरेऽवस्थाननिमित्तकमित्यर्थः । सिद्धान्तमुपसंहरन् सङ्गृह्णाति ॥ तस्मादिति ॥ ब्रह्मश्रुतिसाहित्यादित्यर्थः । इयता प्रपञ्चितमन्यलिङ्गानां निरवकाशत्वमुपेत्य पूर्वपक्षकरणं सिद्धान्ते च विष्णुलिङ्गानां निरवकाशत्वमन्यलिङ्गानां विष्णुनिष्ठत्वं च टीकोक्तमाचार्यवाक्यारूढं करोति ॥ तदेतदिति ॥ अन्यत्र भगवतोऽन्यविषयस्य श्रुत्यादेः । अनन्यथासिद्धत्वं निरवकाशत्वम् । आदिपदेन प्राणो वा अहमस्मीति वाक्यं गृह्यते । इति न च वाच्यमित्यर्थः । कुत एतदित्यत उक्तं ॥ अन्यगतेति । इन्द्रादिगतानामप्यहंशब्दादीनां मुख्यतस्तदन्तर्यामिभगवत्सम्बन्धित्वात्तदपेक्षया सावकाशत्वादिति । प्राक् श्रुतिलिङ्गादेरित्युक्तम् । तदेतत्प्राबल्यापेक्षया । इदानीं लिङ्गादीनामिति वचनं लिङ्गनिरवकाशतयैव श्रुत्यादिनिरवकाशतापूर्वपक्षसूचनार्थम् । अत एव पूर्वं श्रुतेस्सावकाशत्वमाशङ्क्य वृत्रहंतृत्वादिलिङ्गवशेनैव श्रुतिरुज्जीवितेति ध्येयम् ।

पाण्डुरङ्गि – सर्वव्यापित्वमित्यादीनीत्यत्रादिपदेन देहरथित्वपरामर्शः ॥ श्रुतितुल्ययेति ॥ तथाचेश्वरप्रयुक्तोऽहंशब्दो मुख्यार्थ एवेति भावः । नन्वहंशब्देनान्तर्यामिणो लक्षणा नोपपद्यते । प्रयोजनाभावादित्यतोऽनिरूढलक्षणायामेव तदपेक्षा न तु निरूढलक्षणायामपि । इयं च निरूढलक्षणेत्याह ॥ निरूढयेति ॥ तत्र हेतुः श्रुतितुल्यतयेति ॥ नन्वेतदयुक्तम् ।

(पाण्डुरङ्गि)

सर्वेषां शब्दानामन्तर्यामिणि मुख्यत्वादहंशब्दस्य तत्र मुख्यत्वस्यैव सत्त्वेन लक्षणया तत्परत्वस्यासम्भवादित्यरुचेराह ॥ सर्वान्तर्यामिक इत्यादिना ॥ मुख्यवृत्त्या वेति ॥ तथा चाक्षादिशब्दवन्नानार्थत्वस्य वक्ष्यमाणश्रौतानुशासनादिसिद्धत्वान्नोक्त दोष इति भावः । अद्वैतिमते स्थित्वा शङ्कते ॥ अहमिति ॥ इन्द्रशब्देन विशिष्टोक्ताविति ॥ अनेन किमत्र साक्षादैक्यमुच्यते लक्षणया वेत्यादिटीकावाक्यं दार्ष्टान्तिकपरतया योजितं भवति । अन्यथा दृष्टान्तवाक्ये विशिष्टचैतन्यैक्यपक्षयोर्वामदेवस्य मन्वादित्वाभावाच्चैतन्यैक्यविवक्षयोक्तिरिति चेदित्यादिनोक्तत्वेन किमत्र साक्षादैक्यमुच्यते लक्षणया वेत्यादिविकल्पस्यासङ्गतत्वादिति भावः । न वा इत्यादिश्रुतावित्यादिशब्दोपात्तपार्ष्टिकवाक्यमुपपादयति ॥ भूरिति शिर इति ॥ एवमहंश्रुत्यादेः सावकाशत्वमुपपाद्य परोक्तलिङ्गानामपि सावकाशत्वमुपपादयति ॥ चक्षुरादीति ॥ बाह्यरूपेण वाय्वनन्तर्यामिरूपेण । प्राणसंवादादिलिङ्गानामन्तर्यामिणि विष्णौ मुख्यत्वे दुःखादेरन्तर्यामिणि मुख्यत्वं स्यादित्येतद्बाधकं परिहरति ॥ दुःखित्वादिकं त्विति ॥

तात्पर्यचन्द्रिका

सूत्रक्रमस्तु ॥ आद्ये स्वपक्षहेतूक्तिः । तस्य च ''तद्वैत्वं प्राण'' इत्यत्र यथा प्राणो विष्णुस्तथाऽत्रापि प्राणो विष्णुः । तत्श्रुतिलिङ्गानामस्मिन्प्रकरणे बहुस्थलेष्वनुगमादित्यर्थः । एवं च ''तद्वैत्वं प्राण इति श्रुताविवे''ति टीकायाः ''तथाशब्दस्समुच्चयार्थ'' इति टीकया सह न विरोधः । द्वितीये ''प्राणो वा अह'' मितीन्द्रप्रयुक्ताहंशब्दरूपबाधकोद्धारः । तत्राध्यात्मसम्बन्धभूमशब्दस्य यदा ''प्राणस्त्व''मित्यादिभाष्यानुसारेणाध्यात्मशब्दस्य देहार्थत्वस्वीकारेण भगवद्देहभूतेन्द्रविश्वामित्रादिबह्वात्मसम्बन्धोर्थः । अस्मिन्नित्यस्य चैतत्प्रकरण इत्यर्थः । तदेन्द्रे भगवतस्सत्त्वात्तदभिप्रायेण ''प्राणो वा अह''मित्युक्तिः । अन्यथाऽस्मिन्नेव प्रकरणे ''प्राणस्त्वं प्राणः सर्वाणि भूतानी''ति न स्यात् । पूर्वपक्षेपि विश्वामित्रादेः प्राणत्वाभावादिति परिहारार्थः । अत एव सूत्रे भूमपदम् । भाष्येपि प्राणस्त्वमित्युपादानम् । यदा तु ''अध्यात्मसम्बन्धशब्देनावेशो विष्णोरिन्द्रे विवक्षितः । अधिकात्मनः परमात्मनः सम्बन्धोध्यात्मसम्बन्ध'' इत्यैतरेयभाष्यानुसारेण भगवतः सन्निधानविशेषोऽध्यात्मसम्बन्धभूमशब्दार्थः । अस्मिन्नित्यस्य चेन्द्र

इत्यर्थः । तदेन्द्रे तात्कालिकभगवत्सन्निधानविशेषाभिप्रायेण ''प्राणो वा अह'' मित्युक्तिरित्यर्थः । एतच्चैतरेयभाष्योदाहृतात् ''आविष्टो विष्णुनाऽथेन्द्रः प्राणेन सहकौशिक''मित्यादिब्रह्माण्डवाक्यादवगन्तव्यम् । तृतीये तु तर्हि मयीति स्यादितीदं बाधकोद्धारे यद्बाधकं तदुद्धारः । तत्र च शास्त्रपदं ब्रह्मणः सर्वशास्तृत्वात्तत्तच्छब्दवाच्यता युक्तेति दर्शयितुम् । अत एव भाष्ये ''तत्तन्नाम्नोच्यते विष्णुः सर्वशास्तृत्वहेतुत'' इति स्मृतिरुदाहृता । चतुर्थे जीवादिलिङ्गं तदन्तर्यामिनिष्ठमित्यस्यार्थस्य तृतीयेनेन्द्रप्रयुक्ताहंशब्दस्यान्तर्यामिविषयत्वं वदतोक्तप्रायत्वात् तदनुक्त्वाऽन्तर्यामिकथनं कस्मादिति शङ्कायामन्तरादिभेदेनोपासात्रैविध्यादित्येवोक्तम् ।

प्रकाशिका – हेतूक्तिमेव विवृणोति ॥ तस्येति ॥ श्रुतीति ॥ ब्रह्मेमं पुरुषमित्यादिब्रह्मश्रुतिर्देवोपास्यत्वादीनि लिङ्गानि । अनुगमात् अनुवृत्तेः अभ्यासादिति यावत् ॥ न विरोध इति ॥ एकार्थत्वादिति भावः । न वक्तुरित्यत्र टीकायां परिहारद्वयस्योक्तत्वात्तन्मूलं वदन्परिहारद्वयं स्फुटयति ॥ तत्रेति ॥ ''प्राणस्त्वं प्राणस्सर्वाणि भूतानीति बह्वध्यात्मसम्बन्धोत्र विद्यत'' इति सूत्रभाष्यानुसारेणेत्यर्थः । बह्विति भूमशब्दार्थः ॥ तदेति ॥ विष्णोस्सर्वत्र सत्त्वेन प्राणस्त्वमित्यादिसम्भवादिति भावः । अन्यथा स्वमतविष्ण्वभिप्रायाभावे ॥ यदा त्विति ॥ ''अध्यात्मसम्बन्धशब्देनावेशो विष्णोरिन्द्रे विवक्षितः । भगवतोऽन्यत्रान्तर्यामिरूपेण सम्बन्धोऽस्त्येव । तस्मिन्निन्द्रे तु विशेषावेशस्तात्कालिकः । अधिकात्मनः परमात्मनः'' इत्यैतरेयभाष्यानुसारेणेत्यर्थः ॥ एतच्चेति ॥ तात्कालिकसन्निधानविशेषाभिप्रायेणोक्तमित्येतदित्यर्थः ।

आविष्टो विष्णुनाथेन्द्रो वायुना सह कौशिकम् । शंसेत्युक्त्वा निषण्णोऽभूदिदमन्नं तवेति सः ॥
ऋक्सहस्रं शशंसाथ यज्ञांगत्वेन भक्तितः । तत् श्रुत्वा तुष्टिमगमत्केशवो वायुसंयुतः ॥
द्वितीयवारं शंसेति प्राह तं च जनार्दनः । प्रीतये शक्रमाविष्टो विश्वामित्रश्शशंस तत् ॥
अतिप्रियत्वाद्भगवान् पुनरप्याह कौशिकम् । तृतीयं च शशंसाथ विष्णोरन्नं प्रकल्प्य तत् ॥
ततोऽतितुष्टो भगवान्ददामि वरमुत्तमम् । ऊचे स प्रथमे त्वेव निजसालोक्यमीश्वरः ॥
अदाद्वितीये सामीप्यं तृतीये पुनरेव च । वरं ददामीत्युक्त(स्स)स्सन्मुनिः प्राह जनार्दनम् ॥
सम्यक्त्वामेव जानीयामिति मोक्षसुखोच्चताम् । इच्छंस्तं प्राह भगवानिन्द्रस्थो वायुसंयुतः ॥
सर्वनामाहमस्म्येक इति ज्ञानं ममोत्तमम् । यस्मात्सर्वगुणत्वं स्यात्सर्वनामत्व एव तु ॥

इत्यादिनेत्यर्थः ॥ तृतीय इति ॥ शास्त्रदृष्टचेत्यत्रेत्यर्थः । यदि स्वगतविष्ण्वभिप्रायेण प्राणोहमित्युक्तिस्तर्हि रथे देव इतिवन्मयि प्राण इति स्यादिति यद्बाधकमित्यर्थः ।

(प्रकाशिका)

तदुद्धारप्रकारं सूत्रपदेन दर्शयति ॥ तत्रेति ॥ चतुर्थे जीवादिलिङ्गात्तत्प्राप्तिशङ्कायां सत्यां तल्लिङ्गस्यान्यथासिद्धिमनुक्त्वा प्रयोजनोक्तिरयुक्तेत्यत आह ॥ चतुर्थ इति ॥ उक्तप्रायत्वादिति ॥ ननु कथं तर्हि परिहारे कृतेपि पुनरत्र शङ्केति चेन्मैवम् । प्राणसंवादादिलिङ्गानामन्तर्यामिनिष्ठता न वक्तुं युक्ता । तस्य तदानीमौदासीन्यावगतेः । तथोक्तौ प्रयोजनाभावाच्चेति विशेषशङ्कोपपत्तेः । अत एव टीकायामुदासीनवदास्तामिति वचनमुदाहृतम् । परिहारस्तु बाह्यरूपाभिप्रायेण वचनं नेयम् । प्रयोजनाभावस्तु नास्ति । अन्तर्बहिस्सर्वगतत्वेन चोपासनात्रैविध्यार्थत्वात्तस्य चास्मिन्प्रकरणे ''स एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यते''त्यादिनाऽऽश्रितत्वाच्च तद्योगादित्यनुरोधेन त्रैविध्योपपत्तेश्चेत्यर्थः ।

पाण्डुरङ्गि –एवं चेति ॥ श्रुतिलिङ्गानुगमसाध्यविष्णुत्व एव दृष्टान्ततयोपादानादित्यर्थः। अन्यथा दृष्टान्तत्वसमुच्चययोर्विरुद्धनिश्चयसन्देहसापेक्षत्वेन विरोधाट्टीकाविरोधापत्तेरिति भावः ॥ अन्यथेति ॥ स्वात्मनः परमात्मदेहत्वाभिप्रायेणेन्द्रेण प्राणस्त्वं प्राण इत्युक्तमित्यस्यानङ्गीकार इत्यर्थः ॥ एतच्चेति ॥ वायुना सह देवेशस्तदा वासवमाविशदिति पूर्ववाक्ये वायुसहितस्य विष्णोः प्रवेशमुक्त्वा आविष्टो विष्णुनेत्यनेन वायुसहितपरमात्मावेशतः तस्येन्द्रस्य विश्वामित्रे प्रवेश उच्यत इति भावः । तत्राविष्ट इत्यत्राविश्यत इत्याविष्टः । कर्मणि क्तः ॥

तात्पर्यचन्द्रिका

अन्ये तु प्रतर्दनं प्रतीन्द्रेण प्रयुक्तं ''प्राणोस्मि प्रज्ञात्मे''ति वाक्यमुदाहृत्य ''मामेव विजानीही'' तीन्द्रलिङ्गात् ''इदं शरीरं परिगृह्योत्थापयती''ति वायुलिङ्गात् ''वक्तारं विद्या''दिति जीवलिङ्गाच्चेन्द्रादिरेव प्राण इति प्राप्ते ''यं त्वं मनुष्याय हिततम''मिति हिततमत्वादिब्रह्मलिङ्गाद्ब्रह्मैव प्राण इति सिद्धान्त इत्याहुः । तत्र न तावत्परमपुरुषार्थसाधनत्वं हिततमत्वम् । त्वन्मते ज्ञानादेवाज्ञाननिवृत्त्या ब्रह्मणि तस्याभावात् । परमपुरुषार्थत्वं हि ततमत्वं चेत्सर्वोपप्लवरहितं मोक्षदशानुगतं शुद्धचैतन्यं हिततमं वाच्यम् । तस्य हिततमत्वं च न विशिष्टं प्रति । तस्य मोक्षदशायामभावात् । नापि शुद्धं प्रति । तस्याखण्डत्वेनास्येदं हितमिति विभागायोगात् । किं च हितत्वं विना न हिततमत्वम् । न चाखण्डे हितत्वसामान्यं हिततमत्वविशेषश्च युक्तः । तस्मान्न हिततमत्वं ब्रह्मलिङ्गम् । नापि ''तं मामायुरमृतमित्युपास्स्वे''त्युक्तममृतत्वोपासनकर्मत्वं च ब्रह्मलिङ्गम् । अविद्यमान-

तदुपासनकर्मत्वस्येन्द्रादावपि सम्भवात् । नापि ''स यो मां वेद नस्तेयेन न भ्रूणहत्यये''त्युक्तः स्वज्ञानेन सर्वकर्मालेपो ब्रह्मलिङ्गम् । शुद्धे ''एष ह्येव साधुकर्म कारयति एष लोकाधिपति''रित्यादेरयोगात् । विशिष्टज्ञानेन च त्वन्मते सर्वकर्मालेपाभावात् । एवं लिङ्गान्तरं दूष्यम् । इदं चाधिकरणं जीवत्वनिषेधेन ब्रह्मत्वविधानात्तदभेदप्रतिकूलम् ॥

प्रकाशिका — अन्ये त्विति ॥ कौषीतकिब्राह्मणे तृतीयेध्याय इन्द्रप्रतर्दनाख्यायिकायां प्रतर्दनं प्रति ''इन्द्र उवाच मामेव विजानीही''त्युपक्रम्य श्रुतमिन्द्रवाक्यं ''प्राणोस्मिप्रज्ञात्मा तं मामायुरमृतमित्युपास्स्वे''ति । तत्र प्राणः किं वायुः किं वेन्द्र उत जीवोऽथ ब्रह्मेति संशये प्राणशब्दस्यान्यत्र प्रसिद्धेः प्राणो वायुरेवेति प्राप्ते ''यं त्वं मनुष्याय हिततमं मन्यसे यो मां वेद न स्तेयेन न भ्रूणहत्यया स एष प्राण एव प्रज्ञात्माऽऽनन्दोऽजरोऽमृत'' इति हिततमत्वनिखिलस्तेयभ्रूणहत्यादिपापालेपप्रज्ञात्मत्वानन्दत्वादेर्ब्रह्मण्येवानुगमात् वायौ च तदयोगाद्ब्रह्मैवायं प्राण इत्याद्येनोक्त्वा वक्तुरुपदेष्टुरिन्द्रस्य प्राणोस्मीति प्राणत्वेन स्वात्मोपदेशादिंद्र एव प्राणो न ब्रह्मेति पुनराक्षिप्य अस्मिन्प्रकरणे ''यावद्धचस्मिन् शरीरे प्राणो वसति तावदायु''रित्यायुरवधित्वस्य ''प्रज्ञानंदोजर'' इति प्रज्ञात्वादेश्चोक्त्याऽध्यात्मशब्दितप्रत्यगात्मसम्बन्धबाहुल्यसत्त्वात् तस्य च परागभूतेन्द्रेऽयोगात् ''मामेव विजानीहि प्राणोस्मी''ति स्वात्मोपदेशस्य च ''अहं ब्रह्मास्मी''त्यादिशास्त्राधीनदृष्ट्या ''अहं मनुरभव''मिति वामदेवस्य मनुत्वादिना स्वात्मोपदेशवदुपपत्तेः ब्रह्मैव प्राण इति द्वितीयतृतीयाभ्यामुक्त्वा चतुर्थेन सूत्रेण पुनः ''न वाचं विजिज्ञासीत वक्तारं विद्या''दिति वक्तृत्वरूपजीवलिङ्गात् ''अथ प्राण एव प्रज्ञात्मा इदं शरीरं परिगृह्योत्थापयती''ति प्राणलिङ्गात् हिततमत्वादिब्रह्मलिङ्गाच्च त्रयाणामप्युपास्यत्वं न तु ब्रह्मण एवेत्याक्षिप्य तथात्व उपासात्रैविध्यप्रसङ्गात् अन्यत्र प्राणस्य प्राणमित्यादौ वाक्यान्तरे ब्रह्मलिङ्गैः प्राणशब्दे ब्रह्मत्वस्याश्रितत्वात् इहापि हिततमत्वादिलिङ्गयोगात् ''मामेव विजानीही''त्युपक्रम्य ''प्राणोस्मि प्रज्ञात्मे''त्युक्त्वा अन्ते ''स एष प्राण एव प्रज्ञात्माऽऽनन्दोऽजरोऽमृत'' इत्युपसंहारेण ब्रह्मण्येकवाक्यत्वावगतौ तन्मध्यगतान्यलिङ्गानि ब्रह्मण्येव नेयानीति सिद्धान्त इत्याहुरित्यर्थः ।

॥ इतीन्द्रलिङ्गादित्यादि ॥ यथाश्रुतभाष्यानुरोधेनैवमुक्तिः । भामत्यां तु शरीरधारणरूपलिङ्गस्य वायुगतत्वेपि वायुव्यापारस्य परमात्मायत्तत्वात् वक्तृत्वस्य च वाक्करण-

(प्रकाशिका)

कव्यापारवत्त्वरूपस्य ''येन वागभ्युद्यत'' इति श्रुतेर्जीवरूपेणोपपत्तेरनेकब्रह्मलिङ्गानुरोधेनेन्द्रलिङ्गानामन्यथासिद्धेर्न पूर्वपक्षोदय इत्याक्षिप्य ''यो वै प्राणः स प्रज्ञायावाप्रज्ञासप्राणः सह ह्येतावस्मिञ्छरीरे वसतः सहोत्क्रामत'' इति यस्यैव प्राणस्य प्रज्ञात्मनोपास्यत्वमुक्तं तस्यैव प्राणस्य प्रज्ञात्मना सहोत्क्रमणकथनात् निर्भेदे ब्रह्मणि द्विवचनसहभावोत्क्रमणानामयोगाद्यथायोगं वाय्वादयस्त्रय एवात्रोपास्याः । वाक्यभेदस्य सह्यत्वादिति पूर्वपक्षयित्वा प्रागुक्तैकवाक्यतामाश्रित्य सिद्धान्तितम् । उक्तं च -

तस्मादनन्यथासिद्धब्रह्मलिङ्गानुसारतः ।
एकवाक्यबलात्प्राणजीवलिङ्गोपपादनम् ॥

इतीति ध्येयम् । सूत्रार्थान् क्रमेण दूषयिष्यन्नाद्यसूत्रोक्तसिद्धान्तहेतुं तावद्दूषयति ॥ तत्रेति ॥ यदुक्तं हिततमत्वलिङ्गमिति तत्किं भामत्याद्युक्तरीत्या पुमर्थहेतुत्वमुत पुरुषार्थरूपत्वमिति विकल्प्याद्येऽसिद्धं ब्रह्मणीत्याह ॥ न तावदिति ॥ अज्ञानोच्छेदस्यैव परमपुरुषार्थत्वात्तस्य च ज्ञानादेव सिद्धेः । उक्तं च ''परमपुरुषार्थस्यापवर्गस्य परमात्मज्ञानादन्यतोऽनवाप्ते''रिति । परंपरया तद्धेतुत्वस्य जीवेपि सम्भवात् । न च मुक्तिहेतुज्ञानविषयत्वं तत् । अशब्दार्थत्वात् । किं चात्र प्राणः किं विशिष्टं ब्रह्मेति सिद्धान्त्यते शुद्धमिति वा । आद्येऽसिद्धेः । द्वितीये ''एष ह्येव साधु कर्मे''त्युक्तपुण्यपापकर्तृत्वाद्ययोग इति भावः । द्वितीयं निरस्यति ॥ परमेति ॥ तत्किं विशिष्टस्य शुद्धस्य वा लिङ्गम् । नाद्यः । तस्याज्ञानाद्युपप्लववतस्तदयोगात् । द्वितीये विशिष्टं संसारिणं प्रति हि शुद्धं हिततममित्युच्यते मुक्तं शुद्धं प्रत्येव वा । आद्यं निरस्यति ॥ तस्येति ॥ द्वितीयं निराह ॥ नापीति ॥ अस्येति षष्ठ्यर्थस्य भेदघटितत्वात्कल्पितभेदस्यापि तदाऽभावादिति भावः ॥ अविद्यमानेति ॥ त्वन्मत उपासनाविषयस्यासत्त्वस्वीकारात् । तथाच न पूर्वपक्षनिरास इति भावः । सर्वकर्मालेपहेतुज्ञानविषयत्वं शुद्धस्याङ्गीकृत्य शुद्धं ब्रह्मैव प्रकरणे गीयत इत्युच्यते उत विशिष्टस्यैव तदुपेत्य तदेवात्रोच्यत इति विकल्प्याद्यं दूषयति ॥ शुद्ध इति ॥ शुद्धस्य निष्कलं निष्क्रियमित्यादिनौदासीन्यश्रवणादिति भावः । द्वितीयं निरस्यति ॥ विशिष्टेति ॥ एवमिति ॥ नापि ज्ञानात्मत्वम् । जीवेपि सम्भवात् । नाप्यजरत्वामृतत्वलोकपालत्वादीनि । इन्द्रादिदेवे तदुपपत्तेः । किं चैतानि प्रज्ञात्मत्वादीनि शुद्धे चेदेष ह्येव साधुकर्मेत्याद्ययोगः । विशिष्टे चेदसिद्धिरित्यादिरूपेण दूष्यमित्यर्थः । इदं परेषामनारभ्यमेवेत्याह ॥ इदं चेति ॥ तथाचाभेदवादिभिः कथमिदमारम्भणीयम् । स्वव्याहतत्वादिति भावः ।

पाण्डुरङ्गि – इन्द्रलिङ्गादिति ॥ इन्द्रस्य वचनरूपलिङ्गादित्यर्थः ॥ वायुलिङ्गादिति ॥ शरीरधारणरूपवायुलिङ्गादित्यर्थः ॥ जीवलिङ्गादिति ॥ वागादिभिः करणैः व्यापृतस्य कार्यकारणाध्यक्षस्य जीवस्य विज्ञेयत्वरूपलिङ्गादित्यर्थः । वक्तृत्वं च वाक्करणकव्यापारवत्त्वम् ॥ लिङ्गान्तरं दूष्यमिति ॥ स एष प्राण एष प्रज्ञात्माऽऽनन्दोऽजरोऽमृत इत्यादिलिङ्गान्तरमपि दूष्यमित्यर्थः ।

तात्पर्यचन्द्रिका

केचित्तु ''मामुपास्स्वे''तीन्द्रलिङ्गात् जीवलिङ्गानां च जीवविशेषेन्द्रे पर्यवसानात् प्राणलिङ्गे सत्यपि ''प्राणोस्मी''ति प्राणस्य जीवविशेषेन्द्रविशेषणत्वप्रतीतेर्जीव-वायुपक्षयोरनुत्थानादिन्द्रः प्राण इति प्राप्ते ''आनन्दोऽजरोमृत'' इत्यादिब्रह्मलिङ्गा-द्ब्रह्मैव प्राण इति सिद्धान्त इत्याहुः । तन्न । इन्द्र इत्येव पूर्वपक्षे सति सूत्रे ''जीवमु-ख्यप्राणलिङ्गा''दिति शङ्कायोगात् । तत्र जीवशब्दस्य तद्विशेषेन्द्रपरत्वे वक्तुरात्मो-पदेशस्यापीन्द्रलिङ्गस्यानेनैव सङ्ग्रहसम्भवात् ''न वक्तुरात्मोपदेशा''दिति पृथक्सौत्र-शङ्कायोगात् । अस्मदीयोदाहरणे तु जीवलिङ्गं शतायुष्त्वं नेन्द्रे युक्तम् । मनोवाक्प्राण इत्यादौ प्राणोपि नान्यविशेषणम् ।

प्रकाशिका — रामानुजमतमनूद्य पराचष्टे ॥ केचित्त्विति ॥ प्रतर्दनविद्यायां ''स होवाच प्राणोस्मि प्रज्ञात्मा मामायुरमृतमित्युपास्स्वे''त्युपासनाकर्मतयेन्द्रप्राणशब्दनिर्दिष्टः किं प्रसिद्ध इन्द्र उत परमात्मेति संशये ''मामेव विजानीही''ति ''प्राणोस्मि प्रज्ञात्मा मामायुरमृतमित्युपास्स्वे''तीन्द्रलिङ्गात् अस्य च ''इन्द्रस्त्रिशीर्षाणं त्वाष्ट्रमह''न्नित्युपक्रमे श्रुतत्वाष्ट्रवधादिभिः प्रसिद्धत्वात् ''आनन्दोऽजरोमृत'' इत्यानन्दादिलिङ्गानामुपक्रमा-वगतत्वाष्ट्रहननादिलिङ्गानुरोधेन नेयत्वादिन्द्र एव । यद्यपि ''वक्तारं विद्या''दिति जीवमात्रलिङ्गं ''इदं शरीरं परिगृह्योत्थापयती''ति पञ्चवृत्तिरूपमुख्यप्राणलिङ्गं चास्ति तथापि विशेषाकाङ्क्षायां जीवधर्मस्येन्द्रशब्दवाच्यप्रकृतजीवविशेषनिष्ठत्वप्रतीतेः प्राणोस्मीति सामानाधिकरण्येन प्राणस्य जीवविशेषेन्द्रविशेषणत्वप्रतीतेः प्राधान्येन प्रतिपाद्यत्व-शङ्कानुदयान्न तयोरिह प्राप्तिरिति प्राप्ते ''स एष प्रज्ञानन्दोजरोमृतं मनुष्याय हिततमं एष ह्येव साधु कर्म कारयति तद्यथा रथस्यारेषु नेमिरर्पिता नाभावरा अर्पिता एवमेवैता भूतमात्राः प्रज्ञामात्रास्वर्पिताः प्रज्ञामात्राः प्राणेऽर्पिताः एष लोकाधिपतिरेष सर्वेश्वर''

(प्रकाशिका)

इत्यादिनाऽऽनन्दाजरामृतत्वहिततमत्वसाध्वसाधुकर्मकारयितृत्वचेतनाचेतनात्मककृत्स्नव-स्त्वाधारत्वसर्वलोकाधिपतित्वादिपरमात्मधर्मबाहुल्यात् स्वावस्थितपरमात्मोपासनाभिप्रायेण मामुपास्स्वेत्युपदेशोपपत्तेरानन्दादिबहुतरगुणानुरोधेन त्वाष्ट्रवधादेर्वर्णनीयत्वादिन्द्रप्राणादि-निर्दिष्टो जीवादर्थान्तरभूतः परमात्मेति सिद्धान्त इत्याहुरित्यर्थः । उक्तं च-

विद्या प्रातर्दनी सा वदति हिततमोपास्तिकर्मेन्द्रमेव
ख्यातप्राणेन्द्रचिह्नान्वितमपि तदसौ विश्वकर्तेति चेन्न ।
ब्रह्म त्रेधा ह्युपास्यं बहुविधचिदचित्कंचुकं स्वात्मना च
प्राणेंद्रप्रक्रमोपि प्रबलतरमहावाक्यवैघट्यभग्नः ॥

इत्यादि । यद्यपि भाष्ये प्राणशब्दनिर्दिष्टो जीव एवोत परमात्मेत्येव संशयो दर्शितः । न त्विन्द्र एवेति । तथापि ''प्रसिद्धजीवभाव इन्द्र एवे''ति पूर्वपक्षान्ते कथनात् श्रुतप्रकाशे तथैव व्याख्यातत्वाच्चेन्द्रः प्राण इति प्राप्त इत्युक्तमिति ध्येयम् । सूत्रानानुगुण्येन पूर्वपक्षं निरस्यति ॥ तन्नेति ॥ ननु जीवशब्दस्य जीवविशेषेन्द्रपरत्वमुच्यत इति चेत्तथापि मुख्यप्राणपदायोगात् । तस्य त्वन्मते जडत्वेन तद्विशेषेन्द्रपरत्वायोगात् । सामान्यशब्दस्य विशेषपरत्वे लक्षणापत्तेश्च । दोषान्तरमाह ॥ तत्रेति ॥ ''मामुपास्स्वेति वक्तुरिन्द्रस्य स्वात्मन एवोपदेशा''दिति त्वया व्याख्यातत्वाज्जीवलिङ्गपदेन वक्तृत्वादेर्ग्रहणमिवा-त्मोपदेशोऽपि ग्रहीतुं शक्यत इति तत्सूत्रं व्यर्थमित्यर्थः । उपलक्षणमेतत् । प्राणस्येन्द्र-विशेषणत्वेनाप्राधान्ये धर्मिनिर्देशाय सूत्रे प्राणस्तथेति प्राणपदप्रयोगो न स्यात् । किं त्विन्द्रस्तथानुगमादित्येव स्यात् ।

यदत्रोक्तं श्रुतप्रकाशे प्राणशब्दस्य परमात्मलिङ्गप्रतिपादकवाक्यस्थत्वेन सिद्धान्त-हेतुद्योतकत्वात्सूत्रे प्राणपदेन धर्मी निर्दिष्ट इति तन्न । सिद्धान्तहेतोस्तथानुगमादित्यादिनैव स्फुटं प्रतिभासात् पूर्वपक्षहेतोः केनाप्यप्रतीतेस्तत्सूचनार्थत्वात्प्राधान्याच्चेन्द्र इत्येव निर्देष्टव्यत्वात् । अत एव तद्भाष्ये ''इन्द्रशब्दस्य जीवविशेष एव प्रसिद्धे''रिति पूर्वपक्षहेतुर्बहिरेवोक्त इति ध्येयम् । ननूक्तरीत्या जीवमुख्यप्राणकोटिकपूर्वपक्षासम्भवादगत्या सर्वसमाधेयमेतत् । अन्यथाऽयं दोषो भवतामपि सम इत्याशंक्य स्यादयं दोषोऽद्वैतिनामि-दमेवोदाहृत्य त्रितयपरत्वेन पूर्वपक्षयताम् । न त्वस्माकं प्रागुक्तदोषास्पृष्टोदाहरणान्तरं कुर्वतामित्याह ॥ अस्मदीयेति ॥ नेन्द्र इति ॥ तस्यामरत्वेन बहुकालस्थायिनश्श-

तायुष्ट्वायोगात् । त्वन्मते वक्तृत्वादिजीवलिङ्गस्य तद्विशेषेन्द्रनिष्ठत्वे तत्र पर्यवसानमिव नास्मन्मते जीवलिङ्गमिन्द्रे पर्यवसाययितुं शक्यत इति स्वातन्त्र्येण जीवकोटिकपूर्वपक्षो युक्तः। प्राणोपि नान्यविशेषणतया प्रतीयत इति तत्कोटिकपूर्वपक्षोपि युक्त इति सर्वमनवद्यमिति भावः ।

पाण्डुरङ्गी — नन्वेवं भवत्पक्षेपि जीवलिङ्गानां तद्विशेषेन्द्रपरत्वेन प्राणोऽस्मीति प्राणस्य जीवविशेषेन्द्रविशेषणत्वप्रतीतेः प्राणलिङ्गस्यापि तत्परत्वेनेन्द्र एव प्राण इत्येक एव पूर्वपक्षो वाच्यः । तथाच जीवप्राणलिङ्गायोगादिति शङ्कायोगः तत्र जीवशब्दस्य तद्विशेष-परत्वे च वक्तुरात्मोपदेशेपि इन्द्रलिङ्गस्यानेनैव सङ्ग्रहसम्भवात् वक्तुरात्मोपदेशादिति पृथक् सौत्रशङ्कायोगादिति दोषतादवस्थ्यमेवेत्यत आह ॥ अस्मदीयोदाहरणे त्विति ॥

तात्पर्यचन्द्रिका

यत्तु परकीयं ''न वक्तु''रिति सूत्रव्याख्यानं वक्तुरुपदेष्टुरिन्द्रस्य प्राणोऽस्मी-त्यात्मोपदेशान्नेति चेन्न । अस्मिन्प्रकरणे ''यावद्ध्यस्मिन् शरीरे प्राणो वसति तावदायु''रित्यायुरवधित्वस्य ''वक्तारं विद्या''दिति वक्तृत्वप्रज्ञात्मत्वादेश्चोक्तेः प्रत्यगात्मसम्बन्धबाहुल्यमस्ति । तच्च पराचीनेन्द्रे न युक्तमिति । तन्न । उपदेशादि-त्यनेनैवोपदेष्टृत्वरूपवक्तृत्वलाभेन वक्तुरित्यस्य वैयर्थ्यात् । स्वात्मोपदेशादित्यस्य तु वक्तृपदप्रयोगेऽप्यलाभात् । अस्मत्पक्षे च बृहतीसहस्रवक्तारं प्रतीन्द्रस्य विप्रलम्भो न युक्त इति सूचनाय तस्य सार्थक्यात् । इन्द्रेऽपि स्वशरीरावस्थानवक्तृत्वप्रज्ञात्मत्वादेः सम्भवादायुरवधित्ववक्तृत्वयोश्च वायुजीवयोरेव सम्भवेन सदा सर्वगत इन्द्रिया-दिरहिते च ब्रह्मण्यसम्भवेन च ब्रह्मपक्षप्रतिकूलत्वात् । किं चास्माकं मत इव वक्तुरात्मोपदेशस्य गतिमनुक्त्वा प्रकरणस्य ब्रह्मपरत्वोक्तिरयुक्ता । उक्तं चानुगमादि-त्यनेन प्रकरणस्य ब्रह्मपरत्वम् । केचित्तु परमात्मासाधारणधर्मोध्यात्मशब्दार्थः । तत्सम्बन्धबहुत्वमध्यात्मसम्बन्धभूमेत्याहुः । तन्न । उक्तदोषत्वात् । सम्बन्ध-पदवैयर्थ्याच्च । अन्यथा ''अन्तस्तद्धर्मे''त्यादावपि सम्बन्धपदप्रसङ्गात् । अस्मिन्निति सप्तम्यैव सम्बन्धोक्तेश्च । किं चेह भूमपदप्रयोगाद्धिततमत्वादिवदानन्दाजरत्वादीनां सर्वेषां ब्रह्मधर्माणामत्रैव विवक्षासम्भवेनानुगमादिति व्यर्थम् ।

प्रकाशिका – एवं मतद्वयेऽधिकरणशरीरमाद्यसूत्रार्थं च निरस्याधुना पूर्वमताभिमतं द्वितीयसूत्रार्थमनूद्य निरस्यति ॥ यत्त्विति ॥ प्राग्विवृतानि सूत्राण्यस्माभिः । पराचीने संसारित्वेन पराग्भूते । नन्वात्मोपदेशादित्यनेन स्वोपदेशालाभात्तदर्थं वक्तुरित्येतदित्यत आह ॥ स्वात्मेति ॥ भवतामप्ययं दोष इत्यत आह ॥ अस्मदिति ॥ न त्वन्मत इव मन्मते वक्तुरित्यनेनेन्द्रो गृह्यते । किन्तु विश्वामित्रः । तथापि तद्व्यर्थमिति चेन्न । पूर्वपक्षदाढ्यर्थत्वादिति भावः । सिद्धान्तांशार्थं निरस्यति ॥ इन्द्र इति ॥ न केवलमन्यथासिद्धत्वं हेतूनामसिद्धिश्चेत्याह ॥ आयुरिति ॥ वाय्विति ॥ वायुमुख्यप्राणशब्दितपञ्चवृत्तिरूपवाय्वित्यर्थः । सर्वगतत्वान्नावधित्वं करणशून्यत्वान्न वक्तृत्वमित्यर्थः ॥ गतिमनुक्त्वेति ॥ ब्रह्मपरत्वे स्वात्मोपदेशरूपबाधके शङ्किते मन्मत इवान्तर्याम्यादिविवक्षया तदुक्तिरिति गत्युक्त्या बाधकमपरिहृत्य प्रकरणस्य ब्रह्मपरत्वोक्तिरयुक्तेत्यर्थः । अयं च दोषस्तवापि तुल्य इति शङ्कानिरासाय वा गत्युक्तिपरत्वमस्य युज्यत इत्यवगत्यैवमाश्रितमित्याशङ्कानिरासाय वोक्तमस्मन्मत इवेति । नन्वेवं बाधके शङ्किते स्वपक्षहेतुं प्रथममनुक्त्वा शास्त्रदृष्टत्वेत्यनेन तत्परिहारः क्रियते । अतो न दोष इत्यत आह ॥ उक्तं चेति ॥ तथा चैहैव बाधकपरिहारः कर्तव्य इति भावः । एतेनास्यापि स्वपक्षहेतुपरत्व आद्यस्य वैयर्थ्यमित्युक्तं भवति । न च तत्र हिततमत्वाजरत्वादिकमेव विवक्षितं इह पुनरायुरवधित्वादिकमतो न दोष इति वाच्यम् । निरसिष्यमाणत्वादिति भावः ।

॥ केचित्त्विति ॥ ''मामेव विजानीहि मामुपास्स्वे''त्यादि वक्तुस्त्वाष्ट्रवधादिना प्रज्ञातजीवभावस्येन्द्रस्योपास्यत्वेनात्मन एवोपदेशादिप्रक्रमस्य जीवविषयत्वे आनन्दोजर इत्याद्युपसंहारस्तदनुगुण एव नेय इति चेत् अस्मिन्प्रकरणे हिततमत्वसाध्वसाधुकर्मकारयितृत्वादीनामध्यात्मशब्दितानां परमात्मासाधारणधर्माणां सम्बन्धबाहुल्यमस्तीत्यर्थ इत्याहुरित्यर्थः ॥ उक्तेति ॥ उक्तं बाधकमपरिहृत्य ब्रह्मधर्मबाहुल्योक्तिरयुक्ता । न च स्वपक्षहेतुं पूर्वमुक्त्वा पश्चाद्बाधकं शास्त्रसूत्रेण निरसिष्यते । उक्तं च श्रुतप्रकाशे ''पूर्वं परमात्मपरत्वसाधकहेतुरुक्तः । पूर्वपक्षयुक्तेः कः परिहार इत्यतश्शास्त्रसूत्रमिती''ति वाच्यम् । अनुगमादित्यनेनैव स्वपक्षहेतोरुक्तत्वात् । अत्र विशेषस्तु किं चेहेत्यत्र निरसिष्यत इति प्रागुक्तदोषग्रस्तत्वादित्यर्थः ॥ सम्बन्धेति ॥ अध्यात्मभूमेत्यनेनैव पूर्णत्वादिति भावः । नन्वसिद्धिपरिहाराय सम्बन्धपदमित्यत आह ॥ अस्मिन्निति ॥ आधाराधेयभावस्य सप्तम्यर्थत्वादिति भावः । स्वपक्षहेतुपरत्वे दोषान्तरमाह ॥ किञ्चेति ॥ भूमपदप्रयोगादिति ॥

एतेन यदत्रोक्तं श्रुतप्रकाशे ''आद्यं सूत्रं स एष प्राण एव प्रज्ञात्मानंदोजर इत्यादि-वाक्यमात्रविषयं व्याख्यानम् । न तु परैरिव वाक्यान्तरस्थहेतवोप्यत्र विवक्षितत्वेनोक्ताः । अध्यात्मसम्बन्धभूमेति द्वितीयसूत्र एव बहुवाक्यस्थहेतुबाहुल्यस्य विवक्षितत्वावगमा'' दित्यादिना नाद्वैतिमत इवास्माकं पौनरुक्त्यमिति तन्निरस्तम् । अत्रैव बाहुल्यवाचिभूमशब्देन सर्वस्य विवक्षितुं शक्यत्वादिति ॥ आनन्देति ॥ आद्यसूत्रोक्तानामपीत्यर्थः । एतेन प्राणशब्दचिह्नितवाक्यगतहेतोरेव वर्णनीयत्वादित्यपि प्रत्युक्तम् । तेनास्य वैयर्थ्याभावेप्यनेन बहुविषयेण तस्य वैयर्थ्यकथनात् ।

पाण्डुरङ्गि – नन्वेवं भवत्पक्षेप्युपदेशादित्यनेनैवोपदेष्टृत्वरूपवक्तृत्वलाभाद्वक्तुरित्यस्य वैयर्थ्यं स्यादित्यतः स्यादेवं यद्यस्माभिर्वक्तुरिन्द्रस्येति व्याख्यायते नैवमित्याह ॥ अस्मत्पक्षे चेति ॥ सदा सर्वगत इति ॥ अत्र ब्रह्मणि सदा सर्वगतत्वादायुरवधित्वस्यासम्भवः । इन्द्रियरहितत्वाद्वक्तृत्वस्यासम्भव इति सम्बन्धो बोध्यः ॥ उक्तदोषत्वादिति ॥ किं चास्मन्मत इव वक्तुरात्मोपदेशस्य गतिमनुक्त्वा प्रकरणस्य ब्रह्मपरत्वोक्तिरयुक्तेत्युक्त-दोषादित्यर्थः ।

तात्पर्यचन्द्रिका

यच्च शास्त्रदृष्टचेत्यस्य परकीयं व्याख्यानं इन्द्रः स्वात्मानं यथा शास्त्रमार्गेण ज्ञानेनाहं ब्रह्मेति पश्यन्मामेव जानीहीत्युपदिदेश वामदेववदिति । तन्न । चिदचित्संवलनात्मकाहंशब्दार्थे ब्रह्मत्वस्य मन्वादित्वस्य वाऽभावेन ''मामेव जानीहि अहं मनु''रित्यादिव्यपदेशहेतोरहंब्रह्मेत्यादिदृष्टेर्भ्रान्तिदृष्टित्वेन शास्त्रदृष्टि-त्वाभावात् । चिन्मात्रैक्यदृष्टेश्च भिन्नविषयत्वेन मां विजानीहीत्यादिव्यपदेशाहेतु-त्वात्। मामित्यादौ चिन्मात्रलक्षणायां च ''मां विजानीहि यो मां वेदे''ति वित्तिकर्मत्वोक्तिरयुक्ता । किंच शास्त्रशब्दस्य हिताहितशास्तरि वेदादौ योगसम्भवान्न रूढिः । उक्तं च -

भवेतां यदि वृक्षस्य वाजिकर्णौ कथञ्चन ।
अदृष्टां समुदायस्य कः शक्तिं जातु कल्पयेत् ॥

इति । शास्तृत्वं च ''एकः शास्ता न द्वितीयोस्ति शास्ते''त्यादि- श्रुत्या ब्रह्मण्येव मुख्यम् । मुख्यसम्भवे चामुख्यमयुक्तम् । दर्शितश्च भाष्यकृता

(तात्पर्यचन्द्रिका)

''संविच्छास्त्रं परं पद''मिति ब्रह्मणि शास्त्रपदप्रयोगः । लोकप्रसिद्धिस्तु शास्त्रशब्दस्य वेदादन्यत्रैव । अपि च सकारणकदृष्टिद्वारा व्यपदेशविषयोक्तितोप्यस्मद्रीत्या साक्षादेव तदुक्तिर्युक्ता । सौत्रो वामदेवदृष्टान्तोऽपि परपक्षे न युक्तः । ''अहं मनु''रित्यादि-नोक्तं ह्यैक्यं चिन्मात्रविवक्षया वक्तव्यम् । न च तद्विवक्षायां ''अहं भूमिमद-दामार्यायाहं दृष्टिं दाशुषे मर्त्यायै''त्यादि-विशिष्टविषयमुत्तरवाक्यं युज्यते । भगवद्धर्मो हीन्द्राय भूमिप्रदानादिकम् ।

केचित्तु ''यस्यात्मा शरीर''मित्यादि शास्त्रेण या दृष्टिः जीवो ब्रह्मशरीरं शरीरवाची च शब्दो देवमनुष्यादिशब्दवच्छरीरिपर्यन्त इत्येवंरूपा सा शास्त्रदृष्टि-रित्याहुः । तन्न । उक्तदोषत्वात् । भगवत्यहंशब्दप्रयोगे शरीरशब्दः शरीरिपर्यन्त इति लोकदृष्टेरपि हेतुत्वेन शास्त्रपदप्रयोगे विशेषहेत्वभावाच्च । यत्तु ''जीवमुख्यप्राणे''ति सूत्रस्य परकीयं व्याख्यानं तत्तल्लिङ्गानुग्रहार्थं किंचिदत्र जीववाक्यं किंचिन्मुख्य-प्राणवाक्यं किञ्चिद्ब्रह्मवाक्यम् । तथाच त्रयोप्युपास्या इति चेन्न । उपासात्रैविध्य-प्रसङ्गात् । अन्यत्र ''प्राणस्य प्राण''मित्यादि वाक्यान्तरे ब्रह्मलिङ्गैः प्राणशब्दे ब्रह्मपरताया आश्रितत्वादिहापि हिततमत्वादिब्रह्मलिङ्गयोगादिति । तन्न । ''अपीतौ तद्वत्प्रसङ्गात्'' इत्यादिवत्प्रसङ्गपदाभावात् । ''मामेव विजानीही''तीन्द्रलिङ्गस्यापि सत्त्वेन चातुर्विध्यादिति वक्तव्यत्वाच्च । पूर्ववादिनं प्रतीष्टापत्तेश्च । ननूपक्रमोप-संहारैकरूप्यादेकवाक्यताऽवगता । अत एव भामत्यां भाष्यमुल्लंघ्य त्रिविधोपा-सनापरत्वेन वाक्यभेदेन पूर्वपक्षं प्रापय्य तदेकवाक्यताप्रतीतेर्ब्रह्ममात्रपरत्वमिति सिद्धान्तितमिति चेदुच्यते ।

बुद्ध्यादिपरमत्रैव सा प्रज्ञेत्यादिकं यथा ।
मामुपास्स्वेत्यादिवाक्यं तथाऽस्त्विन्द्रादिगोचरम् ॥ १ ॥

अत्रैव ब्रह्मपरवाक्यसमुदाये यथा ''यो वै प्राणः सा प्रज्ञा या प्रज्ञा स प्राणः सह ह्येतावस्मिञ्शरीरे वसतः सहोत्क्रमतः'' इत्येकदेशो ज्ञानक्रियाशक्त्या-श्रयबुद्धिप्राणपरः सिद्धान्तेऽपि प्रज्ञाप्राणशब्दयोरुत्क्रमणादिलिङ्गैर्बुद्धिवायुपरत्वात् तथा पूर्वपक्षेऽपीन्द्रादि-लिङ्गस्वारस्यार्थं तत्तद्वाक्यमिन्द्रादि परमस्तु । आश्रितत्वादित्यत्र च प्रकृतत्रैविध्यस्यैवान्वयसम्भवे ब्रह्मपरताया इत्यध्याहारो न युक्तः । तद्योगादिति च

(तात्पर्यचन्द्रिका)

सर्वनाम्नः सन्निकृष्टत्रैविध्यपरत्वसम्भवे विप्रकृष्टब्रह्मलिङ्गपरत्वमयुक्तम् । तद्योगादित्य-स्यानुगमादित्यनेन पुनरुक्तिश्च ।

प्रकाशिका – अद्वैतिमते तृतीयसूत्रार्थमनूद्य निरस्यति ॥ यच्चेति ॥ दृष्टान्ते दार्ष्टान्तिके च ब्रह्माद्यैकात्म्यज्ञानं तादृशव्यपदेशहेतुरित्यर्थः । किमत्र दार्ष्टान्तिक इन्द्रे दृष्टान्ते वामदेवे चाहमर्थे विशिष्ट एव प्राणशब्दितब्रह्मत्वस्य मन्वादित्वस्य च ज्ञानं मामेव विजानीहीत्यादि-व्यपदेशहेतुरुच्यते उत लक्षितस्य चिन्मात्रस्य चिन्मात्रेणैक्यज्ञानं तस्य हेतुरिति विकल्प्याद्यं निरस्यति ॥ चिदचिदिति ॥ द्वितीयं निरस्यति ॥ चिन्मात्रेति ॥ चिन्मात्रं विजानीहि चिन्मात्रं मन्वादीत्येव स्यात् । न तु मामिति । अहमिति च । न हि चैत्रं विजानीहीति वक्तव्ये मामिति व्यपदेशो युज्यत इत्यर्थः । ननु मामित्यस्याहमित्यस्य च चिन्मात्रमर्थ इत्यत आह ॥ मामित्यादाविति ॥ तस्योदासीनस्य सकलकारकशक्तिविधुरस्य कर्मत्वायोगात् । ननूल्लेखित्वमात्रेण मामित्युक्तिर्न तु कर्मत्वमिति चेत्कर्मणि द्वितीयेति कर्मत्वार्थकद्वितीयाश्रवणादिति भावः । लक्षणापत्तेश्चेत्यपि ध्येयम् । सिद्धान्ते च स्वप्रयुक्तास्मच्छब्दस्य स्वान्तर्यामिण्येव मुख्यत्वोक्तेर्न कोऽपि दोष इति भावः । नन्वथापि भवन्मते शास्त्रशब्दस्यान्तर्यामिणि यौगिकत्वाद्वेदादिशास्त्रे रूढत्वात् रूढेश्च योगापेक्षया मुख्यत्वस्य रथकारनये स्थितत्वाच्छास्त्रशब्दो मुख्यामुख्यन्यायेन वेदादिपरो नांतर्यामिपर इत्याशङ्क्याह ॥ किञ्चेति ॥ ''संध्यामुपासीत न सुरां पिबे''दित्यादिना हितमिदं कर्तव्यमहितमिदं न कर्तव्यमिति शासकत्वाच्छास्त्रमिति ''शासु अनुशिष्टा''वित्यतःष्ट्रन्प्रत्यये शास्त्रमिति योगेनैवोपपत्तेर्न रूढिरित्यर्थः ।

नन्वेवं रूढिमात्रपरिलोपः । सर्वत्र योगेनैवोपपत्तेरित्यतो यत्र योगाभावस्तत्रैव रूढिरिति भावेन तत्र वार्तिकसंमतिमाह ॥ उक्तं चेति ॥ नामधेयपादे प्रोक्षण्यधिकरणे उक्तमित्यर्थः । तदधिकरणं जन्मादिसूत्रे प्रपञ्चितम् । अश्वकर्ण इति शब्दवाच्ये कस्मिंश्चिद्वृक्षविशेषे यदि वाजिकर्णसदृशौ कर्णौ भवेतां तर्ह्यश्वकर्णपदस्य सत्स्ववयवार्थेषु तत एवोपपन्नत्वेन कल्पकाभावात्समुदायशक्तिं रूढिं कः कल्पयेत् । न कोपि । ततस्तत्रावयवार्थाभावादेव रूढिरङ्गीकृता । अत्रावयवार्थोऽस्तीत्यर्थः । नन्वस्तूभयत्र योगस्तथाप्यंतर्यामिग्रहणे को हेतुरिति चेदुक्तानुपपत्तिगणादेवेति ब्रूमः । हेत्वन्तरं चात्राह ॥ शास्तृत्वं चेति ॥ प्रवृत्तिहेतुपौष्कल्यस्य ब्रह्मण्येव भावादिति भावः । वैदिकप्रयोगबाहुल्यरूपरूढिश्चास्तीत्याह

(प्रकाशिका)

॥ दर्शितश्चेति ॥ रूढिश्च तत्र नास्तीत्याह ॥ लोकेति ॥ यद्वा योगार्थानुसन्धान-शून्यानाम(भावे)पि लौकिकानां शास्त्रपदेन वेदप्रतीते रूढिरेवेत्यत आह ॥ लोकेति ॥ शास्त्रपदेनान्तर्यामिग्रहणे हेत्वन्तरमाह ॥ अपि चेति ॥ मां विजानीहीति व्यपदेशविषयत्व-मिन्द्रस्याहं ब्रह्मास्मीत्यादिशास्त्रजन्यब्रह्मात्मैक्यज्ञानद्वारेति व्यवधानेन त्वयोच्यते । अस्मा-भिस्तु साक्षादेवान्तर्यामिदृष्ट्या प्राणोस्मीति व्यपदेशविषयत्वमुच्यते । अतोप्यस्मदभिमत एवार्थ इत्यर्थः । ननु दृष्टान्तबलादेवमाश्रीयत इति चेन्न । विशिष्टाभेदायोगेन दूषितत्वात् । चिन्मात्रलक्षणाया अप्युक्तदोषत्वात् । दोषान्तरेणापि दूषयति ॥ सौत्र इति ॥ कथं तर्ह्यंतर्यामिपक्षे योग इत्यत आह ॥ भगवदिति ॥ उपेन्द्ररूपेण बलेस्साम्राज्यमादायेन्द्राय दत्तमिति भागवतादिप्रसिद्धिं हिशब्देन द्योतयति ।

॥ केचित्त्विति ॥ प्रज्ञातजीवभावेनेन्द्रेण मामेव विजानीहि मामुपास्स्वेत्युपास्यस्य ब्रह्मण एव स्वात्मत्वोपदेशोऽयं न प्रमाणान्तरप्राप्तस्वात्मावलोकनकृतः । किन्तु ''य आत्मनि तिष्ठन्य आत्मनोंऽतरोयमयतियमात्मा न वेद यस्यात्मा शरीर''मित्यादिशास्त्रेण जीवब्रह्मणोश्शरीरशरीरिभावप्रतिपादनात् शरीरवाचिशब्दानां शरीरिपर्यन्तत्वस्य ''अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणी''त्यादिशास्त्रेण लब्धत्वात् तेन शास्त्रेण लोकतश्च जनितया दृष्ट्या ब्रह्मणो जीवशरीरत्वं शरीरवाचिशब्दानां शरीरिपर्यन्तत्वपर्यवसानं च जानतो वामदेवस्य ''अहं मनुरभव''मित्यादौ स्ववाच्यहंशब्देन स्वशरीरकपरब्रह्मोपदेश-वदिन्द्रस्यापि मामुपास्स्वेत्यादिना स्वशरीरकपरमात्मदृष्टिकृत इत्यर्थ इत्याहुरित्यर्थः ॥ उक्तेति ॥ शास्त्रशब्दस्य ब्रह्मण्येव मुख्यतया मुख्यसम्भवेऽमुख्यवेदग्रहणायोगात् । अस्मद्रीत्या साक्षादेवोपदेशविषयोक्तिसम्भवे शास्त्रकारणकदृष्टिद्वारोपदेशविषयोक्तेरयुक्त-त्वादित्युक्तदोषग्रस्तत्वादित्यर्थः । शास्त्रपदं चाधिकमित्याह ॥ भगवतीति ॥ लोके ब्राह्मण-मानयेदित्यादौ शरीरिपर्यन्तत्वप्रतीतेरिति भावः ॥ यत्त्विति ॥ विवृतमेतत्प्राक् ॥ त्रैविध्यप्रसङ्गादिति ॥ ब्रह्ममात्रग्रहणे तु नैवमिति भावः । कथं तर्हि प्राणशब्दो ब्रह्मणीत्यतः प्रवृत्तमाश्रितत्वादिति । तस्यार्थमाह ॥ अन्यत्रेति ॥ चातुर्विध्यादिति ॥ नन्विन्द्रलिङ्गं शास्त्रदृष्टयेत्यनेनैव परिहृतं न पुनरत्र शङ्कार्हमिति चेत्तर्हि जीवमुख्यप्राण- लिङ्गानामपि ब्रह्मैक्याङ्गीकारेणापि समाधातुं शक्यत्वेन साम्यात् । तथोपास्यत्वेन पुनश्शङ्केत्यस्यापि साम्यादिति भावः ॥ इष्टापत्तेरिति ॥ तेनैव त्रिविधोपासनाया अङ्गीकृतत्वादिति भावः । ननु नायं दोषः । उपासात्रैविध्यस्य पूर्वपक्षयुक्तित्वेन सिद्धान्ते तत्प्रसङ्गस्यानापाद्यत्वात् ।

किन्तु मामेव विजानीहीत्युपक्रम्य प्राणोस्मि प्रज्ञात्मेत्युक्त्वा स एष प्राण इत्युपसंहारेण ब्रह्मण्यवगतेनैकवाक्यत्वेनेति वाचस्पतिमतमाशङ्क्य निरस्यति ॥ नन्विति ॥ विवृतं चैतत्प्रागस्माभिः । एकवाक्यत्वावगमेपि न पूर्वपक्षोपमर्दस्सम्भवतीति भावेनाह ॥ उच्यत इति ॥ पूर्वार्धं व्याचष्टे ॥ अत्रैवेति ॥ एकदेशः किंचिद्वाक्यम् । ज्ञानशक्त्याश्रयबुद्धेः क्रियाशक्त्याश्रयप्राणस्य च प्रतिपादकं यथेत्यर्थः । तत्राविगानमाह ॥ सिद्धान्तेपीति ॥ उत्तरार्धं व्याख्याति ॥ तथेति ॥ सूत्रखण्डार्थेप्यनुपपत्तिमाह ॥ आश्रितत्वादिति ॥ उपलक्षणं चैतत् । अन्यत्रेत्यस्याप्यध्याहार इत्यपि ध्येयम् ॥ विप्रकृष्टेति ॥ अनुगमादित्यनेनोक्तेत्यर्थः ॥ पुनरुक्तिरिति ॥ हिततमत्वादिलिङ्गपर्यालोचनया ब्रह्मत्वावगमादिति व्याख्यातत्वादिति भावः ।

पाण्डुरङ्गि – वित्तिकर्मत्वोक्तिरयुक्तेति ॥ अन्यथा वित्तिकर्मत्वरूपदृश्यत्वेन शुद्धस्यापि मिथ्यात्वं स्यादिति भावः । ननु शास्त्रपदे रूढिरेवास्त्वित्यतः किं विद्वद्रूढिर्वा पामररूढिर्वा । नाद्य इत्याह ॥ न रूढिरिति ॥ ननु योगेन शास्त्रशब्दवाच्यत्वं वेदस्य कुतोऽभ्युपेयते । रूढिरेव किं न स्यादित्यतो योगासम्भवे रूढिरभ्युपेया । न तु तत्सम्भवे । अन्यथा तवापसिद्धान्तः स्यादित्यभिप्रायेण तद्वाक्यमुदाहरति ॥ उक्तं चेति ॥ तथाच तत्र वाजिकर्णशब्दस्य वृक्षे योगासम्भवेन रूढिकल्पनेपि प्रकृते योगसम्भवेन रूढिकल्पनायोगादिति भावः । अस्तु वा शास्त्रशब्दस्य वेदेपि योग एव । तथापि शास्त्रशब्देन वेद एव गृह्यत इत्यतः तत्र प्रयोजकीभूतस्य योगस्य ब्रह्मणि मुख्यत्वात्तदेव ग्राह्यमित्यभिप्रेत्य तत्र मुख्यत्वे किं ज्ञापकमित्यत आह ॥ शास्तृत्वं चेति ॥ शास्त्रशब्दप्रवृत्तिनिमित्तं शास्तृत्वं ब्रह्मणि मुख्यम् । तथापि तदेव किमर्थं ग्राह्यम् । अमुख्यस्यापि वेदस्य शास्त्रशब्देन ग्रहणोपपत्तेरित्यत आह ॥ मुख्यसम्भवे चेति ॥ एवं महायोगेन शास्त्रशब्दस्य विष्णुपरत्वमुपपाद्य तन्मूलकविद्वद्रूढ्यापि समर्थयते ॥ दर्शितश्चेति ॥ द्वितीयं दूषयति ॥ लोकेति ॥ सकारणकेति ॥ शास्त्ररूपकारणजन्या ब्रह्मैक्यदृष्टिः । तद्विषयीभूतं ब्रह्माहंशब्दव्यपदेशविषय इति परंपरयेत्यर्थः । अस्मन्मते साक्षादेवाहंशब्दविषयीभूतस्यांतर्यामिणः प्रदर्शनमित्यर्थः ॥ उक्तदोषत्वादिति ॥ शास्त्रशब्दस्य हिताहितशास्तरि वेदादौ रूढ्यभावे योगस्यैव वक्तव्यत्वात् योगस्य चैकः शास्ता न द्वितीय इत्यादिभाष्योदाहृतप्रमाणानुसारेण परमात्मनि मुख्यत्वेन मुख्यसम्भवे चामुख्यग्रहणायोगाच्छास्त्रशब्देन वेदग्रहणमयुक्तम् । किञ्च सकारणदृष्टिद्वारा व्यपदेशविषयोक्तितोऽप्यस्मद्रीत्या साक्षादेव तदुक्तिर्युक्तेत्युक्तदूषणस्यात्राप्यपरिहार्यत्वादित्यर्थः ।

तात्पर्यचन्द्रिका

इतरे तु प्राणधर्मेण बुद्धिधर्मेण स्वधर्मेण च ब्रह्मोपासायास्त्रैविध्याद् ब्रह्मवाक्येपि जीवमुख्यप्राणलिङ्गं न विरुद्धमिति व्याचक्षते । तन्न । अन्यधर्मेणान्योपासने ब्रह्मधर्मादिना जीवोपासायाः त्रैविध्याज्जीववाक्येपि ब्रह्मलिङ्गं न विरुद्धमिति वैपरीत्यप्रसङ्गात् । केचित्तु चिद्विशिष्टत्वेनाचिद्विशिष्टत्वेन स्वरूपेण चेत्युपासायास्त्रैविध्यम् । न च वाक्यभेदः । ''तं मामायुरमृतमित्युपास्स्वे''त्येकस्मिन्नेव वाक्ये मामिति जीवविशिष्टाया आयुरिति प्राणविशिष्टाया अमृतमिति स्वेन रूपेण चोपासनाया विधानादित्याहुः । तन्न । ''तान्वरिष्ठःप्राण उवाच य एवायं मुख्यप्राणः अपहतपाप्मा ह्येष'' इत्यादिश्रुत्या मुख्यप्राणस्य चेतनत्वात्तल्लिङ्गनिर्वाहायाचिद्विशिष्टोपासनोक्त्ययोगात् ।

॥ टीकाक्षरार्थस्तु ॥ ननु ''एतद्धस्मवै तद्विद्वानाह हिरण्यदन्वैद'' इति हिरण्यदन्वैदवन्महिदासोपि ऋषित्वेनोच्यतामित्यत आह ॥ न हि महिदासोपि मुनित (यैवो)योच्यते । वैयर्थ्यादिति ॥ अस्या उपनिषद ऐतरेयसंज्ञयैवेतरापुत्रस्य महिदासस्य ऋषित्वसिद्धया तदुक्तिनैष्फल्यादित्यर्थः । यद्वा ऋषिमात्रत्वे महिदासस्य ''इतः प्रदानाह्येत इतः सम्भृता'' इत्यादिना देवतापदप्रदातृत्वं तत्पोषकत्वमित्यादीनामुपास्यब्रह्मधर्माणामुक्तेर्नैष्फल्यादित्यर्थः । यद्वा महिदासस्य मुनित्वेनाप्युक्तिरिष्टा । मुनित्वेनैवोक्तिर्न तु ब्रह्मतयेति तु न युक्तम् । ''इतःप्रदानाह्येत इतः सम्भृता'' इत्यादीनां ब्रह्मधर्मवाचिनां विरुद्धार्थत्वादित्यर्थः ॥

अत्र चाद्या पञ्चाधिकरणी समन्वयविशेषाप्रतिपादकत्वादध्यायपादबहिर्भूता तदुपोद्घातत्वेनैका पेटिका । तत्राप्याद्यं शास्त्रमात्रोपोद्घातरूपम् । इतरा चतुरधिकरणी तु शास्त्रान्तर्गताप्यध्यायोपोद्घातरूपा । आनन्दमयमारभ्यापादपरिसमाप्ति समन्वयपरत्वेनैका महापेटिका । तत्राप्यानन्दमयांतरधिकरणे बहुविषयपूर्वपक्षयुक्तत्वेन । अन्तरादिचतुरधिकरणी तु साक्षादानन्दमयाक्षेपकपूर्वपक्षयुक्तत्वेन । तत्राप्याकाशादित्रयमन्तरधिकरणन्यायातिदेशकत्वेन भूते प्रसिद्धनामविषयकत्वेन चैकावान्तरपेटिकेत्याद्यूह्यम् ।

(तात्पर्यचन्द्रिका)

शब्दास्सामान्याधिदैवाधिभूताध्यात्मगोचराः ।
ससूक्ता अधिवेदस्थाः सलिङ्गाश्चात्र चिन्तिताः ॥ १ ॥

अस्मिंश्च पादे आनन्दमय इत्यत्र सामान्यशब्दाः अन्तरित्यत्राधिदैवगताः । आकाश इत्यत्राधिभूतगताः । अत एव प्राण इत्यत्राध्यात्मगताः । ज्योतिरित्यत्र सूक्तसहिताः । छन्द इत्यत्राधिवेदगताः । प्राणस्तथेत्यत्र लिङ्गसहिताः शब्दा विचारिता इति ॥ इत्यन्तिमप्राणाधिकरणम् ॥ १२ ॥

इति श्रीमद्ब्रह्मण्यतीर्थपूज्यपादानां शिष्येण व्यासयतिना विरचितायां
श्रीमद्भाष्यटीकाविवृतौ तात्पर्यचन्द्रिकायां प्रथमाध्यायस्य प्रथमः पादः ॥

प्रकाशिका – एवं भाष्याभिमतं निरस्येदानीं यत्प्राचां वृत्तिकृतां मतमथवेत्यादिना परभाष्य एवोपन्यस्तं तदनूद्य निरस्यति ॥ इतरे त्विति ॥ ''शरीरं परिगृह्योत्थापयती''ति प्राणधर्मेण ''प्रज्ञया वाचं समारुह्य वाचा सर्वाणि नामान्याप्नोती''ति प्रज्ञाशब्दितबुद्धि-धर्मेण। क्रियाज्ञानशक्तिद्वयाश्रयणप्राणबुद्धिरूपोपाधिधर्मेणेति यावत् । ''प्राण एव प्रज्ञात्माऽजर'' इत्यादि ब्रह्मधर्मेण चैकस्यैव ब्रह्मण उपासनात्रैविध्यात् अन्यत्र ''मनोमयः प्राणशरीरो भारूप'' इत्यादावुपाधिधर्मेण ब्रह्मण उपासनाया आश्रितत्वादिहापि तद्योगा-दिति यथाश्रुतमेव । न तु प्रसङ्गशब्दाध्याहार इत्यर्थः । पूर्वं प्राणस्यैकमुपासनमपरं जीवस्यापरं ब्रह्मण इत्युपासनात्रैविध्येन वाक्यभेदप्रसङ्गो दूषणमुक्तं पूर्वपक्षिणं प्रति । इह तु ब्रह्मण एकस्यैवोपासनात्रयविशिष्टस्य विधानान्न वाक्यभेद इति भावः । यद्यपीदं मतं भामत्यामेव वाक्यभेदप्रसङ्गेन दूषितं तथापि प्रबलदोषकथनायैवमुपन्यासः ॥ जीवेति ॥ बुद्ध्यवच्छिन्नस्यैव जीवत्वादिति भावः ॥ केचित्त्विति ॥ प्रसङ्गशब्दानध्याहारेण भोक्तृजीवशरीरकरूपचिद्विशिष्टत्वानुसन्धानाय भोग्यभोगकरणभूतप्राणशरीरकत्वरूपाचिद्वि-शिष्टत्वानुसन्धानाय स्वरूपेण चिदचिल्लक्षणद्वारमन्तरेण गुणविशिष्टानुसन्धानाय चेति त्रिविधोपासनाय जीवादिलिङ्गानामत्रोपदेशात् एवं त्रिविधानुसन्धानस्य ''सत्यं ज्ञानमनन्तं ब्रह्म विज्ञानं चे''त्यादिषु प्रकरणान्तरेष्वप्याश्रितत्वादिहापि त्रिविधानुसन्धानस्य युक्तत्वादि-त्यर्थ इत्याहुरित्यर्थः । श्रुतप्रकाशोक्तं समाधानमाह ॥ तं मामिति ॥ यत्र जीवविशेषाणा-

षाणां परमात्मासाधारणधर्मयोगः तत्र चिदचिद्विशेषांतरात्मत्वानुसन्धानं येषितमिति भावः । अत्र शरीरं परिगृह्योत्थापयतीति प्राणलिङ्गनिर्वाहायाचि-

द्विशिष्टत्वेनानुसन्धानं यदुक्तं तदयुक्तम् । प्राणस्य चेतनत्वात् । तथाच द्वैविध्यमेवोपासनस्य । न त्रैविध्यमिति भावेन दूषयति ॥ तन्नेति ॥ अपहतेति ॥ न ह्यचेतनस्य पापप्रसक्तिरस्तीति भावः । उपलक्षणमेतत् । आश्रितत्वादित्यस्ये- हेत्यनेनान्वयोपपत्तावन्यत्रेत्यध्याहारायोग इत्याद्यपि ध्येयम् ।

एतेन यत्केनचित्प्रलपितं ''प्राणोस्मि प्रज्ञात्मा तं मामायुरमृतमित्युपास्स्वे'' त्यत्रेन्द्रवाक्य उपासनाकर्मत्वेनेन्द्रशब्दनिर्दिष्टः किमिन्द्र उत शिव इति सन्देहे वृष्टिद्वारा सकलरक्षकत्वरूपप्राणत्वस्य ''इन्द्रो राजा जगतो य ईश'' इति श्रुत्या परमैश्वर्येण सर्वोपास्यत्वस्य च सम्भवात् जीवलिङ्गानां च जीवविशेषेन्द्र एव पर्यवसानात् प्राणलिङ्गे सत्यपि प्राणस्येन्द्रविशेषणत्वप्रतीतेर्जीववायुपक्षयोरनुत्थानादिन्द्र एवेति प्राप्ते अजरामृतत्वादिलिङ्गानामनुगमादुपसंहारेऽवगमाच्छिव एवेति सिद्धान्त इति । उक्तं च-

प्राणोस्मीत्युक्त इन्द्रस्सहि जगदखिलं प्राणयत्यंबुवर्षै-
रिन्द्रो राजेत्यनेकश्रुतिमितमहिमा स्यादुपास्यश्च मुक्त्यै ।
मैवं क्षुण्णःससृज्यस्तमजरममृतं शक्नुमो नैव वक्तुं
तस्मात्तं मामुपास्वेत्यखिलपरिवृढे युज्यतां शास्त्रदृष्ट्या ॥

इति । तन्निरस्तम् । इन्द्र इत्येव पूर्वपक्षे सति सूत्रे जीवमुख्यप्राणलिङ्गादिति शङ्कायोगात् । तत्र जीवादिशब्दस्य तद्विशेषेन्द्रपरत्वे च वक्तुरात्मोपदेशस्यापीन्द्रलिङ्गस्यानेनैव सङ्ग्रहसम्भवेन न वक्तुरिति पृथक् शङ्कायोगात् । प्राणस्येन्द्रविशेषणत्वेनाप्राधान्ये सूत्रे धर्मिनिर्देशाय प्राणपदप्रयोगायोगाच्च । प्राणत्वस्य विष्णावेव प्राणाधिकरणे साधितत्वाच्च। अमृतत्वादेः ''त्रिपादस्यामृतं दिवी''त्यादौ विष्णुधर्मत्वस्योक्तत्वात् । शिवस्यापि ''रुद्रस्य शिर उत्पिपेषे''त्यादेरमृतत्वाद्ययोगाच्च । यदपि न वक्तुरित्यादीनां रामानुजरीत्यार्थकथनं तदपि तदूषणेनैव निरस्तम् । तच्चोक्तं शिवार्कमणिदीपिकायां ऐतरेये ''प्राणो वा अहमस्म्यृष'' इत्यत्र ''प्राणस्त्वं प्राणस्सर्वाणि भूतानी''त्यादिना सार्वात्म्यस्य ब्रह्मलिङ्गस्य सत्त्वेन प्राणस्य ब्रह्मत्वं निश्चितमिति तत्र न सन्देहः । प्राणोस्मि प्रज्ञात्मेत्यत्र तु त्वष्टृवधादीन्द्रलिङ्गाच्छरीरं परिगृह्येत्यादिप्राणलिङ्गाच्च वैषम्यमिति । मूर्खप्रलपितमेतत् । तत्रेवात्रापि भूयसां ब्रह्मलिङ्गानां सत्त्वात् । तत्र ब्रह्मत्वस्यात्रत्यन्यायं विनान्येनासिद्धेः । इन्द्रादिलिङ्गानां निरवकाशानां भूयसां दर्शितत्वाच्च । तस्यैवोदाहरणे सूत्रोक्तत्रयकोटिकपूर्वपक्षसम्भवेन सूत्रस्य सामंजस्यस्योक्तत्वाच्च । संशयबीजस्य टीकायामेवोक्तत्वाच्चेति ।

(प्रकाशिका)

अधिकरणान्ते टीकायां ''न हि महिदासो मुनितयैवोच्यते । वैयर्थ्यादेवे''त्येतद्वाक्ये वैयर्थ्यादित्ययुक्तम् । ऋषिज्ञानार्थत्वादित्यतोऽवतार्यार्थमाह ॥ नन्विति ॥ ऋषित्वेति ॥ ऋषिज्ञानस्यान्यथासिद्धेरित्यर्थः । वैयर्थ्यादित्यत्र प्रतियोगिनमध्याहृत्यार्थान्तरमाह ॥ यद्वेति ॥ इतः प्रदानं येषां त इति पददातृत्वं सम्भृता इति पोषकत्वमिति ध्येयम् । उपास्यानां ब्रह्मधर्माणामित्यर्थः । विशब्दस्य विरुद्धार्थत्वं मत्वाऽन्यथा योजयति ॥ यद्वेति ॥ शिष्टं सुगममिति भावः । एतत्पादीयद्वादशाधिकरणानां प्रमेयस्य सुज्ञानाय पेटिकासङ्गतिमाह ॥ अत्रेति ॥ समन्वयसूत्रे सामान्यतः प्रतिपादनाद्विशेषेत्युक्तम् । समन्वयाप्रतिपादने किमर्थमत्र निवेश इत्यत उक्तमुपोद्घातत्वेनेति । एतच्चेक्षत्यधिकरणे स्पष्टम् ॥ तत्राप्याद्यमिति ॥ यथा चैतत्तथोक्तं जिज्ञासाधिकरणे ॥ युक्तत्वेनेति ॥ एकाऽवान्तरपेटिकेत्यन्वयः । आदिपदेन छन्दःप्राणाधिकरणयोर्बहु- श्रुतिलिङ्गविषयत्वेन वा ज्योतिःप्राणद्वाराऽऽनन्दमयाक्षेपकत्वेन वा अन्यत्रप्रसिद्धश्रुतिलिङ्गोत्कीर्तनस्य प्रयोजनोक्तिपरत्वेन वा एका पेटिका । एवमुत्तरपादेष्वपि ध्येयमिति भावः । सप्तानामप्यधिकरणानां विषयोपाधीन् सङ्गृह्य विशदयति ॥ शब्दा इति ॥ गुणिसामान्यवाचका इत्यर्थः ॥ लिङ्गेति ॥ पूर्वपक्षप्रापकानेकलिङ्गसहिता इत्यर्थः ॥ शब्दा इति ॥ नामात्मका विष्णौ समन्विता इत्यर्थः ॥ छ ॥ अन्तिमप्राणाधिकरणं सम्पूर्णम् ॥

इति श्रीमत्सर्वतन्त्रस्वतन्त्रसुधीन्द्रतीर्थगुरुपादशिष्यराघवेन्द्रयतिकृते
चन्द्रिकाप्रकाशिकायां प्रथमाध्यायस्य प्रथमः पादः ॥ १ ॥

पाण्डुरङ्गि – वचनक्रियायामन्ययोगव्यवच्छेदकैवकारस्वारस्यार्थमाह ॥ यद्वेति ॥ यद्वाऽस्मिन्नपि टीकास्थस्य मुनितयैवोच्यत इत्यत्रैवकारस्य वैयर्थ्यं भवतीत्यत एवकारसूचितं पक्षान्तरमाह ॥ यद्वेति ॥ अन्तिमप्राणाधिकरणं सम्पूर्णम् ॥ १२ ॥

इति श्रीविद्याधीशपूज्यपादशिष्येण केशवभट्टारकेण विरचितायां
चन्द्रिकावाक्यविवृतौ भावदीपिकायां प्रथमाध्यायस्य प्रथमःपादः ॥ १ ॥

★★★